आचार्यशर्ववर्मप्रणीतं

# कातन्त्रव्याकरणम्

**द्वितीयो भागः**

प्रथमखण्डम्

## व्याख्याचतुष्टयोपेतम्

कुलपतेः डॉ. मण्डनमिश्रस्य प्रस्तावनया समलङ्कृतम्


सम्पादकः

डॉ. जानकीप्रसादद्विवेदी



सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

वाराणसी

SARASVATĪBHAVANA-GRANTHAMĀLĀ
[ Vol. 135 ]

# KĀTANTRAVYĀKARAṆA

OF

## ĀCĀRYA ŚARVAVARMĀ

[ PART - TWO ]
( VOLUME - 1 )

*With four Commentaries*

'VṚTTI' & 'ṬĪKĀ'
By
ŚRĪ DURGA SINGH
'KĀTANTRAVṚTTIPAÑJIKĀ'
By
ŚRĪ TRILOCANADĀSA
'KALĀPACANDRA'
By
KAVIRĀJA SUSENAŚARMĀ
'SAMĪKṢĀ'
By Editor

*FOREWORD BY*
**DR. MANDAN MISHRA**
VICE-CHANCELLOR

*EDITED BY*
**DR. JĀNAKĪPRASĀDA DWIVEDĪ**
Reader, Sanskrit Department
Central Institute of Higher Tibetan Studies
(Deemed University)
Sarnath, Varanasi

VARANASI
1998

*Research Publication Supervisor —*
**Director, Research Institute**
Sampurnanand Sanskrit University
Varanasi.

❑

*Published by —*
**Dr. Harish Chandra Mani Tripathi**
**Director, Publication Department**
Sampurnanand Sanskrit University
Varanasi-221 002

❑

*Available at —*
**Sales Department,**
Sampurnanand Sanskrit University
Varanasi-221 002

❑

**First Edition,** 500 Copies
**Price :** Rs. 500.00

❑

*Printed by —*
**Anand Printing Press**
C. 27/170-A, Jagatganj,
Varanasi-221 002

सरस्वतीभवन-ग्रन्थमाला

[ १३५ ]

आचार्यशर्ववर्मप्रणीतं

# कातन्त्रव्याकरणम्

(द्वितीयो भागः)

[प्रथमखण्डम्]

श्रीदुर्गसिंहकृताभ्यां कातन्त्रवृत्ति-टीकाभ्यां

श्रीमत्त्रिलोचनदासकृतया 'कातन्त्रवृत्तिपञ्जिका'-टीकया

कविराजसुषेणशर्मकृतया 'कलापचन्द्र'-टीकया

सम्पादकीयसमीक्षया

कुलपतेः डॉ० मण्डनमिश्रस्य प्रस्तावनया च समलङ्कृतम्


*सम्पादकः*

**डॉ० जानकीप्रसादद्विवेदः**

उपाचार्यः, संस्कृतविभागे

केन्द्रीय-उच्चतिब्बतीशिक्षा-संस्थानम्

सारनाथः, वाराणसी



वाराणस्याम्

२०५५ तमे वैक्रमाब्दे १९२० तमे शकाब्दे १९९८ तमे खैस्ताब्दे

*अनुसन्धानप्रकाशनपर्यवेक्षकः –*
**निदेशकः, अनुसन्धानसंस्थानस्य**
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी।

❑

*प्रकाशकः –*
**डॉ० हरिश्चन्द्रमणित्रिपाठी**
**निदेशकः, प्रकाशनविभागस्य**
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी - २२१ ००२.

❑

*प्राप्तिस्थानम् –*
**विक्रय-विभागः,**
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी - २२१ ००२.

❑

**प्रथमं संस्करणम्,** ५०० प्रतिरूपाणि
**मूल्यम् –** ५००.०० रूप्यकाणि

❑

*मुद्रकः –*
**आनन्द प्रिंटिंग प्रेस**
सी० २७/१७०-ए, जगतगंज
वाराणसी - २२१ ००२

# प्रस्तावना

अपवर्गस्य द्वारं वाङ्मलानां चिकित्सितं च व्याकरणं शब्दानुशासनानुरागिणे कस्मै सचेतसे न रोचेत। तत्र माहेन्द्रीं परम्परामधिकृत्य प्रवर्तिते **'मोदकं देहि'** इति वचनाश्रिते कातन्त्रव्याकरणे मूलभूतानि सन्ति त्रीणि प्रकरणानि। 'मा + उदकम्' इति पदच्छेदेनोपलक्षितं प्रथमं सन्धिप्रकरणम्, 'मोदकम्' इति स्याद्यन्तपदेन संकेतितं द्वितीयं नामचतुष्टयप्रकरणम्, 'देहि' इति क्रियापदेनोद्दिष्टं तृतीयमाख्यातप्रकरणं चेति। तत्र सार्धचतुष्टयशतपृष्ठात्मकः सन्धिप्रकरणात्मकः प्रथमो भागः १९९७ तमे यीशवीये वर्षे विश्वविद्यालयेनानेन प्रकाशितः, यस्य लोकार्पणं २९.३.९८ तमे दिनाङ्के उत्तरप्रदेशीयोच्चशिक्षामन्त्रिणा माननीयश्रीनरेन्द्रकुमारसिंहगौर-महोदयेनानुष्ठितम्। भागस्यास्य विस्तरेण समीक्षा **'प्राकृतविद्या'**-पत्रिकायां (व० १० अं० १, पृ० ८८-९०) डॉ० सुदीपजैनमहोदयेन समाचरिता। सः सम्पादकस्याद्भुतं कार्यमिदमितिहासनिर्माणकरं मनुते। तत्र परमं प्रमोदास्पदमेतद् यत् **'श्रीकुन्दकुन्द-भारतीट्रस्ट'** - नाम्नी दिल्लीस्था जैनसंस्था संस्कृतभाषासाहित्ययोर्महनीयमवदानं तत्रापि च कातन्त्रव्याकरणस्य सम्पादनसमीक्षासंवलितं विशिष्टं कार्यं परिलक्ष्य सम्पादकाय डॉ० द्विवेदाय **आचार्य – उमास्वामिपुरस्कार**मुद्घोषितवती।

प्रकाशनसौविध्यधिया नामचतुष्टयात्मके द्वितीये भागे खण्डद्वयं परिकल्पितम्। तत्र प्रथमे खण्डेऽस्मिन् नामचतुष्टयप्रकरणस्य प्राथमिकं पादत्रितयमेव सङ्गृहीतम्। अवशिष्टं चतुर्थं कारकप्रकरणं पञ्चमं समासप्रकरणं षष्ठं तद्धितप्रकरणं च द्वितीये खण्डे समावेशार्हमस्ति। अत्र प्रथमे खण्डे २०६ सूत्राणां **दुर्गसिंहीयवृत्तेः, दुर्गटीकायाः**, त्रिलोचनदासकृताया **विवरणपञ्जिकायाः**, सुषेणविद्याभूषणकृतस्य **कलापचन्द्रस्य** च सम्पादनं सन्निहितमस्ति। व्याख्याचतुष्टयस्यास्येह तदेव स्थानमवगन्तव्यं यत् पाणिनीयव्याकरणे भाष्य – काशिका – न्यास – पदमञ्जर्याख्यव्याख्यानानामुपकल्प्यते। सम्पादकस्य श्रीद्विवेदस्य प्रतिसूत्रं हिन्दीभाषायाम् **अर्थनिर्देशः समीक्षा च** व्याकरणस्या-स्यार्थतत्त्वाधिगमाय सौविध्यातिशयं वितरति। समीक्षायां प्रायेण पक्षत्रितयं प्रदर्शितम् – १. पाणिनीयसूत्रैः सह तुलनात्मकाध्ययनेनोत्कर्षापकर्षविवेचनम्, २. व्याख्याचतुष्टयव्याकरणान्तरीयविशिष्टविचारप्रवर्तनम्, ३. शब्दसाधुत्वप्रक्रियाप्रदर्शनं चेति। गोपथब्राह्मण–बृहद्देवता – ऋक्तन्त्र– अग्निपुराण – जैनेन्द्रव्याकरणादिभ्योऽपि समाहृता सामग्री शोधकार्यनिरतानां जिज्ञासुजनानां च महते उपकाराय प्रकल्पेत।

**'क्षिप्रं प्रबोधार्थमनेकार्थं कलापकम्'** (व्याख्यानप्रक्रिया १।१५-१६) इति आचार्यशशिदेवस्य समुद्घोषः कलापापरपर्यायस्य कातन्त्रस्य नूनं सरलतां संक्षिप्ततां चावबोधयति। एतेनैवानन्यसुलभेन वैशिष्ट्येन व्याकरणमिदं कश्मीर-राजस्थान-वङ्गादिप्रदेशेषु नेपाल-भूटान-तिब्बत-मङ्गोलिया-श्रीलङ्कादिदेशेषु चाध्ययनाध्यापनादौ पर्याप्तं प्रतिष्ठितं बभूव। अस्य मुद्रिता सामग्री नागराक्षरेषु प्रायेण नगण्यैवास्ते, ततोऽधिका वङ्गाक्षरेषूपलभ्यते, परं शताधिकवर्षपूर्वं मुद्रितत्वात् सा जीर्णप्रायैव काठिन्येन प्राप्यते। विपुला सामग्री व्याकरणस्यास्य वङ्ग-शारदा-उत्कल-भोटप्रभृतिलिपिषु निबद्धा तत्र तत्र सुरक्षिताऽवलोक्यते। सम्पादकेन डॉ० द्विवेदेन प्रायेण सर्व एवैते हस्तलेखाः समयेऽधीता आसन्, यथास्थानमंशतस्तेषामुपयोगोऽपि कृतः। तिब्बतदेशे कदाचिदस्यैव प्राधान्येनाध्ययनादिकं प्रवृत्तमासीदिति द्वादशग्रन्थानां भोटभाषानुवादेन भोटभाषायां त्रयोविंशतिव्याख्याप्रणयनेन चावगन्तुं शक्यते। श्रीतेनजिनग्यात्सोनाम्ना प्रसिद्धेन **चतुर्दशदलाईलामा**महाभागेनेदं कलापव्याकरणमधीतमासीदिति तेनैव स्वयमुक्तं २१.१२.९८ तमे दिनाङ्के सारनाथस्थे तिब्बतीसंस्थाने प्रवर्तितव्याख्यानप्रसङ्गे।

अत्र वङ्गाक्षरेषु शताधिकवर्षपूर्वं मुद्रितान् ग्रन्थानधिकृत्य सम्पादनकार्यं प्रवृत्तमस्ति। अस्मिन् सम्पादनकार्ये विविधग्रन्थानां सन्दर्भसम्पूरणेन सौष्ठवं किमपि संवर्धितम्। कातन्त्रपरिशिष्ट-विशिष्टशब्द-व्युत्पादितशब्दादीनां परिशिष्टैः शोधकार्यसौविध्यमारचितम्। एतेन मन्ये, शास्त्रान्तरेषु निरतैर्लोकयात्रादिषु स्थितैश्चापि जनैरल्पीयसा कालेन सुखेन च कातन्त्रव्याकरणज्ञानं कर्तुं शक्यते। महनीयस्यास्य कार्यस्य महता श्रमेण मनोयोगेन च सम्पादनकर्मणि समर्पितं **डॉ० जानकीप्रसाद-द्विवेद**महं सम्प्रीतः सन् विविधैराशीर्वचोभिरभ्युदयेन योजये। इदमाशास्यते आशंस्यते चापि यत् सङ्कल्पितस्य समग्रस्यैव कार्यस्य सम्पादनं प्रकाशनं चाशु सम्पद्येतेति। अन्ते च ग्रन्थस्यास्य सौष्ठवपूर्वकप्रकाशनार्थं विश्वविद्यालयस्यास्य प्रकाशननिदेशकाय **डॉ० हरिश्चन्द्रमणित्रिपाठि**महोदयाय, तत्सहायकाय **डॉ० हरिवंशकुमारपाण्डेयाय**, प्रकाशनविभागीयान्यसहयोगिभ्यः, मुद्रकाय 'आनन्द-प्रिंटिंग-प्रेस'-यन्त्रालय-सञ्चालकाय **श्रीदिवाकरत्रिपाठिने** च धन्यवादान् समर्पयन् ग्रन्थमिमं पाठकेभ्यः समुपहरामि।

**वाराणस्याम्**
मार्गशीर्षपूर्णिमायाम्,
वि० सं० २०५५

**मण्डनमिश्रः**
कुलपतिः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

॥श्रीः॥

# भूमिका

सन्धिप्रकरणे वर्णकार्यं दर्शितम्। साम्प्रतं वर्णसमुदायरूपस्याद्यन्तपदकार्य-निरूपणमिष्यते। तदर्थं कातन्त्रे नामचतुष्टयप्रकरणं प्रारब्धम्, तत्र सन्ति षट् पादाः। प्राथमिके पादत्रितये षड्लिङ्गविषयो विवेचितः, तस्यैव किञ्चिद् वैशिष्ट्यमिह द्वितीय-भागस्य प्रथमखण्डात्मके ग्रन्थे वक्ष्यते। नामचतुष्टयस्य चतुर्थपादे कारकम्, पञ्चमे समासः, षष्ठे च पादे तद्धितः संगृहीतः। एतत्पादत्रितयस्य समावेशो द्वितीयभागस्य द्वितीयखण्डात्मके ग्रन्थे सुनिश्चितः इति वेदितव्यम्।

नामचतुष्टयाध्याये प्रायेण त्रिविधं विधानमवलोक्यते – किञ्चित् पाणिनीय-व्याकरणेन प्रायेण साम्यं भजते, किञ्चित् सर्वथा नवीनमेव वर्तते यत् पाणिनीये नावेक्ष्यते, किञ्चिच्चैतादृशमस्ति यत् पाणिनीये भिन्नरूपमालक्ष्यते। तद् यथा

**नवीना योजना** –

१. नित्यस्त्रीलिङ्गवाचिनाम् आकारान्तशब्दानां श्रद्धासंज्ञा – **"आ श्रद्धा"** (२।१।१०)। श्रद्धासंज्ञकेभ्यः शब्देभ्यः परस्य सिप्रत्ययस्य लोपे सति 'श्रद्धा - माला' प्रभृतीनि शब्दरूपाणि निष्पद्यन्ते – **"श्रद्धायाः सिर्लोपम्"** (२।१।३७) इति। पाणिनीये संज्ञेयं नैव समादृता।

२. लिङ्गस्य धातोर्वा अन्त्यव्यञ्जनात् पूर्ववर्तिनो नकारस्यानुषङ्गसंज्ञा – **"व्यञ्जनान्नोऽनुषङ्गः"** (२।१।१२) इति। 'विद्वन्स् - स्रन्स्' प्रभृतिशब्देभ्योऽनुषङ्ग-संज्ञकस्य नकारस्य **"अनुषङ्गश्चाक्रुञ्चेत्"** (२।२।३९) इत्यनेन लोपे कृते सति 'विदुषः, स्रस्यते' इत्यादिरूपाणि साधूनि भवन्ति। पाणिनिना नेयं संज्ञा विहिता, परं पूर्वाचार्यकृतत्वादेषा महाभाष्यदीपिकाकारेण न्यासकारेण च स्मर्यते – **"पूर्वाचार्यसंज्ञेयं नकारस्य"** (म० भा० दी०, पृ० १३४)। **"नकारस्योपधाया अनुषङ्ग इति पूर्वाचार्यैः संज्ञा कृता"** (न्या० १।१।४७) इति।

३. श्रद्धासंज्ञकेभ्यः शब्देभ्यः परवर्तिनां 'ङे - ङसि - ङस् - ङि' इत्येतेषां प्रत्ययानां स्थाने क्रमेण 'यै - यास् - यास् - याम्' इत्येते आदेशाः **"ङवन्ति यै - यास् - यास् - याम्"** (२।१।४२) इति। एतेन 'श्रद्धायै - श्रद्धायाः - श्रद्धायाः - श्रद्धायाम्। मालायै - मालायाः - मालायाः - मालायाम्' प्रभृतीनि शब्दरूपाणि सारल्येन निष्पद्यन्ते। पाणिनीये याडागम - वृद्धि - सवर्णदीर्घैरेतानि साध्यन्ते।

४. श्रद्धासंज्ञकेभ्यः सर्वनामशब्देभ्यः समागतानां ङवतां प्रत्ययानां यथासंख्यं 'यै - यास् - यास् - याम्' इत्येते आदेशा ह्रस्वपूर्वाः सुना सह भवन्ति – **"सर्वनाम्नस्तु ससवो ह्रस्वपूर्वाश्च"** (२।१।४३)। तेन – 'सर्वस्यै - सर्वस्याः - सर्वस्याः - सर्वस्याम्' इत्यादयः शब्दा लाघवेन सिध्यन्ति। पाणिनिना स्याडागम - वृद्धि - सवर्णदीर्घैरेते संसाधिताः।

५. नदीसंज्ञकेभ्यः शब्देभ्यः परवर्तिनां ङवतां प्रत्ययानां स्थाने यथासंख्यम् 'ऐ - आस् - आस् – आम्' इत्येते आदेशाः **"नद्या ऐ - आसासाम्"** (२।१।४५)। अनेन विधिना 'नद्यै - नद्याः - नद्याः - नद्याम्। वध्वै - वध्वाः - वध्वाः - वध्वाम्' इत्यादीनि रूपाणि लघुनोपायेन साध्यन्ते। पाणिनीये एतदर्थम् आडागम - वृद्धि - सवर्ण-दीर्घविधयः समाद्रियन्ते।

६. **सिविभक्तिसहितयोस्त्वन्मदोर्युष्मदस्मदोश्च स्थाने यथासंख्यं 'त्वम् - अहम्' इत्येतावादेशौ – "त्वमहं सौ सिविभक्त्योः"** (२।३।१०)। अनेन निर्देशेन 'त्वम् - अहम् - अतित्वम् - अत्यहम्' इत्यादिशब्दसाधने प्रक्रियालाघवमनुभूयते। एतदर्थं पाणिनिना "त्वाहौ सौ" (अ० ७।२।९४) इत्यनेन 'युष्म् - अस्म्' – स्थाने 'त्व - अह' आदेशौ, "शेषे लोपः" (अ० ७।२।९०) इत्यनेन 'अद्' भागस्य लोपः, "ङेप्रथमयोरम्" (अ० ७।१।२८) इत्यनेन सुप्रत्ययस्यामादेशश्च विधीयते। तेन तत्र प्रक्रियागौरवं सन्निहितमेवास्ते।

**भिन्नरूपा विधयः**

१. **लिङ्गसंज्ञा – "धातुविभक्तिवर्जमर्थवल्लिङ्गम्"** (२।१।१)। पाणिनीया प्रातिपदिकसंज्ञा तदर्थं प्रसिद्धिं भजते। परं प्रातिपदिकसंज्ञा भवति महती संज्ञा

यावता लिङ्गसंज्ञा द्व्यक्षरात्मकत्वाल्लघुसंज्ञैवास्ति, अपि च 'लिङ्ग्यते चित्र्यतेऽनेनैकदेशेनार्थो गम्यते' इति व्युत्पत्तिदृशाऽन्वर्थताप्यस्याः सिध्यति। अविस्पष्टार्थप्रतिपत्तिहेतुरित्यर्थः। प्रसङ्गतो व्याख्याकारैरर्थपदस्य चत्वारोऽर्था दर्शिताः– अभिधेयः, निवृत्तिः, प्रयोजनम्, धनं चेति। इह ग्रन्थप्रस्तावादभिधेयपरत्वमेवास्य गृह्यते। केषांचिदाचार्याणां मते जातिरेव शब्दार्थः, अन्येषां च मते द्रव्यमेव शब्दार्थोऽभिमतः, परश्च कातन्त्रकारः उभयमेव शब्दार्थं स्वीकरोति। वर्णानामर्थवत्त्वमनर्थकत्वं चापि समीक्षितम्। शब्दानां चतुष्टयी प्रवृत्तिर्भवति – जातिद्रव्यगुणक्रियारूपत्वात्। परमत्र स्वाभाविकक्रमः स्वीक्रियते जातिक्रियागुणद्रव्यरूपः। यथोक्तम् –

**जातिक्रियागुणद्रव्यैः स्वभावाख्यानमीदृशम्।**

**दण्डिनो मतमाश्रित्य दुर्गेणापीत्युदाहृतम्॥** (क० च० २।१।१) इति।

२. **घुट्संज्ञा** – **"पञ्चादौ घुट्, जश्शसौ नपुंसके"** (२।१।३-४)। 'सि-औ-जस्-अम्-औ' इति पञ्चप्रत्ययानाम्, नपुंसके जस्शसोश्च संज्ञेयं निर्दिश्यते। एतेन 'राजा-राजानौ-सामानि' इत्यादौ दीर्घादेशः प्रवर्तते – **"घुटि चासंबुद्धौ"** (२।२।१७)। एकाक्षरात्मिका एषा लघुसंज्ञा, परं पाणिनिना प्रयुक्ता सर्वनामस्थानसंज्ञा वर्तते महती संज्ञा, अपि च पूर्वाचार्योपहासार्थमियं पाणिनिना निर्दिष्टेत्यपि अभिमतम्। तद् यथोक्तम् – **"तस्मात् पूर्वाचार्यानुपालब्धुमेषा महती संज्ञा प्रणीता"** (द्र०, न्यासः १।१।४२) इति।

३. **अग्निसंज्ञा** – "इदुदग्निः" (२।१।८)। लिङ्गसंज्ञकशब्दस्थयोरिकारोकारयोरग्निसंज्ञा विधीयते। तेन "अग्नेरमोऽकारः" (२।१।५०) इत्यनेन अग्निसंज्ञकात् परस्याकारस्य लोपे सति 'अग्निम्–पटुम्' इत्यादीनि रूपाणि सिध्यन्ति। पाणिनिरत्र "शेषो घ्यसखि, पतिः समास एव, षष्ठीयुक्तश्छन्दसि वा" (अ० १।४।७-९) इति सूत्रत्रितयेन घिसंज्ञां कृतवान्। इयं संकेतबोधिका संज्ञा हस्तचेष्टादिवत्, परमग्निसंज्ञाया अन्वर्थत्वमपि कल्पयितुं शक्यते – अग्निशब्दस्यापि लिङ्गसंज्ञान्तर्गतत्वात्। अत्रेकारेण उकारोऽपि उपलक्ष्यते।

## विध्यादिनिर्देशे साम्यम्

लिङ्गात् पराः स्यादयो विभक्तयो भवन्ति। उकारानुबन्ध आगमोऽन्त्यस्वरानन्तरं प्रवर्तते। स्त्रीत्ववाचकलिङ्गस्थयोरीकारोकारयोर्नदीसंज्ञा। लिङ्गस्य धातोश्चान्त्याद् वर्णात् पूर्वस्य वर्णस्योपधासंज्ञा, 'आभ्याम् - वृक्षाय' इत्यादौ दीर्घविधानम्, वृक्षानित्यादौ सकारस्य नकारः, वृक्षैरित्यादौ भिस ऐसादेशः, वृक्षादित्यादौ ङसेरादादेशः, वृक्षस्येत्यादौ ङसः स्यादेशः, वृक्षेणेत्यादौ टाविभक्तेरिनादेशः, वृक्षायेत्यादौ ङेविभक्तेर्यादेशः, 'स्मै - स्मिन् - इ - ए' प्रभृतय आदेशाः। सिलोप - अलोपौ, अकारस्योकारादेशः 'सख्युः - पत्युः' इत्यादौ, सम्बुद्धिसिलोप - त्रेस्त्रयादेश - संख्यासंज्ञककार्य - स्यमोर्लुक् - मुरागम - तुरागम - नुरागम - पुंवद्भाव - तिरश्चि - उदीचि - पदादेश - इयुवादेश - जरस् - तिसृ - चतसृ - एन - ड - ग - रादेशप्रभृतयो विधयः प्रायेण पाणिनीये कातन्त्रे चोभयत्र समानरूपेण निर्दिष्टाः सन्ति। तत्र प्रसङ्गतः किञ्चिद् वैशिष्ट्यं दर्शितं व्याख्यातृभिः, यथा –

**विभक्तेरन्वर्थता –** संख्याकर्मादयोऽर्था आभिर्विभज्यन्ते इति विभक्तयः (वि० प० २।१।२)–

**एकस्य बहूनां वा धातोर्लिङ्गस्य पदानां वा।**

**विभजन्त्यर्थं यस्माद् विभक्तयस्तेन ताः प्रोक्ताः॥** (ना० शा० १४।३०)।

**सिद्धशब्दार्थाः –** नित्यः, निष्पन्नः, प्रसिद्धश्च।

**आगमपदार्थः –** प्रकृतिप्रत्यययोरनुपघाती आगमः। आगच्छतीत्यागमः। तथा चापिशलीयाः पठन्ति –

**आगमोऽनुपघातेन विकारश्चोपमर्दनात्।**

**आदेशश्च प्रसङ्गेन लोपः सर्वापकर्षणात्॥** (वि० प०. २।१।६)

**'अतिजरस्य, भिक्षुष्य'** इत्यादौ ङसः स्यादेशसिद्ध्यर्थं कलापचन्द्रकारः आचार्यसुषेणविद्याभूषणो युक्तिमुपन्यस्यन्नाह – "ऋषिप्रयोगादिति चिन्त्यम्। यद् वा – "इन टा, भिसैस् वा, ङेर्यः, ङसिरात्, ङस् स्यः' इति क्रमेणैव पाठो युक्तः, कथं

व्यतिक्रमः ? तद् बोधयति – क्वचिद् व्यञ्जनान्तादुकारान्ताच्च स्यादिति" (२।१।२२), एतेन व्यत्यस्तक्रमरचनयाऽऽचार्यस्य विशेषाभिप्रायो लक्ष्यते। अत एव साधूक्तं महाभाष्यकारेण – "इहेङ्गितेन चेष्टितेन निमिषितेन महता वा सूत्रप्रबन्धेन आचार्याणामभिप्रायो गम्यते" (म० भा० ६।१।३७) इति। उक्तमुदाहरणद्वयमेकस्मिन् श्लोके स्मर्यते –

**नवं नवं परिक्षिप्य पुराणमपकर्षतः।**
**अतिजरस्य भिक्षुष्य कन्था वर्षशतं गता॥**

**पतौ** इति प्रयोगस्य प्रामाण्यविषये टीकाकारो निर्वक्ति – **"गते मृते प्रव्रजिते क्लीबे च पतिते पतौ"** (परा० स्मृ० ४।२६) इत्यादौ ऋषिवचनादन्येषां च-मतेन सूत्रस्य योगविभागाद् वा क्वचित् सपूर्वोऽपि औ - इत्यादेशो भवतीति (द्र० - कात० वृ० टी० २।१।६१)। **पितरः** इति द्वितीयाबहुवचने साधु। अरादेशविधायके "अर् ङौ" (२।१।६६) इति सूत्रे कार्यिकार्यनिमित्तक्रमेणैव शब्दोपन्यासे कृतेऽपि **वररुचि**मतानुसारम् 'अर्' इत्यस्य प्राङ् निर्देशादत्र योगविभागोऽनुमन्यते, तेन –

**उपोष्य रजनीमेकाममावास्यां तिलोदकैः।**
**पितरस्तर्पयामास विधिदृष्टेन कर्मणा॥** (द्र०, कवि० २।१।६६)

इत्यत्र 'पितरः' इति पदं द्वितीयाबहुवचनेऽप्युपपद्यते।

## व्याख्याकाराणां कानिचिद् विशिष्टवचनानि विचारा वा

### १. कातन्त्रैकदेशीयो वररुचिः

कैश्चित् कातन्त्रैकदेशीयैरिति पञ्जी। कातन्त्रशब्दोऽत्र सकलवैयाकरणपरः। कातन्त्रं ये विदन्ति सूरय इत्यर्थेऽण्प्रत्ययविधानात् तदेकदेशीयैर्वररुचिप्रभृतिभिरित्यर्थः (क० च० २।१।४१)।

### २. शर्ववर्मणा पाणिनेरुपहासः

इह विदधद् यथासंख्यं लघुविस्पष्टार्थं प्रक्रियाविकलान् उपहसतीव भगवान् याट्-स्याट्-आटः प्रकुर्वाणान् (क० च० "नद्या ऐ-आसासाम्" २।१।४५)।

**३. कृत्प्रकरणं नैव शर्ववर्मप्रणीतम्**

शर्ववर्मणा कृत्प्रत्ययविशेषविधानं नाम न कृतम् अभिधानतः, प्रकृतिप्रत्यय-विभागकल्पना आदृतैवेत्यदोषः (वि० प० - धातोस्तृशब्दस्याऽऽर् २।१।६८)।

**४. अनुकरणं द्विविधम्**

तच्च (अनुकरणम्) द्विविधम् – शब्दानुकरणम् अर्थानुकरणं चेति। यत्र शब्दमात्रप्रतीत्यर्थमनुक्रियते उच्चार्यते तच्छब्दानुकरणम्। यत्रार्थमात्रप्रतीत्यर्थं शब्दोऽनुक्रियते तदर्थानुकरणम् (क० च० २।२।१)।

**५. छान्दसप्रयोगः**

अनड्वाहीमालभेतेति छन्दस्येव दृश्यते। भाषायामप्यन्ये वर्णयन्तीति। अयं पुनर्मन्यते - भाषायामीदृशः प्रयोगो न दृश्यते इति (दु० टी०, वि० प० २।२।४२)।

**६. अन्यदपि किञ्चित् स्मरणीयम्**

(१) सन्देहे नैव गुरुलाघवचिन्ता (२।१।६४)।

(२) द्विविधा हि संज्ञाशब्दाः – व्युत्पन्ना अव्युत्पन्नाश्च (२।१।६९)।

(३) समुदायप्रवृत्ताः शब्दा अवयवेऽपि वर्तन्ते (२।२।३१)।

(४) को हि नाम दृष्टपरिकल्पनां विहायादृष्टं परिकल्पयतीति (वि० प० २।२।४५)।

(५) न क्षरति न चलतीति कृत्वा अक्षरं स्वर उच्यते पूर्वाचार्यैः (दु० टी० २।२।५९)।

(६) उणादिषु सर्वे विधयो विकल्प्यन्ते (दु० टी० २।२।६५)।

(७) आख्यातप्रधानं हि वाक्यम् (दु० टी० २।३।१)।

(८) एकवाक्याश्रितो हि संबन्धोऽन्तरङ्गः (दु० टी० २।३।१)।

(९) मनोविज्ञानं हि स्मरणम् (दु० टी० २।३।४)।

(१०) आम्नाय एव शरणमिति साम्प्रदायिकाः (क० च० २।३।७)।

(११) तथा च प्रयोगो दृश्यते – इमैर्गुणैः सप्तर्षयः स्वर्गं गताः (क० च० २।२।३८) इति।

(१२) विशेषणविशेष्यभावस्य प्रयोक्तुरायत्तत्वात् (वि० प० २।१।५८, क० च० २।२।५९, दु० टी० २।३।१)।

सूत्रकारेण आचार्यशर्ववर्मणा किञ्चित् कार्यं बालबोधनार्थम्, असन्देहार्थम्, प्रतिपत्तिगौरवनिरासार्थम्, स्पष्टार्थम्, वैचित्र्यार्थम्, योगविभागार्थम्, उत्तरार्थम्, साक्षात्प्रतिपत्त्यर्थम्, उपचारार्थम्, लोकव्यवहार - आचार्यपारम्पर्यनिर्वाहार्थं च विहितम्, परं स सुखार्थमधिकं विधि – पद – वर्णादिकं विदधाति। टीकाकारो दुर्गसिंहः सूत्रकारं शर्ववर्माणमीदृशमेव समुद्घोषयति – "**सुखप्रतिपत्तिकृतप्रतिज्ञोऽयं भगवानिति**" (दु० टी० २।१।६६)। प्रायेण चत्वारिंशत् कार्याणि सुखार्थं विहितानि दृश्यन्ते। इह निदर्शनाय कानिचिद् वचनानि प्रस्तूयन्ते –

**[सुखार्थम्]**

१. वस्तुतस्तु धुड्ग्रहणं सुखार्थम् (क० च० २।१।१९)।

२. यद् घोषवद्ग्रहणं तत् श्रुतिसुखार्थमिति (क० च० २।१।१४)।

३. सुखार्थं व्यञ्जनग्रहणम् (क० च० २।१।१३)।

४. सुखार्थम् अर्थवद्ग्रहणम् (क० च० २।१।१)।

५. इह (ङसिप्रत्यये) ङकार इकारश्चानुबन्धः सुखप्रतिपत्त्यर्थ एव (दु० टी० २।१।२१)।

६. ह्रस्वग्रहणं सुखप्रतिपत्त्यर्थम् (दु० टी० २।१।४०)।

७. स्वरग्रहणं सुखप्रतिपत्त्यर्थम् (दु० टी० २।१।५१)।

८. सपूर्वग्रहणं सुखप्रतिपत्त्यर्थम् (दु० टी० २।१।६३)।

९. भिन्नयोगस्तु सुखप्रतिपत्त्यर्थ एव (दु० टी० २।२।१७)।

१०. सुखार्थमेव समासान्तग्रहणम् (वि० प० २।२।५२)।

११. वद्ग्रहणं तु सुखप्रतिपत्त्यर्थम् (दु० टी० २।२।५३; ३।५०)।

१२. व्यञ्जनग्रहणं सुखार्थमिति (क० च० २।१।१३; ३।१८)।

१३. अविभक्तिनिर्देशः सुखार्थः (दु० टी० २।३।२८)।

१४. तस्येत्यकारः श्रुतिसुखार्थ एव (दु० टी० २।३।३३)।

१५. अन्तग्रहणमिह मन्दधियां सुखप्रतिपत्त्यर्थम् (दु० टी० २।३।५४)।

१६. आदिग्रहणं सुखार्थमुक्तम् (वि० प०, क० च० २।१।४७)।

**[बालबोधनार्थम्]**

१. विचित्रनिर्देशः खलु बालव्युत्पत्त्यर्थ एव (क० च० २।१।१६)।

२. पृथग्योगो बालावबोधार्थः (दु० वृ० २।१।२३)।

**[प्रतिपत्तिगौरवनिरासार्थम्]**

१. प्रतिपत्तिगौरवनिरासार्थमेवेदं सर्वग्रहणम् (वि० प० २।१।३०)।

२. प्रतिपत्तिगौरवनिरासार्थमेवाप्राप्ते विभाषेयमुच्यते (दु० टी० २।१।३६)

३. प्रतिपत्तिगौरवनिरासार्थमेव लोपग्रहणम् (दु० टी० २।१।३७)।

४. प्रतिपत्तिगौरवनिरासार्थमेव सहग्रहणम् (वि० प० २।२।१५)।

**[स्पष्टार्थम्]**

१. कार्यिकार्ययोरभिन्नविभक्तिनिर्देश इह स्पष्टार्थः।

२. तीयाद् वेति सिद्धे द्वितीयातृतीयाभ्यामिति स्पष्टार्थम् (दु० वृ० २।१।४४)।

३. पृथग्योगस्तु विस्पष्टार्थः (दु० टी० २।२।५०)।

**[लोकोपचारनिर्वाहार्थम्]**

१. स्त्रीपुंनपुंसकानि लोकलिङ्गानुशासनगम्यानि (दु० टी० २।१।४)।

२. लोकोपचारादियमेषामेव संज्ञा कृता (दु० टी० २।१।२५)।

३. लोकोपचाराश्रयणमिष्टसिद्ध्यर्थम् (क० च० २।१।२५)।

४. लोकोपचाराद् एकद्वित्रिप्रभृतीनाम् इयं (संख्या) संज्ञा सिद्धा।

**[आचार्यपारम्पर्यार्थम्]**

१. आचार्यपारम्पर्याद् यथादृष्टपरिकल्पनावशाद् दीर्घादिरेवायमादेशः (क० च० २।३।८)।

२. तस्मादाचार्यपारम्पर्यमेव व्याख्यानम् (क० च० २।३।६२)।

**[असन्देहार्थम्]**

१. तपरकरणमसन्देहार्थम् (दु० टी० २।१।९,६३)।

**[वैचित्र्यार्थम्]**

१. गुरुकरणं वैचित्र्यार्थम् (क० च० २।१।४७)।

२. एवं घुटीति सिद्धेऽन्तग्रहणमुभयपक्षे वैचित्र्यार्थमेव (दु० टी० २।२।३६)।

**[योगविभागार्थम्]**

१. अरः प्राङ् निर्देशो योगविभागार्थ इति वररुचिः (क० च० २।१।६६)

**[सम्प्रदायार्थम्]**

१. भावसप्तम्यां विषय एव नास्तीति सम्प्रदायः (क० च० २।१।६८)।

२. प्रत्ययलोप इत्यस्य तु अतः पञ्जिकायामपि आमि च विशेषविधानादिति यदुक्तं तद् युक्तमेवेति साम्प्रदायिकाः (क० च० २।२।१)।

३. तस्मादकारान्तत्वे आम्नाय एव शरणमिति साम्प्रदायिकाः (क० च० २।३।७)

**[उपचारार्थम्]**

१. सखिस्थ इकारः सखिरुच्यते, उपचारात् (दु० टी० २।२।१)।

२. स्त्र्याख्यावयवोऽपि स्त्र्याख्य इत्युपचारात् (वि० प० २।२।४)।

**[उत्तरार्थम्]**

१. पृथग्योगोऽयमुत्तरार्थः (दु० वृ० २।१।६७; दु० टी० २।२।२३)।

२. नदीश्रद्धाग्रहणमुत्तरार्थमिहार्थं च (दु० वृ० २।१।७१)।

## [साक्षात् प्रतिपत्त्यर्थम्]

१. आदिग्रहणं साक्षात् प्रतिपत्त्यर्थमवश्यं कर्तव्यम् ।

नामचतुष्टयस्य प्राथमिके पादत्रितये वृत्तिकार-टीकाकार-पञ्जिकाकार-कलापचन्द्रकारैश्चतुर्भिर्व्याख्यातृभिर्बहूनां ग्रन्थानां वचनानि ग्रन्थकाराणां चाभिमतानि सिद्धान्ता विचारा वा समुद्धृताः सन्ति, तेषु कानिचिदभिमतानि नूनमेव वैशिष्ट्यं किञ्चित् ख्यापयन्ति । इह कतिपये विचारा निदर्श्यन्ते यथोक्तवचनोल्लेखेन –

**१. कश्चिद्-अन्य-अपरशब्दैः स्मृतानामाचार्याणां शब्दार्थविषयकमभिमतम्**

**कश्चिदाह** – जातिरेव शब्दार्थ इति । ..... **अन्यः** पुनराह – द्रव्यमेव शब्दार्थः । ..... **अन्यः** पुनराह – उभयमेवैतत् शब्दार्थः । .... **अपरः** पुनराह – सत्तैव शब्दार्थ इति । ........ **अन्यः** पुनरन्यथैव प्रतिपद्यते – स्वार्थद्रव्यलक्षणो द्विक इति (दु० टी० २।१।१)।

**२. "धातुविभक्तिवर्जमर्थवल्लिङ्गम्" (२।१।१) इत्यत्र विभक्तिवर्जनस्य फलं गोपीनाथानुसारम्**

**गोपीनाथस्तु** अभूवन्नित्यत्र विभक्तिवर्जनाभावे नलोपः स्यात् । न च नकारकरणसामर्थ्यादिव नलोपो न भविष्यतीति वाच्यम्, "अन उस सिजभ्यस्तु०" (३।४।३१) इत्यत्र विशेषणार्थत्वेन नकारस्य सार्थक्यात् । अन्यथा 'अ उस्' इति कृते 'पपाच' इत्यत्रापि उसादेशः स्यादिति (क० च० २।१।१)।

**३. शब्दज्ञानस्यावश्यकत्वमर्थज्ञाने प्रभाकरमतेन**

न हि ढक्कादीनां शब्दा अपि शक्त्या लक्षणया वा गृह्यन्ते, वृत्त्या स्वरूपोपस्थापनेऽपि प्रथमं तु तद्वर्णात्मकशब्दज्ञानस्यावश्यकत्वात् । न ह्यनुपस्थितः शब्दः शक्त्या लक्षणया वा कञ्चिदर्थमुपस्थापयतीति प्रभाकराः (क० च० २।१।१)।

**४. निवृत्तिरूपस्यार्थपदार्थस्य विषये उमापतिवचनं नोचितम्**

यत्तु **उमापतिना** 'न चेदृशः प्रयोगः क्वापि दृश्यते' इत्युक्तं तत् किमस्माकम**पराधः** – न ह्यरुणकिरणावलीनामपराधो यज्जीवलोकमुलूको नावेक्षते इति (क० च० २।१।१)।

### ५. अभिमुखीकरणार्थविषये कस्यचिदाचार्यस्य मतं नोचितम्

अभिमुखीकरणं संमुखीकरणमिति **कश्चित्**। तन्न, लोके व्यवहितस्यापि आभिमुख्यदर्शनात्। तस्माद् अभिमुखीकरणं कार्योन्मुखीकरणमित्यर्थः। तथा च कुमारे (कु० सं० ३।७५)– 'शून्या जगाम भवनाभिमुखी कथञ्चित्' (क० च० २।१।५) इति।

### ६. ह्रस्वविधिविषये केषांचिदाचार्याणामभिमतम्

औणादिकस्य नदीसंज्ञकस्य ह्रस्वो नेष्यते इति **केचित्**। तस्माद् 'हे तन्त्रीः! हे लक्ष्मीः' इति सिध्यति। दृश्यते च 'हे लक्ष्मीः! स्या दरिद्राणां तन्त्रीः कर्णामृतं पिब' इति। अस्माकं तु मते व्यवस्थितवास्मरणाद् विकल्पो मन्तव्यः। तेन 'मातर्लक्ष्मि! भजस्व माम्' इत्यादिकम्, 'हे लक्ष्मीः! स्या दरिद्राणाम्' इति च (क० च० २।१।९)।

### ७. जरसादेशविषये भाष्यकाराभिमतम्

दीर्घोच्चारणाद् अतिजरसादिति। .... **भाष्यकार**मते तु पुनः अतिजरादिति भवितव्यम्, सन्निपातलक्षणत्वात् (दु० टी० २।१।२१)।

### ८. 'स्मात्' आदेशविषयकं मैत्रेयरक्षितस्याभिमतम्

'सर्वतो जयमन्विच्छेत् पुत्रादेकात् पराजयम्' इत्यसाधुरिति **रक्षितः**। अन्ये तु 'गणकृतमनित्यम्' (कात० प० २९) इति न्यायात् साधुत्वमाहुः। अपरे तु 'पुत्रादेकात् पराजयम्' पुत्रादेव पराजयम् इत्यवधारणार्थत्वान्न सर्वनाम इत्याहुः (क० च० २।१।२६)।

### ९. सम्बुद्धावोकारादेशविषयकमाचार्यवररुचेरभिमतम्

सम्बुद्धौ च (२।१।५६) इत्यत्र चकारोऽनित्यार्थस्तेन 'वरतनु! सम्प्रवदन्ति कुक्कुटाः' इति **वररुचिः**। स्वमते दीर्घान्ततनूशब्देन साध्यम्। समासान्तविधेरनित्यत्वाद् "गोरप्रधानस्य" (कात० परि० नाम० ८१) इत्यादिना न ह्रस्वः (क० च० २।१।५६)।

**१०. चतसृ – आदेशविषयकं कुलचन्द्राभिमतम्**

एतेन 'हे प्रियचत्वः' इति कुलचन्द्रेण यदुक्तं तदशुद्धमेव, पाणिनिसम्मत्या **श्रीपतिना** दूषितत्वात् । **कुलचन्द्र**दृष्ट्या तु पञ्जिकायां 'हे प्रियचत्वः ।' इति लिखितम्, किन्तु छात्रैः 'हे प्रियचतसृ !' इति बोद्धव्यम् (क० च० २।२।६)।

**११. वकारस्योकारादेशविषयकं कुलचन्द्रादेरभिमतम्**

वृत्तौ यूनीति पाठो नास्तीति **केचित्**। 'यूनी काममियं दुनोति हृदयं वैधव्यभावाद् वधूः' इति **कुलचन्द्रः**। अन्ये तु "यूनस्तिः" (अ० ४।१।७७) इति नदादिविहितस्य ईकारस्य बाधकस्तिप्रत्ययोऽस्तीति, तेन युवतिरित्येव प्रयोगः। ....... यन्मते यूनीति पाठस्तन्मते "यूनस्तिः" इत्यत्र वानुवृत्तिरित्याशयः (क० च० २।२।४७)।

**१२. लोपविषयकमभिमतं विद्यानन्दस्यान्यस्य च आचार्यस्य**

चतुर्भाग इति। चतुर्थश्चासौ भागश्चेति। समासे पूरणप्रत्ययस्य लोप इति **विद्यानन्दः**। अन्यस्तु चतुर्थो भागश्चतुरित्युपचारात् (क० च० २।३।४)।

सूत्ररचनादिविषयकौ उत्कर्षापकर्षौ समीक्षातोऽवगन्तव्यौ। शब्दसाधुत्व-प्रक्रियाधिगमाय रूपसिद्धिः संक्षेपेण दर्शिता, तत्र तान्येवोदाहरणानि संगृहीतानि यानि वृत्तिकारेण दुर्गसिंहेन दर्शितानि।

'वृत्ति - टीका - पञ्जिका – कलापचन्द्र' इति व्याख्याचतुष्टयस्य तु मुख्यतः सम्पादनमत्र वर्तत एव, परं कातन्त्रपरिशिष्टस्येह योगोऽविस्मरणीयस्तस्मात् प्रथमपरिशिष्टे संबद्धानि नाम – षत्व – णत्वप्रकरणगतानि एकोननवत्यधिकशतसंख्याकानि कातन्त्रपरिशिष्टसूत्राणि संकलितानि। अन्यान्यपि सप्त परिशिष्टानि ग्रन्थेऽस्मिन्नि-बद्धानि उद्धृतग्रन्थग्रन्थकारविशिष्टशब्दव्युत्पन्नशब्दादिसुपरिचयाय।

**कृतज्ञताप्रकाशः**

इदमवगन्तव्यं यद् व्याख्याचतुष्टयोपेतस्य समीक्षात्मकस्य चास्य कातन्त्र-व्याकरणस्य मुद्रणं प्रायेण चतुःसहस्रपृष्ठेषु पूर्णताम्प्राप्स्यतीति। तत्र सन्धिप्रकरणा-त्मकः प्रथमो भागः सार्धचतुःशतपृष्ठात्मकः १९९७ तमे यीशवीये वर्षे प्रकाशितः। द्वितीयभागस्य नामचतुष्टयाध्यायीयप्राथमिकपादत्रितयात्मकं प्रथमखण्डमिदं सपाद-

षट्शतपृष्ठात्मकं वर्तते, कारक – समास – तद्धितप्रकरणात्मकं द्वितीयखण्डं च सप्तशतपृष्ठात्मकं कल्पितमस्ति। आख्याताध्यायभागस्तृतीयः प्रायेण सहस्रपृष्ठेषु कृत्प्रकरणात्मकश्चतुर्थश्चापि भाग एतावत्स्वेव पृष्ठेषु परिसमाप्तो भविष्यतीति संभाव्यते। एतादृशं व्याख्यादिबाहुल्यसमृद्धवाङ्मयं पाणिनीयादिव्याकरणान्तरापेक्षया सरलं संक्षिप्तं च कातन्त्रमुपस्थाप्य व्याकरणवाङ्मये लोकव्यवहारप्रधानां माहेन्द्रीं परम्परामुज्जीवयन्तो येऽद्यापि जयन्ति, सर्वांस्तांस्तान् **कातन्त्राचार्यान्** प्रति सर्वप्रथममहं प्रणतः संस्तेभ्यः कृतज्ञतां विज्ञापयामि।

एतावत्या महत्याः प्रकाशनयोजनायाः स्वीकरणाय सम्पूर्णानन्दसंस्कृतविश्वविद्यालयो नूनमभिनन्दनीय एवास्ते, अभिनन्दनीया चास्ति प्रकाशनसमितिः। यथोचितनिर्देशन - व्यवस्था - समाधानादिकार्यजातस्य निर्वाहाय **कुलपति-कुलसचिव-प्रकाशननिदेशक - तदीयसहयोगिनोऽपि** यशोभाजो भवन्ति। तस्मात् परममाननीयान् कुलपतिश्री**मण्डनमिश्र**महाभागान् प्रति प्रणामाञ्जलिना, कुलसचिवनिदेशकवर्यान् प्रति विनयव्यापारेण, अथ च सुहृद्वर्यं प्रकाशननिदेशकश्री**हरिश्चन्द्रमणित्रिपाठि**महोदयं प्रति सुहृत्सम्मितसद्भावध्वनितधन्यवादप्रदानेन च स्वीयां कृतज्ञतां विज्ञापयामि। ईक्ष्यपत्रसंशोधनादिकार्येषु कौशलमावहन्तो **डॉ० हरिवंशपाण्डेय – कन्हईसिंहकुशवाहा-**प्रभृतयः प्रकाशनविभागीयसदस्यास्त्वरितसन्मुद्रणयोजनाव्यापारपरा आनन्दप्रिण्टिङ्ग-प्रेसाधिकारिणश्चाप्यवश्यं धन्यवादानर्हन्ति।

कार्येऽस्मिन् सम्पादकत्वेन संसक्तोऽहं नास्मि यद्यपि प्रचारपरस्तथापि लोकोऽयमवश्यं समये शब्दार्थौ लोकते = परीक्षते। एतस्मादेव कारणात्तदीयान्वर्थताधिगम्यते। यथोक्तम्,

**लोक्येते येन शब्दार्थौ लोकस्तेन स उच्यते।**
**व्यवहारोऽथवा वृद्धव्यवहर्तृपरम्परा॥**

**अयमाशयः** – दिल्लीमहानगरस्था **'कुन्दकुन्दभारतीट्रस्ट'** नाम्नी जैनसंस्था समीक्षानन्तरं ग्रन्थस्यास्योत्कर्षातिशयं मन्यमाना **'आचार्य-उमास्वामि-पुरस्कारम्'** १९९७ वर्षीयमैषमो

जूनमासे घोषितवती सम्पादकाय । एवं स्मर्यते – वन्दनीयानां न्यासाध्यक्षमहोदयानामाचार्य**श्रीविद्यानन्द**मुनिराजमहात्मनां भक्तजनैरनुयायिभिः कातन्त्रव्याकरणमधिकृत्य कश्चित् [1]पत्रव्यवहारो मया सह प्रवर्तित आसीत् त्रयोदशवर्षपूर्वम् (१९८५ – ८६ यीशवीयवर्षयोः)। ततो जानामि जैनसम्प्रदायस्य कातन्त्रव्याकरणेऽनुरागविशेषव्यवहारं मदीयग्रन्थावलोकनतत्परतां च ।अद्यावधि मम सम्पादकत्वे कातन्त्रव्याकरणस्य ग्रन्थचतुष्टयी अनुसंधानप्रधानाः षोडशलेखाश्चापि संप्रकाशिताः संजाताः । साम्प्रतमहमनुसन्धानाध्यापनजीवने दशग्रन्थानां पञ्चाधिकशतसंख्याकानामनुसंधाननिबन्धानां च प्रकाशनेनात्मानं कृतिनं मन्ये ।

उक्तपुरस्कारेण सम्माननाय संस्थां तदधिकारिवर्गं च प्रति सविनयमहमात्मनः कृतज्ञतां विज्ञापयामि ।जैनशासनरतानां न्यासाध्यक्षमहोदयानामाचार्यप्रवराणामाशीर्भिः कातन्त्रप्रकाशनरूपं महनीयं कार्यं कार्त्स्न्येन यथाशीघ्रमेव सम्पत्स्यते इति संभावनयाऽहं तान् प्रति प्रणतिपरायणोऽस्मि । सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिपदभाजां चयनसमितेरध्यक्षतामधिकुर्वतां च माननीय – डॉ० **मण्डनमिश्र**महाभागानां कुन्दकुन्दभारतीट्रस्टसंस्थाया मन्त्रिपदमलंकुर्वतां स्वनामधन्यानां श्रीमतां **सुरेशचन्द्रजैन**महाभागानां चावसरेऽस्मिन् स्मरणं तेभ्यो धन्यवादविज्ञापनं च परमं श्रेयस्करं मन्ये । प्रथमभागस्य समीक्षाकारो डॉ० **सुदीपजैन**महोदयः कार्यमिदमितिहासनिर्माणकरं[2]

---

१. (क) श्रीज्ञानचन्द्र जैन, प्राचार्य – शासकीय उ० मा० वि०, माधवगढ़ – सतना । दि० ५/११/८५,

(ख) डॉ० स्नेह रानी जैन, सागर वि० वि० । दि० २८/१/८६,

(ग) डॉ० स्नेह रानी जैन, सागर वि० वि० । दि० १८/३/८६

२. द्र०, प्राकृतविद्या त्रैमासिकी पत्रिका – व० १० अं० १ (अप्रैल – जून १९९८ई०), पृ० ८८ – ९०

'व्याकरणशास्त्र के इतिहास में यह अत्यन्त श्रम एवं निष्ठापूर्वक किया गया अद्भुत कार्य है, जो अपने आप में एक 'इतिहास बनाने वाला' कार्य सिद्ध होगा ।

मनुते, तथैवाहमप्याशंसे इति धिया तस्मै महानुभावाय धन्यवादप्रदानेनात्मनः सद्भावं तदर्थं विज्ञापयामि।

**स्याद्यन्तशब्दविषये विविधं विधेयं**
**साधुत्वनिर्णयविधौ बुधभावनीयम्।**
**संक्षेपतः सरलबुद्धितया च वेद्यं**
**द्रष्टव्यमत्र निहितं नियतं सुधीभिः॥१।**
**कातन्त्रं यच्च कौमारं कालापं कीर्त्यते बुधैः।**
**शार्ववर्मिकमित्याख्यं तदेवेह समीक्षितम्॥२।**

वि० सं० २०५५
अक्षयनवमी
दि० २९।१०।९८

विदुषामाश्रवः
**जानकीप्रसादद्विवेदः**
सम्पादकः
उपाचार्यः संस्कृतविभागे,
केन्द्रीय – उच्चतिब्बती-शिक्षासंस्थानम्
सारनाथ – वाराणसी

॥श्रीः॥

# विषयानुक्रमणी

## नामचतुष्टयप्रकरणे प्रथमो धातुपादः

**१. लिङ्गसंज्ञा** **पृ० १ – २२**

[धातु-प्रत्ययवर्जित अथवान् शब्दों की लिङ्गसंज्ञा, पाणिनीय 'प्रातिपदिक' इस महती संज्ञा की अपेक्षा शार्ववर्मिक 'लिङ्ग' सञ्ज्ञा का लघुसंज्ञात्व, एक या दो अक्षरों वाली संज्ञा लघुसंज्ञा तथा इससे अधिक अक्षरों वाली महासंज्ञा, महती संज्ञा का प्रयोजन, उसकी अन्वर्थता, विशिष्ट अर्थ में व्यवहारार्थ शक्तिनियमन करने के लिए संज्ञा का प्रयोग , 'लिङ्ग' शब्द का यौगिकार्थ, नाम = प्रातिपदिक में अभेद, पूर्वाचार्यों द्वारा 'लिङ्ग' का व्यवहार, अर्वाचीन आचार्यों द्वारा तदर्थ 'प्रातिपदिक – नाम – मृत् – लि' संज्ञाओं का प्रयोग, 'अर्थ' शब्द के चार अर्थ-अभिधेय, निवृत्ति, प्रयोजन और धन, वर्णों की अर्थवत्ता-अनर्थकता, शब्दार्थविषयक ३ पक्ष – जाति, द्रव्य तथा उभय, शब्द के चार भेद-जाति, द्रव्य, गुण और क्रिया, विविध व्याख्याकारों का उल्लेख]

**२. स्यादि विभक्तियों का प्रयोग** **पृ० २२ – २८**

[विभक्ति का यौगिकार्थ, प्राचीन तथा अर्वाचीन प्रयोग, कातन्त्रकार द्वारा विभक्ति संज्ञा का प्रयोग किए विना ही विभक्ति का व्यवहार, वृत्तिकार द्वारा स्यादि २१ प्रत्ययों का परिगणन, पाणिनीय "ङ्याप्प्रातिपदिकात्" (अ० ४/१/१) सूत्र में 'ङ्याप्'- पाठ की अनावश्यकता]

**३. घुट् संज्ञा** **पृ० २८ – ३३**

[सि, औ, जस, अम्, औ तथा नपुंसकलिङ्ग में जस्-शस् की घुट् संज्ञा, पाणिनि-द्वारा 'सर्वनामस्थान' इस महती संज्ञा के प्रयोग से पूर्वाचार्यों का उपहास एवं महती संज्ञा का गौरव]

४. सम्बुद्धिसंज्ञा पृ० ३३ – ३५

[आमन्त्रित अर्थ में विहित 'सि' प्रत्यय की संबुद्धि संज्ञा, आमन्त्रित का यौगिकत्व-योगरूढत्व, 'सिद्ध' शब्द के तीन अर्थ – नित्य, निष्पन्न और प्रसिद्ध, प्रसिद्ध अर्थ की ग्राह्यता एवं अविद्यमान का संबोधनाभाव]

५. उदनुबन्ध आगम पृ० ३५ – ४०

[अन्तिम स्वर से पर में तथा तृतीयादि विभक्तियों में परादि रूप आगम, प्रकृति-प्रत्यय का अनुपघाती आगम, 'आगम-परिभाषा' शब्दों की व्युत्पत्ति, आगम-विकार-आदेश-लोपविषयक आपिशलि आचार्य की परिभाषा]

६. अग्निसंज्ञा पृ० ४० – ४२

[पाणिनीय घिसंज्ञा, उसकी कृत्रिमता, अग्निसंज्ञा की अन्वर्थता, 'अग्नि' संज्ञा के व्यवहार से अर्थावबोध की सहजगम्यता तथा 'घि' संज्ञा के प्रयोग से हस्तचेष्टावत् साङ्केतिक अर्थबोध]

७. नदीसंज्ञा पृ० ४२ – ४६

[स्त्रीत्वबोधक ई-ऊवर्णों (प्रत्ययों) की तथा पाणिनि के अनुसार ईकारान्त-ऊकारन्त शब्दों की नदीसंज्ञा, कुलविध्वंसिनी स्त्री के साथ कूलविध्वंसिनी नदी का साम्य, अनुगतार्थता न होने के कारण पाणिनि पर आक्षेप, मुग्धबोधव्याकरण में एकदेश 'दी' संज्ञा का प्रयोग]

८. श्रद्धासंज्ञा पृ० ४६ – ४७

[नित्य स्त्रीलिङ्गवाची आकार की श्रद्धासंज्ञा, उसकी अन्वर्थता का अभाव, पाणिनि द्वारा संज्ञा का अभाव, सूत्रस्थ 'आख्या' शब्द के पाठ का विशेष फल]

९. उपधासंज्ञा पृ० ४७ – ४९

[लिङ्ग या धातु के अन्तिम वर्ण से पूर्ववर्ती वर्ण की उपधासंज्ञा, उसकी अन्वर्थता, पूर्वाचार्यकृत व्यवहार, अर्वाचीन व्याकरणों में एतदर्थ 'ङ' संज्ञा]

**१०. अनुषङ्गसंज्ञा** पृ० ४९ – ५१

[ लिङ्ग या धातुगत अन्तिम व्यञ्जन वर्ण से पूर्ववर्ती नकार की अनुषङ्ग संज्ञा, पाणिनि द्वारा प्रयोग न किए जाने पर भी व्याख्याकारों द्वारा इसका स्मरण, पूर्वाचार्यकृत प्रयोग ]

**११. धुट्संज्ञा** पृ० ५१ – ५४

[ २५व्यञ्जन वर्णों की धुट् संज्ञा, उसकी कृत्रिमता, पाणिनीय व्याकरण में इसके लिए झल् प्रत्याहार का प्रयोग ]

**१२. दीर्घविधान** पृ० ५४ – ६०

[ लिङ्ग के अन्तिम ह्रस्व अकार का घोषवत् विभक्तियों तथा जस् के परे रहने पर दीर्घादेश-आभ्याम्, वृक्षाय, वृक्षाणाम्, वृक्षाः आदि में, कातन्त्र में कार्यी (स्थानी) का प्रथमान्त तथा कार्य (आदेश) का द्वितीयान्त निर्देश, पाणिनीय व्याकरण में स्थानी का षष्ठ्यन्त तथा कार्य का प्रथमान्त निर्देश ]

**१३. स् को न् आदेश, अकारलोप, भिस् को ऐस् तथा अकार को एकार आदेश** पृ० ६० – ७२

[ पाणिनि-शर्ववर्मा की सूत्ररचनाशैली में भिन्नता, कातन्त्रकार के अनुसार 'वृक्षेभिः' आदि शब्दरूपों का भी साधुत्व, कातन्त्रीय निर्देशों की सरलता, विविध आचार्यों के उद्धरण ]

**१४. ङसि को आत्, ङस् को स्य, टा को इन एवं ङे को य आदेश** पृ० ७२ – ७९

[ इन चार आदेशों के लिए कातन्त्र में चार तथा पाणिनीय व्याकरण में दो सूत्र, कातन्त्रीय विधान में क्रमव्यत्यास से विशिष्ट कार्यों का ज्ञापन, तदनुसार द्वितीया-बहुवचन में पितरः, अतिजरसिन, अतिजरस्स्य, तथा भिक्षुष्य शब्दों की साधुता, बालावबोधार्थ पृथक् सूत्रों की रचना ]

**१५. स्मै-स्मात्-स्मिन्-इ आदेश तथा सु-आगम पृ० ७९ – ९९**

[ सर्वनाम – संज्ञक अकारान्त लिङ्ग से होने वाले चार आदेश तथा एक आगम, सर्वादिगण में द्विशब्द से पूर्व एवं पर में किम् शब्द का पाठ, सर्वनाम की अन्वर्थता, संज्ञा तथा उपसर्जन में सर्वनामप्रयुक्त कार्यों का अभाव, सर्वार्थप्रतिपादक जगत्-कृत्स्न आदि शब्दों की सर्वनामता का अभाव, कातन्त्रीय सु-आगम के लिए पाणिनीय व्याकरण में सुट् आगम, कातन्त्रीय 'इ' आदेश के लिए पाणिनि का 'शी' आदेश, पाणिनीय दीर्घ ई-उच्चारण का विशेष प्रयोजन तथापि कातन्त्रीय ह्रस्व इ-विधान की ही संगति, अल्पादिगण - पठित शब्दों से तथा द्वन्द्व समास में वैकल्पिक इ आदेश ]

**१६. इ-आदेशभिन्न सर्वनाम कार्य का निषेध पृ० ९९ – १११**

[ द्वन्द्वसमास - तृतीयासमास - बहुव्रीहिसमास में पाणिनि द्वारा सार्वनामिक कार्यों का निषेध न करके सर्वनाम संज्ञा का ही निषेध, व्याख्याकारों द्वारा "दिशां वा" सूत्र बनाए जाने का औचित्यसाधन ]

**१७. लोप, एकार-ह्रस्व-इकार आदेश पृ० १११ – १९**

[ श्रद्धासंज्ञक वर्ण (शब्द) से परवर्ती प्रथमाविभक्ति - एकवचन – सिप्रत्यय का लोप, संज्ञापूर्वक निर्देश की सुखार्थता, तृतीया - एकवचन टाप्रत्यय-षष्ठी सप्तमीद्विवचन ओस् प्रत्यय में श्रद्धासंज्ञक आकार का लोप, पाणिनि द्वारा टा के लिए आङ् का प्रयोग, 'हे श्रद्धे !' आदि में श्रद्धासंज्ञक आकार को एकारादेश, 'हे अम्ब !' आदि में अम्बार्थक शब्दस्थ आकार को ह्रस्व, 'श्रद्धे, माले' इत्यादि में औ को इ आदेश तथा कातन्त्रैकदेशीय वररुचि आदि आचार्यों का मतभेद ]

**१८. ङे को यै-ऐ, ङसि को यास्-आस्, ङस् को यास्-आस् तथा ङि को याम्-आम् आदेश पृ० ११९ – २६**

[ पाणिनि का प्रक्रियागौरव, याट् - आट् - स्याट् आगम - वृद्धि आदि प्रक्रिया का गौरव ]

**१९. ह्रस्व, लोप, औकारादेश, स् को न्, टा को ना, अदस् को अमु, इ को ए, उ को ओ, अकारलोप, औ आदेश, अ को उ, आ आदेश तथा सिलोप** पृ० १२६ – ५७

[‘हे नदि ! हे वधु !’ में ई- ऊ वर्णों का ह्रस्व, ‘नदीम्-नदीः’ आदि में अम्-शस् प्रत्ययघटित अ का लोप, पाणिनि के पूर्वरूप-पूर्वसवर्णदीर्घ-विधान में गौरव, अपाणिनीय होने के कारण वररुचि के मत का खण्डन, ‘नदी-मही’ आदि में सिलोप, ‘ईकारात्’ पाठ एवं ‘लक्ष्मी’ शब्द को अव्युत्पन्न माने जाने के विषय में विचार-समाधान, ‘वाक्-तडित्’ में सिलोप, सूत्रकार द्वारा प्रकृत सूत्र बनाए जाने का औचित्य, ‘अग्निम्-पटुम्’ आदि में अम्-प्रत्यय के अकार का लोप, ‘अग्नी-पटू’ आदि में औ को इ, ‘अग्नीन्-पटून्’ आदि में शस्प्रत्ययस्थ स् को न्, हेमकर आदि आचार्यों का अभिमत, ‘अग्निना-पटुना’ आदि में टा को ना आदेश, टा के लिए पाणिनि - द्वारा आङ् का प्रयोग, ‘अमुना’ आदि में अदस् को अमु आदेश, ‘अग्नयः, पटवः’ आदि में इ को ए तथा उ को ओ आदेश, ‘हे अग्ने ! हे धेनो ! में इ को ए-उ को ओ ‘अग्नये, पटवे’ आदि में इ को ए-उ को ओ, ‘अग्नेः, धेनोः आदि में ङस्-प्रत्ययस्थ अ का लोप, ‘अग्नौ-धेनौ’ आदि में इ-उ-ङि को औकार आदेश, ‘सख्युः, पत्युः’ आदि में ङस्प्रत्ययघटित अ को उ, ‘पितुः, मातुः’ आदि में ऋ-अ को उ ‘पिता-माता’ में ऋ को आ आदेश]

**२०. अग्निवद्भाव, अर्-आर् आदेश, सिलोप, नु-आगम, लुक् तथा आम् आदेश** पृ० १५७ – ८५

[कातन्त्रकार का अतिदेशविधानरूप प्रक्रियागौरव तथापि उसके विधान की अनिवार्यता, ‘पितरौ-पितरः – पितरि-मातरि’ में ऋ को अर् आदेश, द्वितीया-बहुवचन में ‘पितरः’ पद की सिद्धि, ‘कर्तारौ - कर्तारः – स्वसारौ – स्वसारः’ में ऋ को आर् आदेश, ‘धातोः – तृशब्दस्य’ पदों का सार्थकत्व, ‘हे कर्तः ! हे स्वसः !’ आदि में ऋ को अर्, ‘हे वृक्ष ! हे अग्ने !’ आदि में सिलोप, ‘वृक्षाणाम्-अग्नीनाम्’ आदि में नु-आगम, ‘त्रयाणाम्’आदि में नु-आगम, ‘ष्णान्तायाः’ में अन्तपद की सार्थकता, लोकव्यवहार के अनुसार संख्यार्थक शब्दों का उपादान, ‘कति-पञ्च’ आदि शब्दों में जस्-शस् का लुक् तथा ‘नियाम्-ग्रामण्याम्’ आदि में ङि को आम् आदेश]

## [द्वितीयः सखिपादः]

**२१. अग्निसंज्ञा का निषेध तथा नदीवद्भाव पृ० १८६ – २०१**

[ कातन्त्रकार के अनुसार 'सखि' शब्द की अग्निसंज्ञा नहीं होती तथा पाणिनि के अनुसार घिसंज्ञा, अग्निसंज्ञा की अन्वर्थता तथा घिसंज्ञा की कृत्रिमता, 'सख्या-सख्ये' में गुणाभाव, 'हे स्त्रि ! स्त्रियै, स्त्रीणाम्' आदि में नदीवद्भाव, तदनुसार ह्रस्व-ऐ-नु आगम आदि कार्यों की प्रवृत्ति, 'श्रीणाम्-श्रियाम्, भ्रूणाम्-भ्रुवाम्, बुद्ध्यै-बुद्धये, श्रियै-श्रिये, धेन्वै-धेनवे' आदि में वैकल्पिक नदीवद्भाव ]

**२२. लोप, प्रत्ययलक्षणप्रयुक्त कार्यों का निषेध, मु-आगम, तु-आगम, ई-शि-आदेश, नु-आगम, अन् आदेश पृ० २०१ – २५**

['पयः- तत्-सुसखि' इत्यादि में सि-अम् प्रत्ययों का लोप तथा प्रत्ययलक्षण मानकर प्राप्त दीर्घादेशादि कार्यों का निषेध, 'कुण्डम्-अतिजरम्' आदि में मु-आगम, 'अन्यत्-इतरत्-कतमत्' आदि में तु-आगम, पाणिनि द्वारा विहित 'अद्ड्' आदेश का लाघव-गौरव 'कुण्डे-पयसी' आदि में औ को ई-आदेश, 'पद्मानि-पयांसि' में 'जस्-शस्' को शि-आदेश-नु-आगम, पाणिनि का नुमागम, 'वारिणी-वारिणे' इत्यादिमें नु-आगम, 'अस्थ्ना-दध्ना-अक्ष्णा' आदि में इ को अन्- आदेश, पाणिनीय अनङादेश का विधान तथा न् - आदेश में लाघव होने पर भी 'अन्' आदेश के विधान का औचित्य]

**२३. पुंवद्भाव, दीर्घ, उपधादीर्घ, अन्-आदेश, ऐ-आदेश पृ० २२५ – ५०**

['कर्त्रा-कर्तृणा कुलेन, मृदवे-मृदुने वस्त्राय'आदि में वैकल्पिक पुंवद्भाव-कातन्त्रकार द्वारा वा-निर्देश से एवं पाणिनि द्वारा गालव आचार्य के उल्लेख से, 'अग्नीनाम्-धेनूनाम्' आदि में नु-आगम से पूर्व इ-उ को दीर्घादेश, 'पञ्चानाम्-सप्तानाम्' आदि में न् की उपधा अ को दीर्घ, 'राजा-सामानि' आदि में घुट्संज्ञक प्रत्ययों के

परवर्ती रहने पर न् की उपधा को दीर्घ, 'श्रेयान्-महान्' आदि सकारान्त-तकारान्त शब्दों में न् की उपधा को दीर्घ, पाणिनि के 'श्रेयस् - महत्' प्रातिपदिक तथा कातन्त्रकार के श्रेयन्स् – महन्त्, 'आपः – स्वाम्पि' इत्यादि नोपध – अनोपध 'अप्' शब्द में दीर्घ, 'भवान् – सुस्रोताः' इत्यादि अन्त्वन्त – असन्त शब्दों में दीर्घ, 'दण्डी - वृत्रहा – अर्यमा' इत्यादि में उपधादीर्घ, 'उशना – अनेहा' आदि में स् को अन् आदेश, पाणिनीय अनङ् आदेश का विधान, 'सखा' में इ को अन् आदेश तथा 'सखायौ - सखायः' में इ को ऐ– आदेश]

**२४. उकारादेश, औकारादेश, आकारादेश, नु - आगम, शन्तृङ् प्रत्यय में नकार का लोप, घ् - आदेश, औ - आदेश, आ - आदेश पृ०२५०-७०**

['द्युभ्याम् - द्युषु' इत्यादि में वकार को उकारादेश, 'द्यौः, हे द्यौः ! ' में वकार को औकारादेश, 'द्याम् - अतिद्याम्' में वकार को आकारादेश, 'युङ्, युञ्जौ, युञ्जः' में नु-आगम, 'ददत् - जाग्रत्' आदि शब्दस्थ शन्तृङ् प्रत्यय के नकार का लोप, 'तुदती - तुदन्ती, भाती - भान्ती' आदि में वैकल्पिक नकारलोप, 'वृत्रघ्नः - वृत्रघ्ना' आदि में ह् को घ् - आदेश, 'गौः, गावौ, गावः' आदि में ओ को औ, 'गाम् - गाः' में ओ को आ तथा 'पन्थाः - मन्थाः - ऋभुक्षाः' में इकार को आकारादेश। 'पथिन् - मथिन् - ऋभुक्षिन्' प्रातिपदिकों में पाणिनि द्वारा किए गए 'न् को आ- इ को अ - थ् को न्थ' आदेशों में प्रक्रियागौरव]

**२५. अन् आदेश, इ - लोप, नलोप, अनुषङ्गलोप, अन् - लोप, उ - आदेश, नु - आगम, ह्रस्वादेश, म् - आदेश, उ - आदेश पृ०२७० - ९४**

['पन्थानौ - मन्थानौ' आदि में इ को अन् आदेश, 'पथः - मथः - पथिकः' इत्यादि में इकार - नकारलोप, 'विदुषः – वैदुष्यम् - महतः - महत्ता' आदि में अनुषङ्ग (नकार) - लोप, 'पुंसः - पौंस्नम् - पुंस्त्वम्' आदि में 'अन्' भाग का लोप, 'चतुरः – चतुर्भिः - चतुर्थः - चातुर्यम्, अनडुहः, अनडुह्यम्, अनडुही ' आदि में वा को उ - आदेश, 'अनड्वान्' में नु - आगम, 'हे प्रियचत्वः । हे अनड्वन् ! ' शब्दों में वा - घटित आ को ह्रस्व, 'अमुष्मात्- अमुष्मिन्' आदि में द् को म् 'पेचुषः – पेचुषी -

विदुषः - विदुषी - वैदुषम्' आदि में व को उ तथा 'शुनः - शुनी - यूनः - मघोनः' इत्यादि में व को उ आदेश]

**२६. औ - आदेश, अलोप - दीर्घ, 'तिरश्चि - उदीचि - पद्' आदेश, अलोप - अलुप्तवद्भाव, अकारलोप, इय् - उव् आदेश पृ०२९४-३१८**

['प्रष्ठौहः - प्रष्ठौही' आदि में वा को औ, 'प्रतीचः - प्रतीची - गोऽचः - गोऽची' इत्यादि में अलोप - दीर्घ आदेश, 'तिरश्चः - तिरश्ची - तैरश्च्यम्' इत्यादि में 'तिर्यन्च्' को 'तिरश्च्' आदेश, 'उदीचः - उदीची - औदीच्यम्' इत्यादि में 'उदन्च्' को 'उदीचि' आदेश, 'व्याघ्रपदः - व्याघ्रपदी - सुपदः - कुम्भपदी' आदि में पाद् को पत् आदेश, 'पाद - पाद्' शब्दों की समानार्थता, 'राज्ञः - दध्नः - प्रतिदीव्ना' में अन् के अकार का लोप, इसका अलुप्तवद्भाव होने के कारण धकार को दकारादेश तथा वकार को ऊट् आदेश प्रवृत्त नहीं होता। 'कीलालपः - कीलालपा' इत्यादि में धातुगत आकार का लोप तथा 'नियौ - नियः - लुवौ - लुवः - सुधियौ - सुधियः - मित्रभुवौ - अतिभुवः' इत्यादि में ईकार को इय् एवं ऊकार को उव् आदेश]

**२७. 'य् - व्' आदेश, धातुवद्भाव, उत्त्व, 'अक् - क' प्रत्यय, इकारादेश पृ० ३१८ - ३९**

[ग्रामण्यौ - ग्रामण्यः - यवल्वौ - यवल्वः' आदि में पाणिनीय यण्विधान का वैचित्र्य, 'भ्रुवौ - भ्रुवः' इत्यादि में धातुवद्भाव के अतिदेश से ऊ को उवादेश, अतिदेशकरण का औचित्य, 'स्त्रियौ - स्त्रियः - स्त्रियम् - स्त्रियः' में धातुवद्भाव के फलस्वरूप ई को इयादेश, पाणिनीय इयङ् - उवङ् - विधान, 'हे भोः ! हे भवन्!' में वन्त् को वैकल्पिक उ - आदेश, पाणिनि द्वारा इसके निष्पादन का अभाव, 'उच्चकैः - नीचकैः - सर्वकः - विश्वकः – मयका - पचतकि' आदि में अक् प्रत्यय, यावकः - मणिकः - अश्वकः - वृक्षकः - एहकि - देवदत्तकः' में क - प्रत्यय तथा 'सर्विका - उष्ट्रिका - पाचिका - पाठिका' आदि में अकार को इकारादेश]

## [तृतीयो युष्मत्पादः]

### २८. 'वस् - नस् - वाम् – नौ - ते - मे - त्वा - मा' आदेश तथा उनका निषेध पृ० ३४०-५३

['पुत्रो वः' में 'युष्माकम् - युष्मभ्यम् - युष्मान्' के स्थान में **'वस्'** आदेश, 'पुत्रो नः' में 'अस्माकम् - अस्मभ्यम् - अस्मान्' के स्थान में 'नस्' **आदेश**, 'ग्रामो वाम्' में 'युवयोः - युवाभ्याम् - युवाम्' के स्थान में 'वाम्' आदेश, 'ग्रामो **नौ'** में 'आवयोः - आवाभ्याम् - आवाम्' के स्थान में 'नौ' आदेश, 'पुत्रस्ते' में 'तव - तुभ्यम्' के स्थान में 'ते' आदेश, 'पुत्रो मे' में 'मम - मह्यम्' के स्थान में 'मे' आदेश, 'पुत्रस्त्वा पातु' में 'त्वाम् के स्थान में 'त्वा' आदेश एवं 'पुत्रो मा पातु' में 'माम्' के स्थान में 'मा' आदेश, 'युष्माकं कुलदेवता - अस्माकं पापनाशनः' आदि में 'वस् - नस्' आदेशों का पादादि में होने के कारण अभाव तथा 'पुत्रो युष्माकं च, पुत्रोऽस्माकं च' आदि में चादियोग के कारण 'वस् - नस्' आदेशाभाव]

### २९. लोप, युव- आव - आम् - आन् - त्वम् - अहम् - यूयम् - वयम् - तुभ्यम् - मह्यम् - तव - मम - अत् - अभ्यम् - आकम् - ए - आ आदेश पृ० ३५३ - ८४

['युष्मभ्यम् - अस्मभ्यम् - त्वयि –मयि' आदि में युष्मद् - अस्मद्घटित द् का लोप, 'युवाभ्याम् - आवाभ्याम्' आदि में 'युष्मद् - अस्मद्' को 'युव - आव' आदेश, 'त्वाम् - माम् - युवाम् - आवाम्' आदि में 'अम्- औ' को 'आम्' आदेश, 'युष्मान् - अस्मान्' आदि में 'शस्' प्रत्यय को 'आन्' आदेश, 'त्वम् - अहम्' आदि में 'त्व + सि - अह + सि' को 'त्वम् - अहम्' आदेश, 'यूयम् - वयम्' आदि में 'युस्मद् + जस् - अस्मद् + जस्' के स्थान में 'यूयम् - वयम्' आदेश, 'तुभ्यम् - मह्यम्' आदि में 'त्वद् + ङे - मद् + ङे' को 'तुभ्यम् - मह्यम्' आदेश, 'तव - मम' आदि में 'त्व + ङस् - म + ङस्' के स्थान में 'तव – मम' आदेश, 'त्वत् - मत् - युष्मत् - अस्मत्' आदि में 'ङसि - भ्यस्' को 'अत्' आदेश, 'युष्मभ्यम् - अस्मभ्यम्' आदि में भ्यस् को 'अभ्यम्'

आदेश, 'युष्माकम् - अस्माकम्' में साम् को 'आकम्' आदेश, 'त्वया - मया - युवयोः - आवयोः' में अकार को एकारादेश तथा 'युवाभ्याम् - आवाभ्याम्' आदि में अकार को आकारादेश]

## ३०. आ - औ - अर्वन्ति - मघवन्तु - जरस् - तिसृ - चतसृ - र् आदेश

पृ० ३८४ - ४०३

['राः - राभ्याम्' आदि में ऐकार को आकारादेश, 'अष्टाभिः - अष्टासु - प्रियाष्टौ' आदि में नकार को आकार, 'अष्टौ' में 'जस् - शस्' को औ, 'अर्वन्तौ - अर्वन्तः - अर्वत्यम् - अर्वती' में 'अर्वन् को 'अर्वन्त्' आदेश, 'मघवान् – मघवन्तौ - माघवतम् - मघवती' आदि में 'मघवन्' को 'मघवन्त्' आदेश, 'जरे- जरसौ, जराः - जरसः' में 'जरा' को वैकल्पिक 'जरस्' आदेश, 'तिस्रः - चतस्रः' आदि में 'त्रि - चत्वार्' को 'तिसृ - चतसृ' तथा ऋ को र् आदेश]

## ३१. ऋ को दीर्घनिषेध - वैकल्पिक दीर्घ, अ - क- म - स - इयम् - अयम् - अत् - अन - एन - भिर् - औ - लोप - उवर्ण - ई - द् आदेश

पृ० ४०३ – ३८

['तिसृणाम् – चतसृणाम्' में ऋ को दीर्घ आदेश का निषेध, 'नृणाम् - नृणाम्' में ऋ को वैकल्पिक दीर्घादेश, 'सः, तौ, यत्र, तत्र' आदि में दकार को अकारादेश, 'कः – कदा' आदि में 'किम्' को 'क' आदेश, 'इमौ - इमकौ' आदि में दकार को मकारादेश, 'असौ - असकौ' में दकार को सकार, 'सः - स्यः' आदि में तकार को सकार, 'इयम् - अयम्' में इदम् को 'इयम् - अयम्' आदेश, 'आभ्याम् - एभिः' में इद को अकारादेश, 'अनेन - अनयोः' में इद को अन - आदेश, 'एतं व्याकरणमध्यापय अथो एनं वेदमध्यापय' इत्यादि में 'एत – इद' को एन आदेश, 'एभिः' में 'भिस्' को भिर् आदेश, 'असौ - असकौ' में अ को औ तथा सि- लोप 'अमुम् - अमू - अमून्' में उकार–ऊकार आदेश 'अमी - अमीभ्यः' में एकार को ईकारादेश, 'अद्भिः स्वद्भ्याम्' में पकार को दकारादेश तथा 'स्वनडुत् - उपानत् - सुविद्वत् - उखास्रत् - पर्णध्वत्' आदि में 'हकार - सकार' आदि को दकारादेश]

### ३२. ड्-ग्-वर्गीय चतुर्थ वर्ण-अकृतवद्भाव-र्-ईर्-ऊर्-स्-लोप आदेश पृ० ४३८-७०

['मधुलिट्-सुविट्-षट्-देवेट्' इत्यादि में 'हकार-शकार-षकार-जकार' को डकारादेश, 'गोधुक्-गोधुग्भ्याम्' इत्यादि में हकार को गकारादेश, 'वाक्-दृक्' में चकार-शकार को गकारादेश, 'निघुट्-ज्ञानभुत्-गर्धप्' आदि में 'गकार-बकार-दकार को घकार-भकार-धकार आदेश, 'सजूः-आशीः-आशीस्ता' इत्यादि में षकार को रकार, 'गीः -गीर्षु-धूः-धूस्तरा' आदि में इर् को ईर्-उर् को ऊर् आदेश, 'अहः-अहोभ्याम्' इत्यादि में नकार को सकारादेश तथा 'विद्वान्-पुम्भ्याम्, साधुमक् साधुतट्-सखा-राजभ्याम्' इत्यादि में सकार-ककार-नकार आदि का लोप]

### ३३. नलोपनिषेध-अलुप्तवद्भाव-र्-वर्गीय तृतीय वर्ण-वर्गीय प्रथम वर्ण – विसर्ग – पूर्ववर्ती कार्यसम्पन्नता पृ० ४७०-८९

['हे राजन्! हे साम !' इत्यादि में नलोप का निषेध, 'राजभ्याम्- राजसु-विद्वान्' आदि में नकार-संयोगान्त लोप के अलुप्तवद्भाव से दीर्घ-नलोप आदि का प्रतिषेध, 'सर्पिर्भ्याम्-धनुर्भ्याम्' आदि में सकार को रकारादेश, 'योषिद्भ्याम्-मज्जति-लज्जते' इत्यादि में तवर्गीय तृतीय वर्णादेश, 'षट्सु-इच्छति-गच्छति' इत्यादि में ड् को ट्–छ् को च् आदेश, 'विधप्-विधब्-वाक्-वाग्' आदि में भ् को प्-ब्, एवं ग् को क्-ग् आदेश, 'गीः-धूः-वृक्षः-पयोभ्याम्' आदि में रकार-सकार को विसर्गादेश तथा 'सुवाक्- सुवाग्-सुपथि-सुद्यु-देवेट्-देवेड्' इत्यादि में च् को ग्, ग् को क्, सि-अम्-नलोप, व्-इ को उ-य् आदेश एवं ज् को ड्-ड् को ट् आदेश]

### ३४. प्रथमं परिशिष्टम् = कातन्त्रपरिशिष्टम् पृ० ४९१ – ५३१

[नामप्रकरण के १०१, षत्वप्रकरण के ५१ तथा णत्वप्रकरण के ३७ सूत्र। सर्वादिगण, लुग्विधि, पद्-हृद्-यूषन्-दोषन् आदि आदेश – म-र-दीर्घ – लोप आदि विधियाँ, वर्णका – वर्तका आदि शब्दसिद्धि, 'अग्नीषोमौ – युधिष्ठिर – भूमिष्ठ-

सुषाम - प्रतिष्णात' आदि में मूर्धन्यादेश, कोटरावण – इक्षुवण - पूर्वाह्ण – क्षीरपाण – क्षीरपेण – प्रणम्य – प्रणिनाय – प्रणिगदति' आदि में णत्वविधान तथा 'प्रकम्पन – शत्रुघ्न – प्रनङ्भ्याम् – तृप्नोति – नरानार्त – आचार्यानी – नरवाहन' आदि में णत्वनिषेध ]

३५. द्वितीयं परिशिष्टम् = रूपसिद्धिः पृ० ५३२ – ४७

[नामचतुष्टय अध्याय के प्रारम्भिक तीन पादों की दुर्गवृत्ति में प्रस्तुत 'अग्नौ - अतिमह्यम् - अनडुहः – अनेहा – अमुष्मिन् – उदीचः – अहम् – गोमान् – तिरश्चः – तृष्णक्– नप्तारौ – पाचिका – पेचुषः – भाती भान्ती कुले – मघवान् – यूनः - राज्ञः – श्रद्धा – सामानि – स्वसारौ – हे भो ! – हे सामन्' आदि ६५१ उदाहरणों की सूची, जिनकी समीक्षाखण्ड के अन्तर्गत रूपसिद्धि की गई है ]

३६. तृतीयं परिशिष्टम् = श्लोकसूची पृ० ५४८ – ५४

[दुर्गवृत्ति – दुर्गटीका – पञ्जिका तथा कलापचन्द्र में प्रसङ्गतः उद्धृत ७५ श्लोकों की सूची। इसमें अर्धश्लोक भी सम्मिलित हैं ]

३७. चतुर्थं परिशिष्टम् = व्युत्पत्तिपरकशब्दसूची पृ० ५५५ – ५८

[दुर्गवृत्ति – दुर्गटीका – विवरणपञ्जिका तथा कलापचन्द्र नामक चार व्याख्याओं में जिन शब्दों के लौकिक विग्रह – समास – सन्धि आदि उक्त हुए हैं – ऐसे 'अनुषङ्ग – अभिधेयसत्ता – आमन्त्रित – उपधा – ग्रामणी – दधि – द्वीप – पति – प्रत्यय – भ्रू – राजन्वान् – मालान्ती – विधि – विराम – संयोग – सम्राट् – सोमप – स्वाम्पि – स्वयम्भू' आदि १५५ शब्दों की सूची ]

३८. पञ्चमं परिशिष्टम् = विशिष्टशब्दाः पृ० ५५९ – ८२

[विषयसूचक - प्रक्रिया - पारिभाषिक प्रयोग - शैली - पूर्वाचार्यप्रयोग – रूढशब्द – मतविशेषसूचक – सिद्धान्त – समन्वयबोधक लगभग ९०० विशिष्ट शब्दों का संग्रह इसमें किया गया है ]

**३९. षष्ठं परिशिष्टम् = उद्धृता ग्रन्थाः पृ० ५८३ – ८४**

[दुर्गवृत्ति – दुर्गटीका – विवरणपञ्जिका – कलापचन्द्र नामक चार व्याख्याओं तथा समीक्षा में जिन मुख्य ५० ग्रन्थों का स्मरण किया गया है – उनका इसमें वर्णानुक्रम संग्रह प्रस्तुत है]

**४०. सप्तमं परिशिष्टम् = उद्धृतानि आचार्यनामानि पृ० ५८५ – ८८**

[दुर्गवृत्ति – दुर्गटीका – विवरणपञ्जिका – कलापचन्द्र तथा समीक्षाभाग में प्रसङ्गतः जिन लगभग १०० प्रमुख आचार्यों का समुदाय या व्यक्ति के रूप में स्मरण किया गया है। उनका यहाँ वर्णानुक्रम संकलन प्रस्तुत है]

**४१. अष्टमं परिशिष्टम् = साङ्केतिकशब्दपरिचयः पृ० ५८९ – ९१**

॥श्रीः॥

# कातन्त्रव्याकरणम्

## अथ द्वितीये नामचतुष्टयाध्याये प्रथमो धातुपादः

### ८०. धातुविभक्तिवर्जमर्थवल्लिङ्गम् [२/१/१]

**[सूत्रार्थ]**

भू-आदि धातुओं तथा सि-आदि विभक्तियों से भिन्न अर्थवान् शब्द की लिङ्ग संज्ञा होती है ॥८०।

**[दु०वृ०]**

**अर्थोऽभिधेयम् ।** धातुविभक्तिवर्जमर्थवल्लिङ्गसंज्ञं भवति । **वृक्षः, कुण्डम्, कुमारी, डित्थः, राजपुरुषः, औपगवः, कारकः ।** धातुविभक्तिवर्जमिति किम् ? अहन्, वृक्षान् । अर्थवदिति किम् ? वृक्ष इति व्-ऋ-क्-षामेकैकशो मा भूत्, राजनित्युन्मत्तवचनस्य च । लिङ्गप्रदेशाः – "**लिङ्गान्तनकारस्य**" (२/३/५६) इत्येवमादयः ।।८० ।

**[दु०टी०]**

**धातु० ।** भूप्रभृतयो धातवः, विभक्तयः स्यादयस्त्यादयश्च । तसादीनां तु सर्वनामकार्यं प्रत्येव विभक्तिसंज्ञेति । ततस्तत्रेत्याचष्टे ततयति, तत्रयति । "**इनि लिङ्गस्य०**" (३/२/१२) इत्यादिभिर्भवति । धातुश्च विभक्तिश्चेति द्वन्द्वः, न धातोर्विभक्तिरिति तत्पुरुषः, त्यादिवर्जमित्यकरणात् । त्यादयः स्यामहिपर्यन्ता एव रूढितः "**स्यसंहितानि त्यादीनि भविष्यन्ती**" (३/१/३२) इति स्यति-स्यतस्-स्यन्तीत्यादि-परिगणनाद् वा । **अर्थोऽभिधेयमिति ।** अर्थशब्दोऽभिधेयनिवृत्तिप्रयोजनधनवचनो यद्यपि, तथाप्यभिधेयवचन एव गृह्यते व्याप्तिन्यायात्, अभिधेये हि निवृत्त्यादीनामन्तर्भावात् । तद् यथा – मशकार्थोऽयं धूमः, मशकनिवृत्तिरभिधीयते । केनार्थेनागतोऽसि, केन

प्रयोजनेनेति । अर्थवानयम्, धनवानयमिति । प्रतीयमानं वस्तुमात्रमर्थः । **'औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः'** (मी० द० १/१/५), ततश्च नित्ययोगे वन्तुरेव, सामान्यत्वान्नपुंसकलिङ्गम् । स पुनश्चतुर्धा भिद्यते – जातिर्द्रव्यं गुणः क्रिया चेति । तथा चाह –

**शब्दैरेभिः प्रतीयन्ते जातिद्रव्यगुणक्रियाः।**

**चातुर्विध्यादमीषां तु शब्द उक्तश्चतुर्विधः।।**

**कश्चिद्** आह – **जातिरेव शब्दार्थ इति।** न हि निराधारा जातिरुपलभ्यते इति द्रव्ये बुद्धिरुत्पद्यते साहचर्यात् । यथा वृक्षादयो न स्वतो वृक्षा नाप्यवृक्षाः, वृक्षत्वादिजातियोगाद् वृक्षाः । एवं गुणोऽपि न स्वतः शुक्लो नाप्यशुक्लः शुक्लत्वजातियोगात् तदाधारतया गुणविशेषः शुक्ल इति शुक्लः पट इति तेनैव शुक्लत्वबलेन द्रव्ये समवेते शुक्लगुणे समवायाद् बुद्धिरिति । तथा पटेन संयुक्तेऽभ्रकादिद्रव्ये समवेते शुक्लगुणे समवायात् शुक्लत्वबलादेव शुक्लः पट इति ।

डित्थादिशब्दानामप्येकद्रव्यसमवायिनां बाल्याद्यवस्थाभेदात् सामान्यमस्तीति डित्थ एवायमिति बुद्धिरुत्पद्यते । तथा चित्रादिषु डित्थोऽयं लिख्यते तथा क्रियास्वपि अधिश्रयणादिषु कर्मसु समवेतैरधिश्रयणत्वादिसामान्यैस्तेष्वेव कर्मसु प्रत्येकं समवायाद् एकार्थसमवायि पचतिक्रियात्वं पचतिशब्दवाच्यमिति, लिङ्गवचनादयस्तु तदाश्रयसम्बन्धादिति ।

**अन्यः** पुनराह – **द्रव्यमेव शब्दार्थ** इति । जात्यादयस्तु द्रव्यसंसर्गिणोऽशब्दवाच्या अपि सन्निधानबलेनैव तस्य भेदकाः । यथा यत्रेयं पताका तद् देवदत्तस्य गृहमिति उदयविनाशवदपि संसर्गिबलात्तदेवेदमिति बुद्धिरुत्पद्यते असर्वद्रव्यनाशाच्च गवादिशब्देनैव स्वाभिधेयशून्य इति । तथा च स एवायं गौः, तदेवेदं कार्षापणम्, तानेव शालीन् भुङ्क्ते एकत्वाध्यवसायाज्जाताविव द्रव्येऽपि नित्यत्वमेव शब्दार्थस्य ।

**अन्यः** पुनराह – **उभयमेवैतत् शब्दार्थ** इति । कदाचिज्जातिः प्रधानं द्रव्यं गुणभूतं कदाचिद् वा द्रव्यं प्रधानं जातिर्गुणभूतेति । **अपरः** पुनराह – **सत्तैव शब्दार्थ** इति,

**सम्बन्धिभेदात् सत्तैव भिद्यमाना गवादिषु।**

**जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः।।** (वा० प० ३/१/३३) इति ।

एतेन सत्तैव धात्वर्थश्चेति सर्वशब्देन प्रतिपद्यते। तस्मात् सत्ता नित्या सदसद्भ्यामवाच्यरूपा प्रथमत एव विवर्तमाना महानिति बुद्धिरुत्पद्यते, **सत्तामात्रत्वादात्मनः।** सैवात्मा, सैव नित्या, अन्यस्य सर्वस्यैव परिणामित्वात्। **वैशेषिकाणाम**परसत्तापि द्रव्यगुणकर्मणां सम्प्रत्ययहेतुर्विशेषाख्या नित्या इति।

**अन्यः** पुनरन्यथैव प्रतिपद्यते – स्वार्थद्रव्यलक्षणो द्विक इति। नहि लिङ्ग-संख्यादयो विभक्तिमन्तरेण प्रतिपद्यन्ते। तत्र स्वार्थो विशेषणं द्रव्यं विशेष्यम्। विशेषणेन हि लिङ्गं विशेष्यं नियम्यते, तत्पुनः स्वरूपजातिगुणक्रियाद्रव्यलक्षणम्। अत्र स्वरूपं जात्यात्मकमसाधारणरूपम्। यथा डित्थस्य डित्थत्वं जातिः सामान्यम्, यथा गवां गोत्वम्। गुणः सहजो धर्मः, यथा पटस्य शुक्लं रूपम्। क्रिया धात्वर्थः, यथा गन्तुर्गतिः। द्रव्यं गुणाधिकरणम्, यथा दण्डो दण्डिनः। एतैः खलु विशेषणभूतैरेतेषु विशेष्यभूतेषु लिङ्गस्य प्रतिनियमः। ननु स्वरूपमनन्वितमस्तु नाम अनन्वितायाः संज्ञाया नियामकम्। गुणक्रियाद्रव्याणि पुनरनन्वितानि प्रतिविषयं व्यावृत्तस्वभावानि कथमन्वितानां संज्ञानां नियामकानि ? नैष दोषः, गुणक्रियाद्रव्याश्रितानां सामान्यानामनन्वितत्वात्।

ननु यदि सामान्यानामनन्वयस्तान्येव तर्हि लिङ्गं नियमयन्तु कथं **चतुष्टयी शब्दानां प्रवृत्तिः ?** सत्यम्, **द्विविधैव शब्दानां प्रवृत्तिः –** अन्वितानां जातिः, अनन्वितानां स्वरूपम्। यदि नाम गुणादिसमवायिनां सामान्यानां शब्दनियामकत्वाद् गुणादीनामपि शब्दनियामकत्वमुपचर्यते, कथं पुनरेतदुभयमभिधत्ते न तावद् युगपद् विशेषण-विशेष्यभावात्। न हि युगपदुपलभ्यमानयोर्विशेषणविशेष्यभावो गृह्यते गृहीतेन हि विशेषणेनेन्द्रियसहकारिणा विशेष्यं प्रतिपाद्यते, नापि क्रमशो विशेषणविशेष्यप्रतिपत्तिः समकालसङ्केतस्मृतितः शब्दश्रुतेरुपरमाद् नहि ज्ञानयोर्विनश्यतोः सहावस्थानं सम्भवति, नित्यत्वप्रसङ्गात्।

क एवमाह – उभयमभिधत्ते इति न पुनरुभयमर्थः स्वार्थविशिष्टं द्रव्यं तावच्छब्दतः प्रतिभासत एव। तत्र हि शब्दानां नियोगः, नहि नियामकमन्तरेण केवले स्वार्थे द्रव्ये वा शब्दानां प्रतिनियमः शक्योऽभिधातुम्। स्वार्थस्तु नियामकत्वाद् विशेष्यज्ञानहेतुत्वाच्चानभिधेयोऽप्यभिधीयते, स हि शब्दानां प्रवृत्तिं प्रयोजयति।

ननु कथमगृहीतः स्वार्थः शब्दार्थं विशेषयति, न हि दण्डादिरगृहीतः पुरुष-विशेषको भवति ? नैष दोषः, दिगादीनामगृहीतानामपि वृक्षादिविशेषणभावात् समानौ

हि तद्भावाभावौ। यथैव हि दण्डादीनां ग्रहणानुविधायि विशिष्टं ज्ञानम् एवमग्रहणानुविधायि दिगादीनां विशिष्टं ज्ञानम्। तस्माद् ग्रहणाग्रहणयोर्यदवच्छेदस्तद्विशेषणम्। एवं चागृहीत एव स्वार्थः सविशेषणं द्रव्यं सहशब्देन प्रतिपादयतीति।

**अन्यः** पुनराह- नेह सामान्यविशेषविषयः शब्दः किन्तु प्राणिनामवबोधरूपं प्रतिभासमात्रं जनयति स तस्यार्थः, यस्तु सामान्यरूपयुक्तस्य विशेषवतोऽर्थस्य बुद्धौ प्रतिभासः सामान्यरूपेण प्रयोगस्य पुनः पुनस्तत्रैव दर्शनाभ्यासात्, न पुनः परमार्थतोऽप्याकारग्रहविशिष्टरूपः शब्दस्य विषयः। उक्तञ्च –

**अभ्यासात् प्रतिभाहेतुः सर्वः शब्दोऽपरैः स्मृतः।**

**बालानां च तिरश्चां तद् यथार्थप्रतिपत्तिषु॥** (वा० प० २/११७)

'अग्निष्टोमेन यजेत' इति प्रवृत्त्यनुकूला प्रतिभा उपजायते, 'ब्राह्मणो न हन्तव्यः' इति निवृत्त्यनुकूला।

ननु विभक्तिमन्तरेण वृक्षादीनां कथमर्थप्रतिपादनम्। न हि ते केवलाः प्रयोगमर्हन्ति ? सत्यम्। **अन्वयव्यतिरेकाभ्यामर्थभेदप्रतिपत्तिः** प्रकृतिसाम्येऽपि प्रत्ययभेदात् संख्या-कारकभेदप्रतिपत्तिः। तद् यथा– वृक्षं पश्याते, वृक्षौ पश्यति, वृक्षेणाभिहतो वृक्षाभ्यामभिहत इति प्रत्ययसाम्येऽपि प्रकृतिभेदादर्थभेदप्रतिपत्तिः। तद् यथा- वृक्षं पश्यति, चन्द्रं पश्यतीति कथं वाक्यस्य लिङ्गस्य न भवति। साध्यं साधनं च येन प्रत्याय्येत तदेकं वाक्यम्, न तु बहुभेदकं तदेव प्रवर्तकम्, विवक्षितार्थावेदनाद् वाक्याच्चापोद्धृत्य पदं तदनुकूलमन्वाख्यायेत। तथा च **लिङ्ग्यतेऽनेनार्थ इति कृत्वा लिङ्गमन्वर्थमुच्यते।** असंज्ञानत्वात् पूर्वपदातिशयकृतं खल्वन्त्यपदं वाक्यम्, तदेव हि वाक्यार्थं गमयति। पूर्वपदार्थविशिष्टः खल्वन्त्यपदार्थो वाक्यार्थः, न पुनरर्थान्तरापोहः। न ह्ययं पन्थाः स्रुघ्नं गच्छतीत्युक्ते कस्यचिदर्थस्यापोहो गम्यते। अन्त्यपदं च विभक्त्यन्तं तत् कथं लिङ्गसंज्ञम्भवति वाक्यसंस्कारपक्षेऽपीति।

**अपर** आह – वाक्यस्य क्रियाप्रधानत्वात् क्रियायाश्चासत्त्वभूताया एकत्वादिसंबन्धाभावान्नैव विभक्तिर्नामेति नलोपोऽपि न स्यात्, धातुवर्जनादेव वृत्रहन्निति। समासस्य तु लिङ्गसंज्ञा न विहन्यते, एकार्थत्वादवयवविभक्तयोऽपि प्रागेव लुप्ता इति। धातुविभक्तिवर्जम् इत्यादि। ननु धातुवर्जमनर्थकं विभक्तिवर्जमिति विभक्त्यन्तस्य

प्रतिषेधो भविष्यति कथमहन्निति नलोपप्रसङ्गः ? नैतदेवम् । हन्तिरयमविभक्तिप्रकृतिः कथं विभक्त्यन्तो भवितुमर्हति यस्य विभक्तिरन्तोऽवयवः स समूहो विभक्त्यन्तः, न च हन्तेर्विभक्तिरन्तोऽवयवो विभक्तिवर्णानामेवान्तर्वर्तिनां विभक्तिग्रहणेन विभक्तिकार्यप्रतिषेधः । यथा वृक्षान्, लिङ्गान्तत्वाभावान्नलोपो न भवति । राजप्रभृतीनामपि लिङ्गान्तत्वादेव नलोपविधिः । समूहश्च विभक्तिप्रत्ययः प्रकृतिसङ्गतस्तदर्थविशिष्टमेवार्थं गमयति, प्रकृतिभागेऽतिशयत्वमाधाय निवृत्त इति ।

तथा च **"न संबुद्धौ"** (२/३/५७) इति वचनं विधीयते कथं 'वृत्रहा, अर्धभाक्' क्विबादिलोपे प्रकृतिरेवार्थसंबन्धात् प्रधानं तदर्थमभिधत्तेऽनाख्याततत्वाद् गौणोऽत्र क्रियार्थ इति न प्रतिषेधः, **"आ धातोरघुट्स्वरे"** (२/२/५५) इति ज्ञापकाद् वा । ननु अनर्थकानामप्रयोगादर्थवद्ग्रहणमनर्थकम् । नैवम्, अर्थवतां प्रयोगे तदेकदेशानामनर्थकानामस्ति प्रसङ्गः । यथा 'वृक्षः' इत्यत्र व्-ऋ-क्-षामिति अवयवविरतिरस्तीति । विरामे धुटां प्रथमतृतीयौ स्याताम्, वनं धनमिति नलोपश्च । तथा राजनित्युन्मत्तवचनस्य चानुकृतस्यानुकार्यानुकरणयोर्भेदस्याविवक्षायामिति ।

**अन्ये** पुनरन्यथा चोदयन्ति परिहरन्ति च – **'अर्थवन्तो वर्णाः'** इति ।

**धातु-लिङ्ग- निपातानां वर्णानाममर्थदर्शनात् ।**
**तिलांशे च तिलौघे च न तैलं सैकते यतः ।।**
**नायं हेतुरिहैकान्तो गृहयन्त्रादिदर्शनात् ।**
**अनर्थकावयवानां समुदायोऽर्थवानिति ।।८०।**

[वि० प०]

**नमः परमदेवतायै ।** धातु० । **अर्थोऽभिधेयमिति ।** अभिधेय-निवृत्ति-प्रयोजन-धनेषु बहुष्वर्थेषु यद्यप्यर्थशब्दो वर्तते, तथाप्यभिधेयवचन एव गृह्यते । कथमिति चेत्, एवं मन्यते-निवृत्त्यादयो ह्यर्थाः परस्परासंस्पर्शिनस्ततस्तेषामन्यतमस्य ग्रहणे सत्यन्येषामसंग्रह एव स्यादतस्तदवस्थमेवानवस्थादेश्यमापद्यते । यावदयमर्थो गृह्यते तावदेष कथन्न गृह्यते इति । अभिधेयवचने त्वर्थशब्दे गृह्यमाणे निवृत्त्यादयोऽप्यर्थाः संग्रहीतुं शक्यन्त एवेति तेषामप्यभिधेय एवान्तर्भावात् । तथाहि 'मशकार्थोऽयं धूमः' – मशकनिवृत्तिरभिधीयते । निवृत्तिरभिधेयत्वेन निर्दिश्यते । तथा 'केनार्थेनागतोऽसि' – केन प्रयोजनेनेत्यभिधीयते । 'अर्थवानयम्' – धनवानित्यभिधीयते ।

यद्येवम् – 'शशविषाणम्, बन्ध्यासुतः' इत्येवमादीनामभिधेयस्याभावादप्रसङ्गो लिङ्गसंज्ञाया एव। तदयुक्तम्। न खल्वेवं विज्ञायते- अर्थोऽस्यास्तीति वन्तुः। सत्तासमाविष्टमभिधेयं यस्यास्तीति, अपि त्वर्थोऽस्यास्तीति अभिधेयसत्तासमाविष्टमभिधेयं यस्यास्तीति। ईदृशश्चाभिधेयं सर्वेषामेव विद्यते, यतो भूतं भविष्यदत्यन्तासद् वा वस्तु न प्रच्यवतेऽभिधेयसत्तायाः कुत इति चेत्, सर्वस्यैवाभिधीयमानत्वात्। न हि सर्वथा अविद्यमानाभिधेयः शब्दो लोके प्रयोगमर्हतीति। तेन यत्प्रयोगे यत्प्रतीयते स तस्यार्थः। तथा चोक्तम् –

**शब्देनोच्चार्यमाणेन यद् वस्तु प्रतिपद्यते।**

**तस्य शब्दस्य तद् वस्तु जायतामर्थसंज्ञया।।** इति।

**धातुविभक्तिवर्जमिति।** अथ कथमिह समासः। किं धातुश्च विभक्तिश्चेति द्वन्द्वः, आहोस्विद् धातोर्विभक्तिरिति तत्पुरुषः ? सत्यम्। द्वन्द्व एवायं न तत्पुरुषः। तत्पुरुषे हि त्यादिवर्जमिति कुर्यात्। न हि त्यादिमन्तरेण धातोरन्या विभक्तिरस्तीति। न चैवं वर्तमानाया एव वर्जनं स्यादित्याशङ्कनीयम्। त्यादिशब्दस्य स्यामहि-पर्यन्ताख्यातदशविभक्तिषु प्रख्याततत्वात्। यदि च त्यादिशब्दो वर्तमानायामेव वर्तते, तदा स्यसंहितानि त्यादीनि भविष्यन्तीति सिद्धे स्यति-स्यतः-स्यन्तीत्यादि किमित्या**चार्यः** पर्यजीगणत्। तद्धि परिगणनं विभक्त्यन्तरस्य स्यसंहिताप्रसङ्गप्रतिषेधार्थम्। स च त्यादिशब्देनैव केवलवर्तमानाविषयेण सिद्ध इत्यलं परिगणनयेति। धातुविभक्ती वर्जयतीति प्राप्ये "**कर्मण्यण्**" (४/३/१)।

अर्थवदिति सामान्यरूपत्वान्नपुंसकम्। **लिङ्गसंज्ञमिति।** लिङ्गं संज्ञा यस्येति विग्रहे ? [1]गोरप्रधानस्यान्त्यस्य स्त्रियामादादीनाञ्च इति ह्रस्वः। **अन्वर्थसंज्ञा चेयम् – लिङ्ग्यते चिह्न्यतेऽनेनैकदेशेनार्थो गम्यते इति लिङ्गम् अविस्पष्टार्थप्रतिपत्तिहेतुरुच्यते।** अत एव वाक्यस्यार्थवतोऽपि लिङ्गसंज्ञा न भवति, तस्य विवक्षितसम्पूर्णस्पष्टार्थप्रतिपादकत्वात्। तथा कृत्-तद्धित-समासानामपि अर्थवत्त्वाल्लिङ्गसंज्ञा सिद्धा इत्युदाहरति – राजपुरुष इत्यादि। अहन् इति "हनेर्ह्यस्तन्यां दिः सिर्वा, "**अड् धात्वादिः**" (३/८/

---

१. गोस्त्रीप्रत्ययस्योपसर्जनस्यान्त्यस्य ह्रस्वः (कात० परि०-नाम० ८१)।

१६) इत्यादिनाडागमः। "**अनु विकरणः कर्तरि**" (३/२/३२) इति अदादित्वादनो लुक् "**व्यञ्जनाद् दिस्योः**" (३/२/४७) इति लोपः। वृक्षानिति। "**शसि सस्य च नः**" (२/१/१६)।

नन्वनर्थकानामप्रयोगादर्थवतामेव लिङ्गसंज्ञा भविष्यति किमर्थवद्ग्रहणेनेत्याह- अर्थवदित्यादि। अर्थवतां शब्दानां प्रयोगे तदेकदेशानामनर्थकानामपि प्रयोगाल्लिङ्गसंज्ञा प्रसज्यते। ततो 'वृ-ऋ-कृ-षृ' इत्यादिष्ववयवकृतो विरामोऽस्तीति "**वा विरामे**" (२/३/६२) इत्यादिना प्रथमादिकार्यं स्यात्। किं च अनुकार्यानुकरणयोर्भेदस्याविवक्षया उन्मत्तवचनस्य मा भूद् इत्याह - राजन् इति। अथ लाघवार्थमिन्प्रत्ययः कथन्न कृत इति न देश्यम्, तस्य क्रियापदार्थकादेव दर्शनात्। अर्थनम् **अर्थः**। भावे घञ्, सोऽस्यास्तीति **अर्थी** वाचक उच्यते। तथा च अर्थादनागते इति घोषयन्ति। स चायं वन्तुर्नित्यशब्दार्थसंबन्धवादिनां मते नित्ययोगे, **अन्येषां** तु मते संसङ्ग एवेति ॥८०।

**[क० च०]**

**श्रीविद्याभूषणाचार्यसुषेणेन विनिर्मितः।**
**आस्तां कलापचन्द्रोऽयं कालापानां मनोमुदे॥**

प्रथमं तावत् सूचीकटाहन्यायेन सन्धिप्रकरणेन वर्णकार्यमुक्त्वा पदकार्ये कर्तव्ये आख्यातात् प्राक् **चतुष्टयप्रकरणमुच्यते।** तत्रेयं युक्तिः– वाक्यं हि क्रियाप्रधानं क्रियाया विशेष्यत्वात् कारकं च विशेषणं ततश्च **नागृहीतविशेषणा बुद्धिर्विशेष्ये चोपजायते,** विशेषणज्ञानमन्तरेण विशेष्यज्ञानं न भवतीत्यतस्तत्प्रतिपादकं चतुष्टय- प्रकरणमेव प्रागुच्यत इति सङ्गतिः।

**श्रीधातु०।** धातुविभक्तिवर्जमिति। ननु वर्जनं हि परित्यागः, न ह्यर्थवत्तया धातु- विभक्ती परित्यज्येते, तयोरप्यर्थवत्त्वात्। किन्तर्हि लिङ्गसंज्ञाप्राप्तिकाले, ततश्च निषेधस्य प्राप्तिपूर्वकत्वाद् 'अर्थवल्लिङ्गं धातुविभक्तिवर्जमिति' निर्देशो युज्यते ? सत्यम्। लिङ्गसंज्ञाप्राप्तिदशायां धातुविभक्ती वर्जयिष्यतीति मनसि कृत्वा तत्पूर्वदशायामपि योग्यतया धातुविभक्तिवर्जमित्युच्यते, क्रियायोग्यतयैव कृदन्तस्य प्रयोगात्। यथा अपचन्नपि सूपकारः पचनयोग्यतया पाचक उच्यते। अत एव "**स्वरोऽवर्णवर्जो नामी**" (१/१/७) इत्यत्र **कुलचन्द्रो**ऽप्युक्तवान् - कथमेकेन स्वरेणान्यः स्वरः परित्यज्यत

इति तत्र सिद्धान्तितम् । यथा 'कौण्डिन्यवर्जितेभ्यो ब्राह्मणेभ्यो दधि दीयताम्' इत्युक्ते नहि ब्राह्मणतया कौण्डिन्यो वर्ज्यते, किन्तर्हि दधिदानकाले । तद्वदिहाप्यदोषः ।

यद् वा वर्जशब्दोऽयमत्यन्ताभाववचनः, चेत् तर्हि धातुविभक्तिवर्जनं व्यर्थम्, धातुविभक्त्योरपि धातुविभक्त्यन्ताभावस्य सत्त्वेन तयोर्लिङ्गसंज्ञाप्रसङ्गात् । नहि धातुविभक्त्योर्धातुविभक्ती वर्तेते ? सत्यम् । **जातिरेव पदार्थ** इति मते धातुविभक्तिशब्देन धातुविभक्तित्वमुच्यते । ततश्च धातुत्व- विभक्तित्वात्यन्ताभाववद् यदर्थवत् तल्लिङ्गमिति ।

यद् वा वर्जशब्दोऽयमन्योऽन्याभाववचनः, ततश्च धातुविभक्त्योरन्योन्याभाववद् यदर्थवत् तल्लिङ्गमिति सर्वं सुस्थम् । अर्थवदिति वाच्य-वाचकलक्षणसंबन्धे षष्ठी, अर्थोऽस्यास्तीत्**यर्थवत्,** ततश्च येनार्थ उच्यते प्रतिपाद्यते तद् **अर्थवत्** । एतेन अर्थप्रतिपादकत्वमर्थवत्त्वमिति अर्थवल्लक्षणमायातम् । अथ तर्हि धूमशब्दोच्चारणादानुमानिकवह्निप्रतीतौ धूमशब्दस्यार्थवत्तया वह्न्यर्थे लिङ्गसञ्ज्ञा कथन्न स्यात् । नहि वह्न्यर्थे धूमशब्दस्य लिङ्गत्वमभिधीयत इति चेत् – वृत्तावर्थप्रतिपादकत्वमर्थवत्त्वमिति ब्रूमः । **वृत्तिश्च** शक्ति – लक्षणान्यतररूपा । नहि शक्त्या लक्षणया वा धूमशब्देन वह्निः प्रतीयते, अपि त्वनुमानेनैव ।

ननु तथाप्यजहत्स्वार्थवादिनां **नैयायिकानां** मते 'राजपुरुष' इत्यादीनां लिङ्गसंज्ञा कथन्न स्यात्, ते ह्यवयवशक्त्या पदार्थोपस्थितौ सत्यामप्यन्वयबोधात् समुदायेऽन्यां शक्तिं न कल्पयन्ति इति चेदुच्यते – वृत्तिप्रतिपाद्यार्थोपस्थापकत्वमर्थवत्त्वम् । उपस्थापकत्वं च तदुपस्थितिहेतुबुद्धिजनकत्वम्, ततश्च वृत्तिप्रतिपादितो राजत्व-पुरुषत्वविशिष्टो योऽर्थः संबन्धित्वेन तदुपस्थितिहेतुबुद्धिजनकत्वं राजपुरुषसमुदायस्यापि घटते । तथा 'शशविषाणम्' इत्यादौ वृत्तिप्रतिपादितः शशत्व- विषाणत्वविशिष्टो योऽर्थः शशे विषाणस्य वस्तुनः सत्ताविरहेऽपि योग्यताभ्रमेण प्रतीयमानसंबन्धितया तदुपस्थितिहेतुबुद्धिजनकत्वं शशविषाणादिसमुदायभागस्याप्यस्त्येव । एतेन संबन्धित्वाभावात् शशस्य विषाणमिति कथं षष्ठीति देश्यमपास्तम् । 'राजन्' इति निरर्थकानुकरणेऽपि वृत्तेरभावाद् अर्थवद्-ग्रहणस्य व्यावृत्तिः सुतरामेव संगच्छत इत्यग्रे व्याख्यास्यामः ।

अथ यदि वृत्तिप्रतिपाद्यार्थोपस्थापकत्वमर्थवत्त्वम् इत्युच्यते तदा 'शृणु राजन्' इत्यत्रापि अवयववृत्त्युपस्थाप्यार्थस्य समुदायेनोपस्थापितत्वादर्थवत्तया लिङ्गसंज्ञा कथन्न स्यात् चेत् ? वृत्तिप्रतिपाद्यार्थोपस्थापकताभिव्याप्तिमत्त्वमिति ब्रूमः । ततः 'शृणु राजन्'

इत्यत्र नास्ति लिङ्गसंज्ञावसरः 'राजन्'- भागस्य निरर्थकत्वात्। न च 'प्रपाचकः' इत्यादौ प्र-शब्देऽभिव्याप्तिमत्त्वं नास्तीति वाच्यम्। यावता पचिना प्रतिपादितः प्रकृष्टपचनस्वरूपे योऽर्थस्तदुपस्थापकताभिव्याप्तिमत्त्वं प्रावच्छेदेनैव संभवति। जहत्स्वार्थवादिनां **मीमांसकानां** मते पुनः 'राजपुरुषः' इत्यादिवत् 'प्रपाचकः' इत्यादौ समुदाये शक्तिरस्त्येवेति **संक्षेपः**।

न ह्यर्थवदित्यत्र परत्वात् संयोगान्तलोपः कथन्न स्यात्। न च परत्वं न संगच्छते, उभयोः सावकाशत्वाभावादिति वाच्यम्, 'विदुषः' इत्यादावनुषङ्गलोपस्य 'पुम्भ्याम्' इत्यादौ संयोगान्तलोपस्य च सावकाशत्वात्। नैवम्, नित्यत्वादुनषङ्गलोप एव प्रवर्तते। नित्यत्वं च कृताकृतप्रसङ्गित्वेन। तथाहि, संयोगान्तलोपे कृते **"न संयोगान्तौ"** (२/३/५८) इत्यादिनाऽलुप्तवद्भावादनुषङ्गलोपः प्राप्नोति . अकृते तु सुतरामेव प्राप्नोति, उभयपक्षेऽपि **"विरामव्यञ्जनादौ०"** (२/३/६४) इत्यतिदेशबलादिति बोध्यम्। अत एव **"व्यञ्जनान्नोऽनुषङ्ग"** (२/१/१२) इत्यस्य **टीकायां** 'संयोगान्तलोपस्यालुप्तवद्भावाच्च नित्योऽनुषङ्गलोपः' इत्युक्तम्। अथ तर्हि संयोगान्तलोपस्यापि नित्यत्वमनुषङ्गलोपे कृते नकारस्यालुप्तवद्भावात् संयोगान्तलोपः प्रवर्तते। अकृतेऽपि सुतरामेवेति कृताकृतप्रसङ्गित्वात् ? सत्यम्। तत्र विरामव्यञ्जनादिसान्निध्यात् संयोगान्तलोपसाहचर्याद् अन्तर्भूतनकारस्यैव अलुप्तवद्भाव इति कुतो मध्यभूतनकारस्यालुप्तवद्भावप्रसङ्गः।

अथ तर्हि "धुट्स्वराद् घुटि नुः" (२/२/११) इत्यत्र गोमन्तीति प्रत्युदाहरणे न्वागमे कृते नकारद्वयस्य संयुक्तसजातीयानामनेकस्याप्युच्चारणं प्रति भेदो नास्तीति न्यायाद् दूषणानुपपत्तौ किमर्थं प्रत्युदाहरणमिति पूर्वपक्षे 'गोमत्कुलानि' इत्यत्र समासे प्रत्ययलोपलक्षणन्यायेन न्वागमे सति **"व्यञ्जनान्तस्य यत्सुभोः"** (२/५/४) इत्यतिदेशबलादनुषङ्गलोपे **"न संयोगान्तौ०"** (२/३/५८) इत्यादिना मध्यभूतनकारस्यालुप्तवद्भावात् पुनरनुषङ्गलोपो न भवतीति टीकाकृत्सिद्धान्तविरोधः। तथा च **टीकायां** 'ननु गोमन्तीति कथं प्रत्युदाहरणम्' श्रुतेरभेदात्। नैवम्। 'गोमत्कुलानि' इत्यत्र समासे नलोपे पुनर्नलोपो न स्यादिति **"व्यञ्जनान्तस्य यत्सुभोः"** (२/५/४) इति जातौ चरितार्थत्वाद् व्यक्तौ शास्त्रातिदेशपक्षे च न-संयोगान्तयोरलुप्तवद्भावात् पुनर्नलोपो न स्यादनुषङ्गत्वाभावादिति, नैवम्। टीकार्थापरिज्ञानाद् विरोधः शङ्क्यते। न-संयोगान्तयोरलुप्तवद्भावादिति टीकापङ्क्तेरयमाशयः। तथाहि 'गोमत्कुलानि' इत्यत्र

नित्यत्वादनुषङ्गलोपे पुनरनुषङ्गसंयोगान्तयोर्लोपप्रसक्तौ सत्यां लुप्तनकारस्य **'असिद्धं बहिरङ्गम्'** (काला०प०४२) इत्यादिन्यायादसिद्धवद्भावान्नकारलोपो न भवति, अनुषङ्गत्वाभावात् । संयोगान्ततकारलोपस्तु भवत्येव विरोधाभावात् । ततो 'गोमन्कुलानि' इति स्थिते संयोगान्ततकारस्यालुप्तवद्भावादनुषङ्गलोपः कथन्न स्याच्चेत्, नैवम् । संयोगान्ततकारस्यालुप्तवद्भावत्वे प्राप्तेऽपि नकारलोपो लुप्तनकारस्यासिद्धवत्त्वादनुषङ्गत्वं नास्तीति । अतो नानुषङ्गलोप इति । अत एवाह – नसंयोगान्तयोरलुप्तवद्भावाद् इति नकारस्यालुप्तवत्त्वम् **'असिद्धं बहिरङ्गमन्तरङ्गे'** (काला० प० ४२) इति न्यायादसिद्धमित्यर्थः। संयोगान्तस्यालुप्तवत्त्वम् **"न संयोगान्तौ०"** (२/३/५८) इत्यादिनेत्याशयः। अत एव **"न संयोगान्तयोः"** इति द्विवचनोपन्यास इति तस्माद् 'गोमन्कुलानि' इति प्रयोगनिवृत्त्यर्थं गोमन्तीति प्रत्युदाहरणं युक्तमेतत् । एतेन मध्यभूतनकारस्यालुप्तवद्भावप्रत्याशया सिद्धान्ते टीकाविरोध इति यदुक्तं तन्निरस्तम् । मध्यभूतनकारं प्रत्यलुप्तवद्भावस्यासिद्धत्वेन व्याख्यातत्वादिति ।

यद् वा **"विरामव्यञ्जनादिष्वनडुन्नहिवन्सीनां च"** (२/३/४४) इत्यत्र वन्सेरुपादानं किमर्थम् ? यावता अनुषङ्गलोपेऽपि **'न संयोगान्तौ०'** (२/३/५८) इत्यादिनाऽलुप्तवद्भावात् संयोगान्तलोप एव भविष्यति, तदा सकारस्याभावात् कस्य स्थाने दकारो भविष्यति । तस्मात् तत्र वन्सेरुपादानान्मध्यभूतनकारस्यालुप्तत्वं नास्ति । अतः संयोगान्तलोपो न भविष्यति, अनुषङ्गलोपस्तु भवत्येव ।

यद् वा अनुषङ्गसंज्ञाया गुरुकरणेनान्वर्थबलात् संयोगान्तलोपं बाधित्वा प्रागेवानुषङ्गलोपः । तथाहि कार्यान्तरस्य प्रसक्तावपि **'अनुषज्यते इत्यनुषङ्गः'** इति **केचित्** । तन्न, **टीकाकृतैव** दूषितत्वात् । अर्थोऽभिधेयमिति । ननु कथम् अभिधेयमिति नपुंसकम् अर्थशब्दसामानाधिकरण्यात् पुंसा निर्देशो युज्यते वाच्यलिङ्गत्वादिति ? सत्यम्, अभिधेयं प्रयुज्य सामान्यत्वात् क्लीबत्वे पश्चादर्थशब्देन सह संबन्धः ततश्चाभिधेयं घटपटादि अर्थशब्दवाच्यमित्यर्थः। यथा क्रिया साध्यमुच्यते इति । सामान्येन साध्यमित्युक्त्वा पश्चात् क्रियेति संबन्धः ।

यद् वा अर्थशब्दोऽयमभिधेयं वक्तीत्यर्थः। वृक्ष इत्यादि । **शब्दार्थाश्चत्वारः संभवन्तीति जाति-द्रव्य-गुण-क्रिया इति** । तथा च **टीकायाम्** –

**शब्दैरेभिः प्रतीयन्ते जाति-द्रव्य-गुण-क्रियाः।**
**चातुर्विध्यादमीषां तु शब्द उक्तश्चतुर्विधः।।**

एतदनुसारेणैव चत्वार्युदाहरणानि । तत्र जातौ-वृक्षः । क्रियायाम्-कुण्डम् । गुणे-कुमारी । द्रव्ये-डित्थः । ननु –

**स्वार्थो द्रव्यं च लिङ्गं च संख्या कर्मादिरेव च ।**

**अमी पञ्चैव लिङ्गार्थास्त्रयः केषांचिदग्रिमाः ।।**

इति पक्षद्वयं दृश्यते, तत्कथमपरकल्पना क्रियते दुर्गेण ? सत्यम् । नेयमपरकल्पना, किन्तु 'स्वार्थो द्रव्यं च ' इत्यादौ यः स्वार्थः प्रवृत्तिनिमित्तस्वरूपोऽभिहितस्तस्यैव स्वार्थस्य प्रकर्षेण पुन**श्चतुर्धा** भेदो दर्शितः ।

ननु जाति-द्रव्य-गुण-क्रियेति श्लोकक्रमेणैवोदाहर्तुं युज्यते, तत्कथं व्यतिक्रमेण ? सत्यम्,

**जाति-क्रिया-गुण-द्रव्यैः स्वभावाख्यानमीदृशम् ।**

**दण्डिनो मतमाश्रित्य दुर्गेणापीत्युदाहृतम् ।।** इति ।

यद् वा आद्यत्रयं लिङ्गत्रयसूचनार्थम् । आधुनिकसंकेतविषयोऽप्यर्थशब्दवाच्य इति चतुर्थमुदाहरणमिति । यद् वा कारिकायां छन्दोऽनुरोधादुक्तम्, न पुनस्तावदेवं क्रमः, क्रमाक्रमयोरकिञ्चित्करत्वात् । अथ तर्हि 'राजपुरुषः' इत्युदाहरणत्रयं कथमुच्यते – "**अर्थवदधातुरप्रत्ययः प्रातिपदिकम्**" (अ० १/२/४५) इति परसूत्रम् । तत्र सूत्रे च प्रत्ययवर्जनात् कृत्तद्धितानां लिङ्गसंज्ञायामप्राप्तायां "**कृत्-तद्धित-समासाश्च**" (अ०१/२/४६) इत्यपरसूत्रं कृतम् । समासस्यापि अप्रत्ययान्तत्वेन पूर्वेणैव सिध्यतीति यत् समासग्रहणं तन्नियमार्थम् । तथाहि विशेष्य-विशेषणभावापन्नानामर्थवत्समुदायानां मध्ये समासस्यैव भवति, नान्यस्य । एतेन वाक्यं व्यावर्त्यते । एवं सर्वमेकेनैव सूत्रेणास्माभिः साधितमिति परोदाहरणत्रयेण **परमतं कटाक्षितमिति संक्षेपः**। धातुविभक्तिवर्जमिति किमिति **वृत्तिः ?** समासनिविष्टत्वादेकदा प्रत्याख्यायते व्यावृत्तिः, प्रत्युदाहरणं तु क्रमेण बोद्धव्यम् ।

ननु धातुवर्जनं किमर्थम् 'अहन्' इत्यत्र विभक्त्यन्तत्वेन लिङ्गसंज्ञाभावान्नलोपो न भविष्यति ? नैवम् । "**न संबुद्धौ**" (२/३/५७) इति वचनाल्लुप्तविभक्तिकानां लिङ्गसंज्ञां प्रति विभक्त्यन्तता नास्तीति ज्ञापितत्वात् । तथाहि 'हे राजन्!' इत्यत्रापि विभक्त्यन्तत्वेन लिङ्गसंज्ञाया अभावान्नलोपो न भविष्यति किं "**न संबुद्धौ**"

(२/३/५७) इति वचनेन। तस्मात् तद् बोधयति – साक्षाद् विभक्तिकानामेव विभक्त्यन्तता (लिङ्गत्वाभावः) न लुप्तविभक्तिकानामिति। न च 'हन्' इति धातुस्वरूपं प्रत्युदाहरणमुचितमिति वाच्यम्, लिङ्गसंज्ञायां सत्यामपि धातुसंज्ञायाः परत्वेन त्यादिभिराघ्रातत्वात्। तस्माल्लुप्तत्वादेव वर्जनमिति। तर्हि विभक्तिवर्जनं किमर्थम्? 'वृक्षान्' इत्यत्र नलोपः स्यादिति चेत्, नैवम्। नकारकरणवैयर्थ्यं स्यात्। अथ नकारस्यैतदेव फलं यद् विसर्गाभाव इति। नैवम्, यदा विसर्गाभाव एव फलं तदा **"शसि सस्य च नः"** (२/१/१६) इत्यत्र नकारग्रहणमपनीय 'सस्य च लोपः' इति कुर्यात्, 'शस् अः' इति वा। तस्मान्नकारकरणादेव नलोपो न भविष्यति, किं विभक्तिवर्जनेन? नैवम्। **"लिङ्गान्तनकारस्य"** (२/३/५६) इत्यस्य महाविराम एव विषयः, "वा विरामे" (२।३।६२) इत्यस्य विरामग्रहणादिति वक्ष्यति। अतो वृक्षानानयेत्यादौ महाविरामाभावेन नकारकरणस्य चरितार्थत्वमस्ति। वृक्षानित्यत्र महाविरामे लोपः स्यादेवेति **कुलचन्द्राशयः।**

**तदसत्।** यथा 'राजा गच्छति' इत्यादौ पदविरामेऽपि **"लिङ्गान्तनकारस्य"** (२/३/५६) इति लोपो भविष्यति। तथा 'वृक्षानानय' इत्यत्रापि लोपप्राप्तिरिति।

**हेमकरस्तु** 'कुण्डे, वने' इति प्रत्युदाहृतवान्। **अयमाशयः** 'कुण्डे' इत्यादौ विभक्तिग्रहणाभावे **"स्वरो ह्रस्वो नपुंसके"** (२/४/५२) इति ह्रस्वे 'कुण्डि, वनि' इत्यनिष्टं स्यात्। न चात्र एकारस्य लाक्षणिकत्वादिति वाच्यम्, वर्णग्रहणे तन्न्यायस्यानित्यत्वात्। यथा 'वृक्षांश्चरति' इत्यादौ लाक्षणिकनकारस्याप्यनुस्वारपूर्णः शकारः इति। तथाहि **"ङशषछान्तेजादीनां डः"** (२/३/४६) इत्यत्र **टीकायां** वक्ष्यति – 'शकारग्रहणं ज्ञापयति लाक्षणिकपरिभाषेयमनित्या प्रायेण वर्णविधाविति'। ननु कथमेवमुच्यते, यावता विभक्त्यन्तभागस्य नपुंसकवृत्तित्वं नास्तीति कथं ह्रस्वप्रसङ्गः। यथा **"नपुंसकात् स्यमोर्लोपः"** (२/२/६) इत्यत्र लि ङ्गस्य नपुंसकत्वं न तु विभक्त्यन्तस्य? सत्यम्, प्रथमा विभक्तिर्लिङ्गार्थ एव क्रियते, अतः प्रथमान्तस्यापि क्लीबत्वमस्त्येव।

**गोपीनाथस्तु**-अभूवन्नित्यत्र विभक्तिवर्जनाभावे नलोपः स्यात्। न च नकारकरणसामर्थ्यादेव नलोपो न भविष्यतीति वाच्यम्, **"अन उस् सिजभ्यस्त०"** (३/४/३१) इत्यत्र विशेषणार्थत्वेन नकारस्य सार्थक्यात्, अन्यथा 'अ उस्' इति कृते 'पपाच' इत्यत्रापि उसादेशः स्यादिति। वृक्षानिति यदुदाहृतम्, तत् प्रथमकक्षायामित्युक्तवान्।

तदसत्, 'अ उस्' इति कृतेऽपि सिचः साहचर्याद् अद्यतन्या अकार एव ज्ञातव्यः, कुतः परोक्षाया अकारस्य प्रसङ्गः ? न च उस्-विधौ अदिति कृते नकारकरणं व्यर्थमिति वाच्यम्, तस्यानुबन्धत्वे प्रमाणाभावात् ।तस्माद् वृक्षानितिवदभूवन्नित्यत्रापि नकारकरणाल्लोपो न भविष्यति, किं विभक्तिवर्जनेन ?

**केचित्तु** 'अश्वयुजमाचष्टे' इति इनि कृते विभक्त्यन्तभागस्य लिङ्गत्वे परत्वाद् विभक्तिलोपं बाधित्वा **"इनि लिङ्गस्य"** (३/२/१२) इत्यादिनाऽन्त्यस्वरादिलोपो भवन् अमो लोपः स्यात् । ततश्च क्विपि कृते 'अश्वय्' इति साधितव्ये 'अश्वयुग्' इति प्रयोगः स्यात्, तन्निरासार्थमेव विभक्तिवर्जनं कार्यमित्याहुः । तदसत्, यावता **"यावत्सम्भवस्तावद्विधिः"** (कात०प०५७) इति न्यायादत्रैवामो लोपेऽपि पुनरुज्भागलोपस्य निवारणाशक्यत्वात् । एतद् दूषणम् असङ्गतमेव, यतोऽनेनैव न्यायेन पुनरप्यश्वय्-शब्दस्याय्भागलोपप्रसङ्गात् ।न चेयमनवस्थेति वाच्यम्, यावदनेकस्वरत्वं तावदेव लोपप्रसङ्गात् ।अतोऽमो लोपे **'असिद्धं बहिरङ्गम्'** (काला० प० ४२) इति न्यायात् पुनरुज्भागस्य लोपो न भवतीत्ययमपि **सिद्धान्तः।**

**अन्ये** तु विभक्त्यन्तस्य लिङ्गसंज्ञायां सत्याम् 'उपकुम्भम्' इत्यत्र संख्या-कर्मादिविशेषाभिव्यक्तये पुनर्विभक्त्युत्पत्तिः स्यादित्याहुः ।**वस्तुतस्तु** वृक्षानेव प्रत्युदाहरणं युक्तम्, औ- जसोर्नकारकरणे सार्थकत्वम् । अर्थवदिति किमिति, ननु वृक्षशब्दस्यावय-वत्वेन निरर्थकत्वात् । यथा 'व-ऋ-क-षाः' वर्णाः प्रत्युदाहृताः, तथा अकारोऽपि प्रत्युदाहर्तुं युज्यते तत् कथं नोदाहृतः ? सत्यम्, व्-ऋ-क्-षाम् इत्युपलक्षणमकारोऽपि बोद्धव्य इति केचि**न्मूर्खाः। अन्ये** तु अकारोऽपि प्रत्युदाहृत एव, तर्हि व–ऋ-क-षाणामिति वक्तुं युज्यते, नैवम् । **'आगमशासनमनित्यम्'** (काला०प०२१) इति न्वागम इत्याहुः । तन्न । अकारेऽपि प्रत्युदाहृते **'अवयवसिद्धेः समुदायसिद्धिर्बलीयसी'** (व्या० परि० १०८) इति न्यायात् समुदायसम्भ्वेऽवयवानां लिङ्गसंज्ञायाः प्राप्तिरेव नास्तीति कुतः प्रत्युदाहरणसङ्गतिः ।

**वस्तुतस्तु** अकारस्य लिङ्गसंज्ञा स्यादेव, पूर्वपूर्ववर्णस्मृतिसहकारेणान्त्यवर्णस्यार्थ-प्रतिपादकत्वेनाकारस्य निरर्थकत्वाभावान्नोदाहृतोऽकार इति ।यद् वा 'व्–ऋ–क्-षाम्' इत्यत्राकारद्वयम् । एक उच्चारणार्थः, अन्यश्चाकारप्रदर्शनार्थः । ततश्च समानदीर्घत्वे परलोपे च व्-ऋ-क्-षाम् इति **दिक्।**

एकैकश इति। ननु "संख्यैकार्थाभ्यां वीप्सायाम्" (२।६।४०-९)इति शस्-प्रत्ययस्य विधानाद् उक्तार्थतया द्विर्वचनस्य व्यर्थत्वेन कथम् एकैकश इति। तथा च तत्र **वृत्तौ** 'द्वौ द्वौ देहि द्विशो देहि' इत्युदाहृतम्, सत्यम्। तत्र "वीप्सायाम्" इति **सप्तमी द्विधा भिद्यते – विषयतया अभिधेयतया च** । ततो विषयपक्षे शब्दप्रतिपाद्य-वीप्सायामेव शसो विधानान्नास्त्यर्थतेति। यद् वा एका लिङ्गसंज्ञा एकशः क्रमशो मा भूत्। यद् वा 'एकैकशः' इति प्रकृत्यन्तरम्। तथा च **भारते- "स्वयमेकैकशः पुत्राः पतन्ति युद्धदुर्मदाः"** इति। यद् वा एकस्य एकशः 'एकैकशः' इत्येकस्य वृ-ऋ-कृ-षादेरेकशः क्रमशो लिङ्गसंज्ञा मा भूत्। ननु **'अवयवसिद्धेः'** (व्या०प० १०८) इति न्यायात् समुदायस्यैव लिङ्गसंज्ञा भविष्यति, नतु अवयवस्यैवेत्याह – राजन् इत्यादि, उन्मत्तवचनानुकरणस्येत्यर्थः। **अयमाशयः –** राजेति वक्तव्ये उन्मत्तो मत्ततया राजन् इत्याह, तत्समीपवर्ती किमयमाह ? इत्यपरेण पृष्टः सन् अनुकरोति राजन् इति; तदिदं प्रत्युदाहरणम् अनुकरणमन्तरेणापदस्यासाधुत्वात्। असाधुशब्दस्या-नुकरणस्यापि साधुत्वमिष्यते। तत्तु **"तत्र चतुर्दशा०"** (१/१/२) इत्यादौ प्रतिपादितम्। ननु कथं तस्यानुकरणस्यानर्थकत्वम्, अनुकार्यप्रतिपादकत्वादेवार्थवत्त्वात्, नैवम्। यन्मते शब्दो नित्यस्तन्मते उन्मत्तवचनानुकार्येण सहानुकरणस्याभेदेन निरर्थकत्वं सिद्धिमिति। अत एव अनुकरणेऽपि उन्मत्तवचनस्य चेत्युक्तं **वृत्तिकृता।** तर्हि शब्दस्वरूपोऽर्थः केन निवार्यताम् ? नैवम्। अर्थशब्देनात्र वृत्त्युपस्थाप्यार्थाभिधानात्, नहि राजन् इति शब्दस्वरूपे राजन्शब्दस्य वृत्तिरस्ति। ननु **'वृत्तिर्हि द्विधा शक्ति-लक्षणान्यतररूपा'।** तत्र शक्तिर्मा भूत्, लक्षणा केन निवार्यते। नहि लक्षणामन्तरेण शब्दस्वरूपार्थप्रतिपादने किमपि सामर्थ्यमस्तीति ? नैवम्, शास्त्रेण मनसा वा शब्दस्वरूपोपस्थितौ सत्यां पुनः स्वरूपोपस्थित्यर्थं वृत्तिकल्पने प्रमाणाभावात्, गौरवाच्च। नहि ढक्कादीनां शब्दा अपि शक्त्या लक्षणया वा गृह्यन्ते (वृत्त्यर्थौ) वृत्त्या स्वरूपोप-स्थापनेऽपि प्रथमं तु तद्वर्णात्मकशब्दज्ञानस्यावश्यकत्वात्, न ह्यनुपस्थितः शब्दः शक्त्या लक्षणया वा कञ्चिदर्थमुपस्थापयतीति **प्रभाकराः।**

कथं तर्हि **"न सखिष्टादावग्निः"** (२/२/१) इत्यत्र शब्दानुकरणाद् विभक्तिरिति चेदुच्यते, यत्र प्रत्यक्षेण स्वरूपोपस्थितावपि तज्जातीयशब्दान्तरस्वरूपोऽर्थोऽभिमतः, तत्रावश्यं वृत्तिरपि कल्पनीया। नहि शब्दान्तरं शास्त्रेण मनसा वा प्रत्यक्षेणोपस्थितं

संभवति । **नैयायिकानां मते** यद्यपि वृत्त्या पदजन्यपदार्थोपस्थितिं विना नान्वयबोध इति नियमाद् भेदविवक्षां विनापि शब्दानुकरणस्वरूपस्येतरपदार्थेन सहान्वयार्थमवश्यं लक्षणया पदस्य स्वरूपोपस्थापकत्वं वाच्यम्, तथापि यत्रेतिशब्दप्रयोगस्तत्र तेनैवेतिशब्देन स्वशक्त्या प्रथमोपस्थितशब्दस्वरूपोपस्थापने कृते सति तस्य पुनरितरपदार्थेन सहान्वयः, प्रथमोपचारितानुकरणशब्दस्य स्वरूपोपस्थापनार्थं वृत्तिकल्पने मानाभावाद् गौरवाच्च ।

न च इतिशब्दस्थितौ अनुकरणस्य वैफल्यमिति वाच्यम्, इतिशब्दस्य प्रक्रान्तवाचित्वेन तद्विना विशेषबोधकत्वाभावात् । अत इतिशब्दसहितं राजन् इति प्रत्युदाहृतम्, अतो निरर्थकत्वमनुकरणस्य सिद्धमेव । वृत्तिकारोऽपि उन्मत्तवचनानुकरणस्य इत्यनुक्त्वा अनुकार्यानुकरणयोरभेदप्रतिपादनायोन्मत्तवचनस्येत्युक्तवान् । **त्रिलोचनोऽपि** भेदस्याविवक्षायामित्युक्तवान् । **अभेदस्तु साहजिक, भेदः** पुनर्विवक्षावशाद् भवति, सोऽत्र न विवक्षितः, असत एव विवक्षा संभवतीति । एतेन राजन्-शशविषाणयोस्तु महान् भेदः सिद्धः । शशविषाणस्य वृत्त्युपस्थाप्यार्थेनार्थवत्त्वाद् 'राजन्' इत्यत्र वृत्तिरेव नास्तीति **संक्षेपः।**

**हेमकर**स्त्वाह - राजेत्युन्मत्तवचनं तस्यानुकरणं राजन् इति कथं भवति । यतो यथोक्तवर्णसमुदायप्रतिपादनार्थमनुकरणं संधीयते । न तु 'राजन्' इति राजेति वर्णसमूहं प्रतिपादयति ? सत्यम् । अर्थानुकरणमिदम् 'राजन्' इत्युन्मत्तवचनस्यानर्थकत्वं ज्ञापयति, तदसत् । यदर्थानुसंधानेन प्रयोक्त्रा प्रयोगः क्रियते, तदर्थानुसन्धानेनानुक्रियमाणस्यैवार्थानुकरणत्वात् । नहि उन्मत्तेनाहं राजा न भवामीति प्रतिपद्यते, ततश्च **'प्रकृतिवदनुकरणस्य'** (व्या०परि० ८६) इति न्यायेन लिङ्गसंज्ञाकार्यस्यानिवार्यतैव । ननु **'अर्थवद्ग्रहणे नानर्थकस्य'** (कात०प०४) इति न्यायादर्थवतां धातुविभक्तीनां वर्जनेन **'यादृग्जातीयस्य'** (कात० प०९०) इति न्यायाद् वार्थवतामेव लिङ्गसंज्ञा भविष्यति किमर्थवद्ग्रहणेन ? सत्यम्, अर्थवद्ग्रहणं विशिष्टार्थप्रतिपादनार्थम् । तेन वृत्त्युपस्थाप्यार्थप्रतिपादकताभिव्याप्तिमत्त्वमर्थवत्त्वमिति व्याख्यानस्य शक्यत्वमिति । नन्वर्थवद्ग्रहणे नानर्थकस्येत्यत्रापि एवं व्याख्या क्रियते चेत्, **सुखार्थमर्थवद्ग्रहणमिति।**

**हेमकर**स्त्वाह-नन्वर्थवतां वर्जनादर्थवतामेव लिङ्गसंज्ञा भविष्यति कुदेश्यमेतत्, यतो वृ-ऋ-क्-षां वर्णानामप्यर्थवत्त्वमनिवार्यमिति, तन्न । नहि वृक्षसंबन्धिनां व्-ऋ-क्-षामेकैकस्य कोऽप्यर्थोऽस्तीति । अथास्तीति चेत् तदा एकवर्णोच्चारणेनैवार्थप्रतीतौ

इतरवर्णोच्चारणस्य वैयर्थ्यं स्यात् । नन्वर्थस्य कियानवयवेनोच्यते इति चेत्, न । नहि वकारोच्चारणेन वृक्षसम्बन्धि पत्रं शाखा वा प्रतीयते इति ।

इदानीं **पञ्जिका** व्याख्यायते- अभिधेयेत्यादि । ननु धर्मिणां भेदे हि द्वन्द्वः क्रियते । अत्र तु सर्वस्यैवाभिधेयस्वरूपत्वादभिन्नार्थत्वेन स कथं घटते, न हि भवति घट-कलशाविति ? सत्यम् । धर्मिणोऽभिन्नत्वेऽपि अभिधेयत्व- धनत्वधर्मयोर्भेदमादाय द्वन्द्व इति । यथा **"[1]प्रमाण-प्रमेय-संशय०"** (न्या० सू० १/१/१) इत्यादिन्यायसूत्रे द्वन्द्व इति । ननु बहुष्विति किमुक्तम्, धनेष्वित्युक्ते बहुवचनसामर्थ्यादेव बहुलार्थो लभ्यत इति ? सत्यम्, प्रयोगाविर्भावायेति **हेमकरः । वस्तुतस्तु** बहुशब्दः कारणाद्यर्थपरिग्रहः । तथा च **कोशः—**

**अर्थोऽभिधेये शब्दानां धन-कारण-वस्तुषु ।**
**प्रयोजने निवृत्तौ च विषये च प्रवर्तते ।।**

(द्र०, अ० को० ३।३।८६; मेदिनी० ७२।२) इति ।

यत्तु **पञ्जिकायां** साक्षाच्चतुर्णामेवोपादानं कृतम्, तत्तु प्रसिद्धमादायैवेति न दोषः । अस्मिन् व्याख्यानेऽभिधेयस्य परस्परसंस्पर्शात् तद्भिन्ना ये निवृत्त्यादयोऽर्थाः परस्परासंस्पर्शिनस्तेषामन्यतमस्य ग्रहणे द्वयोरेवावस्थितत्वात् कथमन्येषामिति बहुवचनं संगच्छत इति देश्यमपास्तम् । **तदवस्थमिति ।** सैवानवस्थेवावस्था यस्यानवस्थादेश्यस्येति विग्रहः । अनवस्थामेव विवृणोति यावदयमर्थ इत्यादि । मशकार्थोऽयं धूम इति । ननु यदि अर्थशब्दो निवृत्तिवचनस्तदत्र कः समासः स्यात् ? न तावत् षष्ठीतत्पुरुषः, निवृत्तेर्धूमपदेन सामानाधिकरण्याभावात् । नापि मशकस्य निवृत्तिर्यस्माद् धूमादिति व्यधिकरणबहुव्रीहिः, तस्य प्रयोगदृष्ट्यैव क्लृप्तत्वात् । व्यधिकरणबहुव्रीहिरेवात्र इष्यते इति चेत् तदा मशकस्य निवृत्तिर्भवतीत्यर्थे मशकार्थो भवतीत्यपप्रयोगः स्यात् । न चेदृशः प्रयोगः क्वापि दृश्यत इति ? सत्यम् । अर्थशब्देन निवृत्तिः साक्षान्नोच्यते, किन्तु तात्पर्यवृत्त्यैव । तथाहि अर्थशब्देन प्रयोजनमेवोच्यते,तच्च द्विविधम्- प्रवर्तनीयत्वेन निवर्तनीयत्वेन च । यथा पुण्यार्थं तपः पुण्यप्रवर्तनार्थं तपः । पापार्थं गङ्गास्नानम्= पापनिवृत्तये गङ्गास्नानम् । एतेन प्रकृतेऽपि मशको निवर्तनीयत्वेन प्रयोजनं यस्य

---

१. प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः (गौ० न्या० सू० १।१।१)।

धूमस्येति समानाधिकरणबहुव्रीहिरेव सङ्गच्छते। अत एव केन प्रयोजनेनेत्यादौ सर्वत्रेतिशब्दं प्रयुञ्जानेन **पञ्जिकाकृता** मशकनिवृत्तिरभिधीयते इत्यत्र स्वरूपार्थप्रतिपादक इतिंशब्दो न प्रयुज्यत इति।

यद् वा मशकाय अयमिति चतुर्थीतत्पुरुषः, तर्हि कथमभिधानकाण्डे निवृत्तेः पृथक् कृत्वा प्रयोजनं पठितमिति ? सत्यम्। निवर्तनीयत्वेन यत् प्रयोजनं तदेव निवृत्तिरित्यभेदबुद्ध्या निवृत्तावपि पठितम् इ**त्युमापतिः**, तन्न। मशकस्य निवृत्तिर्यस्माद् धूमादिति व्यधिकरणबहुव्रीहिरेव श्रेयान्। तर्हि मशकस्य निवृत्तिर्भवतीत्यर्थे मशकार्थो भवतीत्यपप्रयोगः स्यात् ? चेद् भवति, एवं विवक्षिते अर्थशब्दस्य निवृत्त्यर्थदर्शनात्। तथाहि **"वसेरश्यर्थस्य"** इति **वामनसूत्रे** अशेर्भोजनस्यार्थो निवृत्तिर्वाच्यत्वेन यस्येति विग्रहे भोजननिवृत्तिवचनस्येति प्रतीयते। यत्तु **उमापतिना** 'न चेदृशः प्रयोगः क्वापि दृश्यते' इत्युक्तं तत् किमस्माकमपराधः, **'न ह्यरुणकिरणावलीनामपराधो यज्जीवलोक-मुलूको नावेक्षते'** इति। अभिधेयार्थग्रहणे सति दोषमाशङ्कते यद्येवमित्यादि। शशविषाणमित्यादि। तथा च श्लोकः–

**एष बन्ध्यासुतो याति खपुष्पकृतशेखरः।**
**मृगतृष्णाम्भसि स्नात्वा शशशृङ्गधनुर्धरः।।** इति।

अभिधेयसत्तासमाविष्टेत्यादि। अभिधेयशब्देनात्र प्रतीयमानेत्युच्यते। अभिधेया चासौ सत्ता चेति, तया समाविष्टं संयुक्तमभिधेयं प्रतिपाद्यं यस्य शब्दस्यास्तीत्यर्थः। ननु वस्तुसत्तासमाविष्टमभिधेयं विहाय कथमभिधेयसत्तासमाविष्टमभिधेयं गृह्यते इति चेद् व्याप्तिन्यायात्। व्याप्तिमेव दर्शयति-ईदृशमित्यादि। **अभिधेयं प्रतिपाद्यमित्यर्थः।** सर्वेषामिति शशविषाणादीनामित्यर्थः। यत इत्यादि। भूतं हि अतीतत्वेन प्रतीयमानम्। यथा 'रामो वनम् अगच्छत्'। एवं भविष्यदत्यन्तासच्च बोध्यम्। यथा- बलिरिन्द्रो भविष्यति, शशविषाणमिति।

ननु **"अर्थवदधातुरप्रत्ययः प्रतिपदिकम्"** (अ० १/२/४५) इति **पाणिनिना** नञ्द्वयविधानं तत्पुरुषशङ्कानिरासार्थं क्रियते तदभावा**दस्मन्मते** कः समासः स्यादित्याह-अथ कथमित्यादि। किम्प्रकारः समास इत्यर्थः। त्यादिवर्जमिति कुर्यादिति। ननु त्यादिवर्जमिति कृते आख्यातिकविभक्तीनामेव वर्जनं स्यात्। धातुविभक्तिवर्जमिति गुरुनिर्देशः पुनर्गौणस्यापि कृदन्तस्य वर्जनार्थं कथन्न स्यात् ? एवं तर्हि व्याप्तिन्यायेनैव द्वन्द्वो मन्तव्यः। प्रख्यातत्वे विप्रतिपन्नं प्रत्याह– यदि चेत्यादि। तद्धि इत्यादि। ननु

कथमिदमुच्यते परत्र स्य-साहित्यशङ्कानिराकरणेनैव परिगणनस्य साफल्यात् ? सत्यम् । 'विभक्तिसंज्ञा विज्ञेया वक्ष्यन्ते' (२।६।२४) इति ज्ञापकात् परत्र स्यसाहित्यशङ्का न भविष्यति, न चानियमस्य साहित्यशब्दस्योभयत्र निपातितत्वात् 'वक्ष्यन्ते' इति ज्ञापकमेव न भविष्यतीति वाच्यम्, 'वक्ष्यन्ते' इत्यत्र स्यशब्दस्य पूर्वस्मिन् दृष्टत्वाद् दृष्टपरिकल्पनां विहाय अदृष्टपरिकल्पने प्रमाणाभावात् । **'स्यपराणि'** इत्यकरणादिति **केचित् ।** तन्न, स्यपराणीति तत्पुरुषस्यापि शक्यत्वात् । प्राप्ये **"कर्मण्यण्"** (४/३/१) इति । यद्यपि प्राप्ये कर्मण्यण्विधानादश् नास्तीति । यथा 'आदित्यं पश्यति, हिमवन्तं शृणोति' इति, तथाप्यभिधानात् क्वचिद् भवत्यपीति । सामान्यरूपत्वादिति । **रूप्यते विशिष्यतेऽनेनेति रूपं विशेषणम् ।** अध्याहार्यसामान्यशब्दस्य विशेषणत्वादित्यर्थः । एतेन यद् यदर्थवत् सामान्यं तत्तदेव लिङ्गमिति । एतेन 'चः समुच्चयं वक्ति' इत्यादावनुकरणेऽपि लिङ्गसंज्ञेति ।

यद् वा यथा एकत्वादीनामनिश्चितत्वेऽपि उत्सर्गसिद्धमेकवचनं प्रवर्तते, तथा नपुंसकस्यापि उत्सर्गस्वीकारेण न दोषः । गोरप्रधानस्येत्यादि । ननु कथमिदमुच्यते **"स्वरो ह्रस्वो नपुंसके"** (२/४/५२) इत्यस्य विषयत्वादिति चेत्, न । अकिञ्चित्करोऽयं पूर्वपक्षः । वक्तव्यस्यापि सूत्राङ्गत्वाद् नास्ति विशेषः । यद् वा **'अपवादविषये क्वचिदुत्सर्गस्यापि समावेशः'** (कात० प० ३७) इति न दोषः ।

ननु परेण **"कृत्तद्धितसमासाश्च"** (अ०१/२/४६) इति वाक्यव्यावर्तनार्थं समासग्रहणं क्रियते । तदभावादस्मन्मते वाक्यस्यापि लिङ्गसंज्ञा स्यादित्याह-अन्वर्थतेति । लिगिरिह एकदेशज्ञाने वर्तते, करणेऽल् । ननु **वाक्यं हि त्रिविधम्** – स्याद्यन्तचयं त्याद्यन्तचयमुभयं च । आद्यम्-वटुरयम्, भिक्षुरयम्, गौरयम् । द्वितीयं यथा – पचति, पठति, गच्छति । तृतीयं यथा-काष्ठैः स्थाल्यामोदनं पचतीति । तत्रोभयचयस्य सम्पूर्णस्पष्टार्थत्वान्नास्ति लिङ्गसंज्ञेति, इतरयोस्तु अविस्पष्टार्थत्वात् कथं लिङ्गसंज्ञा न स्यात्, सत्यम् । न हि निष्क्रियं निष्कारकं वाक्यमस्ति । यत्र च नामपदं न श्रूयते, तत्र क्रियापदाक्षिप्तं नामपदमनुसन्धेयम् । यत्र च क्रियापदं नास्ति तत्रास्ति-भवति इति पदं प्रयुज्यते । अतस्तयोरपि विस्पष्टार्थत्वान्न लिङ्गसंज्ञेति ।

ननु यथा एकदेशस्याविस्पष्टार्थहेतुत्वाल्लिङ्गसंज्ञा स्यात्, तथा काष्ठैः स्थाल्यामोदनं पचतीत्यादिवाक्यावयवस्याविस्पष्टार्थत्वात् कथं लिङ्गसंज्ञा न स्यात् ? नैवम्,

वाक्यगतविशेषणानां क्रियापदान्वितानां परस्परासम्बन्धित्वेन विशिष्टार्थत्वाभावात्। संज्ञा हि विशिष्टार्थेनार्थवत एव विधीयते इति **केचित्** । **अन्ये** तु धातुविभक्तिवर्जार्थवदित्यकृत्वा यदसमस्तं निर्दिशति, तद् बोधयति एकार्थेनार्थवतः संज्ञा भवतीत्याहुः – अथ तर्हि कष्टं श्रितादिषु निर्विभक्त्यन्तस्य पदापदसमुदायस्याविस्पष्टार्थस्य लिङ्गसंज्ञा स्यात् ? अथ संज्ञायामपि किं दूषणमिति चेत्, सत्यम्। कष्टं श्रितस्यापत्यं काष्टंश्रितिरित्यपप्रयोगः स्यात्। अत्रोच्यते – धातुविभक्त्योः पदापदसमुदायभिन्नयोर्वर्जनादन्यस्यापि पदापदसमुदायभिन्नस्यैव संज्ञा भवति, न तु पदापदसमुदायस्येति **संक्षेपः**।

ननु वाक्यस्यापि विभक्त्यन्तत्वाद् वर्जनं भविष्यति किं गुरुसंज्ञाकरणेन ? नैवं पदस्यैव विभक्त्यन्तत्वं न तु वाक्यस्य पदभिन्नत्वात्। तथाहि-अथ किं पदान्येव वाक्यं तेभ्योऽन्यद् वा ? अथ पदान्येव तर्हि समुदितानि प्रत्येकं वा। तत्राद्ये उत्तरपदोच्चारणकाले पूर्वपदप्रध्वंसान्नास्ति वाक्यव्यक्तिः। द्वितीये प्रथमपदाद् वाक्यार्थव्यक्तौ द्वितीयपदस्य वैयर्थ्यम्। अतस्तेभ्योऽन्यदिति चेद् **अस्माकमयं पक्षः**, यतो विभक्त्यन्तेभ्यः पदेभ्योऽन्यत्वाद् वाक्यस्य संज्ञा प्राप्ताऽन्वर्थसंज्ञया निषिध्यते।

ननु यदि पदेभ्योऽन्यद् वाक्यं तदा पदानि वाक्यस्य किंकुर्वते ? न तावदारभन्ते आशुविनाशित्वात्। नहि विनष्टेष्ववयवेषु व्यक्तेः स्थितिः। अथ व्यञ्जयन्ति तर्हि एकैकशः समुदितानि वा ? आद्ये द्वितीयपदवैयर्थ्यम्। अथ समुदितानि तर्हि क्रमशो युगपद् वा ? न तावत् क्रमशः, द्वितीयपदोच्चारणकाले प्रथमपदध्वंसात्। नापि युगपत्, एकदा सकलपदोच्चारणासंभवात्। अतो नास्ति वाक्यव्यक्तिः कस्मादर्थप्रतीतिर्भविष्यति येनार्थेनार्थवतः संज्ञा विधातव्येति। उच्यते-पूर्वपदानुभवजनितानुभवोऽन्त्यपदेन सह संगच्छते। तत्सहितेनान्त्यपदेनार्थः प्रतिपद्यते इति। एवं तर्हि अन्त्यपदस्य विभक्त्यन्तत्वात् लिङ्गसंज्ञा न भविष्यति किमन्वर्थसंज्ञयेति ? सत्यम्। **पूर्वाचार्यप्रसिद्धा संज्ञा** अन्वाख्यायते। अथ तेऽपि **वैयाकरणाः** कथमेवं कुर्वन्ति स्म इति चेत्, सुखार्थमिति न दोषः।

अवयव इत्यादि। ननु वृक्षशब्दोच्चारणे व-ऋ-क-षाः सन्ति। नैतेषां पृथग् योगः, येन विरामकार्यं स्यादित्याह – किञ्चेति **हेमकरः**, तन्न। संहितायोग्ये काले वर्णान्तराभावो हि विरामः। ततश्च '**पदयोः सन्धिर्विवक्षितो न समासान्तरङ्गयोः**' (कात० प० ६२) इति न्यायाद् विकल्पपक्षेऽपि संहिताभावरूपविरतिरस्त्येव कुतो "**वा विरामे**"(२/३/६२) इत्यादीनां न विषय इति। तस्माद् '**अवयवसिद्धेः समुदायसिद्धिर्बलीयसी**'

(व्या० परि० १०८) इति न्यायात् समुदायस्यैव भविष्यति न त्ववयवानामित्याह- किञ्च इति । अर्थादनागते इति परसूत्रम् । **अस्यार्थः**– अर्थशब्दादनागते भविष्यदर्थे इन् विधीयते, अर्थी धनमस्य भविष्यतीति । **अस्मन्मते** शब्दशक्तिस्वभावादेव वाचके प्रतीतिरिति घोषयन्तीति अनेन परमतं कटाक्षितमिति ।।८० ।

**[ समीक्षा ]**

(१) **पाणिनि** ने धातु-प्रत्ययवर्जित अर्थवान् जिन शब्दों की दो सूत्रों द्वारा 'प्रातिपदिक' संज्ञा की है - **"अर्थवदधातुरप्रत्ययः प्रातिपदिकम्, कृत्तद्धितसमासाश्च"** (अ०१/२/४५-४६), शर्ववर्मा ने उनके लिए 'लिङ्ग' इस सञ्ज्ञाशब्द का व्यवहार किया है । इन दोनों में यद्यपि प्रातिपदिक संज्ञा अधिक प्रसिद्ध है, तथापि लिङ्गसंज्ञा भी पूर्वाचार्यों- द्वारा प्रयुक्त हुई है । इस प्रकार दोनों में से किसी का भी गौरव या लाघव यद्यपि सिद्ध नहीं किया जा सकता, तथापि आकार की दृष्टि से लिङ्गसंज्ञा अवश्य ही लघु है, जब कि 'प्रातिपदिक 'एक महती संज्ञा है ।

**कैयट** आदि व्याख्याकारों के मतानुसार एक या दो अक्षरों वाली ही संज्ञा की जानी चाहिए, क्योंकि लोकव्यवहारसम्पादन का लघु उपाय एक मात्र शब्दव्यवहार ही है, उसमें भी संज्ञा-व्यवहार तो और भी अधिक लाघवाधायक होता है । अतः संज्ञा को अत्यन्त लघु (एक या दो अक्षरों वाली) ही होना चाहिए ।

(२) व्याख्याकारों ने **महती संज्ञा** का एक प्रयोजन माना है - उसका अन्वर्थ होना । अन्वर्थ संज्ञा वह होती है, जिसका कोई लोकप्रचलित यौगिक अर्थ भी होता हो, परन्तु शास्त्र में उसका अर्थविशेष में नियमन किया गया हो – **"सर्वार्थाभिधानयोग्य-शब्दस्य शक्तिनियमनमात्रं सञ्ज्ञाकरणम्; सर्वार्थाभिधानशक्तियुक्तः शब्दो यदा विशिष्टार्थे संव्यवहाराय नियम्यते तदा तत्रैव प्रतीतिं जनयति"** (म० भा० प्र० १/१/२७, २०) । इस दृष्टि से 'पदं पदं प्रति प्रतिपदम्, तत्र भवम्' इस अर्थ के अभिप्रेत होने से यदि 'प्रातिपदिक' संज्ञा को अन्वर्थ माना जाता है, तो **'लिङ्ग्यते चित्र्यतेऽनेनैक देशेनार्थो गम्यते'** इस अर्थ की सङ्गति से 'लिङ्ग' संज्ञा को भी अन्वर्थ सिद्ध किया जा सकता है ।

(३) **शब्दशक्तिप्रकाशिकाकार** के अनुसार नाम और प्रातिपदिक में कोई भेद नहीं किया जा सकता – **"यत् प्रातिपदिकं प्रोक्तं तन्नाम्नो नातिरिच्यते"**

(कारिका१४), तथापि पूर्वाचार्यों ने 'नाम' संज्ञा का अधिकांश व्यवहार सुबन्त पद के लिए किया है। जैसे –

**काशकृत्स्नधातुव्याख्यान –** "लिङ्गे किमि चिति विभक्तावेतन्नाम" (सू०२)। लिङ्गम्=प्रातिपदिकम्, किम्=स्त्रीत्वादिकम्, चित्=संख्या, विभक्तिः=कर्मादिकारकम्, एष्वर्थेषु यच्छब्दरूपं वर्तते तन्नाम इत्युच्यते (व्याख्या)। इस व्याख्या से स्पष्ट है कि पूर्वाचार्य प्रातिपदिक के अर्थ में लिङ्गसंज्ञा का भी व्यवहार करते थे।

**गोपथब्राह्मण –** किं नामाख्यातम् (१।१।२४)।

**बृहद्देवता –** अष्टौ यत्र प्रयुज्यन्ते नानार्थेषु विभक्तयः।

तन्नाम कवयः प्राहुर्भेदे वचनलिङ्गयोः॥ (१२।१८)।

**वाजसनेयिप्रातिशाख्य –** नाम वायव्यमिष्यते (८/५२)।

**अथर्ववेदप्रातिशाख्य –** आख्यातानि नामसदृशानि (१/३/३)।

**नाट्यशास्त्र –** नामाख्यातनिपातैरुपसर्गसमासतद्धितैर्युक्तः।

सन्धिविभक्तिषु युक्तो विज्ञेयो वाचकाभिनयः॥ (१४/४)।

**अर्वाचीन आचार्यों** ने 'लिङ्ग' संज्ञा के अर्थ में 'प्रातिपदिक -नाम-मृत्- लि' शब्दों का प्रयोग किया है

**अग्निपुराण –** धातुप्रत्ययहीनं यत् स्यात् प्रातिपदिकं तु तत् (३५०/२३)।

**नारदपुराण –** अर्थवत् प्रातिपदिकं धातुप्रत्ययवर्जितम् (५२/३)।

**जैनेन्द्रव्याकरण –** अधु मृत् (१/१/५)।

**हैमशब्दानुशासन –** अधातुविभक्तिवाक्यमर्थवन्नाम (१/१/२७)।

**मुग्धबोधव्याकरण –** क्त्यन्तान्यौ दली (सू० १४)।

(४) लिङ्गसंज्ञा में धातुओं का वर्जन यदि न किया जाता तो 'अहन्' इत्यादि में धातुओं की भी लिङ्गसंज्ञा हो जाने से नलोप आदि कार्य प्रवृत्त हो जाते – **"लिङ्गान्तनकारस्य"** (२/३/५६)। विभक्ति का परित्याग किए जाने से 'वृक्षान्' की भी लिङ्गसंज्ञा और उसके फलस्वरूप नलोप नहीं होता है।

'अर्थवत्' का पाठ होने से वृक्षशब्दगत 'व्-ऋ-क्-ष्' में से किसी भी वर्ण की स्वतन्त्ररूप में लिङ्गसंज्ञा प्रवृत्त नहीं होती है।

'अर्थ' शब्द की व्याख्या करते हुए व्याख्याकारों ने चार अर्थ बताए हैं– अभिधेय, निवृत्ति, प्रयोजन तथा धन। तथापि यहाँ अभिधेयपरक ही अर्थ शब्द का पाठ किया गया है, क्योंकि अभिधेय में निवृत्ति आदि अर्थों का भी अन्तर्भाव हो जाता है। अर्थ के साथ शब्द का औत्पत्तिक संबन्ध है। शब्द को 'जाति-द्रव्य गुण-क्रिया' के भेद से चार प्रकार का स्वीकार किया गया है

व्याख्याकारों ने 'जातिरेव शब्दार्थः, द्रव्यमेव शब्दार्थः, उभयमेव शब्दार्थः' इन तीन पक्षों की विस्तृत व्याख्या प्रस्तुत की है। वर्णों की अर्थवत्ता आदि पर भी विचार किया गया है।

टीकाकार **दुर्गसिंह** ने शब्द के चार भेदों को 'जाति-द्रव्य-गुण-क्रिया' के क्रम से प्रस्तुत किया है, परन्तु उदाहरण 'जाति-क्रिया-गुण-द्रव्य' के क्रम से दिए हैं। इस व्यतिक्रम का समाधान करते हुए कलापचन्द्रकार सुषेण विद्याभूषण ने कहा है कि आचार्य दण्डी जाति-क्रिया-गुण-द्रव्य के ही क्रम को स्वाभाविक मानते हैं, उन्हीं के अनुसार दुर्गसिंह ने भी उदाहरणों का क्रम रखा है–

**जाति-क्रिया-गुण-द्रव्यैः स्वभावाख्यानमीदृशम्।**
**दण्डिनो मतमाश्रित्य दुर्गेणापीत्युदाहृतम्॥**

**कलापचन्द्रकार** ने प्रसङ्गतः हेमकर-गोपीनाथ आदि आचार्यों के भी मतों का उल्लेख किया है॥८०।

## ८१. तस्मात् परा विभक्तयः [२/१/२]

### [सूत्रार्थ]

लिङ्गसंज्ञक शब्द से पर में 'सि-औ-जस्' आदि विभक्तियाँ होती है॥८१।

### [दु० वृ०]

सि, औ, जस्। अम्, औ, शस्। टा, भ्याम्, भिस्। ङे, भ्याम्, भ्यस्। ङसि, भ्याम्, भ्यस्। ङस्, ओस्, आम्। ङि, ओस्, सुप्। तस्माल्लिङ्गात् पराः स्यादयो

विभक्तयो भवन्ति। दृषत्-दृषद्, दृषदौ, दृषदः, दृषदम्, दृषदौ, दृषदः, दृषदा, दृषद्भ्याम्, दृषद्भिरित्यादि।एवं कुमारी, कुमार्य्यौ, कुमार्य्यः।खट्वा, खट्वे, खट्वाः। **अर्थस्य विभजनाद् विभक्तय** इति ॥८१।

## [दु० टी०]

**तस्मात्०।** विधिरयम्।स्यादयोऽनेन विधीयन्ते इति, तर्हि तस्माद्ग्रहणं परग्रहणं च किमर्थम् ? "**प्रत्ययः परः**" (३/२/१) इति वचनाद् अर्थायातं पूर्वं लिङ्गं तत एव भवति यतो धातोरसत्त्वार्थत्वादेकत्वादिसम्बन्धाभावात् त्यादिभिश्च बाधितत्वात्, त्याद्यन्ताच्च क्रियावत् साधनैकत्वादिषु न भवति त्यादिभिरेवैकत्वाद्यभिधानात्। तर्हि भिन्नवाक्यतायामनर्थकेभ्योऽपि स्युः।एकत्वादिनियमस्तु पश्चाद् यथासम्भवमिति नैवं लिङ्गमनन्तरं तर्हि **सुखप्रतिपत्त्यर्थम् अधिकारार्थं** च स्याद्यनभिसम्बन्धे तेनाभिलिङ्गत्वाद् अचिनवम्, असुनवम् इत्यत्राग्नेरमोऽकारलोपो न भवति।

ननु परत्वान्नित्यत्वाच्च गुण एव, तर्हि विरामव्यञ्जनादौ सामान्ये प्रत्ययविधानात् 'स्रस्तम्, ध्वस्तम्' इति दत्वं स्यात्, नैवम्। लिङ्गप्रकरणत्वात् लिङ्गमेव नियमयति, तथा चाख्याते "**चवर्गस्य किरसवर्णे, हो ढः**" (३/६/५५,५६) इति वचनम्। तर्हि इतरफलेन फलवदिति परग्रहणं च लिङ्गात् परतो विभक्तीनामवश्यम्भाव इति प्रतिपत्त्यर्थम्। अन्यथा नित्यत्वादणादयो लिङ्गमात्रादेव भवितुमर्हन्ति विभक्तिनिर्देशस्यासम्भवादपत्यादिसंबन्धापेक्षया बहिरङ्गत्वं पुनरुभयस्थितमेव।को दोषश्चेत्, उत्पन्नायाश्च विभक्तेर्लोपेन भवितव्यम्। यत्र लोपो न दृश्यते तदर्थं पूर्वाह्णे प्रकर्षः पूर्वाह्णेतराम्, पूर्वाह्णेतमाम्। पूर्वाह्णे जातो भवो वा पूर्वाह्णेतनः, अपराह्णेतनः। अप्सु भवम् अप्सव्यम्, अमुष्यापत्यम् आमुष्यायणः इति स्त्रियामादादयस्तु वचनसामान्याल्लिङ्गमात्राद् भवन्ति। ततः स्वार्थिकप्रत्ययाश्च यावकः। एवं बहूनि चर्माणि यस्यां सा बहुचर्मिका शालेति। अर्थस्य विभजनादिति। लिङ्गार्थकर्मादयोऽर्था आभिर्विभज्यन्ते इत्येतान्येव सप्तत्रिकाणि सप्त विभक्तयः प्रथमादिशब्दवाच्याः। यथा त्यादयो विभक्तय इति यदाह विभक्तिग्रहणं तत्स्वरूपविशेषणं **मन्दधियां** सुखप्रतिपत्त्यर्थं न पुनरधिकारार्थमवश्यम्भावि स्यादि-संबन्धेनेव 'भारः, हारः' इत्यादिषु दीर्घादिविषयो न भविष्यतीति।

सेरिकार उच्चारणार्थो न विशेषणार्थः "**ईकारान्तात् सिः**" (२/१/४८) इत्यादिषु अर्थवद्ग्रहणे नानर्थकस्येति सुपः सकारस्य ग्रहणं न भविष्यति। निरनुबन्धग्रहणेन

सानुबन्धकस्येत्यन्ये। जस्-शसोर्जकारशकारौ **"जस्-शसौ नपुंसके"** (२/१/४) इत्यादिविशेषणार्थौ। ननु शसादीनां शकारादयः कर्तव्या एव **"जस् सर्व इः"** (२/१/३०) इति प्रतिपदोक्तस्य ग्रहणं भविष्यति। सर्वमस्यतीति सर्वाः, क्विपि स्यादीनां प्रकृतत्वाच्च तर्हि असन्दिग्धार्थ एव। टा-वचनस्य टकारो **"न सखिष्टादावग्निः"** (२/२/१) इति विशेषणार्थः। अन्यथा आकारादाविति प्रतिपद्येत। सखीनित्यत्राग्नि कार्यं न स्यात्। ङवतां ङकारो ङवन्ति यै यास् यास् यामिति विशेषणार्थः। सुपः पकारः सावित्युक्ते सन्देहे यदि सोर्ग्रहणमभिप्रेयात् तदा सुपीति प्रदध्यादिति परिहारार्थः। **"ङ्णोः कटावन्तौ शषससुप्सु"** (का०परि०-सं०५४) इति प्रकारमन्तरेणापि सप्तमीबहुवचन एव पदान्ते हि सकारे कटौ सिद्धौ ॥८१।

**[वि० प०]**

**तस्मात्०।** अथानन्तरत्वात् लिङ्गमनुवर्तते किं तस्माद्ग्रहणेन ? सत्यम्, अधिकारार्थः। अन्यथा अचिनवम्, असुनवम् इत्यादौ श्वस्तन्यमोऽग्नेरमोऽकार इत्यादिना लोपः स्यात्। तदयुक्तम्, परत्वान्नित्यत्वाच्चात्र गुणेन भवितव्यम्। किञ्च लिङ्गप्रकरणत्वात् स्यादेरेव अमोऽकारलोपो भविष्यतीति, सत्यम्। तस्माद्-ग्रहणं सुखार्थमेव। तर्हि परग्रहणं किमर्थम्, प्रत्ययत्वादेव स्यादीनां प्रत्ययः पर इति परत्वं सिद्धम्। सत्यम्, लिङ्गात् परस्यादीनामवश्यम्भावप्रतिपत्त्यर्थम्। अन्यथा तस्यापत्यम् इति विभक्तिनिर्देशस्याभावाद् **"वाणपत्ये"** (२/६/१) इत्यादिना नित्यत्वाल्लिङ्गमात्रा-देवाणादयः स्युरिति।

अत एव वक्ष्यति षष्ठ्यन्तान्नाम इति, तथाप्यनर्थकं परा-ग्रहणम्, उत्पन्नाया हि विभक्तेर्लोपेन भवितव्यमिति चेद् यत्र लोपो न दृश्यते तदर्थं परा-ग्रहणम्। यथा अमुष्यापत्यम् **आमुष्यायण** इति। ननु कथं स्यादयो विभक्तय इति, न ह्यत्र विभक्तिसंज्ञां प्रति सूत्रमस्तीत्याह-अर्थस्य इत्यादि . एतेनान्वर्थबलादेव विभक्तिसंज्ञा सिद्धेति दर्शितम्। तथाहि संख्याकर्मादयोऽर्था आभिर्विभज्यन्त इति **विभक्तय** उच्यन्ते ॥८१।

**[क० च०]**

**तस्मात्०।** परा इति पुंस्यपि **"अल्पादेर्वा"** (२/१/३१) इति विकल्पनात् पक्षे **"जस् सर्व इः"** (२/१/३०) इति इन् भवति। **कश्चित्तु** स्त्रियामित्याचष्ट, तन्न।

स्यादीनां विशेषणत्वात् पुंलिङ्गमेव योग्यमिति । एतत्तु **केचिद्** दूषयन्ति । तथाहि, परा इति स्त्रीलिङ्ग एव सन्निहितविभक्तिशब्दस्य विशेषणत्वात् । स्यादिशब्दस्य विशेषणत्वेऽपि स्त्रीलिङ्ग एव, स्यादिशब्दस्यापि स्त्रीलिङ्गवाचित्वात् । तथाहि सिरेवादिर्यासां विभक्तीनामिति[1] । तन्न, परशब्दो विभक्तिशब्दश्च द्वयमेव सि-औ-जस्प्रभृतीनां शब्दानुकरणानामेव विशेषणम् । शब्दानुकरणं हि स्वभावात् पुंलिङ्गमेव । यथा **"नियो ङिराम्, न सखिष्टादावग्निः"** (२/१/७७; २/१) इत्यादि । न हि विशेषणस्य विभक्तिशब्दस्य 'परा'-इति विशेषणं युक्तम् । यावता यत्र विशेष्यस्य लिङ्गनिश्चयो नास्ति, तत्रैव विशेषणेन लिङ्गमनुमीयते इति । यथा **"कुतुः कृत्तेः स्नेहपात्रं सैवाल्पा कुतुपः पुमान्"** (अ० को० २/९/३३) इत्यत्र कुतुशब्दस्य लिङ्गनिश्चयाभावे सैवेति विशेषणबलात् स्त्रीत्वमवगम्यते । अत्र तु शब्दानुकरणानां सि-प्रभृतीनां विद्यमानत्वमिति । अत एव **वररुचिनापि "पञ्चादौ घुट्"** (२।१।३) इत्यत्र लिङ्गात् परेषां स्यादीनामिति पुंसा विवृतम् । अत एव पञ्चशब्देन स्यादय एवोच्यन्ते न विभक्तयस्तासां विशेषणत्वेनाप्रधानत्वादिति **पञ्जीकृतोक्तम्** । 'सि-औ-जस्' इत्यादौ सूत्रत्वाज्जसो लुक् ।

यद्यपि तस्माद्-ग्रहणेन सर्वेषामनुवृत्तत्वाद् धातुविभक्तिलिङ्गादिकं सर्वमेव स्मर्यते, तथापि मुख्यतया लिङ्गमेवानुवर्तते इत्याह-तस्माल्लिङ्गादिति **वृत्तिः।** लिङ्गस्यार्थवत्तया व्यभिचाराभावादर्थवत इति पाठो वृत्तौ नास्त्येव। **महान्तस्तु** विशिष्टार्थाभिधायकादेव विभक्तिरिति प्रतिपादनार्थं वृत्तावर्थवदिति विवृतम् इत्याहुः । पूर्वसूत्रे स्वरान्तस्योदाहृतत्वादिह व्यञ्जनान्तमुदाहरति–दृशदित्यादि । तर्हि कुमारीखट्वादिकं कथं प्रत्युदाहृतम् ? सत्यम्, परपक्षन्यूनताप्रदर्शनार्थम् । तथाहि अप्रत्यय इत्युक्त्वा स्त्र्याकारादेर्विभक्तिविधानार्थं **"ङ्याप्प्रातिपदिकात्"** (अ० ४/१/१) इत्यपरसूत्रं क्रियते इति (आचार्यस्यैकेन सूत्रेण सर्वत्र लिङ्गत्वादिति परमतं कटाक्षितम्) ।

ननु परत्वान्नित्यत्वाच्चेति हेतुद्वयं किमर्थम् एकेनैव सिद्धत्वात् ? सत्यम् । अकारलोपे व्यक्तिराश्रयणीया । ततो 'व्यक्तिः सर्वस्य बाधिका' इति न्यायात् परत्वमपि बाधित्वा लोपेन भवितव्यमिति चेल्लोपे कृतेऽपि गुणो भविष्यति । अतो नित्यत्वाद्

---

१. अत एवोमापतिः – परा इति स्यादिविशेषणत्वात् पुंस्याह कश्चित् स न वेत्ति किञ्चित् ।
विभक्तयोऽत्र प्रथमादयो वा स्युः स्यादयो वापि यतः स्त्रियस्ताः ।।

आवश्यकत्वाद् वेत्यर्थः । नापि सकृद् बाधा, भिन्नविषयत्वात् । अचिनवम् इत्यादि । अथ विशेषविधित्वादमोऽकारलोप एव भविष्यतीत्याह-नित्यत्वादिति ।

ननु **"अग्नेरमोऽकारः"** (२/१/५०) इत्यत्र विहितविशेषणाद् गुणे कृतेऽप्यमोऽकार-लोपो भविष्यतीत्याह-किञ्च इति । सुखार्थमिति । दुःखं पुनरेतत् लिङ्गमिति प्रथमान्तस्य पञ्चम्यन्ततया विपरिणाम इति । यदि तु लिङ्गाधिकारो न स्यात् तदा 'स्रस्तम्, ध्वस्तम्' इत्यादौ **"स्रसिध्वसोश्च"** (२/३/४५) इति सकारस्य दकारः स्याद् इत्याह-किञ्चेति **कश्चित्**। तदेतन्निरासार्थमवश्यं लिङ्गप्रकरणमाश्रयणीयम्, ततो लिङ्गप्रकरणत्वात् स्यादेरेवामोऽकारलोपः स्यादिति पूर्वपरिहारोऽपि न कृतः स्यादित्याशयः ।

**[पक्षान्तरं वा]** – आमुष्यायण इत्यादि । नन्वमुष्यशब्दस्य कुञ्जादिपाठसामर्थ्यादिव भविष्यतीति चेद् अप्सव्यम् इति बोध्यम्, इदमपि दिगादिपाठसामर्थ्यादिव भविष्यतीति चेद् मृन्मन्यम् इति बोद्धव्यम् । अन्यथा विभक्तिं बाधित्वा मयट्प्रत्यये सति मृत्-शब्दस्य तकारस्य पदान्तत्वाभावात् **"पञ्चमे पञ्चमान्०"** (१/४/२) इति न प्राप्नोति । नन्वत्र व्यवस्थितवाधिकाराद् भविष्यति चेद् अपदान्तत्वाण्णत्वं स्यात् । न ह्यत्रेत्यादि । [1]परो हि सुपो विभक्तयस्तिङश्चेति सूत्रं ब्रूते, तदिह नास्तीत्यर्थः । सङ्ख्याकर्मादय इति । अथ विभक्तित्वं किमुभयप्रतिपादकत्वम् ? एकतरप्रतिपादकत्वं वा ? आद्ये प्रथमाया विभक्तित्वं न स्यात्, कर्माद्यर्थाभावात् । द्वितीये त्वेकशब्दस्यापि विभक्तित्वप्रसङ्गः संख्याप्रतिपादकत्वादिति चेत्, प्रत्ययत्वे सतीति विशेषणं देयम्, तथापि क्तप्रत्ययस्यापि विभक्तिप्रसङ्ग इति चेत्, रूढिराश्रयणीया । **वस्तुतस्तु** प्रत्ययत्वे सति संख्याप्रति-पादकत्वमिति न दोषः ॥८१।

**[समीक्षा]**

विभक्तिसंज्ञा पूर्वाचार्यों ने तथा पाणिनि ने परिभा. ~ की है । पाणिनि के अनुसार सुप् तथा तिङ् प्रत्ययों में तीन-तीन प्रत्ययों के समुदाय की विभक्ति संज्ञा होती है – **"विभक्तिश्च, प्राग् दिशो विभक्तिः"** (पा० १/४/१०४; ५/३/१)।

---

१. परः = पाणिनिः । तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः, तान्येकवचनद्विवचनबहुवचनान्येकशः, सुपः, विभक्तिश्च (अ० १।४।१०१-१०४)।

नाट्यशास्त्र के अनुसार विभक्ति उसे कहते हैं जो धातु, लिङ्ग तथा पद के संख्या-कर्मादि अर्थों का विभाजन करती है–

**एकस्य बहूनां वा धातोर्लिङ्गस्य पदानां वा।**

**विभजन्त्यर्थं यस्माद् विभक्तयस्तेन ताः प्रोक्ताः॥** (ना० शा० १४/३०)।

कातन्त्रकार ने अन्वर्थ मानकर विभक्तिसंज्ञा के लिए सूत्र नहीं बनाया है।

**प्राचीन ग्रन्थों में विभक्तिसंज्ञा का प्रयोग–**

**गोपथब्राह्मण–** ओङ्कारं पृच्छामः। को धातुः, किं प्रातिपदिकम्, किं वचनम्, का विभक्तिः ? (१/१/२४,२६)।

**बृहद्देवता–** सङ्ख्याविभक्त्यव्ययलिङ्गयुक्तः (१/४५; २/९४,१०१)।

**ऋक्तन्त्र–** विभक्तिलोपश्च (३/१/६)।

**निरुक्त–** विशयवत्यो हि वृत्तयो भवन्ति, यथार्थं विभक्तीः संनमयेत् (२।१;७।१)।

**अर्वाचीन ग्रन्थों में विभक्ति का प्रयोग–**

**जैनेन्द्रव्याकरण–** विभक्ती, ते विभक्तयः (१/२/१५७; ४/१/९१)

**शाकटायनव्याकरण–** त्रयी त्रयी विभक्तिः (१/३/१८१)।

**हैमव्याकरण–** स्त्यादिर्विभक्तिः (१/१/१९)।

**मुग्धबोधव्याकरण–** सित्यादिः क्तिः (सू० १२)।

**शब्दशक्तिप्रकाशिका–** सङ्ख्यात्वव्याप्यसामान्यैः शक्तिमान् प्रत्ययस्तु यः।
सा विभक्तिर्द्विधा प्रोक्ता सुप्-तिङ् चेति विभेदतः॥
धातुभेदानुपादाय तदर्थे कर्मतादिकान्।
बोधयन्त्यो द्वितीयाद्या निर्वक्तव्या विभक्तयः॥
(कारिका ६१, ६६)।

**अग्निपुराण–** द्वे विभक्ती सुप्तिङश्च सुपः सप्त विभक्तयः (३५०/१)।

**नारदपुराण–** सुपां सप्त विभक्तयः।
विभक्तीनां विपर्यासो यथा दध्ना जुहोति हि॥ (५२/२; ५३/७)।

कातन्त्रकार ने 'विभक्ति' शब्द की कोई परिभाषा तो नहीं की है, परन्तु उनके प्रयोग की व्यवस्था प्रकृत सूत्र में की है। तद्धित प्रकरण में तस् आदि प्रत्ययों की विभक्तिसंज्ञा प्राप्त होती है (कात० २/६/२४)।

कातन्त्रव्याकरण में स्यादि २१ प्रत्ययों के लिए तथा त्यादि १८ प्रत्ययों के लिए सूत्र नहीं बनाए गए हैं। अतः वृत्तिकार ने स्यादि २१ प्रत्ययों को यहाँ गिनाया है और उनसे सिद्ध होने वाले शब्दों के कुछ उदाहरण भी दिए हैं। टीकाकार आदि ने २१ प्रत्ययों में आने वाले अनुबन्धों की सार्थकता भी बताई है।

**[विशेष]**

पाणिनि ने **"ङ्याप्प्रातिपदिकात्"** (अ० ४।१।१) इस अधिकारसूत्रद्वारा ङ्यन्त तथा आबन्त से भी 'सु-औ' आदि प्रत्यय विहित किए हैं। इसका स्पष्टीकरण करते हुए व्याख्याकारों ने कहा है कि ङ्यन्त और आबन्त शब्दरूपों से ही तद्धित प्रत्यय हों, सुबन्त से न हों - इसलिए यहाँ प्रातिपदिक से भिन्न 'ङ्याप्' का पाठ किया गया है, परन्तु इसे महाभाष्यकार [1]पतञ्जलि आदि आवश्यक नहीं मानते। इस प्रकार कातन्त्रकार का ही सूत्रनिर्देश अधिक संगत सिद्ध होता है।

## ८२. पञ्चादौ घुट् [२/१/३]

**[सूत्रार्थ]**

स्यादि २१ प्रत्ययों में प्रारम्भिक 'सि, औ, जस्, अम्, औ' इन पाँच प्रत्ययों की घुट् सञ्ज्ञा होती है ॥८२।

---

१. **वस्तुतस्तु** ङ्यापोर्ग्रहणं मास्तु, सुबन्तादेव तद्धितोत्पत्तिः। सुपः प्रागेव च ङ्यापौ प्रवर्तेते। स्वार्थ-द्रव्य-लिङ्ग-संख्या-कारककुत्सादिप्रयुक्तकार्याणां क्रमिकत्वात्। तथाहि – स्वार्थः प्रवृत्तिनिमित्तं जात्यादि। तज्ज्ञानं पूर्वं भवति, विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात्। ततस्तदाश्रयज्ञानम्, धर्मित्वेन प्रधानत्वाद् लिङ्गादिभिराकाङ्क्षितत्वाच्च। ततः स्वमात्रापेक्षत्वाल्लिङ्गस्य ज्ञानम्। ततो विजातीयक्रियापेक्षकारकापेक्षया सजातीयपदार्थापेक्षसंख्याज्ञानम्। ततः कारकरूपविभक्त्यर्थापेक्षा भवति। तन्निवृत्तौ कुत्सादिज्ञानमिति **"कुत्सित०"** (५।३।७४) इति सूत्र**भाष्ये** स्थितम्। **शब्दरत्ने** च परिष्कृतमेतत् (बालमनोरमा ४।१।१)।

**[दु०वृ०]**

स्यादीनामादौ पञ्च वचनानि घुट्संज्ञकानि भवन्ति । सि, औ, जस्, अम्, औ । घुट्प्रदेशाः **"घुटि चासंबुद्धौ"** (२/२/१७) इत्येवमादयः ॥३ ।

**[दु० टी०]**

ननु सञ्ज्ञासञ्ज्ञिनोरभेदविवक्षायामुभयत्र प्रथमा चेत्, घुडिति **कथमेकवचनम्** ? सत्यम्, सामान्येन घुटं प्रयुज्य किन्तद् घुडिति विशेषविवक्षायां पश्चाद**ादौ पञ्च** वचनानि इति संबध्नीयात् । यथा **'वेदाः प्रमाणम्'**। यथात्मने न शक्यं यत् किञ्चिद् भुक्त्वा क्षुदमपनेतुमिति सिर्घुडौ घुडिति प्रत्येकं वा सम्बन्धः, घुटस्तु पुंलिङ्गे निदर्शनम् । साध्योदाहरणं तु 'राजा, राजानौ, राजानः, राजानम्, राजानौ' ।

ननु राजेति नित्यत्वाद् व्यञ्जनाच्चेति सिलोपे कृते घुट्संज्ञाभावाद् दीर्घो न स्यात् । न च वक्तव्यम् उत्पत्तिकाल एव संज्ञा लोके खलूत्पन्नस्य सतः सञ्ज्ञाविधानात् । सेस्तु घुट्संज्ञायाः **"गोरौ घुटि"** (२।२।३३) इत्यादिषु प्रयोजनमस्ति । नैवम्, स्वरादवगतं घुट्त्वं व्यञ्जनादपि तत् प्रत्ययहेतुरिति प्रत्ययलोपलक्षणेन वा लोपात् । **'स्वरादेशो विधिर्बलवान्'** (कात० प० ३७) इति वा दीर्घो न विहन्यते । पञ्चशब्दवाच्याः स्यादय एव विशेष्यत्वात्, न तु विभक्तयो विशेषणत्वात् । तेन 'राज्ञे देहि, राज्ञ आगतः' इत्यनोऽकारस्य लोपो भवत्यघुट्स्वरे, आदिग्रहणमसमञ्जसनिवृत्त्यर्थम् ॥८२।

**[वि० प०]**

पञ्चादौ । ननु पञ्चेति संज्ञिनिर्देशोऽयम्, तत् कथं प्रथमासम्बन्धे षष्ठी युज्यते । तदयुक्तम्, संज्ञासंज्ञिनोरभेदस्य विवक्षितत्वात् । यथा 'अयं देवदत्तः' इति, तर्हि घुडिति कथम् एकवचनम्, संज्ञिसमानाधिकरणत्वाद् बहुवचनं प्राप्नोति । यथा 'अमी देवदत्ताः' इति, सत्यम् । सामान्येन घुटं प्रयुज्य किन्तद् घुडिति विशेषविवक्षायां पश्चादादौ पञ्च वचनानीति संबन्धनीयम् । यथा **'वेदाः प्रमाणम्, स्मृतयः प्रमाणम्'** इति । पञ्चशब्देन स्यादय एवोच्यन्ते, न तु विभक्तयः, तासां विशेषणत्वेनाप्रधानत्वात् । प्रधानानुयायिनश्च जनव्यवहारा भवन्ति । नाम्ना परपदेनेति ज्ञापकाद् वा । अन्यथाऽनोऽकारस्याघुट्स्वरे लोप उक्तः, कथं तृतीयायां घुट्स्वरे लोपः स्यादिति । अत एवाह– आदौ पञ्च वचनानीति । सि - प्रभृतीनीत्यर्थः । यत् पुनः स्यादीनामित्युक्तं तदादाविति सम्बन्धवशात् ।

तेन 'राज्ञे धेहि,राज्ञे आगतः' इत्यादौ चतुर्थ्यादिष्वघुट्स्वरत्वादनोऽकारस्य लोपो भवतीति ॥८२।

[क०च०]

**पञ्च०** । आदिशब्दोऽत्र आदित्वे वर्तते, अत एव सप्तमी संगच्छते। अन्यथा 'आदयः' इति वक्तुं युज्यते। अथ कथं पञ्चैवादित्वे वर्तन्ते, सेरेवादित्वे वर्तनात् ? सत्यम् । स्यादिसमुदायानां मध्ये आदौ सेर्घुट्संज्ञायां सत्यां तस्यातीतत्वे सति औकारस्य पुनरादित्वम्, तस्यापि संज्ञायां सत्यामतीतत्वे सति अन्येषामपि सम्बन्ध इति वाच्यवाचकलक्षण इत्यर्थः । यथेत्यादि । अयमपि संज्ञी निर्दिष्टः । घुटं प्रयुज्य इतिशब्दानुकरणत्वात् पुंसा निर्देशः ।

ननु पञ्चशब्देन पञ्चमीप्रभृतीनामुक्तत्वात् कथं द्वितीयाद्विवचनपर्यन्तमात्रं **वृत्तौ** दर्शितमित्याह - पञ्चशब्देनेत्यादि । स्यादय इति वचनरूपा इत्यर्थः। न त्वित्यादि । त्रिकरूपा इत्यर्थः। प्रधानानुयायिनश्चेति चकारेण शास्त्रव्यवहारोऽपि इति सूच्यते। अथ व्यवहाराश्रयस्य कष्टत्वाद् व्याप्तिन्यायाच्च पञ्चमीप्रभृतीनामेव संज्ञित्वं युक्तमित्याह- नाम्नेत्यादि ।

ननु नपुंसके जस्शसोरेव घुट्त्वादकारलोपस्य बाधाभावात् कथं ज्ञापकमिति ? सत्यम् । पञ्चविभक्तिग्रहणे सति **"जस्शसौ नपुंसके"** (२।१।४) इत्यत्र जस्शसोर्बहुवचनत्वाद् अन्यदपि बहुवचनं नियम्यते न त्वेकवचनमिति । यद् वा जस्शसोः प्रथमाद्वितीयासंबन्धित्वाद् नियमोऽपि प्रथमाद्वितीययोरेव, न तु तृतीयादाविति । अतो नाम्नेति स्फुटमेव न सिध्यतीति ज्ञापकं युक्तमिति **प्राञ्चः**। तथा चोक्तम्–

**विभक्तिपक्षे प्रथमाद्वितीयाद्वारेव घुट्त्वं किल जस्शसोः स्यात् ।**
**यथैव घुट्त्वं नियमस्तथैव नाम्नेत्यसिद्धं स्फुटमेव जातम् ॥**

तन्न । स्थितिपक्षे जसः प्रथमाबहुवचनत्वात् प्रथमैव नियम्यताम्, न तु द्वितीयेति चोद्यप्रसङ्गात् । तस्मात् **"न सखिष्टादावग्निः"** (२।२।१) इत्येव ज्ञापकं युक्तम् । अन्यथा घुटि परतो हि ऐत्वे कुतोऽग्निकार्यप्राप्तिर्यन्निषिध्यत इति । यत्तु नाम्नामिति ज्ञापकादित्युक्तम्, तत् प्रथमकक्षायामिति **संक्षेपः** ॥८२।

**[ समीक्षा ]**

कातन्त्रकार ने यहाँ जिन 'सि - औ - जस् -अम् - औ' इन पाँच प्रत्ययों की 'घुट्' संज्ञा की है पाणिनि ने उसे '[1]सर्वनामस्थान' कहा है । स्पष्ट है कि 'घुट्' संज्ञा **लघुसंज्ञा** है, जब कि 'सर्वनामस्थान' एक **महती संज्ञा । न्यासकार** आदि सर्वनामस्थान को यद्यपि पूर्वाचार्यकृत मानते हैं तथापि किस पूर्वाचार्य ने इसका सर्वप्रथम प्रयोग किया था - यह ज्ञात नहीं है । कुछ व्याख्याकार तो यह भी कहते हैं कि **पाणिनि ने इस** संज्ञा का समादर (प्रयोग = व्यवहार) अपने ग्रन्थ में इसलिए **किया है कि** इससे पूर्वाचार्यों का उपहास सूचित हो और वह इसलिए कि पूर्वाचार्य कितनी महती संज्ञा का प्रयोग करते थे । अस्तु, पाणिनीय सर्वनामस्थान संज्ञा में यहाँ गौरव स्पष्ट है ।। ८२ ।

## ८३. जस्शसौ नपुंसके [ २ । १ । ४ ]

**[ सूत्रार्थ ]**

नपुंसकलिङ्ग में जस् तथा शस् प्रत्ययों की घुट् संज्ञा होती है ।। ८३ ।

**[ दु० वृ० ]**

नपुंसकलिङ्गे जस्शसौ घुट्संज्ञकौ भवतः । सामानि तिष्ठन्ति, सामानि पश्य । नपुंसके जसेव घुडिति नियमाद् वारिणी, जतुनी ।। ८३ ।

**[ दु० टी ]**

जस्शसौ० । **'स्त्रीपुंनपुंसकानि लोकलिङ्गानुशासनगम्यानि'** इति वक्ष्यति । नपुंसके जसेव घुडिति नियमाद् 'वारिणी, जतुनी' इति । एतेन किमुक्तं नपुंसकलिङ्गं नियम्य नपुंसकेऽन्यस्य वचनस्य नियमेन सदपि घुट्त्वं निवर्तत इत्यर्थः । तेनाघुटि नान्तस्य चोपधालक्षणो दीर्घो न भवति । नपुंसकं चार्थस्तत्र घुट्कार्यं नास्तीति तद्विशिष्टा प्रकृतिर्नियम्यते - नपुंसक एव जस् घुडिति प्रत्ययनियमो न भवति, **"घोषवन्तोऽन्ये"** (१ । १ । १२) इत्यनुषङ्गलोपाभावात् । शस्ग्रहणमप्राप्त्यर्थम्, स्यादिसम्बन्धात् साहचर्याद् वा । **"बह्वल्पार्थात् कारकाच्छस्"** (अ० ५ । ४ । ४२) । बहु देहि बहुश इति घुट्निमित्तो नुर्न भवति । शिरिति किमिति न कृतम् इति चेद्, अप्राप्त्यर्थमिदमिति स्यात् । द्विवचनं क्रियते यदि, **नियमप्रतिपत्तिर्गरीयसी** भवति । ततो यथान्यासमेवाश्रय इति । कथम्,

---

१. शि सर्वनामस्थानम्, सुडनपुंसकस्य (अ० १ । १ । ४२, ४३) ।

**कुण्डलोद्घृष्टगण्डानां कुमाराणां तपस्विनाम्।**

**निचकर्त शिरान् द्रौणिर्नालेभ्य इव पङ्कजान्।।**

**ऋषिवचनत्वात्** शसो लोपो दृश्यते, नकारस्यापि स्थितिरिति ।।८३।

**[वि० प०]**

जस्० ।जसः पूर्वेणैव सिद्धे तदुपादानं **नियमार्थमि**त्याह – नपुंसके जसेवेति । नपुंसक एव जसिति प्रत्ययनियमस्तु न भवति, "**घोषवन्तोऽन्ये**" (१।१।१२) इति निर्देशात् । अन्यथा लिङ्गान्तत्वे जसो घुट्त्वाभावाद् इह पुंलिङ्गेऽनुषङ्गलोपः स्यात् । ततो नपुंसके जसेव घुडिति नियमेनान्यस्य वचनस्य घुट्त्वं पूर्वेण प्राप्तमपि निवर्त्यते । तेन 'वारिणी, जतुनी' इति "**घुटि चासम्बुद्धौ**" (२।२।१७) इति दीर्घो न भवति इति । "**औरीम्, नामिनः स्वरे**" (२।२।९,१२) इति नुरागमः ।।८३।

**[क०च०]**

जस्शसौ० । ननु 'वारिणी' इति कथं प्रत्युदाहृतम् । "**इन्हन्पूषार्यम्णां शौ च**" (२।२।२१) इत्यत्र सौ शावेवेति नियमादौकारे दीर्घाभावस्य सिद्धत्वात् । ननु लाक्षणिकत्वान्नियमस्याविषय इति चेत्, सौ शावेवेति नियमाद् दण्डिनावित्यत्र यदुक्तं तत्रापि लाक्षणिकतासत्त्वाद् दीर्घः स्यात्, सत्यम् । तत्र समुदायस्य लाक्षणिकतया अत्रावयवस्य लाक्षणिकत्वाद् इनि शीघ्रं बुद्धिर्नोत्पद्यते, अतोऽत्र लाक्षणिकत्वं स्फुटमेवेति । अथवा हनादयस्तावदनागमसमुदायास्तत्साहचर्यादिन्नपि अनागमसमुदाय एव गृह्यते, अतो नियमोऽपि तत्रैव । '**अर्थवद्ग्रहणे नानर्थकस्य**' (कात० प० ४) इति वक्तुं न युज्यते, '**अनिनस्मन्ग्रहणान्यर्थवताऽनर्थकेन च तदन्तता**' (व्या० परि० १२९) इति न्यायात् । अन्यथा "पयस्वी' इति न सिध्यतीति ।

ननु "घोषवन्तः" (१।१।१२) इति ज्ञापकाश्रयणं किमर्थम्, प्रत्ययनियमे हि पूर्वसूत्रे पञ्चग्रहणमेव व्यर्थं स्यात्, स्यावमो घुड् इत्येव वक्तुं योग्यत्वात् । सत्यम्, सत्यप्यस्मिन् परिहारे ज्ञापकेन सुखपरिहारः कृतः । ननु जस् प्रथमावयवः, सादृश्यादन्यस्यापि प्रथमावयवस्यैव नियमेन घुट्त्वनिरासो युक्तः, न तु द्वितीयाद्विवचनैकवचनयोरिति ? सत्यम् । यदि द्वितीयाद्विवचनैकवचनयोर्घुट्त्वाभावं नाभिधेयात्, तदा

नपुंसके जस् ततश्च शस् इति पृथग्योग एव कृतः स्यात् । तस्माद् द्वितीयाबहुवचनेन समाससंसृष्टेन जसा द्वितीयाद्विवचनैकवचनमपि नियम्यते इति **संक्षेपः** ॥८३।

[ समीक्षा ]

द्र०, पूर्वसूत्र (२।१।३) – समीक्षा ॥८३।

## ८४. आमन्त्रिते सिः सम्बुद्धिः [ २।१।५ ]

**[ सूत्रार्थ ]**

आमन्त्रित (प्रसिद्ध वस्तु के अभिमुखीकरण = कार्योन्मुखीकरण) अर्थ में विहित 'सि' प्रत्यय की संबुद्धि संज्ञा होती है ॥८४।

**[ दु० वृ० ]**

सिद्धस्याभिमुखीकरणमामन्त्रितम् । तस्मिन्नर्थे विहितः सिः संबुद्धिसंज्ञो भवति । हे अम्ब ! हे वृक्ष ! संबुद्धिप्रदेशाः – "**संबुद्धौ च**" (२।१।३९,५६) इत्येवमादयः ॥८४।

**[ दु० टी० ]**

**आमन्त्रिते०** । आमन्त्रणम् आमन्त्रितम्, अर्थात् लिङ्गात् पर इति । सिद्धस्येत्यादि । एतेन किमुक्तम् आमन्त्रणं वस्तुगतं (आमन्त्रितं वस्तुगतम्) प्रागेव क्रियासम्बन्धाद् अभिमुखीकृत्य हि पदार्थः क्रियायां विनियुज्यते । हे पचन्, हे पचमान, हे करिष्यन्, हे करिष्यमाण ! आमन्त्रितविषये हि शन्तृङानशौ अतिरिक्त आमन्त्रणार्थ इति "**आमन्त्रणे च**" (२।४।१८) इत्यनेनैव प्रथमा – सेः संबुद्धिसंज्ञास्तीति संबुद्धिनिबन्धनं कार्यं प्रवर्तते ।

**अन्यः** पुनराह – लिङ्गार्थो विभक्त्यर्थश्चामन्त्रितमुभयविशेषणं चैतत्, तदा आमन्त्रणे वर्तमानाद् आमन्त्रणे च यः सिरिति । वृक्षादेरचेतनस्यापि विवक्षया आमन्त्रणमिति संज्ञाप्रकरणत्वादिहैव संबुद्धिसंज्ञा न्याया इत्यामन्त्रणे च तदनन्तरं सिः सम्बुद्धिरिति न कृतं संबोधनार्थत्वात् सिः सम्बुद्धिरुच्यते ॥८४।

**[ वि० प० ]**

**आमन्त्रिते** । सिद्धस्येत्यादि । अभिमुखस्य भावः आभिमुख्यम्, तस्मिन् करणं विधानम्, सिद्धस्येति । एतदुक्तं भवति – योऽन्यत्र व्यासक्तः कार्यान्तरे विनियोजनार्थमाभि-

मुख्ये विधीयते, तत्र यदाभिमुख्ये विधानं तदामन्त्रितमित्यर्थः, तच्च आमन्त्रितं सिद्धस्यैव भवति, नाप्रसिद्धस्येति । तस्यार्थक्रियाया अक्षमत्वाद् आमन्त्र्यो हि पदार्थः क्रियायां विनियुज्यते। यथोक्तम् –

**सिद्धस्याभिमुखीभावमात्रं संबोधनं विदुः।**
**प्राप्ताभिमुख्यो ह्यर्थात्मा क्रियायां विनियुज्यते।।**

(वा० प० ३।७।१६३)इति ।

हे अम्ब ! हे वृक्ष ! इति **"आमन्त्रणे च"** (२।४।१८) इति सिः, तस्यानेन संबुद्धिसंज्ञायां सत्यां **"ह्रस्वनदी०"**(२।१।७१)इत्यादिना सेर्लोपः ।**"ह्रस्वोऽम्बार्थानाम्"** (२ ।१।४०) इति श्रद्धाया ह्रस्वश्च भवति ।।८४।

**[क० च०]**

आमन्त्रिते ०।सिद्धस्येत्यादि **वृत्तिः।** ननु सिद्धशब्दस्य कोऽर्थः ? न तावन्नित्यार्थः, तदा आकाशादेरेव स्यात् ।न तावन्निष्पन्नार्थः, तदा अन्नादेरेव स्यात् ।नापि प्रसिद्धार्थः, तदा काम्पिल्लादेरेव स्यात् । तस्मात् किं स्यादिति चेदुच्यते - सिद्धशब्दोऽत्र प्रसिद्धार्थो गृह्यते, ततश्च लिङ्गसंज्ञायां यः शब्दः प्रसिद्ध इत्यर्थः। लिङ्गसंज्ञायां यो निष्पन्नो वा ततश्**चोपचारात् तद्वाच्यवस्तु सिद्धशब्देनाभिधीयते इति केचित्।**

**वस्तुतस्तु** सिद्धशब्दो विद्यमानवचनः, एतेनाविद्यमानस्य न संबोधनम् ।अथ तर्हि सिद्धशब्देन किंप्रयोजनम्, व्यावृत्तेरभावात् । साध्यव्यावृत्त्यैव सार्थकत्वादिति चेत्, न। तथाहि **'संबोधनं न लोकेऽस्ति विधातव्ये च वस्तुनि'** (वा०प० ३।१०।५) इति । यथा राजा भवति । अत्र राजत्वमेव साध्यम्, तर्हि स्वरूपकथनार्थमिति । अभिमुखीकरणं संमुखीकरणमिति **कश्चित्।** तन्न, लोके व्यवहितस्यापि आभिमुख्यदर्शनात् । तस्मादभिमुखीकरणं कार्योन्मुखीकरणमित्यर्थः। तथा च **कुमारे 'शून्या जगाम भवनाभिमुखी कथंचित्'** (कु० सं० ३।७५) इत्यादि ।।८४।

**[समीक्षा]**

पाणिनि ने अष्टाध्यायी में संबोधन में विहित प्रथमा विभक्ति की आमन्त्रितसंज्ञा स्वीकार की है – **"संबोधने च, साऽऽमन्त्रितम्"** (२।३।४७,४८) और उसमें एकवचन सुप्रत्यय की 'संबुद्धि' संज्ञा – **"एकवचनं सम्बुद्धिः"** (२।३।४९) इस प्रकार पाणिनि

'आमन्त्रित' को योगरूढ स्वीकार करते हैं, जबकि कातन्त्रकार ने आमन्त्रित को यौगिक मानकर तदर्थ संज्ञासूत्र बनाने की कोई आवश्यकता नहीं समझी और उस आमन्त्रित अर्थ में 'सि' (प्रथमा – एकवचन) की संबुद्धि संज्ञा-हेतु प्रकृत सूत्र बनाया है। यही दोनों व्याकरणों में संबुद्धिसंज्ञा की विशेषता है।

वृत्तिकार दुर्गसिंह – द्वारा प्रस्तुत 'सिद्ध' शब्द के ३ अर्थ व्याख्याकारों ने किए हैं – **नित्य, निष्पन्न और प्रसिद्ध।** उनमें से यहाँ प्रसिद्ध अर्थ ग्राह्य है। सिद्ध शब्द को विद्यमानार्थक मानकर कलापचन्द्रकार सुषेण विद्याभूषण ने कहा है किअविद्यमान का संबोधन नहीं हो सकता ॥८४।

## ८५. आगम उदनुबन्धः स्वरादन्त्यात् परः [ २।१।६ ]

### [ सूत्रार्थ ]

उकारानुबन्ध वाला आगम अन्तिम स्वर से पर में होता है ॥८५।

### [ दु० वृ० ]

प्रकृतिप्रत्यययोरनुपघाती **आगमः।** "आगम उदनुबन्धोऽन्त्यात् स्वरात् परः" परिभाष्यते। पद्मानि, पयांसि। आगम इति किम् ? विद्युत्वान्। उदनुबन्ध आगमस्य लिङ्गम् ॥८५।

### [ दु०टी० ]

आगमः।आगच्छतीति **आगमः।** ननु शब्देषु स्थितानामेव वर्णानामन्वाख्यानमागमः पुनरपूर्व एव, शब्दान्तरश्चेत् किमाचष्टे। न च शब्दात् शब्दान्तरप्रतिपत्तिर्युक्ता। नैवम्, प्रथमं प्रकृतिमुत्पादयति, ततः प्रत्ययम्। पश्चादागमम्, तस्मिंश्च तस्मादागम इति बुद्धिर्भवति।उदनुबन्धोऽस्येति उदनुबन्धः।स्वरादिति परदिग्योगलक्षणा पञ्चमी।अन्ते भवो**ऽन्त्यः,** भवार्थे दिगादिषु यः प्रत्ययो दृश्यते, स्वराणां मध्येऽन्त्यात् स्वरादित्यन्त्य-ग्रहणादेव गम्यते, अन्यथा येन विधिस्तदन्तस्येति सिद्धत्वात्। परिभाष्यत इति। परितः सर्वतो भाष्यते इति **परिभाषा।** यत्र यत्र लिङ्गमस्ति तेन तेन सहैकवाक्यतामा-पद्यमाना विध्यङ्गशेषभूतोच्यते। अथवा नानादेशावस्थितानि सर्वाण्येव कार्याणि लिङ्गान्युत्पाद्य एकदेशस्थैव नियमयति। यथा प्रदीपः सर्वतोऽवस्थितान् घटादीन् प्रकाशयति तथोद्देशं संज्ञापरिभाषे इत्युभयथापि लिङ्गद्वारेणैव प्रवर्तते लिङ्गमात्रा-

श्रयत्वाल्लिङ्गवतीयमुच्यते । तत्पुनरस्या लिङ्गम् उदनुबन्ध आगमः "**धुट्स्वराद् घुटि नुः**" (२।२।११) इत्येवमादिषु ।

ननु च उदनुबन्धो यः स आगम इति कथमवसितम्, यावता "**धुटः स्वरात्**" (२।२।११) इति पञ्चमी, घुटीति सप्तमी, मध्ये नुः स्वतन्त्रः कथन्न भवतीति "**युजेरसमासे नुर्घुटि, अनडुहश्च, सौ नुः**" (२।२।२८, ४२, ४३) इत्यादिषु आदेशोऽपि । नैवम्, उदनुबन्धकरणसामर्थ्यादागम एव निश्चीयत इत्याह - उदनुबन्ध आगमस्य लिङ्गम् इति, तर्हि वन्तुप्रभृतयोऽप्युदनुबन्धाः, तेषामप्यागमत्वं स्यात् । नैवम्, प्रत्ययकरणत्वात् । अन्यथा आगमकरणमनर्थकमित्याह –आगम इति किम् ? विद्युत्वान् इति । अन्तस्थो डे र्षोरित्यादिषु तु नियतदेशावस्थानकल्पनयैवागमत्वं सिद्धम् । ननु "**सौ नुः**" (२।२।४३) प्रभृतिषु सप्तमीनिर्देशाद् अर्थात् परो लभ्यते ? नैवम् । प्रकृते-रागमत्वादानन्तर्यं न विरुध्यते । ननु "**मुचादेरागमो नकारः**" (३।५।३०) इत्यत्र नुरेव कथन्न कृत उदनुबन्धबलादेवागमो भविष्यति ? सत्यम्, **प्रतिपत्तिगौरवनिरासार्थमेव** ॥ ८५।

[वि० प०]

आगमः । प्रकृतीत्यादि । तथा **चापिशलीयाः** पठन्ति –

**आगमोऽनुपघातेन विकारश्चोपमर्दनात् ।**
**आदेशस्तु प्रसङ्गेन लोपः सर्वापकर्षणात्** ॥ इति ।

अस्मात् स्वरात् पर इति स्वराणां मध्ये योऽन्त्यः स्वरस्तस्मादिति प्रतिपत्तव्यम् । अन्यथा व्यञ्जनापेक्षया अन्त्यात् स्वरात् परो भवन् पद्मानीत्यादौ पकारस्याकारादपि स्यात्, एतच्चान्त्यग्रहणादेव लभ्यते, अन्यथा '**येन विधिस्तदन्तस्य**' (कात० प० ३) इति सिद्धमेव । उदनुबन्ध इत्यादि । "**धुट्स्वराद् घुटि नुः**" (२।२।११) इत्यादौ उकारस्यानन्यार्थत्वादागमत्वमेव लक्षयतीत्यर्थः । अत एव विद्युत्वानित्यादौ सत्यप्युदनुबन्धत्वे वन्तोर्नागमत्वम्, उकारस्य "**अन्त्वसन्तस्य चाधातोः**" (२।२।२०) इति चरितार्थत्वात् प्रत्ययप्रकरणविहितत्वाच्चास्येति ॥ ८५।

[क० च०]

आगमः । ननु प्रकृतिप्रत्यययोरनुपघाती आगम इत्युक्तेऽनादिविकरणानामागमत्वं कथं न स्यात्, नैवम् । प्रकृतिप्रत्यययोरेकतरत्वे सतीति विशेषणस्य विवक्षितत्वादा-

गमशब्दो रूढो वा। स्वराणां मध्ये योऽन्त्यः स्वरः इत्यादि **पञ्जी,** अन्यथा यदि कियदपेक्षयाऽन्त्यस्वरत्वं गृह्येतेत्यर्थः। एतच्चान्त्यग्रहणादेव लभ्यत इति। एतदेव कथन्न भवति चकारात् समुदायापेक्षया वेति चेद् अन्त्यग्रहणादेव लभ्यते। न च वक्तव्यम्– भयानीत्यत्रान्तग्रहणस्य व्यावृत्तिर्भविष्यतीति अन्त्यग्रहणसत्त्वेऽपि व्यपदेशिवद्भावेन प्राप्तत्वात्। अन्यथेति। यदि तु समुदायापेक्षयाऽन्त्यत्वं गृह्यते तदा **'येन विधिस्तदन्तस्य'** (कात० प० ३) इति सिद्धमेव किमन्त्यग्रहणेनेति भावः। तदा पद्मानीत्यादावेव स्यात्, न तु पयांसीत्यादाविति शेषः॥८५।

**[ समीक्षा ]**

(१) पाणिनि ने जो नुम् आदि मित् आगम किए हैं और उनके लिए परिभाषा-सूत्र बनाया है– **"मिदचोऽन्त्यात् परः"** (अ० १।१।४७), कातन्त्र में ऐसे ही आगम उकारानुबन्ध वाले किए गए हैं– 'नु, मु' आदि। फलतः इन आगमों की व्यवस्था के लिए प्रकृत सूत्र बनाया गया है, जिसके अनुसार उदनुबन्ध आगम अन्तिम स्वर के बाद होते हैं।

(२) आगम उसे कहते हैं जो प्रकृति-प्रत्यय का उपघात किए विना ही प्रवृत्त होता है– **"प्रकृतिप्रत्यययोरनुपघाती आगमः"।**

(३) टीकाकार ने आगम-परिभाषा शब्दों की व्युत्पत्ति भी की है- **आगच्छतीत्यागमः। परितः सर्वतो भाष्यते इति परिभाषा।**

(४) आपिशलि आचार्य के मतानुसार आगम-विकार-आदेश तथा लोप की परिभाषा एक श्लोक में इस प्रकार की गई है–

**आगमोऽनुपघातेन विकारश्चोपमर्दनात्।**
**आदेशस्तु प्रसङ्गेन लोपः सर्वापकर्षणात्॥** (वि० प०)।

**[ रूपसिद्धिः ]**

१. **पद्मानि।** पद्म + जस्। **"जस्शसौ"** (२।१।४) से जस् की घुट् संज्ञा, **"जस्शसोः शिः"** (२।२।१०) से जस् को शि-आदेश, प्रकृत सूत्र के नियमानुसार 'पद्म' शब्दान्तर्गत मकारोत्तरवर्ती अन्तिम स्वर के पश्चात् **"धुट्स्वराद् घुटि नुः"** (२।२।११) से 'नु' आगम तथा **"घुटि चासंबुद्धौ"** (२।२।१७) से मकारोत्तरवर्ती ह्रस्व अकार को दीर्घ आदेश।

२. **पयांसि ।** पयस् + जस् (अथवा शस्) । पूर्ववत् जस् की घुट्संज्ञा, 'जस्' को 'शि' आदेश, पयस्-शब्दान्तर्गत यकारोत्तरवर्ती अकार के पश्चात् 'नु' आगम, **"सान्तमहतोर्नोपधायाः"** (२।२।१८) से दीर्घ तथा **"मनोरनुस्वारो घुटि"** (२।४।४४) से न् को अनुस्वार आदेश ॥८५।

## ८६. तृतीयादौ तु परादिः [२।१।७]

**[सूत्रार्थः]**

'टा' से 'सुप्' पर्यन्त प्रत्ययों के पर में रहने पर उन्हीं प्रत्ययों (विभक्तियों) के आद्य अवयव रूप उदनुबन्ध आगम होता है ॥८६।

**[दु०वृ०]**

आगम उदनुबन्धस्तृतीयादौ विभक्तौ परादिर्भवति । सर्वस्यै, सर्वेषाम्, वृक्षाणाम् । तुशब्दस्तृतीयाद्यधिकारनिवृत्त्यर्थः । ॥८६।

**[दु० टी०]**

तृतीया० । पूर्वस्यापवादोऽयम् । तृतीयादौ तु परादिश्चेत्, अतिरिणाऽतिरिणो-रित्यत्र रैशब्दस्यात्वं स्यात् । व्यञ्जनादौ यथा 'अतिराभ्याम्' इति । नैवम्, **'सन्निपातलक्षणविधेरनिमित्तत्वात्'** (कात० प०३१), तर्हि तृतीयायां प्रयोजनाभावाच्च-तुर्थ्यादाविति वक्तुं युज्यते । णत्वं पुनरागमत्वादेव सिद्धम् । प्रियतिसृणा कुलेनेत्यत्र नकारस्य णत्वमपि न भवति, समासावयवत्वात् ? सत्यम् । यथासम्भवमात्रं तृतीयादिग्रहणम् । तथा च व्यञ्जने ओसि च परादित्वं न दृश्यते, किं च चतुर्थ्यादौ परादिः, तृतीयायां प्रकृतेरवयव इति संदिह्येत । तुशब्द इत्यादि । अव्ययाश्चानेकार्था इत्युत्तरत्र तृतीयानिवृत्तावप्ययं तुशब्दो वर्तते । तृतीयादेस्त्वादिरिति कृते सिध्यति । परग्रहणं प्रकृतिप्रत्ययविभागेन सुखप्रतिपत्त्यर्थम् ॥८६।

**[वि० प०]**

तृतीया० । सर्वस्या इति – **"सर्वनाम्नस्तु ससवो ह्रस्वपूर्वाश्च"** (२।१।४३) इति श्रद्धायाः परस्य ङेवचनस्य यैकारः सुरागमो ह्रस्वपूर्वश्च । परादित्वे सति यथाक्रमम्

एषामुदाहरणानां विसर्गस्याभावो **"धुटि बहुत्वे त्वे, अकारो दीर्घं घोषवति"**(२। ४) इति प्रयोजनानि। अथ 'अतिरिणा, अतिरिणोः' इत्यत्र न्वागमस्य परादित्वे विभक्तेर्व्यञ्जनादित्वात् कथं 'रैः' इत्यात्त्वं न भवति ? सत्यम्। **"नामिनः स्वरे"** (२।२।१२) इति नुरागमो विहितस्ततः **'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य'** (कात०प० ३१) इति ॥८६।

**[क० च०]**

तृतीयादौ। ननु पूर्वसूत्रे सामान्यतोऽन्त्यस्वराद् भवन् आगमस्योदनुबन्धस्य प्रकृतिभक्तत्वे प्राप्तेऽनेनागमस्योद्बन्धस्य पराद्यवयवत्वं परिभाष्यते। ततश्चतुर्णामित्यत्र 'चतुरः' इत्यनेनान्त्यात् स्वरात् परः पुनर्न्वागमः कथन्न स्यादिति चेत्, न। आदिशब्देनावयवे उच्यमाने प्राथम्यपुरस्कारेणैवोच्येत। प्राथम्यं चाव्यवहितपूर्वस्थितत्वम्। अतः कथमत्र न्वागमस्यापरादित्वे रेफस्य व्यवधाने न्वागमस्य सिद्धिः। चेत् परादित्वार्थं नुर्भवतु पुनरन्त्यात् स्वरात् परो भवतु इति चेत् ? सत्यम्। उदनुबन्धस्यागमस्य कोऽप्यर्थो नास्ति, किन्तु प्रकृतिप्रत्यययोरर्थाभिधाने साहाय्यमेव क्रियते। तच्चैकेनैव न्वागमेन कृतम्, कथं पुनर्न्वागमस्य प्रसङ्ग इति। यथा 'भिनत्ति' इत्यत्र नशब्देनैव साहाय्यं कृतमित्यन्न स्यात्। अथवा पूर्वसूत्रस्य सामान्यप्राप्तस्य बाधकमिदं भिन्नविषयेऽपि बाध्यबाधकभावाविरुद्धत्वात्। तथा च 'वृक्षैः' इत्यत्र प्रकृतिप्रत्यययोरपि बाध्यबाधकभावो विवक्षित इति।

तुशब्द इत्यादि **वृत्तिः।** ननु तुशब्दग्रहणं किमर्थम्,यावता **"अग्नेरमोऽकारः"** (२।१।५०) इति लोपविधानम्। अतस्तृतीयाद्यधिकारनिवृत्तिर्भविष्यति ? सत्यम्। **'स्वं रूपं शब्दस्याशब्दसंज्ञा'** (कात०प० २८) इति न्यायात् तत्राग्निशब्दादमोऽकारलोपो भविष्यति, तर्हि **"शसोऽकारः"** (२।१।५२) इत्यत्र 'अस्त्रियाम्' इति ग्रहणं व्यर्थं स्यात्, अग्निशब्दस्य स्वभावतः पुंसि वृत्तत्वात्। चेद् 'अत्यग्नीः स्त्रियः' इत्येतद्व्यावर्तनार्थं भविष्यति। न च वक्तव्यम् **"न सखिष्टादावग्निः"** (२।२।१) इत्यत्र टादिग्रहणं निरर्थकमिति उत्तरत्र नरपतेर्भूपतेरित्येतत्सिद्ध्यर्थं तस्यावश्यं क्रियमाणत्वात्। यद् वा टादिग्रहणं शसि सखिशब्दस्याग्नित्वप्रतिपादनार्थं भविष्यति। ननु **"इच्छतिनैककर्तृकात्"** (३।२।४) इति ज्ञापकात् स्वरूपस्य ग्रहणं न भविष्यतीति चेद् अत्र सूत्रत्वादिति वक्तव्यम्। किंच ज्ञापकेन किमिह प्रत्याख्यातुं न शक्यत इति **संक्षेपः।** तृतीयाग्रहणस्य 'बहुक्रोष्टुना वनेन' इति फलम् ॥८६।

### [ समीक्षा ]

**"आगम उदनुबन्धः स्वरादन्त्यात् परः"** (२।१।६) सूत्र के निर्देशानुसार जो उदनुबन्ध आगम अन्तिम स्वर के पश्चात् होता है, वही तृतीयादि विभक्तियों के परवर्ती होने पर उन्हीं का आद्यवयवरूप होगा। जैसे – 'सर्वेषाम्' आदि में 'सु' आगम तथा 'वृक्षाणाम्' आदि में 'नु' आगम। पाणिनि इन आगमों को टित् कहते हैं – 'नुट्, सुट्, डुट्, णुट्'। तथा इनकी व्यवस्था के लिए उनका परिभाषासूत्र है – **"आद्यन्तौ टकितौ"** ( अ०१।१।४६)। वस्तुतः पाणिनि का अनुबन्धभेद यहाँ आवश्यक प्रतीत नहीं होता, क्योंकि 'नुम्' आगम तृतीयादि विभक्तियों में नहीं होता तथा 'नुट्' आगम तृतीयादि विभक्तियों में ही होता है। इस प्रकार कातन्त्रीय व्यवस्था अधिक उचित कही जा सकती है।

### [ रूपसिद्धि ]

१. **सर्वस्यै।** सर्वा + ङे। **"सर्वनाम्नस्तु ससवो ह्रस्वपूर्वाश्च"** (२।१।४३) सूत्र से 'सर्वा'शब्द को ह्रस्व, सु आगम तथा 'ङे' के स्थान में 'यै' आदेश।

२. **सर्वेषाम्।** सर्व +आम्। **"सुरामि सर्वतः"** (२।१।२९) से 'सु' आगम, **"धुटि बहुत्वे त्वे"** (२।१।१९) से एत्व तथा **"नामिकरपरः प्रत्ययविकारागमस्थः सिः षं नुविसर्जनीयषान्तरोऽपि"** (२।४।४७) से 'स्' को मूर्धन्यादेश।

३. **वृक्षाणाम्।** वृक्ष +आम्। **"आमि च नुः"** (२।१।७२) से 'नु' आगम, **"अकारो दीर्घं घोषवति"** (२।१।१४) से दीर्घ तथा **"रषृवर्णेभ्यो नो णमनन्त्यः स्वरहयवकवर्गपवर्गान्तरोऽपि"** (२।४।४८) से णत्व ॥८६।

## ८७. इदुदग्निः [ २।१।८ ]

### [ सूत्रार्थ ]

इकार तथा उकार की अग्निसंज्ञा होती है ॥८७।

### [ दु० वृ० ]

इकार उकारश्चाग्निसंज्ञो भवति। अग्निम्, पटुम्। इदुदिति किमु ? सेनान्यम्, यवल्वम्। अग्निप्रदेशाः **"अग्नेरमोऽकारः"** (२।१।५०) इत्येवमादयः ॥८७।

[दु० टी०]

इदु०। इकार उकारश्चेत्येतेन किमुक्तम् ? इदुदिति प्रत्येकं लुप्तप्रथमैकवचनम् इकारमात्र उकारमात्रश्चाग्निरिति। एतेन 'अग्नी, पटू' इत्यत्राग्नेः पर औकारः पूर्वमापद्यमान इकारोकारावेवापद्येत न तदन्तं शब्दमिति। किं च **"न सखिष्टादावग्निः"** (२।२।१) इत्यत्र प्रतिषेधो भविष्यति, तेन 'परमसख्या कृतम्, उत्तमसख्ये देहि' इति सिद्धम्। अन्यथा तदन्तविशेषणे बहुव्रीहौ सखिशब्दस्य प्रतिषेधो न स्यात्। गौणत्वात् सामान्यनिर्देशादिह तदन्तविधिरपि नाशङ्क्यते लिङ्गमपि नाधिकृतमेव।

तथा च व्याख्यातम् – किञ्च विशेषणविशेष्ययोरिष्टत्वात्। इदुदिति किमित्यन्यस्य मा भूदित्यर्थः। तपरमन्तरेण यत्वे वत्वे च यकारो वकारश्चाग्निरिति प्रतिपद्येत। ततश्च 'सेनान्यम्, यवल्वम्' इत्यत्र **"अग्नेरमोऽकारः"** (२।१।५०) इत्यमोऽकारलोपः स्यात्। अथ **"उमकारयोर्मध्ये"** (१।५।७) इति ज्ञापकादिति चेत्, नैवम्। सूत्रत्वादम आदिलोपः कृत इति मन्यते ॥८७।

[वि० प०]

इदु०। इदुदिति प्रत्येकं लुप्तप्रथमैकवचनम्। अत आह - इकार उकारश्चेति। एतेन केवलयोरेवानयोरग्निसंज्ञा स्यात्, न तदन्तस्येति दर्शितम्। तथा च सति 'अग्नी, पटू' इत्यत्राग्नेः पर औकारः पूर्वमापद्यमान इकारोकारावेवापद्येत न तदन्तं शब्दमिति। 'सेनान्यम्, यवल्वम्' इति तकारमन्तरेणासवर्णे यत्वे वत्वे च कृते य्वग्निरिति सूत्रे यकारवकारयोरेवाग्निसंज्ञा स्यात्। ततश्चेहाप्यमोऽकारलोपः स्यात्। **"औरिम्, उमकारयोर्मध्ये"** (२।१।४१; १।५।७) इति ज्ञापकाददोष इति चेत्, नैवम्। इकारोकाराभ्यां सूत्रत्वाद् अम आदिलोप इति मन्यते। सेनां नयतीति **"सत्सूद्विष०"** (४।३।७४) इत्यादिना क्विप्। यवं लुनातीति **"क्विप् च"** (४।३।६८) इति क्विप्। **"अनेकाक्षरयोः"** (२।२।५९) इत्यादिना यत्वं वत्वं च ॥८७।

[क० च०]

इदुत्०। ननु इदुतोर्द्विवचनान्तयोः सामानाधिकरण्येनाग्निशब्दादपि द्विवचनान्तमेव वक्तुं युक्तमित्याशङ्क्याह – प्रत्येकमित्यादि। एतेनेति **वृत्तौ** इकारान्तोकारान्त इति विशेषाभावेनेत्यर्थः। ननु इदन्तोदन्तत्वेन कथन्न विवृतम्, यावता येन विधिस्तदन्तस्येति

इदन्तोदन्तमिति युक्तं चेत् न। न ह्यस्य लिङ्गाधिकारोऽस्ति, येन लिङ्गेनात्र तदन्तविधिर्भविष्यतीति युक्तमेवोक्तं **वृत्तौ** – इकार उकारश्चेत् ॥८७।

**[समीक्षा]**

लिङ्ग का अधिकार न होने के कारण कातन्त्र में 'इ-उ' वर्णों की अग्नि संज्ञा मानी गई है। पाणिनि ने इसके लिए इवर्णोवर्णान्त की **घिसंज्ञा** की है – **"शेषो घ्यसखि"** (पा० अ० १।४।७)। इकार-उकार की अग्निसंज्ञा करने के कारण कातन्त्र में 'अग्नी,पटू' आदि शब्दों में **"औकारः पूर्वम्"** (२।१।५१) सूत्र से औकार को 'इ-उ' आदेश होते हैं, तदन्त अग्नि-पटु' इत्यादि नहीं। संज्ञा-शब्द की दृष्टि से 'अग्नि' को अन्वर्थ कहा जा सकता है, जबकि पाणिनि की 'घि' संज्ञा अत्यन्त कृत्रिम होने से यदृच्छाप्रयुक्त है। इन दोनों में यही अन्तर कहा जा सकता है कि कातन्त्रकार की संज्ञा शब्दप्रयोग से अर्थावबोध कराने की तरह सहजगम्य है और पाणिनि की कृत्रिम संज्ञा हस्तचेष्टा से अर्थावबोध कराने की तरह साङ्केतिक।

**[रूपसिद्धिः]**

१. **अग्निम्।** अग्नि + अम्। प्रकृतसूत्र से अग्निशब्दान्तर्गत इकार की अग्निसंज्ञा, **"अग्नेरमोऽकारः"** (२।१।५०) से अम्-प्रत्यय के अकार का लोप।

२. **पटुम्।** पटु +अम्। प्रकृत सूत्र से पटु-शब्दान्तर्गत उकार की अग्निसंज्ञा तथा **"अग्नेरमोऽकारः"** (२।१।५०) से अम्-प्रत्यय के अकार का लोप ॥८७।

## ८८. ईदूत् स्त्र्याख्यौ नदी [२।१।९]

**[सूत्रार्थ]**

नित्यस्त्रीलिङ्ग वाले शब्दों में दीर्घ ईकार तथा दीर्घ ऊकार की नदीसंज्ञा होती है ॥८८।

**[दु० वृ०]**

ईदूदित्येवं स्त्र्याख्यौ नदीसंज्ञौ भवतः। **नद्यै, वध्वै। तपरकरणमसन्देहार्थम्।** स्त्र्याख्याविति किम्? सेनान्यै, यवल्वै। नदीप्रदेशाः– **"नद्या ऐ आसासाम्"** (२।१।४५) इत्येवमादयः॥८८।

[दु० टी०]

ईत्० । ईदूदित्येवमिति प्रत्येकं लुप्तप्रथमैकवचनं स्त्र्याख्याविति समुदायापेक्षया द्विवचनम् । यथा पतिश्च पुत्रश्च ताविति । लुप्तप्रथमाद्विवचनो द्वन्द्वो वा । तपरकरणं किमर्थम् ? तपरमन्तरेण यू इति निर्देशे सति किमेतौ दीर्घौ वा ह्रस्वौ वा । ह्रस्वश्चेत्, 'बहुमतिः, बहुधेनुः' इति नदीत्वाद् बहुव्रीहौ कप्रसङ्गः स्यात्, नैवम् । ह्रस्वयोर्ङवति नदीवद्भावविधानात् । अथ विभाषार्थं तदिति चेत्, वद्ग्रहणं विरुध्येत, उपमानोपमेययोरविशेषत्वात् । अथ यकारो वेति । ऊकारेण स्वरेण सहचरित ईकार एव विज्ञायते ? नैवम् । बहुप्रतिपत्तिविधेयमेतदित्याह – **तपरकरणमसन्देहार्थम्** इति । स्त्रियमाचक्षाते इति **स्त्र्याख्यौ**। अस्मादेव ज्ञापकात् सोपसर्गादपि कप्रत्ययः। मूलविभुजादिवक्तव्यबलादित्यन्ये । प्रयोगश्च दृश्यते –

**यस्मिन् दश सहस्राणि पुत्रे जाते गवां ददौ।**

**ब्राह्मणेभ्यः प्रियाख्येभ्यः सोऽयमुञ्छेन जीवति ।।**

अथवा **आचक्षाते इत्याख्यौ । "उपसर्गे त्वातो डः"** (४।२।५२) इति डप्रत्ययः । ततः स्त्रिया आख्यौ इति समासः । अत्र कर्मोपपदे अण् न भवत्यभिधानादिति भावः । तदन्तविशेषणमिह नास्ति । कुमारीयतीति क्विप् । **"य्वोर्व्यञ्जनेऽये"** (४।१।३५) इति यिनो यलोपः । कुमारीवाचरतीति आयेश्च पक्षे लोप इति मतम् । खरकुटीव खरकुटी, प्रतिकृतौ बहुलत्वात् को नास्तीति । कुमार्यै खरकुट्यै द्विजायेत्यत्र ऐ-प्रभृतयो भवन्ति । कथं तन्त्र्यै, वध्वै, यवल्वै । नेमौ स्त्रियामीकारोकारौ विहिताविति ? सत्यम् । **स्त्र्याख्याव-यवोऽपि स्त्र्याख्य इत्युपचारात्**। यथा – 'ग्रामो दग्धः, पटो दग्धः' इति ग्रामैकदेशोऽपि ग्राम उच्यते ।

**व्युत्पत्तिवादी** पुनराह - स्त्रियामेतावपि विहितावीदूताविति । यथा - अतितन्त्र्यै, अतिलक्ष्म्यै, अतियवल्वै द्विजाय । यस्तु लिङ्गमधिकृत्य तदन्तं विशेषयति, स आह - प्रथमे लिङ्गे यौ स्त्र्याख्यौ इति प्रवृत्ता नदीसञ्ज्ञा न निवर्तते । किं चाप्रधाने लिङ्गकार्यमपि दृश्यते । यथा कुन्तान् स्त्रीः प्रवेशय । यष्टीर्मनुष्यानिति कुन्तयोगात् कुन्ताः स्त्रियः । यष्टियोगाद् यष्टयो मनुष्या इति । आख्याग्रहणं च नित्यस्त्रीविषयार्थम्, स्त्रीविषये यावीदूतौ तयोर्नदीसंज्ञा यथा स्यात्, इह मा भूत् - ग्रामण्यै, यवल्वै ब्राह्मण्यै ।

'ग्रामणी - यवलू' शब्दौ शब्दान्तरनिरपेक्षौ स्वभावात् पुंसि वर्तेते। तर्हि ईदूद्ग्रहणं किमर्थम्, बहुखट्व इत्यत्र नदीलक्षणः को मा भूत्, नैवम्। **"ह्रस्वनदीश्रद्धाभ्यः"** (२।१।७१) इत्यत्र श्रद्धाग्रहणात्। तर्हि 'शरदं मातरं पश्य' इति नदीकार्यं प्रसज्येत ॥८८।

**[वि० प०]**

ईदूत्०। अथ किमर्थं तपरकरणम्, ईकारस्य यत्वे यू-इति लुप्तप्रथमाद्विवचनमास्ताम्, नैवम्। **"औकारः पूर्वम्"** (२।१।५१) इति कृते निर्देशस्य समानत्वाद् ह्रस्वयोरपि नदीसंज्ञा स्यात्। ततश्च मतिधेनुशब्दयोरपि नदीत्वे सति बहुमतिर्बहुधेनुरिति [1]**"नद्यृदन्ताद् बहुव्रीहौ"** इति नदीलक्षणः कप्रत्ययः स्यात्। तदयुक्तम् **"ह्रस्वश्च ङवति"** (२।२।५) इति ह्रस्वयोर्नदीवद्भावविधानाद् विकल्पार्थमिति तदिति चेत् तर्हि वत्करणं विरुध्येत। उपमानोपमेययोरविशेषत्वादतस्तस्मादतिदेशबलाद् दीर्घयोरेव नदीसंज्ञा विज्ञायते। यू-इति पुनर्विधानाच्च, अन्यथा ईदूदिति वर्तत एव। न च यकारस्य नदीत्वाशङ्का स्यात्, यस्मादुकारेण स्वरेण साहचर्यादीकार एवावसीयते ? सत्यम्, एवं सति सन्देहनिरासार्थमेव स्यादित्याह – तपर इत्यादि।

**स्त्रियमाचक्षाते इति स्त्र्याख्यौ।** विषयविवक्षायां चक्षिङः ख्याञादेशे सति, अत एव निर्देशात् सोपसर्गादपि कप्रत्ययः। तच्च किमर्थमित्याह – स्त्र्याख्यावित्यादि। सेनानी-यवलूशब्दौ शब्दान्तरनिरपेक्षौ स्वभावात् पुंसि वर्तेते, नात्र नदीसंज्ञा यदापि शब्दान्तरसन्निधानात् स्त्रियां वृत्तिस्तदापि न भवति। इहाख्याग्रहणस्य नित्यस्त्रीविषयत्वादिति। अन्यथा स्त्रियामित्येवं कुर्यात्। तेन 'सेनान्यै, यवल्वै ब्राह्मण्यै' इति नदीत्वाभावाद् **"नद्या ऐ-आस्-आस्-आम्"** (२।१।४५) इति ऐर्न भवति ॥८८।

**[क० च०]**

ईदूत्०। ह्रस्वयोरपि नदीसंज्ञा स्यादिति। ननु **"अमृशसोरादिर्लोपम्"** (२।१।४७) इत्यत्रामृग्रहणादेव ह्रस्वयोर्न भविष्यति। अन्यथा **"अग्नेरमोऽकारः"** (२।१।५०) इत्यनेनाकारलोपः सिद्धः ? सत्यम्। सिद्धान्तरमेतद् इति यू पुनर्विधानाच्चेति नेह वत्करणमस्ति, अधिकाराच्चेति तदर्थस्याघटनान्न वर्तते इत्याह - 'यू' इति **हेमकरः।** औणादिकस्य नदीसंज्ञकस्य ह्रस्वो नेष्यते इति **केचित्।** तस्माद् 'हे तन्त्रीः, हे लक्ष्मीः' इति सिध्यति। दृश्यते च – **'हे लक्ष्मीः स्या दरिद्राणां तन्त्रीः कर्णामृतं पिब'** इति। अस्माकं

---

१. नद्यृतश्च (अ० ५।४।१५३)।

तु मते व्यस्थितवास्मरणाद् विकल्पो मन्तव्यः। तेन **'मातर्लक्ष्मि! भजस्व माम्'** इत्यादिकम्, **'हे लक्ष्मीः स्या दरिद्राणाम्'** इति च ॥८८।

**[ समीक्षा ]**

कातन्त्रकार के अनुसार स्त्रीत्वबोधक ईकार-ऊकार वर्णों (प्रत्ययों) की तथा पाणिनि के अनुसार नित्य स्त्रीलिङ्ग वाले ईकारान्त-ऊकारान्त शब्दों की नदीसंज्ञा की गई है – **"यू स्त्र्याख्यौ नदी"** (अ० १।४।३)। एकत्र तदन्तविधि है और अन्यत्र उसका अभाव, परन्तु इस भेद से कोई उत्कर्ष-अपकर्ष नहीं कहा जा सकता है, क्योंकि यह भेद तो सूत्ररचनाशैली के अनुसार उपस्थित होता है। 'ईदूत्' तथा 'यू' पदों में 'ईदूत्' पद से सरलतया दीर्घ ईकार तथा दीर्घ ऊकार का बोध हो जाता है, परन्तु 'यू' पद से दीर्घ ईकार-ऊकार रूप अर्थ व्याख्यागम्य है।

इसे ईकारान्त-ऊकारान्त स्त्रीत्वाभिधायक शब्दों के साथ अंशतः भी साम्य न होने के कारण अन्वर्थ तो नहीं कहा जा सकता है, तथापि कुलविध्वंसिनी स्त्री के साथ कूलविध्वंसिनी नदी का साम्य स्थापित कर दोनों में तादात्म्य दिखाने का प्रयत्न विद्वानों ने अवश्य किया है। जैसे –

१. **स्त्री नदी तदिदं सत्यं रसेनाकुलिता सती।**
**यतो ध्वंसं विधत्ते सा कूलवत्कुलयोरपि॥** (वृत्तित्रय० १०९)।

२. **नद्यश्च नार्यश्च सदृक्प्रभावास्तुल्यानि कूलानि कुलानि तासाम्।**
**तोयैश्च दोषैश्च निपातयन्ति नद्यो हि कूलानि कुलानि नार्यः॥**

(प० त० १।२२३)।

३. **जामातृसम्पत्तिमचिन्तयित्वा पित्रा तु दत्ता स्वमनोऽभिलाषात्।**
**कुलद्वयं हन्ति मदेन नारी कूलद्वयं क्षुब्धजला नदीव॥**

(अविमारक० १।३)।

अन्वर्थता या अनुगतार्थता न होने के कारण पाणिनि पर आक्षेप किया जाता है –

**पाणिनेर्न नदी गङ्गा यमुना वा नदी स्थली।**
**प्रभुः स्वातन्त्र्यमापन्नो यदिच्छति करोति तत्॥** (वृ०त्र०वा० ८०)।

मुग्धबोधव्याकरण में वोपदेव ने एकदेश 'दी' संज्ञा का प्रयोग किया है – "यूत् स्त्र्येव दी" (सू०९६)।

**[ रूपसिद्धि ]**

१. **नद्यै**। नदी + ङे। प्रकृत सूत्र से नदीशब्दान्तर्गत ईकार की नदीसंज्ञा, "**नद्या ऐ आसासाम्**" (२।१।४५) से ङे को ऐ आदेश तथा ई को य् आदेश।

२. **वध्वै**। वधू + ङे। प्रकृत सूत्र से वधू-शब्दान्तर्गत ऊकार की नदीसंज्ञा, "**नद्या ऐ आसासाम्**" (२।१।४५) से ङे को ऐ-आदेश तथा ऊ को व् आदेश।

## ८९. आ श्रद्धा [२।१।१०]

**[ सूत्रार्थ ]**

नित्यस्त्रीलिङ्गवाची आकार की श्रद्धा संज्ञा होती है॥८९।

**[ दु० वृ० ]**

आकारो यः स्त्र्याख्यः स श्रद्धासंज्ञो भवति। श्रद्धा, माला। स्त्र्याख्य इति किम् ? कीलालपाः। श्रद्धाप्रदेशाः– "**श्रद्धायाः सिर्लोपम्**" (२।१।३७) इत्येवमादयः॥८९।

**[ दु० टी० ]**

**आ श्रद्धा**। इहाख्याग्रहणं नित्यस्त्रीविषयार्थम्। इह मा भूत्-सोमपाः स्त्री। ननु "**स्त्रियामादा**" (२।४।४९) विधाने आजिति कृते यत्र श्रद्धाग्रहणेन प्रयोजनं तत्राज्ग्रहणेनैव सिध्यति, एवमभेदोपचारादायिलोपाद् वा श्रद्धापुरुष इति। तदन्तपक्षेऽपि कुन्तान् स्त्रीः, यष्टीर्मनुष्यानिति यथा तथायमपि भविष्यति ? सत्यम्, **प्रतिपत्तिरियं गरीयसीति** संज्ञा विधीयते॥८९।

**[ वि० प० ]**

**आ श्रद्धा**। कीलालपा इति। कीलालं पिबतीति "**आतो मनुक्वनिब्वनिब्विच्**" (४।३।६६) इति। इहाप्याख्याग्रहणमनुवर्तते एव पूर्ववद् वेदितव्यम्॥८९।

**[ क० च० ]**

**आ श्रद्धा**। इहाख्याग्रहणमनुवर्तते इति। एतेन नित्यस्त्रीलिङ्गस्यैवानेन क्रियते इति 'सोमपाः स्त्री' इत्यत्रोपचारादाकारस्य स्त्रीत्वेऽपि न भवतीति न्यायः। **अस्यायमाशयः–**

[टीकापूर्वपक्षस्वरसात् **"स्त्रियामादा"** (२।४।४९) इत्यस्य विषय एवास्य विषय इति कल्पनाद् उपचारे प्रमाणलाभाच्च तस्मादयमाशयः।] तथाहि आख्याग्रहणाभावे स्त्रियामिति कृते विषयमाश्रित्य 'दानम्' दा इति सम्पदादित्वात् स्त्रियां क्विपि कृते यथाकथञ्चित् सम्बन्धेनाकारस्य स्त्रीविषयत्वात् तत्रापि स्यात्। 'कीलालपाः स्त्री' आदावपि। अत एवाख्याग्रहणमुपात्तम्। तथा च सति स्त्रियां विहितस्यैव भविष्यति, नान्यस्येति पर्यवसितम्। एवं च **वृत्तौ** समुदायस्य प्रत्युदाहरणं **टीकायां** व्याख्यास्यत इति वक्तव्यम्॥८९।

**[समीक्षा]**

स्त्रीलिङ्गवाले आकारान्त शब्दों की यह श्रद्धासंज्ञा गण पर आधारित कही जा सकती है। सूत्ररचनाप्रक्रिया के अनुसार यह केवल आकार की ही होती है। श्रद्धाशब्दार्थ की अन्य आकारान्तशब्दों के साथ कोई सङ्गति न होने के कारण इसे अन्वर्थ नहीं कहा जा सकता। पाणिनि ने आकार या आकारान्त शब्दों की कोई संज्ञा नहीं की हैं। पूर्वसूत्रस्थ 'आख्या' पद की अनुवृत्ति से 'सोमपाः, कीलालपाः स्त्री' इत्यादि में आकार की श्रद्धासंज्ञा प्रवृत्त नहीं होती है।

**[रूपसिद्धि]**

१. **श्रद्धा।** श्रद्धा + सि। प्रकृत सूत्र द्वारा आकार की श्रद्धासंज्ञा तथा **"श्रद्धायाः सिर्लोपम्"** (२।१।३७) से 'सि' प्रत्यय का लोप।

२. **माला।** माला + सि। प्रकृत सूत्र से मालाशब्द के अन्तर्गत लकारोत्तरवर्ती आकार की श्रद्धासंज्ञा तथा **"श्रद्धायाः सिर्लोपम्"** (२।१।३७) से सिप्रत्यय का लोप॥८९।

## १०. अन्त्यात् पूर्व उपधा (२।१।११)

**[सूत्रार्थ]**

लिङ्ग (प्रातिपदिक) या धातु के अन्तिम वर्ण से पूर्ववर्ती वर्ण की उपधा संज्ञा होती है॥९०।

**[दु० वृ०]**

लिङ्गस्य धातोर्वा अन्त्याद् वर्णाद् यः पूर्वो वर्णः स उपधासंज्ञो भवति। राजन्- अकारः, भिद्-इकारः, वृत्-ऋकारः (वृ वकारः)। उपधाप्रदेशाः– **"अस्योपधाया दीर्घो वृद्धिर्नामिनामिनिचट्सु"** (३।६।५) इत्येवमादयः॥९०।

## [ दु० टी० ]

अन्त्यात्० । पूर्वदिग्योगलक्षणा पञ्चमीयम् । **उपधानम् उपधा । "आतश्चोपसर्गे"** (४।५।८४) इत्यङ् । तत्सम्बन्धादुपधायाः स्वलिङ्गेनावस्थितिः । ननु कथमिह वर्ण इति लभ्यते ? सत्यम्, वर्णसमुदायो हि लिङ्गं धातुर्वा अर्थादन्त्यशब्दवाच्यः पूर्वशब्दवाच्यश्च वर्ण एव भवति । किञ्च स्मृतिकृतोऽतिशयोऽन्त्यवर्णविषयानुसन्धिः (स्मृतिकृतोऽन्त्यवर्णविषयार्थसम्बन्धि) प्रत्यय इत्युक्त एव । अतः पूर्वोऽनन्तर एव वर्ण उपधासंज्ञार्थं स्मर्यते इति कुतः शिष्टः शिष्यत इति । अत्रान्त्यादवयवात् पूर्वस्य शकारमात्रस्य उपधासंज्ञा यत्तदर्थं वर्ण इति भण्यते । **आशीरिति ज्ञापयन्त्यन्ये।** यद्येवं संज्ञयापि किमुपधाविधानेन उपान्त्य इति कृतेऽप्यभिमतं सिध्यति, समीपभूतो वर्णोऽन्त्यो यस्य खलु **उपान्त्य** इत्युच्यते ? सत्यम्, **एता हि संज्ञा नित्या अन्वाख्यातव्या** इति ।।९०।

## [ वि० प० ]

अन्त्यात्० । अत्र सूत्रे विशेषस्यानिर्देशाल्लिङ्गाधिकारस्याप्यनङ्गीकरणात् सामान्यमेव विज्ञायते इत्याह – लिङ्गस्य धातोर्वेति । न चेदं लिङ्गप्रकरणं लिङ्गकार्यस्य **"अकारो दीर्घं घोषवति"** (२।१।१४) इत्यादिना विधास्यमानत्वेन तस्य भविष्यत्वात् । किं च यदि लिङ्गप्रकरणत्वात् तस्यैव उपधासंज्ञा स्यात् तदा **"अस्योपधाया दीर्घो वृद्धिः०"**(३।६।५) इत्यादि विरुध्यते, धातोरुपधाव्यवहाराभावादिति । एतदेव सूचयति - उपधाप्रदेशाः **"अस्योपधाया दीर्घो वृद्धिः०"**(३।६।५) इत्यादि ।।९०।

## [ क० च० ]

अन्त्यात् । अन्त्यादिति **'भाविनि भूतवदुपचारः'** (कात० प० १४) इत्याह – किं चेति । वृत् – ऋकार इत्यपि क्वचिद् वृत्तौ पाठः । तस्यायमाशयः – उपधासंज्ञाया गुणः **"ऋदुपधाच्चाक्लृपिचृतेः"** (४।२।२४) इत्यत्र क्यबपि प्रयोजनम्, किन्त्वेतत् तात्पर्यं स्याद् गुणरूपोपधाकारस्य पूर्वमेव दर्शितत्वात् । तस्माद् वृ - वकार इति पाठस्यैव प्रयोजनम्-**"उरोष्ठ्योपधस्य"** (३।५।४३) इति व्यञ्जनकार्यत्वात् पूर्वतो विशेषो ह्ययम् ।।९०।

## [ समीक्षा ]

पाणिनि तथा कातन्त्रकार की यह उपधासंज्ञा अन्वर्थ है - उप = समीपेऽन्त्यस्य पूर्वस्मिन् समीपे धीयते निधीयते यो वर्णः स **उपधासंज्ञः। उपधानमिति वा उपधा।**

"**आतश्चोपसर्गे**" (४।५।८४) इति अङ्प्रत्ययः (उप+धा+अङ्)। पाणिनि का सूत्र है-"**अलोऽन्त्यात् पूर्व उपधा**" (अ०१।१।६५)।

**पूर्वाचार्यों** ने भी इस संज्ञा का प्रयोग किया है –

**निरुक्त** – अथाप्युपधालोपो भवति - जग्मतुर्जग्मुरिति (२।१)। अथाप्युपधाविकारो भवति - राजा दण्डीति।

**ऋक्प्रातिशाख्य** – सहोपधोऽरिफित एकवर्णवद् विसर्जनीयः स्वरघोषवत् परः (१।६७)। अनुस्वारमुपधां वाऽन्यवर्णां स्वरोपधात् सोष्मयमोदयश्चेत् (१४।५४)।

**वाजसनेयिप्रातिशाख्य** – अन्त्याद् वर्णात् पूर्व उपधा (१।३५)।

**अथर्ववेदप्रातिशाख्य** – यान्याकारोपधानि मकारान्तानि स्त्रियैकवचनानि ह्रस्वोपधानि पुंवचनानि (२।१।१५)।

अर्वाचीन व्याकरणों में इसके लिए ङ्-संज्ञा का प्रयोग किया गया है –

**जैनेन्द्रव्याकरण** – उपान्त्याल् ङ् (१।१।६६)।

**मुग्धबोधव्याकरण** – पूर्वोऽन्त्याद् ङ् (सू० ९१) ॥९०॥

## ९१. व्यञ्जनान्नोऽनुषङ्गः [२।१।१२]

### [सूत्रार्थ]

लिङ्ग (प्रातिपदिक) अथवा धातु-गत अन्तिम व्यञ्जन वर्ण से पूर्ववर्ती नकार की अनुषङ्ग संज्ञा होती है ॥९१॥

### [दु० वृ०]

लिङ्गस्य धातोर्वाऽन्त्याद् व्यञ्जनाद् यः पूर्वो नकारः सोऽनुषङ्गसंज्ञो भवति। विदुषः, स्रस्यते। न इति किम्? ऊर्भ्याम्। अनुषङ्गप्रदेशाः – "**अनुषङ्गश्चाक्रुञ्चेत्**" (२।२।३९) इत्येवमादयः ॥९१॥

### [दु० टी०]

**व्यञ्ज०**। इहानन्तरत्वाद् अन्त्यात् पूर्व इति वर्तते नेत्यकार उच्चारणार्थः। तेन 'उपानद्' इत्यत्रानुषङ्गसंज्ञा न भवति। **अनुषज्यत इत्यनुषङ्ग** इति व्युत्पत्त्या अस्य

प्रधानता ख्यायते, तेन 'भवद्भ्याम्, विद्वद्भ्याम्' इत्यत्र संयोगान्तलोपाद् अनुषङ्गलोप एव भवतीति **केचिदा**चक्षते । तदयुक्तम् - वचनसामर्थ्यादनुषङ्ग एव लुप्यते, संयोगान्त-लोपस्यालुप्तवद्भावाच्च नित्योऽयमनुषङ्गलोप इति । यथाकथंचिदियं व्युत्पत्तिरिति । व्यञ्जनादिति किमर्थम् "गमहन०" (३।६।४३; ४।६।७७) इत्यत्रानुषङ्गसंज्ञा मा भूदिति । 'विदुषः' इति वेत्तेः शन्तुर्वन्सुः । शस्, ङसि, उस् वा ॥९१।

**[वि० प०]**

व्यञ्जनात्० । विदुष इति । विद ज्ञाने, शन्तृङ् । **"वेत्तेः शन्तुर्वन्सुः"** (४।४।४) इति वन्सुः । शस्, ङसि, ङस् वा । **"अघुट्स्वरादौ०"** (२।२।४६) इत्यादिना वृशब्द-स्योत्वम् । अनेन नकारस्यानुषङ्गत्वे **"अनुषङ्गश्चाक्रुञ्चेत्"** (२।२।३९) इत्यनुषङ्ग-लोपः । षत्वं नामिपरत्वात् । धातोरपि दर्शयति - स्रस्यत इति स्रन्सेः कर्मण्यात्मनेपदं 'ते' । **"सार्वधातुके यण्, अनिदनुबन्धानाम्"** (३।२।३१; ६।१) इत्यादिनाऽनुषङ्गलोपः । ऊर्भ्याम् इति । ऊर्ज बलप्राणधारणयोश्चुरादित्वादन् । ऊर्जयतीति क्विप् ॥९१।

**[क० च०]**

व्यञ्जनात्० । ननु ऊर्भ्याम् इति **वृत्तौ** कथम् प्रत्युदाहृतम्, यावता रेफस्य सत्यामप्यनुषङ्गसंज्ञायां रात् सस्यैव लोप इति नियमस्य व्यावृत्तिबलादेव लोपो न भविष्यति ? सत्यम् । अत्राह **हेमकरः**– नियमस्य विरामव्यञ्जनादिषु विषयत्वाद् अघुटि स्वरे 'ऊर्ज्जा' इत्यादिकं प्रत्युदाहरणं बोद्धव्यम् । **महान्तस्तु** ऊर्भ्यामित्येव प्रत्युदाहरणं युक्तम् । यावता विरामे 'ऊर्क्' इत्यत्र नियमव्यावृत्तिचरितार्थत्वम् इति दिक् ॥९१।

**[समीक्षा]**

पाणिनि ने यह संज्ञा नहीं की है, परन्तु व्याख्याकारों ने इसका स्मरण किया है । **"पूर्वाचार्यसंज्ञेयं नकारस्य"** (म० भा० दी०, पृ० १३४) । **"नकारस्योपधाया अनुषङ्ग इति पूर्वाचार्यैः संज्ञा कृता"** (न्यासः १।१।४७) ।

काशकृत्स्नधातुव्याख्यान में इस संज्ञा के उपलब्ध होने से यह दृढतापूर्वक कहा जा सकता है कि पूर्वाचार्यों ने यह संज्ञा की थी - "अनुनासिकोऽनुषङ्गः" (का० धा० व्या०, सू० ७) ।

**[ रूपसिद्धि ]**

१. **विदुषः।** विद्वन्स्+शस्। अन्तिम वर्ण स् से पूर्ववर्ती नकार की प्रकृत सूत्र द्वारा अनुषङ्ग संज्ञा, **"अघुट्स्वरादौ सेट्कस्यापि वन्सेर्वशब्दस्योत्वम्"** (२।२।४६) से व् को उ, **"अनुषङ्गश्चाक्रुञ्चेत्"** (२।२।३९) से न् को लोप, **"नामिकरपरः"** (२।४।४७) से स् को ष् आदेश तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से विसर्ग आदेश। पञ्चमी-एकवचन 'ङसि' प्रत्यय तथा षष्ठी-एकवचन 'ङस्' प्रत्यय में भी 'विदुषः' शब्दरूप सिद्ध होता है।

२. **स्रस्यते।** स्रन्स्+ते। "सार्वधातुके यण्" (३।२।३१) से यण्, अन्तिम वर्ण स् से पूर्ववर्ती नकार की प्रकृत सूत्र द्वारा अनुषङ्ग संज्ञा तथा **"अनिदनुबन्धानामगुणेऽनुषङ्गलोपः"** (३।६।१) से न् का लोप॥९१।

## १२. धुड् व्यञ्जनमनन्तस्थानुनासिकम् [२।१।१३]

**[ सूत्रार्थ ]**

अन्तस्था और अनुनासिकसंज्ञक व्यञ्जनों को छोड़ कर शेष व्यञ्जनवर्णों की धुट् संज्ञा होती है॥९२।

**[ दु० वृ० ]**

अन्तस्थानुनासिकवर्जितं व्यञ्जनं धुट्संज्ञं भवति। पयांसि। अपक्त। अन्तस्थानुनासिकवर्जमिति किम्? चत्वारि, अमंस्त। धुट्प्रदेशाः – **"धुटश्च धुटि"** (३।६।५१) इत्येवमादयः॥९२।

**[ दु० टी० ]**

धुट्०। न विद्येते अन्तस्थानुनासिकसंज्ञे यस्य तद् व्यञ्जनम् **अनन्तस्थानुनासिकम्,** संज्ञासंज्ञिनोरभेदे समाहारद्वन्द्व एव - अन्तस्थाश्च अनुनासिकाश्च **अन्तस्थानुनासिकम्,** पश्चान्नञ्समासः। संहतेरपि प्राधान्यादवयवस्य साकारत्वात् संज्ञा प्रवर्तते। ननु **'नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः'** (कात० प० ४९) इति व्यञ्जनमेव गम्यते, व्यञ्जनग्रहणं किमर्थम्। नैवम्, अन्तस्थानुनासिका हि बहवस्तदपेक्षयाऽन्यो वर्ण इति प्रतिपत्तव्यम्, नैवम्। **"धुटश्च धुटि"** (३।६।५१) इति सिद्धे **"ह्रस्वाच्चानिटः,**

**इटश्चेटि**"(३।६।५२, ५३) इति विधानाद् "**धुट्स्वराद् घुटि नुः**"(२।२।११) इत्यत्र स्वरग्रहणाच्च स्वराणां धुट्संज्ञा नास्तीति अवगम्यते। तदयुक्तम्। ह्रस्वादेव सिचो लोपो यथा स्याद् दीर्घो मा भूत। अनैषीदिति। "इटश्चेट्येव अनिटः" इति वर्जने सति विधिर्वा "**धुट्स्वराद् घुटि नुः**" (२।२।११) इत्यत्र च स्वरग्रहणं स्वरदर्शना-देवान्तरङ्गमप्यारमैत्वं च बाधित्वा नुरेव यथा स्यात्-'सुकर्तॄणि, सुसखीनि' इति। तर्हि घञादीनां घकारकरणं किमर्थम्, धुटीत्युक्तेऽपि चजोः कगौ भवत एव, नैवम्। कृत्स्वराणां धुट्संज्ञा नास्तीति ज्ञापयिष्यति। किञ्च विसर्जनीयानुस्वारयोरपि धुट्संज्ञा स्यात् जिह्वामूलीयोपध्मानीययोर्वचनबलान्न भविष्यति। ततश्च संगम्यते, पचाम इति। "**अघोषे प्रथमः, पदान्ते धुटां प्रथमश्च**" (२।३।६१; ३।८।१) प्राप्नोति॥९२।

## [वि० प०]

धुट्०। पयांसीति सकारस्य धुट्त्वे "**धुट्स्वराद् घुटि नुः**" (२।२।११) इति सकारात् प्राङ् नुरागमः। "**सान्तमहतोर्नोपधायाः**" (२।२।१८) इति दीर्घः। अपक्त इति। पच्, अद्यतनी त, ततः अडागमः, सिच्, "धुटश्च धुटि" (३।६।५१) इति सिचो लोपः। चत्वारीति। जस्शसोः शिः। अमंस्त। मन ज्ञाने। धुट्त्वाभावाद् न्वागमसिच्लोपौ न भूतौ ॥९२।

## [क० च०]

धुट्०। ननु अमंस्त इति कथं प्रत्युदाहृतम्, यावता व्यक्तिबलादेव नकारस्यानुस्वारे कृते धुट्त्वाभावादेव सिचो लोपो न भविष्यति ? सत्यम्, वर्गे वर्गान्तः (२।४।४५) इत्यत्र मनोरनुवृत्तिपक्षे वर्गे वर्गान्तत्वविषया एव व्यक्तिराश्रयणीया। नन्वनुस्वारविधाविति यन्मतं तन्मतमवलम्ब्येदम्, एतच्चानुस्वारस्य नियतस्थानव्यञ्जनत्वमिति पक्षे। अन्यथा अनुस्वारस्य धुट्त्वमेवेति न दोषः। सामान्यतो व्यञ्जनत्वपक्षेऽपि न तस्य धुट्संज्ञा, पूर्वत्रोत्तरत्र च प्रधानवर्णप्रस्तावादिति भावः।

यद् वा अनुस्वारविधौ तु यदि व्यक्तिराश्रीयते तदा "धुटश्च धुटि"(३।६।५१) इत्यत्रापि व्यक्तिराश्रयणीया। अपाक्ष्मेति प्रत्युदाहरणमि**त्येके।** यदि विभक्तिव्यत्ययेन व्यञ्जनानुवृत्तिः क्रियते, तदा व्यञ्जनग्रहणं सुखार्थम्। ननु धुडनन्तस्थानुनासिकम् इति कृतेऽपि यादृग्जातीयस्येति न्यायाद् व्यञ्जनस्य धुट्संज्ञा भविष्यति, न तु स्वरस्येति

तत् किं व्यञ्जनग्रहणेन ? नैवम् । अन्तस्थानुनासिका वर्णास्तत्साहचर्याद् वर्णस्यैव भविष्यतीत्युक्ते स्वरव्यञ्जनयोरेव सामान्येनोपपद्यत इति व्यञ्जनग्रहणम् । ननु तथापि न क्रियताम्, **"धुट्स्वराद् घुटि नुः"** (२।२।११) इत्यत्र स्वरग्रहणादेव स्वरस्य धुट्संज्ञा न भविष्यति । अन्यथा "धुटो नुः" इति विदध्यात् । नैवम्, तत्रैव स्वरग्रहणस्य प्रयोजनमुक्तम् ।

तथाहि 'सुकर्तृणि, सुसखीनि' इत्यत्र **"धातोस्तृशब्दस्यार्, घुटि न्वै"** (२।१।६८; २।२४) इति न प्राप्नोतीति सार्थकं व्यञ्जनग्रहणमिति । ननु तथापि व्यञ्जनग्रहणं न क्रियताम्, तदभावेऽपि व्यञ्जनस्यैव धुट्संज्ञा भविष्यति । तथाहि यदि केवलं व्यञ्जनस्य धुट्संज्ञा न भविष्यति, तदा आख्याते सिज्लोपविधौ **"ह्रस्वाच्चानिटः, इटश्चेटि"** (३।६।५२, ५३) इति सूत्रद्वयविधानमनर्थकम् **"धुटश्च धुटि"** (३।६।५१) इत्यनेनैव सिद्धेः । नैवम् । **"ह्रस्वाच्चानिटः"** (३।६।५२) इति नियमार्थम् भविष्यतीति वाच्यम् । तथाहि स्वरधुटां मध्ये ह्रस्वादेव सिचो लुग् भविष्यति न दीर्घादिति अनैषीदिति सिद्धम् । तथा इटः सिचो लोपो भवन् इट्येव, तेनानिटि न स्यात् । यथा अकणिषम् इति व्यञ्जनग्रहणं सार्थकमिति । यदि पुनरिदं व्याख्यायते अन्तस्थानुनासिकं तावद् व्यञ्जनम्, तत्साहचर्याद् अन्त्यव्यञ्जनस्यैव भविष्यति । तदा **सुखार्थं व्यञ्जनग्रहण**मिति भावः ।।९२ ।

**[ समीक्षा ]**

कातन्त्रकार ने "अनुनासिका ङ-ञ-ण-न-माः" (१।१।१३) से 'ङ्, ञ्, ण्, न्, म्' वर्णों की अनुनासिक संज्ञा एवम् "अन्तस्था यरलवाः" (१।१।१४) से 'य्, र्, ल्, व्' वर्णों की अन्तस्था संज्ञा की है। इन ९ वर्णों को छोड़कर शेष २५ व्यञ्जन वर्णों की कृत्रिम 'धुट्' संज्ञा कातन्त्र में की गई है - क्, ख्, ग्, घ्, च्, छ्, ज्, झ्, ट्, ठ्, ड्, ढ्, त्, थ्, द्, ध्, प्, फ्, ब्, भ्, श्, ष्, स्, ह्, क्ष् । पाणिनीय व्याकरण में माहेश्वरसूत्रस्थ ये ही वर्ण (क्ष् को छोड़कर) झल् प्रत्याहार में आते हैं- (१) झ भञ्, (२) घ ढ धष्, (३) ज ब ग ड दश्, (४) ख फ छ ठ थ च ट तव्, (५) क पय्, (६) श ष सर्, (७) हल् ।

'धुट्' और झल्' दोनों ही कृत्रिम संज्ञाएँ हैं। अतः इनकी अन्वर्थता और उत्कर्षापकर्ष बताना संभव नहीं है।

**[ रूपसिद्धि ]**

१. **पयांसि ।** पयस् + जस् । "जस्शसौ नपुंसके" (२।१।४) से जस्प्रत्यय की घुट्संज्ञा, "**जस्शसोः शिः**" (२।२।१०) से जस् को 'शि' आदेश , पयस्-शब्दस्थ स् की प्रकृत सूत्र से धुट्संज्ञा, "**धुट्स्वराद् घुटि नुः**" (२।२।११) से नु आगम, "**सान्तमहतोर्नोपधायाः**" (२।२।१८) से दीर्घ तथा "**मनोरनुस्वारो घुटि**" (२।४।४४) से न् को अनुस्वार ।

२. **अपक्त ।** पच् + त (अद्यतनी) । "**अड् धात्वादिर्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु**" (३।८।१६) से 'अट्' आगम, "**सिजद्यतन्याम्**" (३।२।२४) से सिच् प्रत्यय, प्रकृत सूत्र से च् तथा त् की 'धुट्' संज्ञा "**धुटश्च धुटि**" (३।६।५१) से सिच्-लोप एवम् "**चजोः कगौ धुड्घानुबन्धयोः**" (४।६।५६) से 'च्' को 'क्' आदेश ॥९२।

## ९३. अकारो दीर्घं घोषवति [२।१।१४]

**[ सूत्रार्थ ]**

घोषवत्-संज्ञक विभक्ति के परवर्ती होने पर लिङ्ग (प्रातिपदिक) के अन्तिम ह्रस्व वर्ण को दीर्घ आदेश होता है ॥९३ ।

**[दु० वृ० ]**

अकारो लिङ्गान्तो घोषवति विभक्तौ दीर्घमापद्यते । आभ्याम्, वृक्षाय, वृक्षाणाम् । घोषवतीति किम् ? वृक्षः ॥९३।

**[दु० टी० ]**

अकारः ।**वर्णसमाम्नाये** खल्वादिरकार इति तमधिकृत्य दीर्घादिविधिरन्वाख्यायते । **कारशब्दः** स्वरूपार्थ एव वर्णेभ्यः प्रयुज्यते । वर्णानां तु स्वरूपमभिधेयम् इति प्रथमा । लिङ्गमिह पुनरन्वाख्यातम्, यतो जसिप्रभृतिषु विधिषु स्यादय एव श्रूयन्त इति प्रकरणबलाद् घोषवान् वर्ण इह स्यादिविभक्तिविषय एव प्रतिपत्तव्यः । स्यादयश्च लिङ्गमन्तरेण न संभवन्तीति । अथवा वक्ष्यमाणेषु विधिषु लिङ्गप्रभृतय एव श्रूयन्ते, ततोऽविनाभावसंबन्धात् स्यादय एव अन्तरङ्गा गम्यन्ते, तेन 'भारहारः' इति न दीर्घ इति । पचध्वम्, यजध्वम् इत्यत्र च कुत एत्वं धुटि, येन "**अस्य वमोर्दीर्घः**" (३।८।११) इति लिङ्गार्थं ज्ञापकमुच्यत इति ।

ननु कथम् आभ्याम्, नायं लिङ्गान्त इति ? नैवम्। नात्रान्तग्रहणमस्ति प्रायोवृत्तितया निगद्यते लिङ्गस्यान्तो लिङ्गं वा अकार इति, यद्येवमिहैव स्यात्। **'अर्थवद्ग्रहणे नानर्थकस्य'** (कात० प० ४) इति न वृक्षाभ्यामिति। अत्र इदमोऽकारश्चेत् ते इति विदध्यात्, नैवम्। विष्णुपर्यायस्याकारस्यापि संभवाद् आय, आनामिति न सिध्यति ? सत्यम्, अनित्येयं परिभाषेति ज्ञापितमेव। यस्तु लिङ्गमधिकृत्य तदन्तं विशेषयति अकारान्तं लिङ्गं दीर्घमापद्यत इति तदा **'आद्यन्तवदेकस्मिन्'** (कात० प० २१) इत्युपचाराद् आभ्याम् इति भवति, स्यादिमधिकृत्य च घोषवदादौ स्यादाविति **'वर्णग्रहणे तदादौ कार्यसम्प्रत्ययः'** (द्र०-क० व्या०-पृ० २२२, सं० ७०) इति प्रतिपद्यते। ननु दीर्घो भवन् **'स्थानेऽन्तरतमः'** (कात०प० १६) इति चेद् आग्रहणमेव कथं न कुर्यात् ? सत्यम्, **विचित्रार्थमेव**।

ननु 'वृक्षाय, वृक्षाणाम्' इत्यत्र अकारमाश्रित्य यकारादेशौ नुरागमश्च जातस्तस्मात् **'सन्निपातलक्षणो विधिरनिमित्तं तद्विघाताय'** (कात० प० ३०) इति दीर्घो न स्यात्। नैवम्, भे इति कर्तव्ये यद् घोषवद्ग्रहणं करोति तदवसीयते वर्णग्रहणे निमित्तत्वाद् इत्यस्तीयं परिभाषेति ।।९३।

**[वि० प०]**

**अकारः।** घोषवति विभक्ताविति भिन्नाधिकरणोऽयं विशेष्यविशेषणभावः। विभक्तिविषये यो घोषवान् वर्णस्तस्मिन्नित्यर्थः कथमेतद्, यावता विभक्त्यधिकारस्याभावात् 'भारहारः' इत्यादिष्वपि दीर्घः स्यादिति न देश्यम्। प्रकरणबलाद् विधिप्रकरणे ह्यस्मिन् जसीत्यादिषु विधिवाक्येषु स्यादय एव श्रूयन्ते। ततश्च स्यादिप्रकरणबलात् तद्विषये घोषवान् वर्णः प्रतिपत्तव्यः। स्यादयश्च विभक्तय इति। अत एवाकारो लिङ्गान्त इत्युक्तम्, स्यादीनां लिङ्गमन्तरेणासंभवात्।

अथवा **"स्मै सर्वनाम्नः"** (२।१।२५) इत्यादिषु लिङ्गप्रकृतय एव दृश्यन्ते, ततो लिङ्गप्रकरणत्वाल्लिङ्गस्यैव दीर्घादिविधिरिति कुतोऽन्यत्र प्रसङ्गः। अत एवाख्याते दीर्घविधानार्थम् **"अस्य वमोर्दीर्घः"** (३।८।११) इति सूत्रान्तरमुक्तम्। आभ्यामिति। इदम् + भ्याम। त्यदाद्यत्वम् **"अद् व्यञ्जनेऽनक्"** (२।३।३५) इति अदादेश इति। इह लिङ्गान्तत्वाभावेऽपि दीर्घः। न खलु अत्र अन्तग्रहणमस्तीति लिङ्गस्यान्तो लिङ्गं वाऽकारः इत्यर्थः। न चाकारेण तदन्तविधिरुपलभ्यते, लिङ्गस्यैवानधिकृतत्वात् किं तेन विशिष्यते। यदुक्तं वृत्तौ लिङ्गान्त इति तत् प्रायोवृत्तिमाश्रित्य वेदितव्यम्। यद्येवम्

**'अर्थवद्ग्रहणे नानर्थकस्य'** (कात० प० ४) इत्यत्रैव स्यात्, न वृक्षाभ्याम् इत्यादौ। नैवम्, तदा घोषवतीत्यपनीय 'भ्ये' इति कुर्यात्। नहि इदमोऽकारस्य भकारमन्तरेणान्यत्र घोषवति सम्भवोऽस्तीति ? तदयुक्तम्, विष्णुपर्यायस्यार्थवतोऽकारस्य संभवात् तदर्थं घोषवद्ग्रहणं विज्ञायते, यथा आय- आनामिति ? सत्यम्, अनित्येयं परिभाषा। **"ओदन्ताः"** (१।३।१) इत्यत्रान्तग्रहणेन विज्ञापितमेव। वृक्षाय, वृक्षाणामिति अकारमाश्रित्य ङेवचनस्य यकारो नुरागमश्चामि परतः। ततः **'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य'** (कात० प० ३१) इति नाशङ्कनीयम्।

एवं तर्हि भकार एव दीर्घमित्युक्तं स्यात्, नहि स्यादौ भकारमन्तरेण घोषवान् वर्णोऽपरोऽस्तीति "अकारो दीर्घं भे" इति विदध्यात्, न चैवं कृतम्, तस्माद् घोषवद्ग्रहणमेव ज्ञापयति –वर्णग्रहणे निमित्तत्वादस्तीयं परिभाषेति, तद्बलाच्च दीर्घ इति ॥९३।

## [क० च०]

**अकारः**। घोषवति विभक्ताविति। नन्वत्र विभक्तेर्न विशेष्यत्वं घोषवति, अनित्यकरणाद् विभक्तिसमुदायस्य घोषवत्त्वाभावाच्च। यदि च घोषवान् वर्णो विशेष्यः विशेषणं विभक्तिस्तदा कथं सामानाधिकरण्येनान्वयः, विभक्तेः समुदायवृत्तित्वात्। समुदायस्य घोषवत्त्वाभावादित्याह - भिन्नाधिकरणोऽयमिति। ननु जसीत्यादिषु स्यादय एव श्रूयन्त इति कथमुच्यते,यावता स्यादिभिन्नयोरपि जस्‌शसोः संभवः। यथा नरजसनम् अल्पश इत्याह - अथवेति। **"स्मै सर्वनाम्नः"** (२।२।२५) इत्यादिषु लिङ्गप्रकृतय एव श्रूयन्त इति। ननु यथा लिङ्गप्रकृतय एव श्रूयन्ते तथा पूर्वपूर्वसूत्रे सामान्यमपि श्रूयते।

तथाहि लिङ्गस्य धातोर्वेति, नैवम् **"अस्य वमोर्दीर्घः"** (३।८।११) इत्याख्याते दीर्घविधानादत्र लिङ्गस्यैव भविष्यति, तदयुक्तम्। आख्याते घोषवति "अस्य वमोः" परत एव दीर्घो भवति, नान्यस्मिन्निति नियमार्थं भविष्यति, तस्य व्यावृत्त्या 'पचध्वम्, यजध्वम्' इत्यत्रानेनापि न दीर्घः। नैवम्, तत्र **"धुटि बहुत्वे त्वे"** (२।१।१९) इत्यस्य विषयत्वेन दीर्घो न भविष्यतीति चेत्, जहीति वृत्त्या दीर्घो न भविष्यतीति, **"हन्तेर्ज हौ"** (३।४।४९) इति जादेशकरणाद् दीर्घो न भविष्यतीति **गुरवः**। नैवम्।

**"हेरकारादहन्तेः"** (३।४।३३) हन्धातोः प्रतिषेधात् 'जहौ' इति न भविष्यति ? सत्यम् । यदि पूर्वदृष्ट्या सामान्यमाश्रीयते, तदा "अस्य वमोः" (३।८।११) इत्यस्य नियमत्वं स्यात् । यदि तु परदृष्ट्या स्यादय एवाश्रीयन्ते, तदा **"अस्य वमोर्दीर्घः"** (३।८।११) इत्यस्य विधित्वं स्यात् ।

ननु एकस्मिन्नपि पक्षे का क्षतिः, **'विधिनियमसंभवे विधिरेव ज्यायान्'** (कात० प०पा० ८४) इति न्यायात् तस्य विधित्वकल्पनं युक्तम् । अत एव **पञ्जिकायां** स्यादिप्रकृतय एव श्रूयन्त इति यदुक्तं तदुचितमिति घोषवद्ग्रहणेन ज्ञापयतीति । ननु तथापि घोषवद्ग्रहणं न क्रियताम्, भ्योरिति क्रियताम् ।'वृक्षाय' इत्यत्र यकारोपादानादेव भविष्यति । वृक्षाणाम् इत्यत्र तु न्वागमस्य तृतीयादौ त्विति परादित्वकरणादेव दीर्घो भविष्यति, अन्यथा तस्य परादित्वेन किं फलम् । नैवम्, दीर्घादन्यदपि परादित्वस्य फलमस्ति, यथा क्रोष्टूनामिति । व्यञ्जनविषये नित्यं तुनिति । किं च वृक्षाणामित्यत्र परादित्वाभावात् प्रकृतिभक्तत्वे सति 'दध्ना' इतिवत् **'अवमसंयोगाद०'** (२।२।५३) इत्यादिनाऽकारलोपः स्यात् । 'भ्योसु' इति कृतेऽप्यनयोरुपादानेन ज्ञापकं सिध्यति । यद् घोषवद्ग्रहणं तत् **श्रुतिसुखार्थमिति** । अन्यथा उच्चारणगौरवं स्यादिति भावः । अथाकारग्रहणं किमर्थम्, न च 'अग्निभ्याम्' इत्यादौ दीर्घः स्यादिति वाच्यम्, नामिनां **"दीर्घमामि सनौ"**(२।२।१५)इति दीर्घविधानात् ।अन्यथा 'अग्नीनाम्' इत्यादिष्वप्यनेनैव दीर्घो भविष्यति किं तेनेति ? सत्यम् । नियमार्थं तत् सूत्रं भविष्यति नामिनां दीर्घो भवन् आम्विशिष्टे न्वागम एव न तु टादिविशिष्टे, तेन 'वारिणा' इत्यादिषु न दीर्घः । ततोऽकारग्रहणाभावे 'अग्निभ्याम्' इत्यत्र दीर्घः स्यादतोऽकारग्रहणम् ॥ ९३ ।

**[समीक्षा]**

कातन्त्रकार ने 'ग्-घ्-ङ्-ज्-झ्-ञ्-ड्-ढ्-ण्-द्-ध्-न्-ब्-भ्-म्-य्-र्-ल्-व्-ह्-' **इन बीस वर्णों की घोषवत् संज्ञा की है – "घोषवन्तोऽन्ये"** (१।१।१२) । **इन्हीं वर्णों** के पर में रहने पर लिङ्गान्त्य ह्रस्व अकार को दीर्घ आदेश होता है । पाणिनि ने **"नामि"** (अ० ६।४।३) तथा **"सुपि च"** (अ० ७।३।१०२) इन दो सूत्रों द्वारा दीर्घविधान किया है । कार्यी तथा कार्य का निर्देश अपनी-अपनी परम्परा के अनुसार है – कातन्त्र में कार्यी (स्थानी) प्रथमान्त है तथा कार्य द्वितीयान्त । जबकि पाणिनि स्थानी का षष्ठ्यन्त तथा कार्य का निर्देश प्रथमान्त करते हैं ।

**[रूपसिद्धि]**

१. **आभ्याम्।** इदम् + भ्याम्। "**त्यदादीनाम विभक्तौ**" (२।३।२९) से मकार को अकार, "**अकारे लोपम्**" (२।१।१७) से अकार का लोप, "**अद् व्यञ्जनेऽनक्**" (२।३।३५) से 'अ' आदेश तथा प्रकृत सूत्र द्वारा दीर्घ।

२. **वृक्षाय।** वृक्ष + ङे। "**ङेर्यः**" (२।१।२४) से ङे को 'य' आदेश एवं प्रकृत सूत्र से लिङ्गान्त ह्रस्व अकार को दीर्घ।

३. **वृक्षाणाम्।** वृक्ष + आम्। "**आमि च नुः**" (२।१।७२) से नु आगम, "**तृतीयादौ तु परादिः**" (२।१।७) से आम् प्रत्यय के आद्यवयव के रूप में उसकी योजना, "**रषृवर्णेभ्यः ०**" (२।४।१८) से न् को ण् तथा प्रकृत सूत्र से लिङ्गान्त्य ह्रस्व अ को दीर्घ।।९३।

## ९४. जसि [२।१।१५]

**[सूत्रार्थ]**

'जस्' (प्रथमाविभक्ति-बहुवचन) प्रत्यय के पर में रहने पर लिङ्ग (प्रातिपदिक) के अन्तवर्ती ह्रस्व अकार को दीर्घ आदेश होता है।।९४।

**[दु० वृ०]**

अकारो लिङ्गान्तो जसि परे दीर्घमापद्यते। वृक्षाः। अकारे लोपे प्राप्ते वचनम्।।९४।

**[दु० टी०]**

**जसि।** उच्चारितप्रध्वंसिनो ह्यनुबन्धा इति जकाराभावे नास्त्येव दीर्घ इत्याह - अकार इत्यादि। न च सवर्णलक्षणो दीर्घोऽस्ति, एकपदे अकारस्य लोपात् स्यादिसम्बन्धाच्च। नरजसनम्। जसिधातुरयं युडन्तो भिन्नयोगेऽपि **सुखप्रतिपत्त्यर्थ** एव।।९४।

**[वि० प०]**

**जसि।** अनुबन्धानामुच्चारितप्रध्वंसित्वाज्जकारलोपे घोषवतोऽसम्भवात् पूर्वेण दीर्घो न सिध्यतीति वचनमिदमुच्यते। यद्येवं समानलक्षणो दीर्घो भवतीत्याह - अकार इत्यादि। एकपदत्वाद् "**अकारे लोपम्**" (२।१।१७) इति विशेषवचनेन पूर्वस्याकारस्य लोपः प्राप्त इति भावः।।९४।

**[क० च०]**

**जसि।** पूर्वेणेत्यादि। ननु कथमिदमुच्यते, यावता जकारस्थितावपि **"धुटि बहुत्वे त्वे"** (२।१।१९) इत्यनेन एत्वमेव प्राप्नोति ? सत्यम्, एत्वविधावजसीति कृते दीर्घः सिध्यतीति **कुलचन्द्रः। हेमकरस्तु** जकारस्यानुबन्धत्वाद् एत्वमपि निराकृतमिति। **महान्तस्तु "धुटि बहुत्वे त्वे"** (२।१।१९) इत्यत्र धुड्ग्रहणमपनीय सुभोरिति क्रियताम्, किमनेनेत्याहुः। **वस्तुतस्तु** पूर्वपरयोः सूत्रयोरघुड्विषयत्वाद् अत्रापि अघुड्विषय एव कल्प्यते इति न दोषः। अत्र **उमापतिः** –

**स्थिते जकारे विफलं जसीति जस्यानुबन्धत्वमतो न पूर्वम्।**
**एवं च पूर्वापरसूत्रदृष्ट्या घुडन्यधुट्येव कुतोऽत्र देश्यम्॥**

अकारे लोप इत्यादि **वृत्तिः।** अकारे परे **"अकारे लोपम्"** (२।१।१७) इत्यनेन अकारलोपे प्राप्ते वचनमारभ्यते इत्यर्थः। ननु अकारलोपविधौ अजसीति क्रियतां किमनेन ? सत्यम्। एवन्तर्हि 'ते' इति न सिध्यति, किन्तु त्यदाद्यत्वे **"जस् सर्व इः"** (२।१।३०) इति कृते दकारस्थाने कृतस्याकारस्य एत्वे पुनस्तकाराकारस्य ऐत्वे 'तै' इत्येवं स्यात्।

अथ 'त्यदादीनां डः' इति विधीयतां चेत् तथापि उपकुम्भमिति न सिध्यति, जसः स्थानेऽमिति कृतेऽकारस्य लोपो न स्यादेव। तदर्थमेव सूत्रमिदं चेत्,नैवम्। **"अव्ययीभावात्"** (२।४।१) इत्यत्रामृग्रहणमपनीय डमिति कर्तव्यं चेत्, तदा तितव इति न सिध्यति, तन्न। **"अकारे लोपम्"** (२।१।१७) इत्यत्र अजस इति विदध्यात्। जसः सम्बन्धिनि अकारेऽकारलोपो न भविष्यति कुतोऽन्यत्र प्रसङ्गश्चेत् तदा **सुखार्थमेव सूत्रमिदम्** ॥९४।

**[समीक्षा]**

अनुबन्धों के उच्चरितप्रध्वंसी होने के कारण जस्-प्रत्ययगत 'ज्' समाप्त हो जाता है, अतः पर में घोषवत् वर्ण के अभाव में पूर्वसूत्र से दीर्घ नहीं हो सकता था, अतः पृथक् सूत्र बनाया गया है, परन्तु समानलक्षण दीर्घ से ही कार्य सिद्ध हो जाने पर सूत्र बनाने की कोई आवश्यकता नहीं रह जाती – इस आपत्ति का समाधान व्याख्याकारों ने इस प्रकार किया है कि समानलक्षण दीर्घ को बाधकर

**"अकारे लोपम्"** (२।१।१७) से आकार-लोप हो जाने पर जस्प्रत्ययान्त रूप 'वृक्षः' ही सिद्ध होता, जो किसी भी रूप में सार्थक नहीं कहा जा सकता था। अतः अनर्थक रूप के वारणार्थ प्रकृत सूत्र बनाया गया है। पाणिनि तो पूर्व-पर के स्थान में दीर्घविधान करते हैं– **"एकः पूर्वपरयोः, प्रथमयोः पूर्वसवर्णः"** (अ० ६।१।७५, १०२)।

**[रूपसिद्धि]**

१. वृक्षाः। वृक्ष+जस्। प्रकृत सूत्र से लिङ्गान्तवर्ती ह्रस्व अकार को दीर्घ, **"समानः सवर्णे दीर्घीभवति परश्च लोपम्"** (१।२।१) से दीर्घ तथा परवर्ती अकार का लोप, **"रेफसोर्विसर्जनीयः"** (२।३।६३) से विसर्ग आदेश ॥९४।

## ९५. शसि सस्य च नः [२।१।१६]

**[सूत्रार्थ]**

शस् (द्वितीयाविभक्ति-बहुवचन) प्रत्यय के पर में रहने पर लिङ्गान्तवर्ती अकार को दीर्घ तथा शस्प्रत्ययगत स् को न् आदेश होता है ॥९५।

**[दु० वृ०]**

अकारो लिङ्गान्तः शसि परे दीर्घमापद्यते, सस्य च नो भवति। वृक्षान्। स्याद्यधिकारः किम् ? अल्पशः ॥९५।

**[दु० टी०]**

**शसि०।** ननु **'सप्तम्या निर्दिष्टे पूर्वस्य'** (कात० प० २१) कार्यं भवति इति लिङ्गान्तसकारस्य नकारः स्यात्-सुमनसः पश्येति। नैवम्। **'श्रुतानुमितयोः श्रौतसम्बन्धो विधिर्बलवान्'** (कात० प० पा० ९२) इति। किञ्च 'तृतीयान्' इति निर्देशात् नपुंसकपरत्वात् शिरादेश इति पुंसि विधिरयम्। ननु 'शस् आन्' इति कथन्न कुर्यात् लघु विस्पष्टं च ? सत्यम्, **विचित्रनिर्देशः खलु बालबोधक एव** ॥९५।

**[वि० प०]**

**शसि ०।** ननु **'सप्तम्या निर्दिष्टे पूर्वस्य'** (कात०प० २१) इति प्रकृतिसकारस्यैव नकारः कथन्न भवति। यथा-'सुमनसः पश्य' इति। नैवम्, दीर्घसन्नियोगेन विधीयमानो नकारः कथन्तदभावे स्यात्, **'सन्नियोगशिष्टानामेकापायेऽन्यतरस्याप्यपायः'**

(व्या० प० वृ० ४१) इति न्यायात्। अथ दीर्घ एव कथन्न स्यादिति चेद् अकारान्तत्वाभावात्। ननु कथम् अकारान्तस्यैव दीर्घ इति निश्चितम्, न ह्यत्रान्तग्रहणमस्तीति। न च तदन्तविशेषणम्, लिङ्गस्यैवानधिकृतत्वादिति ? सत्यम्। शसीति निमित्तसप्तम्युपादानाद् अनन्तरस्यैव पूर्वस्य दीर्घो भवति, कुतो व्यवहितस्य प्रसङ्गः। तथा **'अकारो दीर्घं घोषवति'** (२।१।१४) इत्यादावपि मन्तव्यम्। दृशद्भ्याम् इत्यादौ दीर्घप्रतिषेधार्थम्. एवं तर्हि यत्र दीर्घस्तत्रैव प्रकृतिसकारस्यैव नकारः कथन्न स्यात् सारसानिति, नैवम्। अत्रापि सकारस्याकारेण व्यवहितत्वात् तस्माद् अर्थवशाद् विभक्तिविपरिणामेन लब्धषष्ठीकस्य शस एव सकारस्य नकार इति। किञ्च श्रुतत्वात् 'तृतीयान्' इति निर्देशाद् वेति।

स्याद्यधिकारः किमिति – ननु च स्याद्यधिकारो न कृत एव तत् किमिदमुच्यते ? सत्यम्। इह स्याद्यधिकारः स्यादिसम्बन्ध उच्यते। यथा ब्राह्मणानामत्राधिकारः, ब्राह्मणानामत्र सम्बन्धो गम्यते। **तदयमर्थः –** स्याद्यधिकारः किं स्यादिसम्बन्धः किमिति न ह्यन्यस्य शसः सद्भावोऽस्तीति मन्यते। अथवा ये स्याद्यधिकारमिच्छन्ति तन्मतमनेनाशङ्कितमिति। इह तु प्रकरणे स्यादिसम्बन्धादेव न भवतीति वेदितव्यम् इत्यदोषः। अल्पं देहि अल्पशः। "[1]**बह्वल्पार्था०**" (२।६।४०-८) इत्यादिना तमादित्वाच्छस्॥९५।

## [ क० च० ]

शसि। यावता अर्थवशाद् विभक्तिविपरिणामेन लब्धषष्ठीकस्य शसः सकारस्य नकारस्तावता तत एवार्थवशात् पूर्वस्य कार्यद्वयम् इत्यकारस्य दीर्घत्वे तत्सन्निहितस्य सकारस्य न कथं नकार इत्याह – किं चेति **हेमकरः। वस्तुतस्तु** यस्य दीर्घो विधीयते नकारोऽपि तस्यैव विधातुमुचितः आदेशितया क्लृप्तत्वात् साहचर्याच्च। अन्यथा आदेशिद्वयकल्पने गौरवं स्यादित्याह– किञ्चेति। लिङ्गमपि श्रुतम्, तस्य दीर्घादिविधानादित्याह – तृतीयानितिनिर्देशाद् वेति **हेमकरः**। तन्न। लिङ्गं हि प्रकरणबलात् प्राप्तम्, अतोऽनुचितमिति, किन्तु शसीत्यस्य सप्तम्यन्ततया श्रुतत्वेन दीर्घनकारादेशयोर्निमित्तत्वमेव युक्तम्, तत्र शस आदेशित्वे सति श्रुतहानिकल्पना स्यात्, वाक्यद्वयमपीत्याह – तृतीयानिति निर्देशाद् वेति।

---

१. बह्वल्पार्थाच्छस् कारकादन्यतरस्याम् (अ० ५।४।४२)।

अधिकारशब्दस्य सम्बन्ध एवार्थश्चेत् स्यादिसम्बन्धः किमिति कथन्न ब्रूयादित्याह – अथवेति **कश्चित्**। तन्न। पर्यायत्वात् तस्मात् पक्षान्तर एव। ननु लाघवात् शसोऽनिति कथन्न कृतम् अकारेऽकारलोपः स्यादिति चेत्, अकारकरणादेव लोपो न भविष्यति, नैवम्। अकारमकृत्वा न इति कृते 'इमान्' इत्यत्र अद्भावः स्यात्। ततोऽद्भावनिषेधार्थमेवाकारकरणं कथमकारलोपं बाधते। अथ **'असिद्धं बहिरङ्गम् अन्तरङ्गे'** (कात० प० ३३) इति न्यायाद् अद्भावो न भविष्यति, चेन्न। आदेशं प्रति **"रागान्नक्षत्रयोगात्"** (२।६।७) इत्यत्र **"साऽस्य देवता"** (२।६।७) इति निर्देशादनित्योऽयम्, तर्हि 'शस् आन्' इति कथन्न कृतम्। एवं सति लघु विस्पष्टं च भवति ? सत्यम्। **विचित्रनिर्देशः खलु बालव्युत्पत्त्यर्थ एव**॥९५।

**[समीक्षा]**

कातन्त्रकार एकही सूत्र-द्वारा दीर्घ तथा सकार को नकारादेश करते हैं, परन्तु पाणिनि ने पृथक्-पृथक् सूत्र बनाए हैं – **"प्रथमयोः पूर्वसवर्णः, तस्माच्छसो नः पुंसि"** (अ० ६।१।१०२, १०३)। यद्यपि सरलता की दृष्टि से 'शस् आन्' यह सूत्र बनाना चाहिए था, तथापि मन्दमति बालकों केअवबोधार्थ या विचित्रनिर्देशसङ्केतार्थ **"शसि सस्य च नः"**(२।१।१६)ऐसा सूत्र बनाया गया है – **विचित्रनिर्देशः खलु बालव्युत्पत्त्यर्थ एव** (क० च०)।

यहाँ स्याद्यधिकार के कारण स्यादिसम्बन्धी ही शस् प्रत्यय लिया जाता है, **"बह्वल्पार्थात् कारकाच्छस्"** (२।६।४०-८ तमादिवृत्तिः) सूत्र में निर्दिष्ट शस्-प्रत्यय नहीं। अतः 'अल्पशः' में प्रकृत सूत्र प्रवृत्त नहीं होता है।

**[रूपसिद्धि]**

१. **वृक्षान्**। वृक्ष + शस्। प्रकृत सूत्र से लिङ्गान्तवर्ती अकार को दीर्घ तथा शस्-प्रत्ययान्तर्गत सकार को नकार॥९५।

## ९६. अकारे लोपम् [२।१।१७]

**[सूत्रार्थ]**

**लिङ्ग (प्रातिपदिक)** – गत अकार का लोप होता है, विभक्तिगत **अकार के** परवर्ती होने पर॥९६।

## [दु० वृ०]

विभक्तौ लिङ्गस्याकारो लोपमापद्यते अकारे सामान्ये। वृक्षम्, युष्मत्, यः, सः, उशना ॥९६॥

## [दु० टी०]

**अकारे०।** विशेषस्यानवगमत्वात् सामान्यं **स्यादिविभक्त्युपश्लिष्टमेव** लिङ्गमवसीयत इत्याह-विभक्ताविति। तेन 'दण्डाग्रम्' **इत्यत्र लोपो** न भवति। अकारादौ स्यादाविति च नैव संबन्धः। एवं सत्यम्, अतोरिति **विदध्यात्**। न चाममन्तरेण पञ्चम्यतमन्तरेण च स्यादेरकारोऽस्तीत्याह – अकारे सामान्य इति, तेन त्यदाद्यत्वे उशनसादीनामनादेशे विधिरयमिति ॥९६।

## [वि० प०]

**अकारे०।** इह स्यादिप्रस्तावे विशेषस्यानिर्देशात् सामान्यं स्यादिविभक्तिरेव निमित्तमवगम्यत इत्याह-विभक्ताविति। तेन 'दण्डाग्रम्' इत्यादौ लोपो न भवतीति। अथ किं स्यादिसंबन्धिन्येवाकारे लोपः, आहोस्वित् सामान्ये ? इत्याह - अकारे सामान्ये इति। यदि च स्यादेरेवाकारलोपः स्यात् तदाऽन्यस्य विशेषविधिभिराघ्रातत्वात् परिशिष्टं द्वितीयैकवचनं पञ्चम्यदादेशश्च संभवतीति तदाऽमतोर्लोपमिति कुर्यात्। ननु चाभ्यमादेशोऽपि अकारादिस्यादिरस्त्येव, सत्यम्। भकारादिरयमादेश इति **कश्चित्।** तन्मतमिदमुक्तम्। इह तु तेभ्य एव निर्देशादेव अकारे सामान्ये भवतीति वेदितव्यमित्यदोषः। युष्मदिति। युष्मद्, पञ्चम्या भ्यस् **"अत् पञ्चम्यद्वित्वे"** (२।३।१४) इत्यदादेशः। **"एषां विभक्तौ"** (२।३।६) इति दकारलोपः। लिङ्गस्याप्यकारे दर्शयति 'यः, सः' इत्यादि। यद् – त्यदाद्यत्वम्। उशना इति। उशनसोऽन्तस्यानादेशः ॥९६।

## [क० च०]

**अकारे०।** इह स्यादिति ननु कथं विशेषस्यानिर्देशादित्युच्यते ? यतोऽनन्तरत्वाच्छसीत्यनुवर्तते ? नैवम्, जसीति वचनात्। अन्यथाऽकारलोपस्याविषयत्वात् समानलक्षणदीर्घत्वेनैव वृक्षा इति सिध्यति, किं जसीत्यनेनेति। **हेमकरस्तु** अकार इत्युपादानादित्याचष्टे। तत्रायं पूर्वपक्षः - ननु शसोऽनुवर्तनेऽपि शसि परे योऽकारस्तस्मिन्नित्यर्थेऽकारस्य सार्थकत्वम्, नैवम्। साधनमेव फलं तदा शसि परे

योऽकारस्तस्य लोपेऽपि सिद्ध इत्यकारस्य निरर्थकत्वम्, अतोऽकार इत्युपादानादित्युक्तवानिति ।

ननु तथापि अकारग्रहणं सार्थकम्, यस्माद् वृक्षानित्यादावकारलोपो न प्रवर्तते । **नैवम्**, स्थितिपक्षेऽपि औपश्लेषिकसप्तमी ग्राह्या । ज्ञापकादिना अस्मिन् पक्षेऽपि औपश्लेषिकसप्तमीयम्, ततः शस्युपश्लिष्टस्य अकारो लोपमापद्यते इत्युक्तेऽकारोऽनर्थक इति । ननु औपश्लेषिकी सप्तमी ग्राह्या, नैवम् । चेच्छसि त्यदाद्यत्वे दीर्घे च सति यानित्यादिपूर्वेणैव सिध्यति, अकारो निरर्थकः । अथैवं सति सूत्रमेव निरर्थकम्, कथमकार इति ? सत्यम् । अकार इत्यस्योपादानं यत्रेति व्युत्पत्त्या सूत्रमेव वक्ष्यामः । तेन 'दण्डाग्रम्' इत्यादो लोपो न भवतीति । नन्वत्रापि प्रत्ययलोपलक्षणन्यायाद् दण्डशब्दस्याकारस्य विभक्त्युपश्लिष्टत्वेन सामान्येऽकारे लोपो भवन् अग्रशब्दस्याकारे कथन्न भवतीति, नैवम् । अभिप्रायापरिज्ञानाद् विभक्तौ परतो यल्लिङ्गं तस्याकारलोपे कर्तव्ये निमित्तभूते सामान्येऽपि अकारे गृह्यमाणे उपस्थितत्वात् तयोरेव लिङ्गविभक्त्योर्गृह्यते । कुतो दण्डाग्रम् इत्यत्र अकारलोपप्रसङ्गः । अत एव जसीत्यत्र **टीकायामुक्तम्** – एकपदेऽकारस्याकारे लोप इति ।

अथ 'यत्र, तत्र' इत्यत्र कथमकारलोपः, यावता वृत्तौ युवावैनमघवदर्वत्स्वेव प्रत्ययवदिति नियमेन प्रत्ययलोपलक्षणस्याविषय इति । नच वक्तव्यम्, त्रादीनां विभक्तित्वेनैव विभक्त्युपश्लिष्टत्वम्, तेषां सर्वनामकार्यं प्रत्येव विभक्तित्वात् ? सत्यम्, **वृत्तौ** युवावैन इत्यादि **श्रीपति**सूत्रानङ्गीकरणात् । **वस्तुतस्तु** विभक्त्युपश्लिष्टत्वमिह यदा कदाचित् सम्भवमेव गृह्यते । एतत्तु "**आकारो महतः कार्यः**" (२।५।२१) इत्यत्र दीर्घविधानादेवावसीयते, अन्यथा यदि कार्यकाले विभक्त्युपश्लिष्टत्वं गृह्यते, तदा तत्राकारेऽपि कृतेऽकारलोपस्याविषयत्वात् समानलक्षणदीर्घेणैव महादेव इत्यादिकं सिध्यतीति भावः ।

**पञ्ज्यां** दण्डाग्रम् इत्यादि यदुक्तं तत्र दण्डेति संबोधनं पदम् - 'हे दण्ड अग्रं गच्छ' इत्यन्वयः । समासे तु "**प्रकृतिश्च स्वरान्तस्य**" (२।५।३) इत्यनेनैव प्रकृतिभावादकारलोपस्य निषेध इति । तर्हि समानलक्षणदीर्घोऽपि न स्यात्, नैवम् । तत्र वक्ष्यति – सन्धिस्तु स्यादेव भिन्नप्रकरणत्वात् । यथा 'देवेन्द्रः, खरोढः' इति, तर्हि यत्रेति न स्यादित्यत्रापि प्रकृतिभावस्य विषयत्वात् । चेन्न, औपदेशिकस्यापि स्वरान्ते तस्य

(सूत्रस्य) विषयत्वात् । नैवम्, अन्तग्रहणस्य तत्र सुखार्थतया वक्ष्यमाणत्वेनानौपदेशिकपरिग्रहार्थकत्वात् । कथमन्यथा 'राजपुरुषः' इत्यत्रापि तस्य विषय इति **"अवमसंयोगात्"** (२।२।५३) इत्यत्र **टीकाकृद्** वक्ष्यतीति चेदुच्यते, तत्र **"चतुर्दश०"** (१।१।२) इति निर्देशाद् **"आकारो महतः कार्यः"** (२।५।२१) इत्यत्र आकारविधानाच्च श्रुतत्वाच्चान्त्यस्वरस्यैव विकृतौ प्रकृतिभावनिश्चय इति न किञ्चिदनुपपन्नम् ।

परिशिष्टं द्वितीयैकवचनमित्यादि । ननु अव्ययीभावसमासे अमादेशस्यापि सम्भवात् कथमिदमुक्तम्, सत्यम् । अत्र **कुलचन्द्रः** द्वितीयैकवचनं पञ्चम्यद् अव्ययीभावसमासेऽमूरूपादेशश्चेति, तन्न । नद्यां युवामितिवत् "अमतोर्लोपम्" इति सूत्रे कृते प्रतिपदोक्तस्यैवामो ग्रहणात् । तर्हि अस्मिन् पक्षे उपकुम्भमित्यत्र कथम् अकारलोपो न स्यादिति चेद् अव्ययीभावादित्यत्र डमिति कर्तव्यम् । अकारलोपस्याविषयत्वाज्जसीति न कर्तव्यम् अत्रोक्तम्, अकारे लोपे प्राप्ते वचनमिति । शसि च दीर्घो न कर्तव्यः, किन्तु "शसोऽन्" इति कर्तव्यं समानदीर्घेणैव सिद्धत्वादिति ।

**अन्यच्च कातन्त्रप्रदीपेऽनुसन्धेयम् ।** ननु डमिति सूत्रं कृत्वा सिद्धान्तो देयः, सत्यम् । येन पुनरभ्यमादेशो मन्यते तेन पुनरभ्यमादेशो ड्भ्यमादेशो मन्यते कुतः पूर्वपक्षस्यावकाश इति । ननु उशनेति कथमुदाहृतम्, यावता **"घुटि चासंबुद्धौ"** (२।२।१७) इति कृते समानदीर्घत्वेनैव सिद्धत्वात् ? सत्यम् । दिङ्मात्रमिदं किन्तु संबोधनेऽदन्तपक्षे उदाहरणम्, यथा 'हे उशन' इति ॥९६।

**[ समीक्षा ]**

कातन्त्रकार ने 'वृक्षम्' आदि शब्दरूप अकार-लोप करके सिद्ध किए हैं, परन्तु पाणिनि ऐसे उदाहरणों में पररूपविधान (अमि पूर्वः ६।१।१०७) करते हैं। लोप तथा पररूप में अकारलोप से सरलता प्रतीत होती है।

**[ रूपसिद्धि ]**

१. **वृक्षम् ।** वृक्ष + अम् । प्रकृत सूत्र से क्षकारोत्तरवर्ती अकार का लोप, क्ष् का अम्प्रत्ययस्थ अ - से संबन्ध ।

२. **युष्मत् ।** युष्मद् + भ्यस् । **"एषां विभक्तावन्तलोपः"** (२।३।६) से द् का लोप, "अत् पञ्चम्यद्वित्वे" (२।३।१४) से भ्यस् को अत् आदेश तथा प्रकृत सूत्र से मकारोत्तरवर्ती अकार का लोप ।

३. **यः** । यद् + सि । "**त्यदादीनाम विभक्तौ**" (२।३।२९) से द् को अ, प्रकृत सूत्र से यकारोत्तरवर्ती अकार का लोप तथा स् को विसर्ग – "**रेफसोर्विसर्जनीयः**" (२।३।६३)।

४. **सः** । तद् + सि । "**त्यदादीनाम विभक्तौ**" (२।३।२९) से द् को अ, प्रकृत सूत्र से तकारोत्तरवर्ती अकार का लोप, "तस्य च" (२।३।३३) से त् को स् तथा स् को विसर्ग।

५. **उशना।** उशनस् + सि । "**उशनःपुरुदंशोऽनेहसां सावनन्तः**" (२।२।२२) से स् को अन्, प्रकृत सूत्र से नकारोत्तरवर्ती अकार का लोप, "**व्यञ्जनाच्च**" (२।१।४९) से सि-लोप, "**घुटि चासंबुद्धौ**" (२।२।१७) से न् की उपधा को दीर्घ तथा "**लिङ्गान्तनकारस्य**" (२।३।५६) से नलोप ॥९६।

## ९७. भिसैस् वा [२।१।१८]

### [सूत्रार्थ]

अकारान्त लिङ्ग (प्रातिपदिक) से परवर्ती भिस् प्रत्यय के स्थान में ऐस् आदेश विकल्प से होता है ॥९७।

### [दु० वृ०]

अकारान्ताल्लिङ्गात् परो भिसैस् वा भवति । वृक्षैः । वाशब्दः पक्षान्तरं सूचयति - एस्, ऐस् वा । ऐस्करणादतिजरसैरिति **केचित्** ॥९७।

### [दु० टी०]

**भिस्०** । '**अर्थवशाद् विभक्तिविपरिणामः**' (कात० प० २५) इति प्रथमया चरितार्थत्वात् पञ्चम्या विपरिणाम इत्याह – अकारान्ताल्लिङ्गादित्यादि । अकारादाकारस्य जात्यन्तरत्वादिह मालाभिरिति कुतः प्राप्तिः । स्यादिसम्बन्धादनर्थकत्वाच्च ओदन-भिस्मिटा, ब्राह्मणभिस्मा इत्यत्र च भिस्मा ओदनः, तद्दग्धिका च भिस्मिटोच्यते । वाशब्द इह न विकल्पार्थः । वृक्षेभिरिति प्रयोगस्य **भाषायाम**दर्शनात् । अत आह - वाशब्दः पक्षान्तरं सूचयति – एस् ऐस् वेति । एवं सति जरामतिक्रान्तैः कुलैरतिजरैरिति सिद्धम् । ऐत्वं भवति एसि सति सन्निपातविधेरनिमित्तत्वाज्जरा जरस् न भवत्येकदेशस्यानन्यवद्-

भावोऽत्र ऐत्वमकारस्य तु भवति, वर्णग्रहणे निमित्तत्वादिति । यदि पुनरैस् एव क्रियते, ऐत्वप्रयत्नबलात् सन्निपातलक्षणपरिभाषामैस् बाधते तदा अतिजरसैरिति **केचिदिति।**

ननु वृक्षैरिति अकारान्ताद् भिस ऐस्भावः, तस्मिंश्च धुट्येत्वम्, उभयसावकाशमेतत् । तत्र ऐस्भावस्यावकाशो वचनप्रामाण्यात् कृते एत्वे भूतपूर्वादकारान्ताद् विहितविशेषणाद् वा एत्वस्यावकाशो भ्यसादिषु, अतः परत्वादेत्वेन भवितव्यम् । चेदेवम्, कृताकृतप्रसङ्गी यो विधिः स नित्य इति नित्यमैस्भाव एव स्यात् । आह च **व्याघ्रभूतिः –**

**एत्वं भिसि परत्वाच्चेदत ऐस् क्व भविष्यति।**
**भूतपूर्वात् कृतेऽप्येत्वे नित्यमैस्त्वं तथा सति॥१७।**

**[वि० प०]**

भिस्० । अर्थवशाद् विभक्तिविपरिणाम इत्याह - अकारान्तादिति । वाशब्दो न विकल्पार्थः, वृक्षेभिरिति **भाषायां** प्रयोगस्यादर्शनादित्याह - वाशब्द इत्यादि । तेन जरामतिक्रान्तैः कुलैरिति विग्रहे नपुंसकलक्षणह्रस्वत्वे सति अतिजरैरिति सिद्धम् । एरि सति सन्निपातलक्षणत्वेन जराशब्दस्य जरसादेशस्याभावात् । तर्हि कथम् ऐत्वम् अकारस्येति चेत्, **'वर्णग्रहणे निमित्तत्वाद्'** (कात० प० पा० ३४) इत्यदोषः । यद्येवम्, एसादेश एवास्तु किमैस्करणेनेति ? ऐकारोपदेशबलादैसादेशः सन्निपातलक्षणपरिभाषां बाधते । ततोऽतिजरसैरिति सिद्धम्, अतो वाशब्देनोभयमतं प्रमाणीकृतामित्याह - ऐस्करणादिति ।

ननु ऐस्करणमेवास्ताम्, किमैस्करणेनेति, अस्मिन् सति सन्निपातलक्षणपरिभाषाबाधया रूपद्वयस्य सिद्धत्वात्, जरसादेशो हि तत्र विकल्पेन विधीयत इति ? सत्यम् । एवं मन्यते, सन्निपातलक्षणनिषेधस्य नित्यं कृतत्वात् तन्निबन्धनोऽपि जरसादेशो नित्यं स्यादिति प्रतिपद्येत मन्दधीरित्येव सूचनम् । ननु वृक्षैरित्यत्र परत्वाद् **"धुटि बहुत्वे त्वे"** (२।१।१९) इति कथमेत्वं न स्याद् उभयोरपि सावकाशत्वात् तत्रैत्वे कृतेऽपि वचनाद् भूतपूर्वगतिमाश्रित्य ऐसादेशस्य सावकाशत्वमेत्वस्यापि भ्यसादिषु चरितार्थत्वात् । अतः परत्वाद् एत्वेन भवितव्यमिति । तदसत्, एत्वे कृतेऽप्यैसादेशस्य वचनबलात् सद्भावमाचक्षाणेन नित्यत्वं प्रतिपादितमिति नित्यत्वादेसादेश इति । एत्वं चानित्यमैसि

सति धुटोऽसम्भवाद् अन्यत्र चरितार्थत्वाच्चेति । एतच्च **वृद्धै**रुक्तमित्युच्यते । यदाह **व्याघ्रभूतिः** –

**एत्वं भिसि परत्वाच्चेदत ऐस् क्व भविष्यति।**

**भूतपूर्वात् कृतेऽप्येत्वे नित्यमैस्त्वन्यथा सति॥** इति ।

**वयं** तु पश्यामः – परत्वमेव न सङ्गच्छते, यदुभयोरन्यत्र चरितार्थत्वे सति तद् भवति । यथा वृक्षेभ्य इत्यत्र अन्यत्र चरितार्थयोरेत्वदीर्घयोः परत्वादेत्वमिति । न ह्येकस्मिन् विषये सावकाशत्वं विप्रतिषेधश्चोपपद्यते । यथोक्तम् -'यत्र द्वौ प्रसङ्गौ अन्यार्थावेकस्मिन् (विषये) युगपत् प्राप्नुतः स तुल्यबलविरोधो विप्रतिषेधः' इति । अन्यार्थाविति ।अन्यत्र चरितार्थावित्यर्थः ।किंच यदि वचनबलादेवैत्वे कृतेऽप्यैसादेशस्य सावकाशत्वं स्यात् तदा अत एत्वमन्यत्र सावकाशत्वादैस् बाधत इति कथं नोच्यते । तस्माद् वचनप्रामाण्यादेवैत्वमैस् बाधत इति युक्तम् ।।१७ ।

[ **क०** **च०** ]

**भिसै०** । ऐसित्यत्र निःसन्देहाय विसर्गो न कृतः, सूत्रत्वात् । वाशब्दो लोपमपि न समुच्चिनोति, वृक्षेभिरिति प्रयोगस्य **भाषायाम**दर्शनात् । ननु विभक्तिविपरिणामः कथं क्रियते, भिसा सह अकारः ऐस् भवतीत्यर्थस्य घटनात्, नैवम् । दृष्टकल्पनां विहाय तृतीयान्ततया अदृष्टकल्पने मानाभावात्, अभेदान्वयस्योचितत्वाच्चेत्याह – अर्थविशादिति । **भाषायाम**पीति, **छन्दसि** तु दृश्यते -"भद्रं कर्णेभिः शृणुयाम, इति तेभिर्नोद्य सवितेति च" इति ।

**वाशब्द** इत्यादि । ननु पक्षान्तरं समुच्चिन्वन् औसादिकं कथन्न समुच्चिनोति, नैवम् ।ऐस् तावत् कण्ठ्यतालव्यादिः सान्तः, अन्योऽपि कण्ठ्यतालव्यादिः सान्त एवेति समुच्चिनोति, स पुनरेसेव कस्यचिन्मते केवलमैस् क्रियते । तन्मते ऐकारोपदेशबलात् सन्निपातलक्षणपरिभाषां बाधित्वा नित्यं जरसादेशः स्यात् । अन्यस्य तु मते एस् एव क्रियते, एतन्मते सामर्थ्यविरहात् सन्निपातलक्षणपरिभाषां न बाधते । अतो जरसादेशाभावान्नित्यम् अतिजरसैरेव स्यात् । अत्र तु परतन्त्रश्रुतस्य एसः सूचकेन वाशब्देन अतिजरैरिति न साध्यते । एतदेवाह – तेनेत्यादि ।

सन्निपातलक्षणत्वेनेति । ननु कथमिदमुच्यते **'वर्णग्रहणे निमित्तत्वात्'** (कात० प० पा० ३४) इत्यस्य विषयत्वात्, यतः स्वरवर्णे जरसादेशो विधीयते । तथा च

"**ङसिरात्**" (२।१।२१) इत्यत्र नित्यत्वाज्जरसादेशः स्यादिति **टीकायां** वक्ष्यति, तत्र हि 'वर्णग्रहणे निमित्तत्वात् ' इत्यस्यावतारेणैव नित्यत्वं सङ्गच्छत इति ? सत्यम्, जरसादेशं प्रति अनित्यतेति **हेमकरः। केचिद्** वर्णयन्ति - वर्णग्रहणस्य यत् कार्यं तद् वर्णकार्यमिति पक्षमवलम्ब्योक्तम् इति। यत्तु **टीकायां** नित्यत्वाज्जरसादेशः स्यादिति वक्ष्यति, तद्वर्णे परे यत् कार्यमिति पक्षमवलम्ब्योक्तमिति। ऐकारोपदेशबलादिति। नन्वत्र एकारैकारयोर्द्विमात्रत्वेन विशेषाभावात् कथमैकारोपदेशस्य बलाधिक्यमिति ? सत्यम्। यन्मते ऐकारस्य एकारादधिकधर्मत्वम्, तन्मते इदमुक्तमिति। धुटोऽसम्भवादिति। ननु भूतपूर्वगत्या धुडस्त्येवेत्याह – अन्यत्रेति। यस्माद् अन्यगत्यैव भूतपूर्वगतिराश्रीयते इति। एत्वं भिसीत्यादि। अतः अकारादित्यर्थः। यत्र द्वौ प्रसङ्गावित्यादि। प्रसज्यते कार्यमनेनेति **प्रसङ्गः** सूत्रम्। **यत्रैकस्मिन् विषये द्वे सूत्रे युगपत् प्राप्नुतः**, तत्र विषये यो युगपत्प्राप्तिस्वरूपः स तुल्यबलविरोधो **विप्रतिषेधः**। यद् वा यत्रेत्यस्यैव स इत्यनेन परामर्शः श्रुतत्वात्। स विषयस्तुल्यबलविरोध इति बहुव्रीहिः। विप्रतिषेध इत्यनेन विप्रतिषेधविषय उच्यते।

ननु कथं परत्वमेव न संगच्छते इत्युक्तं यत एकस्मिन् उदाहरणेऽपि व्यक्तिपक्षे परत्वं घटते। तथाहि जातिपक्षे सकृल्लक्ष्ये लक्षणस्य चरितार्थत्वात् कृतार्थयोः सूत्रयोरेकस्मिन् विषये विरोधेन प्रवृत्तौ व्यक्तिपक्षे तु प्रतिलक्ष्ये लक्षणभेदादेकस्मिन् विषयेऽकृतार्थयोः पर्यायेण प्राप्तौ "**विप्रतिषेधे परं कार्यम्**" (कात० प० पा० ६९) इति सूत्रं विधीयते। यथा "**युगपद्वचने परः पुरुषाणाम्**" (३।१।४) इति व्यक्तिपक्षे पूर्वसूत्रं तल्लक्ष्यं प्रति व्यर्थमिति चेत्, न। शर्ववर्मणा तल्लक्ष्यं प्रति सूत्र नारब्धमेव। ननु यदि तल्लक्ष्यं प्रति सूत्रं नारब्धम् इत्युच्यते, तदा कथं भूतपूर्वगत्या ऐसादेशस्य सावकाशत्वमिति **वृद्धैरुक्तम्** ? सत्यम्। तल्लक्ष्यं प्रति तत् [1]सूत्रं नारब्धम्, किन्तु तज्जातीयं सूत्रान्तरमिति। यत्तु द्वौ प्रसङ्गावित्यत्रान्यार्थावित्यस्यान्यत्र चरितार्थाविति व्याख्यातम्, तत्तु **जातिपक्षे। व्यक्तिपक्षे** तु अन्यार्थावित्यस्य भिन्नफलकावित्यर्थो न्यायसम्मतः। अत एवैकस्मिन् विषये परत्वं घटत इति मनसि कृत्वाह – किञ्चेति ।।९७।

---

१. सूत्रं नारब्धमिति तत्रोच्यते यत्र तज्जातीयसावकाशता तत्र यथासम्भवं भवत्येव। सर्वसूत्रविवादविषयत्वाद् अतः आचार्यप्रवृत्तिवैयर्थ्यभियाऽपूर्वस्थिताकारमाश्रित्यापि प्रवर्तत इति न दोषः।

**[ समीक्षा ]**

कातन्त्रकार और पाणिनि दोनों ने ही अकारान्त लिङ्ग=प्रातिपदिक से भिस् को ऐस् आदेश किया है, अतः उभयत्र उत्कर्ष–अपकर्ष नहीं कहा जा सकता है । कातन्त्रकार ने 'वा' शब्द पढ़कर पक्षान्तर भी सूचित किया है, जिससे 'वृक्षेभिः' आदि भी रूप साधु कहे जा सकते हैं, लेकिन भाषा में ऐसे रूपों का व्यवहार न होने से व्याख्याकार 'एस्' रूप पक्षान्तर की कल्पना करते हैं । पाणिनि तथा तदनुयायी ऐस् आदेश को भाषा में नित्य ही स्वीकार करते हैं – **"अतो भिस ऐस्"** (अ० ७।१।९)।

**[ रूपसिद्धि ]**

१. **वृक्षैः ।** वृक्ष + भिस् । प्रकृत सूत्र से भिस् को 'ऐस्' आदेश, **"एकारे ऐ ऐकारे च"** (१।२।६) से अकार को ऐकार, परवर्ती ऐकार का लोप तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से स् को विसर्ग आदेश ।।९७।

## ९८. धुटि बहुत्वे त्वे [ २।१।१९ ]

**[ सूत्रार्थ ]**

बहुवचन में धुडादि वर्ण वाली विभक्ति केपरवर्ती होने पर लिङ्ग (प्रातिपदिक) का अन्तिम अकार एकार हो जाता है ।।९८।

**[ दु० वृ० ]**

अकारो लिङ्गान्तो बहुत्वे धुटि परे एकारो भवति । **एषु, वृक्षेभ्यः ।** परत्वादेत्वं स्यात् । धुटीति किम् ? वृक्षाणाम् । तुशब्दो विभाषानिवृत्त्यर्थः ।।९८।

**[ दु० टी० ]**

धुटि० । बहुत्वेऽर्थे वर्तते यः स्यादिस्तस्मिन् धुटीति बहुत्वे वर्तमाने धुडादौ स्यादावित्येके।'वृक्षेभ्यः' इत्यादिषु घोषवति दीर्घः प्राप्नोति धुट्येत्वं च ।तत्रोभयोरन्यत्र सावकाशत्वात् **'पूर्वपरयोः परविधिर्बलवान्'** (द्र०, कला० व्या०, पृ० २२१, सं० ५०) इत्यर्थः । तुशब्द इत्यादि । यदीह वाग्रहणमनुवर्तते तदा धुट्येत्वमैस् वा भवतीति विप्रतिपद्यते । सुभोर्बहुत्वे इति कृते न किञ्चिल्लाघवमिति ।।९८।

## [ वि० प० ]

धुटि० । तुशब्द इत्यादि । ननु वाशब्दो विकल्पार्थो न भवतीति तत्र निश्चितम्, तत्कथमिदमुच्यते ? सत्यम् । वाशब्दानुवृत्तौ धुट्येत्वमैस् वा भवतीति पक्षान्तरसूचनमेव विकल्पस्तदा तुशब्दो वानिवृत्त्यर्थ इति ब्रूयाद् इत्याशङ्क्याह – अथवेति । तत्रापि कार्यस्य विकल्पितत्वात्, अथवा पूर्वमविकल्पार्थत्वे हेतुरुक्त इत्यनुवृत्तस्य विकल्पार्थतापि शङ्क्येत इत्यदोषः ।।९८।

## [ क० च० ]

धुटि० । वृक्षाणाम् इति घोषवद्ग्रहणादेवात्र एत्वं न भविष्यति, किंधुड्ग्रहणेन ? नैवम् । घोषवद्ग्रहणं वृक्षायेति साधनार्थं भविष्यति चेन्न, तदा तत्र यभोरिति विदध्यात्, नैवम् । तदा घोषवद्ग्रहणं श्रुतिसुखार्थमिति वाच्यम् । **वस्तुतस्तु धुड्ग्रहणं सुखार्थमिति**[1] ।।९८।

## [ समीक्षा ]

'अ + सु, वृक्ष + भ्यः' आदि अवस्था में अकार को एकारादेश दोनों ही व्याकरणों में किया गया है, परन्तु यह ज्ञातव्य है कि पाणिनि जिसे 'झल्' कहते हैं - "बहुवचने झल्येत्" (अ० ७।३।१०२), कातन्त्रकार ने उसके लिए 'धुट्' शब्द का व्यवहार किया है – **"धुड् व्यञ्जनमनन्तस्थानुनासिकम्"** (२।१।१३)।

पाणिनि ने 'एत्' आदेश में स्वरितार्थ तपर किया है। कातन्त्रव्याकरण यतः लौकिक शब्दों का ही व्याकरण है, अतः उसमें 'त्' अनुबन्ध की योजना नहीं की गई है। प्रकृत सूत्र में 'धुटि' पद के पाठ से 'वृक्षाणाम्' आदि शब्दों में एत्व नहीं होता है। सूत्र में यदि 'तु' शब्द का पाठ न होता तो पूर्व सूत्र **"भिसैस् वा"** (२।१।१८) से 'वा' पद की अनुवृत्ति होने के कारण एत्वविधि विकल्प से प्रवृत्त होती। इसके वारणार्थ 'तु' शब्द का पाठ किया गया है।

## [ रूपसिद्धि ]

१. **एषु**। इदम् + सुप्। **"त्यदादीनाम विभक्तौ"** (२।३।२९) से मकार को अकार, **"अकारे लोपम्"** (२।१।१७) से दकारोत्तरवर्ती अकार का लोप, **"अद्**

---

१. ननु लाघवार्थं वानिवृत्त्यर्थमिति कथमुक्तमित्याह - अथवेति । ननु परत्वादेत्वमिति कथमुच्यते । यदि सकारोऽस्य विषयः स्यात् तदा धुड्ग्रहणमकृत्वा 'एत्वं सि बहुत्वे' इति कृतं स्यात्, तस्माद् धुड्ग्रहणबलादेव बहुत्वे घोषवति दीर्घो न भवतीति चेत् सिद्धान्तान्तरमिति **पुरुषोत्तमचक्रवर्ती**।

**व्यञ्जनेऽनक्**" (२।३।३५) से 'इद' को 'अ', प्रकृत सूत्र से अकार को एकार तथा "**नामिकरपरः**" (२।४।४७) से सकार को षकारादेश।

२. **वृक्षेभ्यः**। वृक्ष + भ्यस्। प्रकृत सूत्र से अकार को एकार तथा "**रेफसोर्विसर्जनीयः**" (२।३।६३) से सकार को विसर्गादेश।

**[विशेष]**

'वृक्षेभ्यः' आदि स्थलों में "**अकारो दीर्घं घोषवति**" (२।१।१४) से अकार को दीर्घ आदेश प्राप्त होता है, परन्तु '**पूर्वपरयोः परविधिर्बलवान्**' (द्र०, कला० व्या०, पृ० २२१, सं०५०) इस परिभाषावचन के अनुसार परविधि (=एकारादेश) ही प्रवृत्त होती है ॥१८।

## १९. ओसि च [२।१।२०]

**[सूत्रार्थ]**

षष्ठी - सप्तमी विभक्तियों के द्विवचने 'ओस्' प्रत्यय के पर में रहने पर लिङ्गान्तवर्ती अकार के स्थान में एकार आदेश होता है ॥१९।

**[दु० वृ०]**

अकारो लिङ्गान्त ओसि परे एकारो भवति। वृक्षयोः ॥१९।

**[दु० टी०]**

ओसि०। ओसिति षष्ठी - सप्तमीद्विवचनं गृह्यते। सत्यप्यर्थभेदे कुतो द्विवचनाशङ्का यस्मादवशिष्टप्रत्ययहेतुः सामान्यमस्तीति ॥१९।

**[समीक्षा]**

शर्ववर्मा तथा पाणिनि ने इस सूत्र की रचना समान रूप में की है। अतः 'वृक्ष + ओस्' इस अवस्था में अकार को एकारादेश होकर 'वृक्षयोः' शब्दरूप निष्पन्न होता है।

**[रूपसिद्धि]**

१. **वृक्षयोः**। वृक्ष + ओस्। प्रकृत सूत्र से क्षकारोत्तरवर्ती अकार को एकार, "**ए अय्**" (१।२।१२) से एकार को अय् तथा "**रेफसोर्विसर्जनीयः**" (२।३।६३) से सकार को विसर्गादेश ॥१९।

# १००, ङसिरात् [ २।१।२१ ]

**[ सूत्रार्थ ]**

अकारान्त लिङ्ग (प्रातिपदिक) से परवर्ती पञ्चमीविभक्ति - एकवचन 'ङसि' प्रत्यय के स्थान में 'आत्' आदेश होता है ।।१००।

**[ दु० वृ० ]**

अकारान्ताल्लिङ्गात् परो ङसिराद् भवति। वृक्षात्। दीर्घोच्चारणाद् अतिजरसात् ।।१००।

**[ दु० टी० ]**

ङसि०। दीर्घोच्चारणाद् अतिजरसाद् इति। यद्यत्र नित्यत्वाज्जरसादेशः स्याद् दीर्घोच्चारणं किमर्थम् ? ह्रस्वेऽपि कृते समानलक्षणदीर्घो भविष्यति, अकारस्याकारे लोपो नास्ति "रागान्नक्षत्रयोगात्" (२।६।७) इत्यादिनिर्देशात्। तस्माद् दीर्घबलादादेशे कृते पश्चाज्जरस् भवतीत्यर्थः। अथवा अकारोच्चारणाद् यद्यकारो न क्रियते समस्तस्यादेशो न लभ्यते, एकवर्णत्वात्। तदयुक्तम्। अभेदनिर्देशाद् ङसिस्तकाररूपेण विपरिणमत इति ज्ञापकोच्चारणं च कष्टमिति। **भाष्यकार**मते तु पुनः अतिजरादिति भवितव्यम्, सन्निपातलक्षणत्वात्। इह **ङकार इकारश्चानुबन्धः सुखप्रतिपत्त्यर्थ एव,** अन्यथा स्यादिसम्बन्धात् परिशिष्टतया ङसिरेव प्रतीयते ।।१००।

**[ वि० प० ]**

**ङसिः।** ननु ह्रस्वेऽपि कृते समानलक्षणे दीर्घत्वे सति सिद्धं वृक्षादिति, किं दीर्घविधानेन ? न चाकारलोपः स्यादित्युक्तं रागान्नक्षत्रयोगादिति ज्ञापकाद् अकारकरणाच्च। अन्यथा यद्यकारलोपः स्यात् तदा "ङसिस्त" इति विदध्यात्। नन्वकारमन्तरेण एकवर्णत्वात् कथं समस्तस्यायमादेशः, **'वर्णान्तस्य विधिः'** (कात० प० ५) इत्यन्त्यस्यैव स्यादिति चेद् अस्तु को दोषः, लोपपक्षे साध्यस्य सिद्धत्वादिति । **ये** तु **'परस्यादेः'** (भोजपरि० – सू० १६) इति परिभाषामङ्गीकृतवन्तः, तन्मतेऽप्यभेदनिर्देशात् समस्तस्य भविष्यति। ङसिस्तकाररूपेण विपरिणमत इत्यर्थः। ततोऽकारकरणादेव लोपो न भविष्यति किं दीर्घकरणेनेत्यत आह-दीर्घ इत्यादि। दीर्घबलात् सन्निपातलक्षणपरिभाषा न प्रवर्तत इति आदादेशे कृते पश्चाज्जरसादेशो भवतीति ।।१००।

[ क० च० ]

ङसि० । दीर्घबलादित्यादि । दीर्घबलात् सन्निपातलक्षणपरिभाषा न प्रवर्तते इति कथमुच्यते **'वर्णग्रहणे निमित्तत्वात्'** (कात० प० ३२) इत्यनेनैव तस्य बाधितत्वात् ? सत्यम् । एवं योज्यते **पञ्जी** - दीर्घबलात् पूर्वं **"ङसिरात्"** (२।१।२१) इत्यनेन आदादेशे कृते **'वर्णग्रहणे निमित्तत्वात्'** (कात०प० ३२) इत्यनेन सन्निपातलक्षणपरिभाषा न प्रवर्तत इति हेतोः पश्चाज्जरस् भवतीति ॥१००।

[ **समीक्षा** ]

'वृक्ष + ङसि' इस अवस्था में 'ङसि' (पञ्चमीविभक्ति-एकवचन) को 'आत्' आदेश दोनों ही व्याकरणों में किया गया है। अन्तर यह है कि कातन्त्रकार तीन पृथक्- पृथक् सूत्रों द्वारा 'ङसि' को 'आत्', 'ङस्' को 'स्य' तथा 'टा' को 'इन' आदेश करते हैं, जबकि पाणिनि ने एक ही सूत्र-द्वारा तीनों आदेशों का विधान किया है- **"टाङसिङसामिनात्स्याः"** (अ० ७।१।१२)। उसमें भी पाणिनीय क्रम की अपेक्षा कातन्त्रीयक्रम में विपर्यास है, क्योंकि वहाँ ङसि, ङस् और 'टा' प्रत्ययों के क्रमशः आदेश किए गए हैं।

कातन्त्र के इस क्रमव्यत्यास से व्याख्याकार यह ज्ञापित करते हैं कि 'पितृ' शब्द से द्वितीया-बहुवचन 'शस्' प्रत्यय के भी परवर्ती होने पर ऋ को 'अर्' आदेश तथा 'उदधि –भिक्षु' शब्दों से भी ङस् को 'स्य' आदेश प्रवृत्त होगा और इस प्रकार पितृ - शब्द से द्वितीया-बहुवचन में भी 'पितरः' शब्द साधु होगा। 'उदधि' शब्द से षष्ठी-एकवचन में **उदधिष्य** तथा भिक्षु शब्द से **भिक्षुष्य** शब्दरूप बनेगा।

ऐसी मान्यता है कि सूत्रों की विचित्र रचना से आचार्य का विशेष अभिप्राय परिलक्षित होता है– **"इङ्गितेनोन्मिषितेन महता वा सूत्रप्रबन्धनाचार्याणामभिप्रायो लक्ष्यते"** (म० भा० ६।१।३७)।

व्याख्याकारों ने 'अतिजर' शब्द से 'ङसि' प्रत्यय में 'अतिजरसात्' शब्दरूप साधु माना है। **भाष्यकार** तो **'अतिजरात्'** रूप ही प्रामाणिक मानते हैं । व्याख्याकार विविध परिभाषावचनों का स्मरण करते हुए 'अतिजरसात्' रूप की सिद्धि 'आत्' आदेश के बाद ही जरसादेश करके घोषित करते हैं।

**[ रूपसिद्धि ]**

१. **वृक्षात्।** वृक्ष+ङसि। प्रकृत सूत्र से ङसि को आत्, "समानः सवर्णे दीर्घीभवति परश्च लोपम्" (१।२।१) से क्षकारोत्तरवर्ती अकार को दीर्घ तथा परवर्ती आकार (आत्–आदेश घटित) का लोप।।१००।

## १०१. ङस् स्यः [२।१।२२]

**[ सूत्रार्थ ]**

अकारान्त लिङ्ग से परवर्ती षष्ठी -एकवचन 'ङस्' प्रत्यय के स्थान में 'स्य' आदेश होता है।।१०१।

**[दु० वृ०]**

अकारान्ताल्लिङ्गात् परो ङस् स्यो भवति। **वृक्षस्य**।।१०१।

**[दु० टी०]**

ङस्। अत्रापि ङकारः पूर्ववत् ।।१०१।

**[क० च०]**

ङस्। ननु कथम् –

**नवं नवं परिक्षिप्य पुराणमवकर्षतः।**<br>
**अतिजरस्स्य भिक्षुष्य कन्था वर्षशतं गता।।**

इत्यत्र 'अतिजरस्स्य,भिक्षुष्य' इति व्यञ्जनान्तादुकारान्ताच्च ङस् स्यः स्यादिति। अत्राकारादेव स्यः स्यादिति उक्तत्वात्? सत्यम्, **ऋषिप्रयोगादिति** चिन्त्यम्। यद् वा "इन टा, भिसैस् वा, ङेर्यः, ङसिरात्, ङस् स्यः" इति क्रमिकपाठ एव युक्तः कथं व्यतिक्रमः? तद् बोधयति - क्वचिद् व्यञ्जनान्ताद् उकारान्ताच्च स्यादिति।।१०१।

**[ समीक्षा ]**

पाणिनीय और कातन्त्र दोनों ही व्याकरणों में, 'वृक्ष+ङस्' इस अवस्था में 'स्य' आदेश होकर 'वृक्षस्य' शब्दरूप सिद्ध किया जाता है। कातन्त्रीय सूत्रों में विभक्तिव्यत्यास से **'अतिजरस्स्य'** तथा **'भिक्षुष्य'** शब्दरूप भी साधु माने जाते हैं।

[ **रूपसिद्धि** ]

१. **वृक्षस्य।** वृक्ष+ङस्। प्रकृत सूत्र से 'ङस्' को 'स्य' आदेश ॥१०१।

## १०२. इन टा [२।१।२३]

[ **सूत्रार्थ** ]

अकारान्त लिङ्ग=प्रातिपदिक से परवर्ती तृतीया-एकवचन 'टा' के स्थान में 'इन' आदेश होता है ॥१०२।

[ **दु० वृ०** ]

अकारान्ताल्लिङ्गात् परष्टा इनो भवति। वृक्षेण। 'टेन' इति सिद्धे इनोच्चारणमग्रतः इन एव। तेन अतिजरसिन कुलेन। **पृथग् योगो बालावबोधार्थः** ॥१०२।

[ **दु० टी०** ]

इन०। ननु **'कार्यी निमित्तं कार्यमित्येष निर्देशक्रमः'** (कात० प० ५६) इति यस्माद् उपायपूर्वक उपेयो भवति 'टेन' इति निर्देशेन भवितव्यम्, ह्रस्वो वेति विप्रतिपत्तिश्चेत्, नैवम्। उभयथाप्येत्वविषयत्वात्। अथ दीर्घबलाद् विगृहीतिश्चेत्, नैवम्। **"तेन दीव्यति०"** (२।६।८) इति निर्देशात्। किञ्च "टा इन" इति विदध्यात्। अत आह-इनोच्चारणमित्यादि। अग्रतः–शब्द उभयत्र संबध्यते-इनोच्चारणमग्रत इन एवाग्रतो यथा स्यात्। तेन पश्चाज्जरस् भवतीति मतान्तरमेतद् बुद्ध्याध्यासित-संबन्धस्य व्यतिक्रमनिर्देशोऽपि दृश्यते। यथा **"स्मै सर्वनाम्नः, सुरामि सर्वतः"** (२।१।२५,२९) इत्यादिषु। तस्माद् अतिजरसा, अतिजरेणेति भवितव्यम्। पृथग्योग इत्यादि। यदि **"टाङसिङसामिनात्स्याः"** (अ० ७।१।१२) इति विदध्यात् तदा 'इन' इति किम् अकारान्तः, उत नकारान्तः? आदिति ह्रस्वो दीर्घो वेति बाला विप्रतिपद्यन्ते ज्ञापकैरपि मुह्यन्तीति। अत एव लुप्तविभक्तिकनिर्देशः। ननु **"ङसिरात्"** (२।१।२१) इत्यतः पूर्वम् 'इन टा' इति कर्तुं युज्यते क्रमात्, नैवं लाभहानिशून्यमिदं चोद्यम्, स्यादिसम्बन्धे टकारोऽपि **सुखप्रतिपत्त्यर्थ** एव 'वृक्षात्' इत्यत्र स्याच्चेत् तर्हि इनदिति तत्रैव विदध्यात्। अथ अतिजरसादिति मतं चेत् तथाप्यनर्थ-कत्वात् ॥१०२।

## [वि० प०]

इन० । ननु **'कार्यी निमित्तं कार्यम् इत्येष निर्देशक्रमः'** (कात० प० ५६) इति न्यायात् पूर्वं टा - वचनस्य निर्देशो युज्यते ततः कार्यस्येति टेनेति निर्देशेन भवितव्यम् । एवं सति लाघवमपि भवति । कथमयं विपर्ययनिर्देशः ? नच दीर्घो ह्रस्वो वेति सन्देहः, उभयथाप्येत्वविषयत्वेन दीर्घस्यानर्थकत्वाद् ह्रस्व एव निश्चेष्यते । दीर्घबलाद्धि सन्धिरित्यप्ययुक्तम् **"तेन दीव्यति०"** (२।६।८) इत्यादि निर्देशादित्याह - टेनेत्यादि । काकाक्षिन्यायेनाग्रतः– शब्द उभयत्र संबध्यते, तेन इनोच्चारणमग्रतः इन एवाग्रत इति । तेन नित्योऽपि जरसादेशः पश्चाद् भवतीति **मतान्तरमेतद् वृत्तौ** दर्शितम् ।

**सर्ववर्मणस्तु** मतं लक्ष्यते - बुद्ध्याध्यासितसंबन्धस्य व्यतिक्रमनिर्देशोऽपि, तथा च **"स्मै सर्वनाम्नः, सुरामि सर्वतः"** (२।१।२५,२९) इत्यादावग्रतः कार्यमेव निर्दिष्टम् । न चात्र लाघवमस्ति प्रतिपत्तिगौरवस्योक्तेन प्रकारेण विद्यमानत्वात्, तस्मादिह 'अतिजरसा, अतिजरेण' भवितव्यमेव । ननु **"टाङसिङसामिनात्स्याः"** (अ० ७।१।१२) इत्येकयोगः कथं न कृत इति, न चोद्यम् - इन इत्यकारान्तः उतस्विन्नकारान्तः, आदिति ह्रस्वो दीर्घो वेति सन्देहप्रसङ्गात् ज्ञापकोपन्यासश्च गरीयानिति । अत आह – पृथग् योगादिति ॥१०२।

## [समीक्षा]

दोनों ही व्याकरणों में 'टा' को 'इन' आदेश करके 'वृक्षेण' आदि शब्दरूप सिद्ध किए गए हैं। अन्तर यह है कि पाणिनि ने 'कार्यी निमित्तं कार्यम्' के क्रमानुसार पहले 'टा' (कार्यी) का तथा तदनन्तर 'इन' (कार्य) का निर्देश किया है – **"टा-ङसि-ङसामिनात्स्याः"** (अ०७।१।१२)। परन्तु कातन्त्रकार ने प्रकृत सूत्र में पहले कार्य का और तदनन्तर कार्यी का पाठ किया है– "इन टा" ।

इस व्यतिक्रम-निर्देश से व्याख्याकारों ने 'अतिजरा + टा' इस अवस्था में **"स्वरो ह्रस्वो नपुंसके"** (२।४।५२) से ह्रस्वादेश करने के बाद पहले 'टा' को 'इन' आदेश करके तदनन्तर जरसादेश का विधान माना है और इस प्रकार 'अतिजरसिन' प्रयोग सिद्ध किया है। "ङसिरात्, ङस् स्यः, इन टा" इस रूप में आदेशत्रयविधायक एक सूत्र होना चाहिए, परन्तु कातन्त्रकार ने बालावबोधार्थ भिन्न-भिन्न तीन सूत्र किए हैं – **पृथग्योगो बालावबोधार्थः।**

[ **रूपसिद्धि** ]

१. **वृक्षेण।** वृक्ष+टा। प्रकृत सूत्र द्वारा 'टा' को 'इन' आदेश, **"अवर्ण इवर्णे ए"** (१।२।२) से अकार को एकार तथा **"रषृवर्णेभ्यो नो णमनन्त्यः स्वरहयवकवर्गपवर्गान्तरोऽपि"** (२।४।४८) से नकार को णकारादेश ॥१०२।

## १०३. ङेर्यः [२।१।२४]

[ **सूत्रार्थ** ]

अकारान्त लिङ्ग=प्रातिपदिक से परवर्ती चतुर्थी विभक्ति-एकवचन 'ङे' प्रत्यय को 'य' आदेश होता है ॥१०३।

[ **दु० वृ०** ]

अकारान्ताल्लिङ्गात् परस्य ङेवचनस्य य आदेशो भवति। वृक्षाय ॥१०३।

[ **दु० टी०** ]

ङेः। सप्तम्येकवचनस्य न ग्रहणं **"ङिः स्मिन्"** (२।१।२७) इति ङिग्रहणानर्थक्यप्रसङ्गात्। ततो **"ङेर्यः"** (२।१।२४) इत्यतो ङिग्रहणं वर्तिष्यते। न चानन्तरत्वाद् ङसेरनुवर्तनमुचितम्, ङसेरनुवर्तने हि ङसिः स्मात्– स्मिनोरिति कृतं स्यात्। अत्रापि **ङकारः सुखप्रतिपत्त्यर्थ एव** ॥१०३।

[ **वि० प०** ]

ङेः। ङेरिति ङस आदिलोपः सूत्रत्वात् ॥१०३।

[ **क० च०** ]

ङेः। **"ङेर्यः"** (२।१।२४) इति सरेफोऽयं योगः। तथाहि सप्तम्येकवचनस्य न ग्रहणम्, 'ङिः स्मिन्' इति ङिग्रहणनार्थक्यप्रसङ्गात्। यतस्तत्र "ङेर्यः" इत्यतो ङिग्रहणं वर्तिष्यते। न चानन्तरत्वाद् ङसेरेवानुवर्तनमुचितम्, ङसेरनुवर्तने हि स्मात्-स्मिनाविति कृतं स्यात्। **कुलचन्द्रस्तु** सूत्रत्वात् षष्ठीलुगित्युक्तवान्,ततः षष्ठीपदं षष्ठ्येकदेशपरम्, अत एव न रेफशून्यः पाठः। एतदेकवाक्यतया ङस आदिलोप इत्यत्रादिलोप इति वर्णयन्ति **अन्ये** ॥१०३।

### [ समीक्षा ]

दोनों ही आचार्यों ने 'ङे' को 'य' आदेश करके 'वृक्षाय' आदि शब्दरूप सिद्ध किए हैं, अतः उभयत्र साम्य ही है।

### [ रूपसिद्धि ]

१. **वृक्षाय।** वृक्ष + ङे। प्रकृत सूत्र से ङे को य तथा "अकारो दीर्घं घोषवति" (२।१।१४) से घोषवान् वर्ण यकार के परवर्ती होने पर क्षकारोत्तरवर्ती अकार को 'दीर्घ' आकारादेश ॥१०३।

## १०४. स्मै सर्वनाम्नः [ २।१।२५ ]

### [ सूत्रार्थ ]

सर्वनामसंज्ञक अकारान्त लिङ्ग=प्रातिपदिक से परवर्ती चतुर्थ्येकवचन 'ङे' प्रत्यय को 'स्मै' आदेश होता है ॥१०४।

### [ दु० वृ० ]

अकारान्तात् सर्वनाम्नो लिङ्गात् परस्य ङेवचनस्य स्मैर्भवति सर्वस्मै। विश्वस्मै। सर्वेषां नामेति किम्? विश्वो नाम कश्चित्। विश्वम् अतिक्रान्तः (तस्मै) - विश्वाय, अतिविश्वाय। **तीयाद् वा वक्तव्यम्** – द्वितीयस्मै, द्वितीयाय। तृतीयस्मै, तृतीयाय। किन्तत् सर्वनाम? सर्व, विश्व, उभ, उभय, अन्य, अन्यतर, इतर, डतर, डतम। **वृत्।** त्व, नेम, सम, सिम, पूर्वापरावरदक्षिणोत्तरपराधराणि व्यवस्थायामसंज्ञायाम्, स्वमज्ञातिधनाख्यायाम्, अन्तरं बहिर्योगोपसंव्यानयोः। **वृत्।** त्यद्, तद्, यद्, एतद्, अदस्, इदम्, किम्, एक, द्वि, युष्मद्, अस्मद्, भवन्त् ॥१०४।

### [ दु० टी० ]

स्मै। सर्वेषान्नाम सर्वनाम इत्यन्वर्थसञ्ज्ञया सर्वादयो गृह्यन्ते। कथं सकल - कृत्स्न - जगत्पर्याया इह वर्जिता इत्यवसीयते। **लोकोपचारा**दियमेषामेव संज्ञा सिद्धेति, तर्हि किमन्वर्थतया? सत्यम्, संज्ञोपसर्जनयोः प्रतिषेधो यथा स्यात्। ननूपसर्जने न प्रयोजयत्यन्वर्थता, गौणत्वादेव न भविष्यति। नन्वत्र तदन्तविधिरस्ति, **"द्वन्द्वे, तृतीया-समासे च"** (२।१।३२, ३४) सार्वनामिककार्यप्रतिषेधात्। तथा च 'परमसर्वस्मै,

उत्तमविश्वस्मै' केवलस्याद्यन्तवदुपचारात् । अत एव तदन्तः संज्ञी तस्मादुपसर्जनस्यापि प्राप्नोतीत्यन्वर्थता युक्तेत्याह – सर्वेषां नामेत्यादि ।

**यैरपि "सर्वादीनि सर्वनामानि"** (अ० १।१।२७) इत्युक्तं तैरपि लोकत एव सर्वादीनि प्रतिपत्तव्यानि । यथा 'शूर्पणखा' इति पूर्वपदात् संज्ञायां णत्वं दृश्यते, न तथात्र तत्रापिग्रहणाद् अत एव निपातनादि**त्यन्ये।** उभशब्दो द्विवचनः स्त्र्यादन्तश्च एव दृश्यते तयोश्च सर्वनामकार्यं नास्तीति स्मैप्रभृतीनां च यथायोगमेकवचन-बहुवचनविषयत्वात् । न चाकि विहिते को वा रूपभेद इति नैवं सर्वनाम्नो हेतुप्रयोगे सर्वा विभक्तयो यथा स्युरिति उभाभ्यां हेतुभ्याम्, उभयोर्हेत्वोरिति । **"यत्तदेतेभ्यः, द्वयोरेकस्य निर्धारणे डतरो वा, जातौ तु डतमो बहुषु"** (अ० ५।२।३९; ३।९२, ९३) इति तौ किम इति तमादिनिपातनाद् वक्ष्यते । यतरस्मै, यतमस्मै । कतरस्मै, कतमस्मै । त्वशब्दोऽन्यवाची ।समशब्दः सर्वपर्यायः ।तुल्यपर्यायोऽपि अन्वर्थसंज्ञया सर्वपर्यायस्यैव ग्रहणम्, तेन 'समाय देशाय' इति स्मैर्न भवतीति । निम्नोन्नहितायेत्यर्थः, न पुनः सर्वशब्दसाहचर्याद् इति वक्तव्यम् ।

**गणसूत्रार्थ** उच्यते । असंज्ञायामिति । पूर्वादयो यदि संज्ञारूपा न भवन्तीत्यर्थः । व्यवस्थायामिति । स्वाभिधेयापेक्षोऽवधिनियमो **व्यवस्था। अवधिर्मर्यादा।** तस्य नियमोऽवश्यंभावः, अवधिभावाद् अभ्रंशः किम्भूतोऽवधिनियमः स्वाभिधेयापेक्षः पूर्वादीनां शब्दानां स्वाभिधेयो दिग्देशकालस्वभावोऽर्थः पूर्वादीन्यसंज्ञारूपाणि स्वाभिधेय एव वर्तमानानि व्यवस्थायां गम्यमानायां सर्वनामानीत्यर्थः ।पूर्वस्मादिति ।परस्मादवधेरिति गम्यते । परस्मादिति । पूर्वस्मादवधेरिति गम्यते । व्यवस्थायामिति किम् ? 'दक्षिणाय गाथकाय देहि' इति प्रवीणायेत्यर्थः । प्रावीण्यमात्रनिमित्तेनावधिभावनिरपेक्ष एव दक्षिणशब्दो गाथके वर्तते । असंज्ञायामिति किम् ? उत्तराय कुरवे देहि । सत्यामपि व्यवस्थायाम् इयं तेषां संज्ञा । तथाहि **जम्बूद्वीपं सुमेरुं वा अवधिमपेक्ष्य उत्तरशब्दो वर्तते इति व्यवस्था गम्यते।**

स्वमज्ञातिधनाख्यायामिति स्वशब्दः सर्वनाम भवति । न चेदयं ज्ञातिधनयोः संज्ञारूपेण वर्तते - स्वस्मै पुत्राय, स्वस्मै गवे । आत्मीयायेत्यर्थः । पुत्र - गोशब्दयोरिह सान्निध्याज्जातिर्धनं च गम्यते । स्वशब्दादात्मीयत्वमात्रमिति । अज्ञातिधनाख्यायामिति किम् ?'स्वाय ज्ञातये, स्वाय धनाय' ।शब्दान्तरनिरपेक्ष एव स्वशब्दो ज्ञातिधनाभिधायी ।

यद्येवम्, ज्ञातिधनयोरप्रयोगः पर्यायत्वात्, नैवम्। पर्यायशब्दो हि यत्रानेकार्थः सन्दिग्धार्थो वा तदर्थव्यक्तीकरणायानुप्रयोगः क्रियते। यथा हरिः सिंहः, पिकः कोकिल इति।

**अन्तरं बहिर्योगोपसंव्यानयोः** इति बहिरनावृतो देश उच्यते। तेन योगो बहिर्योगः, स चानावृतस्य वस्तुनो भवति। उपसंवीयते पिधीयते तदिति कर्मणि युट्, संवीयतेऽनेनेति वा करणे। संव्यानस्य समीप**मुपसंव्यानम्** अबहिर्योगः। वस्तु वस्त्वन्तरेणापिहितमुच्यते। अन्तरस्मै गृहाय, नगरबाह्याय चाण्डालादिगृहायेत्यर्थः। अन्तरस्मै शकटाय। वस्त्रान्तरेणावृतायेत्यर्थः। परिधानीयं प्रच्छादनीयमुच्यते न प्रावरणीयम्, तदभिधाने हि तस्य बहिर्योगित्वाद् बहिर्योग एव सिद्धिः। तथा प्राव्रियते प्रच्छाद्यतेऽनेनेति **प्रावरणीयमु**च्यते यद् वस्त्रस्योपरि पिधीयते। बहिर्योगोपसंव्यानयोरिति किम्? अयमनयोर्ग्रामयोरन्तरे तापसः प्रतिवसति, अस्मिन्नन्तरे शीतान्युदकानि सन्ति। मध्यवचनोऽन्तरशब्दः "ङिः स्मिन्"अपि न भवति। **अपुरीति वक्तव्यम्** – अन्तरायां पुरि वसति। **"सर्वनाम्नस्तु ससवो ह्रस्वपूर्वाश्च"** (२।१।४३) इति न भवति। अकारान्तादिति किम्? भवतः। सर्वनामत्वेऽकृप्रभृतीनि भवन्ति। भवकान्। भवादृक्। भवता हेतुना, भवतोर्हेत्वोरिति ॥१०४।

## [वि० प०]

स्मै। **सर्वेषां नाम सर्वनामे**त्यन्वर्थसंज्ञया सर्वनामेह प्रतिपत्तव्यम्। तर्हि 'जगत्-कृत्स्न-सकल' इत्येवमादीनामपि सर्वनामत्वप्रसङ्गः स्यात्, नैवम्। **लोकोपचारा**देतत्-पर्यायवर्जितानामेव सर्वनामसंज्ञा सिद्धेति। यद्येवं किमन्वर्थेनेति? सत्यम्। संज्ञोप-सर्जनयोः प्रतिषेधो यथा स्यादित्येतदेवान्वर्थतां कथयन् दर्शयति - सर्वेषां नामेत्यादि। कश्चिदिति न सर्वस्य विश्वस्य इति संज्ञेत्यर्थः। विश्वमतिक्रान्त इति कश्चिदित्यत्रापि संबन्धनीयम्। ननूपसर्जनेऽप्रधानत्वादेव न भविष्यति किं प्रतिषेधेनेति? नैवम्। तदन्तविधिरत्र प्रकरणे मन्तव्य एव 'परमसर्वस्मै, उत्तमविश्वस्मै' इत्यादिसिद्धये। तथा च **"नान्यत् सार्वनामिकम्, तृतीयासमासे च"** (२।१।३३,३४) इत्यादिना द्वन्द्वादौ समासे तदन्तस्य सार्वनामिककार्यप्रतिषेधार्थं सूत्रान्तरमुक्तम्, तर्हि केवलस्य सर्वनामशब्दस्य सार्वनामिकं कार्यं कथमिति चेत्, आद्यन्तवद्भावात्। अत उपसर्जने स्यादिति प्रतिषेध उच्यते। **यै**रपि **"सर्वादीनि सर्वनामानि"** (अ० १।१।२७) इति सूत्रमुक्तं तेऽप्यस्मत्पथ-

वर्तिन एव। कथमन्यथा जगदादिपर्यायवर्जितान्येव सर्वनामानि निश्चेतुं शक्यन्ते ऋते **लोकोपचारात्** ? तथाऽन्वर्थोऽपि तैरङ्गीकर्तव्य एव। यथोक्तं **जिनेन्द्रबुद्धिना** - **"अत एवान्वर्थसंज्ञाकरणात् संज्ञोपसर्जनीभूतानां सर्वनामसंज्ञा न भवतीति"** (का० वृ० -न्यासः १।१।२७)।

ननु उभशब्दो द्व्यर्थकत्वाद् द्विवचनान्त एव, नच तत्र सार्वनामिकं कार्यं किमपि संभवतीति स्मैप्रभृतीनां यथायोगम् एकवचनबहुवचनविषयत्वात् तत् किमित्यसौ पठ्यते। अथात्र सर्वनामत्वादकप्रत्यय इति चेत्, तदयुक्तम्, कप्रत्ययेनैव सिद्धत्वात्। न खल्वत्राप्यकि विहिते के वा रूपभेदोऽस्ति ? सत्यम्। सर्वनाम्नो हेतुप्रयोगे सर्वा विभक्तयो भवन्तीति व्याख्येयं तदुभयशब्दस्यापि सर्वनामत्वे यथा स्यात् - उभौ हेतू, उभाभ्यां हेतुभ्याम्, उभयोर्हेत्वोरिति। अन्यथा **"षष्ठी हेतुप्रयोगे"** (२।४।३७) इति षष्ठ्येव स्यात्। उभयेति। उभाववयवौ यस्येति विग्रहः। **"उभान्नित्यम्"** इति तमादित्वादयट्। उभय-उभयस्मै। अन्य-अन्यस्मै। अन्यतर-अन्यतरस्मै। इतर-इतरस्मै। डतर-डतमौ प्रत्ययौ। यत्तदेकेभ्यो द्वयोरेकस्य निर्धारणे डतरः, बहूनां जातौ डतमः। तौ किम इति तमादित्वात्। अतो डतरडतमप्रत्ययान्ता अपि गृह्यन्ते। यतरस्मै, यतमस्मै। कतरस्मै, कतमस्मै। **वृत्**करणमन्यादिगणसमाप्त्यर्थमिति।

त्वशब्दोऽप्यन्यार्थः, त्वस्मै। नेमशब्दः खण्डनार्थः, नेमस्मै। समशब्दः सर्वार्थः समानार्थकश्चेति यदाह – **"समं सर्वसमानयोः"** (द्र०, अ० को० ३।१।६४) इति। अत्र तु सर्वपर्याय एव गृह्यतेऽन्वर्थसंज्ञाबलात्। सम-समस्मै, सिम-सिमस्मै। पूर्वा-परावरदक्षिणोत्तरपराधराणि व्यवस्थायामसंज्ञायामिति। अत्र स्वाभिधेयापेक्षोऽवधि-नियमो व्यवस्थेति। अवधिर्मर्यादा सीमेति यावत्। तस्य नियमोऽवश्यम्भावः अवधिभावादभ्रंशः, स किम्भूतः स्वाभिधेयापेक्षः पूर्वादीनां स्वाभिधेयो दिग्देशकालस्वभावो योऽर्थस्तमपेक्षते इति **स्वाभिधेयापेक्षः।**

**अस्यायमर्थः –** दिगादीनामर्थानां पूर्वादिशब्दाभिधेयानां यत् तावत् पूर्वादित्वं तन्नियोगतः कमप्यवधिमपेक्ष्य भवति। तथाहि पूर्वस्य देशस्य यत् पूर्वत्वं तदवश्यं परदेशमवधिमपेक्षते तथा परस्यापि यत् परत्वं तत् पूर्वमिति पूर्वादीनां सम्बन्धि-शब्दत्वादिति। एवं च सति व्यवस्थिते पूर्वादिशब्दाभिधेयानामवश्यमवधिना भाव्यमिति तस्यैवावधेर्यः पूर्वादिशब्दाभिधेयापेक्षोऽप्यवधिभाव ऐकान्तिकः स नियमो व्यवस्था, सा च गम्यमाना न तु पूर्वादिशब्दवाच्या। या हि व्यवस्था पूर्वादिशब्दाभिधेयादर्थाद्

अन्यार्थस्यावधिभूतस्य विषयभूता सा कथं पूर्वादिशब्दवाच्या भवितुमर्हति इति। असंज्ञायामिति। संज्ञायामसत्यामपि पूर्वादयः शब्दा यदि संज्ञारूपेण न वर्तन्ते इति तदा एतदुक्तं भवति – पूर्वादयः शब्दा व्यवस्थायां गम्यमानायामपि असंज्ञारूपाः सन्तः सर्वनामसंज्ञा भवन्तीति। पूर्वस्मादिति। परस्मादवधेरिति गम्यते। एवमन्येऽपि द्रष्टव्या इति। व्यवस्थायामिति किम्? दक्षिणाय गाथकाय देहि। प्रवीणायेत्यर्थः। अत्रापि प्रावीण्यमात्रं निमित्तमुपादायावधिभावो निरपेक्ष एव। दक्षिणशब्दो गाथके वर्तते।

असंज्ञायामिति किम्? उत्तराय कुरवे देहि। सत्यामपि व्यवस्थायामियं तेषां संज्ञा। तथाहि **जम्बूद्वीपं सुमेरुं वाऽवधिमपेक्ष्य उत्तरशब्दः कुरुष्वपि वर्तते इति व्यवस्था गम्यते।** स्वमज्ञातिधनाख्यायामिति। ज्ञातधनयोराख्या ज्ञातिधनाख्या। ज्ञातिधनयोः संज्ञारूपेण स्वशब्दश्चेन्न वर्तते तदा सर्वनामसंज्ञेत्यर्थः। स्वस्मै पुत्राय, स्वस्मै गवे। आत्मीयायेत्यर्थः। आत्मीयत्वमात्रेऽत्र स्वशब्दो वर्तते इति ज्ञातिधनयोस्त्वप्रतिपत्तिः, पुत्रगोशब्दसन्निधानादिति। अज्ञातिधनाख्यायामिति किम्? स्वाय ज्ञातये, स्वाय धनाय! अत्र ज्ञातिधनयोः पर्यायरूपतया स्वशब्दो वर्तते। कथन्तर्हि ज्ञातिधनयोः प्रयोगः, न ह्यपि भवति वृक्षस्तरुरिति। यथोक्तम्,

**पर्यायाणां प्रयोगो हि यौगपद्येन नेष्यते।**

**पर्यायेणैव ते यस्माद् वदन्त्यर्थं न संहताः॥**

**पर्यायत्वं ततः सर्वपर्यायाणां प्रतिष्ठितम्॥** इति।

सत्यम्, यत्रानेकार्थः शब्दः सन्दिग्धार्थो वा तत्रार्थविशेषप्रतिपादनार्थं पर्यायशब्दस्यापि प्रयोगः कर्तव्य एव। यथाह – 'हरिः सिंहः, पिकः कोकिलः' इति। तथा च,

**धूमायन्त इवाश्लिष्टाः प्रज्वलन्तीव संहताः।**

**उल्मुकानीव मे स्वा हि ज्ञातयो भरतर्षभ!** इति।

अन्तरं बहिर्योगोपसंव्यानयोरिति। बहिरित्यनावृतो देशस्तेन सम्बन्धो बहिर्योगः, स चानावृतस्य बाह्यस्य वस्तुनो भवति। उपसंवीयते पिधीयते तदिति **"कृत्ययुटोऽन्यत्रापि च"** (४।५।९२) इति वचनबलात् कर्मणि युट्, करणे वा संवीयते पिधीयतेऽनेनेति **संव्यानम्।** पश्चादुपशब्देनापि संबन्धः। संव्यानस्य समीपम् **उपसंव्यानमिति।** अबहिर्योगवस्तुनोऽवस्त्वन्तरेण पिहितमुच्यते। बहिर्योगे यथा – अन्तरस्मै गृहाय।

नगरबाह्याय चाण्डालादिगृहायेत्यर्थः । उपसंव्याने च – अन्तरस्मै शाटकाय । वस्त्रान्तरेणावृतायेत्यर्थः ।

बहिर्योगोपसंव्यानयोरिति किम् ? अयमनयोर्ग्रामयोरन्तरे तापसः प्रतिवसति, अस्मिन्नन्तरे शीतान्युदकानि सन्ति । मध्यवचनोऽत्रान्तरशब्दस्तेन इहापि **"ङिः स्मिन्"** (२।१।२७) इति न भवति । वृत्करणं पूर्वादिगणसमाप्त्यर्थम् । त्यद् - त्यस्मै । तद् - तस्मै इत्यादयो ह्यनुसर्तव्याः । द्विप्रभृतेस्तु स्मैप्रभृतयो न भवन्तीति यथासंभवमक्प्रभृतीनि प्रयोजनानि ज्ञातव्यानि ॥१०४।

**[क० च०]**

स्मै । ननु **"सर्वादीनि सर्वनामानि"** (अ० १।१।२७) इति **केश्चित्** सर्वनामसंज्ञां प्रति सूत्रं प्रणीतम् । **अस्मन्मते** का गतिरित्याह – **सर्वेषां नामेति । वाचकमित्यर्थः ।** उभादीनां तु उभत्वादिरूपेण युगपत् सर्वेषामनभिधानेऽपि गणपाठबलादेव पर्यायेण तदभिधानादेवादोष इति मन्तव्यम् । यत्र तु युगपत् सर्वार्थता कतिपयार्थता च संभवति तत्र समशब्दादौ सर्वार्थतैव गृह्यते न कतिपयार्थता । मुख्यार्थतासम्भवे गौणार्थताकल्पनाया अन्याय्यत्वात् । युष्मदस्मदादीनां चेतनामात्रवाचित्वाद् गणपाठसामर्थ्यादिव सर्वनामतेति अन्वर्थ इति **संक्षेपः ।** एतत्पर्यायेति जगदादिपर्यायवर्जितानामित्यर्थः । सत्यमित्यादि । ननु यथा **लोकोपचारा**ज्जगदादिपर्यायवर्जितानां सर्वनामसंज्ञा तथा संज्ञोपसर्जनवर्जितानामेव भविष्यति ।

**लोकोपचारादेव** किमन्वर्थेनेति ? सत्यम्, यत्र व्याख्यान्तरं तत्र **लोकोपचाराश्रयणमिष्टसिद्ध्यर्थम्,** यत्र तु व्याख्यान्तरं सम्भवति तत्र किं लोकोपचाराश्रयणेनेति कश्चिदित्यत्रापि संबन्धनीयमिति । एतच्च विशेष्यत्वप्रदर्शनार्थमुक्तम्, न पुनः सर्वस्य विशेष्यत्वे सर्वनामत्वमिति कुव्याख्यानं युक्तमित्यग्रे वक्ष्यति । समुदायो न संज्ञा किन्त्ववयव एव संज्ञोपसर्जनेऽपि सर्वार्थकम् । एवं चेत् तत् कथम् अन्वर्थेन व्यावृत्तिरिति पूर्वपक्षो विद्यत एव, तथापि येन केनचित् प्रकारेण व्यावृत्तिर्घटत इति कृत्वा पूर्वपक्षं करोति - नन्वित्यादि **केचित् ।** तदन्तविधिरिति । अत्र प्रकरणे अत्र गणे । एतेन सर्वाद्यन्तस्यैव सर्वनामसंज्ञेत्यर्थः ।

ननु **'ग्रहणवता लिङ्गेन न तदन्तविधिः'** (व्या० प० पा० ८९) इति न्यायात् कथं तदन्तस्य ग्रहणमित्याह – तथा चेति । ननु कथमिदं ज्ञापकम्, यावता द्वन्द्वादौ

परपदस्यानुपसर्जनत्वेन सर्वनामत्वात् तदाश्रितकार्यं प्राप्नोत्येव। नैवम्, बाह्वादिगणे उपबाहुशब्दपाठेन यच्छब्दाश्रितं यत् कार्यमुक्तं तन्न तदाश्रितम् इति ज्ञापकात्। अत एव 'सौत्रनाडि:' इत्यत्र ग्रहणवता लिङ्गेन च तदन्तविध्यभावे सति नडशब्दाश्रित आयनण्प्रत्ययो न भवति, किन्तु "**इणतः**" (२।६।५) इतीण्। तथा चोक्तम् –

**गणे तदन्तस्य विधेरभावो बाह्वादिसूत्रे ह्युपबाहुपाठात्।**
**अतोऽत्र मन्येत कुतोऽत्र देश्यं द्वन्द्वादिके कार्यनिषेधवाचा॥**

अत एवोपसर्जनस्यापीति उपसर्जनान्तस्यापीत्यर्थः। एतदुक्तं भवति - तदन्तविधिना सर्वाद्यन्तस्य उपसर्जनान्तस्यापि। गौणत्वाभावात् संज्ञा स्यादित्यन्वर्थाश्रयणं युक्तमित्यर्थः। तथा च समुदायसंज्ञा इत्यन्वर्थत्वेन व्यावर्तनम्, अवयवाश्च सर्वार्थका न संज्ञेति भावः। अत एव तदन्तः संज्ञीति **टीकाकारः**। अथ 'अतिसर्वाय सर्वस्मै' इत्यत्र चान्वर्थत्वात् कथन्न संज्ञेति चेत्, सर्वत्वपुरस्कारेण सर्वार्थवाचकस्यैव ग्रहणात्। अथ तर्हि 'सर्वातिसर्वाय' इत्यत्र सर्वत्वपुरस्कारस्यापि सत्त्वात् 'परमसर्वस्मै' इतिवत् संज्ञा स्यात्, नैवम्। येन सर्वादिना सर्वाद्यन्तं गृह्यते प्रत्यासत्त्या यदि तेनैवार्थेन तदन्तस्य सर्वार्थता स्यात् तदा संज्ञेति कश्चिन्न दोषः। 'त्वत्कपितृकः' इत्यादौ व्यपदेशिवद्भावात् तदन्तत्वमस्तीति बहुव्रीहाविति वचनं च संगच्छते। तथा 'तत्पुत्रः' इत्यादौ तदादिप्रकरणे प्रत्युदाहरणस्य सङ्गतिः। न च गौणत्वमिति वाच्यम्, प्रत्यासत्त्या सर्वान्तिभागस्य योऽर्थस्तमपेक्ष्य गौणमुख्यव्यवहाराश्रयणात्, तर्हि 'अतिसर्वाय' इत्यादौ अन्तभूतस्य परपदस्य व्यपदेशिवद्भावेन तदन्तत्वात् संज्ञा स्याद् इति चेत् का क्षतिः, स्मैप्रभृतीनां सर्वनामाश्रितविभक्तिस्थाने विधीयमानत्वात्।

**वस्तुतस्तु** तदन्तविधिरत्र प्रकरणे मन्तव्य इत्यत्र विधिप्रकरणे स्मैप्रभृतौ तदन्तविधिरित्येवार्थः। संज्ञा च केवलस्यैव अत उपसर्जनस्यापि प्राप्नोति अर्थाश्रितो गौणमुख्यव्यवहारो न शब्दाश्रित इति न्यायात्। अन्वर्थे तु सति संज्ञाविधावन्वर्थस्याश्रयणाद् गौणमुख्यन्यायावतार इति भावः। 'त्वत्कपितृकः' इत्यादौ सर्वनामत्वाभावाद् बहुव्रीहाविति वचनमसङ्गतमिति चेत्, अत्र वक्ष्यति - अन्तरङ्गोऽप्यक् वचनात् प्रतिविध्यते इति वाक्यावस्थायां प्राप्तोऽप्यक् वचनान्निवर्तत इत्यर्थः। तर्हि निमित्ताभावादेव समासे सति अकोऽपि निवृत्तिर्भविष्यति किन्तेन वचनेनेति चेत्? सत्यम्, तदेव वचनं ज्ञापयति -

क्वचिन्निमित्ताभावे नैमित्तिकस्याप्यभाव इत्यस्यासिद्धवद्भाव इति । तेन 'कर्माणि' इत्यादौ दीर्घे, णत्वे नान्तत्वाभावेऽपि दीर्घाभावो न भवतीति **कुलचन्द्रः।**

**परमार्थतस्तु** 'तत्पुत्रः' इत्यादि प्रत्युदाहरणदर्शनात् प्रत्यासत्त्या यस्य संज्ञा कर्तव्या तदुत्तरविभक्तिमाश्रित्यैव गौणमुख्यव्यवहाराश्रयणम् । तदन्तः संज्ञीति, संज्ञी सर्वादिस्तदन्तस्य प्रकृतिभागस्यान्त इत्येवार्थष्**टीकायां** कल्पनीय इति भाव्यमधिकं मनीषिभिरिति । पूर्वस्मादिति । ननु अवधिभावदर्शने कर्तव्ये परस्मात् पूर्वः, पूर्वस्मात् पर इति वक्तुं युज्यते, तत्कथं पूर्वस्मादिति परस्मादवधेरिति गम्यत इत्युक्तम् । उच्यते – पूर्वस्मादिति गच्छतीति क्रियापदाध्याहारादपादाने पञ्चमी । परस्मादिति अवधौ **"दिगितरर्तेऽन्यैश्च"**(२।४।२१) इत्यनेन पञ्चमीत्याहुः **केचित् । वस्तुतस्तु** उभयत्रैवावधिभाव एव पञ्चमी परस्पेणावधिभावस्य सन्दर्शनार्थमिति । संज्ञायामिति । ननु संज्ञाग्रहणं किमर्थम्, अन्वर्थबलादेव तस्या वर्जितत्वात् ? सत्यम्, अन्वर्थद्वारेण यत् संज्ञावर्जनं तदप्रसिद्धाया एव प्रसिद्धशब्दसाधनायैव संज्ञायाः प्रवृत्तेः । प्रसिद्धे शास्त्रप्रवृत्तिर्ज्यायसीति न्यायात् । अत एव कुरुदेशवाचकोत्तरशब्दस्यापि प्रसिद्धत्वेन संज्ञा स्यादित्यसंज्ञाग्रहणम् । 'विश्वेदेवाः' इति तु **छान्दसप्रयोगः ।** अथवा संकोचवृत्त्या सर्वत्वपुरस्कारेणैव **विश्वशब्दो दशसु श्राद्धदेवेषु** वर्तते, यथा दशघटेषु सर्वे घटा इति प्रयोगः । अत एव 'विश्वेषां देवानाम्' इति प्रयोगः साधुरिति ।

**'तथा परेषां युधि चेति पार्थिवः'** इति प्रयोगदर्शनात् **'तथा समुद्रादपरे परे नृपाः'** इति दर्शनाच्च शत्रुवाचकस्य श्रेष्ठवाचकस्यापि परशब्दस्य सर्वनामत्वम् । **'वृथा द्वयेषामपि मेदिनीभृताम्'** इति माघदर्शनाद् द्वयशब्दोऽप्यत्र गणे पठनीयः ।

तथा च **श्रीपतिः –** कृतिना द्वयमप्यत्र गणे पठ्यते, अपिशब्दात् प्रथमपश्चिमावपि । **दुर्गदेव**स्त्वाह - 'व्यवस्थितविभाषयाऽन्यत्रापि स्वागमः' (दु० वृ०) इति पश्चिमप्रथमावपि पठन्त्**यन्ये**, तेन 'पश्चिमस्यां दिशि, प्रथमस्मात्' इति च प्रयोगः । नेमशब्दोऽर्धार्थः । सिमशब्दः सर्वार्थः । यथा 'तेऽमी सिमे विस्मिताः' इति । 'उत्तराय कुरवे देहि' इति । ननु देशवाचककुरुशब्दो बहुत्व एव वर्तते तत् कथं कुरुशब्दादेकवचनम् ? सत्यम्, देहीति क्रियासंबन्धाल्लक्षणया कुरुशब्दः पुरुषे वर्तते । अथ तथापि उभयपदेन लक्षणया अयोगाद् उत्तरशब्देन सह कथमन्वयः ? सत्यम्, प्रथममुत्तरशब्देनान्वये सति पश्चात् कुरुशब्देन लक्षणयाऽन्वयः । यथा 'गभीरायां नद्यां घोषः प्रतिवसति' इति । धूमायन्त

इत्यादि । ननु कथमत्र स्वशब्दे सन्देहः । नानार्थता चेति । यावता स्वशब्दो ज्ञातौ पुंसि, धने नपुंसके वर्तते । सत्यम्, अल्पादीनां विकल्पपक्षे ज्ञात्यात्मीययोः समानरूपत्वात् सन्देहः स्यादिति श्लोके ज्ञातिपदोपादानम् । ननु 'स्वम्' इति नपुंसकनिर्देशादेव ज्ञातौ न भविष्यति, किं ज्ञातिवर्जनेन । ज्ञातौ तु तस्य पुंस्त्वात्, यद् वा धनवचनोऽपि पुंलिङ्गः । तथा च **कोशः – "स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने"** (अ० को० ३।३।२११) इति ? सत्यम्, स्वमिति शब्दस्वरूपोऽयमित्यर्थो घटते । तथा च नपुंसकनिर्देशेऽपि 'स्वस्मै पुत्राय' इत्यादि प्रयोगः । तथा च नपुंसकवृत्ते सप्तम्या निर्देश इति साधुरिति **नव्याः । अन्ये** तु 'लिङ्गग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' (कात० प० १७) इति न्यायाद् ज्ञात्यर्थस्यापि स्यादिति वर्जनम् ॥१०४।

**[ समीक्षा ]**

'सर्व + ङे' इस अवस्था में दोनों ही वैयाकरण आचार्य 'ङे' को 'स्मै' आदेश करके 'सर्वस्मै' शब्दरूप सिद्ध करते हैं । अतः आदेशविधान की दृष्टि से उभयत्र साम्य ही है । परन्तु गणपठित शब्दक्रम के अनुसार विशेषता यह है कि कातन्त्रकार 'सर्वादि' गण में 'द्वि' शब्द से पूर्व ही 'किम्' शब्द का पाठ करते हैं, इसके विपरीत पाणिनीय गण में 'किम्' शब्द का पाठ 'द्वि' शब्द के अनन्तर किया गया है । इसीलिए **"किंसर्वनामबहुभ्योऽद्व्यादिभ्यः"** (अ० ५।३।२) इस सूत्र में पाणिनि ने द्व्यादिगण से अतिरिक्त 'किम्' शब्द पढ़ा है । यदि उसे पृथक् से न पढ़ा जाता तो द्व्यादि गण के अन्तर्गत पठित होने के कारण उससे भी तसिल् आदि प्रत्यय नहीं होते । इसके विपरीत कातन्त्र में 'द्वि' से पूर्व ही 'किम्' शब्द का पाठ होने से तसिल् आदि प्रत्ययों के विधायक सूत्र में 'किम्' शब्द का पाठ नहीं किया गया है –

**विभक्तिसंज्ञा विज्ञेया वक्ष्यन्तेऽतः परं तु ये ।**
**अद्व्यादेः सर्वनाम्नस्ते बहोश्चैव पराः स्मृताः ॥** (कात० २।६।२४) इति।

कातन्त्रकार ने **'सर्वेषां नाम सर्वनाम'** अर्थात् उन शब्दों की सर्वनाम संज्ञा प्रसिद्ध है, जो साकल्य अर्थ के प्रतिपादक हैं – इस प्रकार सर्वनाम की अन्वर्थता बताकर सर्वनामसंज्ञाविधायक सूत्र नहीं बनाया है । साकल्यार्थप्रतिपादक शब्दों की ही सर्वनाम संज्ञा माने जाने के कारण 'विश्व' आदि संज्ञाशब्दों में तथा 'विश्वमतिक्रान्तोऽतिविश्वः' आदि में सर्वनामसंज्ञाप्रयुक्त कार्य प्रवृत्त नहीं होते हैं – 'विश्वाय,

अतिविश्वाय'। कातन्त्र में 'न गौणे सार्वनामिकम्' वचन प्रसिद्ध है। 'सर्व' आदि शब्दों को गण में पढ़े जाने के कारण 'जगत्, कृत्स्न, निखिल' आदि सर्वार्थ-प्रतिपादक शब्दों की सर्वनामसंज्ञा नहीं होती है।

व्याख्याकारों ने "तीयाद् वा वक्तव्यम्, स्वमज्ञातिधनाख्यायाम्" आदि वार्त्तिकसूत्र-अन्तर्गणसूत्र पढ़कर 'द्वितीयस्मै, द्वितीयाय' आदि रूपों का भी साधुत्व दिखाया है। 'पश्चिम, प्रथम, द्वय' आदि की सर्वनामता के विषय में व्याख्याकारों के विचार पठनीय हैं।

**[ रूपसिद्धि ]**

१. **सर्वस्मै।** सर्व + ङे। प्रकृत सूत्र द्वारा सर्वनामसंज्ञक 'सर्व' शब्द से परवर्ती 'ङे' के स्थान में 'स्मै' आदेश ॥१०४।

२. **विश्वस्मै।** विश्व+ङे। पूर्ववत् 'ङे' के स्थान में 'स्मै' आदेश ॥१०४।

## १०५. ङसिः स्मात् [ २।१।२६ ]

**[ सूत्रार्थ ]**

सर्वनामसंज्ञक अकारान्त लिङ्ग=प्रातिपदिक से परवर्ती पञ्चमीविभक्ति-एकवचन 'ङसि' के स्थान में 'स्मात्' आदेश होता है।।१०५।

**[ दु० वृ० ]**

अकारान्तात् सर्वनाम्नो लिङ्गात् परो ङसिः स्माद् भवति। सर्वस्मात्। विश्वस्मात्। अकारान्तादिति किम् ? भवतः।।१०५।

**[ दु० टी० ]**

ङसिः। यथा अतिविश्वात् तथा विश्वस्य समीप**मुपविश्वम्, उपविश्वात्।** पूर्वपदार्थप्रधानोऽयमव्ययीभाव इति ॥१०५।

**[ क० च० ]**

ङसिः। **'सर्वतो जयमन्विच्छेत् पुत्रादेकात् पराजयम्'** इति असाधुरिति **रक्षितः।** **अन्ये** तु **'गणकृतमनित्यम्'** (कात० प० २९) इति न्यायात् साधुत्वमाहुः। **अपरे** तु 'पुत्रादेकात् पराजयम्'-पुत्रादेव पराजयम् इत्यवधारणार्थत्वान्न सर्वनाम इत्याहुः ॥१०५।

## [ समीक्षा ]

'सर्व + ङसि ' इस स्थिति में दोनों ही व्याकरणों में 'ङसि' को 'स्मात्' आदेश करके 'सर्वस्मात्' आदि शब्दरूप सिद्ध किए गए हैं । पाणिनि का सूत्र है – **"ङसिङ्योः स्मात्स्मिनौ"** (अ० ७।१।१५) ।

## [ रूपसिद्धि ]

१. **सर्वस्मात्** । सर्व + ङसि । प्रकृत सूत्र द्वारा सर्वनामसंज्ञक 'सर्व' शब्द से परवर्ती पञ्चमी विभक्ति - एकवचन 'ङसि' को 'स्मात्' आदेश ।

२. **विश्वस्मात्** । विश्व + ङसि । पूर्ववत् 'ङसि' को 'स्मात्' आदेश ।।१०५ ।

# १०६. ङिः स्मिन् [ २।१।२७ ]

## [ सूत्रार्थ ]

सर्वनामसंज्ञक अकारान्त लिङ्ग=प्रातिपदिक से परवर्ती सप्तमी विभक्ति - एकवचन 'ङि' प्रत्यय के स्थान में 'स्मिन्' आदेश होता है ।।१०६।

## [ दु० वृ० ]

अकारान्तात् सर्वनाम्नो लिङ्गात् परो ङिः स्मिन् भवति । सर्वस्मिन् । विश्वस्मिन् । सर्वेषां नामेति किम् ? समे देशे यजति ।।१०६।

## [ दु० टी० ]

ङिः । यथा 'अतिविश्वे' तथा 'उपविश्वे' । **"वा तृतीयासप्तम्योः"** (२।४।२) अम्भाव इति । **"ननु ङसिङ्योः स्मात्स्मिनौ"** (अ० ७।१।१५) इति कृते 'विभाष्येते' इति द्विवचनमपि नाभिधेयं स्यात् । नैवम्, किमयं नकारोऽस्वरः सस्वरो वेति विप्रतिपद्यन्ते ।।१०६।

## [ समीक्षा ]

पाणिनि तथा शर्ववर्मा दोनों ही 'सर्व' आदि शब्दों से परवर्ती 'ङि' प्रत्यय को 'स्मिन्' आदेश करके 'सर्वस्मिन्' आदि शब्दरूप सिद्ध करते हैं, अतः उभयत्र साम्य है ।

**[ रूपसिद्धि ]**

१. **सर्वस्मिन्।** सर्व + ङि । सर्वनामसंज्ञक अकारान्त 'सर्व' शब्द से परवर्ती सप्तमी विभक्ति - एकवचन 'ङि' प्रत्यय के स्थान में प्रकृत सूत्र द्वारा 'स्मिन्' आदेश ।

२. **विश्वस्मिन्।** विश्व + ङि । पूर्ववत् 'ङि' को 'स्मिन्' आदेश ।।१०६।

## १०७. विभाष्येते पूर्वादिः [ २।१।२८ ]

**[ सूत्रार्थ ]**

पूर्वादि गणपठित शब्दों से परवर्ती 'ङसि' तथा 'ङि' के स्थान में क्रमशः 'स्मात् - स्मिन्' आदेश विकल्प से होते हैं ।।१०७।

**[ दु० वृ० ]**

पूर्वादिर्गणात् परयोर्ङसिङ्योः स्थाने स्मात् - स्मिनौ विभाष्येते । प्राप्ते विभाषा । पूर्वस्मात्, पूर्वात् । पूर्वस्मिन्, पूर्वे । **'तीयाद् वा वक्तव्यम्'** (वा० सू०) । द्वितीयस्मात्, द्वितीयात् । द्वितीयस्मिन्, द्वितीये । तृतीयस्मात्, तृतीयात् । तृतीयस्मिन्, तृतीये ।।१०७।

**[ दु० टी० ]**

**विभा०।** विपूर्वो भाष विभाषणे । विभाषा अव्ययो वा । तत इन् धात्वर्थे । पूर्वादिरिति तद्गुणसंविज्ञानो बहुव्रीहिः । प्राप्ते विभाषेति पूर्वादिर्गणस्य सर्वनामत्वात् स्मात् - स्मिनौ नित्यं प्राप्तौ विकल्प्येते यथास्थानम् । न च ङेः स्यादीनां वा अश्रुतत्वादित्यर्थः । **'अपवादविषयं परिहृत्य उत्सर्गः प्रवर्तते'** (कात० प० ५५) इत्युत्पत्तिकाल एव विभाषा स्यात् । पूर्वादिरिति किम् ? तस्मात् त्यदः पूर्वो वृत्शब्दः पूर्वादिगणसमाप्त्यर्थ एव पठ्यते । तीयादिति । तीयप्रत्ययान्तादित्यर्थः । 'तीयो वा ङवत्सु' इति पूर्वादिषु संबध्यते इति वक्तव्यमेव युक्तमिति तौ पूर्वादेर्वेति **कुचोद्यमेतत्,** पर्यायत्वात् ।।१०७।

**(वि० प०)**

विभाष्येते । विपूर्वाद् भाषतेः कर्मणि वर्तमानाया आत्मनेपदप्रथमपुरुष-द्विवचनम् - आते, **"सार्वधातुके यण्"** (३।२।३१) । 'आते - आथे' इति चेति आकारस्येकारः । विभाष्येते इति द्विवचनं व्यवहितस्यापि ङसिः स्मादित्यनुकर्षणार्थम् ।

एवं तर्हि "तौ पूर्वादेर्वेति" कथन्न कृतं चेत्, नैवम्। **'पर्यायशब्दानां गुरुलाघवचिन्ता नास्ति'** (सीर० प० वृ० १२२) इति। तीयाद् वेति। पटुजातीयादित्यत्र न भवति, अनर्थकत्वात्। पटोः प्रकारः पटुजातीयः, प्रकारे जातीयप्रत्ययो **रूढितः**॥१०७।

**[क० च०]**

विभा०। विपूर्वो भाषिरकर्मकः। यथा -

**निवार्यतामालि किमप्ययं वटुः पुनर्विवक्षुः स्फुरितोत्तराधरः।**

**न केवलं यो महतो विभाषते शृणोति तस्मादपि यः स पापभाक्॥**

(कु० सं० ५।८३)।

इति, तत्कथं कर्मणि प्रत्यय इति **कुलचन्द्रः**। तन्न, 'महतोऽपभाषते' इति बहुपुस्तके पाठदर्शनाद् दृष्टान्त एव न संगच्छते इत्याह-विपूर्वाद् भाषतेः कर्मणीत्यादि॥१०७।

**[समीक्षा]**

पाणिनि ने भी पूर्वादि शब्दों से 'स्मात्-स्मिन्' आदेश विकल्प से किए हैं- **"पूर्वादिभ्यो नवभ्यो वा"** (अ० ७।१।१६)। इस प्रकार दोनों ही व्याकरणों में 'पूर्वस्मात्-पूर्वात्, पूर्वस्मिन्-पूर्वे' शब्दरूपों का साधुत्व प्रमाणित किया गया है।

**[रूपसिद्धि]**

१. **पूर्वस्मात्, पूर्वात्।** पूर्व + ङसि। प्रकृत सूत्र के निर्देशानुसार पञ्चमीविभक्ति-एकवचन 'ङसि' के स्थान में 'स्मात्' आदेश होने पर 'पूर्वस्मात्' रूप तथा 'स्मात्' आदेश के अभाव (विकल्प) में **"ङसिरात्"** (२।१।२१) से 'आत्' आदेश होने पर 'पूर्वात्' शब्दरूप सिद्ध होता है।

२. **पूर्वस्मिन्, पूर्वे।** पूर्व + ङि। प्रकृत सूत्र के निर्देशानुसार सप्तमीविभक्ति-एकवचन 'ङि' को 'स्मिन्' आदेश किए जाने पर 'पूर्वस्मिन्' शब्दरूप एवं 'स्मिन्' आदेश के अभाव (विकल्प) पक्ष में **"अवर्ण इवर्णे ए"** (१।२।२) से वकारोत्तरवर्ती अकार को एकार तथा परवर्ती इकार का लोप होने पर 'पूर्वे' शब्दरूप निष्पन्न होता है॥१०७।

## १०८. सुरामि सर्वतः [ २।१।२९ ]

### [ सूत्रार्थ ]

सर्वनामसंज्ञक अवर्णान्त लिङ्ग=प्रातिपदिक से षष्ठी - बहुवचन आम् - प्रत्यय के परवर्ती रहने पर 'सु' आगम होता है ॥१०८।

### [ दु० वृ० ]

अकारान्तात् सर्वनाम्नो लिङ्गात् सर्वतः आमि परे सुरागमो भवति । सर्वेषाम्, विश्वेषाम् । यासाम्, तासाम् । उकारः परादित्वार्थः । प्रतिपदोक्तग्रहणात् - त्वाम्, युवाम् ॥१०८।

### [ दु० टी० ]

सुरा० । न्वागमबाधनार्थमिदम् । इह हि **'विशेषातिदिष्टः प्रकृतं न बाधते'** (कात० प० १९) इति सर्वनाम प्रवर्तते, न त्वनन्तरः पूर्वादिः सर्वतोग्रहणेन चाकारान्तं सर्वनाम विशिष्यते । सर्वनाम्नोऽकारान्तात् 'सर्वतः' इति स्त्रीलिङ्गात्, पुंलिङ्गान्नपुंसकलिङ्गादित्यर्थः । यत्र च स्त्रीलिङ्गमस्ति तत्रावश्यं **"स्त्रियामादा"** (२।४।४९) इत्याह - यासां तासामित्यादि । अथवा अकारोपलक्षितः समुदायोऽवर्णान्तः सर्वतः इत्युच्यते । अकारमात्रस्य हि नार्थः सर्वतोविशेषणेन । न पुनरेवं सर्वस्मात् सर्वनाम्न इति । एवं सति भवतामुभयीनामित्यत्रापि स्यात् । अस्तु चेत्, नैवम् । विशेषणविशेष्यभावस्येष्टत्वात् सुरित्युकारानुबन्धः परादित्वार्थः, तेन धुट्येत्वं स्यात् ।

परिशिष्टमिह षष्ठीबहुवचनम् । यदा सर्व इवाचरत्यायिः तस्य च लोपे धातुत्वात् 'सर्वाञ्चकार' इति तेषां मतम् । तदापि न भवति स्यादिसंबन्धाद् असर्वनामत्वाच्च । तर्हि कथं त्वाम्, युवामिति लाक्षणिकत्वात् सन्निपातलक्षणत्वाच्च । नन्वादेशप्रस्तावाद् 'आम् साम् सर्वतः' इति कथन्न कुर्यात्, नैवम् । आदेशे कृतेऽपि नुर्भवितुमर्हति । अथ **'सकृद् बाधितो विधिर्बाधित एव'** (कात० प० ३६) इति, तदेवं कष्टमिति । 'विभाषा' न वर्तते, उत्तरत्र वा-ग्रहणात् । अथ विभाषाधिकारे पुनर्वाग्रहणम् उत्तरत्र वाऽधिकारनिवृत्त्यर्थमिति तदेष्टत इति वक्तव्यम् ॥१०८।

[वि० प०]

**सुरामि ।** अकारान्तात् सर्वत इति अकारमात्रस्य सर्वतोविशेषणेन प्रयोजनाभावाद् अकारोपलक्षितोऽवर्णसमुदायः सर्वतः – शब्देनोच्यते । 'सर्वतः' इत्यवर्णान्तादित्यर्थः । तेन स्त्रियामादन्तादपि स्यादित्याह - यासां तासामिति । अकारान्तादिति तु वचनं वृत्तावधिकाराविच्छेददर्शनार्थमुक्तम् । ननु कथमेतद् यावता प्रधानत्वात् सर्वनाम्नो विशेषणमुचितम् - सर्वस्मात्, सर्वनाम्न इति । ततो भवतामुभयीनामित्यत्रापि सुरागमो युक्त इति ? सत्यम्, **विशेषणविशेष्यभावस्य प्रयोक्तुरायत्तत्वाद्** इत्यदोषः । उकारः परादित्वार्थ इति **"तृतीयादौ तु परादिः"** (२।१।७) इति परादित्वम्, तेन **"धुटि बहुत्वे त्वे"** (२।१।१९) इत्येत्वं फलमित्यर्थः । ननु युष्मदस्मदादिभ्यः **"अमौ चाम्"** (२।३।८) इति कृते कथं सुरागमो न स्यादित्याह - प्रतिपदोक्त इत्यादि । पारिशेष्यात् षष्ठीबहुवचनमेव स्थितम् ।।१०८।

[क० च०]

**सुरामि ।** अकारान्तात् सर्वत इति **वृत्तिः ।** अकारान्तत्वेनोपस्थितस्य सर्वनाम्नः सर्वत इति विशेषणाद् भूतपूर्वाकारान्तं साक्षादकारान्तं यावत् सर्वनाम, तस्मात् सर्वस्मादेव सुरागम इति । सर्वासामित्यत्रापि समानदीर्घे सति भूतपूर्वाकारान्तत्वमस्ति, न च उभयीनामित्यत्रापि भूतपूर्वाकारान्तत्वमिति वाच्यम् अकारस्येकारेण व्यवधानात् । न हीकारस्याप्यकाराद् भूतपूर्वान्तत्वमस्तीति **कश्चिद्** व्याख्यानं कुरुते । न ह्यत्रापि स्त्रीप्रत्ययेन व्यवधानत्वमस्तीति ? सत्यम्, अकारान्तादित्यस्य सर्वतोग्रहणेन विशेषणादवर्णान्तादित्यर्थः प्रतिपद्यते ।।१०८।

[समीक्षा]

'सर्वेषाम्, विश्वेषाम्' आदि शब्दों के साधुत्वार्थ कातन्त्रकार 'सु' आगम तथा पाणिनि **"आमि सर्वनाम्नः सुट्"** (अ० ७।१।५२) से 'सुट्' आगम करते हैं । 'सु' आगम में उकार अनुबन्ध ही परादि-विधान के लिए निर्धारित है – **"तृतीयादौ तु परादिः"** (२।१।७), जबकि पाणिनि तदर्थ 'ट्' अनुबन्ध की योजना करते हैं – **"आद्यन्तौ टकितौ"** (अ० १।१।४६) और उकारानुबन्ध को उच्चारणसौकर्यार्थ मानते हैं । इस प्रकार पाणिनीय 'सुट्' – निर्देश में गौरव स्पष्ट है ।

व्याख्याकारों के अनुसार सूत्र में 'सर्वतः' पद के पाठ से अनुवृत्त 'अकारान्त' शब्द का अर्थ 'अवर्णान्त' किया जाता है, अतः 'यासाम्, तासाम्' आदि शब्दरूप भी सिद्ध होते हैं। **'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्'** (कात० प० पा० ७५) इस परिभाषा के अनुसार 'त्वाम्, युवाम्' में 'सु' आगम नहीं होता है।

**[ रूपसिद्धि ]**

१. **सर्वेषाम्।** सर्व + आम्। प्रकृत सूत्र से 'सु' आगम, **"तृतीयादौ तु परादिः"** (२।१।७) से उसकी 'आम्' प्रत्यय से पूर्व में योजना, **"धुटि बहुत्वे त्वे"** (२।१।१९) से अकार को एकार तथा **"नामिकरपरः०"** (२।४।४७) से सकार को षकारादेश।

२. **विश्वेषाम्।** विश्व + आम्। प्रकृत सूत्र से 'सु' आगम आदि पूर्ववत् योजना।

३. **यासाम्।** यद् + आम्। **"त्यदादीनाम विभक्तौ"** (२।३।२९) से 'द्' को 'अ', **"अकारे लोपम्"** (२।१।१७) से पूर्ववर्ती 'अ' का लोप, **"स्त्रियामादा"** (२।४।४९) से आकार, प्रकृत सूत्र से 'सु' आगम और **"तृतीयादौ तु परादिः"** (२।१।७) से उसकी परादियोजना।

४. **तासाम्।** तद् + आम्। **"त्यदादीनाम विभक्तौ"** (२।३।२९) से 'द्' को 'अ' आदेश आदि पूर्ववत् ॥१०८।

## १०९. जस् सर्व इः [२।१।३०]

**[ सूत्रार्थ ]**

सर्वनामसंज्ञक अकारान्त लिङ्ग=प्रातिपदिक से परवर्ती जस् प्रत्यय के स्थान में 'इ' आदेश होता है।।१०९।

**[ दु० वृ० ]**

अकारान्तात् सर्वनाम्नो लिङ्गात् परो जस् सर्व इर्भवति। सर्वे। विश्वे। अकारान्तादिति किम्? सर्वाः ॥१०९।

**[ दु० टी० ]**

जस्०। अकारान्तमिह वर्तते, न तु सर्वत इति। यस्मान्निर्विशेषणं सामान्यं सविशेषणं विशिष्टमिति युक्तमिह **'विशेषातिदिष्टः प्रकृतं न बाधते'** (कात०प० १९)

इति वचनम् । अथवा अधिकारमपेक्ष्य विशेषातिदिष्टत्वमिति । यथा द्विजभोजने दध्यधिकृतं कथंचित् तक्रं दीयते, पुनरपरेद्युः प्रकृतमेव दधि दीयते न विशिष्टं तक्रमित्याह - अकारान्तादिति किम् ? सर्वा इति । सर्वग्रहणं **'परस्यादेः'** (भोज० प० सू० १६) इत्यादेर्मा भूत् । नन्वियं शार्ववर्मिके न प्रयोजनवती किं चाभेदात्तथावर्णान्तस्यापि न भवति । जस् इकाररूपेण विपरिणमत इति तर्हि प्रतिपत्तिगौरवनिरासार्थमेव सर्वग्रहणम् । **केनचिद्** दीर्घमादिशता **"दीर्घात्, पदान्ताद् वा"** (अ० ६।१।७५, ७६) इति छस्य द्विर्भावः प्रयोजनमुच्यते । परं च तद् निमित्तं चेति परनिमित्तम् । परनिमित्तं च तदादेशश्चेति प्रतिपाद्य **'परनिमित्तादेशः पूर्वस्मिन् स एव'** (कात० प० ४४) ह्रस्व एवेत्यर्थः। तदा ह्रस्वान्नित्यं द्विर्भाव एव स्यादित्यर्थः। यद्येवं सर्वेऽत्रेति कथमकारलोपः, तयाहुरिति कथमय् भवतीति **'परनिमित्तादेशः पूर्वस्मिन् स एव'** (कात० प० ४४) पर इति । परत्वमेव नियम्यते, तेन 'शाले एते, माले इमे' **"द्विवचनमनौ"** (१।३।२) इति प्रकृतिर्भवति । तस्माद् इह ह्रस्व एवादेशः प्रतिपत्तव्य इति ।।१०९ ।

## [वि० प०]

**जस्०।** सर्वग्रहणं समस्तादेशार्थम्, अन्यथा **"परस्यादेः"** (भोज० प० सू० १६) इति आदेरेव स्यात् । ननु द्वाभ्यां गता आपो यत्रासौ **द्वीपः।** अन्तर्गता आपो यत्रासौ **अन्तरीपः** इत्यादि सिद्ध्यर्थं परिभाषेयमङ्गीकृता **कैश्चित्।** इह तु एते शब्दा रूढित एव सिद्धाः। नहि **"द्व्यन्तरुपसर्गेभ्योऽप ईः"** (अ० ६।३।९७) इति वचनमत्रादृतम्, तदस्याः परिभाषाया अनङ्गीकरणादेवादेर्न भविष्यति जसित्यभेदबलाद् वा जस इकाररूपेण परिणमत इत्यर्थः। एतेनैकवर्णत्वाद् अन्ते भविष्यति इत्यपि निरस्तम्। अतः किं सर्वग्रहणेन ? सत्यम्। **प्रतिपत्तिगौरवनिरासार्थमेवेदं सर्वग्रहणम्।**

**'विशेषातिदिष्टः प्रकृतं न बाधते'** (कात० प० १९) इति न्यायाद् अकारान्त एवानुवर्तते इत्याह - अकारान्तादिति किम् ? सर्वा इति । इह पूर्वस्मिंश्च विभाषा न वर्तते **"अल्पादेर्वा"** (२।१।३१) इत्युत्तरत्र वा - ग्रहणात् ।।१०९ ।

## [क० च०]

**जस्०।** ननु 'आसीनः' इति सिद्ध्यर्थम् "ई तस्यासः" (४।४।६) इत्यनेन **'पञ्चम्या निर्दिष्टे परस्य'** (कात० प० २२) इति न्यायाद् आनस्याकारस्य यथा ईर्भवति

तथाऽत्रापि जसोऽकारस्यादेः कथं न स्यादित्याह - जसित्यभेदबलाद् वेति । एकवर्णत्वादन्तस्येत्यादि । ननु अन्तस्यापीकारे कृतेऽन्तरङ्गत्वात् **"जसि"** (२।१।१५) इत्यनेन दीर्घे सति साध्यं सिध्यति किं तस्येकारनिरासेन ? सत्यम्, अन्तरङ्गत्वाद् **"अकारे लोपम्"** (२।१।१७) इत्यनेन प्राप्तमकारलोपं बाधित्वा **"जसि"** (२।१।१५) इत्यनेन कृतेऽपि दीर्घे विकारपक्षे परलोपं बाधित्वा परत्वादकारस्येत्वं स्यात् ।

न च **'असिद्धं बहिरङ्गम्'** (कात० प० ३३) इति न्यायादन्तरङ्गे एत्वे कर्तव्ये बहिरङ्गस्येकारस्य सिद्धत्वमिति वाच्यम्, स्वरानन्तर्ये तस्यानित्यत्वात् । ननु तथाप्यन्तरङ्गत्वात् **"जसि"** (२।१।१५) इति दीर्घे सति परलोपो बाधितः स्यात् तन्निरासार्थं वर्णान्तनिरास इति **महान्तः** । **"अल्पादेर्वा"** (२।१।३१) इति - वाग्रहणादिति । **'उभयोर्विभाषयोर्मध्ये यो विधिः'** (कात० प० ११) इति न्यायाद् युक्तिमूलक एव । तथाहि पूर्वत्र वाग्रहणादेव सिद्धे यदत्र वाग्रहणं तन्मध्ये नित्यार्थं भवतीति चेत् परत्र वाग्रहणमुत्तरत्र वानिवृत्त्यर्थमिति कथन्न स्यात् ? सत्यम् । **"द्वन्द्वाच्च"** (२।१।३२) इति चकारो वानुकर्षणार्थ एव, अन्यथा चकारो व्यर्थः स्यादिति ॥१०९ ।

**[ समीक्षा ]**

'सर्व + जस्, विश्व + जस्' इस अवस्था में जस् को इकारादेश करके कातन्त्रकार 'सर्वे, विश्वे' आदि प्रयोग बनाते हैं; जबकि पाणिनि 'जस्' को 'शी' आदेश करते हैं - "जसः शी" (अ० ७।१।१७) । पाणिनि ने दीर्घ ईकार का उच्चारण **"नपुंसकाच्च"** (अ० ७।१।१९) इस उत्तरवर्ती सूत्र के लिए किया है । इससे 'त्रपुणी, जतुनी' इत्यादि शब्दरूपों में दीर्घ ईकार दृष्ट होता है, परन्तु प्रकृतसूत्र के अनुसार अकारान्त शब्द से उत्तरवर्ती 'जस्' को 'शी' आदेश होता है । अकारान्त शब्द से उत्तरवर्ती चाहे ह्रस्व इकार हो या दीर्घ', सभी का गुणादेश हो जाने पर 'ए' वर्ण ही दिखाई पड़ता है 'इ' अथवा 'ई' नहीं । इस प्रकार ह्रस्व इकार से ही कार्य सिद्ध हो जाने पर दीर्घ ईकार का निर्देश व्यर्थ सिद्ध हो जाता है - इस दृष्टि से कातन्त्रीय ह्रस्व 'इ' का विधान ही संगत प्रतीत होता है ।

व्याख्याकारों के अनुसार इस सूत्र में अकारान्त का अधिकार माना जाता है, अवर्णान्त का नहीं, अन्यथा 'सर्वा' शब्द से भी 'जस्' प्रत्यय को 'इ' आदेश' प्रवृत्त हो जाता । **'एकवर्णविधिरन्ते प्रवर्तते अनेकवर्णविधिः सर्वस्य'** (कात० प०

पा० ६) इस न्याय के अनुसार इकारादेश 'जस्'-प्रत्ययान्तवर्ती 'स्' को प्राप्त था, किन्तु समस्त 'जस्' प्रत्यय के स्थान में अभीष्ट होने से सूत्रकार शर्ववर्मा ने सूत्र में 'सर्वः' पद पढ़ा है।

**[ रूपसिद्धि ]**

१. **सर्वे।** सर्व+जस्। प्रकृत सूत्र से 'जस्' को 'इ' आदेश, **"अवर्ण इवर्णे ए"** (१।२।२) से वकारोत्तरवर्ती अकार को एकार तथा परवर्ती इकार का लोप।

२. **विश्वे।** विश्व+जस्। पूर्ववत् इकार-एकार आदेश तथा इकार का लोप ॥१०९।

## ११०. अल्पादेर्वा [ २।१।३१ ]

**[ सूत्रार्थ ]**

अल्पादि गण-पठित शब्द से परवर्ती 'जस्' प्रत्यय को विकल्प से 'इ' आदेश होता है ॥११०।

**[ दु० वृ० ]**

अल्पादेर्गणात् परो जस् सर्व इर्भवति वा। अल्पे, अल्पाः। प्रथमे, प्रथमाः। उभय इति नित्यं भाषायाम्। अल्प-प्रथम-चरम-तय-अय-कतिपय-नेमार्द्धाः पूर्वादयश्च ॥११०।

**[ दु० टी० ]**

**अल्पा०।** अल्प एवादिर्यस्य इत्यादिशब्दोऽयं व्यवस्थावाचीत्याह - अल्पेत्यादि। तयायौ उत्सृष्टानुबन्धौ प्रत्ययौ, परिशिष्टानि लिङ्गानि पूर्वादयो नवैव, गणे वृत्करणात्। द्वितये, द्वितयाः। द्वौ अवयवौ एषामिति विगृह्य **"द्वित्रिभ्यामयड् वा"** पक्षे तयट्-द्वयाः। उभाववयवावेषामिति विगृह्य "उभान्नित्यमयट्" तमादिनिपातनाद् व्यवस्थित-विभाषाविज्ञानादिति। अत आह-उभय इति नित्यं भाषायामिति। **'भाषाग्रहणं स्वरूपाख्यानमेव'**। नेमस्य पूर्वादीनां च प्राप्ते विभाषा, अन्येषामप्राप्ते ॥११०।

**[ वि० प० ]**

अल्पादेः। उभय इति नित्यमिति। एतत्पुनर्व्यवस्थितविभाषाश्रयणाद् भाषायामिति स्वरूपाख्यानमेवाव्यभिचारात् तयायौ प्रत्ययौ। अतस्तदन्तस्य ग्रहणं

"संख्याया अवयवे तयट्, द्वित्रिभ्यामयड् वा, उभान्नित्यम्" इति तमादित्वादयट्। चत्वारोऽवयवा एषामिति **चतुष्टये, चतुष्टयाः।** तत्र क्वचिदधिकाराद् **"अनव्ययविसृष्टस्तु सकारं कपवर्गयोः"** (२।५।२९) इति तकारेऽपि सकारः। अथवा अन्तर्वर्तिनीं विभक्तिमाश्रित्य पदान्तत्वे सति "ते थे वा सम्" (१।५।३) इत्यनेन वा सकारे सति षत्वविधावपिशब्दबलाद् **"ह्रस्वात्तादौ तद्धिते"** (कात० परि०-ष० २२) इति षत्वे षाट्टवर्गत्वे च रूपमिदम्। एवं पञ्चतये, पञ्चतयाः। द्वितये, द्वितयाः। त्रितये, त्रितयाः। द्वये, द्वयाः। त्रये, त्रयाः। उभय इति नित्यमुक्तमेव **"पूर्वादयश्च"** (२।१।२८) इति नवैव पूर्वादयो गणे **वृत्करणात्।** नेमशब्दस्य पूर्वादीनां च सर्वनामत्वाद् नित्यप्राप्ते अन्येषामप्राप्ते विभाषेयमुभयत उच्यते ।।११०।

**[क० च०]**

अल्पादेः। अर्धेत्यादि। अर्धेति अध्याहार्य इतिशब्देन उक्तत्वान्न विभक्तिः। अर्द्धा इति बहुवचनान्तं पदमिति **कश्चित्।** क्वचिदधिकारादपि भवन् सकारः कपवर्गयोरेव भवितुमर्हतीत्याह - अथवेति। ननु **"विसर्जनीयश्चे छे वा शम्"** (१।५।१) इत्यत्र **टीकाकृता "उमकारयोर्मध्ये"** (१।५।७) इति यावत् पदान्ताधिकार एव संभवतीति उक्तत्वात् कथमपदान्ते **"ते थे वा सम्"** (१।५।३) इत्यस्य प्राप्तिरित्याह – अन्तर्वर्तिनीमित्यादि। एवं तर्हि अन्त्यत्वाद् **"नामिकरपर०"** (२।४।४७) इत्यादिना षत्वं स्यादित्याह - अपिशब्दबलादिति ।।११०।

**[समीक्षा]**

कातन्त्रकार 'सर्वनाम' संज्ञा किए विना ही विकल्प से जस् को 'इ' आदेश करके 'अल्पे, अल्पाः' आदि शब्दरूप सिद्ध करते हैं। पाणिनि ने 'अल्प' आदि शब्दों की जस् प्रत्यय में विकल्प से सर्वनाम संज्ञा की है - "प्रथमचरमतयाल्पार्ध-कतिपयनेमाश्च" (अ० १।१।३३), तदनुसार सर्वनामसंज्ञापक्ष में **"जसः शी"** (अ० ७।१।१७) से 'शी' आदेश होकर 'अल्पे' रूप तथा विकल्प में 'अल्पाः' रूप निष्पन्न होता है।

**[रूपसिद्धि]**

१. **अल्पे, अल्पाः।** अल्प + जस्। प्रकृत सूत्र से जस् को 'इ' **"अवर्ण इवर्णे ए"** (१।२।२) से पकारोत्तरवर्ती अकार को एकार तथा परवर्ती इकार को लोप।

'इ' आदेश न होने पर **"समानः सवर्णे दीर्घीभवति परश्च लोपम्"** (१।२।१) से पकारोत्तरवर्ती अकार को दीर्घ, परवर्ती अकार का लोप एवं "रेफसोर्विसर्जनीयः" (२।३।६३) से 'स्' को विसर्गादेश होने पर 'अल्पाः' रूप साधु होता है।

२. **प्रथमे, प्रथमाः।** प्रथम + जस्। पूर्ववत् जस् को 'इ' आदेश होने पर 'प्रथमे' रूप तथा पक्ष में सवर्णदीर्घ होकर 'प्रथमाः' शब्द निष्पन्न होता है।।११०।

## १११. द्वन्द्वस्थाच्च [२।१।३२]

### [सूत्रार्थ]

द्वन्द्वसमास में सर्वनामसंज्ञक लिङ्ग=प्रातिपदिक से परवर्ती जस् प्रत्यय को 'इ' आदेश विकल्प से होता है।।१११।

### [दु० वृ०]

द्वन्द्वस्थाच्च सर्वनाम्नो लिङ्गात् परो जस् सर्व इर्भवति वा। **कतरकतमे, कतरकतमाः। दण्ड (द्वन्द्व)-कतमे, दण्ड (द्वन्द्व)-कतमाः।**।१११।

### [दु० टी०]

द्वन्द्व०। इहापि दृष्टानुवृत्तिकतया सर्वनाम्न इति। द्वन्द्वे तिष्ठतीति द्वन्द्वस्थम्, विषयलक्षणोऽयमाधारः आधेयं सर्वनामेति असर्वनामपूर्वादपि विभाषेत्याह - दण्डाश्च कतमे च दण्डकतमे, दण्डकतमा इति श्रुतत्वात् सर्वनाम्नामेव द्वन्द्व इत्यन्ये। **स्थग्रहणं प्रतिपत्तिगौरवनिरासार्थमेव।** प्रत्ययव्यवधाने तु न भवति कतरकतमकाः। प्राप्ते विभाषेयम्।।१११।

### [समीक्षा]

यहाँ भी कातन्त्रकार ने जस् को वैकल्पिक 'इ' आदेश करके 'कतरकतमे, कतरकतमाः' आदि शब्दरूप सिद्ध किए हैं, परन्तु पाणिनि इन शब्दों की वैकल्पिक सर्वनामसंज्ञा करते हैं - **"विभाषा जसि"** (अ० १।१।३२)

### [रूपसिद्धि]

१. **कतरकतमे, कतरकतमाः।** कतरकतम + जस्। प्रकृत सूत्र से जस् प्रत्यय को 'इ' आदेश, **"अवर्ण इवर्णे ए"** (१।२।२) से मकारोत्तरवर्ती अकार को एकार

एवं परवर्ती इकार का लोप। इ-आदेश के अभाव में सवर्णदीर्घ होकर 'कतरकतमाः'।

२. **दण्डकतमे, दण्डकतमाः।** दण्डकतम + जस्। पूर्ववत् इ-आदेशपक्ष में दण्डकतमे तथा उसके अभाव में सवर्णदीर्घ होने पर 'दण्डकतमाः'।।१११।

## ११२. नान्यत् सार्वनामिकम् [२।१।३३]

### [सूत्रार्थ]

द्वन्द्व समास में सर्वनामसंज्ञक लिङ्ग=प्रातिपदिक से जस् को इ आदेश–भिन्न सर्वनामसंबन्धी कार्य नहीं होते हैं ।।११२।

### [दु० वृ०]

चकारोऽनुवर्तते। द्वन्द्वस्थस्य सर्वनाम्नो लिङ्गस्योक्तम् अन्यच्च सार्वनामिकं कार्यं न भवति। पूर्वापराय, पूर्वापरात्, दक्षिणोत्तरपूर्वाणाम् ।।११२।

### [दु० टी०]

**नान्यत्०।** सर्वनाम्नि भवम्, सर्वनाम्न इदं वा **सार्वनामिकम्।** कृतादित्वाद् इकण्। अधिकृतश्चकारोऽन्यशब्देन संबध्यते इत्यर्थादुक्तमिति गम्यते, तेन स्मैप्रभृतयो न भवन्ति। जसस्तु पूर्ववचनसामर्थ्याद् विभाषैव। अन्यदिति प्रकरणान्तरगतस्यापि प्रतिषेधार्थम्, तेनाक्प्रत्ययो न भवति। यद्यक् स्यात् तन्मध्यपातित्वात् पूर्वेण विभाषा स्यात्, तर्हि तथाप्यक्प्रतिषेधो नैव द्वन्द्वस्थाच्चेति पञ्चम्यन्तत्वात्, स चार्थवशाद् विभक्तेर्विपरिणामः पञ्चम्या वाक्यार्थघटनात् परिशिष्टेषु स्मैप्रभृतिषु परत्वयोगात्, नैवम्। **"नान्यत् सार्वनामिकम्"** (२।१।३३) इति व्यक्तौ प्रवृत्तत्वात्। अन्यथा श्रुतत्वात् सर्वनामकार्यमुक्तमेव प्रतीयते इत्याह - द्वन्द्वस्थस्येति। तेनाक् प्रतिषिध्यत इति भावः। यद्येवं दक्षिणोत्तरपूर्वाणां स्त्रीणामिति **'सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः'** (जै० परि० वृ० १०३) अपि न स्यात्। नैवम्, नाम्नां समुच्चयो हि द्वन्द्वः, तद्विषयस्य प्रतिषेधादवयवस्य स्यादेव ।।११२।

### [वि० प०]

नान्यत्०। **'अर्थवशाद् विभक्तिविपरिणामः'** (कात० प० २५) इति न्यायात् पञ्चम्यन्तोऽपि द्वन्द्वस्थशब्दः षष्ठ्यन्ततया विपरिणमत इत्याह - द्वन्द्वस्थस्येति। ननु

स्मैप्रभृतिषु पञ्चम्यर्थस्य घटनात् कथं विभक्तिविपरिणामः, तदयुक्तम् । न खलु स्मैप्रभृतिकमेव सार्वनामिकं कार्यं निषेध्यं किन्त्वन्यदपि । तथाहि – **"द्वन्द्वस्थाच्च"** (२।१।३२) इति चकार इहानुवर्तते, स चान्यशब्देन संबध्यते ततश्चान्यच्चेत्युक्ते सति अर्थादनुक्तमिति गम्यते । न केवलमुक्तं न भवति । अन्यच्चेति प्रकरणान्तरविहितमपि कार्यं न भवतीत्यर्थः । तेनाक्प्रत्ययस्यापि प्रतिषेधः सिद्धः, स च पञ्चम्या न घटते । न ह्यसौ सर्वनाम्नः परो विधीयते किं तर्हि अन्त्यात् स्वरात् पूर्व इति कथं पञ्चम्या वाक्यार्थो घटते, यदि पुनरिह स्मैप्रभृतिकमेव सार्वनामिकं कार्यं निषेध्यं स्यात् तदा किमन्यत् सार्वनामिकमित्यनेनेत्येवं ब्रूयात् । श्रुतत्वात् सार्वनामिकं कार्यमुक्तमेव गम्यते । तस्माद् व्याप्त्यर्थमेवैतत्, यावत् सार्वनामिकं कार्यं तावन्न भवतीत्यर्थः ।

ननु चाकि प्रतिषिद्धे कप्रत्ययेन भवितव्यम् । तत्कोऽत्र विशेषः, सत्यम्, कप्रत्ययेन व्यवधानात् । कतरकतमका इति द्वन्द्वस्थाच्चेति वा न स्यात्, अकि पुनः प्रकृत्यन्तःपातिनि कुत एतदिति । यद्येवम् - दक्षिणा च उत्तरा च पूर्वा चेति दक्षिणोत्तरपूर्वाणां स्त्रीणामिति सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः उच्यमानो न स्यात्, अस्यापि सार्वनामिककार्यत्वाद् इत्ययुक्तम्, नाम्नां समुच्चयो हि द्वन्द्वस्तद्विषये कार्यं निषिध्यमानं कथमवयवस्य निषिध्यते । सिद्धान्तः पुनरस्य सामान्येन द्वन्द्वे कृते प्रकरणबलात् स्त्रीत्वस्य विवक्षा पश्चादिति पुंवद्भावो न संभवत्येव । सार्वनामिकमिति सर्वनाम्न इदं वा कार्यमिति **"क्रीतादित्वादिकण्"**(२।६।८)॥११२ ।

**[ क० च० ]**

**नान्यत्०।** ननु पूर्वसूत्रे चकारो वानुकर्षणार्थ इत्युक्तमेव नेहार्थः, तत् कथम् अन्यशब्देन संबन्धादनुक्तागमादिकं निषिध्यते । यावताऽन्यशब्देनैवाकादिनिषेधे सिद्धिरिति, अन्यशब्दस्य सापेक्षत्वादिति चेत्, न । जस्कार्यमपेक्ष्यैव ----चरितार्थत्वादित्याह - यदि पुनरित्यादि । तर्हि **वृत्तौ** चकारोऽनुवर्तते इति कथमुक्तम्, सत्यम् । अन्यशब्दस्यापरिप्राप्तार्थस्य द्योतनायैव चकारसंबन्धः क्रियते इति । ननु अन्यत् सार्वनामिकग्रहणयोरेकतरग्रहणेनैव व्याप्तिर्लभ्यते, किम् उभयग्रहणेनेति ? सत्यम्, **सुखार्थमिति उमापतिः।** तन्न, नेति कृते जस्कार्यस्यैव निषेधः स्यात् ततश्च स्मैप्रभृतिककार्यनिषेधार्थमवश्यमेवान्यदग्रहणं देयम्, ततो व्याप्त्यर्थं सार्वनामिकग्रहणं च कार्यं **न सुखार्थमिति वयम्।** तन्न, अन्यशब्देन स्मैप्रभृतिकार्यमपेक्ष्य सर्वनामसकाशाद् यदन्यत् सर्वनाम्नो हेतुप्रयोगे सर्वा विभक्तयः स्युरित्यादि कार्यम्, तदेवोच्यते । न त्वक्प्रत्ययादिकमिति तस्य सर्वनामसकाशाद् विधीयमानत्वात् । ततश्च सार्वनामिक-

ग्रहणबलादतिशयव्याप्त्या विभक्तिविपरिणामः क्रियते, तस्मादुभयग्रहणं कर्तव्यमेव। ननु यावत् सार्वनामिकनिषेधे द्वन्द्वस्थः शब्दः पञ्चम्यन्तोऽपि षष्ठ्यन्तः कृतः, तथाऽवयवाश्रितनिषेधार्थमपि सिद्धान्तो घटत इत्याह - सिद्धान्तः पुनरित्यादि। यद् वा यदि समुदायाश्रितकार्यं निषिध्यते नावयवाश्रितं तदा कतरकतमका इत्यत्र कतरशब्दादक् स्यादित्याह – **सिद्धान्तः** पुनरित्यादि ॥११२।

**[ समीक्षा ]**

'पूर्वापर + ङे' में ङे को स्मै, 'पूर्वापर + ङसि' में ङसि को 'स्मात्' तथा 'दक्षिणोत्तरपूर्व + आम्' में सु - आगम प्राप्त होता है, परन्तु प्रकृत सूत्र के निर्देशानुसार सार्वनामिक कार्यों का निषेध हो जाने से 'स्मै' आदि आदेश उपपन्न नहीं होते हैं।

पाणिनि सार्वनामिक कार्यों का निषेध न करके द्वन्द्व समास में सर्वनामसंज्ञा का ही निषेध करते हैं – "द्वन्द्वे च" (अ० १।१।३१)। इससे सार्वनामिक कार्यों की प्राप्ति ही नहीं होती है।

**[ रूपसिद्धि ]**

१. **पूर्वापराय।** पूर्वापर + ङे। प्रकृत सूत्र के निर्देशानुसार सार्वनामिक कार्यों का निषेध होने के कारण **"स्मै सर्वनाम्नः"** (२।१।२५) से ङे को 'स्मै' आदेश न होने पर **"ङेर्यः"** (२।१।२४) से ङे को 'य' आदेश तथा **"अकारो दीर्घं घोषवति"** (२।१।१४) से दीर्घ होकर 'पूर्वापराय' रूप निष्पन्न होता है।

२. **पूर्वापरात्।** पूर्वापर + ङसि। 'स्मात्' आदेश के अभाव में **"ङसिरात्"** (२।१।२१) से ङसि को 'आत्' आदेश, **"समानः सवर्णे दीर्घीभवति परश्च लोपम्"** (१।२।१) से सवर्णदीर्घ तथा परवर्ती आकार का लोप।

३. **दक्षिणोत्तरपूर्वाणाम्।** दक्षिणोत्तरपूर्व + आम्। **"सुरामि सर्वतः"** (२।१।२९) से 'सु' आगम के अभाव में **"आमि च नुः"** (२।१।७२) से 'नु' आगम, "घुटि चासंबुद्धौ" (२।२।१७) से दीर्घ तथा नकार को णकारादेश ॥११२।

## ११३. तृतीयासमासे च [ २।१।३४ ]

**[ सूत्रार्थ ]**

तृतीयासमास होने पर तथा उसके अभाव में भी सार्वनामिक कार्य नहीं होता है ॥११३।

[दु० वृ०]

तृतीयायाः समासे असमासे चोक्तमन्यच्च सार्वनामिकं कार्यं न भवति । मासेन पूर्वाय, मासपूर्वाय । मासेनावराः, मासावराः । श्रुतत्वात् सर्वनाम्नैव समासे इह स्याद् अक्- त्वयका कृतम्, मयका कृतम् ॥११३।

[दु० टी०]

**तृतीया०** । तृतीयायाः समासस्तृतीयासमासः परपदार्थप्रधानस्तत्पुरुषः । प्रधानं समासमपेक्ष्य चकारोऽनुक्तमपि तद् योग्यं वाक्यं समुच्चिनोति । किं च यदि समुदायमपेक्ष्य स्यात् तदा द्वन्द्वादिषु अनर्थकः प्रतिषेध इत्याह - मासेन पूर्वायेति । एवं मासेनावराः **मासावराः** इति **"जस् सर्व इः"** (२।१।३०) न भवति । पूर्वीभावे मासः करणं कर्ता वा करोतौ मासेन पूर्वः कृतः इति गम्यमानत्वात् । मासेन पूर्वस्य हेतोः मासपूर्वहेतोः **"षष्ठ्येव हेतुप्रयोगे"** (२।४।३७) । श्रुतत्वादित्यादि वाक्ये प्रत्युदाहृतेऽपि समासोऽपि प्रत्युदाहृत एव । 'त्वकत्कृतम्' इति पूर्वपराभ्यामेव समासाभिधानं नान्यैः सर्वनामभिः । **केचिद्** अत्र समासयोग्यत्वाद् वाक्यमपि समास इत्युपचर्य्य बहुव्रीहौ चेत्यत्रानर्थकं चकारं पठन्ति । ननु तृतीयार्थयोग इति कथं न विदध्यात्, नैवम् । तदा **पूर्वस्मै मासेन** इत्यत्र प्रतिषेधो भवितुमर्हति, समासग्रहणे हि समासमपेक्ष्य तद् योग्यं वाक्यं प्रतिपत्तव्यम् । नैवम्, तृतीयार्थेन हि योगः समासार्थे वाक्ये समासे च संभवति नान्यत्रेति **प्रतिपत्तिरियं गरीयसीति** ॥११३।

[वि० प०]

**तृतीया०** । चकाराद् विभक्त्यन्तरसमासेऽपि कथं न भवतीति नाशङ्कनीयम् । तृतीयायाः समासस्तृतीयासमासः । इहोत्तरपदप्रधानत्वात् तत्पुरुषस्य, प्रधानेन समासेन संबध्यमानश्चकारोऽनुक्तमप्यसमासमेव समुच्चिनोतीत्याह - तृतीयायाः समासे असमासे चेति, असमासेऽपि तृतीयाया एवेत्यर्थः । तेन सन्निधानात् तृतीयासमासयोग्य एव वाक्येऽपि प्रतिषेध इति । किं च यदि चकारः समासान्तरमपि समुच्चिनुयात् तदा द्वन्द्वादिषु प्रतिषेधान्तरमनर्थकमनेनैव सिद्धत्वादित्याह – मासेन पूर्वायेति । इह पुनः स्मैर्भवत्येव पूर्वस्मै मासेनेति तृतीयासमासयोग्यत्वाभावात् ।

श्रुतत्वादित्यादि तत्र बहुलत्वाद् विभक्तेश्च पूर्व इष्यते इति विभक्तेश्च पूर्वमक्प्रत्ययः, स च विभक्तिग्रहणेन गृह्यते अन्तलोपे सतोत्वमस्थानिनीत्येत्वम् । वाक्ये प्रत्युदाहृते समासेऽपि प्रत्युदाहर्तव्य एव त्वकत्कृतम्, मकत्कृतमिति ।।११३ ।

[ क० च० ]

**तृतीया०** । यदि समासशब्देनैव सह संबध्यते चकारस्तदा तृतीयायाः समासे इत्येवं विदध्यादित्याह - किञ्चेति । ननु कार्यं प्रत्युत्तरपदार्थप्रधानस्तत्पुरुषः, संबन्धस्तु पदस्य पदेनैवेति विदध्यादित्याह - किं चेति **कुलचन्द्रः** । पूर्वस्मै मासेनेति । ननु कथमिदमुक्तं प्रत्युदाहरणम्, द्व्यङ्गविकलत्वात् । तथाहि यथा तृतीयासमासयोग्यता-भावस्तथोत्तरपदसर्वनामत्वाभावश्च । अत एव **वृत्तिकृतोक्तम्** – श्रुतत्वात् सर्वनाम्नैव समास इति ? सत्यम् । यत्र तृतीयासमासोऽङ्गीक्रियते, तत्रैव परपदनियमः । यदि पुनस्तृतीयासमासयोग्यता नास्ति तदा परपदनियमोऽपि नास्ति । **वस्तुतस्तु** 'पूर्वस्मै, पूर्वेण' इत्यादिकमेव प्रत्युदाहरणं बोध्यम् ।।११३।

[ समीक्षा ]

'मासपूर्व + ङे' इस स्थिति में कातन्त्रकार सार्वनामिक कार्य= ङे को स्मै आदेश का निषेध करते हैं, परन्तु पाणिनि के निर्देशानुसार यहाँ सर्वनामसंज्ञा का ही निषेध होता है - "**तृतीयासमासे**" (१।१।३०)।

[ रूपसिद्धि ]

१. **मासेन पूर्वाय, मासपूर्वाय** । मासेन पूर्व + ङे, मासपूर्व + ङे । प्रकृत सूत्र के निर्देशानुसार यहाँ 'ङे' को "**स्मै सर्वनाम्नः**" (२।१।२५) से 'स्मै' आदेश न होने पर "**ङेर्यः**" (२।१।२४) से 'ङे' को 'य' आदेश तथा "**अकारो दीर्घं घोषवति**" (२।१।१४) से दीर्घ आदेश ।

२. **मासेनावराः, मासावराः** । मासेन अवर + जस्, मासावर + जस् । जस् को 'इ' आदेश के अभाव में "**समानः सवर्णे दीर्घीभवति परश्च लोपम्**" (१।२।१) से सवर्णदीर्घ तथा परवर्ती अकारलोप - स् को विसर्गादेश ।।११३।

## ११४. बहुव्रीहौ [२।१।३५]

### [सूत्रार्थ]

बहुव्रीहि समास में सर्वनामकृत कार्य नहीं होता है ॥११४।

### [दु० वृ०]

बहुव्रीहौ समासे सार्वनामिकं कार्यं न भवति । **त्वत्कपितृकः, मत्कपितृकः ।** अक् न स्यात् । **वस्त्रान्तरवसनान्तराः** । अप्रधानादेव द्वन्द्वस्थाच्चेति वा न स्यात् ॥११४।

### [दु० टी०]

**बहु० ।** त्वं पिता अस्य, अहं पिता अस्य इति **'त्वत्पितृको मत्पितृकः'** इत्यकि प्रतिषिद्धे कः स्यात्, अन्यथा **'त्वकत्पितृको मकत्पितृकः'** इति प्रसज्येत । अन्तरङ्गोऽप्यक् वचनात् प्रतिषिध्यते । बहिरङ्गस्य सार्वनामिकस्य कार्यस्योपसर्जनत्वादेव प्रतिषेध इति । तथाऽवयवभूतेऽपि बहुव्रीहौ वस्त्रमन्तरं येषाम्, वसनं वासोऽन्तरं येषामिति **वस्त्रान्तरेत्यादि ।** कथमाढ्यो भूतपूर्वः **आढ्यपूर्वः, आढ्यपूर्वाय देहीति** । पूर्वादीनां व्यवस्थायामिति न भवति ॥११४।

### [वि० प०]

**बहु० । 'त्वत्कपितृको मत्कपितृकः'** इति । त्वं पिता अस्य, अहं पिता अस्येति विग्रहः । अन्तरङ्गेऽप्यकि वचनात् प्रतिषिद्धे कप्रत्ययः स्यादेव । अन्ते च **'नद्याद्यन्ताद् बहुव्रीहौ'** इति वचनात् कप्रत्ययः । **'वस्त्रान्तरवसनान्तराः'** इति वस्त्रमन्तरं येषां ते **वस्त्रान्तराः,** वसनं वासोऽन्तरं येषां ते **वसनान्तरा** इत्यत्र जस इकाराभावं प्रति बहुव्रीहाविति वचनं न प्रयोजयति, उपसर्जनत्वादेव प्रतिषेधः सिद्धः । तथा वस्त्रान्तराश्च वसनान्तराश्चेति विग्रहे **"द्वन्द्वस्थाच्च"** (२।१।३२) इति न वर्तते इत्याह – वस्त्रान्तरेत्यादि । अप्रधानत्वादेवेति न भवति बहुव्रीहावन्तरशब्दस्योपसर्जनीभूतत्वादित्यर्थः ॥११४।

### [क० च०]

**बहु० ।** उक्तमिति **वृत्तौ** कथमुक्तम्, उपसर्जनत्वादेव **'अतिसर्वाय'** इत्यादौ निषेधसिद्धेः अको निषेधार्थमन्यद्ग्रहणस्यैव विवरणं क्रियताम् ? सत्यम् । अक्प्रतिषेधार्थं क्रियमाणमेतद् वचनं स्मैप्रभृतिकमपि विषयीकरोतीति **प्राञ्चः ।** पराभिप्रायेणोक्तमिति

**कुलचन्द्रः। आधुनिकास्तु** न पठन्त्येव। ननु यथा अक उपसर्जनत्वात् **'प्रियसर्वाय'** इत्यादौ सार्वनामिकं कार्यं न भवति। तथा 'त्वत्कपितृकः' इत्यत्रापि किमनेनेत्याह - अन्तरङ्गेऽपीति। ननु कथम् अस्यान्तरङ्गत्वं चेदुच्यते समासमपेक्ष्य वाक्यस्य पूर्वोपस्थितत्वेनान्तरङ्गात् तद्दशायां भवतोऽक्प्रत्ययस्यान्तरङ्गत्वमुच्यते। ननु वाक्यदशायां जातस्याक्प्रत्ययस्य कथं समासे निषेधः कर्तुं शक्यते ? सत्यम्। बहुव्रीहाविति विषयसप्तमी, ततो वाक्यदशायां बहुव्रीहेर्विषयत्वाद् वचनमिदं सार्थकमिति।

यद् वा नात्र सूत्रे भवतीत्यादिक्रियाध्याहार्या, किन्तु तिष्ठतीति क्रिया। एवं सति वाक्यावस्थायां जातोऽक्प्रत्ययः समासे सत्यनेन दूरीक्रियते। **शरणदेव**स्त्वाह - यद् वा बहुव्रीहिशब्दोऽयमुपचाराद् बहुव्रीहियोग्यवाक्ये वर्तते इत्याह - वचनबलादिति। ननु तथापि सूत्रमिदं निरर्थकम्, यावता वाक्यदशायां सर्वनामत्वमाश्रित्य कृतस्यापि अक्प्रत्ययस्य समासे सति सर्वनाम्नां गौणत्वोत्पत्तौ सत्यां निमित्तस्य सर्वनाम्नोऽनैमित्तिकस्याप्यभावो भविष्यतीति ? सत्यम्। वचनमिदं नैमित्तिकपरिभाषाया अनित्यत्वज्ञापनार्थम्। तेन 'कर्मणि' इत्यत्र णत्वे कृते नान्तत्वाभावेऽपि दीर्घो न निवर्तते। अत एव निमित्ताभावविषये **'असिद्धं बहिरङ्गम्'** (कात० प० ३३) इत्यस्यापि क्वचिद् विषय इति। अत्रान्तरङ्गो दीर्घभावो बहिरङ्गो णत्वविधिः। तथा 'गोमान् भविष्यति' इत्यत्र भविष्यद्योगेऽपि वन्तुर्न निवर्तते, तथा **'अस्यापत्यम् इः'** इत्यत्र प्रकृतेरपाये सति इ-प्रत्ययस्य न निवृत्तिः। वस्त्रान्तरवसनान्तराः इति **वृत्तिः।** ननु कथमत्र द्वन्द्व एकार्थत्वात्, नहि भवति घटकलशाविति ? सत्यम्। वसनशब्दश्चात्र वसन्त्यस्मिन्निति व्युत्पत्त्या गृहवृत्तिः, न तु वस्त्रवृत्तिः। यत्तु वसनं **वासः** इत्युक्तं **पञ्ज्याम्,** तदपि गृहवचनमेव ॥११४।

**[समीक्षा]**

'मत् + पितृकः, त्वत् + पितृकः' इस स्थिति में का॰ न्त्रकार सार्वनामिक कार्य=अक् प्रत्यय का निषेध करते हैं। पाणिनि के अनुसार सर्वनामसंज्ञा का ही निषेध होता है - **"न बहुव्रीहौ"** (अ० १।१।२९)।

**[रूपसिद्धि]**

१. **त्वत्कपितृकः।** 'युष्मद् + सि + पितृ + सि'। त्वं पिता अस्य। बहुव्रीहिसमास, **"तत्स्था लोप्या विभक्तयः"** (२।५।२) से विभक्तिलोप, **"त्वन्मदोः"** (२।३।३) से

'त्व' आदेश, **"अव्ययसर्वनाम्नः"** (२।२।६४) से प्राप्त 'अक्' प्रत्यय का **"बहुव्रीहौ"** (२।१।३५) से निषेध, "कप्रत्ययश्च बहुलम्" से क-प्रत्यय, **"अघोषे प्रथमः"** (२।३।६१) से द् को त्, **"नद्यृदन्ताद् बहुव्रीहौ, शेषाद् वा कः"** से 'क' प्रत्यय, लिङ्गसंज्ञा, प्रथमाविभक्ति–एकवचन में 'सि' प्रत्यय तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से स् को विसर्गादेश।

२. **मत्कपितृकः।** अस्मद् + सि + पितृ + सि। अहं पिता अस्य। बहुव्रीहिसमास, विभक्तिलोप, म-आदेश, अक्प्रत्यय का निषेध हो जाने पर क-प्रत्यय, द् को त्-आदेश, 'मत्कपितृ' शब्द से क-प्रत्यय, लिङ्गसंज्ञा, प्रथमा– एकवचन में 'सि' प्रत्यय तथा स् को विसर्गादेश।

३. **वस्त्रान्तरवसनान्तराः।** वस्त्रान्तरवसनान्तर + जस्। वस्त्रम् अन्तरं येषां ते वस्त्रान्तराः, वसनम् अन्तरं येषां ते वसनान्तराः, वस्त्रान्तराश्च वसनान्तराश्च। बहुव्रीहिसमासघटित 'अन्तर' शब्द के अप्रधान (गौण) होने से यहाँ **"द्वन्द्वस्थाच्च"** (२।१।३२) सूत्रद्वारा 'जस्' के स्थान में वैकल्पिक 'इ' आदेश नहीं होता है। **"समानः सवर्णे दीर्घीभवति परश्च लोपम्"** (१।२।१) से सवर्णदीर्घ, परवर्ती अकार का लोप तथा स् को विसर्गादेश ॥११४।

## ११५. दिशां वा [२।१।३६]

### [सूत्रार्थ]

दिग्वाची शब्दों का बहुव्रीहिसमास होने पर सर्वनामसंज्ञाप्रयुक्त कार्य विकल्प से होता है ॥११५।

### [दु० वृ०]

दिशां बहुव्रीहौ समासे सार्वनामिकं कार्यं भवति वा। उत्तरपूर्वस्यै, उत्तरपूर्वायै। दिशां बहुव्रीहाविति किम् ? दक्षिणपूर्वायै मुग्धायै ॥११५।

### [दु० टी०]

**दिशाम्०।** दिशां बहुव्रीहावित्यादि। उत्तरस्याश्च पूर्वस्याश्च दिशोर्यदन्तरालम् इति विग्रहः। **विदिशोऽपि दिश उच्यन्ते, उपचारात्।** वाच्यवाचकलक्षणसम्बन्धे

षष्ठीयम्। यैन बहुव्रीहिणा दिश उच्यन्ते स दिशां बहुव्रीहिरित्यर्थः। दक्षिणैव पूर्वा यस्या मुग्धाया इति विग्रहः। अथवा **'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्'** (कात० प० पा० ७५) इति। कः प्रतिपदोक्तः, योऽर्थायातैर्दिग्वाचकैः समासः **"विदिक् तथा"** (२।५।१०) इति। "बहुव्रीहौ" (२।१।३५) इति किं समास एव वर्तिष्यते इति, तर्हि द्वन्द्वेऽपि विभाषा स्यात् 'दक्षिणोत्तरपूर्वाणाम्'। नैवम्, प्रतिपदोक्तस्यैव ग्रहणात्। सत्यम्। बहुव्रीहिरेवानुवर्त्यतां सुखप्रतिपत्त्यर्थम्, किमेकविभक्तियुक्त-समासानुवर्तनेनेति।

ननु दक्षिणावयवत्वाद् दक्षिणा, पूर्वावयवत्वाच्च पूर्वा। दक्षिणा चासौ पूर्वा चेति कर्मधारये 'दक्षिणपूर्वस्यै' इति भविष्यति। अन्यपदार्थे तूपसर्जनत्वात् सर्वनामत्वं नास्ति 'दक्षिणपूर्वायै' किमनेन, **"विदिक् तथा"** (२।५।१०) इत्यनेन च? सत्यम्। **प्रतिपत्तिगौरवनिरासार्थमेव** अप्राप्ते विभाषेयमुच्यते।।११५।

## [वि० प०]

**दिशाम्०।** उत्तरपूर्वस्या इति। उत्तरस्याश्च पूर्वस्याश्च दिशोर्यदन्तरालमिति विग्रहः। इहान्तरालं दिगुच्यते। **विदिशोऽपि दिश उच्यन्ते, उपचारात्।** 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः' (जै० प० वृ० १०३) इति पूर्वपदस्य पुंवद्भावः। **"सर्वनाम्नस्तु ससवो ह्रस्वपूर्वाश्च"** (२।१।४३) इति पक्षे सार्वनामिकं कार्यमिह न भवति। दक्षिणपूर्वाया इति। दक्षिणैव पूर्वा यस्या मुग्धायाः। सञ्जातदिङ्मोहा स्त्री कथ्यते न दिगिति। दिशामिति वाच्यवाचकलक्षणसंबन्धे षष्ठी। येन बहुव्रीहिणा दिश उच्यन्ते, स दिशां बहुव्रीहिः, न तु दिग्वाचकानां शब्दानां यो बहुव्रीहिरिति। अथवा 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव बहुव्रीहेर्ग्रहणम्' इति, न तु लाक्षणिकस्येति। कः पुनः प्रतिपदोक्त-बहुव्रीहिरिति चेत्, योऽर्थायातैर्दिग्वाचकैः शब्दैः समासे सति 'विदिक् तथा" (२।५।१०) इत्यनेन विहितः। तथा च प्रतिपदोक्तबहुव्रीह्यर्थं तदिति वक्ष्यति। अयं तु **"स्यातां यदि पदे द्वे तु"** (२।५।९) इत्यादिनैव बहुव्रीहिः।। ११५।

## [क० च०]

**दिशाम्०।** उत्तरपूर्वस्या इति। नन्वन्तरालपदस्यान्तरङ्गस्य नपुंसकत्वात् कथं समासस्य स्त्रीत्ववृत्तिरित्याह – इहेत्यादि। ननु दिशां बहुव्रीहौ विधीयमानं कार्यं कथं

विदिक्संबन्धिबहुव्रीहौ स्यादित्याह - विदिश इत्यादि। ननु दिशामिति वाच्य-वाचकलक्षणसंबन्धे षष्ठीति कथं निश्चितम्, दिग्वाचकानां शब्दानां संबन्धिनि बहुव्रीहौ कथं न स्यादित्याह - अथवेति। ननु सूत्रमिदं किमर्थम्, दक्षिणावयवत्वाद् दक्षिणा, पूर्वावयवत्वाच्च पूर्वा। दक्षिणा चासौ पूर्वा चेति कर्मधारये विदिगभिधेयायां 'दक्षिणपूर्वस्यै' इति पदं सिध्यति। दक्षिणस्याश्च पूर्वस्याश्च दिशोर्यदन्तरालं सा दक्षिणपूर्वा दिग् इत्यस्योपसर्जनत्वात् 'दक्षिणपूर्वायै' इति सिध्यति। एवं सति प्रतिपदोक्तबहुव्रीहिग्रहणार्थं क्रियमाणं **"विदिक् तथा"** (२।५।१०) इति सूत्रमपि न कृतं स्यात्? सत्यम्। **प्रतिपदोक्तिर्गरीयसीति दुर्गस्याशयः।**

**तत्रोमापतिस्**तमाक्षिपति –

**विदिक्ष्वर्थेषु पूर्वादिः समासोऽत्र विधीयते।**
**विना वाक्यविशेषेण विशेष्यावीदृशौ कुतः?॥**
**दक्षिणस्याश्च पूर्वस्या दिशोरथ उपर्यपि।**
**उदीच्याश्च प्रतीच्याश्च मध्यमत्राप्यसौ भवेत्॥**
**कथं चाभ्यां विशेषाभ्यां वर्तते कर्मधारयः।**
**कृते चास्मिन् बहुव्रीहौ दिशां वेत्यपि सुस्थितम्॥**

**अस्यायमर्थः –** विदिग्रूपेष्वर्थेषु पूर्वादिः शब्दस्यात्र बहुव्रीहिप्रकरणे समासोऽभि-धीयते, तस्माद् "विदिक् तथा" (२।५।१०) इति सूत्रं विना ईदृशौ वक्ष्यमाणौ विशेषौ कुतः प्रतीयेते? विशेषद्वयमेवाह – दक्षिणस्याश्चेति। दक्षिणस्याश्च पूर्वस्याश्च दिशोरध उपरि वा या दिग् इत्यर्थे बहुव्रीहिः स्याद् इत्येको विशेषः। अन्यश्च - उदीच्याश्च प्रतीच्याश्च दिशोर्मध्ये या दिग् इत्यर्थेऽपि बहुव्रीहिः स्यात्। कथं चाभ्यामुक्ताभ्याम् उभाभ्यां कर्मधारयः। यदि कर्मधारय एव क्रियते, न **"विदिक् तथा"** (२।५।१०) इत्यनेन बहुव्रीहिस्तदा कथमेतद् विशेषद्वयं लभ्यत इत्यर्थः। सूत्रे कृते हि तथा-ग्रहणस्य प्रसिद्धप्रयोगमादायैव प्रवृत्तत्वाद् विदिशि अभिधेयायां पूर्वादिगणपठितस्यैव वाधिकरणबहुव्रीहिर्विशिष्यते इति **तात्पर्यार्थः।** तस्मादेतद् विशेषद्वयार्थमवश्यं **"विदिक् तथा"** (२।५।१०) इति सूत्रं कर्तव्यम्। तस्मिंश्च सति **"दिशां वा"** (२।१।३६) इत्यपि कर्तव्यमिति।

**तदसदिति महान्तः।** दक्षिणस्याश्च पूर्वस्याश्च दिशोरध उपरि वा या दिग् इत्यर्थे बहुव्रीहिप्रसङ्गो नास्त्येव, भिन्नाधिकरणानां लक्षणवशादेव बहुव्रीहेरभ्युपगमात् । अन्यथा सूत्रस्थितावपि उक्तविशेषद्वयस्य **"स्यातां यदि"** (२।५।९) इत्यादिसूत्रेण बहुव्रीहिः केन निवार्यते ? तथाग्रहणेन निवार्यते इति चेत्, तथाग्रहणशक्त्या वारणेऽपि लक्षणानुसारस्याभ्युपगमादिति संक्षेप इति ध्येयमन्यत् **सुधीभिः। "दिशां वा"** (२।१।३६) इति वाशब्दस्यान्तरस्थीयत्वान्न वर्गान्तत्वम् । तथाहि **"क्रियाभावो धातुः"** (३।१।९) इत्यत्र **टीकायां 'वा गतिगन्धनयोः'** (२।१७) इत्यनेन वितर्कणाद् वाशब्दस्यान्तस्थात्वं निश्चितं **"ह्वावामश्च"** (४।३।२) इत्यत्र वेञ्धातुना सह वितर्कणाद् वेञ्धातुरप्यन्तस्थात्वं सम्प्रसारणविषयत्वान्निश्चितम् । एतदेव **मेदिनीकारोऽपि**– अन्तस्थीयवकारान्तवर्गे **'वा स्याद् विकल्पोपमयोरेवार्थे च समुच्चये'** (१८५।७४-७५) इत्युक्तवान् ॥११५।

**[समीक्षा]**

'उत्तरपूर्वा + ङे' इस अवस्था में कातन्त्रकार के अनुसार सार्वनामिक कार्य का तथा पाणिनि के अनुसार सर्वनामसंज्ञा का वैकल्पिक निषेध होता है – **"विभाषा दिक्समासे बहुव्रीहौ"** (अ० १।१।२८)।

व्याख्याकारों ने कहा है कि इस सूत्र को बनाने की कोई आवश्यकता नहीं है, क्योंकि इसके अभाव में भी बहुव्रीहिसमास होने पर दिग्वाचक शब्द के पश्चात् सर्वनामप्रयुक्त कार्य नहीं होगा– **"बहुव्रीहौ"** (२।१।३५)। इसका समाधान इस प्रकार है – 'दक्षिणपूर्वायै मुग्धायै' इस प्रयोग में सर्वनामप्रयुक्त कार्य होने लगेगा, क्योंकि यहाँ विशेष्य पद है – मुग्धायै । दिग्भ्रम हो जाने वाली स्त्री को मुग्धा कहते हैं । 'दक्षिणपूर्वा' इस विशेषण का अर्थ है दक्षिण दिशा को ही जो पूर्वदिशा समझने लग जाए– दक्षिणा एव पूर्वा यस्याः सा, तस्यै । इस विशेषण में दक्षिणा और पूर्वा शब्द दिग्वाचक होने पर भी समास में दिग्वाचक नहीं रह जाते । अतः यहाँ इनके अप्रधान (गौण) हो जाने पर सार्वनामिक कार्य का निषेध ही होना चाहिए । **"दिशां वा"** (२।१।३६) सूत्र के अभाव में यहाँ भी सर्वनामप्रयुक्त कार्य प्रवृत्त होगा । सूत्र बनाए जाने पर 'दिशाम्' पद में वाच्यवाचकसंबन्ध - प्रयुक्त षष्ठी होने के कारण 'दक्षिणपूर्वायै मुग्धायै' में सर्वनाम प्रयुक्त कार्य नहीं होता है ।

**[रूपसिद्धि]**

१. **उत्तरपूर्वस्यै, उत्तरपूर्वायै।** उत्तरपूर्वा + ङे। उत्तरस्याश्च पूर्वस्याश्च दिशोर्यदन्तरालं सा उत्तरपूर्वा, तस्यै। **"सर्वनाम्नस्तु ससवो ह्रस्वपूर्वाश्च"** (२।१।४३) से ह्रस्व, सु का आगम तथा **"ङवन्ति यै - यास् - यास् - याम्"** (२।१।४२) से 'ङे' को 'यै' आदेश ॥११५।

## ११६. श्रद्धायाः सिर्लोपम् [२।१।३७]

**[सूत्रार्थ]**

श्रद्धासंज्ञक से परवर्ती 'सि' प्रत्यय का लोप होता है ॥११६।

**[दु० वृ०]**

श्रद्धासंज्ञकात् परः सिर्लोपमापद्यते। श्रद्धा, माला। श्रद्धाया इति किम्? कीलालपाः। सिरदिति कृते जरा जरस् स्यात् ॥११६।

**[दु० टी०]**

**श्रद्धायाः।** आकारः स्त्र्याख्यः श्रद्धासंज्ञक इति वचनात् कुतः सर्वनामानुवर्तनचिन्तेति। अथ सर्वनामाश्रित्योत्पद्यते या सा सर्वनामश्रद्धेति, तथापि **"साऽस्य देवता"** (२।६।७) इति ज्ञापकात्। सिरदित्यादि। ननु श्रद्धामाश्रित्य खल्वदादेश उत्पद्यते, तां च श्रद्धां विहन्तुं कथं निमित्तं भवतीति तस्माद् दीर्घात् परलोप एव। आदेशविधानं तु सेरभावार्थम्? सत्यम्, **प्रतिपत्तिगौरवनिरासार्थमेव** लोपग्रहणम्। सम्बुद्धेः सेर्लोपं वक्ष्यति। असंबुद्ध्यर्थं वचनमिदम् इति ॥११६।

**[वि० प०]**

**श्रद्धायाः।** सिरदित्यादि। ननु सन्निपातलक्षणत्वादेव जरसादेशो न भविष्यतीति अदादेशो हि श्रद्धामाश्रित्य भवन् कथं तद्विघाताय निमित्तं संभवति? सत्यम्। प्रक्रियागौरवनिरासार्थमेव लोपग्रहणम् ॥११६।

**[क० च०]**

**श्रद्धा०।** सन्निपात इत्यादि **'वर्णग्रहणे निमित्तत्वात्'** (कात० प० ३२) इति परिभाषा अनित्या इति **"भिसैस् वा"** (२।१।१८) इत्यत्रोक्तमिति **कश्चित्।** लुगिति कृते सिध्यति किं गुरुकरणेनेति चेत्, न। **'पर्यायशब्दानां गुरुलाघवचिन्ता नास्ति'** (सीर० प० १२२) इति ॥११६।

**[समीक्षा]**

'श्रद्धा + सि, माला + सि' इस अवस्था में कातन्त्रकार श्रद्धासंज्ञक शब्दों से 'सि' प्रत्यय का लोप करके 'श्रद्धा, माला' आदि शब्दरूपों की सिद्धि करते हैं। जबकि पाणिनि विना ही श्रद्धा संज्ञा किए आबन्तशब्दों से सुप्रत्यय का लोप करते हैं – "**हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्**" (अ० ६।१।६८)।

व्याख्याकारों के अनुसार संज्ञापूर्वक निर्देश यतः सुखार्थ माना जाता है, अतः कातन्त्रकार द्वारा आकारान्त शब्दों की श्रद्धासंज्ञा करके उससे किया गया सि-लोप का निर्देश अधिक सुखकर सिद्ध होता है।

"श्रद्धायाः सिरत्" इस प्रकार सूत्रपाठ किए जाने पर 'जरा' शब्द को जरस् आदेश प्रवृत्त होगा, अतः तथाविध सूत्रपाठ नहीं किया गया है।

**[रूपसिद्धि]**

१. **श्रद्धा**। श्रद्धा + सि। "**आ श्रद्धा**" (२।१।१०) से श्रद्धासंज्ञा तथा उससे परवर्ती 'सि' प्रत्यय का प्रकृत सूत्रद्वारा लोप।

२. **माला**। माला + सि। पूर्ववत् श्रद्धासंज्ञा तथा 'सि' का लोप ॥ ११६।

## ११७. टौसोरे [२।१।३८]

**[सूत्रार्थ]**

तृतीयाविभक्ति – एकवचन 'टा' प्रत्यय तथा षष्ठी-सप्तमीद्विवचन 'ओस्' प्रत्यय के परवर्ती होने पर श्रद्धासंज्ञक आकार को एकारादेश होता है ॥११७।

**[दु० वृ०]**

टौसोः परयोः श्रद्धाया एत्वं भवति। **तुलया, तुलयोः** ॥११७।

**[दु० टी०]**

**टौसोः**। ननु श्रद्धाया इति कथमिह षष्ठ्यन्ततया न विपरिणमते श्रद्धायाः परयोष्टौसोः स्थाने एत्वं भवतीत्यर्थस्यापि घटनादित्याह – तुलयेति। अन्यथा "**तुलया संमिते**" (२।६।९) इति निर्देशो नोपपद्यते इति ॥११७।

**[वि० प०]**

**टौसोः**। टौसोरिति सप्तमीद्विवचनम्। अतः '**सप्तम्या निर्दिष्टे पूर्वस्य**' (कात० प० २१) इति न्यायात् श्रद्धाया इति पञ्चम्यन्तमपि षष्ठ्यन्ततया विपरिणमते

इति । कथमेतद् यावता श्रद्धायाः परयोष्टौसोः स्थाने एत्वं भवतीत्यपि वाक्यार्थो घटते ? सत्यम् । टौसोरिति सप्तम्येव **'व्याख्यानाद् विशेषार्थप्रतिपत्तेः'** (कात० प० ६५), **"तुलया संमिते"** (२।६।९) इति निर्देशाच्च । एतदेवोदाहरणेन सूचयति– तुलया, तुलयोरिति ॥११७।

**[क० च०]**

**टौसो०।** व्याख्यानत इत्यादि । **आचार्यपारम्पर्यादित्यर्थः।** पक्षान्तरमाह – तुलयेत्यादि । ननु तथापि विभक्तिविपरिणामः कथं क्रियते, श्रद्धायाः परयोष्टौसोः परतः स्वतन्त्र एव एकारः कथं न स्यात्, नैवम् । आदेशप्रस्तावात् श्रद्धायाः स्थान एव युज्यते ॥११७।

**[समीक्षा]**

'तुला + टा, तुला + ओस्' इस अवस्था में कातन्त्रकार श्रद्धासंज्ञक आकार को एकारादेश करके 'तुलया, तुलयोः' शब्दरूप सिद्ध करते हैं । पाणिनि के निर्देशानुसार यहाँ 'आबन्त' अङ्ग को एकारादेश होता है - **"आङि चापः"** (अ० ७।३।१०५) । पाणिनि के इस प्रकृत निर्देश में 'टा' के लिए 'आङ्' इस **पूर्वाचार्य**-व्यवहृत शब्द का प्रयोग किया गया है ।

**[रूपसिद्धि]**

१. **तुलया।** तुला + टा । **"आ श्रद्धा"** (२।१।१०) से श्रद्धासंज्ञा, प्रकृत सूत्र से श्रद्धासंज्ञक आकार का एकारादेश तथा **"ए अय्"** (१।२।१२) से ए को 'अय्' आदेश ।

२. **तुलयोः।** तुला + ओस् । पूर्ववत् श्रद्धासंज्ञा, आकार को एकारादेश, एकार को अयादेश तथा सकार को **"रेफसोर्विसर्जनीयः"** (२।३।६३) से विसर्गादेश ॥११७।

## ११८. सम्बुद्धौ च [२।१।३९]

**[सूत्रार्थ]**

संबुद्धिसंज्ञक प्रत्यय (सि) के पर में रहने पर श्रद्धासंज्ञक आकार को एकारादेश होता है ॥११८।

**[दु० वृ०]**

श्रद्धायाः संबुद्धौ चैत्वम्भवति । हे श्रद्धे, हे माले ॥११८।

## [दु० टी०]

**सम्बु०।** वचनात् प्रागेव सिलोपश्चेत् तदा संबुद्धाविति लोपे सत्यौपश्लेषिक आधारो नास्तीति विषय एवान्यत्र न भवतीत्यर्थः , संबुद्धिसमीपोऽपि देशः संबुद्धिरित्युपचारात् । यथा– **'गङ्गायां घोषः'।** पौर्वापर्यमप्येवम्, प्रत्ययलोपलक्षणमेव वा ॥११८।

## [वि० प०]

**संबुद्धौ।** स्वरादेशमप्येत्वं बाधित्वा यदि **"ह्रस्वनदी०"** (२।१।७१) इत्यादौ श्रद्धाग्रहणबलादग्रतः संबुद्धेर्लोप इत्युच्यते तदा निमित्तस्याभावात् कथमेत्वमिति न देश्यं **'सम्बुद्धौ'** इति विषयसप्तमीत्वाद् भविष्यति । अथवा संबुद्धिसमीपो देशः संबुद्धिरित्युपचारात् । यथा गङ्गासमीपो देशो गङ्गेति । तदा निमित्तसप्तम्यामप्यदोषः प्रत्ययलोपलक्षणं वा । यदि पुनरनेनैव न्यायेन नित्यत्वात् स्वरादेशत्वादन्तरङ्गत्वाच्च पूर्वमेत्वं भवति, तदा भूतपूर्वगतिमाश्रित्य संबुद्धेर्लोप इति वेदितव्यम् ॥११८।

## [क० च०]

**संबुद्धौ।** ननु यदि विषयसप्तमीयं तदाऽनुत्पन्नायामेव संबुद्धौ एत्वं स्यादित्याह - अथवेति **हेमकरः**। तन्न । **"ह्रस्वनदी०"** (२।१।७१) इत्यत्र श्रद्धाग्रहणवैफल्यभयात् सेर्लोप एवाग्रतो भविष्यति न त्वेत्वमिति तस्मादयमेवाशयः। ननु संबुद्धित्वं जातिमाश्रित्य विषयसप्तम्येवास्तु संबुद्धिव्यक्तिलोपे जातेरेव विनाशित्वाद् अस्मिन् पक्षे एत्वमस्तु । यदा तु संबुद्धिर्व्यक्तिराश्रीयते तदा कथं संबुद्ध्यभावे एत्वं स्यादित्याह - अथवेति । **उपचाराश्रयणं कष्ट**मित्याह – प्रत्ययेत्यादि । **'प्रत्ययलोपलक्षणेन कृताकृतप्रसङ्गित्वाद्'** (कात० प० पा० ८२) इत्यर्थः। ननु **"ह्रस्वनदीश्रद्धाभ्यः"** (२।१।७१) इत्यत्र विहितविशेषणाङ्गीकारे लोपो नित्य इति । अन्तरङ्गत्वादिति । **'सर्वविधिभ्यो लोपविधिर्बलवान्'** (कात० प० ३४) इति न्यायाल्लोप एवाग्रतो भविष्यतीत्याह– स्वरादेशत्वादिति । **'लोपस्वरादेशयोः स्वरादेशविधिर्बलवान्'** (कात० प० ३५) इति न्यायादित्यर्थः।

**[समीक्षा]**

'हे श्रद्धे, हे माले' आदि में कातन्त्रकार संबुद्धिसंज्ञक सि – प्रत्यय के पर में रहने पर श्रद्धासंज्ञक आकार को एकारादेश करते हैं और पाणिनि श्रद्धासंज्ञा विना ही किए 'आ' को 'ए' आदेश – **"संबुद्धौ च"** (अ० ७।३।१०६)।

**[रूपसिद्धि]**

१. **हे श्रद्धे !** श्रद्धा + सि। **"आमन्त्रिते सिः संबुद्धिः"** (२।१।५) से सिप्रत्यय की संबुद्धिसंज्ञा, प्रकृत सूत्र से आकार को एकारादेश, पूर्वगति मानकर **"ह्रस्वनदीश्रद्धाभ्यः"** (२।१।७१) से 'सि' का लोप।

२. **हे माले!** माला + सि। पूर्ववत् संबुद्धिसंज्ञा, आकार को एकार तथा 'सि' का लोप ॥११८।

## ११९. ह्रस्वोऽम्बार्थानाम् [२।१।४०]

**[सूत्रार्थ]**

श्रद्धासंज्ञक अम्बार्थक शब्दों का संबुद्धिसंज्ञक प्रत्यय के परवर्ती होने पर ह्रस्वादेश होता है ॥११९।

**[दु० वृ०]**

अम्बार्थानां श्रद्धासंज्ञकानां संबुद्धौ ह्रस्वो भवति। **हे अम्ब! हे अक्क!** अम्बार्थानामिति सिद्धे 'ह्रस्व' इति संज्ञापूर्वकत्वात् सुखार्थम्। बहुस्वरत्वाड् ड - ल - कवतां न स्यात्। हे अम्बाडे! हे अम्बाले! हे अम्बिके! ॥११९।

**[दु० टी०]**

**ह्रस्वः।** अम्बार्थे अम्बाशब्दः अर्थशब्दसान्निध्यात्, तेन अम्बा अर्थो येषामिति विग्रहः सोऽर्थोऽम्बाशब्देऽस्ति। अम्बाया अपि ह्रस्वो भवति, तद्गुणसंविज्ञानात्। श्रद्धासंज्ञया अम्बार्था विशिष्यन्ते, विशेषणेन च तदन्तविधिरिति अम्बार्थानां श्रद्धासंज्ञकानामिति परिणतिः। श्रुतत्वाच्च श्रद्धाया एव ह्रस्वः, अम्बार्थानां वा श्रद्धाया ह्रस्वो भवतीत्यान्तरतम्यात्। अदम्बार्थानामित्यादि। ननु अम्बाशब्दोऽयं द्विस्वरस्तत्साहचर्याद् द्विस्वरा एव गृह्यन्ते। यथा अम्बा, अक्का, अल्ला, अज्जा (अत्ता, नन्दा), अच्चा

इति, सत्यम् । **ह्रस्वग्रहणं सुखप्रतिपत्त्यर्थम्।** अन्यथा अकार एकारो भवत्येषामिति शङ्क्यते । ननु श्रद्धाधिकारः किमर्थः 'हे मातः' इत्यत्र ह्रस्वस्यापि ह्रस्वः स्यादेव बाधक इति, नैवम् । परत्वाद् अर् भविष्यति ? सत्यम् । अधिकाराविच्छेदार्थ एव ।।११९ ।

**[वि० प०]**

**ह्रस्वः।** अदम्बार्थानामिति । दुःखं पुनरेतदेकारस्याधिकृतत्वात् 'एषामत् संबुद्धौ' एकारः इत्यपि वाक्यार्थः स्यादिति भावः । अम्बाशब्दो हि द्विस्वरस्तत्साहचर्याद् द्विस्वराणामेव स्यादित्याह – बहुस्वरत्वादिति ।।११९ ।

**[क० च०]**

**ह्रस्वः।** अदम्बार्थानामिति **वृत्तिः** । **अयमभिप्रायः** – अदम्बार्थानामिति सिद्धे ह्रस्व इति संज्ञापूर्वकत्वात् **'संज्ञापूर्वको विधिरनित्यः'** (कात० प०३०) इति न्यायाड् डलकवतां ह्रस्वो न भविष्यतीत्येतदेव प्रयोजनं कथं न स्यादित्याह – बहुस्वरत्वादिति । **केचित्तु** व्यस्तेनैव योजयन्ति । ननु 'हे अम्बाडे' इत्यादौ कथन्न ह्रस्व इति, सत्यम् । ह्रस्व इति संज्ञापूर्वको विधिरनित्य इत्याह – संज्ञापूर्वकत्वाद् इति । बहुस्वरत्वादेवात्र न भविष्यतीत्याह - **सुखार्थमिति** ।।११९ ।

**[समीक्षा]**

'हे अम्बा + सि, हे अक्का + सि, हे अल्ला + सि' इस अवस्था में कातन्त्रकार संबुद्धिसंज्ञक प्रत्यय के परवर्ती होने पर श्रद्धासंज्ञक आकार का ह्रस्व करते हैं । पाणिनि ने भी इसी विधान का निर्देश किया है – **"अम्बार्थनद्योर्ह्रस्वः"** (अ० ७।३।१०७) ।

व्याख्याकारों के अनुसार "अदम्बार्थानाम्" इस प्रकार सूत्र बनाए जाने पर भी कार्य संभव था, फिर भी 'ह्रस्व' इस सञ्ज्ञा के द्वारा निर्देश सुखावबोधार्थ ही किया गया है । 'अदम्बार्थानाम्' इस निर्देश से पूर्ववर्ती सूत्र द्वारा एत्व आदेश की भी आशङ्का की जा सकती है, इसलिए भी 'ह्रस्व' का विधान किया गया है ।

**[रूपसिद्धि]**

१. **हे अम्ब।** हे अम्बा + सि । प्रकृत सूत्र द्वारा श्रद्धासंज्ञक आकार को ह्रस्व तथा **"ह्रस्वनदीश्रद्धाभ्यः"** (२।१।७१) से संबुद्धिसंज्ञक सि का लोप ।

२. **हे अक्क !** हे अक्का + सि। पूर्ववत् अक्का – शब्दघटित आकार की श्रद्धासंज्ञा, ह्रस्व, सि की संबुद्धिसंज्ञा तथा सि का लोप ॥११९।

## १२०. औरिम् [२।१।४१]

**[सूत्रार्थ]**

श्रद्धासंज्ञक आकार से परवर्ती औ का 'इ' आदेश होता है ॥१२०।

**[दु० वृ०]**

श्रद्धायाः पर औरिमापद्यते। श्रद्धे, माले। दीर्घः किम् ? जरसी इति **केचित्** ॥१२०।

**[दु० टी०]**

**औरिम्।** प्रकृतत्वादिह श्रद्धामात्रमनुवर्तते। ह्रस्व एव पाठो यस्मात् नैवं जरसी इति सन्निपातत्वाद् दीर्घः। पुनरुत्तरार्थश्चेति परदर्शनार्थम् ॥१२०।

**[वि० प०]**

**औरिम्। केश्चित् कातन्त्रैकदेशीयैर्दीर्घः** पठ्यते, तन्मतमाशङ्कमान आह – दीर्घः किमिति। अन्यथा एत्वे सति ह्रस्वे दीर्घे च विशेषाभावान्नात्र दीर्घस्य फलमित्यर्थः। अतस्तद्बलाच्च सन्निपातलक्षणपरिभाषापि बाध्यते, अस्य पुनर्जरसी इति प्रयोगो न संमतः, तेन ह्रस्व एव पाठः। सन्निपातलक्षणत्वात् जरसादेशो न भवतीति ॥१२०।

**[क० च०]**

**औरिम्। केश्चित् कातन्त्रैकदेशीयैरिति पञ्जी। कातन्त्रशब्दोऽत्र सकलवैयाकरणपरः।** कातन्त्रं ये विदन्ति सूरय इत्यर्थेऽण् प्रत्ययविधानात् तदेकदेशीयै**र्वररुचिप्रभृतिभिरि**त्यर्थः। अन्यथा यथाश्रुतार्थे व्याकरणैकदेशाङ्गैरित्यर्थः स्यात्। तद्बलाद् दीर्घबलाद् इत्यर्थः।

ननु तद्बलात् सन्निपातलक्षणबाधा कथं कल्प्यते तद्बलादेवाग्रतः प्रवर्तमानत्वात् सर्वथा जरस्बाधया नित्यं जरे इत्येव स्यादिति कथं न कल्प्यते। अन्यथा परत्वादन्तरङ्गत्वाच्चाग्रतो जरसादेश एव स्यात् ? सत्यम्। दीर्घस्य एत्वद्वारेणैव वैफल्यदृष्टत्वात् सार्थकत्वकल्पनेऽपि एत्वबाधाद्वारेणैव युज्यते। एत्वबाधापि तदैव

संभवति, यदा दीर्घश्रुतिर्भवतीति । दीर्घश्रुतिरपि तदैव संभवति, यदा सन्निपातलक्षण-परिभाषाबाधया जरसादेशे भवतीति भावः । अत इत्यादि । ननु अस्य मते परत्वात् पूर्वमेव जरस्विकल्पपक्षे इकारः, एतावतैव जरसौ, जरे इति सिध्यति । तत्कथमुक्तं सन्निपातलक्षणत्वाज्जरसादेशो न भवतीति ? सत्यम् । एवं योज्या **पञ्जी । यथा परमते** सन्निपातलक्षणत्वाज्जरसादेशो न भवतीति हेतोर्दीर्घबलात् सन्निपातलक्षणपरिभाषा-बाधया जरस् भवति, न तथा **स्वमत** इति । अपि तु परत्वात् पूर्वमेव जरस् इति **हेमकरा**भिप्रायः ।

यद् वा **वररुचिमतं** दूषयन्नाह – अत इत्यादि । अतो दीर्घकरणादित्यर्थः । **अयमभिप्रायः** – **ये**ऽपि दीर्घमाहुस्तन्मतेऽपि 'जरसी' इति पदं न भवितुमर्हतीति । यतो दीर्घकरणबलादीकारस्य जरसादेशादग्रतो विधानेन सफलत्वात् सन्निपातलक्षण-त्वाज्जरस् न भवतीति दीर्घकरणम् । एतेन **तन्मते** 'जरे' इत्येव पदं नित्यं भवितुमर्हति । यद् वा तद्बलादित्यस्यायमभिप्रायः – **केचिद्** दीर्घकरणं भूतपूर्वश्रद्धार्थमाहुः । **तन्मते** तद्बलाद् भूतपूर्वश्रद्धार्थं दीर्घकरणबलात् सन्निपातलक्षणन्यायस्य बाध एव तद्विषयस्य घटनात् तदप्रवृत्तेः । यत्तु **स्वमते** सन्निपातलक्षणत्वाज्जरस् न भवतीत्युक्तम् । **अस्यायमभिप्रायः – परमते** दीर्घबलाद् दीर्घस्य यः सन्निपातः सन्निकर्षस्तल्लक्षणं दीर्घकरणं तद्धेतोर्जरसी इति यदुक्तं तदपि न भवति, परत्वादेव पूर्वं जरसादेशस्य प्राप्तेः ॥१२० ।

**[समीक्षा]**

'श्रद्धा +औ, माला + औ' इस अवस्था में कातन्त्रकार 'औ' को 'इ' आदेश और आ को ए आदेश करके 'श्रद्धे, माले' शब्दरूप सिद्ध करते हैं, जब कि पाणिनि ने यहाँ औ को शी-विधान किया है – **"औङ आपः"** (अ० ७।१।१८)।

कातन्त्र के कुछ व्याख्याकार ह्रस्व इकारादेश में दोष दिखाते हैं । उनका अभिमत है कि 'जरा + औ' इस अवस्था में पर तथा अन्तरङ्ग होने के कारण जरा को जरस् आदेश पहले ही प्रवृत्त होगा और इस प्रकार आकारान्त के अभाव में श्रद्धासंज्ञा भी नहीं होगी, फलतः 'औ' को 'इ' आदेश भी नहीं होगा । अतः 'जरसौ' रूप बनेगा 'जरसी' नहीं । जरसादेश के अभाव में औकार को इकारादेश तथा आकार को एकारादेश करने पर 'जरे' यह शब्दरूप निष्पन्न होगा ।

कातन्त्रैकदेशीय वररुचिप्रभृति आचार्य जो दीर्घ 'ई' आदेश स्वीकार करके 'जरसी' रूप बनाते हैं– यह समीचीन नहीं है। क्योंकि दीर्घ ईकारपाठ के बल से औ को ई आदेश पहले ही प्रवृत्त हो जाएगा। इसके अनन्तर सन्निपातलक्षण-परिभाषा से जरसादेश न होने के कारण केवल 'जरे' ही रूप निष्पन्न होगा, 'जरसी' रूप नहीं।

पाणिनि ने 'औङ्' को 'शी' आदेश किया है और उनकी प्रक्रिया के अनुसार 'अजरसी – अजरे' ये दो रूप उपपन्न होते हैं। पाणिनि के 'औङ्' निर्देश में 'ङ्' अनुबन्ध का उपादान प्रथमा - द्वितीया विभक्तियों के द्विवचन 'औ' और 'औट्' के ग्रहणार्थ किया गया है। कहा भी है –

"ङकारः सामान्यग्रहणार्थः, औटोऽपि ग्रहणं यथा स्यात्"।

किं च –

**औकारोऽयं शीविधौ ङिद्गृहीतो ङिच्चास्माकं नास्ति कोऽयं प्रकारः।**
**सामान्यार्थस्तस्य चासञ्जनेऽस्मिन् ङित्कार्यं ते श्यां प्रसक्तं स दोषः॥**
**ङित्त्वे विद्याद् वर्णनिर्देशमात्रं वर्णे यत् स्यात् तच्च विद्यात् तदादौ।**
**वर्णश्चायं तेन ङित्त्वेऽप्यदोषो निर्देशोऽयं पूर्वसूत्रेण वा स्यात्॥**

(काशिकावृत्तिः ७।१।१८)।

**[रूपसिद्धि]**

१. **श्रद्धे।** श्रद्धा + औ। प्रकृत सूत्र से औ को इ आदेश, **"अवर्ण इवर्णे ए"** (१।२।२) से आ को ए तथा परवर्ती इ का लोप।

२. **माले।** माला + औ। पूर्ववत् औ को इ, आ को ए तथा इ का लोप ॥१२०

## १२१. ङवन्ति यै-यास्-यास्-याम् [२।१।४२]

**[सूत्रार्थ]**

श्रद्धासंज्ञक शब्द से परवर्ती 'ङे - ङसि - ङस् - ङि' प्रत्ययों के परवर्ती होने प क्रमशः उनके स्थान में 'यै - यास् - यास् - याम्' आदेश होते हैं।।१२१।

[दु० वृ०]

श्रद्धायाः पराणि ङवन्ति वचनानि 'यै - यास् - यास् - याम्' इति यथासङ्ख्यं भवन्ति। **श्रद्धायै, श्रद्धायाः, श्रद्धायाः, श्रद्धायाम्। मालायै, मालायाः, मालायाः, मालायाम्**।।१२१।

[दु० टी०]

**ङवन्ति ०।** ङकारो विद्यते येषां तानि ङवन्ति। संसङ्गे वन्तुरयं ङकारस्यानुबन्धत्वात्। ननूच्चरितप्रध्वंसिनो ह्यनुबन्धा इत्यादेशकाले ङकारस्याभावाद् वर्तमानत्वं नास्ति तत्कथमिह वन्तुरिति ? सत्यम्। वचनाद् भूतपूर्ववदुपचार इति न विरुध्यते। **'यथासङ्ख्यमनुदेशः समानाम्'** (कात० प० १५) इति, अनुदेशः पश्चादुच्चारणम्, सङ्ख्यानं संख्या। उच्चारणमात्रमुच्यते। समानानामनुदेशे उच्चारणानतिक्रमेण भवतीत्यर्थः। तत्र शब्दसाम्यमिह न संभवति। यथा **"द्वितीयचतुर्थयोः प्रथमतृतीयौ"** (३।३।११) इत्यर्थसाम्यं ङवन्तीति प्रतिपत्तव्यम्। अन्यथा द्विर्यास्करणमनर्थकं स्यात्।।१२१।

[वि० प०]

**ङवन्ति०।** यथासङ्ख्यमिति। तत्पुनर्द्विविधम् – **शब्दकृतम् अर्थकृतं च।** तत्र शब्दकृतम् – यत्र शब्दानां समानो निर्देशः, यथा **"द्वितीयचतुर्थयोः प्रथमतृतीयौ"** (३।३।११) इति। अत्र तु ङकारो विद्यते येषां तानि ङवन्तीति एकेनैव ङवच्छब्देन पारिशेष्यात् ङे - ङसि - ङस् - ङीनां चतुर्णामेवार्थानामभिधीयमानत्वाच्चतुर्भिरादेशैः सहार्थकृतं यथासंख्यं प्रतिपत्तव्यम्। अत एव द्विर्यास्करणमर्थवद् भवतीति भावः।।१२१।

[समीक्षा]

'श्रद्धा + ङे, श्रद्धा + ङसि, श्रद्धा + ङस्, श्रद्धा + ङि' इस अवस्था में यथाक्रम ङे को यै, ङसि को यास्, ङस् को यास् तथा ङि को याम् आदेश करके 'श्रद्धायै, श्रद्धायाः, श्रद्धायाः, श्रद्धायाम्' शब्दरूप निष्पन्न किए गए हैं। पाणिनि एतदर्थ याट् आगम, वृद्धि और दीर्घ आदेश करते हैं – **"याडापः, वृद्धिरेचि, अकः सवर्णे दीर्घः"** (अ० ७।३।११३; ६।१।८८, १०१)। इस प्रकार पाणिनि की प्रक्रिया में गौरव तथा कातन्त्रीय प्रक्रिया में लाघव स्पष्ट है।

**[रूपसिद्धि]**

१. **श्रद्धायै।** श्रद्धा + ङे। प्रकृत सूत्र से ङे को यै आदेश।

२. **श्रद्धायाः।** श्रद्धा + ङसि। प्रकृत सूत्र द्वारा 'ङसि' को 'यास्' आदेश तथा स् को विसर्गादेश।

३. **श्रद्धायाः।** श्रद्धा + ङस्। प्रकृत सूत्र से ङस् को यास् आदेश तथा सकार को विसर्गादेश।

४. **श्रद्धायाम्।** श्रद्धा + ङि। प्रकृत सूत्र द्वारा ङि को याम् आदेश।

५-८. **मालायै, मालायाः, मालायाः, मालायाम्।** माला + ङे, माला + ङसि, माला + ङस्, माला + ङि। पूर्ववत् ङे को यै, ङसि को यास्, ङस् को यास् तथा ङि को याम् आदेश॥१२१।

## १२२. सर्वनाम्नस्तु ससवो ह्रस्वपूर्वाश्च [२।१।४३]

**[सूत्रार्थ]**

सर्वनामसंज्ञक तथा श्रद्धासंज्ञक शब्द से परवर्ती 'ङे-ङसि-ङस्-ङि' को क्रमशः सु आगम के साथ यै (स्यै), यास् (स्यास्), यास् (स्यास्), याम् (स्याम्) आदेश तथा श्रद्धासंज्ञक आकार को ह्रस्व भी होता है॥१२२।

**[दु० वृ०]**

सर्वनाम्नः श्रद्धायाः पराणि ङवन्ति वचनानि यै-यास्-यास्-यामिति यथासंख्यं सह सुना भवन्ति ह्रस्वपूर्वाश्च। उदनुबन्धः परादित्वार्थः। **सर्वस्यै, सर्वस्याः, सर्वस्याः, सर्वासाम्।** तुशब्दः स्वागमाधिकारनिवृत्त्यर्थः॥१२२।

**[दु० टी०]**

**सर्वनाम्नः।** सर्वनाम इति किम्? विश्वा नाम काचित्। विश्वमतिक्रान्तायै विश्वायै, अतिविश्वायै ब्राह्मण्यै देहि। अत्र सह सुना भवन्तीति सहशब्दोऽयं विद्यमानवचनः, सुमन्तो भवन्तीत्यर्थः। सलोमक इति। यथा सपूर्वः **"सपरस्वरायाः"** (३।४।१) इति निर्देशात् सहशब्दस्य बहुव्रीहौ सभाव इत्यवसीयते। न भवति च **सविकल्पकान्यपि ज्ञापकानि भवन्तीति।** एवं चेद् अर्थवशाद् विभक्तिविपरिणाम इति।

षष्ठीविपरिणामिनां यैप्रभृतीनामादिर्भविष्यति किं सहग्रहणेन, नैवम् । ङवतामेवानुवृत्तिः स्यात् सुरागमस्तु यैप्रभृतीनां बाधकः स्यात् । **'येन नाप्राप्तौ यो विधिरारभ्यते स तस्य बाधकः'** (व्या० परि० ४२) इति । उक्तं च,

**कार्यिणा हन्यते कार्यं कार्यं कार्येण हन्यते।**
**निमित्तं तु निमित्तेन तच्छेषमनुवर्तते ॥**

सहग्रहणेन तु विशेषणमिदं यैप्रभृतीनामेव साध्यत्वात् । **वस्तुतः** पुनः सुरागमो ह्रस्वपूर्वश्च साध्य इति । ह्रस्वः पूर्वो येभ्य इति विग्रहे पूर्वो दीर्घो ह्रस्वो भवति, ह्रस्वतया विवर्तते इत्यर्थः । तदेतल्**लोकोपचारात्।** लोके हि दीर्घ एव ह्रस्वो भवति, ह्रस्व एव दीर्घो भवति । यदि पुनरत्पूर्वाश्चेति विदध्यात् तदा पूर्वस्मिन् देशे अकारो नियुज्यते इति गम्यते दीर्घात् परलोपोऽपि न भवति, वचनादिति । **तुशब्द इत्यादि।** तुशब्दोऽयं पुनरर्थे न प्रयोजयतीति निवृत्तौ प्रवर्तितव्यम्, तर्हि परयोगे यैप्रभृतीनामेव प्राप्ते विभाषा स्यात्, नैवम् । श्रद्धाप्रकरणमपेक्ष्य वर्तते, अव्ययानामनेकार्थत्वाद् इति ॥१२२ ।

## [वि० प०]

**सर्वनाम्नः।** ससव इति । सह सुना वर्तन्ते इति विग्रहे सपरस्वराया इत्यादिनिर्देशाद् बहुव्रीहौ सहस्य सभावः । ह्रस्वपूर्वाश्चेति ह्रस्वः पूर्वो येभ्य इति विग्रहः । उदनुबन्धः परादित्वार्थ इति । अन्यथा प्रकृतिभक्तत्वे सकारस्य व्यञ्जने विसर्जनीयः स्यादित्यर्थः । तुशब्द इत्यादि । सुश्चासावागमश्चेति स्वागमः । तस्याधिकारनिवृत्तिरर्थः प्रयोजनमस्येति विग्रहः, स चाव्ययत्वात् श्रद्धाप्रकरणत्वादूर्ध्वं निवर्तयति ।।१२२ ।

## [क० च०]

**सर्वनाम्नः।** ससव इति ओकारो नाशङ्कनीयः, व्याख्यानादोकारापेक्षया उकारकल्पने लघुत्वात् । ननु यै-प्रभृतीननादृत्य ह्रस्वस्वागमयोर्विधाने वाक्यभेदः स्यात्, विशिष्टे एक एव विधिर्युक्तः । विधाने तु सर्वनाम्नः श्रद्धायाः पराणि ङवन्ति वचनानि ह्रस्वपूर्वाः स्वागमयैप्रभृतयो भवन्तीत्येव एकक्रियैव । वाक्यभेद इति । अत एव **वृत्तौ** ङवन्ति वचनानि इति पाठोऽप्यस्ति युक्तश्च उभयविशिष्टातिरिक्तविधिरिति । अत एव **'उपसद्भिश्चरित्वा मासमेकं जुहुयाद्'** इत्यत्र विशिष्टकर्मविधिं विशिष्टकर्मान्तर-

कर्मणोर्विधिरेवायमिति **जैमिनीयाः** प्राहुः। न च यैप्रभृतीनामप्यनेकत्वाद् विधेयत्वे गौरवं स्यादिति वाच्यम्, **भवन्मते**ऽपि प्रत्येकमेव तदन्वयात्। अत एव **"तृतीयादौ तु परादिः"** (२।१।७) इति **पञ्जिकायाम**नेनैव यैप्रभृतयः साधिता इति। यत्तु उत्तरत्र सूत्रे सिद्धास्तु यैप्रभृतयः पूर्वेणैव भवन्तीति वक्ष्यति, **तस्यायमभिप्रायः** – ननु यदि ह्रस्वागमविशिष्टयैप्रभृतिकमनेन विधीयते, तदा पक्षे किं स्यादित्याह– सिद्धास्तु यैप्रभृतय इति सर्वं सुस्थितमिति दिक्॥१२२।

**[समीक्षा]**

'सर्वस्यै, सर्वस्याः, सर्वस्याः, सर्वस्याम्' प्रयोगों के सिद्ध्यर्थ कातन्त्रकार 'सु' आगम के साथ ङे को यै, ङसि को यास्, ङस् को यास् तथा ङि को 'याम्' आदेश करने के साथ पूर्ववर्ती आकार को ह्रस्व भी करते हैं। पाणिनि ने एतदर्थ 'स्याट्' आगम, ह्रस्व, वृद्धि तथा दीर्घ– विधान कर प्रक्रियागौरव को ही प्रदर्शित किया है – **"सर्वनाम्नः स्याड्ढ्रस्वश्च, वृद्धिरेचि, अकः सवर्णे दीर्घः"** (अ० ७।३।११४; ६।१।८८, १०१)।

**[रूपसिद्धि]**

१. **सर्वस्यै।** सर्वा+ङे। प्रकृतसूत्र द्वारा आकार को ह्रस्व, सु-आगम तथा ङे को यै आदेश।

२. **सर्वस्याः।** सर्वा+ङसि। प्रकृत सूत्र से आ को ह्रस्व, सु-आगम, ङसि को यास् आदेश तथा स् को विसर्ग।

३. **सर्वस्याः।** सर्वा+ङस्। प्रकृत सूत्र से आ को ह्रस्व, सु-आगम, ङस् को यास् आदेश तथा स् को विसर्ग।

४. **सर्वस्याम्।** सर्वा+ङि। प्रकृत सूत्र से आ को ह्रस्व, सु-आगम तथा ङि को याम् आदेश॥१२२।

## १२३. द्वितीयातृतीयाभ्यां वा [२।१।४४]

**[सूत्रार्थ]**

द्वितीया तथा तृतीया शब्द से परवर्ती 'ङे-ङसि-ङस्-ङि' को क्रमशः वैकल्पिक 'यै-यास्-यास्-याम्' आदेश सु-आगम के साथ होते हैं तथा पूर्ववर्ती श्रद्धासंज्ञक आकार को ह्रस्व भी विकल्प से होता है॥१२३।

[दु० वृ०]

अप्राप्ते विभाषा। द्वितीया-तृतीयाभ्यां पराणि ङवन्ति वचनानि 'यै-यास्-यास्-याम्' इति यथासङ्ख्यं सह सुना भवन्ति ह्रस्वपूर्वश्च वा। द्वितीयस्यै, द्वितीयायै। तृतीयस्यै, तृतीयायै। तीयाद् वेति सिद्धे द्वितीयातृतीयाभ्यामिति **स्पष्टार्थम्**॥१२३।

[दु० टी०]

**द्वितीया।** यदनेन साध्यं तदेव विकल्प्यते। सिद्धास्तु यैप्रभृतयो नित्यमेव भवन्ति, किमत्र चोद्यम्, तीयाद् वेति कृते पटुजातीयाया इत्यत्रापि स्यात्। **'अर्थवद्ग्रहणे नानर्थकस्य'** (कात० प० ४) इति, तर्हि सुखार्थं द्वितीयातृतीयाग्रहणमिति॥१२३।

[वि० प०]

**द्वितीया।** अनयोरसर्वनामत्वात् पूर्वेण ह्रस्वपूर्वः सुरागमो न प्राप्तः, साध्यते यदेव साध्यं तस्यैव विकल्पो युक्त इत्याह – अप्राप्ते विभाषेति। सिद्धास्तु यैप्रभृतयो नित्यमेव भवन्तीति। तीयाद् वेति, अन्यथा पटुजातीयाया इत्यत्रापि प्रसङ्गः, ततः **'अर्थवद्ग्रहणे नानर्थकस्य'** (कात० प० ४) इति वक्तव्यम्। एवं च सति दुःखं स्यादित्यर्थः॥१२३।

[समीक्षा]

'द्वितीया + ङे, तृतीया + ङे' इस अवस्था में कातन्त्रकार केअनुसार सु-आगम के साथ ङे को यै आदेश तथा पूर्ववर्ती आकार को ह्रस्वादेश होकर 'द्वितीयस्यै, तृतीयस्यै' रूप सिद्ध होते हैं। इन 'ङे-ङसि-ङस्-ङि' चारों प्रत्ययों में शब्दों के साधनार्थ पाणिनि स्याट्-आगम, ह्रस्व, वृद्धि तथा दीर्घ आदेश करते हैं – **"सर्वनाम्नः स्याड्ढ्रस्वश्च, वृद्धिरेचि, अकः सवर्णे दीर्घः"** (अ० ७।३।११४; ६।१।८८, १०१)। पक्ष में याट्-आगम आदि कार्य होने पर 'द्वितीयायै, तृतीयायै' आदि रूप निष्पन्न होते हैं। इस प्रकार पाणिनीय प्रक्रिया गौरव दोष से व्याप्त है।

[रूपसिद्धि]

१. **द्वितीयस्यै, द्वितीयायै।** द्वितीया + ङे। प्रकृत सूत्र द्वारा सु-आगम, ङे को यै आदेश तथा पूर्ववर्ती आकार को ह्रस्व। पक्ष में **"ङवन्ति यै-यास्-यास्-याम्"** (२।१।४२) से ङे को यै आदेश होने पर 'द्वितीयायै' रूप साधु होगा।

२. **तृतीयस्यै, तृतीयायै।** तृतीया + ङे। पूर्ववत् सु - आगम, यै तथा ह्रस्वादेश। पक्ष में ङे को यै आदेश होने पर 'तृतीयायै' रूप ॥१२३।

## १२४. नद्या ऐ-आस्-आस्-आम् [२।१।४५]

### [सूत्रार्थ]

नदीसंज्ञक शब्द से परवर्ती 'ङे-ङसि-ङस्-ङि' प्रत्ययों के स्थान में क्रमशः 'ऐ-आस्-आस्-आम्' आदेश उपपन्न होते हैं ॥१२४।

### [दु० वृ०]

वा न स्मर्यते। नदीसंज्ञकात् पराणि ङवन्ति वचनानि 'ऐ-आस्-आस्-आम्' इति यथासङ्ख्यं भवन्ति। **नद्यै, नद्याः, नद्याः, नद्याम्। वध्वै, वध्वाः, वध्वाः, वध्वाम्** ॥१२४।

### [दु० टी०]

नद्याः। अत्रापि पूर्ववद् व्याख्यानम्। इह विदधद् यथासंख्यं लघुविस्पष्टार्थं प्रक्रियाविकलानुपहसतीव **भगवान्** याट्-स्याट्-आट्: प्रकुर्वाणान्। नद्यामिति कथं **"ङेराम्"** इति पुनर्विधानात् ॥१२४।

### [समीक्षा]

'नदी + ङे, नदी + ङसि, नदी + ङस्, नदी + ङि' इस अवस्था में कातन्त्रकार क्रमशः 'ऐ-आस् -आस्-आम्' आदेश करके 'नद्यै, नद्याः, नद्याः, नद्याम्' शब्दरूप सिद्ध करते हैं, परन्तु पाणिनि ने आट् आगम, वृद्धि तथा दीर्घविधान किया है- **"आण्नद्याः, वृद्धिरेचि, अकः सवर्णे दीर्घः"** (अ० ७।३।११२; ६।१।८८, १०१)। इस प्रकार कातन्त्रप्रक्रिया में लाघव स्पष्ट है। लाघवप्रिय व्याख्याकार इसी प्रक्रिया का समादर करते हैं। कातन्त्रटीकाकार ने कहा भी है-"इह विदधद् यथासङ्ख्यं लघुविस्पष्टार्थं प्रक्रियाविकलान् उपहसतीव भगवान् याट्-स्याट्-आटः प्रकुर्वाणान्" (कात० वृ० टी० २।१।४५)।

### [रूपसिद्धि]

१. **नद्यै।** नदी + ङे। प्रकृत सूत्र द्वारा 'ङे' को 'ऐ' आदेश तथा **"इवर्णो यमसवर्णे"** (१।२।८) से ईकार को यकार।

२. **नद्याः ।** नदी + ङसि । प्रकृत सूत्र द्वारा 'ङसि' को 'आस्' आदेश, "इवर्णो यमसवर्णे न च परो लोप्यः" (१।२।८) से ईकार को यकार तथा सकार को विसर्गादेश ।

३. **नद्याः ।** नदी + ङस् । प्रकृत सूत्र द्वारा 'ङस्' को 'आस्' आदेश, "इवर्णो यमसवर्णे न च परो लोप्यः" (३।२।८) से ईकार को यकार एवं सकार को विसर्गादेश ।

४. **नद्याम् ।** नदी + ङि । प्रकृत सूत्र से 'ङि' को 'आम्' आदेश तथा "इवर्णो यमसवर्णे न च परो लोप्यः" (१।२।८) से ईकार को यकार ।

५-८. **वध्वै, वध्वाः, वध्वाः, वध्वाम् ।** वधू + ङे, वधू + ङसि, वधू + ङस्, वधू + ङि । पूर्ववत् ङे को ऐ, ङसि को आस्, ङस् को आस् तथा ङि को आम् आदेश ।।१२४ ।

## १२५. सम्बुद्धौ ह्रस्वः [२।१।४६]

### [सूत्रार्थ]

संबुद्धिसंज्ञक प्रत्यय (सि) के परवर्ती रहने पर नदीसंज्ञक 'ई - ऊ' वर्णों का ह्रस्वादेश होता है ।।१२५ ।

### [दु० वृ०]

नद्याः संबुद्धौ ह्रस्वो भवति । **हे नदि, हे वधु ।** नद्या इति किम् ? हे ग्रामणीः, हे खलपूः ।।१२५ ।

### [दु० टी०]

**सम्बुद्धौ ।** अर्थवशादिह पञ्चमी षष्ठीतया विपरिणमते इति । "**स्थानेऽन्तरतमः**" (कात० प० १६) इति ईकारस्येकारः, ऊकारस्योकारः । इह "**अम्बार्थनद्योः संबुद्धौ ह्रस्वः**" इति कथन्न विदध्यात्, अत्र श्रद्धाविशेषणस्य प्रयोजनमुक्तमेव । अथ **लोकोपचाराद्** दीर्घ एव ह्रस्वः स्यात्, कुतो 'हे मातः' इत्यत्रापि ह्रस्वप्राप्तेरिति । नैवम्, लोके ह्रस्वमपि गृहं ह्रस्वं क्रियते दृढार्थम् । अन्यथा बलवता वातेन बाधते इति । नैवम्, तत्र परत्वादेवार् तर्हि कुत एदोतोर्गुणो वेति सिद्धे ह्रस्वसामर्थ्या देत्वमोत्वञ्च संबुद्धौ न स्यादिति प्रकरणभेदश्च स्यात् ।।१२५।

**[वि० प०]**

**संबुद्धौ।** इह **"अम्बार्थनद्योः संबुद्धौ ह्रस्वः"** इत्येकयोगे सिध्यति किं 'ह्रस्वोऽम्बार्थानाम्' इति पृथग्वचनेन ? न चोद्यं तत्र श्रद्धाधिकारेऽम्बार्थानां श्रद्धासंज्ञकानां ह्रस्व इति। एकयोगे त्वम्बार्थस्य निर्विशेषणत्वात् 'हे मातः' इत्यत्रापि ह्रस्वः स्यात्। अथ दीर्घस्यापि ह्रस्व इति चेत्, न। लोके ह्रस्वमपि गृहं ह्रस्वं क्रियते दृढार्थम्, अन्यथा बलवता वातेन बाधते, तद्वदिहापि ह्रस्वस्यापि ऋकारस्यारादेशबाधनार्थं ह्रस्वः प्राप्नोति, तदयुक्तम्। तत्र परत्वाद् **"घुटि च"** (२।१।६७) इत्यरेव भविष्यति। यद्येवम्, उत्तरत्र 'मातरम्, मातॄः' इत्यत्रापि **"अमृशसोरादिर्लोपम्"** (२।१।४७) आपद्यते। नैवम्, 'अम्बार्थस्य च' इति सिद्धे पुनर्नदीग्रहणमुत्तरत्र नद्येवानुवर्तत इति ज्ञापनार्थं भविष्यति ? सत्यमेतत्। किन्तु सम्बुद्धावेदोतौ गुणो वेति सिद्धे नद्या ह्रस्वकरणसामर्थ्यादित्वमोत्वं च न स्यादिति। अयं च परिहारो नोपपद्यते, अम्बार्थं प्रति ह्रस्वस्य चरितार्थत्वात्। किञ्चास्मिन् नदीप्रकरणे श्रद्धानुप्रवेशोऽप्ययुक्त इति गम्यते।।१२५।

**[क० च०]**

**संबुद्धौ।** दृढार्थमिति। दृढमेवार्थः प्रयोजनमस्य गृहकरणस्येति क्रियाविशेषणम्। न च दृढशब्दस्य धर्मिवाचकत्वात् कथं दृढार्थमित्युक्तमिति वाच्यम्, ह्रस्वे कृते दृढगृहान्तरोत्पत्तिरेव प्रयोजनं स्यात्। **अन्ये** तु धर्मपरोऽयमित्याहुः। अत्र पक्षे **"नपुंसके भावे क्तः"** (४।५।९३)। अम्बार्थस्य चेति। ननु चानुकृष्टत्वादुत्तरत्र नद्यनुवृत्तिः कथं भविष्यति, सत्यम्। चकारोऽयमुक्तसमुच्चयमात्रे द्रष्टव्यः। ततश्च मुख्यवाक्यनिर्दिष्टत्वान्नद्यनुवृत्तिर्युक्तैव। अथ तथापि चकारसंबन्धेनाम्बार्थस्य गौणत्वादुत्तरत्राम्बार्थानुवृत्तिः कथं स्यात्, यथा काम्य चेति ? सत्यम्, उत्तरत्राम्बार्थस्य चेति सचकारानुवृत्तिर्भविष्यति। ततश्च तत्रैव चकारेण नद्यनुकर्षणं क्रियते इत्यदोषः। एदोतोरिति। एवं सति गौरवं स्यादित्याह - गुणो वेति। ननु ईदृशे सूत्रे कृते तु अयं परिहारस्तत्र न दातव्यः, किन्तु अग्नेर्विहितायां संबुद्धाविति विहितविशेषणव्याख्यैव। तत्र **सिद्धान्तः** कार्य इत्याह – **किं चेति**।।१२५।

**[समीक्षा]**

'हे नदि ! हे वधु !' आदि शब्दरूपों में कातन्त्रकार की तरह पाणिनि ने भी ह्रस्वविधान किया है – **"अम्बार्थनद्योर्ह्रस्वः"** (अ० ७।३।१०७)। व्याख्याकारों ने

पूर्ववर्ती सूत्र **"नद्या ऐ आसासाम्"** (२।१।४५) से 'नद्याः' पद की अनुवृत्ति आवश्यक मानी है, क्योंकि उसके अभाव में 'हे ग्रामणीः, हे खलपूः' आदि में भी ह्रस्वादेश प्रवृत्त होगा। ज्ञातव्य है कि यहाँ दीर्घ ईकार-ऊकार के रहने पर भी उनकी नदीसंज्ञा नहीं होती, अतः ह्रस्व भी प्रवृत्त नहीं होता है।

**[रूपसिद्धि]**

१. **हे नदि !** हे नदी + सि। "आमन्त्रिते सिः संबुद्धिः" (२।१।५) से 'सि' की संबुद्धिसंज्ञा, प्रकृत सूत्र से ईकार को ह्रस्व इकार तथा "ह्रस्वनदीश्रद्धाभ्यः" (२।१।७१) से 'सि' का लोप।

२. **हे वधु !** हे वधू + सि। पूर्ववत् संबुद्धिसंज्ञा, ह्रस्व तथा 'सि' का लोप ॥१२५।

## १२६. अमृशसोरादिर्लोपम् [२।१।४७]

**[सूत्रार्थ]**

नदीसंज्ञक शब्दों से परवर्ती द्वितीयाविभक्ति – एकवचन 'अम्' तथा द्वितीया-बहुवचन 'शस्' प्रत्यय के आदि अकार का लोप होता है ॥१२६।

**[दु० वृ०]**

नद्याः परयोरमृशसोरादिर्लोपमापद्यते। **नदीम्, नदीः। वधूम्, वधूः** ॥१२६।

**[दु० टी०]**

**अमृ०।** इह पुनरर्थवशात् पञ्चमी। नद्या आदिलोपो भवति अमृशसोः परत इति न चोद्यम्, श्रुतत्वादमृशसोरादिशब्देन संबन्धः। किं च ईदूतोरेव नदीसंज्ञा, कः पुनस्तयोरादिरवयव इति प्रत्ययस्य सर्वापहारी लोप इत्यादिग्रहणम्। यथा पञ्च, षडिति। 'अमृशसोरलोपः' इति कृते **वैचित्र्यार्थमेव** स्यात् ॥१२६।

**[वि० प०]**

**अमृशसोः।** पूर्वसूत्रे नद्या इति पञ्चम्यन्तमपि 'षष्ठ्यन्ततया विपरिणमते। अर्थवशादिह पुनः पञ्चम्येवानुवर्तते न षष्ठी। नद्या आदिर्लोपमापद्यते अमृशसोः परयोरिति सम्बन्धस्याघटनात्। ईदूतौ हि नदी, कः पुनस्तस्यादिरवयव इति। अथवा श्रुतत्वाद् अमृशस्भ्यामेवादिशब्दस्य संबन्धो नाधिकारानुमितया नद्या इत्यत आह – नद्याः

परयोरिति। एवं तर्हि **'अमृशसोरलोपम्'** इत्यास्तामिति चेत् ? सत्यम्। आदिग्रहणं **सुखप्रतिपत्त्यर्थमेव** ॥१२६।

**[क० च०]**

अम्शसोः। ननु आदिशब्दस्य सामीप्यार्थे गृहीते नद्या आदिभूतस्य समीपस्य लोपो भविष्यति। अतः षष्ठ्यपि संगच्छते इत्याह - अथवेति। अथ 'अम्शसोर्मसौ' इति कृते सिध्यति **गुरुकरणं वैचित्र्यार्थम्**। इह नदी (इहादि)- ग्रहणं समानमात्रोपलक्षणार्थम्। तेन 'वातप्रमीम्, वातप्रमीन्। देवयजीम्, देवयजीन्। अतिलक्ष्मीम्, अतिलक्ष्मीन्। बहुश्रेयसीम्, बहुश्रेयसीन्। बहुचमूम्, बहुचमून्' इत्यादिषु अनदीसंज्ञकेकारोकाराभ्यामपि अम्शसोरादिर्लोपः। निरुक्तलक्षणः सस्य च नः। आदिग्रहणं सुखार्थमिति। **वररुचिस्त्वाह** - आदिग्रहणं क्वचिज्जसोऽपि आदिलोपार्थम्। तेन 'धीवरीः, पीवरीः, सरस्वतीः, फलिनीः, फलवतीः, ओषधीः' इत्याद्याचष्टे। तन्न, अपाणिनीयत्वात्। अत एव **सुखार्थमिति** ॥१२६।

**[समीक्षा]**

'नदी + अम्, नदी +शस् (अस्)' इस अवस्था में कातन्त्रकार 'अम् - शस्' प्रत्ययों के आदि अवयव अकार का लोप करके 'नदीम्, नदीः' आदि शब्दरूप सिद्ध करते हैं। पाणिनि ने 'अम्' प्रत्यय के परवर्ती होने पर **"अमि पूर्वः"** (अ० ६।१।१०७) से पूर्वरूप तथा 'शस्' प्रत्यय के परे रहते **"प्रथमयोः पूर्वसवर्णः"** (अ० ६।१।१०२) से पूर्वसवर्ण दीर्घ का विधान किया है। इससे पाणिनीय प्रक्रिया में गौरव स्पष्ट है।

व्याख्याकारों ने 'अम्शसोर्मसौ, अम्शसोरलोपम्' ये दो न्यासान्तर इस सूत्र के बताए हैं और सूत्रकार द्वारा तादृश सूत्रपाठ न किए जाने का कारण भी प्रस्तुत किया है। कलापचन्द्रकार **सुषेण विद्याभूषण** ने वररुचि के एक मत का यह कहकर खण्डन किया है कि वह **अपाणिनीय** है।

**[रूपसिद्धि]**

१. **नदीम्।** नदी + अम्। **"ईदूत् स्त्र्याख्यौ नदी"** (२।१।९) से ईकार की नदीसंज्ञा तथा प्रकृत सूत्र द्वारा 'अम्' प्रत्यय के आदि अवयव 'अ' का लोप।

२. **नदीः।** नदी+शस्। **"ईदूत् स्त्र्याख्यौ नदी"** (२।१।९) से ईकार की नदी संज्ञा, प्रकृत सूत्र से शस् प्रत्यय के आदि अवयव अकार का लोप तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से स् को विसर्गादेश।

३-४. **वधूम्।** वधू+अम्। **वधूः।** वधू+शस्। पूर्ववत् नदीसंज्ञा तथा 'अम्-शस्' प्रत्ययों के आदि अवयव अकार का लोप ॥१२६।

## १२७. ईकारान्तात् सिः [२।१।४८]

### [सूत्रार्थ]

नदीसंज्ञक ईकारान्त शब्द से परवर्ती प्रथमाविभक्ति – एकवचन 'सि' प्रत्यय का लोप होता है ॥१२७।

### [दु० वृ०]

नदीसंज्ञकेकारान्तात् परः सिर्लोपमापद्यते। नदी, मही। ईकारोऽन्तो यस्मादिति किम्? लक्ष्मीः ॥१२७।

### [दु० टी०]

**ईकारा०।** अधिकृतया नद्या ईकारो विशिष्यते। नदीसंज्ञकईकारोऽन्तः समीपो यस्य लिङ्गस्य तदिदमीकारान्तं लिङ्गमिह प्रकरणबलादधिकृतं वा **केश्चिद्** इति लक्ष्मीरित्यत्र कथं सिलोपप्रसङ्गः, यतो **"लक्षेरीर्मोऽन्तश्च"** (उ० ३।३६) इत्युणादौ लक्षेरीप्रत्ययेऽस्य च मोऽन्त इति। अतद्गुणेऽपि बहुव्रीहौ वचनादेकवर्णव्यवधानेऽपि स्यात्। अथ अव्युत्पन्न एव लक्ष्मीशब्दस्तदापि विहितविशेषणमन्तग्रहणबलात्। यथा नदीति नदशब्दादीप्रत्ययो विहितस्तथा नायमिति उभयपक्षं चालोच्यार्थविवरणाय पञ्चम्या वाक्यार्थमाह। ननु तन्त्रयतेरौणादिक ईरस्ति, कथं **तन्त्रीयं वीणा** इति, नैवम्। अजन्ताद् अलन्ताद् वा ईप्रत्यय इति। कथं बहुश्रेयसी युवा। अयमपि लिङ्गाधिकारो गौणोऽत्र श्रेयसीशब्दो न श्रेयःशब्द इति प्रपूर्वात् श्रन्सेः वयप्, तत ईयन्सुः, प्रशस्यस्य च श्रः। बहवः श्रेयस्योऽस्य सन्तीति विग्रहे नदीलक्षणः कप्रत्ययः, उपसर्जनलक्षणश्च ह्रस्व इह न दृश्यते ॥१२७।

[वि० प०]

**ईकारा०** । अधिकृतया नद्या ईकारो विशिष्यते इत्याह – नदीसंज्ञकेकारान्तादित्यादि । नदीसंज्ञक ईकारोऽन्तः समीपो यस्य तद् **नदीसंज्ञकेकारान्तम्** इह प्रकरणबलाल्लिङ्गमेवोच्यते । अत एव लक्ष्मीरित्यत्र धातोरन्त ईकार इति कुतः प्रसङ्गः ? तथाहि **"लक्षेरीर्मोऽन्तश्च"** (उ० ३।३६) इत्युणादौ लक्षेरीप्रत्ययेऽस्य च मकारोऽन्त इति । अथाव्युत्पन्न एव लक्ष्मीशब्द इति पक्षस्तदाप्यन्तग्रहणबलाद् विहितविशेषणमत्र मन्तव्यमित्यालोच्य पञ्चम्या वाक्यार्थमाह - ईकारोऽन्तो यस्मादिति । यथा नद – महशब्दाभ्यां स्त्रियामीप्रत्ययो विहितस्तथा नात्रेत्यर्थः ।।१२७ ।

[क० च०]

**ईकारा०** । ननु 'ईकारान्तात्' इत्यनेन नद्या इत्यस्य कथमन्वयः, यावता ईकारान्तः शब्दः स नदी भवितुं नार्हति ? सत्यम् । नदीशब्देन नद्यन्त उपचर्यते । तत ईकारान्तो यो नद्यन्त इत्युक्तेऽर्थान्नदीसंज्ञक ईकार एव विशेषणविशेष्यभावेन लभ्यते इत्याह – अधिकृतेत्यादि । अन्तग्रहणादिह लिङ्गान्यपदार्थत्वादेव । व्युत्पन्नपक्षे लक्ष्मीरित्यत्र न भवति । अव्युत्पन्नपक्षे विहितविशेषणेनैव दोषाभाव इति ।।१२७ ।

[समीक्षा]

'नदी + सि, मही + सि' इस अवस्था में कातन्त्रकार लिङ्गसंज्ञकतथा नदीसंज्ञक ईकारान्त शब्द से परवर्ती 'सि' प्रत्यय का लोप करके 'नदी, मही' शब्दरूप सिद्ध करते हैं । पाणिनि ने भी ङ्यन्त शब्दों से परवर्ती 'सु' प्रत्यय का लोप किया है – **"हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्"** (अ० ६।१।६८) ।

व्याख्याकारों ने 'ईकारान्तात्' के स्थान में 'ईकारात्' पाठ तथा 'लक्ष्मी' शब्द को अव्युत्पन्न माने जाने के विषय में अपने विचार तथा समाधान प्रस्तुत किए हैं ।

[रूपसिद्धि]

१. **नदी** । नदी + सि । **"ईदूत् स्त्र्याख्यौ नदी"** (२।१।९) से ईकार की नदीसंज्ञा तथा उससे परवर्ती सिप्रत्यय का प्रकृत सूत्र द्वारा लोप ।

२. **मही** । मही + सि । पूर्ववत् 'मही' शब्द की नदीसंज्ञा एवं प्रकृत सूत्र से सिप्रत्यय का लोप ।।१२७ ।

## १२८. व्यञ्जनाच्च [२।१।४९]

### [सूत्रार्थ]

व्यञ्जनसंज्ञक वर्ण से परवर्ती प्रथमाविभक्ति – एकवचन 'सि' प्रत्यय का लोप होता है ॥१२८।

### [दु० वृ०]

व्यञ्जनसंज्ञकात् परः सिर्लोपमापद्यते। **वाक्, तडित्।** संयोगान्तलोपे सिद्धं चेन्नादेर्धुटो लोपः स्यात्। लिङ्गं चानुवर्तते ॥१२८।

### [दु० टी०]

चकारः उक्तसमुच्चयमात्रे ॥१२८।

### [वि० प०]

**व्यञ्जन०।** लिङ्गं चानुवर्तते इति मतान्तरेणोक्तम्। अस्य तु मते लिङ्गप्रकरणत्वादेव लिङ्गान्तस्य तत्र लोप इति प्रतिपत्तव्यः। न ह्यनेन लिङ्गाधिकार आदृत इति ॥१२८।

### [क० च०]

**व्यञ्जन०।** ननु सूत्रमिदं किमर्थम्, 'वाक्- तडिद्' इत्यादिषु विभक्तिसकारस्योपरि परगमने सति संयोगान्तलोपेनैव सिध्यति। एतदेवाह – संयोगान्त इत्यादि **वृत्तिः**। ननु संयोगान्तलोपेन सिध्यतीति कथमिदमुच्यते यावता 'राजा, सखा' इत्यादौ संयोगान्तलोपे सति न संयोगान्तावित्यादिनाऽलुप्तवद्भावात् लिङ्गान्तनकारलोपो न स्यात् ? सत्यम्, 'न संयोगान्तौ' इति लिङ्गस्य विशेषणत्वात्। अत्र तु विभक्तिसंबन्धी संयोगान्त इति **कुलचन्द्रः**। तन्न, **"लिङ्गान्तनकारस्य"** (२।३।५६) इत्यत्र पुनर्लिङ्गग्रहणम् उत्तरत्र सामान्यार्थमिति **वृत्तौ** वक्ष्यमाणत्वात्। तेन **"न संयोगान्तौ०"** (२।३।५८) इत्यत्र सामान्यसंयोगान्तलोपेऽप्यलुप्तवद्भाव इति।

**वस्तुतस्तु** कतमोऽयं (कथमयम्) पूर्वपक्षः संयोगान्तलोपस्यालुप्तवद्भावेऽपि व्यञ्जनमाश्रित्य नकारलोपो बाधकाभावादिति **महान्तः** सिद्धान्तयन्ति। नन्वादेर्धुटो लोपो भवन् नियमेनैव भवति। तथा च वक्ष्यति – **"स्कोऽट्ट - अदृड् - श्च्युतामादेः"** इत्यतो

'वाक्, सुपयाः' इत्यादौ आदिधुटो लोप एव दोषो भवतु । तत् कथं 'तडिद्' इत्यादौ आदिधुटो लोपप्रसङ्ग इत्याह - लिङ्गं चेत्यादि **वृत्तिः**। चकार उक्तसमुच्चयमात्रे। **वररुचिस्तु** चकारात् पूर्वसूत्रस्यानित्यता, तेन 'सुमङ्गलीरियं वधूः' (ऋ० १०।८५।३३) इति ब्रूते । तन्न, **अपाणिनीयत्वात्** ॥१२८।

**[समीक्षा]**

'वाच् + सि, तडित् + सि' इस अवस्था में व्यञ्जनवर्ण 'च् - त्' से परवर्ती सि-प्रत्यय का लोप करके कातन्त्रकार ने 'वाक्, तडित्' आदि शब्दों की सिद्धि की है। पाणिनि का भी ऐसा ही विधान है – **"हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्"** (अ० ६।१।६८)। पाणिनि का 'हल्' पदव्यवहार कृत्रिमता तथा कातन्त्रकार का व्यञ्जनपदव्यवहार लोकव्यहारप्रसिद्धि को सूचित करता है

व्याख्याकारों के पूर्वपक्षानुसार लोपसूत्र बनाने की कोई आवश्यकता नहीं है, संयोगान्तलोप से ही अभीष्टसिद्धि हो जाएगी। इसका समाधान करते हुए कहा गया है कि संयोगान्तलोप को बाधकर **"संयोगादेर्धुटः"** (२।३।५५) से संयोगादिलोप होने लगेगा। अथवा संयोगान्तलोप में लिङ्ग का अधिकार है, 'सि' प्रत्यय की लिङ्गसंज्ञा नहीं होती। अतः संयोगान्तलोप न होने से अभीष्टसिद्धि नहीं होगी। अतः सूत्रकार ने प्रकृत सूत्र बनाया है।

**[रूपसिद्धि]**

१. **वाक्**। वाच् + सि। प्रकृत सूत्र से 'सि' का लोप, **"चवर्गदृगादीनां च"** (२।३।४८) से च् को ग् तथा **"वा विरामे"** (२।३।६२) से ग् को क् आदेश।

२. **तडित्**। तडित् + सि। प्रकृत सूत्र से 'सि' का लोप ॥१२८।

## १२९. अग्नेरमोऽकारः [२।१।५०]

**[सूत्रार्थ]**

अग्निसंज्ञक से परवर्ती द्वितीयाविभक्ति – एकवचन 'अम्' प्रत्यय के अकार का लोप होता है ॥१२९।

[दु० वृ०]

अग्निसंज्ञकात् परोऽमोऽकारो लोपमापद्यते । अग्निम्, पटुम् ॥१२९।

[क० च०]

**अग्नेः** । ननु अम्ग्रहणं किमर्थम्, अग्नेरकार इत्यास्ताम् । जसादीनां तु अकारलोपो न भविष्यति यस्मात् तेषु स्वरादेशत्वात् "**इरेदुरोज्जसि**" (२।१।५५) इत्यादिना एत्वादय एव सन्ति बाधका इति । सत्यम्, अम्ग्रहणं लाक्षणिकाग्नेः परिग्रहार्थम् । तेन '**अतिचित्रगुम्**' इत्यत्रापि अमोऽकारलोप इति **कश्चित्**। तन्न । वर्णविधौ लाक्षणिकपरिभाषा नास्तीति ज्ञापितत्वात् । तथाहि-'समस्थित' इत्यत्र "**स्थादोरिरद्यतन्यामात्मने**" (३।५।२९) इत्यनेन आकारस्येकारे कृते लाक्षणिकत्वादेव गुणो न भविष्यति । यत्तु गुणनिषेधार्थं "**स्थादोश्च**" इति सूत्रं तद् बोधयति - वर्णविधौ लाक्षणिकपरिभाषा नास्तीति । तस्माद् अग्नेरमोऽकारो लोपमापद्यतेऽग्न्यन्तस्य वा लोपमापद्यते इति शङ्कानिरासार्थममृग्रहणम् ॥१२९।

[समीक्षा]

'अग्नि+अम्, पटु+अम्' इस अवस्था में अग्निसंज्ञक 'अग्नि, पटु' शब्दों से परवर्ती अम्प्रत्यय के अकार का लोप करके कातन्त्रकार 'अग्निम्, पटुम्' रूप सिद्ध करते हैं । पाणिनि ने यहाँ पूर्वरूप का विधान किया है-"**अमि पूर्वः**" (अ० ६।१।१०७) । वस्तुतः अकार का लोप न होने के कारण कातन्त्रकार द्वारा किया गया अकार का लोपविधान ही समीचीन है ।

[रूपसिद्धि]

१. **अग्निम्** । अग्नि+अम् । "**इदुदग्निः**" (२।१।८) से 'अग्नि' शब्दघटित इकार की अग्निसंज्ञा तथा प्रकृत सूत्र द्वारा द्वितीयाविभक्ति-एकवचन 'अम्' प्रत्यय के अकार का लोप ।

२. **पटुम्** । पटु+अम् । "**इदुदग्निः**" (२।१।८) से पटुशब्दघटित उकार की अग्निसंज्ञा तथा उससे परवर्ती द्वितीयाविभक्ति-एकवचन 'अम्' प्रत्यय के अकार का लोप ॥१२९।

## १३०. औकारः पूर्वम् [२।१।५१]

**[सूत्रार्थ]**

अग्निसंज्ञक ईकार-ऊकार से परवर्ती प्रथमा-द्वितीया विभक्तियों के द्विवचन का औकार पूर्ववर्ती स्वर को प्राप्त होता है ॥१३०।

**[दु० वृ०]**

अग्नेः पर औकारः पूर्वस्वरमापद्यते । **अग्नी, पटू, बुद्धी, धेनू** ॥१३०।

**[दु० टी०]**

**औकारः**। अविशेषात् प्रथमाद्विवचनं द्वितीयाद्विवचनं च गृह्यते। **वृत्तौ** पूर्वस्वरमापद्यत इति **स्वरग्रहणं सुखप्रतिपत्त्यर्थम्** इदुतावेवाग्नी यस्मात् ॥१३०।

**[समीक्षा]**

'अग्नि+औ, पटु+औ, बुद्धि+औ, धेनु+औ' इस अवस्था में 'औ'-स्वर पूर्ववर्ती 'इ-उ' स्वरों को प्राप्त होता है। तदनन्तर समानलक्षण दीर्घ होकर 'अग्नी, पटू, बुद्धी, धेनू' आदि शब्दरूप कातन्त्रकार के अनुसार सिद्ध होते हैं। एतदर्थ पाणिनि एकही सूत्र द्वारा पूर्वसवर्णदीर्घ का विधान करते हैं – "**प्रथमयोः पूर्वसवर्णः**" (अ० ६।१।१०२)।

**[रूपसिद्धि]**

१. **अग्नी**। अग्नि+औ। "**इदुदग्निः**" (२।१।८) से अग्निसंज्ञा, प्रकृत सूत्र से औकार को इकार, "**समानः सवर्णे दीर्घीभवति परश्च लोपम्**" (१।२।१) से अग्नि-शब्द-घटित इकार को दीर्घ तथा परवर्ती इकार का लोप।

२. **पटू**। पटु+औ। "**इदुदग्निः**" (२।१।८) से अग्निसंज्ञा, प्रकृत सूत्र से औकार को उकार, "**समानः सवर्णे दीर्घीभवति परश्च लोपम्**" (१।२।१) से पूर्ववर्ती उकार को दीर्घ एवं परवर्ती उकार का लोप।

३. **बुद्धी**। बुद्धि+औ। पूर्ववत् अग्निसंज्ञा, औकार को इकार, पूर्ववर्ती इकार को दीर्घ एवं परवर्ती इकार का लोप।

४. **धेनू**। धेनु+औ। पूर्ववत् अग्निसंज्ञा, औकार को उकार, समानलक्षण दीर्घ तथा परवर्ती उकार का लोप ॥१३०।

## १३१. शसोऽकारः सश्च नोऽस्त्रियाम् [२।१।५२]

### [सूत्रार्थ]

अग्निसंज्ञक इकार – उकार से परवर्ती द्वितीयाविभक्ति – बहुवचन 'शस्' प्रत्ययस्थ अकार पूर्ववर्ती स्वर को प्राप्त होता है तथा अन्तिम वर्ण सकार के स्थान में नकारादेश भी होता है ॥१३१।

### [दु० वृ०]

अग्नेः परः शसोऽकारः पूर्वस्वरमापद्यते, सश्च नो भवत्यस्त्रियाम् । **अग्नीन्, पटून्।** अस्त्रियामिति किम् ? बुद्धीः, धेनूः ॥१३१।

### [दु० टी०]

**शसो०**। शसश्चेति षष्ठी प्रथमा वा यद्युकार उच्चारणार्थः स्यान्न इति अस्वर एवाभिधीयते, अकारस्योच्चारणार्थत्वात् । 'जातीः पुष्पाणि' इति पुष्पेऽपि वर्तमानो जातिशब्दः स्त्रियामेव वर्तते । अस्त्रियामिति सन्निहितस्य कार्यस्य प्रतिषेधो यस्माद् वाक्यार्थद्वयम् – 'शसोऽकारः पूर्वमापद्यते' इत्येको वाक्यार्थः । 'सश्च नोऽस्त्रियाम्' इति द्वितीयः । स्त्रीलिङ्गविशिष्टाल्लिङ्गात् परस्य सस्य नो न भवतीत्यर्थः । **"बह्वल्पार्थात् कारकाच्छस् मङ्गले गम्यमाने"** (२।६।४०-८ तमादिगणे) इति कारकत्वाच्छस्प्रत्ययः । 'बहुशः, कोटिशः' इत्यत्र न भवति, स्यादिसम्बन्धात् ।

ननु 'शस्' इति प्रथमैवास्ताम् । शस् पूर्वमापद्यते सश्च नो भवतीति वचनात् । अकार एव पूर्वं लभ्यते । शसिति प्रथमान्तोऽपि सश्चेति सम्बन्धषष्ठीतया विपरिणमते इति । नैवम्, यदा **'अस्त्रियाम्'** इति प्रतिषेधः स्यात् तदा सर्व एव शस् पूर्वमापद्यते । अथ 'शसः' इति षष्ठ्या निर्दिश्यते इति चेत्, सश्चेति चकारः शसोऽनुक्तमप्यवयवं समुच्चिनोति । शसोऽवयवः पूर्वमापद्यते सश्च नो भवतीति **प्रतिपत्तिरियं गरीयसीति ।** नपुंसके हि परत्वाच्छिरादेशे इति अस्त्रियामित्युच्यते । यद्येवं पुंसीति किमिति न विदध्यात् । नैवम्, वक्ष्यमाणे हि योगे नपुंसकेऽपीष्यते – अमुना कुलेनेति । तस्माद् अस्त्रियाम् इति विधेयम् ॥१३१।

[वि० प०]

**शसो०** । इह चकारकरणाद् वाक्यार्थद्वयम् । एकः शसोऽकारः पूर्वस्वरमापद्यते, अन्यः सश्च न इति । अत्र 'अस्त्रियाम्' इति सन्निहितेनैव संबध्यते, न तु व्यवहितेनेत्याह – सश्च नो भवत्यस्त्रियामिति । सान्निध्यं तु पाठकृतमेव ॥१३१।

[क० च०]

**शसो०** । ननु शसोऽकारः सकारनकारौ भवत इत्यर्थः कथं न स्यादिति चेत्, न । तदा चकारं विहाय स्नाविति विदध्यादित्याह – इह चकारेत्यादि । तस्मात् स इति षष्ठ्यन्तं पदम् । ननु 'कार्यं कार्येण हन्यते' इति न्यायात् कथं पूर्वस्वरमापद्यते इत्युच्यते अकारः सकारश्च नकारो भवतीत्यर्थः कथन्न स्यात्, नैवम् । यद्यादेशस्यैकत्वमुच्यते तदा 'शस् न' इति विदध्यात् । आदेशद्वयं चेत् तदा शसो नकाराविति कृतं स्यात्, किं भिन्नवाक्यार्थचकारकरणेनेति ? अत एव **हेमकरे**णापि पूर्वकार्यस्य न बाधेत्युक्तमित्याह – चकारेत्यादि ॥१३१।

[समीक्षा]

'अग्नि + शस्, पटु + शस्' इस अवस्था में कातन्त्रकार अ को इ तथा स् को न् आदेश करके 'अग्नीन्, पटून्' शब्दरूप सिद्ध करते हैं । पाणिनि ने पूर्वसवर्ण दीर्घ तथा सकार को नकारादेश का विधान किया है – **"प्रथमयोः पूर्वसवर्णः, तस्माच्छसो नः पुंसि"** (अ० ६।१।१०२, १०३)। अतः उभयत्र साम्य ही है ।

व्याख्याकारों ने सूत्र के 'शसोऽकारः सकारनकारौ भवतः' तथा '**शसोऽकारः** सकारश्च नकारौ भवतः' इन अर्थों की भी कल्पना की है, परन्तु **हेमकर** आदि आचार्यों के अभिमतानुसार दो अर्थों वाले ही पक्ष को समीचीन बताया गया है – १. शसोऽकारः पूर्वस्वरमापद्यते, २. सश्च नो भवत्यस्त्रियाम् ।

[रूपसिद्धि]

१. **अग्नीन्** । अग्नि + शस् । **"इदुदग्निः"** (२। १।८) से अग्निसंज्ञा, प्रकृत सूत्र से 'शस्' प्रत्यय - घटित अकार को इकार, **"समानः सवर्णे दीर्घीभवति परश्च लोपम्"** (१।२।१) से पूर्ववर्ती इकार को दीर्घ, परवर्ती इकार का लोप तथा शस्प्रत्ययस्थ सकार को नकारादेश ।

२. **पटून्।** पटु + शस् । पूर्ववत् अग्निसंज्ञा, अकार को उकार, दीर्घ, परवर्ती उकार का लोप तथा सकार को नकारादेश ।।१३१।

## १३२. टा ना [२।१।५३]

**[सूत्रार्थ]**

अग्निसंज्ञक शब्द से परवर्ती तृतीयाविभक्ति– एकवचन 'टा' प्रत्यय को 'ना' आदेश होता है, स्त्रीलिङ्ग से भिन्न स्थल में ।।१३२।

**[दु० वृ०]**

अग्नेः परस्य टावचनस्य नादेशो भवत्यस्त्रियाम् । **अग्निना, पटुना** । अस्त्रियामिति किम् ? बुद्ध्या, धेन्वा ।।१३२।

**[दु० टी०]**

**टा ना ।** नपुंसके न्वागमेनैव सिद्धत्वात् कथं दृढमतिना सुधेनुना पुंसेति, नैवम् । अन्यपदार्थत्वाद् बहुव्रीहेरवयवस्याप्रधानतेति कुतोऽस्त्रियामिति प्रतिषेधः ।।१३२।

**[क० च०]**

**टा ना** । टा इति षष्ठ्यादिलोपो दीर्घात् परलोप इत्यनेन, ततो **"घोषवति लोपम्"** (१।५।११) इति विसर्गलोप इति **कुलचन्द्रप्रभृतयः** । तन्नातिपेशलम् । यावता **"आ धातोरघुट्स्वरे"** (२।२।५५) इत्यनेन योगविभागादाकारलोपो भवितुमर्हति । यथा **"क्त्वो यप्"** (४।६।५५) इति, तस्मात् 'टा' इति लुप्तप्रथमैकवचनमिति युक्तम् । यत्तु **वृत्तौ** षष्ठ्यन्तं विवृतं तत् तात्पर्यकथनमात्रम् । एवं सति 'अनादेश' इति नाशङ्कनीयम्, इच्छतिनैककर्तृकादिति ज्ञापकात् ।।१३२।

**[समीक्षा]**

'अग्नि + टा, पटु + टा' इस अवस्था में कातन्त्र तथा पाणिनीय दोनों ही व्याकरणों में 'टा' को 'ना' आदेश किया गया है । पाणिनि ने 'टा' के लिए 'आङ्' का प्रयोग किया है । ज्ञातव्य है कि पूर्वाचार्य 'टा' के लिए 'आङ्' का प्रयोग करते थे । पाणिनि ने तृतीया– एकवचन में 'टा' प्रत्यय पढ़ा है – **"स्वौजसमौट्छष्टा०"** (अ० ४।१।२), ऐसी स्थिति में भी जो **"आङो नाऽस्त्रियाम्"** (अ० ७।३।१२०)

सूत्र में टा के लिए 'आङ्' शब्द पढ़ा है, उसका स्पष्टीकरण विना व्याख्यात्रों का अवलोकन किए नहीं हो पाता।

**[रूपसिद्धि]**

१. **अग्निना।** अग्नि + टा। प्रकृत सूत्र द्वारा अग्निसंज्ञक शब्द से परवर्ती टा को 'ना' आदेश।

२. **पटुना।** पटु + टा। पूर्ववत् अग्निसंज्ञा तथा 'ना' आदेश ॥१३२।

## १३३. अदोऽमुश्च [२।१।५४]

**[सूत्रार्थ]**

'अदस्' शब्द को 'अमु' तथा 'टा' को 'ना' आदेश होता है, स्त्रीलिङ्ग से भिन्न स्थल में ॥१३३।

**[दु० वृ०]**

अदसोऽमुरादेशो भवत्यस्त्रियाम्, टावचनस्य च नादेशः। अमुना। अस्त्रियामिति किम् ? अमुया ॥१३३।

**[दु० टी०]**

**अदो०**। अदसस्त्यदाद्यत्वे टावचनस्य च नादेशे कृते तत एत्वे पदे निष्पन्ने मत्वे च सत्युत्वं मादित्येकारस्य दीर्घत्वेऽमुनेति प्राप्ते वचनमिदमारभ्यते। चकारेणानुकृष्यमाणे नादेशोऽदसो न भवति, अनन्तरटानुवृत्तेः। यद्येवम् अग्नित्वात् पूर्वेणैव सिद्धम्, चकारकरणमनर्थकम्, नैवम्। **'अर्थवशाद् विभक्तिविपरिणामः'** (कात० प० २५) इति टावचने परेऽमुरादेशः। ततः सन्निपातलक्षणत्वाद् नादेशो भवतीति चकारः क्रियते। नच वक्तव्यम्, नादेश एवास्ताम् अमुरादेशः किमर्थम्, यस्मादकारस्य घोषवति दीर्घत्वे सति **'स्थानेऽन्तरतमः'** (कात० प० १६) इति मादुत्वं दीर्घः स्यात्। अदसः सर्वनाम्नो रूढित इह ग्रहणात् 'अमुमतिक्रान्तेनात्यदसा' इति भवितव्यम्। तर्हि कथम् अमुकेनादस इति व्यक्तिनिर्देशात्। तेन अक्-युक्तस्य यथालक्षणमेवादेशे वा कृते पश्चादत्र को भवति, तत्र बहुलत्वात्। **अमुयेति**। अदसस्त्यदाद्यत्वम्, स्त्रियामादा, टौसोरे, ए अय्, अदसः पदे मः, उत्वं मात् ॥१३३।

**[वि० प०]**

**अदो०** । अद इति षष्ठ्यादिलोपः, सूत्रत्वात् । अमुनेति पुंसा नपुंसकेन वेत्यर्थः । **अमुयेति** । अदस्– त्यदाद्यत्वम् (२।३।२९), स्त्रियामादा (२।४।४९), टौसोरे (२।१।३८), अयादेशः (१।२।१२), **"अदसः पदे मः"** (२।२।४५) इति मत्वम्, **"उत्वं मात्"** (२।३।४१) इति उत्वम् ।।१३३।

**[क० च०]**

**अदो०** । अद इति षष्ठ्यादिलोप इत्यादि । ङसो लोप इत्यर्थः । 'मु' इति आदेशो नाशङ्क्यते, स्वरादिप्रकृतेः स्वराद्यादेशस्य युक्तार्थत्वात् । नन्वत्र चकारः किमर्थः ? आदेशे कृते नादेशस्य पूर्वेणैव सिद्धत्वात् । नैवम्, संनिपातलक्षणत्वान्न स्यात् । न चाग्रे गुणः क्रियताम् । त्यदाद्यत्वे साध्यस्य सिद्धिरिति वाच्यम् । घोषवति दीर्घे 'अमुना' इति स्यात् ।।१३३।

**[समीक्षा]**

'अदस् + टा' इस अवस्था में कातन्त्रकार 'अदस्' को 'अमु' और 'टा' को 'ना' आदेश करके 'अमुना' प्रयोग निष्पन्न करते हैं, जबकि पाणिनि ने अकार को उकार, दकार को मकार तथा टा को ना-आदेश करके 'अमुना' शब्द सिद्ध किया हैं– **"अदसोऽसेर्दादु दो मः"** (अ० ८।२।८०) । इस प्रकार कार्यसंख्या की दृष्टि से उभयत्र साम्य है ।

**[रूपसिद्धि]**

१. **अमुना** । अदस् + टा । **"त्यदादीनाम विभक्तौ"** (२।३।२९) से स् को अ, **"अकारे लोपम्"** (२।१।१७) से पूर्ववर्ती अकार का लोप, प्रकृत सूत्र से 'अद' को 'अमु' तथा 'टा' को 'ना' आदेश ।।१३३।

## १३४. इरेदुरोज्जसि [२।१।५५]

**[सूत्रार्थ]**

लिङ्ग = प्रातिपदिक के अन्त्यावयव इकार के स्थान में एकार तथा उकार के स्थान में ओकार आदेश होता है, जस् प्रत्यय के पर में रहने पर ।।१३४।

[दु० वृ०]

लिङ्गस्येरेद् भवत्युरोच्च जसि परे । अग्नयः, पटवः, बुद्धयः, धेनवः ।।१३४।

[दु० टी०]

**इरेत्०** ।अग्निरिह प्रकृत एव पुनरिकारोकारग्रहणम् अस्त्रियामित्यधिकारनिवृत्त्यर्थम् । अन्यथा एदोतौ गुणो वेति सूत्रे कृते **'स्थानेऽन्तरतमः'** (कात० प० १६) इति सिध्यत्येवेत्याह –बुद्धयः, धेनव इति । बुद्धि - धेनू स्त्रियां वर्तेते । कार्यिकार्ययोरभिन्नविभक्तिनिर्देश इह स्पष्टार्थः ।।१३४।

[वि० प०]

**इरेत्०** ।अग्नेरित्यधिकृतत्वाद् एदोतौ जसि गुणो वेति सिद्धे पुनरिकारोकारग्रहणं व्यक्त्यवधारणार्थम् ।तेन 'अस्त्रियाम्' इति न संबध्यते ।अतः स्त्रीलिङ्गमप्युदाहरति - 'बुद्धयः, धेनवः' इति ।।१३४।

[क० च०]

**इरेत्०** ।नन्विह इकारोकारयोर्ग्रहणस्य व्यक्त्यर्थत्वात् तावेव 'ङे' इति सूत्रे वर्तेते । ततः'सख्ये' इत्यत्रापि 'ङे' इत्यनेन एत्वं स्यात् ।अग्निकार्यत्वाभावेन **"न सखिष्टादावग्निः"** (२।२।१) इत्यनेन निषेधस्याविषयत्वादिति चेत्, न। इदमप्यग्निकार्यम्, इकारोकारयोरग्निकार्यत्वाव्यभिचारात् ।।१३४।

[समीक्षा]

'अग्नि+जस्, पटु+जस्' इस अवस्था में इ को ए तथा उ को ओ आदेश करके कातन्त्रकार 'अग्नयः, पटवः' शब्दरूप सिद्ध करते हैं। यहाँ पाणिनि ने गुणसंज्ञापूर्वक गुणादेश किया है – **"जसि च"** (अ० ७।३।१०९)। अतः उभयत्र साम्य ही है।

[रूपसिद्धि]

१. **अग्नयः।** अग्नि+जस् ।प्रकृत सूत्र से 'अग्नि' शब्दघटित इकार को एकार, **"ए अय्"** (१।२।१२) से एकार को 'अय्' तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से स् को विसर्ग।

२. **पटवः**। पटु+जस्। प्रकृत सूत्र-द्वारा उकार को ओकार, **"ओ अव्"** (१।२।१४) से ओकार को 'अव्' तथा सकार को विसर्गादेश।

३-४. **बुद्धयः**। बुद्धि+जस्। **धेनवः**। धेनु+जस्। पूर्ववत् एकार-ओकार-अय्-अव् तथा विसर्गादेश ॥१३४।

## १३५. सम्बुद्धौ च [२।१।५६]

**[सूत्रार्थ]**

संबुद्धिसंज्ञक 'सि' प्रत्यय के पर में रहने पर लिङ्ग=प्रातिपदिक के अन्त्यावयव इकार को एकार तथा उकार को ओकार आदेश होता है ॥१३५।

**[दु० वृ०]**

**संबुद्धौ**। लिङ्गस्येरेद् भवत्युरोच्च। हे अग्ने ! हे धेनो ! अग्नेः संबुद्धावित्येके - हे नदि, हे वधु ॥१३५।

**[दु० टी०]**

**संबुद्धौ०**। ननु नद्याः संबुद्धौ ह्रस्वत्वे कृतेऽपि प्राप्नोति। नच वक्तव्यम् **'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्'** (कात० प० पा० ७५) नतु लाक्षणिकस्येति। 'हे अतिनदे, हे अतिचित्रगो' इति न सिध्यति। अथ श्रुतयोरिकारोकारयोः संबोधने स्याच्चेत्। इः कामः, उरीशः ए– ओ इति भवितुमर्हति ? सत्यम्। इकारोकारयुक्तोऽपि तथोपचर्यते, व्याप्त्या च यथा दण्डयुक्तो दण्डस्तस्य संबोधनं 'हे दण्डेति, हे नदि, हे वधु' इत्यत्र ह्रस्वात् प्राङ् नदीयुक्तस्य संबोधनं प्रवृत्तम्, न ह्रस्वावस्थायामिति कुतः प्रसङ्गः। **अन्यः** पुनराह – विहितविशेषणं कर्तव्यम्। अग्नेर्विहितायां संबुद्धाविति। इकार उकार इति प्रथमाया अपि **'व्याख्यानतो विशेषार्थप्रतिपत्तिः'** (कात० प० ६५) इति पञ्चम्या विपरिणामोऽग्नेरित्यनुवर्तते वा इत्याह – अग्नेरित्यादि। इह तु **मतान्तरमेव** दर्शितम् ॥१३५।

**[वि० प०]**

**सम्बुद्धौ०**। अथ नद्याः संबुद्धौ ह्रस्वत्वे सति कथम् एत्वम् ओत्वं च न भवति ? लाक्षणिकत्वादिति चेत्, तदयुक्तम्, 'हे अतिनदे, हे चित्रगो' इत्यत्राप्यभावप्रसङ्गात्।

तथाहि – नदीमतिक्रान्तः, चित्रा गौर्यस्येति विग्रहे गोरप्रधानस्यान्त्यस्य स्त्रियामादादीनां चेति ह्रस्व इत्यस्त्येव लाक्षणिकत्वमित्याह - अग्नेः संबुद्धावित्यादि । इकारोकारावधिकृतौ प्रथमान्तावपि व्याख्यानतो विशेषार्थप्रतिपत्तेः पञ्चम्यन्तौ तौ चार्थादग्निः । अथवा प्रकृतत्वाद् अग्निरित्यनुवर्तते, ततो विहितविशेषणव्याख्यानम् अग्नेर्विहितायां संबुद्धावित्यर्थः । तेन 'हे नदि, हे वधु' इत्यत्र नद्याः संबुद्धिर्विहिता, ततो ह्रस्व इति कुतः प्राप्तिः । **एकेऽन्ये** इत्यर्थः । इह तु ह्रस्वकरणसामर्थ्यादिव न भवति । अन्यथा तत्र संबुद्धावेदोतौ गुणो वेति कुर्यात् ॥१३५।

**[क० च०]**

**सम्बुद्धौ** । व्याख्यानत इति । व्याख्यानं पुनरेतत् । यदि प्रथमान्ताविकारोकारावधिकर्तुमिष्टौ तदा इरेदुरोज्जस्संबुद्धावित्येकमेव सूत्रं विदध्यात्, "तौ चार्थादग्निः" इति । तावित्यनेन अग्निशब्दसामानाधिकरण्यादुभयत्र द्विवचनसंभावनायामपि सामान्यविशेषभावेनाग्निशब्दादेकवचनम् । न च सामान्यरूपत्वान्नपुंसकत्वमाशङ्कनीयम्, अग्निशब्दस्याजहल्लिङ्गत्वात् । ननु यदि "इरेदुरोज्जस् संबुद्धौ" इति क्रियते तदा कथं यथासङ्ख्यं न सम्भाव्येत इत्याह – अथवेति । चकारोऽनित्यार्थस्तेन **'वरतनु सम्प्रवदन्ति कुक्कुटाः'** इति **वररुचिः । स्वमते** दीर्घान्ततनूशब्देन साध्यम्, समासान्तविधेरनित्यत्वाद् **"गोरप्रधानस्य"** (कात० परि०-नाम० ८१) इत्यादिना न ह्रस्वः ॥१३५।

**[समीक्षा]**

'हे अग्नि + सि, हे धेनु + सि' इस अवस्था में कातन्त्रकार ने स्पष्टावबोधार्थ इ को ए तथा उ को ओ आदेश करके 'हे अग्ने ! हे धेनो !' रूप सिद्ध किए हैं, जबकि पाणिनि ने संज्ञानिर्देशपूर्वक गुणादेश किया है – **"ह्रस्वस्य गुणः"** (अ० ७।३।१०८)। संज्ञापूर्वक निर्देश भी सुखार्थ माना जाता है। अतः उभयत्र साम्य है।

**[रूपसिद्धि]**

१. **हे अग्ने !** हे अग्नि + सि । **"आमन्त्रिते सिः सम्बुद्धिः"** (२।१।५) से 'सि' की सम्बुद्धिसंज्ञा, प्रकृत सूत्र द्वारा इकार को एकार तथा भूतपूर्वगति के आश्रय से **"ह्रस्वनदीश्रद्धाभ्यः"** (२।१।७१) द्वारा 'सि' का लोप।

२. **हे धेनो !** हे धेनु + सि । पूर्ववत् संबुद्धिसंज्ञा, इकार को एकार तथा सि का लोप ॥१३५।

# १३६. ङे [२।१।५७]

**[सूत्रार्थ]**

चतुर्थी विभक्ति–एकवचन 'ङे' प्रत्यय के परवर्ती होने पर लिङ्ग = प्रातिपदिकसंज्ञक शब्द के अन्त्यावयव इकार को एकार तथा उकार को ओकार आदेश होता है ।।१३६।

**[दु० वृ०]**

ङयि परतो लिङ्गस्येरेद् भवत्युरोच्च । **अग्नये, पटवे, बुद्धये, धेनवे ।** 'ङे' इत्यविकृतनिर्देशात्– **बुद्ध्यै,** धेन्वै ।।१३६।

**[दु० टी०]**

**ङे ।** अथैकयोगमेव कथं न कुर्वीत– "**जसुसंबुद्धिङेष्विति**" । नैवम्, इह व्याख्यातव्यम्– ङ्यीति निर्देशे प्राप्ते यदविकृतनिर्देशं करोति, विकृते ङेवचने मा भूदिति 'बुद्ध्यै, धेन्वै' तदादेशस्तद्वदिति । ननु **'येन नाप्राप्ति०'** (व्या० परि० ४२) न्यायेन "**ह्रस्वश्च ङवति**" (२।२।५) इति नदीवद्भावोऽग्निकार्यं बाधिष्यते, अग्निकार्ये हि प्राप्ते नदीवद्भाव इति न वत्करणं स्वाश्रयार्थम्, नैवम् । विभाषैव साधिता स्वाश्रयानुवृत्तिरिति न यत्रांशे नदीवद्भावस्तत्रांशेऽग्निकार्यमिति भावः, तर्हि भिन्नयोगः सार्थक इति ।।१३६।

**[वि० प०]**

**ङे ।** ननु किमर्थं 'ङे' इति सप्तम्या आदिलोपः, यावता ङ्यीति निर्देशे स्पष्टं भवति । न चेह विभक्तिकृतं गौरवं चिन्त्यते इत्याह - ङे इत्यादि । ह्रस्वश्च ङवतीति नदीवद्भावविधानाद् विकृते ङेवचने मा भूदित्यर्थः ।अत एव जसुसंबुद्धिङेष्वित्येकयोगो न कृतः । तथाहि विकृतनिर्देशस्याप्राप्तेः कथमेवमुच्यते । ननु तथापि येन नाप्राप्ति-न्यायेन नदीवद्भावोऽग्निकार्यं बाधिष्यते, अग्निकार्ये हि प्राप्ते नदीवद्भावो विधीयते इत्युक्तम् । वत्करणस्य स्वाश्रयार्थत्वादिति नदीवद्भावपक्षेऽपि अग्नित्वमस्तीत्यग्निकार्यं स्यादेवेति ।।१३६।

**[क० च०]**

**ङे ।** न चेह विभक्तिकृतं लाघवं चिन्त्यते इति विभक्त्यभावेन कृतं यल्लाघवं तदपि विभक्तिकृतमुपचाराद् विभक्तिशब्देन विभक्त्यभाव उच्यते । यथा मरुदेशे

जलदुःखमिति। नन्वित्यादि। ननु भिन्नविषयत्वात् कथं बाध्यबाधकत्वम्, तथाहि अग्निकार्यं प्रकृतौ विधीयते नदीकार्यं च विभक्तिस्थाने इति, नैवम्। यस्यां प्रकृतावग्निकार्यमेव विधीयते व्यपदेशातिदेशपक्षे तस्यामेव नदीत्वं विधीयते इति ॥१३६।

**[समीक्षा]**

'अग्नि + ङे, पटु + ङे, बुद्धि + ङे, धेनु + ङे' इस स्थिति में कातन्त्रकार लिङ्गस्थ इकार को एकार तथा उकार को ओकार आदेश करके'अग्नये, पटवे, बुद्धये, धेनवे' रूप सिद्ध करते हैं। पाणिनि ने संज्ञानिर्देशपूर्वक गुणविधान किया है– **"घेर्ङिति"** (अ० ७।३।१११)। एकारादिविधान स्पष्टावबोधार्थ तथा संज्ञापूर्वक निर्देश सुखार्थ माना जाता है। अतः उभयत्र साम्य ही है।

व्याख्याकारों ने 'ङे' इस अविकृत सूत्रनिर्देश के आधार पर कहा है कि जहाँ कोई विकार हो जाता है वहाँ सूत्र प्रवृत्त नहीं होता। अतः 'बुद्ध्यै, धेन्वै' में इ को ए एवं उ को ओ आदेश नहीं हुआ है।

**[रूपसिद्धि]**

१. **अग्नये**। अग्नि + ङे। प्रकृत सूत्र द्वारा लिङ्गसंज्ञक 'अग्नि' शब्द के अन्त्यावयव इ को ए तथा **"ए अय्"** (१।२।१२) से 'अय्' आदेश।

२. **पटवे**। पटु + ङे। पूर्ववत् उ को ओ तथा **"ओ अव्"** (१।२।१४) से अव् आदेश।

३-४. **बुद्धये**। बुद्धि + ङे। **धेनवे**। धेनु + ङे। पूर्ववत् इ को ए तथा उ को ओ आदेश ॥१३६।

## १३७. ङसिङसोरलोपश्च [२।१।५८]

**[सूत्रार्थ]**

अग्निसंज्ञक शब्द से परवर्ती ङसि-ङस्प्रत्ययघटित अकार का लोप, इ को ए तथा उ को ओ आदेश होता है ॥१३७।

**[दु० वृ०]**

अग्निसंज्ञकात् परस्य ङसिङसोरकारस्य लोपो भवति, इरेच्च, उरोच्च। **अग्नेः, अग्नेः। धेनोः, धेनोः** ॥१३७।

## [दु० टी०]

**ङसि०**। ननु अलोपात् श्रूयते चकारः स कथं प्रधानतया न वाक्यार्थः इति ङसिङसोरकारलोपो भवति। इरेच्च उरोच्च भवति, **सम्बन्धस्य प्रयोक्तुरायत्तत्वात्।** यदि ङसिङसोः परयोः इरेद् भवति उरोद् भवति श्रुतयोरलोपश्चेति सुखार्थः स्यात् तदाऽन्वाचयशिष्टोऽयं चकारः शङ्क्यते। ततश्च 'बुद्ध्या, धेन्वा' इत्यत्राप्येत्वमोत्वं च स्यात्, नदीवद्भावेनाबाधितत्वात्। यथासङ्ख्यं तु न भवति, इकारस्य ङसिङस्भ्यां संबन्धाद् उकारस्य चेति वैषम्यात्। ततोऽयमेवार्थः सूत्रार्थेनाविर्भावित इति। ननु **'असोऽस्य लोपश्च'** इति कथन्न कुर्यात्, विशेषङकारादीननुबन्धानुत्सृज्य असमात्रमिह गृह्यते जसि शसि च विशेषविधानाद् ङसिङसोग्रहणमेवावसीयते ? सत्यम्। ङसिङसोरिति सुखप्रतिपत्त्यर्थमेव **'एकानुबन्धग्रहणे न द्व्यनुबन्धकस्य'** (व्या० परि० ४६) इति 'ङसिङसोरुपादानम् ॥१३७।

## [वि० प०]

**ङसि०**। यद्यपि अलोपशब्दात् श्रुतश्चकारस्तथापि **विशेषणविशेष्यभावस्य प्रयोक्तुरायत्तत्वा**देदोद्भ्यां सह संबध्यते इत्यत आह- इरेच्च उरोच्चेति। यदि पुनर्यथाश्रुतमेव संबन्धः स्यात् तदा ङसिङसोः परयोरिरेद् भवति, उरोद् भवति। अलोपश्च तयोरेव श्रुतत्वात् तदा चकारस्यान्वाचयशिष्टत्वाशङ्कायामकारलोपमन्तरेणापि प्रधानवाक्यनिर्दिष्टमेत्वमोत्वं च स्यात्। 'बुद्ध्याः, धेन्वाः' इति नदीवद्भावोऽप्यग्निकार्यं न बाधते इत्युक्तमेव। ततो ङसिङसोरिकारोकाराभ्यां सह सम्बन्धो न विवक्षितः, अपि तु अकारेण। ततो वैषम्यसंबन्धाद् यथासंख्यमपि नास्तीति। अत एव एकैकस्योदाहरणद्वयं प्रत्ययभेदाद् दर्शयति – अग्नेः, अग्नेः। धेनोः, धेनोरिति। अत एव सूत्रार्थेनाविर्भावितं ङसिङसोरकारस्येति। अथवा ङसिङस्भ्यामिकारोकारौ क्रमशः सम्बध्येते। ततोऽपि वैषम्यम् - ङसिङसोरलोपो भवति, इरेच्च भवति। ङसिङसोरलोपो भवति, उरोच्च। अत एव प्रत्येकं चकारः सम्बध्यते इति ॥१३७।

## [क० च०]

**ङसि०**। अन्वाचयशिष्टत्वाशङ्कायामिति शङ्कामात्रम्, न तु परमार्थतः, संनियोगशिष्टत्वसंभवेऽन्वाचयशिष्टत्वस्यान्याय्यत्वात्। अतस्तर्हि ङसिङसोरप्यकारद्वयं

ततोऽर्थकृतं यथासंख्यं कथन्न स्यात् । यथा ङवन्तीति सूत्रे इत्याह – अथवेति । क्रमशः संबध्यते इति युगपद् ङसिङसोरकारद्वयमादाय इकारोकाराभ्यां क्रमशः संबध्यते इत्यर्थः । एतदेव विवृणोति – तत इत्यादि ।।१३७।

**[समीक्षा]**

'अग्नि + ङसि - ङस्, धेनु + ङसि - ङस्' इस अवस्था में इ को ए, उ को ओ तथा ङसि-ङस्घटित अकार का लोप करके कातन्त्रकार ने 'अग्नेः, धेनोः' पद निष्पन्न किए हैं । पाणिनि 'इ- उ' का गुण करने के बाद अकार का पूर्वरूप करते हैं– **"घेर्ङिति, ङसिङसोश्च"** (अ० ७।३।१११; ६।१।११०) । वस्तुतः पाणिनीय पूर्वरूप की अपेक्षा कातन्त्रकार द्वारा किया गया अकारलोप प्रक्रियालाघव को सूचित करता है ।

**[रूपसिद्धि]**

१. **अग्नेः ।** अग्नि + ङसि- ङस् । प्रकृतसूत्र द्वारा ङसि - ङस्प्रत्ययस्थ अकार का लोप, इ को 'ए' आदेश तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से स् को विसर्ग ।

२. **धेनोः ।** धेनु + ङसि- ङस् । पूर्ववत् ङसि- ङस्प्रत्ययस्थ अकार का लोप, उ को ओ तथा स् को विसर्ग ।।१३७।

## १३८. गोश्च [२।१।५९]

**[सूत्रार्थ]**

'गो' शब्द से परवर्ती 'ङसि- ङस्' प्रत्ययों के अकार का लोप होता है ।।१३८।

**[दु० वृ०]**

गोशब्दात् परस्य ङसिङसोरकारस्य लोपो भवति । गोः, गोः ।।१३८।

**[दु० टी०]**

**गोः ।** गोशब्दस्य प्रधानस्यात्र ग्रहणम्, अप्रधानस्य ह्रस्वत्वे पूर्वेणैव सिद्धत्वात् । चित्रगोरिति । ओदिति न वर्तते ओकारस्योकारकरणमनर्थकमिति एदिति वर्तते चेद्, वचनबलाद् ओकारस्यौकार इति, नैवम् । अस्मादेव ज्ञापकादेकारस्य निवृत्तिरिति गम्यते ।।१३८।

**[वि० प०]**

**गोः ।** ओदिति न वर्तते, ओकारस्यौकारविधेरनर्थकत्वात् । अन्यथा अप्रधानस्य ह्रस्वत्वे सति सार्थकत्वमित्युक्तम् अग्नित्वात् । पूर्वेणैव सिद्धं चित्रगोरिति । अत एव प्रधानस्य गोशब्दस्य ग्रहणम् एकदेशविकृतस्यानन्यवद्भावेऽपि । यद्येवम्, एदिति कथं न वर्तताम् । वचनादोकारस्येकार इत्ययुक्तम् । एवं सति 'गोश्च' इति निर्दिशेत् ॥१३८।

**[क० च०]**

**गोः ।** गोश्चेति निर्दिशेदिति । अथ कथमिदमुच्यते यावता एदेतोरनुवर्तनस्य गोः, गोरिति पदद्वयस्य सिद्धिरेव प्रयोजनम् । ततश्च गोरित्यपि निर्देशो युज्यते, नैवम् । कतमोऽयं पूर्वपक्षः "**ङसिङसोरलोपश्च**" (२।१।५८) इत्यत्र चकारेणानुकृष्टत्वादेदोतोरनुवृत्तिरेव नास्ति । यत्तु **पञ्जिकायां** गोश्चेति निर्दिशेद् इत्युक्तं तत् प्रथमकक्षायामेव ॥१३८।

**[समीक्षा]**

'गो + ङसि - ङस्' इस अवस्था में अकार का लोप करके कातन्त्रकार ने 'गोः' पद सिद्ध किया है । पाणिनि यहाँ भी "**ङसिङसोश्च**" (अ० ६।१।११०) से पूर्वरूप का विधान करते हैं ।

**[रूपसिद्धि]**

१-२. **गोः ।** गो + ङसि- ङस् । प्रकृत सूत्र द्वारा ङसि- ङस् प्रत्ययघटित अकार का लोप तथा "**रेफसोर्विसर्जनीयः**" (२।३।६३) से स् को विसर्ग ॥१३८।

## १३९. ङिरौ सपूर्वः [२।१।६०]

**[सूत्रार्थ]**

अग्निसंज्ञक शब्द से परवर्ती सप्तमीविभक्ति - एकवचन 'ङि' प्रत्यय तथा अग्निसंज्ञक शब्द के अन्त्यावयवरूप स्वर के स्थान में 'औ' आदेश होता है ॥१३९।

**[दु० वृ०]**

अग्निसंज्ञकात् परो ङिः सह पूर्वेण स्वरेण और्भवति । अग्नौ, धेनौ ॥१३९।

[दु० टी०]

**ङिः**। सह पूर्वेण वर्तते इति **सपूर्वः**। सहशब्दोऽयं तुल्ययोगवचनः। दृष्टानुवृत्तिकतया पूर्व इकार उकारश्च प्रतिपत्तव्यः। न चानन्तरो गोशब्द इति हौ चेति ज्ञापकाद् वा गोश्चेत्यत्र चकारस्तावनुकर्षति उत्तरार्थ **इत्येके**। यद्येवं पूर्वेण सह ङिरौर्भवति इत्युक्ते पूर्वोऽप्यौकाररूपेण वर्तितुमर्हति, ततः स्थानिद्वयस्यादेशद्वयप्रसङ्ग इति, नैवम्। यथा मृत्पिण्डो घटो भवति इत्यपरेण मृत्पिण्डेन सह, यथा द्वयोः पूल्योः कटः कर्तव्य इत्युक्ते एक एव प्रतीयते लोके तथात्रापीति। यदि पुनर्विद्यमानवचनोऽयं सहशब्दः स्यात् तदा विद्यमानपूर्वो ङिरौर्भवति, व्यावृत्तिरपि नास्ति। सपूर्वग्रहणमनर्थकमेव स्यात्। "ङेर्डौ" इति कृते विंशतावित्यत्र तेर्विंशतेरपि डानुबन्धे ङेर्लोपः स्यात्, विभक्त्यनुवर्तने ङकार इह **सुखप्रतिपत्त्यर्थ** एव ॥१३९।

[वि० प०]

**ङिः**। प्रकृतत्वाद् अग्निरिह वर्तते, न त्वनन्तरगोशब्दः। "**हौ च**" (३।५।२४) इति ज्ञापकाद् वा इत्याह - अग्निसंज्ञकादिति ॥१३९।

[क० च०]

**ङिरौ**। प्रकृतत्वादिति। इदुतोरग्नित्वाव्यभिचाराद् "**इरेदुरोज्जसि**" (२।१।५५) इत्यतः इदुतोरनुवर्तनमेवाग्न्यनुवर्तनमिति न दोषः। विभक्त्यनुवर्तने ङकार इह **सुखप्रतिपत्त्यर्थ इति दुर्गः**। ननु एतन्न संगच्छते यावता 'अग्नी' इत्यत्र "**औकारः पूर्वम्**" (२।१।५१) इत्यनेन इकारे कृते औकारः पूर्वस्वरेण सह स्यादिति दूषणम्, तन्निरास एव प्रयोजनम्। न च वाच्यम्, इकारकरणादेव न भविष्यतीति पूर्वेण स्वरेण सहौकारकरणेन सप्रयोजनत्वात्। न च तर्हि "और्डौ" कुर्यादिति वाच्यम्। 'पटू' इति सिद्ध्यर्थमेव पूर्वग्रहणस्य सार्थकत्वात् ? सत्यम्। औकारः पूर्वमित्यत्र पूर्वग्रहणं विहाय तमिति कृते सिध्यति, यत् पूर्वग्रहणं तद् बोधयति – औकारः पूर्वमेव प्राप्नोति न किञ्चिदवर्णान्तरम्। लोपस्तु भवत्येव, वर्णत्वाभावात्। यद् वा अविकृतप्रकरणादेव न भवति 'धेन्वा' इतिवत्। ननु अग्न्यनुवर्तने विभक्तिविपरिणामेन गौरवं स्यादतोऽनन्तरस्य गोरनुवर्तनमेव युक्तमित्याह - हौ चेति ॥१३९।

**[समीक्षा]**

'अग्नि + ङि, धेनु + ङि' इस अवस्था में अग्निसंज्ञक इ-उ एवं ङि के स्थान में 'औ' आदेश करके कातन्त्रकार 'अग्नौ, धेनौ' शब्दरूप सिद्ध करते हैं। पाणिनि के अनुसार ङि को औ, इ-उ को अ तथा वृद्धि होकर उक्त प्रयोग निष्पन्न होते हैं – **"अच्च घेः, वृद्धिरेचि"** (अ० ७।३।११९; ६।१।८८)। इस प्रकार पाणिनीय प्रक्रिया में गौरव स्पष्ट है।

**[रूपसिद्धि]**

१. **अग्नौ।** अग्नि + ङि। प्रकृत सूत्र द्वारा अग्निसंज्ञक इकार तथा ङि प्रत्यय के स्थान में 'औ' आदेश।

२. **धेनौ।** धेनु + ङि। पूर्ववत् औकार आदेश ॥१३९।

## १४०. सखिपत्योर्ङिः [२।१।६१]

**[सूत्रार्थ]**

सखि तथा पति शब्द से परवर्ती सप्तमीविभक्ति – एकवचन 'ङि' प्रत्यय के स्थान में 'औ' आदेश होता है ॥१४०।

**[दु० वृ०]**

सखिपतिभ्यां परो ङिरौर्भवति। सख्यौ, पत्यौ। पुनर्ङिग्रहणं सपूर्वनिवृत्त्यर्थम् ॥१४०।

**[दु० टी०]**

**सखि०।** समीपलक्षणा षष्ठीयम्। सखिपत्योः समीपो ङिरित्यर्थः, **"न सखिष्टादावग्निः, पतिरसमासे"** (२।२।१,२) इति वक्ष्यतीत्याह – पुनर्ङीत्यादि। ननु **'लिङ्गग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्'** (कात० प० १७) कथं सख्यां स्त्रियाम् इति। सत्यम्। अनित्येयं परिभाषेति। तर्हि सखायं पतिमिच्छतीति वा यिन्, **'सखीयति, पतीयति'** इति क्विप्, तदाप्येकदेशविकृतस्यानन्यवद्भावाद् ङेरौत्वं स्यात्। 'सख्यि, पत्यि' इत्यनेकाक्षरयोस्त्वसंयोगाद् यत्वे सति भवितव्यम्, नैवम्। व्यक्तिनिर्देशोऽयं व्यक्तेरवयवप्रधानत्वात् न तौ सखिपती। इकारोऽनुवर्तते, सखिपत्योर्यः इकारस्तस्मादित्यर्थवशात्। **ऋषिवचनात्** –

**गते मृते प्रव्रजिते क्लीबे च पतिते पतौ।**
**पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥**

योगविभागादित्यन्ये। तेन क्वचित् सह पूर्वेण भवतीति ॥१४०।

**[वि० प०]**

**सखि०** । ङेरनुवृत्तौ पुनर्ङिग्रहणं ङिरेव और्यथा स्याद् इत्याह – पुनर्ङिग्रहणमित्यादि । ननु वचनबलादेव सपूर्वनिवृत्तिर्भविष्यति, अन्यथा अग्नित्वात् पूर्वेणैव सिद्धमित्ययुक्तं **"न सखिष्टादावग्निः, पतिरसमासे"** (२।२।१,२) इत्यग्निकार्यप्रतिषेधात् कथं पूर्वेणैव सिध्यतीति । अथानन्तरत्वाद् **"इरेदुरोज्जसि"** (२।१।५५) इत्यतः सामान्येन तत्रेकारो-कारावनुवर्तेते, नाग्निरिति। तदप्ययुक्तम्, प्रकृतत्वाद् अग्निरेव तत्रापि वर्तते। इकारोकारग्रहणस्य तु प्रयोजनान्तरमुक्तमेव ॥१४०।

**[क० च०]**

**सखिपत्योः**। पुनर्ङिग्रहणमिति । ननु **"न सखिष्टादावग्निः"** (२।२।१) इति निषेधाद् ङिग्रहणाभावेऽपि सपूर्वनिवृत्तिः स्यात् ? सत्यम् । प्रकरणान्तरप्राप्तकार्यस्य एकत्वेऽपि **पृथक्करणबलात्** । तथा च 'मातुः स्मृतवान्' इत्यत्र निष्ठादिनिषेधेऽपि स्मृत्यर्थद्वारा षष्ठीत्याह – पुनर्ङीत्यादि ॥१४०।

**[समीक्षा]**

'सखि+ङि, पति+ङि' इस अवस्था में कातन्त्रकार ङि को औ आदेश करके 'सख्यौ, पत्यौ' रूप सिद्ध करते हैं । पाणिनि ने भी 'औ' आदेश किया है – **"औत्"** (अ० ७।३।११८) ।

**[रूपसिद्धि]**

१. **सख्यौ।** सखि+ङि । प्रकृत सूत्र से 'ङि' को 'औ' आदेश तथा **"इवर्णो यमसवर्णे न च परो लोप्यः"** (१।२।८) से इकार को यकार ।

२. **पत्यौ** । पति+ ङि । पूर्ववत् ङि को औ तथा इकार को यकारादेश ॥१४०।

## १४१. ङसिङसोरुमः [२।१।६२]

### [सूत्रार्थ]

'सखि-पति' शब्दों से परवर्ती 'ङसि-ङस्' प्रत्ययघटित अकार को उकारादेश होता है ॥१४१।

### [दु० वृ०]

सखिपतिभ्यां परो ङसिङसोरकार उमापद्यते। **सख्युः, सख्युः। पत्युः, पत्युः।** अग्रहणं यथासङ्ख्यनिवृत्त्यर्थम् ॥१४१।

### [दु० टी०]

**ङसि०** ।यथासङ्ख्यं न भवति ।ङसिङसोः सखिपतिभ्यां संबन्धस्याविवक्षितत्वाद् ङसिङसोरः सखिपतिभ्यां पर इत्यर्थः। "सख्युश्च" (२।२।२३) इति ज्ञापकाद् वा समासेऽपि भवितव्यमेव। शोभनः सखा अतिशयः सखा अस्य **सुसख्युः, अतिसख्युः।** स्वतिभ्यां पूजायामन्नास्तीति **"न सखिष्टादावग्निः"** (२।२।१) इति मतं वर्णयिष्यामः। सखायमिच्छति, पतिमिच्छतीति वा यिन् नाम्यन्तलक्षणो दीर्घस्ततः क्विप् ।यदि दृश्यते सख्युः, पत्युरिति भवितव्यम्, इह एकदेशविकृतस्यानन्यवद्भावात्। यत्तु "ख्यत्याद्" इति सूत्रं कृतवान्, **तन्मते** सख्युश्चेति ज्ञापकाद् अकार उच्चारणार्थ इति। सख्याद् गार्हपत्याद् इत्यत्र न भवति सखीयति, सुसखीयति-क्विप्। तन्मते सख्युः, सुसख्युरिति भवितव्यम्। तथा 'लूनीयति, पूनीयति' इति क्विप्। नकारस्यासिद्धवत्त्वात् लून्युः, पून्युरिति। तदिहाप्रमाणम्।

**चूर्णिकारोऽप्याह–** नस्यासिद्धत्वे अन्तरङ्गे कर्तव्ये बहिरङ्गमीत्वं यत्वमप्यसिद्धमिति। तथा सखेन वर्तते इति सखः, तमिच्छतीति यिन्, **सखीयतीति।** क्विप्, सख्य इतीह भवितव्यम् ।नायं सखीशब्दः एकदेशविकृत इति कथं सख्याः स्त्रिया इत्युभयसावकाशे परत्वादयमेव प्राप्नोति। उत्वेऽपि कृते नदीकार्यं नास्तीति **'सकृद्गतो विप्रतिषेधो यद् बाधितं तद् बाधितमेव'** (कात० प० ३६) इति नियमात्। तर्हि **'लिङ्गग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्'** (कात० प० १७) इत्यनित्येयं परिभाषा। यद्यपि सखीमिच्छतीति यिन्, तदापि 'सख्या' इति भवितव्यम्, ईकारस्य नदीत्वात्। नपुंसके न्वागमो वास्तीति 'सुसखिनः कुलस्य' इति भवति ॥१४१।

[वि० प०]

**ङसि०** । अथ किमर्थमकारग्रहणाम् । उम् इति कर्मपदम् । तच्च कर्तारमपेक्षते । न चान्य इह कर्ता संभवति । ङसिङसोरवयव उमापद्यत इति संबन्धो भविष्यति । न चैवं सकारस्य प्रसङ्गो भिन्नजातीयत्वात् । उकारो हि स्वरः प्रवर्तमानोऽपरस्य सजातीयस्यैव प्रवर्तते न व्यञ्जनस्य । यथा भोक्तुकामो ब्राह्मण इत्युक्ते अपरस्यैव ब्राह्मणस्य विषय इति । अथवा सख्युश्चेति निर्देशाद् अकार एव स्थानीत्याह - अग्रहणमित्यादि । अग्रहणे सति ङसि-ङसोरकारेण सह संबन्धो न सखिपतिभ्याम् । ङसिङसोरकारः सखिपतिभ्यां पर इति । तेन वैषम्यान्न यथासङ्ख्यमिति ॥१४१।

[क० च०]

**ङसि०** । ननु **"दिव उद् व्यञ्जने"** (२।२।२५) इत्यत्र व्यञ्जनस्थानेऽपि स्वरो विधीयते । तद्वदत्रापि **'वर्णान्तस्य विधिः'** (कात० प० ५) इति न्यायाद् ङसिङसोः सकारस्य उकारः स्याद् इत्याह – **'सख्युश्च'** (२।२।२३) इति ज्ञापकादिति ॥१४१।

[समीक्षा]

'सखि + ङसि- ङस्, पति + ङसि- ङस्' इस अवस्था में कातन्त्रकार 'ङसि- ङस्' प्रत्ययघटित अकार को उकारादेश करके 'सख्युः, पत्युः' शब्दरूप निष्पन्न करते हैं । पाणिनि का भी एतादृश ही निर्देश है – **"ख्यत्यात् परस्य"** (अ० ६।१।११२)।

[रूपसिद्धि]

१. **सख्युः**। सखि + ङसि- ङस् । प्रकृत सूत्र से अकार को उकार, **"इवर्णो यमसवर्णे न च परो लोप्यः"** (१।२।८) से इकार को यकार तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से विसर्ग आदेश ।

२. **पत्युः**। पति + ङसि- ङस् । पूर्ववत् अ को उ, इ को य् तथा स् को विसर्ग ॥१४१।

## १४२. ऋदन्तात् सपूर्वः (२।१।६३)

[सूत्रार्थ]

ऋकारान्त लिङ्ग = प्रातिपदिक से परवर्ती 'ङसि- ङस्' प्रत्ययघटित अकार अपने पूर्ववर्ती **स्वर के साथ** उकार को प्राप्त होता **है** ॥१४२।

[वृ० वृ०]

ऋदन्ताल्लिङ्गात् परो ङसिङसोरकारः सह पूर्वेण स्वरेण उमापद्यते। पितुः, पितुः। मातुः, मातुः। ऋदन्तादिति किम् ? स्त्रो धातोः ॥१४२।

[दु० टी०]

ऋ०। **तपरकरणमसन्देहार्थमेव**। अन्यथा रन्ताद् इत्युक्ते रेफान्तादित्यपि प्रतिपद्येत- गिरो धुर इति। ननु **'येन विधिस्तदन्तस्य'** (कात० प० ३) इति ऋदन्ताद् भविष्यति, किमन्तग्रहणेन ? नैवम्। ऋत इत्युक्ते ऋत इति **सौत्रो धातुः** क्विबन्तः, ऋ गतौ वा। ततस्तोऽन्तः क्विपि ऋतो लिङ्गादिति मुह्यन्तीति अतोऽन्तग्रहणम्। ननु डुरित्युक्ते डानुबन्धेऽन्त्यस्वरादिलोपे सिध्यति। अनुबन्ध एवायं कर्तुरायिरिति निर्देशात् ? सत्यम्। **सपूर्वग्रहणं सुखप्रतिपत्त्यर्थमेव** ॥१४२।

[वि० प०]

ऋ०। स्त्रो धातोरिति स्तृणातेरनुकरणमिदं दीर्घात् तस्य स्त्रो धातोरिदं रूपमित्यादिसंबन्धः ॥१४२।

[क० च०]

ऋदन्तात्। स्त्रो धातोरिति। धातोः परः स्यादिर्न संभवतीति कथं स्त्र इति षष्ठ्यन्तं पदमित्याह – स्तृणातेरनुकरणमिति ॥१४२।

[समीक्षा]

'पितृ + ङसि- ङस्' इस अवस्था में ऋ तथा अ के स्थान में 'उ' आदेश करके कातन्त्रकार 'पितुः' पद सिद्ध करते हैं। पाणिनि ने भी **"एकः पूर्वपरयोः"** (अ० ६।१।८४) केअधिकार में उक्त दो वर्णों केस्थान में **"ऋत उत्"** (अ० ६।१।१११) सूत्र द्वारा उकाररूप एकादेश का विधान किया है। अतः उभयत्र साम्य है।

[रूपसिद्धि]

१. **पितुः**। पितृ + ङसि- ङस्। प्रकृत सूत्र द्वारा ङसि- ङस्प्रत्ययघटित अकार को पूर्ववर्ती ऋकार के साथ उकार आदेश तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से सकार को विसर्ग।

२. **मातुः**। मातृ + ङसि- ङस् । पूर्ववत् अकार- ऋकार को उकार तथा सकार को विसर्गादेश ॥१४२॥

## १४३. आ सौ सिलोपश्च [२।१।६४]

**[सूत्रार्थ]**

प्रथमाविभक्ति – एकवचन 'सि' प्रत्यय के परे रहते ऋकारान्त लिङ्ग = प्रातिपदिक के अन्त्य वर्ण के स्थान में 'आ' आदेश तथा सि- प्रत्यय का लोप होता है ॥१४३।

**[दु० वृ०]**

ऋदन्तस्य लिङ्गस्य आ भवति सौ परे सिलोपश्च । पिता, माता ॥१४३।

**[दु० टी०]**

**आ।** साविति निर्देशस्यैकत्वेऽपि सेरेव ग्रहणं न सुपः । सामान्यग्रहणे तु सीति विदध्यात् । सकारादौ विभक्ताविति गम्यते एव । तदयुक्तम्, सिविवक्षायां न सुपो ग्रहणं सुपो विवक्षायां न सेरिति ।तर्हि सुपीत्यकरणादवसीयते- **सन्देहे नैव गुरुलाघवचिन्तेति।** ननु साविति किमर्थम् । अर्थात् सेरेव निमित्तत्वम्, अन्यस्याश्रुतत्वात्, नैवम् । सावित्युक्तेऽर्थविशाद् विभक्तिविपरिणामः स्यात् । अन्यथा ऋदन्ताद् आ भवति, सेरेव लोपश्चेति पक्षे अथ तदा 'आ सेर्लोपश्च' इति विदध्यात् । तथापि **प्रतिपत्तिरियं गरीयसीति।** तथा **'सावन्सेर्डो'** इति कृतेऽपि **प्रक्रियागौरवं** भवतीति ॥१४३।

**[वि० प०]**

**आ सौ।** साविति सप्तमीनिर्देशादिह **'अर्थवशाद् विभक्तिविपरिणामः'** (कात० प० २५) इत्याह – **ऋदन्तस्येति** । अथ कथमिह सेरेव ग्रहणं साविति सप्तमीनिर्देशस्य समानत्वात् सप्तमीबहुवचनस्यापि ग्रहणं स्यादित्ययुक्तम् । एवं सति सीति कुर्यात् । सकारादौ विभक्ताविति गम्यत एव । नच प्रथमैकवचनं सप्तमीबहुवचनं चान्तरेणान्या सकारादिर्विभक्तिरस्ति यन्निवृत्त्यर्थं सावित्युच्यते । ननु तथापि सेरेवायं निर्देशो न **सोरिति** कथमिदं निश्चितम् ? सत्यम् । सिलोपश्चेति निर्देशात् सोर्ग्रहणे सति **सुलोपश्चेत्याचक्षीत** । न च वक्तव्यम्, इकार उच्चारणार्थः सकारमात्रस्यैव लोप इति

तदा निःसन्देहार्थमेवाकारोच्चारणं कृत्वा सलोपश्चेति कुर्वीत । किं च यदि सोर्ग्रहणमभिप्रेयात् तदा सुपीति पानुबन्धमेव निर्दिशेत्, नात्र **संदेहे गुरुलाघवचिन्ता** युक्तिमतीति ।।१४३।

**[क० च०]**

आ सौ। ननु कृतेऽप्यकारे उच्चारणार्थेऽविशेषाद् द्वयोरेव ग्रहणं कथं न स्यादित्याह – किञ्चेति । तथा "**सावन्सेर्डा वा**" कृतेऽपि प्रक्रियागौरवं भवतीति **दुर्गः। अयमाशयः** – 'उशनस्' इत्यत्र ऋद्ग्रहणं कृत्वा तेनैवान् विधीयतामिति **केचित्।** अत एव डीति कर्तव्यम् । तर्हि "**आ च न सम्बुद्धौ**" (२।१।७०) इत्यत्र आ- निषेधो व्यर्थः स्यादिति चेत्, नैवम् । "**अम् च न संबुद्धौ**" इति कर्तुं शक्यत्वात् । एवं सति प्रश्लेषव्याख्यानाभावात् कथं 'हे गार्गीमातः, हे वात्सीमातः' इत्यादिकं सिध्यति चेत्, न । चकारस्याव्ययस्य बहुलत्वात् तल्लाभो भविष्यति, यदुक्तम्– "आ च न सम्बुद्धौ" इति कर्तव्यम्, व्यवस्थितविभाषया आकारस्य प्रायिकता बोद्धव्या, न तु सार्वत्रिकतेति । डा-पक्षे च "**डा च न सम्बुद्धौ**" इति कर्तव्यम् । 'डा' इति कृते सपूर्वानुवृत्तिर्नाशङ्कनीया, तन्निवृत्त्यर्थम् 'ऋतः सेर्डा' इति कर्तव्यम् **इत्याशयः** ।।१४३।

**[समीक्षा]**

'पितृ + सु, मातृ + सु' इस अवस्था में कातन्त्रकार ऋकार को आकार आदेश तथा 'सि' प्रत्यय का लोप करके 'पिता, माता' शब्दरूप निष्पन्न करते हैं, परन्तु पाणिनि "**ऋदुशनस्पुरुदंसोऽनेहसां च**" (अ० ७।१।९४) से 'ऋ' को 'अनङ्' आदेश, "**सर्वनामस्थाने चासंबुद्धौ**" (अ० ६।४।८) से नकार की उपधा (अकार) को दीर्घ तथा "**नलोपः प्रातिपदिकान्तस्य**" (अ० ८।२।७) से नलोप का विधान करते हैं। इस प्रकार पाणिनीय प्रक्रिया में गौरव (विस्तार) स्पष्ट परिलक्षित होता है।

**[रूपसिद्धि]**

१. **पिता।** पितृ + सि । "**धातुविभक्तिवर्जमर्थवल्लिङ्गम्**" (२।१।१) से 'पितृ' शब्द की लिङ्गसंज्ञा तथा प्रकृत सूत्र द्वारा ऋ को आ- सिप्रत्यय का लोप।

२. **माता।** मातृ + सि । पूर्ववत् लिङ्गसंज्ञा, ऋ को आ एवं सि-प्रत्यय का लोप ।।१४३।

## १४४. अग्निवच्छसि [२।१।६५]

### [सूत्रार्थ]

द्वितीयाविभक्ति- बहुवचन 'शस्' प्रत्यय के परवर्ती होने पर ऋकारान्त लिङ्ग = प्रातिपदिक को अग्निवद्भाव होता है ॥१४४।

### [दु०वृ०]

ऋदन्तस्य लिङ्गस्याग्निवद् भवति शसि परे। पितॄन्। तत्रास्त्रियामिति प्रतिषेधात् – मातॄः ॥१४४।

### [दु० टी०]

अग्नि० ।**'अर्थवशाद् विभक्तिविपरिणामः'** (कात० प० २५) इत्याह- ऋदन्तस्येति। बहवोऽतिदेशाः संभवन्तीति तत्र ब्राह्मणवत् क्षत्रिये प्रवर्तितव्यम् इति। यथा निमित्तातिदेशस्तथा नेह इकारोकारावग्नेर्निमित्तं तदन्तस्य कथं भवतीति ।न ह्यनिमित्तम् अन्य एव वचनशतैरपि प्रवर्तयितुं शक्यते। रूपातिदेशोऽपि नैव। तदा इदुताविति विदध्यात्। व्यपदेशातिदेशोऽपि नैव। व्यपदेशः संज्ञा चेत्, किं वत्करणेन ? अथ विधिप्रकरणत्वाद् वद्ग्रहणमेवास्ताम्, तर्हि व्यपदेशातिदेशः शास्त्रातिदेशोऽप्यविरुद्ध एव। ऋदन्तस्याग्नेः शास्त्रं भवति। तत्पुनः **"शसोऽकारः सश्च नोऽस्त्रियाम्"** (२।१।५२) इति कार्यातिदेशस्तु न्याय्य एव सर्वातिदेशानां मध्ये प्रधानं साध्यनिष्ठत्वाद् ऋदन्तस्याग्नेरिव कार्यं भवतीत्यर्थः। तेन शसोऽकारः पूर्वस्वरमापद्यते, सश्च नो भवत्यस्त्रियामिति अग्निमाश्रित्य यत् प्रवर्तते तदग्नेः कार्यं भवति। **अन्यः** पुनराह- पञ्चम्यन्ताद् वतिरयमग्नेरिव ऋदन्ताच्छसि विषये कार्यम् इति तत् पुनः शस एव षष्ठीसप्तम्योरर्थं प्रत्यभेदाद् वद्ग्रहणं कृतम् अभेदविवक्षा गरीयसीति ।**"शसोऽकारः सश्च नोऽस्त्रियाम्"** (२।१।५२)। तत ऋतश्चेति क्रियमाणे सिध्यति। चकार उत्तरार्थोऽग्नेरनुकर्षको भविष्यतीति। अन्यथा पृथग्वचनमनर्थकमिति, नैवम्। प्रकरणभेदः स्यादिति ॥१४४।

### [वि० प०]

अग्निः ।अग्निवद् भवतीति ।अग्निरिव कार्यम् ऋदन्तस्य शसि परे भवतीत्यर्थः। सत्यपि अतिदेशान्तरे कार्यातिदेश एवायं तन्निष्ठत्वात् प्रवृत्तेः। तेन शसोऽकारः

पूर्वस्वरमापद्यते सश्च नो भवत्यस्त्रियाम् । अत आह – तत्रास्त्रियामिति । तत्रेति । **"शसोऽकारः सश्च नोऽस्त्रियाम्"** (२।१।५२) इत्यस्मिन् ॥१४४।

**[क० च०]**

**अग्निवत्०।** ननु अग्नेर्यत् कार्यं तदन्तस्यापि शसि परे भवतीत्युक्ते एदोतौ कथं न स्याताम् इति चेत्, न । **अयमर्थः** कार्यः । शसि परे अग्नेर्यत् कार्यं दृष्टं तद् ऋदन्तस्य भवतीति श्रुतत्वाच्छसि परे तदेवेति कुत एदोतोः प्रसङ्ग इति **हेमकरहृदयम्** ॥१४४।

**[समीक्षा]**

'पितृ + शस्' इस अवस्था में कातन्त्रकार ऋदन्त लिङ्ग को अग्निवत् अतिदेश करते हैं । इस अग्निवत् अतिदेश से शस्प्रत्ययस्थ अ को पूर्वस्वरादेश, स् को न् तथा समानलक्षण दीर्घ करके 'पितॄन्' शब्द का साधुत्व निश्चित करते हैं । पाणिनि के अनुसार स् को न् तथा 'ऋ-अ' इन दो वर्णों के स्थान में "प्रथमयोः पूर्वसवर्णः" (अ० ६।१।१०२) से पूर्वसवर्णदीर्घ 'ॠ' होने पर 'पितॄन्' शब्द सिद्ध होता है ।

इस प्रकार कातन्त्रकार ने अतिदेश करके प्रक्रियागौरव अवश्य किया है, परन्तु पूर्वाचार्यों के अनुरोध से पुंल्लिङ्ग इकारान्त-उकारान्त शब्दों की इस व्याकरण में जो 'अग्नि' संज्ञा की गई है, उसके निर्वाहार्थ तत्प्रयुक्त कार्य करने के लिए अतिदेश करना अत्यन्त आवश्यक है ।

**[रूपसिद्धि]**

१. **पितॄन्।** पितृ + शस् । प्रकृत सूत्र से अग्निवद्भाव होने के कारण **"शसोऽकारः सश्च नोऽस्त्रियाम्"** (२।१।५२) से शस्प्रत्ययघटित अकार को पूर्वस्वर ऋकारादेश, सकार को नकार तथा "समानः सवर्णे दीर्घीभवति परश्च लोपम्" (१।२।१) से पूर्ववर्ती ऋकार को दीर्घ-परवर्ती ऋकार का लोप ॥१४४।

## १४५. अर् ङौ [२।१।६६]

**[सूत्रार्थ]**

सप्तमीविभक्ति-एकवचन 'ङि' प्रत्यय के पर में रहने पर ऋकारान्त लिङ्ग= प्रातिपदिक के अन्त्यावयव 'ऋ' को 'अर्' आदेश होता है ॥१४५।

[दु० वृ०]

ऋदन्तस्य लिङ्गस्य 'अर्' भवति ङौ परे। पितरि, मातरि। योगविभागात्- **'पितरस्तर्पयामास'** ॥१४५।

[दु० टी०]

**अर् ङौ।** ऋदन्तस्य लिङ्गस्य ऋत एवार् भवति। कथं गम्यतेऽनेकवर्णत्वात् सर्वस्य भवितुमर्हति यस्माद् बहुव्रीहिणा समुदाय उच्यते। नहि 'लम्बकर्णः स्फोटयितव्यः' इत्युक्ते कर्णमात्रस्य स्फोटनमवसीयते। अन्तग्रहणमन्तरेण एतत् प्रतिपत्तुं शक्यते यस्मान्निर्दिश्यमानानामादेशिनामादेशा इति। नन्वस्मिन्नपि पक्षे 'ऋ' इत्युक्ते ऋदन्तस्येति प्रतीयते **'येन विधिस्तदन्तस्य'** (कात० प० ३) इति विज्ञानात्। न च कर्तृप्रभृतयोऽत्र निर्दिष्टाः, किं तर्हि समासगम्या इति। अन्तग्रहणेऽपि सति ऋकार एव श्रुतत्वान्निर्दिष्टो वेदितव्यः। यथा भग्नजङ्घस्यास्थिसन्धानाय लेपः कर्तव्य इत्युक्ते न सर्वाङ्गलेपः क्रियते, अपि तु जङ्घायामेव। तथा **"ॠदन्तस्येरगुणे स्वरादौ"** (३।५।४३) इवर्णोवर्णान्तस्येति शेषात् कर्तरीति न ज्ञापकमुच्यते। कर्मधारयेणापि निर्वोढुं शक्यते, **सुखप्रतिपत्तिकृतप्रतिज्ञोऽयं भगवानिति** ॥१४५।

[वि० प०]

**अर् ङौ।** यद्यपि ऋदन्तो यस्यासौ ऋदन्त इति बहुव्रीहिणा समुदाय उच्यते। अरादेशश्चानेकवर्णस्तथापि श्रुतत्वादन्तस्य ऋकारस्यैव भवति न समुदायस्य, तस्याश्रुतत्वात्। न खल्वत्र पितृप्रभृतयः श्रुताः किन्तर्हि समासगम्या इति **"कर्तरि च"** (२।४।३३) इति निर्देशाद् वा। **योगविभागादिति।** अर् इत्येकयोगः, सामान्येनारादेशार्थः। ततो ङाविति द्वितीयः। पूर्वेणैव सिद्धे पुनर्विधानं पूर्वविधेर्लक्ष्यानुरोधार्थम्। तेन शस्येव निमित्ते स्यात्। **'पितरस्तर्पयामास'** इति। **'तृप प्रीणने'** (९।२६८)। **"हेताविन्"** (३।२।९, १०)। परोक्षाया अट्। **"चकासृकासृ०"** (३।२।१७) इत्यादिना आम्प्रत्ययः। कारितस्य गुणः। **"अस्भुवौ च परस्मै"** (३।२।२३) इति असनुप्रयोगः, द्विर्वचनम्। **"अस्यादेः सर्वत्र"** (३।३।१८) इति दीर्घः ॥१४५।

[क० च०]

**अर् ङौ।** कर्तरीति निर्देशाद् वेति पक्षान्तरोपन्यासः शस्येव निमित्ते स्यादिति। ननु 'हे कर्तः कुलम्' इत्यत्र कथम् अरादेशः नपुंसके घुट्त्वाभावेन **"घुटि च"**

(२।१।६७) इत्यस्याविषयत्वाच्चेत्, योगविभागेन अर् इति सूत्रस्य सामान्यविषयत्वाद् भविष्यति, तर्हि कथं शस्येव निमित्ते स्यादित्युच्यते ? सत्यम् । शसि निमित्तेऽपि अरेवेति नियमो व्याख्यातव्यः । तेनान्यत्र सामान्येनैवेति **सम्प्रदायः** । तन्न । **"ह्रस्वनदीश्रद्धाभ्यः"** (२।१।७१) इत्यत्र **टीकाकृता** नपुंसके सम्बुद्धौ 'हे कर्तृ, हे होतृ' इति प्रयोगस्य दर्शितत्वात् । अत एव 'हे कर्तः !' इत्यनेन **श्रीपतिना** यदाक्षिप्तं तदपि निरस्तम् । **स्वमते** तु 'हे कर्तृ !' इत्यादिषु अरभावपक्षस्यैवेष्टत्वाद् अरः प्राङ् निर्देशो योगविभागार्थ इति **वररुचिः** –

**उपोष्य रजनीमेकाममावस्यां तिलोदकैः।**

**पितरस्तर्पयामास विधिदृष्टेन कर्मणा॥** इति प्रयोगः ।। १४५।

**[समीक्षा]**

'पितृ + ङि, मातृ +ङि' इस अवस्था में कातन्त्रकार 'ऋ' को 'अर्' आदेश तथा पाणिनि गुण-रपर करके 'पितरि, मातरि' शब्दरूप निष्पन्न करते हैं – **"ऋतो ङिसर्वनामस्थानयोः, उरण् रपरः"** (अ० ७।३।११०; १।१।५१) ।इस प्रकार पाणिनीय प्रक्रिया में गौरव स्पष्ट है ।

**[रूपसिद्धि]**

१. **पितरि।** पितृ + ङि । प्रकृत सूत्र से 'पितृ' शब्द के अन्त्यावयव ऋकार के स्थान में 'अर्' आदेश ।

२. **मातरि।** मातृ + ङि । पूर्ववत् ऋ को अर् आदेश ।

**[विशेष]**

'पितरः' पद द्वितीयाबहुवचन-शस्प्रत्ययान्त योगविभाग के बल से सिद्ध किया गया है । 'पितरस्तर्पयामास' इस वचन में 'पितरः' पद द्वितीयान्त प्रयुक्त है । प्रथम सूत्र यदि केवल 'अर्' ही मानेंगे तो सामान्यतया किसी भी प्रत्यय के परवर्ती होने पर अरादेश प्रवृत्त होगा । 'ङौ' इस द्वितीय सूत्र से 'पितरि, मातरि' आदि ङिप्रत्ययान्त शब्दों में अरादेश होगा । इस प्रकार योगविभाग में प्रथम सूत्र के अनुसार 'पितरः' यह पद शस्प्रत्ययान्त सिद्ध हो सकेगा ।।१४५।

# १४६. घुटि च [२।१।६७]

## [सूत्रार्थ]

घुट्संज्ञक (सि, औ जस्, अम्, औ, नपुंसकलिङ्ग में जस्- शस्, २।१।३,४) प्रत्ययों के परवर्ती रहने पर ऋकारान्त लिङ्ग के अन्त्यावयव ऋकार को 'अर्' आदेश होता है ।।१४६।

## [दु० वृ०]

ऋदन्तस्य लिङ्गस्यार् भवति घुटि परे। पितरौ। पितरः। घुटीति किम् ? पितॄन्। पृथग्योग उत्तरार्थः ।।१४६।

## [दु० टी०]

**घुटि०** ।**"आ सौ सिलोपश्च"** (२।१।६४) इति वचनात् शेषे घुटि विधिरयम्। चकार उक्तसमुच्चयमात्रे। यद्येकयोगः क्रियते तदा 'कर्तरि' इत्यत्र ङिवचनेऽपि अरेव प्रसज्येत ।।१४६।

## [वि० प०]

**घुटि०**। सावात्वेनाघ्रातत्वात् शेषे घुटि विधिरयम्। अर् ङिघुटोरित्येकयोगे सिध्यति। किन्तु सह निर्दिष्टत्वादुत्तरत्र ङेरप्यनुवृत्तिः स्यात्। घुटो वेष्यत इत्याह- पृथगित्यादि ।।१४६।

## [क० च०]

**घुटि०**। सावात्वेनाघ्रातत्वादिति। ननु आत्वविषयता संबुद्धौ नास्ति, **"आ च न संबुद्धौ"** (२।१।७०) इत्यनेन निषेधात्। तत्र सावस्य विषयत्वे को बाधकश्चेद् भवत्येव पितरित्यत्रास्य विषयता। तर्हि कथं शेष इत्युक्तं चेत्, न। सिमपेक्ष्य शेषत्वं वाच्यम्, किन्तु यत्रासौ सिलोपश्चेति प्रवर्तते तच्छेषत्वमित्यदोषः। घुटीति किम् ? पितॄन् इति **वृत्तिः**।

**अस्यायमाशयः** – ननु सूत्रमिदं किमर्थं यावता अर् ङावित्यस्य योगविभागेनैव 'पितरौ, पितरः' इत्यादिप्रयोगः सिध्यतीति योगविभागस्य लक्ष्यानुसारित्वात् ? सत्यम्। लक्ष्यानुसाराद् यथा 'पितरौ, पितरः' इति भवति तथा 'पितरस्तर्पयामास' इति

प्रयोगदृष्ट्या भाषाविषयेऽपि पितृशब्दस्य शसि परे अरादेशशङ्का स्यादिति 'अघुटि च' इति सूत्रं कर्तव्यम् इति **प्राञ्चः। केचित्तु** चकारः पूर्वत्र क्रियतां किं घुटीति पृथग्वचनेन। योगविभागेनैव 'पितरौ, पितरः' इति सिध्यतीति ? सत्यम्। 'अर् ङौ च' इत्यत्र चकारेण शसोऽनुवृत्त्या पक्षे भाषायामप्यरादेशः स्यादित्याह – घुटीति। किं पितॄन् इत्याहुः। **वृत्तौ** प्रयोग एव नास्तीति **नवीनाः**॥ १४६।

**[समीक्षा]**

'पितृ + औ, पितृ + जस्' इस अवस्था में कातन्त्रकार ऋ को 'अर्' आदेश तथा पाणिनि गुण – रपरविधान करके 'पितरौ, पितरः' शब्द सिद्ध करते हैं – **"ऋतो ङिसर्वनामस्थानयोः, उरण् रपरः"** (अ० ७।३।११०; १।१।५१)। इस प्रकार यहाँ भी पाणिनीय प्रक्रिया में गौरव स्पष्ट है।

**[रूपसिद्धि]**

१. **पितरौ।** पितृ +औ। प्रकृत सूत्र द्वारा ऋकारान्त लिङ्ग **'पितृ'** शब्द के अन्त्यावयव ऋ को अर् आदेश।

२. **पितरः।** पितृ + जस्। पूर्ववत् प्रकृत सूत्र से ऋ को अर् तथा स् को विसर्ग॥१४६।

## १४७. धातोस्तृशब्दस्याऽऽर् [२।१।६८]

**[सूत्रार्थ]**

घुट्संज्ञक वर्णों के परवर्ती होने पर धातु से विहित तृप्रत्ययघटित ऋकार को 'आर्' आदेश होता है॥१४७।

**[दु० वृ०]**

धातोर्विहितस्य तृशब्दस्य ऋत आर् भवति घुटि परे। अरोऽपवादः। कर्तारौ, कर्तारः। धातोर्विहितस्येति किम् ? यातरौ, यातरः। यतेर्ऋन् दीर्घश्च। तृशब्दस्येति किम् ? ननान्दरौ, ननान्दरः। नञि च नन्देः। क्रुशस्तुन् घुटि स्त्रियां च नास्ति, औणादिकत्वात्। क्रोष्टा, क्रोष्ट्री। तृचा सिद्धम्। शसादौ तु तृजन्तस्य तुनन्तस्य च प्रयोगः। 'क्रोष्टॄन्, क्रोष्टून्, क्रोष्ट्रा, क्रोष्टुना' इत्येवमादयः॥१४७।

[दु० टी०]

**धातोः** । धातोरिति पञ्चमीयम् उत्सृष्टानुबन्धस्थस्तृन् तृच् वा तृशब्दवाच्यः, स च धातोर्विधीयते इत्याह - धातोर्विहितस्येति । समीपलक्षणा षष्ठी विवक्षितापि पञ्चम्यर्थतया विपरिणमते इति । यद्येवं तृन्तृचोरारिति कथन्न कृतम्, एतेन धातुग्रहणं शब्दग्रहणं च न कृतमेव स्यात् । सत्यम् । प्रकृतिप्रत्ययसङ्गतिमात्रमेव शर्ववर्मणा दर्शितं न विशेषप्रत्ययविधानं तेन कृतमिति स्थितम् । तुन्प्रयोगनिवृत्त्यर्थं घुटि स्त्रियां च क्रुशस्तुन् स्तृशब्दो विधातव्यो नेत्याह– क्रुश इत्यादि । **"सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन्"** (उ० १।२६) । न स्त्रियां विषये घुड्विषये इत्यर्थः । संबुद्धौ नपुंसकात् स्यमोर्लोपेऽपि दृश्यते तुन्नेव । 'हे क्रोष्टो ! बहुक्रोष्टु वनम्' इति । उणादयो हि बहुलं भवन्तीति । क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिरित्याह- तृचा सिद्धमिति । तुन्विषये तृचो मृगवाचित्वाद् यथान्यत्रा-विशेषविहिताः शब्दा नियतविषया दृश्यन्ते । घरतेर्घृतम्, घृणा, घर्म इत्येवं विषये-रशे रशना, राशी, रश्मिरिति, बिन्देर्बिन्दुरिति, गण्डेर्गण्ड इत्येवं 'बहुक्रोष्टूनि वनानि ' । ऋदन्तादिह बहुव्रीहौ को न दृश्यते । पञ्चभिः क्रोष्ट्रीभिः क्रीतो रथः 'पञ्चक्रोष्टू रथः' इति तद्धितार्थे द्विगोः स्त्रीप्रत्ययस्य निवृत्तिरभिधानात् । **"द्विगोरनपत्यस्य"** इति इकणो लुक् स्त्रियाम्, स्त्रीकारस्य च लुक् तद्धितलुकीति यत्लयन्त्यन्ये । क्रोष्ट्र्यां भक्तिः **क्रोष्ट्रिभक्तिः** । क्रोष्ट्र्यां भक्तिरस्येति भिन्नाधिकरणो वा बहुव्रीहिः पुंवद्भावोऽपि नैव ।

**आदेशवादिनोऽपि** मते स्त्रीप्रत्ययस्य लुक्यपि स्त्रियां वर्तमानस्येति व्याख्यानात् त्रादेशो न निवर्तते । स्त्रीकारो न निमित्तमिति अन्तरङ्गत्वाच्चादेशे सति पश्चादुकारान्ताद् ईप्रत्ययः इति कुत इतरेतराश्रयता । यस्तु टादिस्वरे विकल्पमादिशति तन्मते शसि नित्यं क्रोष्टून् इति **'आदेशादागमो विधिर्बलवान्'** (कात० प० ४०) इत्यभेदे 'क्रोष्टुने अरण्याय, क्रोष्टुनः कुलात्, क्रोष्टूनाम्' इति नित्यमेव । यथा – 'क्रोष्टुभ्याम्, क्रोष्टुभिः, क्रोष्टुषु' इति, तर्हि स्वभावात् तृजन्तो मृगवाची तस्य को निवारयितेत्याह – शसादावित्यादि । 'स्वरसामर्थ्याद् व्यञ्जने न' इति **परो** ब्रूते **तन्मते** न बहुलं दृश्यते इति ।।१४७।

[वि० प०]

**धातोः** । धातोरिति पञ्चमीयम् अतो विहितविशेषणम् इत्याह- धातोर्विहितस्येति । 'कर्तारौ, कर्तारः' इति करोतेः **"वुण्तृचौ"** (४।२।४७) इति तृच् । ताच्छील्यार्थविवक्षायां तृन्प्रत्ययेऽप्येवमुदाहरणम् । एतावेव प्रत्ययौ धातोर्विधीयेते इति । यद्येवम्, 'तृन्तृचोरार्'

इति कथन्न कृतमिति चेत्, नैवम् । **शर्ववर्मणा** तृन्तृचौ विहितौ येनैवमसौ निर्दिश्यते, तर्हि विहितविशेषणमप्ययुक्तमिति चेत्, सत्यम् । **शर्ववर्मणा कृत्प्रत्ययविशेषविधानं नाम न कृतम्, अभिधानतः। प्रकृतिप्रत्ययविभागकल्पना आदृतैव इत्यदोषः। "नञि च नन्देः"** (उ० २।३९) इति ऋन्, दीर्घश्चेति वर्तते, **"नस्य तत्पुरुषे लोप्यः"** (२।५।२२) इति नञो नकारलोपो न भवति, संज्ञाशब्दत्वात्। **"सितनिगमिमसिसच्यविधाञ्-क्रुशिभ्यस्तुन्"** (उ० १।२६) इत्यौणादिकः क्रुशेस्तुन् विहितः, तदा प्रयोगनिरासार्थम् **"तृज्वत् क्रोष्टुः"** (अ० ७।१।५५) इति वक्तव्यमित्ययुक्तम्। **उणादयो हि बहुलं भवन्ति,** ततो घुटि विषये स्त्रीलिङ्गविषये च क्रुशेः परस्तुन्प्रत्यय एव नास्ति, अतस्तृचैवं सिद्धमित्याह– क्रुशस्तुन् इत्यादि । संबुद्धौ नपुंसकात् स्यमोर्लोपे च दृश्यते तुन्प्रत्यय इति प्रयोगो यथा– हे क्रोष्टो !, बहुक्रोष्टु वनमिति ।

ननु क्रोष्टृशब्दस्य मृगवाचित्वात् तदादेशोऽपि मृगवाचीति युज्यते एव वक्तुम्, तृचि पुनरुत्पन्ने क्रोशनक्रियाभिसंबन्धोपस्थितकर्तृत्वमात्रमर्थः स्यादित्ययुक्तम् । क्रियानिमित्तोऽपि तृजन्तो रूढिवशात् मृग एव वर्तिष्यते । यथा– 'परिव्राजकः, दात्रम्, प्राकारः, प्रासादः' इत्यादयः क्रियानिमित्ता वुणादिप्रत्ययान्ता अप्यर्थविशेषे वर्तन्ते ।

अथैवं मन्यते अविशेषे निर्दिष्टस्य तृचः कथं घुटि स्त्रियां च विशेषे प्रयोग इति, नैवम् । अयमपि दृश्यते । यथा घरतिरयमविशेषेणोपदिश्यते । **'गृ घृ सेचने'** (१।२७६) इति अर्थविशेषेणैव प्रसज्यते– 'घृतम्, घर्म, घृणा' इति, तद्वदिहाप्यदोषः । क्रियानिमित्तः पुनरन्यत्र क्रोष्टुशब्दः सर्वत्र प्रयुज्यते एव । यथा–'क्रोष्टा पुरुषः, क्रोष्ट्री स्त्री, क्रोष्टु कुलम्, क्रोष्टृभ्याम्, क्रोष्टृभ्यः' इत्यादि । कथं तर्हि 'प्रियकोष्टा पुरुषः' इत्यत्र बहुव्रीहौ ऋदन्तलक्षणः को न भवति– बहुकर्तृकः प्रासाद इत्यादि । सत्यमेतत् । किन्तु नैतत् सूत्रमस्ति, अपि तु बहुलार्थः । तेन मृगवाचिक्रोष्टृशब्दाद् बहुव्रीहौ को न भवतीति । अत्र बहुलार्थत्वादेव वेदितव्यं शसादावित्यादि । शसादौ स्वर इत्येवमादय इति क्रोष्ट्रे, क्रोष्टवे, क्रोष्टुः, क्रोष्टोरित्येवमादयोऽपीत्यर्थः । व्यञ्जनविषये तृन्प्रत्यय एव 'क्रोष्टुभ्याम्, क्रोष्टुभिः' । तथा क्रोष्टुयोगात् क्रोष्टुने अरण्याय, क्रोष्टुनोऽरण्यात्, क्रोष्टुनोऽरण्यस्येति नपुंसके न्वागमविषयत्वाद् व्यञ्जनादित्वमिति । यस्तु **"विभाषा तृतीयादिष्वचि"** (अ० ७।१।९७) इत्याह । **तन्मते** तृतीयादिष्विति वचनात् शसि नित्यं क्रोष्टून् इति ॥१४७।

[क० च०]

**धातोः**। कर्तेत्यत्र नास्य विषयः। "**आ सौ सिलोपश्च**" (२।१।६४) इत्यनेन बाधितत्वात्, घुटि चेतिवत्। ननु धातोस्तृशब्दमादायास्यापवादत्वाद् आत्वविधिश्चानेन कथन्न बाध्यते ? सत्यम्। '**अनन्तरस्य विधिः प्रतिषेधो वा**' (कात० प० १८) इति न्यायात् संनिहितत्वाद् अर्विधेर्बाधाया एवौचित्यात्। "**यः करोति स कर्ता**" (२।४।१४) इति ज्ञापकाद् वा इत्याह – अरोऽपवाद इति **वृत्तिः।** धातोर्विहितस्येति किमिति **वृत्तिः।** सम्बन्धे षष्ठ्येवास्ताम्, ततश्च यथाकथंचित् संबन्धो यातृशब्देऽप्यस्तीति व्यावृत्तिः संगच्छते। ननु तथापि धातोर्विहितस्येति किमर्थमुच्यते, यावता "**स्वस्रादीनां च**" (२।१।६९) इत्यत्र नप्त्रादीनामेवेति नियमबलाद् उणादिप्रत्ययं प्रति आरादेशस्य व्यावृत्तिरस्तीति 'यातरः' इत्यादिकं सिध्यति ? सत्यम्। यथा सादृश्यादुणादिकं प्रत्यग्रिमवचनाद् व्यावृत्तिरित्युच्यते तथा तृशब्दं प्रति च सादृश्याद् व्यावृत्तिः, न तु 'यातरः' इत्यादौ तत्सूत्रीयनियमव्यावृत्तिः, नियमप्रत्ययान्तत्वाभावात्। अतस्तृशब्दस्येति किम् ? 'ननान्दरौ, ननान्दरः' इत्यपि व्यावृत्तिः संगच्छते। धातोरिति पञ्चमीयमिति **पञ्जी।** ननु पञ्चमीयमिति कथं निश्चितं चेत्, शब्दग्रहणमेव पञ्चमीनिश्चये कारणम्। तथाहि शब्दस्तु वाचक उच्यते कर्त्राद्यर्थवाचकः यस्तृशब्दः, स च तृन्स्वरूपो विहितविशेषणं विना न घटते इत्याह – अतो विहितविशेषणमिति।

**शर्ववर्मणे**त्यादि। ननु कथं निष्ठादिषु तृन्प्रत्ययस्य परिगणनमिति चेत्, प्रकृतिप्रत्ययविभागेन प्राप्तस्यैवोदाहरणं बोद्धव्यम्, तर्हि प्रकृतेऽपि दीयतां दृष्टिः ? सत्यम्। **वररुचिना** तृनादिकं पृथगेवोक्तम्, ततश्च वररुचिशर्ववर्मणोरेकबुद्ध्या दुर्गसिंहेनोक्तमिति कतमोऽयं पूर्वपक्षः, शर्ववर्मणानुक्तत्वात्। ननु स्त्र्यसम्बुद्धिघुटोरित्यनुवृत्तौ "**तृज्वत् क्रोष्टुः**" (अ० ७।१।९५) इति **पाणिनिसूत्रम्।** भवन्मते तदभावात् संबुद्धौ घुटि नित्यं तृजन्तस्यैव प्रयोगः स्याद् इत्याह – सम्बुद्धावित्यादि। ननु तथापि "**नपुंसकात् स्यमोर्लोपे**" (२।२।६) च दृश्यते तुन्प्रत्यय इति किं **काकुवादेन** ? यावता क्रुशस्तुन् घुटि स्त्रियामित्युक्ते नपुंसके स्यमोर्घुट्त्वाभावे नैव तुनस्तस्य प्रयोगः सिद्ध एव ? सत्यम्। अत्र **कुलचन्द्रः "नपुंसकात् स्यमोर्लोपे न च तदुक्तम्"** (२।२।६) इति प्रतिषेधे प्राप्ते नाम्यन्तचतुरां वेति पक्षे तृजन्तप्रयोगनिरासार्थं तुन् दृश्यते इति, तन्न। घुट्त्वाभावेनैव तृजन्तप्रयोगस्य निरासात्, स्वमते तृजादेशाभावाच्च। तस्मादिदमेव युक्तमुत्तरं तद् विवृणोमि – बहवः क्रोष्टारो यस्मिन् वने इति

वाक्येऽवश्यंभविष्यतो घुटो विषयम् आश्रित्य तृजन्तस्य प्रयोगे प्राप्ते स्यमोर्लोपे च बुद्धिस्थीभूते तुन् दृश्यते इति यदुक्तं तद् युक्तमेव । एतेन **'शृगालवञ्चकक्रोष्टुफेरुफेरव-जम्बुकाः'** इति देश्यमपास्तम् । समाहारत्वादेव 'शृगालवञ्चकक्रोष्टु' इति पृथग् द्वन्द्वे सिद्धत्वात्, तर्हि 'जम्बूकौ क्रोष्टुवरुणौ' इत्यत्र का गतिरिति चेत् **"घुटि स्त्रियाम्"** इत्यत्र घुटीति सति **भावसप्तमी।** घुटि सति क्रुशधातोर्विहितस्तुन् न प्रयोगवान् । घुटो लोपे तु तुनः प्रयोगः स्यादेव । यतो घुट्संज्ञा तुनस्तस्य प्रयोगं प्रति प्रतिबन्धिका । प्रतिबन्धकताभावे तु तुनस्तस्य प्रयोगः स्यादेव । एतेन साक्षाद् घुटि तृजन्तप्रयोग इति घुटीति भावसप्तम्या विवक्षावशात् । तस्माल्लिङ्गात् स्यादीनामवश्यंभावाद् अविना-भावसंबन्धाच्च स्यादेर्लिङ्गदशायामेव तुनन्तो निवर्तते, घुटः सत्त्वात् । यद्यपि प्रत्यय-लोपलक्षणन्यायात् प्रत्ययनिबन्धनतृचः प्रयोगो भवितुमुत्सहते । तदपि भावसप्तम्यैव निरस्तं घुटः स्थितेरभावात् । प्रत्ययलोप इत्यस्य तु भावसप्तम्यां विषय एव नास्तीति **सम्प्रदायः** ।

यत्तु **पञ्जीकृतोक्तम् –** घुटीति विषयसप्तमीयमिति, तदपि वर्तमानविषयत्वेनैव भावसप्तम्या अवान्तरत्वात् । ननु तथापि **"नपुंसकात् स्यमोर्लोपे च"** (२।२।६) इति यदुक्तं तदतात्पर्यकम् । यावता उक्तरीत्या बहुक्रोष्टुभिरित्यत्रापि तुन् दृश्यते इत्यपि वक्तुं युज्यते, नैवम् । स्थितास्थितयोरघुड्घुटोर्विषये गृहीतव्ये स्थितस्याघुटो विषय एव ज्यायान् । अतोऽघुड्विषयमाश्रित्य तुन् निर्विवाद एव । यत्र 'बहुक्रोष्टु वनम्' इत्यादौ घुडघुटोरुभयोरेव लोपः क्रियते तत्रान्तरङ्गं सन्निहितं च घुटमाश्रित्य तृजन्तस्य प्रयोगे प्राप्ते तुन् दृश्यते इति युक्तमेवोक्तम् । यद् वा चकारेणैव बहुक्रोष्टुभिरित्यत्रापि तुन् दृश्यते इति सूचितम् । यद् वा **वृत्तौ** घुट्पदं विभक्त्यन्तरमतिरस्कृतघुट्परम्। अत्र तु भिसादिभिरेव तिरस्कृतत्वाद् दृश्यते इति नोक्तम्, तर्हि बहवः क्रोष्टारो यस्मिन् इति वाक्ये कथं तृजिति चेत्, न । स्वपदेनैव वाक्यमिति को दोषः ।

**परमते** तु अन्तर्वर्तिनीं घुड्विभक्तिमाश्रित्य तृजादेशे प्राप्ते तुन् दृश्यते इत्युक्तम्, तर्हि तन्मते कथं 'बहुक्रोष्टुभिः' इत्यत्र नोक्तम् – तुन् दृश्यते इति, नैवम् । अन्तर्वर्तिविभक्त्याश्रयणं न सार्वत्रिकम्, किन्तु प्रयोगानुसारेणैव । तेन 'स्वद्भ्याम्' इत्यादौ **"अपश्च"** (२।२।१९) इति दीर्घो न भवति, युवावादेशादिकं तु भवत्येवेति **हेमकरादिहृदयम् ।** ननु यन्मते तृजादेशः क्रियते तन्मतेऽन्तरङ्गे कप्रत्यये कर्तव्ये बहिरङ्गो घुडाश्रिततृजादेशोऽसिद्धः स्यादिति को न भवति । भवन्मते घुड्विषये तृच्प्रयोगे कथम् ऋदन्तलक्षणः को न स्यादिति हृदि कृत्वाह – कथन्तर्हीति ।।१४७।

## [समीक्षा]

'कर्तृ + औ, कर्तृ + जस्' इस अवस्था में कातन्त्रकार तृच्प्रत्ययघटित 'ऋ' के स्थान में 'आर्' आदेश करके 'कर्तारौ, कर्तारः' शब्दरूप सिद्ध करते हैं, जबकि पाणिनि को इनके साधनार्थ 'गुण, रपर तथा दीर्घ' ये तीन कार्य करने पड़ते है – **"ऋतो ङिसर्वनामस्थानयोः, उरण् रपरः, अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणाम्"** (अ० ७।३।११०; १।१।५१; ६।४।११)। इस प्रकार कातन्त्रीय प्रक्रियालाघव समादरणीय है।

व्याख्याकारों ने सूत्रपठित 'धातोः, तृशब्दस्य' इन पदों का सार्थक्य सिद्ध किया है। जैसे 'धातोः' पद के पाठाभाव में 'यत' धातु से 'ऋन्' प्रत्ययान्त शब्द 'यातृ' से भी 'आर्' आदेश प्रवृत्त हो जाता। परन्तु यहाँ 'तृ' में तकार धातुघटित है और ऋकार प्रत्ययघटित। अतः धातु से 'तृ' के विहित न होने से 'आर्' आदेश नहीं होता। इसी प्रकार 'तृशब्दस्य' का पाठ न होने पर नञ्पूर्वक 'नन्द्' धातु से ऋन्प्रत्ययान्त 'ननान्दृ' शब्द में भी 'आर्' आदेश हो जाता, परन्तु उक्त पाठानुसार यहाँ आर् आदेश नहीं होता। एक श्लोक में उन शब्दों को गिनाया गया है, जो वस्तुतः तृप्रत्ययान्त नहीं हैं, परन्तु प्रतीत होते हैं –

**पिता माता ननान्दा ना सव्येष्ट्रभ्रातृयातरः।**
**जामाता दुहिता देवा न तृप्रत्ययभागिनः॥**

## [रूपसिद्धि]

१. **कर्तारौ।** कर्तृ + औ। 'कृ' धातु से **"वुण्तृचौ"** (४।२।४७) सूत्र द्वारा तृच्प्रत्यय तथा प्रकृत सूत्र से तृप्रत्ययघटित 'ऋ' को आर् आदेश।

२. **कर्तारः।** कर्तृ + जस्। पूर्ववत् 'तृच्' प्रत्यय तथा 'ऋ' को आर्' आदेश ॥१४७।

# १४८. स्वस्रादीनां च [२।१।६९]

## [सूत्रार्थ]

घुट्संज्ञक (सि, औ, जस्, अम्, औ, नपुंसकलिङ्ग में जस्-शस् प्रत्यय) प्रत्ययों के पर में रहने पर स्वस्रादिगणपठित शब्दों के अन्त्यावयव ऋकार को 'आर्' आदेश होता है ॥१४८।

[दु० वृ०]

स्वस्रादीनां च ऋत आर् भवति घुटि परे । **स्वसारौ । नप्तारौ ।**

**स्वसा नप्ता च नेष्टा च त्वष्टा क्षत्ता तथैव च ।**

**होता पोता प्रशास्ता च अष्टौ स्वस्रादयः स्मृताः ॥१४८।**

[दु० टी०]

**स्वस्रा०** । आदिशब्दस्यात्र व्यवस्थावाचित्वात् 'स्वसृ - नप्तृ - नेष्ट्र - त्वष्ट्र - क्षत्तृ - होतृ - पोतृ - प्रशास्तृ' एत एवोदाहृताः । स्वसृग्रहणमप्राप्तिप्रापणार्थम्, तथा नप्त्रादीनां चाव्युत्पत्तिपक्षे । व्युत्पत्तिपक्षे तु नियमार्थम् । एवंभूतानां सञ्ज्ञाशब्दानाम् अपरेण यथा आर् मा भूद् इति पितरौ, पितरः । नीनिशित्विषिक्षिदिहुपूप्रशासीनां तृनन्तानां निपातः, तथा पित्रादीनां च तृनन्तानामेव ॥१४८।

[वि० प०]

**स्वस्रा०** । ननु स्वसृग्रहणमेवास्ताम् । नप्त्रादयस्तु तृजन्तास्तृनन्ता वा नीप्रभृतीनां धातूनां यथायोगं निपातनीयास्ततः पूर्वेणैव आरादेशस्तेषां सिध्यति, नैवम् । **द्विविधा हि संज्ञाशब्दाः – व्युत्पन्नाः, अव्युत्पन्नाश्च ।** तत्राव्युत्पत्तिपक्षे पूर्वेण प्राप्तेरभावाद् अप्राप्तिप्रापणार्थमेव तेषामुपादानम् । व्युत्पत्तिपक्षे तु नियमार्थम् – संज्ञाशब्दानां मध्ये नप्त्रादीनामेव स्यात् । अन्यथा पित्रादीनामपि व्युत्पत्तिपक्षे प्रसज्येतेति ॥१४८।

[समीक्षा]

'स्वसृ + औ, नप्तृ + औ' इस अवस्था में कातन्त्रकार 'ऋ' को आर् आदेश करके तथा पाणिनि 'गुण- रपर-उपधादीर्घ' करके 'स्वसारौ, नप्तारौ' शब्द सिद्ध करते हैं – "**ऋतो ङिसर्वनामस्थानयोः, उरण् रपरः, अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम्**" (अ० ७।३।११०; १।१।५१; ६।४।११) । फलतः यहाँ भी पाणिनीय प्रक्रिया में गौरव स्पष्ट है ।

स्वस्रादि गण में आठ शब्द पढ़े जाते हैं – स्वसा, नप्ता, नेष्टा, त्वष्टा, क्षत्ता, होता, पोता एवं प्रशास्ता । इनमें 'स्वसृ' शब्द के तृप्रत्ययान्त न होने के कारण "**धातोस्तृशब्दस्याऽऽर्**" (२।१।६८) से आर् आदेश प्राप्त नहीं होता, शेष सभी

शब्दों में इसी सूत्र से आर् आदेश हो जाएगा। अतः केवल 'स्वसृ' शब्द में आर् आदेश करने के लिए **"स्वसुश्च"** ऐसा ही सूत्र बनाया जाना चाहिए, **"स्वस्रादीनां च"** इस प्रकार नहीं– इस आपत्ति का समाधान किया जाता है कि यह सूत्र नियमार्थ है। अर्थात् तृप्रत्ययान्त संज्ञाशब्दों में यदि आर् हो तो केवल 'नप्तृ' आदि स्वस्रादिगणपठित शब्दों में ही हो 'पितृ' आदि में नहीं – "सञ्ज्ञाशब्दानां निपातानां मध्ये आर् भवन् नप्त्रादीनामेव, न तु पित्रादीनाम्"।

**[रूपसिद्धि]**

१. **स्वसारौ।** स्वसृ+औ। प्रकृत सूत्र द्वारा 'ऋ' को 'आर्' आदेश।

२. **नप्तारौ।** नप्तृ+औ। पूर्ववत् ऋ को आर्॥१४८।

## १४९. आ च न सम्बुद्धौ [२।१।७०]

**[सूत्रार्थ]**

ऋकारान्त लिङ्ग में ऋ को आर् तथा आ आदेश नहीं होता है संबुद्धि संज्ञक सि प्रत्यय के परे रहते। फलतः अर् आदेश प्रवृत्त होता है॥१४९।

**[दु० वृ०]**

ऋदन्तस्य लिङ्गस्य आर्, आ च न भवति सम्बुद्धौ। अर्थाद् अरेव। **हे कर्तः, हे स्वसः**॥१४९।

**[दु० टी०]**

**आ च।** अनन्तरत्वात् स्वस्रादीनामिति न वर्तते 'विशेषातिदिष्टः प्रकृतं न बाधते' इत्याह - ऋदन्तस्येति। चकारोऽनुक्तमपि समुच्चिन्वन् अधिकृतमेव समुच्चिनोतीत्याह - 'आर् आ च न भवति' इति। चकारेणानुकृष्यते चेत् स्वस्रादीनामेवानन्तरस्यार्प्रतिषेधः शक्यते इति **"घुटि च"** (२।१।६७) इत्यर् प्रत्ययलोपलक्षणेन प्रवर्तते एव बाधकाभावादित्याह – अर्थादित्यादि। **"आ सौ सिलोपश्च"** (२।१।६४) इति चकारोऽयमन्वाचयशिष्ट इति भावः। ननु तत्रापि "आ सिना" इति कथन्न विदध्यात् सह सिना ऋदन्तस्य आ भवति, सिलोपे सत्याकारप्रतिषेधो न विधेय एव स्यात्? सत्यम्। अत्यल्पं चोद्यमिदम्। इहैव 'अर् संबुद्धौ' इति कथं न कुर्यात्, **नैवम्।**

अकारप्रश्लेषार्थं यथान्यासमिति अश्च आश्च आ । तेन बहुव्रीहौ **"मातुरत् पुत्रस्तुतौ"** इति न वक्तव्यम् । अत एव वचनाद् ऋदन्तलक्षणः को न भवति, बहुलार्थत्वाद् वा पुत्रप्रशंसायां गम्यमानायां मातृशब्दस्यान्तोऽकारो भवति । अत्र संभावितोत्कर्षया श्लाघ्यया तत्पुत्रव्यपदेशयोग्यया मात्रा पुत्रस्य प्रशंसा भवति ।

गार्गी माता अस्येति **गार्गीमातृकस्**तस्य संबोधने **'हे गार्गीमात'** तथा **'हे वात्सीमात'**। मातुरिति किम् ? गार्ग्यपितृक। पुत्रस्येति किम् ? हे गार्गीमातृके वत्से ! स्तुताविति किम् ? अरे दासीमातृक । अत्रासंभावितोत्कर्षया श्लाघ्यया मात्रा पुत्रस्य निन्दा, प्रत्युदाहरणे कप्रत्ययः स्यात् ॥१४९।

**[वि० प०]**

**आ च । 'विशेषातिदिष्टः प्रकृतं न बाधते'** (कात० प० १९) इति सामान्यम् ऋदन्तमेवानुवर्तते, न त्वनन्तराः स्वस्रादय इत्याह - ऋदन्तस्येति । आर् आ चेति । अधिकृतस्तावद् आर् न भवति **"आ सौ सिलोपश्च"** (२।१।६४) इत्याकारोऽपि न भवतीत्यर्थः । **"घुटि च"** (२।१।६७) इत्यरेव प्रवर्तते, बाधकाभावादित्याह - अर्थादरेवेति ॥१४९।

**[क० च०]**

**आ च न ।** अस्य वृत्तौ आश्च न भवतीति **साम्प्रदायिकाः** पाठं कुर्वते । अधिकृतस्तावद् आर् न भवतीति ।एतेन उक्तसमुच्चये चकारः ।ननु चकारासम्बन्धतया आरादेशस्य प्राधान्यात् चकारसंबन्धतया आकारस्य गौणत्वेन यत्रारादेशस्य निषेध उपपद्यते तत्रैव प्रधानानुयायितया आकारस्यापि निषेधः स्यात् । यथा - 'हे कर्तः, हे स्वसः' इत्यादौ, न तु 'हे पितः' इत्यत्र, सत्यम् । वाक्यानुरोधे तु प्राधान्यगौणत्व-विचारः, कार्ये तु व्याप्तिन्यायादुभयमेव प्राधान्येन विधीयते इति ।अत एव टीकायामपि शङ्केत इत्युक्तमिति **पञ्जीकृतो हृदयम्,** तन्न बुद्ध्वा **कुलचन्द्रेण** दूषितमिति । यत्तु **टीकाया**मनुक्तमपि समुच्चिन्वन् अधिकृतमेव समुच्चिनोतीत्युक्तम्, तत्रोक्तसमुच्चये तावच्चकारः सम्भवतीत्यपेरर्थः ॥१४९।

**[समीक्षा]**

'हे कर्तृ + सि, हे स्वसृ + सि' इस अवस्था में कातन्त्रकार के अनुसार 'ऋ' को 'अर्' आदेश होने पर 'हे कर्तः ! हे स्वसः ! रूप निष्पन्न होता है, जबकि

पाणिनि एतदर्थ ऋ को गुण, रपर करते हैं– **"ह्रस्वस्य गुणः, उरण् रपरः"** (अ० ७।३।१०८; १।१।५१)। इस प्रकार कातन्त्रीय प्रक्रिया में लाघव स्पष्ट है।

### [रूपसिद्धि]

१. **हे कर्तः!** हे कर्तृ+सि। **"आ सौ सिलोपश्च"** (२।१।६४) से प्राप्त 'आ' आदेश तथा **"धातोस्तृशब्दस्याऽऽर्"** (२।१।६८) से प्राप्त 'आर्' आदेश का **"आ च न संबुद्धौ"** (२।१।७०) से निषेध होने पर **"घुटि च"** (२।१।६७) से 'ऋ' को 'अर्' आदेश तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से 'र्' को विसर्ग आदेश।

२. **हे स्वसः!** हे स्वसृ+सि। पूर्ववत् प्राप्त 'आ-आर्' आदेशों का निषेध, ऋ को अर् तथा रेफ को विसर्ग आदेश ॥१४९।

## १५०. ह्रस्वनदीश्रद्धाभ्यः सिर्लोपम् [२।१।७१]

### [सूत्रार्थ]

ह्रस्व-नदी-श्रद्धासंज्ञक लिङ्ग = प्रातिपदिक से परवर्ती सम्बुद्धिसंज्ञक 'सि' प्रत्यय का लोप होता है ॥१५०।

### [दु० वृ०]

ह्रस्वनदीश्रद्धाभ्यः परः संबुद्धिः सिर्लोपमापद्यते। **हे वृक्ष, हे अग्ने, हे नदि, हे वधु, हे श्रद्धे, हे माले।** संबुद्धिरिति किम् ? वृक्षः। नदीश्रद्धाग्रहणमुत्तरार्थमिद्दार्थं च ॥१५०।

### [दु० टी०]

**ह्रस्व०।** तथावयवनद्या अपि हे लक्ष्मि, हे अतिलक्ष्मि, हे तन्त्रि, हे अतितन्त्रि। ननु लोपात् स्वरादेशस्य बलवत्त्वान्नित्यत्वाच्च प्राग् एत्वे ओत्वे च कृते ह्रस्वाभावाद् 'हे अग्ने! हे पटो!' इत्यत्र सिलोपो न स्यात्। ह्रस्वग्रहणमकारार्थमुत्तरार्थं च। 'अग्नीनाम्, पटूनाम्' इति चरितार्थम्। यद्येवं नदीग्रहणमनर्थकं स्यात्, ह्रस्वलक्षणः सेर्लोपो भविष्यति, नैवम्। **'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य'** (कात०

प० ३१) इति । ननु **'वर्णग्रहणे निमित्तत्वात्'** (कात० प० ३२) इत्यस्तीयं परिभाषा । तर्हि उत्तरार्थं क्रियमाणमिहापि **सुखप्रतिपत्त्यर्थम्** । एवं सति भूतपूर्वाया अपि नद्या एव सिलोप इति । तथा श्रद्धाया एत्वे कृते **"श्रद्धायाः सिर्लोपम्"** (२।१।३७) इत्यनेन सिध्यतीति श्रद्धाग्रहणमपीह भूतपूर्वश्रद्धाप्रतिपत्त्यर्थं तत्साहचर्यादिकारोकारादपि भूत-पूर्वादिति स्थितम् । ह्रस्व इति व्यक्तिनिर्देशाद् वा विहितविशेषणमाचक्षते **अन्ये। "ह्रस्वनदीश्रद्धाभ्यो विहितः सिः"** इत्यर्थः ।

नन्वर्थवशात् सम्बुद्धाविति सप्तम्या अचरितार्थायाः प्रथमया विपरिणामो भविष्यति, किं सिग्रहणेन ? नैवम् । अन्यथाप्यर्थस्य घटनाद् ह्रस्वनदीश्रद्धाभ्यः परस्य ऋदन्तस्य संबुद्धौ लोपो भवतीति ऋत एव लोपः स्यादिति विप्रतिपद्यते । हे भवकर्तः, हे सेनानिपितः, हे यवलुमातः, हे नदीकर्तः, हे श्रद्धामातः । तस्मात् सिग्रहणमिति । **अपर** आह – विशेषविधिं बाधित्वा लोपः प्रागेव यथा स्यादिति । तेन हे वारे ! हे दधे ! हे त्रपो ! हे जतो ! सम्बुद्धिलक्षणमेत्वमोत्वं च सिद्धम् । इकारान्तप्रकृतिपक्षे 'हे पन्थाः' इत्यादावपि विषयसप्तमी स्यात्, तर्हि कथम् ऋदन्तस्य नपुंसके संबुद्धौ 'हे कर्तृ ! हे भर्तृ !' यदि परत्वान्नपुंसकलक्षणः सिलोपः स्यात् तदा नच तदुक्तप्रतिषेधात् सिध्यति, नान्यथेति । किं च 'हे वारि, हे त्रपु, हे दधि, हे जतु' इत्यपि भवितव्यमेव । अथ **"अकाराद् असंबुद्धौ मुश्च"** (२।२।७) इत्यसंबुद्धिग्रहणं ज्ञापयिष्यति - नपुंसकलक्षणोऽपि सेर्लोपो भवतीति ।

नैवम् । **"अन्यादेस्तु तुः"** (२।२।८) इत्यत्र तुशब्दोऽसंबुद्धिनिवृत्त्यर्थ इति व्याख्येयम् । तत्कथम् – 'हे अन्यत्' इति स्यात् । तदर्थश्चेदं संबुद्धिग्रहणम्, तदा "अन्यादेस्तु संबुद्धौ च" इति विदध्यात् । तर्हि प्रियास्तिस्रो यस्य कुलस्येति विग्रहे 'प्रियतिसृ प्रियचतसृ कुलम्' इति न सिध्यति । **"तिसृ चतसृ विभक्तौ"** ( ।३।२५) इति विषयसप्तमीत्वाद् भविष्यति । ननु 'प्रियत्रि, प्रियचतुः कुलम्' इत्यपीष्यते, तन्न सिध्यतीति पूर्वोक्तमेव युक्तम् इत्येतद् इष्टरूपसिद्ध्यर्थं तु व्याख्यास्यामः । कथं सह इना वर्तते इति सिः, परमश्चासाविश्चेति परमेः, तस्यामन्त्रणे 'हे से ! हे परमे !' तथा ओकारादपि **इत्येके**। परमश्चासावुश्चेति परमोः, तस्यामन्त्रणे परमो ! **अन्यः** पुनराह – ओकारस्याविशेषेण घुट्योत्वम्, **मतान्तर**मेतत् ॥१५०।

## [वि० प०]

**ह्रस्वः** । अथ किमर्थं नदीग्रहणम् ? नद्याः संबुद्धौ कृते ह्रस्वलक्षण एव सिलोपो भविष्यति । न च **'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य'** (कात० प० ३१) इति वक्तुं युज्यते, वर्णग्रहणे निमित्तत्वात् । सत्यमेतत्, किन्तु ओरार्थं क्रियमाणमिहापि भूतपूर्वगतिमाश्रित्य सुखार्थमेवावेदयतीति नदीग्रहणम् । तर्हि श्रद्धाग्रहणं किमर्थम् ? **"श्रद्धायाः सिर्लोपम्"** (२।१।३७) इत्यस्त्येव ? सत्यम् । इदमप्युत्तरार्थमिहार्थं च । अन्यथा **'लोपस्वरादेशयोः स्वरादेशो विधिर्बलवान्'** (कात० प० ३५) इत्यग्रतः संबुद्धौ चैत्वे सति श्रद्धाया अभावात् कथमिह सेर्लोपः स्यात् ।

श्रद्धाग्रहणे तु तद्बलाद् भूतपूर्वगतिराश्रीयते इत्याह – नदीश्रद्धाग्रहणमित्यादि । एतेनैतदपि चोद्यमपास्तम्, स्वरादेशत्वान्नित्यत्वाच्च प्रागेत्वे ओत्वे च कृते ह्रस्वाभावात् कथं सेर्लोपः स्यात् –हे अग्ने ! हे धेनो !, नदीश्रद्धाभ्यां साहचर्याद् ह्रस्वादपि भूतपूर्वादिति व्याख्यानात् । अयं तु परिहारो न युज्यते ह्रस्वग्रहणबलात् पूर्वमेव सिलोप इति तस्याकारं प्रति चरितार्थत्वात् 'हे वृक्ष !' इति । उत्तरार्थत्वाच्चाग्नीनाम्, धेनूनामिति ॥१५०।

## [क० च०]

**ह्रस्व०** । स्वरादेशत्वान्नित्यत्वाच्चेति । ननु कृताकृतप्रसङ्गित्वेन नित्यादपि गुणात् प्राक् **'सर्वविधिभ्यो लोपविधिर्बलवान्'** (कात० प० ३४) इति न्यायात् सेर्लोपोऽपि स्यादित्याह –स्वरादेशत्वादिति व्यस्तम् । भूतपूर्वादिति । ननु 'हे पन्थाः' इत्यत्रापि भूतपूर्वह्रस्वात् सिलोपः कथं न स्यात् । यथा हे धेनो ! इत्यादिषु ? सत्यम् ।

अत्र **हेमकरः** – यत्र सम्बुद्धिमाश्रित्य विकारः क्रियते, तत्रैव सिलोपं प्रति भूतपूर्वगत्याश्रयणमिति । तदसत् । सह इना वर्तते इति सिः, तस्य संबोधने 'हे से !' इत्यत्रापि संबुद्धिं विना विकारे सति भूतपूर्वगत्या सिलोपस्य **टीकाकृता** दर्शितत्वादिति **कश्चित्** । तन्न । विकारस्याप्येतत्प्रकरणीयस्यैव गृहीतत्वात् । 'हे से' इत्यत्र तु सन्धिप्रकरणीयविकार इति न दोषः ।

**कुलचन्द्रस्त्वाह** – **"आ च न सम्बुद्धौ"** (२।१।७०) इत्यत आ च नेति वर्तते । ततश्च विभक्तिविपरिणामेन आकाराच्च न भवतीति सम्बन्धनीयमिति । **महान्तस्तु** नदीश्रद्धयोस्तावद् विकारे नामी संभवति, तत्साहचर्याद् ह्रस्वस्यापि नामिन एव विकृताद्

भूतपूर्वगत्या सिलोप इति । व्याख्यानादिति । एतदव्यवहित**पञ्जीकृद्**व्याख्यानादित्यर्थः । ननु यदि भूतपूर्वगत्यैव ह्रस्वादपि सिलोपः क्रियते तदा 'हे वृक्ष' इत्यादौ कथं सिलोपः, विकाराभावेन भूतपूर्वगतेरभावात् ? सत्यम् । अत्रापि सिलोपात् पूर्वं भूत उच्चरित इत्यर्थे सत्यकारं प्रत्यपि भूतपूर्वत्वमस्त्येवेति न दोषः । विकारे सत्येव भूतपूर्वगतिरिति **कः शपथः** ।

'हे वृक्ष' इति । ननु यद्यकारं प्रत्येव ह्रस्वग्रहणं क्रियते तदा 'अनदीश्रद्धाभ्यः' इत्येव क्रियतामित्याह– उत्तरार्थत्वाच्चेति **हेमकरः।** तन्न । 'हे अम्ब, हे अक्क' इत्यत्र कथं सिलोपः, न चात्र नामी विकृतः ? सत्यम् । **टीकाकृता परमतानुवादः कृतः। अस्मन्मते** सेर्विसर्गान्त एवावसीयते ॥१५०।

**[समीक्षा]**

'हे वृक्ष + सि, हे अग्नि + सि, हे नदी + सि, हे श्रद्धा + सि' इस अवस्था में कातन्त्रकार ने सम्बुद्धिसंज्ञक 'सि' प्रत्यय का लोप करके 'हे वृक्ष, हे अग्ने, हे नदि, हे श्रद्धे' शब्दरूप सिद्ध किए हैं। पाणिनि ने भी सु-लोप का विधान किया है– **"एङ्ह्रस्वात् संबुद्धेः"** (अ० ६।१।६९)। अतः उभयत्र साम्य ही है।

**[रूपसिद्धि]**

१. **हे वृक्ष !** हे वृक्ष + सि। **"आमन्त्रिते सिः सम्बुद्धिः"** (२।१।५) से सिप्रत्यय की संबुद्धिसंज्ञा, उसके ह्रस्वान्त लिङ्ग से परवर्ती होने के कारण प्रकृत सूत्र से लोप।

२. **हे अग्ने !** हे अग्नि + सि। पूर्ववत् ह्रस्वान्त लिङ्ग से परवर्ती संबुद्धिसंज्ञक 'सि' प्रत्यय का प्रकृत सूत्र से लोप।

३. **हे नदि !** हे नदी + सि। पूर्ववत् नदीसंज्ञक नदीशब्द से परवर्ती सि प्रत्यय का लोप तथा ईकार को ह्रस्व।

४. **हे वधु !** हे वधू + सि। पूर्ववत् सिलोप तथा ह्रस्व।

५. **हे श्रद्धे !** हे श्रद्धा + सि। सि-लोप तथा एकारादेश।

६. **हे माले !** हे माला + सि। सिलोप तथा एकारादेश ॥१५०।

# १५१. आमि च नुः [२।१।७२]

## [सूत्रार्थ]

ह्रस्व- नदी- श्रद्धासंज्ञक लिङ्ग से परवर्ती षष्ठीविभक्तिबहुवचन 'आम्' प्रत्यय के होने पर 'नु' आगम होता है ।।१५१।

## [दु० वृ०]

ह्रस्वनदीश्रद्धाभ्य आमि परे नुरागमो भवति । **वृक्षाणाम्, अग्नीनाम्, धेनूनाम्, नदीनाम्, वधूनाम् , श्रद्धानाम्, मालानाम् ।** श्रद्धासहचरितस्यामो ग्रहणाद् वा- नद्याम्, युवाम् ।।१५१।

## [दु० टी०]

**आमि ।** श्रद्धासहचरितस्येत्यादि । श्रद्धायास्तावत् षष्ठीबहुवचनम् आम् भवतीति, तत्साहचर्याद् ह्रस्वनदीभ्यामपीत्यर्थः । तेन **"नद्या ऐ- आस्- आस्- आम्"** (२।१।४५) इत्यामादेशे कृते युष्मदादिभ्यश्चामौ चाम् इत्यादेशे कृते न भवति । वाशब्दः पक्षान्तरे **'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव'** (कात० प० पा० ७५) ग्रहणं वेत्यर्थः ।'वारीणाम्, जतूनाम्' इत्यत्र यदि नामिनः स्वरे नुर्भवति तदा न दोष इति । नुरित्युकारः परादित्वार्थः। आम् नामित्यादिश्यतामिति चेत्, नैवम् । लाघवं न भवतीति ।।१५१।

## [वि० प०]

**आमि० ।** नद्याम्, युवामिति ।**"नद्या ऐ आसासाम्"** (२।१।४५) इति ङेरामादेशे कृते तथा **"युष्मदस्मदादिभ्यश्चामौ चाम्"** इति कृते प्राप्नोतीत्याह– श्रद्धासहचरितेत्यादि । **अयमर्थः** – श्रद्धायास्तावत् षष्ठीबहुवचनमेवाम् सम्भवति । तत्साहचर्याद् ह्रस्वनदीभ्यामपि षष्ठीबहुवचनमेव गृह्यते । तेन कुतोऽन्यत्र प्राप्तिः । वाशब्देन **'लक्षण-प्रतिपदोक्तयोः प्रतिपदोक्तस्यैव'** (कात० प० पा० ७५) ग्रहणमिति सूच्यते ।।१५१।

## [समीक्षा]

'वृक्ष + आम्, अग्नि + आम्, धेनु + आम्' इस अवस्था में कातन्त्रकार ने 'नु' तथा पाणिनि ने 'नुट्' आगम करके 'वृक्षाणाम्, अग्नीनाम्, धेनूनाम्' प्रयोग सिद्ध किए हैं। पाणिनि का सूत्र है – **"ह्रस्वनद्यापो नुट्"** (अ० ७।१।५४) । इस प्रकार उभयत्र साम्य ही है ।

### [रूपसिद्धि]

१. **वृक्षाणाम्।** वृक्ष + आम्। ह्रस्वान्त लिङ्गसंज्ञक 'वृक्ष' शब्द से परवर्ती षष्ठीविभक्ति-बहुवचन 'आम्' प्रत्यय के रहने पर प्रकृत सूत्र द्वारा 'नु' आगम, उसका परादि में प्रयोग, **"घुटि चासंबुद्धौ"** (२।२।१७) से दीर्घ तथा नकार को णकारादेश।

२-३. **अग्नीनाम्।** अग्नि + आम्। **धेनूनाम्।** धेनु + आम्। पूर्ववत् 'नु' आगम, परादिप्रयोग तथा दीर्घ।

४-५. **नदीनाम्।** नदी + आम्। **वधूनाम्।** वधू + आम्। पूर्ववत् नदीसंज्ञक 'नदी-वधू' शब्दों से 'नु' आगम, परादिप्रयोग तथा दीर्घ आदेश।

६-७. **श्रद्धानाम्।** श्रद्धा + आम्। **मालानाम्।** माला + आम्। पूर्ववत् श्रद्धासंज्ञक 'श्रद्धा - माला' शब्दों से 'नु' आगम, परादिप्रयोग तथा सवर्णदीर्घ ॥१५१।

## १५२. त्रेस्त्रयश्च [२।१।७३]

### [सूत्रार्थ]

षष्ठीविभक्ति-बहुवचन 'आम्' प्रत्यय के परवर्ती होने पर 'त्रि' शब्द को 'त्रय' आदेश तथा 'नु' आगम होता है ॥१५२।

### [दु० वृ०]

त्रेस्त्रयादेशो भवति नुरागमश्चामि परे। त्रयाणाम्। परमत्रयाणाम् ॥१५२।

### [दु० टी०]

त्रे०। त्रेरिति षष्ठीयं प्रतिपत्तव्या। त्रेः सम्बन्धिन्यामूपरे श्रुतस्य त्रेरेव त्रयादेशो भवतीति। तेन त्रीनतिक्रान्तानाम्, प्रियास्त्रयो येषामिति विग्रहे 'अतित्रीणाम्, प्रियत्रीणाम्' भवितव्यमिति निश्चितम्। परमाश्च ते त्रयश्चेति विग्रहे परपदप्रधानत्वात् तदन्तंभूतस्यापि त्रेरेवाम् संभवतीति इह **'गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः'** (कात० प० २) इति वा। 'त्रेस्त्रयश्च' इत्युक्ते न्वागमस्तावत् पूर्वेणैव भवति, त्रयश्चानेनैव भवतीत्यर्थः। तेन 'अतित्रीणाम्' इति साध्य एव बाध्यते। सिद्धस्य नुर्भवत्येव। तर्हि चकारः किमर्थ इति चेत्, न्वागमस्यैवाधिकारार्थस्तेन चतुरस्त्रयादेशो नैव शङ्क्यते इति। कथं **'त्रीणामिव समुद्राणां युगान्तेऽम्बुसमागमः'** इति **ऋषिवचनात्** ॥१५२।

[वि० प०]

**त्रेः ।** त्रेरिति सम्बन्धे षष्ठीयम्, त्रेः संबन्धिन्यामीति श्रुतत्वात् त्रेरेव स्थाने त्रयादेश इत्याह – त्रेस्त्रयादेश इति । तेन समाससंबन्धिन्यामि त्रयादेशो न भवतीति प्रियास्त्रयो येषामिति विग्रहे प्रियत्रीणामिति । परमाश्च ते त्रयश्चेति विग्रहे तत्पुरुषस्योत्तरपदप्रधानत्वात् त्रेरेव संबन्धिन्यामीति तदन्तस्यापि स्यादेवेत्याह– परमत्रयाणामिति । अथवा **'गौण-मुख्ययोर्मुख्ये कार्यसम्प्रत्ययः'** (कात० प० २) इत्याश्रीयते । न च वक्तव्यं 'प्रियत्रीणाम्' इति त्रयादेशाभावपक्षे कथं नुरागम इति । न खल्वनेन नुरागमो विधीयते, तस्य पूर्वेणैव सिद्धत्वात् । अतः साध्य एव त्रयादेशो बाध्यते । सिद्धस्तु नुः पूर्वेणैव सर्वत्र भवतीति । यत्तु सूत्रार्थे चकारान्नुरागमश्चेत्युक्तम्, तदुत्तरत्र न्वागमस्यैवाधिकारार्थः, अन्यथा त्रयादेशोऽपि चतुरः शङ्क्येत इति ॥१५२।

[क० च०]

**त्रेः ।** इहोत्तरत्र चानुकार्यानुकरणयोर्भेदादेकवचनमिति **कुलचन्द्रः** । ननु आगम-साहचर्यात् त्रिशब्दादामि परे स्वतन्त्र एव मध्ये त्रय इति भवतीत्यर्थः कथन्न स्यात्, तेन पक्षे न्वागमः पक्षे त्रयागम इति ? नैवम् । 'त्रयः' इत्यकारान्तविधानादादेश एव, न त्वागमः । अन्यथा आमि समानदीर्घे वा आकारेण सस्वरे वा विशेषाभावात् । न च वक्तव्यम्, त्रयागमे कृतेऽपि ह्रस्वान्नुविधानार्थम् अकारः क्रियते इति लिङ्गादेव नोर्विधानादिति त्रयागमेनैव साहचर्यस्य कृतत्वाच्च **'सकृद्गत०'** (कात० प० ३६) इति न्यायाद् वा । तस्मान्न पञ्चमीयमित्याह – संबन्धे षष्ठीयमिति । यद् वा पञ्चमी-कल्पनयाऽस्यापादानस्य संबन्धस्य च द्वयोरेव विवक्षा, अतो गौरवम् । षष्ठीकल्पनायां तु संबन्धमात्रस्यैव विवक्षायां लाघवमित्याह – षष्ठीयमिति ।

ननु त्रेः सम्बन्धिन्यां त्रयादेशो भवतीत्युक्ते उभयत्र षष्ठीसंबन्धे गौरवं भवति । तस्मात् त्रेस्त्रयादेश आमि भवतीत्येकत्रैव षष्ठीसंबन्धोऽस्तु लाघवादित्याह- अथवेति । तर्हि 'प्रियत्रीणाम्' इत्यत्र कथन्न स्यादित्याह – गौणमुख्येत्यादि । ननु 'न शब्दाश्रये गौणमुख्यव्यवहारः' इति न्यायस्य सत्त्वात् कथमिदमुच्यते इत्याह – आश्रीयते इति । भिन्नयोगादेव त्रयादेशनिवृत्तिरिति शङ्कामात्रमेतत्, अन्यथा त्रिचतुरस्त्रयश्चेति विदध्यात् ॥१५२।

**[समीक्षा]**

'त्रि+आम्' इस स्थिति में कातन्त्रकार तथा पाणिनि दोनों ही 'त्रि' को 'त्रय' आदेश करके 'त्रयाणाम्' शब्दरूप सिद्ध करते हैं। अन्तर यह है कि कातन्त्रकार ने एक ही सूत्र द्वारा 'त्रय' आदेश तथा 'नु' आगम किया है और पाणिनि ने दो कार्यों के लिए दो पृथक्-पृथक् सूत्र बनाए हैं– **"ह्रस्वनद्यापो नुट्, त्रेस्त्रयः"** (अ० ७।१।५४, ५३)। अतः कार्यसंख्या की दृष्टि से साम्य रहने पर भी सूत्र-भेद के कारण गौरव-लाघव अवश्य ही परिलक्षित होता है।

**[रूपसिद्धि]**

१. **त्रयाणाम्।** त्रि+आम्। प्रकृत सूत्र से 'त्रि' को 'त्रय' आदेश, नु-आगम, "अकारो दीर्घं घोषवति" (२।१।१४) से दीर्घ तथा **"रषृवर्णेभ्यः०"** (२।४।४८) से नकार को णकार आदेश।

२. **परमत्रयाणाम्।** परमत्रि+आम्। परमाश्च ते त्रयश्च। कर्मधारय समास। प्रकृत सूत्र से 'त्रय' आदेश, नु-आगम, दीर्घ तथा नकार को णकारादेश ॥१५२।

## १५३. चतुरः [२।१।७४]

**[सूत्रार्थ]**

षष्ठीविभक्ति – बहुवचन 'आम्' प्रत्यय के पर में रहने पर 'चत्वार्' शब्द से 'नु' आगम होता है ॥१५३।

**[दु० वृ०]**

'चत्वार्' इत्येतस्याऽऽमि परे नुरागमो भवति। चतुर्णाम्। अप्रधानादेव-अतिचतुराम् ॥१५३।

**[वि० प०]**

**चतुरः।** इह पूर्वत्र च बहुत्वेऽप्येकवचनम्, शब्दप्रधानत्वाद् निर्देशस्य। अप्रधानादेवेति चतुरोऽतिक्रान्तानामिति विग्रहे गौणत्वादित्यर्थः ॥१५३।

[क० च०]

**चतुरः।** शब्दानुकरणेऽपि वाशब्दस्योत्वं न विरुध्यते। चतुरो वाशब्दस्योत्वमिति ज्ञापकाद् अत्राप्यस्य विषयत्वाद् अप्रधानादिति पूर्वसूत्रे तावत् 'प्रियत्रीणाम्' इत्यत्राप्रधानत्वात् त्रयादेशो न भवति, तथात्रापि अप्रधानमेव कारणं न त्वन्यत् कारणं वाच्यमित्येवशब्दाभिप्रायः ॥१५३।

**[समीक्षा]**

'चत्वार्+आम्' इस अवस्था में कातन्त्रकार 'नु' आगम तथा पाणिनि 'नुट्' आगम (**षट्चतुर्भ्यश्च** – अ० ७।१।५५) करके 'चतुर्णाम्' शब्द सिद्ध करते हैं। अतः उभयत्र साम्य है, परन्तु पाणिनि 'चतुर्' प्रातिपदिक स्वीकार करते हैं जबकि कातन्त्रकार 'चत्वार्' प्रातिपदिक (लिङ्ग)। ज्ञातव्य है कि एकत्र 'चतुर्' प्रातिपदिक से प्रथमाविभक्ति-बहुवचन में 'चत्वारः, चत्वारि' रूपों के सिद्ध्यर्थ 'आम्' आगम (**"चतुरनडुहोरामुदात्तः"** ७।१।९८) करना पड़ता है तो अन्यत्र 'चत्वार्' लिङ्ग (= प्रातिपदिक) से द्वितीयादि विभक्तियों में 'चतुरः आदि रूपों के निष्पादनार्थ "चतुरो वाशब्दस्योत्वम्" (२।२।४१) से 'वा' को उकारादेश। अतः इस विषय में भी साम्य कहा जा सकता है।

**[रूपसिद्धि]**

१. **चतुर्णाम्।** चत्वार्+आम्। प्रकृत सूत्र से 'नु' आगम, **"चतुरो वाशब्दस्योत्वम्"** (२।२।४१) से 'वा' को 'उ' आदेश तथा "रषृवर्णेभ्यः" (२।४।४८) से न् को ण् ॥१५३।

## १५४. संख्यायाः ष्णान्तायाः [२।१।७५]

**[सूत्रार्थ]**

सङ्ख्यासंज्ञक षकारान्त – नकारान्त लिङ्ग से परवर्ती षष्ठीबहुवचन – आम् प्रत्यय के होने पर 'नु' आगम उपपन्न होता है ॥१५४।

[दु० वृ०]

संख्यायाः षकारनकारान्तायाश्चामि परे नुरागमो भवति । **षण्णाम्, पञ्चानाम् ।** अन्तग्रहणाद् भूतपूर्वनान्ताया अपि-अष्टानाम् । संख्याया इति किम् ? विप्रुषाम्, यज्वनाम् ॥१५४।

[दु० टी०]

**संख्या०।** संख्यायतेऽनयेति **संख्या।** **"आतश्चोपसर्गे"** (४।५।८४) इत्यङ्। **लोकोपचारा**देकद्वित्रिप्रभृतीनामियं संज्ञा सिद्धा । षश्च नश्च ष्णौ तावन्तौ यस्याः सा ष्णान्ता, तस्या इति । 'षष्, पञ्चन्' आभ्याम् आम्, अनेन नुरागमः । एकत्र **"हशषछान्तेजादीनां डः"** (२।३।४६), **"षडो णो ने, तवर्गश्चटवर्गयोगे"** (२।४।४३, ४६) इत्यादिना णत्वम् । अन्यत्र **"नान्तस्य चोपधायाः"** (२।२।१६) इति दीर्घः । **"लिङ्गान्तनकारस्य"** (२।३।५६) इति नलोपः । **'सङ्ख्यायाः ष्णः'** इति सिद्धे 'येन विधिस्तदन्तस्य' (कात० प० ३) इति षकारनकारान्ताया एव गम्यते इत्याह- अन्तग्रहणादित्यादि ।अन्यथा 'अष्टानाम्' इति **"अष्टनः सर्वासु"** (२।३।२०) इत्यात्वे कृते नान्तत्वाभावान्नागमो न स्यादिति । अथ **'आदेशादागमो विधिर्बलवान्'** (है० प० पा० ५०) इति, नैवम् । **'नित्यानित्ययोर्नित्यो विधिर्बलवान्'** (कात० प० ४९) इति नित्यमात्वमेव स्यात् । तथा 'शतानि, सहस्राणि' इत्युपदेशनान्तार्थमि**त्येके,** तेन जस्शसोर्लुक् न भवति ।

**तदयुक्तम्,** सन्निपातलक्षणविधेरनिमित्तत्वात् । 'प्रियाः षड् येषाम्, प्रियाः पञ्च येषाम्' इति विग्रहे 'प्रियषषाम्, प्रियपञ्चाम्' इति भवितव्यम्, संख्याया गौणत्वात् । ननु **"संख्यायाः ष्णान्तायाः"** (२।१।७५) सम्बन्धिन्यामीति विशेषणे किमन्तग्रहणेनेति, नैवम् । श्रुतत्वात् संख्यायाः ष्णान्ताया एवेति अष्टानामिति न सिध्यतीति । "चतुरः संख्यायाः ष्णान्तायाः" इत्येकयोगे सति उत्तरत्र जस्शसोर्लुक् स्यात् – चत्वारः, चतुरः पश्यन्तीति ॥१५४।

[वि० प०]

**सङ्ख्यायाः।** षश्च नश्चेति द्वन्द्वे **"तवर्गस्य षाट् टवर्गाट् टवर्गः"** (३।८।५) इति नस्य णत्वम् । ष्णावन्तौ यस्याः सा ष्णान्ता संख्या तस्या इति । षण्णामिति ।

षष् + आम् । अनेन नुरागमः, "**हशषछान्तेजादीनां डः, षढो णो ने**" (२।३।४६; ४।४३) इति डस्य णत्वम् । "**तवर्गश्चटवर्गयोगे चटवर्गौ**" (२।४।४६) इति नस्य णत्वम् । पञ्चानामिति । तथैव आमि नुरागमः । "**नान्तस्य चोपधायाः**" (२।२।१६) इति दीर्घः । "**लिङ्गान्तनकारस्य**" (२।३।५६) इति प्रकृतिनकारस्य लोपः । '**येन विधिस्तदन्तस्य**' (कात० प० ३) इति सिद्धे किमन्तग्रहणमित्याह- अन्त इत्यादि । अन्यथा "**अष्टनः सर्वासु**" (२।३।२०) इति नकारस्यात्वे कृते नान्तत्वाभावान्नुरागमो न स्यात् । अथ '**आगमादेशयोरागमो विधिर्बलवान्**' (कात० प० ४०) इति भविष्यतीति चेत्, नैवम् । '**नित्यानित्ययोर्नित्यविधिर्बलवान्**' (कात० प० ४९) इत्यात्वमेव स्यादिति । अत्रापि संख्याया इति संबन्धे षष्ठीयम् । अतः संख्यायाः संबन्धिन्यामीति विशेषणात् समाससंबन्धिन्यामीति न भवति । प्रियाः षड् येषाम्, प्रियाः पञ्च येषाम् इति विग्रहे 'प्रियषषाम्, प्रियपञ्चाम्' इति गौणत्वं वा पूर्ववदिहापीति ॥१५४।

**[क० च०]**

**संख्यायाः ।** षश्च नश्चेति । ननु द्वन्द्वसमासे सति भिन्नपदत्वात् "**रषृवर्ण०**" (२।४।४८) इत्यादिना णत्वं न प्राप्नोति ? सत्यम् । समासान्तसमीपयोर्वेति समासान्तत्वाण्णत्वमविरुद्धमेवेति **कुलचन्द्रः** । तन्न । उच्चारणार्थस्याकारास्यैव समासान्तता, न तु नकारस्येति । तर्हि कथं णत्वमित्याह-तवर्ग इत्यादि । पक्षान्तरमाह- गौणत्वमिति । पूर्ववदिति । प्रियत्रीणामित्यादिवदित्यर्थः ॥१५४।

**[समीक्षा]**

'षष् + आम्, पञ्चन् + आम्' इस स्थिति में कातन्त्रकार 'नु' आगम तथा पाणिनि 'नुट्' आगम करके 'षण्णाम्, पञ्चानाम्' प्रयोग सिद्ध करते हैं। अतः उभयत्र साम्य है। पाणिनि का नुडागमविधायक सूत्र है – "**षट्चतुर्भ्यश्च**" (अ० ७।१।५५)।

व्याख्याकारों ने सूत्रस्थ 'अन्त' पद की पहले अनावश्यकता बताकर सार्थकता सिद्ध करते हुए कहा है कि वर्तमान में नकारान्त न होने पर भी यदि पूर्व में वह शब्द नकारान्त रहा हो तो उससे भी 'नु' आगम करने के लिए 'अन्त' पद का पाठ किया गया है। फलतः 'अष्टानाम्' पद में 'अष्टन्' शब्द से न् को आत्व

(**अष्टनः सर्वासु** २।३।२०) हो जाने पर उसका नकारान्तत्व समाप्त हो जाता है, किन्तु पूर्व में नकारान्त होने के कारण 'नु' आगम प्रवृत्त होता है।

यहाँ यह ज्ञातव्य है कि पाणिनि ने षान्त-नान्त संख्यावाचक शब्दों की (पञ्चन्, षष्, सप्तन्, अष्टन्, नवन्, दशन्) 'षट्' संज्ञा की है– **"ष्णान्ता षट्"** (अ० १।१।२४)। तदनुसार 'षट्' – संज्ञक शब्दों से नुडागम किया गया है।

कातन्त्रकार ने संख्या तथा षट् संज्ञाओं के लिए सूत्र नहीं बनाए। उन्होंने लोकव्यवहार के अनुसार संख्यार्थक शब्दों को उसी अर्थ में स्वीकार कर उनका अपने व्याकरण में प्रयोग किया है। तदनुसार ही षान्त-नान्त संख्यावाचक शब्दों से 'नु' आगम का निर्देश किया गया है।

यह विशेष ज्ञातव्य है कि पाणिनि ने पारिभाषिक संख्यासंज्ञा तो की ही है, उसके अतिरिक्त लोकप्रचलित शब्दों का भी प्रयोग किया है। कातन्त्रकार केवल लोकव्यवहार को प्रधान मानकर संख्यासंज्ञक सूत्र बनाने की आवश्यकता नहीं समझते हैं, जैसा कि प्रकृत सूत्र (२।१।७५) से स्पष्ट है ॥१५४।

**[रूपसिद्धि]**

१. **षण्णाम्।** षष्+आम्। प्रकृत सूत्र से 'नु' आगम, **"हशषछान्तेजादीनां डः"** (२।३।४६) से ष् को ड्, **"षडो णो ने"** (२।४।४३) से 'ड्' को 'ण्' तथा **"तवर्गश्चटवर्गयोगे चटवर्गौ"** (२।४।४६) से 'न्' को 'ण्' आदेश।

२. **पञ्चानाम्।** पञ्चन्+आम्। प्रकृत सूत्र से 'नु' आगम, **"नान्तस्य चोपधायाः"** (२।२।१६) से दीर्घ तथा **"लिङ्गान्तनकारस्य"** (२।३।५६) से नकार का लोप ॥१५४।

## १५५. कतेश्च जस्शसोर्लुक् [२।१।७६]

**[सूत्रार्थ]**

सङ्ख्यासंज्ञक षकारान्त–नकारान्त शब्द तथा 'कति' शब्द से परवर्ती जस् – शस् प्रत्ययों का लुक् होता है ॥१५५।

[दु० वृ०]

कतेः संख्यायाः षकारनकारान्तायाश्च जस्–शसोर्लुग् भवति। कति, कति। षट्, षट्। पञ्च, पञ्च ॥१५५।

[दु० टी०]

**कते०**। चकारः ष्णान्ताया इत्यनुकर्षणार्थ इत्याह – कतेः संख्यायाः ष्णान्तायाश्चेति। का संख्या एषामिति संख्यावृत्तेः किमो डतिर्निपात्यते, सद्यआद्यत्वात्। अत्रापि षष्ठीयं कतेः संख्यायाः ष्णान्तायाः संबन्धिनोर्जस्-शसोर्लुग् इति। तेन प्रियाः षड् येषां प्रियाः पञ्च येषामिति विग्रहे **प्रियषषः, प्रियपञ्चानः, प्रियपञ्चः पश्येति**। एवं प्रियाष्टान्, प्रियाष्टानः, प्रियाष्ट्नः पश्येति शसि "अवमसंयोगादनो लोपः" (२।२।५३)। औ तस्माज्जस्शसोरिति कृतत्वादेवाष्टन इति। प्रियाश्च ते षट् चेति। प्रियाश्च ते पञ्च चेति विग्रहे 'प्रियषट्, प्रियपञ्च' चेति भवत्येव संख्यायाः प्रधानत्वात्। यत्तद्भ्यामपि डतिरित्**येके**। ताभ्यामपि जस्शसोर्लुग् इति। तेन 'यति ते नाग शीर्षाणि तति ते नाग वेदनाः' इति। 'लुग्लोपे न प्रत्ययकृतम्' इति **"नान्तस्य चोपधायाः"** (२।२।१६) घुटि दीर्घो न भवति, कतेरेत्वं च न जसीति। ननु 'कतेश्चासोर्लुग्' इति कथन्न विदध्यात्। संख्यायाः प्रधानत्वाच्च ङसिङसोरुत्पत्त्यभाव एव। षडस्यति, पञ्चास्यतीति यदि क्विब् दृश्यते, विभक्तिसंबन्धान्न भविष्यति। तर्हि जस्शसोर्ग्रहणं **सुखप्रतिपत्त्यर्थमेव** स्यात् ॥१५५।

[वि० प०]

**कतेः**। इहापि पूर्ववद् व्याख्यानात् समाससंबन्धिनोर्जस्शसोर्लुग् न भवति। प्रियकतयः, प्रियषषः, प्रियपञ्चानः। 'प्रियकतीन्, प्रियषषः, प्रियपञ्ञ्चः' पश्येति पूर्ववद् विग्रहः। तथा प्रियाष्टानस्तिष्ठन्ति, प्रियाष्टनः पश्येति शस्यनोऽकारलोपे **"तवर्गश्चटवर्गयोगे"** (२।४।४६) इत्यादि प्रवर्तते। कर्मधारये तु संख्यायाः प्रधानत्वात् स्यादेव-प्रियाश्च ते षट् चेति प्रियषडित्यादि ॥१५५।

[क० च०]

**कतेः**। प्रियाष्टान इति संख्यायाः 'अबहोरन्त्यस्वरादिलोपश्च' न भवति, समासान्तविधेरनित्यत्वादिति ॥१५५।

**॥ इति श्रीसुषेणाचार्यकविराजकृते कलापचन्द्रे द्वितीये नाम्नि चतुष्टये प्रथमो धातुपादः समाप्तः॥**

●

[समीक्षा]

'कति + जस्- शस्, षष् + जस्- शस्, पञ्चन् + जस्- शस्' इस अवस्था में कातन्त्रकार तथा पाणिनि (षड्भ्यो लुक्- अ० ७।१।२२) दोनों ही 'जस्- शस्' प्रत्ययों का लुक् करके 'कति, षट्, पञ्च' रूप सिद्ध करते हैं। पाणिनि का यदि 'षट्' संज्ञापूर्वक निर्देश सुखार्थ माना जा सकता है तो कातन्त्रकार का प्रसिद्धिवशात् किया गया विधान भी सुखार्थ ही होगा।

[रूपसिद्धि]

१. **कति**। कति + जस्, शस्। प्रकृत सूत्र द्वारा 'जस्- शस्' प्रत्ययों का लोप।

२. **षट्**। षष् + जस्, शस्। प्रकृत सूत्र द्वारा 'जस्- शस्' प्रत्ययों का लोप, "**हशषछान्तेजादीनां डः**" (२।३।४६) से ष् को ड् तथा "**वा विरामे**" (२।३।६२) से ड् को ट् आदेश।

३. **पञ्च**। पञ्चन् + जस्, शस्। प्रकृत सूत्र से **'जस्- शस्'** प्रत्ययों का लोप तथा "**लिङ्गान्तनकारस्य**" (२।३।५६) से नकारलोप ॥१५५।

## १५६. नियो ङिराम् [२।१।७७]

[सूत्रार्थ]

नी (णीञ् प्रापणे-धातुसिद्ध लिङ्ग = प्रातिपदिक) से परवर्ती सप्तमी– एकवचन 'ङि' प्रत्यय को आम् आदेश होता है ॥१५६।

[दु० वृ०]

नियः परो ङिराम् भवति। नियाम्, ग्रामण्याम् ॥१५६।

**॥ इति दौर्गसिंह्यां वृत्तौ द्वितीये नाम्नि चतुष्टये प्रथमो धातुपादः समाप्तः ॥**

●

[दु० टी०]

**नियो०**। नी (णीञ्) प्रापणे। नयतीति नीः, एवं ग्रामं नयतीति ग्रामणीः। "**सत्सूद्विष०**" (४।३।७४) इत्यादिना क्विप्, "**पूर्वपदात् संज्ञायाम्**" (कात० परि०-

ण० २) णत्वं दृश्यते। ग्रामस्य प्रधानभूतः पुमान् ग्रामणीरुच्यते। एवं ग्रामण्याम्। एकदेशविकृतस्यानन्यवद्भावाद् णत्वेऽप्याम् भवत्येव। येन वर्णेन शब्देन वा यो विधिरारभ्यते स तदन्तस्य भवति, एकस्मिन्नाद्यन्तवदुपचारात्॥१५६।

**॥ इति श्रीदुर्गसिंहविरचितायां कातन्त्रवृत्तिटीकायां द्वितीये नाम्नि चतुष्टये प्रथमो धातुपादः समाप्तः॥**

●

## [वि० प०]

**नियः**। ग्रामण्याम् इति। ग्रामं नयतीति। "**सत्सूद्विष०**" (४।३।७४) इत्यादिना क्विप्, तत्रापिशब्दबलात् पूर्वपदस्थेभ्यः संज्ञायामिति णत्वम्। ततश्च ग्रामप्रधानभूतः पुरुषो ग्रामणीरुच्यते। णत्वेऽप्येकदेशविकृतस्यानन्यवद्भावात् '**येन विधिस्तदन्तस्य**' (कात० प० ३) इति केवलस्याद्यन्तवद्भावात्॥१५६।

**॥ इति श्रीमत्त्रिलोचनदासकृतायां कातन्त्रवृत्तिपञ्जिकायां द्वितीये नाम्नि चतुष्टये प्रथमो धातुपादः समाप्तः॥**

●

## [समीक्षा]

'नी + ङि, ग्रामणी + ङि' इस अवस्था में कातन्त्रकार तथा पाणिनि (ङेराम्-नद्याम्नीभ्यः – अ० ७।३।११६) दोनों ही 'ङि' को 'आम्' आदेश करके 'नियाम्, ग्रामण्याम्' शब्दरूप निष्पन्न करते हैं। अतः उभयत्र साम्य ही है। सूत्ररचनाशैली के सिद्धान्तानुसार कातन्त्रकार कार्यी का प्रथमान्त तथा कार्य का द्वितीयान्त निर्देश करते हैं– ङिः + आम्। पाणिनि के अनुसार कार्यी का षष्ठ्यन्त तथा कार्य का प्रथमान्त निर्देश होता है– ङेः + आम्।

## [रूपसिद्धि]

१. **नियाम्**। नी + ङि। प्रकृत सूत्र द्वारा ङि को आम् तथा "**ईदूतोरियुवौ स्वरे**" (२।२।५६) से ई को इय् आदेश।

२. **ग्रामण्याम्**। ग्रामणी + ङि। प्रकृत सूत्र से ङि को आम् "**अनेकाक्षरयोस्त्व०**" (२।२।५९) से ई को य् आदेश॥१५६।

**॥ इति द्वितीये नामचतुष्टयाध्याये समीक्षात्मकः प्रथमो धातुपादः समाप्तः॥**

●

# अथ द्वितीये नामचतुष्टयाध्याये द्वितीयः सखिपादः

## १५७. न सखिष्टादावग्निः [२।२।१]

**[सूत्रार्थ]**

तृतीयाविभक्ति – एकवचन 'टा' आदि स्वर के परवर्ती होने पर, सखिशब्दस्थ इकार को अग्निवद्भाव नहीं होता है ।।१५७।

**[दु० वृ०]**

सखिस्थः सखिष्टादौ स्वरे नाग्निर्भवति । सख्या, सख्ये ।।१५७।

**[दु० टी०]**

न स० । इदुदग्निरित्यनेनाग्नित्वं प्राप्तं **"न सखिष्टादावग्निः"** इत्युच्यते । ननु तत्र हि इकारोकारयोरेवाग्निसंज्ञा न तदन्तस्येति । **"न सख्युरिष्टादावग्निः"** इति कर्तुमुचितम् । सख्युरिकारोऽग्निर्न भवतीति । अथ सामर्थ्यादिकारोऽवसीयते किमिकारग्रहणेन चेत्, तथाप्यवयवावयविसम्बन्धे षष्ठी केन निवार्यते इत्याह- सखिस्थः सखिरिति । सखिस्थ इकारः सखिरुच्यते, **उपचारात्** । यथा **'मञ्चाः क्रोशन्ति'** इति । सख्युरन् न भवतीति रूपान्यत्वे ह्यनुकरणमेव न स्यात् । विधिमुखेनार्थात् संज्ञा निषिध्यते । यथा 'नायं गौः' इत्युक्तेऽन्यद्रव्यस्य गोसंज्ञा नास्तीत्यवसीयते इति नास्ति प्रकरणभेदः, तदन्तस्यापि प्रतिषेध एवेति निश्चितम् ।

बहवः सखायो यस्य (तेन) बहुसख्या, (तस्मै) बहुसख्ये इति । कथम् **'अतिसखेः'** इति **भाष्यचोदितं चैतत्** । सखीं स्त्रियमतिक्रान्तस्यातिसखेरित्युपसर्जनत्वाद् ह्रस्वत्वं परनिमित्तादेशः पूर्वस्मिन् स एव स्त्रीकार एवायं न सखिस्थ इकारः इति कुतः प्रतिषेध-प्रसङ्गः स्यात्, विभक्तिषु च **'लिङ्गग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्'** (कात० प० १७) इति नाद्रियते । अत एव 'न सखिपत्योष्टादावग्निरसमासे' इति विदध्यात् । टा एवादिर्यस्यासौ टादिस्तद्गुणसंविज्ञानो बहुव्रीहिः, तत्पुरुषे हि शसीति विदध्यात् । आदिग्रहणमिहोत्तरार्थं च । तेन सख्युः, पत्युरित्यग्निलक्षणमेत्वं न स्यात् । नैवम्, तत्र प्रधानमलोप एव वाक्यार्थः क्रियते **"गोश्च"** (२।१।५९) इत्यत्र चकारेण 'इरेदुरोद्'

इत्यनुकृष्यते उत्तरार्थमेवं चेत् किमादिग्रहणेन टाडयोरित्येवं ब्रूयात् । एतेनादिग्रहण-व्याप्तेः प्रयोजनं चिन्त्यते, न तु लाघवमिति । नैतदेवमस्ति प्रयोजनम्, भूपतेर्भूपताविति पतिरसमासे एवाग्निर्न भवति, समासे तु भवत्येव इत्यवधारणार्थम् । अत एवादि-ग्रहणादग्निरिति तत्र संबध्यते इति स्थितम् । टादाविति किम् ? सखीन् । **"शसोऽकारः सश्च नोऽस्त्रियाम्"** (२।१।५२) इति भवति ॥१५७।

## [वि० प०]

**न सखि० । "इदुदग्निः"** (२।१।८) इत्यनेनाग्निसंज्ञा प्राप्ता अनेन प्रतिषिध्यते । ननु कथमयं निर्देशः, यावता इकारोकारयोरेवाग्निसंज्ञा न तदन्तस्येति तत्र निश्चितम्, अतो न "सख्युरिष्टादावग्निः" इति कर्तुमुचितम्, सख्युरिकारोऽग्निर्न भवतीत्यर्थः । अथ समुदायस्य प्रतिषेधेऽप्यर्थादिकार एवावसीयते, तथाप्यवयवावयविसंबन्धे षष्ठी केन निवार्यते । सखिस्थः सखिरिति । सख्यौ तिष्ठतीति सखिस्थः **"नाम्नि स्थश्च"** (४।३।५) इति कप्रत्ययः । सखिस्थ इकारः सखिरुच्यते, **उपचारात् ।** यथा 'मञ्चाः क्रोशन्ति' इति मञ्चस्थाः पुरुषाः मञ्चशब्देनोच्यन्ते ।

ननु तथापि कथमीदृशो निर्देशो यावता **"सख्युश्च"** (२।२।२३) इति वचनादन् प्राप्नोति । नैवम्, अनुकरणनिर्देशोऽयम् । अनुकरणं चानुकार्याकारं स्यादिति कथं विकृतिः अनुकरणमेवान्यथा न स्यादिति भावः । **'प्रकृतिवदनुकरणम्'** (व्या० प० वृ० ८६) इत्यस्य पुनरर्थपदार्थानुकरणं विषयः शब्दपदार्थस्य चेदं सखिशब्दस्यानुकरण-मित्यदोषः । व्यञ्जने अग्निसंज्ञायाः प्रयोजनाभावात् प्रतिषेधो वार्थः । अर्थात् स्वरे परे प्रतिषेधो विज्ञायते इत्याह - टादौ स्वर इति । 'सख्या, सख्ये' इति अग्नित्वाभावात् 'टा ना' ङे इत्येकारश्च न भवति ॥१५७।

## [क० च०]

**न सखि० ।** ननु संज्ञासूत्र एवाग्निशब्दः स्वरूपपरो भवितुमर्हति । कार्यकाले तु संज्ञिपर एव संभवति । एवं च सति "टादावग्निः" सखिस्थो न भवतीत्यर्थे सखिस्थ इकारो विनश्यतीत्यर्थः कथन्न स्यात् ? सत्यम् । पर्युदासोऽयं नञ्, स चान्योऽभाव-वाची, ततश्च संज्ञासूत्रेणैकवाक्यताऽवश्यं कर्तव्या । तथा च टादौ सखिस्थो य इकारस्तदन्योऽन्यभाववान् इकारोऽग्निर्भवतीति । अन्यथा एकवाक्यतां विना **"इदुदग्निः"** (२।१।८) इत्यनेन प्रथमत एव प्राप्तौ सत्यां वचनशतेनापि संज्ञाया

निषेद्धुमशक्यत्वात् । तस्मादेकवाक्यतायां सत्यामग्निशब्देनात्रापि सञ्ज्ञैवोच्यते, न त्विकारव्यक्तिरिति ।अतः सखिस्थ इकारो नश्यतीत्यर्थो न घटत एव, किन्तु संज्ञानिषेधः संभवतीत्याह – संज्ञा प्राप्ता निषिध्यते इति ।अर्थादिति सखिसमुदायस्याग्नित्वासंभवादित्यर्थः। अथ "**न सख्युरिष्टादावग्निः**" इत्यत्र **पूर्वपक्षद्वयम् – एक**स्तावदिकारकरणम् अन्यश्च सख्युरिति षष्ठीविधानम्, तत्र इकारखण्डनार्थं सिद्धान्तयति– अथेति। **द्वितीयपक्षं सूचयति–** तथापीति । इकारग्रहणं मा कार्षीः, षष्ठी केन निवार्यतामित्याह– सखिस्थ इकार इत्यादि । सखिस्थ इत्युपचारेणैव षष्ठ्यर्थो लभ्यते इति भावः।

नन्वनुकरणनिर्देशोऽयमिति, तत्रानुकरणमेव विचार्यते। **तच्च द्विविधम्-शब्दानुकरणमर्थानुकरणं** चेति । यत्र शब्दमात्रप्रतीत्यर्थमनुक्रियते उच्चार्यते **तच्छब्दानुकरणम्।** यत्रार्थमात्रप्रतीत्यर्थं शब्दोऽनुक्रियते **तदर्थानुकरणम्।** तत्रार्थे कार्यासम्भवात् तद्वाचिनि शब्दे कार्यं क्रियते इति **कश्चित्** । तन्न । अर्थप्रतीत्यर्थमुच्चार्यमाणत्वाद् 'घटमानय' इत्यादीनामपि अनुकरणत्वं स्यात् । एवं च सत्यर्थानुकरणपदस्य व्यावृत्तिर्नास्तीति, तस्मात् सार्थकशब्दस्यानुकरणमर्थानुकरणम् , निरर्थकशब्दस्यानुकरणं शब्दानुकरणमिति ।एतच्च "**तिर्यच्यपवर्गे**" (४।६।४३) इत्यत्र **टीकायां** वक्ष्यति, तत्र सार्थकानुकरणे प्रकृतिवदनुकरणं भवतीति यौक्तिक एवायं पक्षः। तथाहि, प्रकृतेः सार्थकत्वेन तत्र यत् कार्यं प्राप्नोति तत् कार्यं तदनुकरणेऽप्यतिदिश्यते, शब्दानुकरणे प्रकृतेर्निरर्थकत्वात् कार्यं तत्र न प्राप्नोति ।कुतस्तदनुकरणे कार्यमिह शब्दानुकरणेऽस्य ग्रहणात् "**सख्युश्च**"(२।२।२३)इत्यन्न भवति ।ननु यदात्र सखिरिति निरर्थकानुकरणं कथन्तर्हि सार्थके कार्यनिषेधः क्रियते ? सत्यम्। निरर्थकानुकरणे पदं निष्पाद्य सूत्रवैयर्थ्यभयात् तत्तद्वर्णानुपूर्वविशिष्टसार्थकशब्दे लक्षितलक्षणया पश्चात् पदाध्यारोपः क्रियते, ततश्च सार्थक एव शब्दे कार्यनिषेध उपपद्यते।

**अन्य**स्त्वाह– सखिशब्देनात्र सामान्येन सकारोत्तरखिकारविशिष्टः शब्द एवानुक्रियते ।सामान्यं चात्र सार्थकनिरर्थकसमुदायत्वम् । प्रसिद्धे शास्त्रप्रवृत्तिर्ज्यायसीति न्यायात् सार्थकशब्दमादायैव सूत्रप्रवृत्तिरिति ।तर्हि अनेनैव न्यायेन सार्थकशब्दम् आदाय प्रकृतिवदनुकरणम् इत्यस्य विषयत्वात् कथं "**सख्युश्च**" (२।२।२३) इत्यन्न भवति ? सत्यम् ।अत एव सखिरिति निर्देशाद् युगपत् सार्थकनिरर्थकयोरनुकरणे निरर्थकाश्रितकार्यमेव भवति, न तु सार्थकाश्रितमिति। यद् वा '**प्रकृतिवदनुकरणमित्यत्रार्थवद्-**

**ग्रहणे नानर्थकस्य'** (व्या० प० वृ० ८६, १) इति न्यायस्य प्रवेशाद् यत्र केवलसार्थकानुकरणं तत्र प्रकृतिवदनुकरणमित्यस्य विषय इति। अत्र तु सार्थकनिरर्थकानुकरणे केवलसार्थकत्वाभावेनार्थवद्ग्रहणस्य विषयो नास्तीति। अर्थपदार्थानुकरणमिति। अर्थ एव पदार्थवाच्यो यस्य शब्दस्य तस्यानुकरणमित्यर्थः। **शब्दपदार्थ** इति। शब्दश्चासौ पदार्थश्चेति शब्दपदार्थः शब्दस्वरूपवाच्यस्यानुकरणमित्यर्थः। बहुव्रीहौ तु शब्दपदार्थशब्देनानुकरणशब्द एवोच्यते, नहि तस्यान्यदनुकरणमस्तीति **संक्षेपः** ॥१५७।

## [समीक्षा]

'सखि + टा, सखि + ङे' इस अवस्था में दोनों ही व्याकरणों के अनुसार टा को ना तथा इकार को गुणादेश नहीं होता है। फलतः 'सख्या, सख्ये' रूप निष्पन्न होते हैं। कातन्त्रकार इकारान्त शब्दों की अग्निसंज्ञा करते हैं – **"इदुदग्निः"** (२।१।८) तथा पाणिनि ने इनकी 'घि' संज्ञा की है – **"शेषो घ्यसखि"** (अ० १।४।७)। 'सखि' शब्द के इकारान्त होने के कारण सखि शब्द की या सखि-शब्दस्थ इकार की उक्त संज्ञा प्राप्त होती है, परन्तु पाणिनि ने 'असखि'-पद के पाठ से घिसंज्ञा का तथा कातन्त्रकार ने **"न सखिष्टादावग्निः"** (२।२।१) सूत्र बनाकर 'सखि' शब्द की अग्निसंज्ञा का निषेध किया है। अन्तर यह है कि कातन्त्रकार की 'अग्नि' संज्ञा अन्वर्थ है, जबकि पाणिनि की घिसंज्ञा हस्तचेष्टा की तरह संकेतबोधिका ।

## [रूपसिद्धि]

१. **सख्या**। सखि + टा। **"इदुदग्निः"** (२।१।८) से प्राप्त सखिशब्दस्थ इकार की अग्निसंज्ञा का प्रकृत सूत्र से निषेध हो जाने पर **"इवर्णो यमसवर्णे न च परो लोप्यः"** (१।२।८) से इकार को यकारादेश।

२. **सख्ये**। सखि + ङे। यहाँ पर पूर्ववत् अग्निसंज्ञा के निषेध से गुणाभाव होने पर इकार को यकारादेश ॥१५७।

# १५८. पतिरसमासे [२।२।२]

## [सूत्रार्थ]

समासाभाव की अवस्था में 'टा' आदि स्वरादि प्रत्ययों के पर में रहने पर पतिशब्दस्थ इकार की 'अग्नि' संज्ञा नहीं होती है ॥१५८।

**[दु० वृ०]**

पतिस्थः पतिष्टादौ स्वरे नाग्निर्भवति असमासे । **पत्या, पत्ये**। असमास इति किम् ? नरपतिना ।।१५८।

**[दु० टी०]**

**पतिः**। नरपतिनेति । नराणां पतिरिति विग्रहः । किञ्च पतिना, धातुनेति ? पातीति **पतिः**। **"पातेर्डतिः"** (उ० ३।५३) । स इह स्वाम्यर्थो रूढितो गृह्यते । टादाविति किम् ? पतिम्, पती, पतीन् ।।१५८।

**[वि० प०]**

**पतिः**। इहापि पूर्ववद् व्याख्यानम् । अत आह- पतिस्थः पतिरिति । पतिशब्दो रूढिवशात् स्वाम्यर्थ इह गृह्यते । तेन पतिना, धातुनेति स्यादेव ।।१५८।

**[क० च०]**

**पतिः**। पातीति **पतिः**। **"पातेर्डतिः"** (उ० ३।५३)। **'सीतायाः पतये नमः'** इत्यलुक्समास एव । नञोऽनित्यत्वाद् वा न निषेधः । तेन बहुलार्थो बहुशब्द इति स्वीकारे 'बहुपत्ये' इत्याद्यपि सिद्धम् । अनित्यस्य लक्ष्यानुसारित्वात् समासेऽपि क्वचिन्निषेधः ।।१५८।

**[समीक्षा]**

'पति + टा, पति + ङे' इस अवस्था में उभयत्र 'टा' को 'ना' तथा 'इ' को गुण आदेश न होने के कारण 'पत्या, पत्ये' शब्दरूप सिद्ध होते हैं। अन्तर यह है कि कातन्त्रकार 'असमास' में 'पति' शब्द की अग्निसंज्ञा का निषेध करते हैं और पाणिनि समास में ही 'पति' शब्द की घिसंज्ञा करते हैं – **"पतिः समास एव"** (अ० १।४।८)।

**[रूपसिद्धि]**

१. **पत्या**। पति + टा । **"इदुदग्निः"** (२।१।८) सूत्र से प्राप्त अग्निसंज्ञा का प्रकृत सूत्र से निषेध हो जाने पर **"इवर्णो यमसवर्णे न च परो लोप्यः"** (१।२।८) से इकार को यकारादेश ।

२. **पत्ये**। पति + ङे । पूर्ववत् अग्निसंज्ञा का निषेध तथा इकार को यकारादेश ।।१५८।

# १५९. स्त्री नदीवत् [२।२।३]

## [सूत्रार्थ]

किसी विभक्ति के पर में रहने पर 'स्त्री' शब्द को नदीवद्भाव होता है ॥१५९।

## [दु० वृ०]

स्त्रीशब्दो नदीवद् भवति विभक्तौ । **हे स्त्रि !, स्त्रियै, स्त्रीणाम् ।** विकल्पमपि बाधते ॥१५९।

## [दु० टी०]

**स्त्री०।** स्तृणातेर्ईट्, टनुबन्धत्वादीः स्त्रीति स्वरूपमेव गृह्यते, न तूपचरितः स्त्र्यर्थाभिधायी स्त्रीशब्दः, **"आशिषि च"** (३।५।२२) इति निर्देशाद् इयादेशत्वादामि ङवति च विभाषा प्राप्ता । वद्व्यावृत्त्या शेषे च नदीत्वस्याप्राप्तिरेवेति वचनमिदमनपेक्षमारभ्यते । यच्चोक्तम् 'विभक्ताविति', तद्विभक्तिमन्तरेण लिङ्गं न संभवतीति । तेन 'बहुस्त्रीकः कलिङ्गः' इति कप्रत्ययः स्यात्, अथवा न चेह **"नद्यृदन्ताद् बहुव्रीहौ कः"** इति वचनमस्ति, अपि तु बहुललक्षणः क इति न दुष्यति । ननु कथमिहानन्तरं टादाविति नानुवर्तते, नैवम् । टादावित्यनुवर्तमानेऽप्यामि ङवति नदीवद्भावस्य प्रयोजनाद् **"ह्रस्वश्च ङवति"** (२।२।५) तदनन्तरं स्त्री चेति विदध्यात् । एतेनोत्सर्गापवादक्रमप्रतिपत्तिरपि स्यात्, अत एव विपर्ययं विदधाति ।अतोऽनुमीयते इदमनपेक्षमिति, तत्सहचरितमसमासग्रहणमपि नानुवर्तते । इष्टत्वादधिकारस्येति वा, तेन तदन्तविधिना 'हे परमस्त्रि, परमस्त्रीम्, परमस्त्रीः पश्य' इति ।

**कार्यातिदेशोऽयं** स्त्रीशब्दो नदीनिबन्धनकार्यभाग् भवतीत्यर्थः । व्यपदेशातिदेशेऽपि न दोषः । **व्यपदेशः संज्ञा,** सा पुनरिहासती अतिदिश्यते । तर्हि मुख्यैव सञ्ज्ञा आस्ताम्, किं वद्ग्रहणेन ? चेत्, नैवम् ।मुख्यसंज्ञायां सत्यां स्त्रियमतिक्रान्ताय 'अति – स्त्रये, अतिस्त्रेः, अतिस्त्रौ' इत्यग्निकार्यं न स्यात् । एकदेशविकृतस्यानन्यवद्भावान्नदीत्वमेवेति । ऐप्रभृतीन्येव भवितुमर्हन्ति तस्माद् वद्ग्रहणं सादृश्यार्थम् । सादृश्यं पुनरीकारमन्तरेण न संभवतीति समीहितं सिद्धम् उभयातिदेशेऽपि, तेन 'स्त्रियाम्, स्त्रियः' इति इयादेशपक्षे अमृशसोरादिलोपो न भवतीति । ईकारावस्थायामेव नदीकार्यं पश्चादियादेश इति निश्चितम् । ननु कथमयं विकल्पं बाधते येन नाप्राप्ति-

न्यायेन चेत्, तदयुक्तम् । स्यम्शस्कप्रत्ययविधिषु चरितार्थत्वात् । नैवम् । निरपेक्षत्वात् प्रवृत्तो नदीवद्भावो न निवर्तते व्यक्तित्वाद् वा ।।१५९।

**[वि० प०]**

**स्त्री नदी०** । अथ किमर्थमिदं यावता स्त्रीशब्दस्य साक्षादेव नदीत्वमस्ति । तथाहि "**स्तृणातेर्ड्रट्**" (उ० ५।१५) इति कृते टनुबन्धत्वान्नदादिलक्षणः 'स्त्रियामी' प्रत्ययः इति, नैवम् । स्त्रीशब्दस्य स्त्री चेति धातुवद्भावाद् इयादेशविषयत्वाद् वक्ष्यमाणवचनाभ्याम् आमि ङवति च विभाषा प्राप्ता, वद्व्यावृत्त्या च शेषवचने नदीत्वस्याप्राप्तिरेवेति वचनमिदमुच्यते । तच्चानपेक्षमिह निमित्तस्यानभिधानात् । अथानन्तरत्वात् टादाविति कथन्नानुवर्तते इंति चेत्, नैवम् । सत्यामपि टादावित्यनुवृत्तौ पारिशेष्याद् ङवत्येव नदीवद्भावस्य प्रयोजनम्, आमि च विशेषविधानात् । ततो ह्रस्वश्च ङवति, तदनन्तरं स्त्री चेति विदध्यात् । विकल्पोऽपि वचनबलादेव न भविष्यति । अन्यथा इयुस्थानित्वात् पूर्वेणैव सिद्धम् । ततो विपर्ययविधानादनपेक्षमिति गम्यते ।

यच्च विभक्तावित्युक्तं **वृत्तौ** तद्विभक्तिमन्तरेण लिङ्गं न संभवति । तेन '**बहुस्त्रीकः कलिङ्गः**' इति बहुव्रीहौ नदीलक्षणः को भवति । तथा निरपेक्षत्वात् पूर्वमेव नदीत्वं प्रवृत्तं स्यात्, पश्चात् प्रत्यय इति कुतो 'ह्रस्वश्च ङवति, स्त्र्याख्यावियुवौ वामि' इति विकल्पोऽपीत्याह – विकल्पमपि बाधते । येन नाप्राप्तिन्यायेन विकल्पस्य बाधेति नायं परिहारोऽन्येषु स्यम्शस्कप्रत्ययेषु चरितार्थत्वादिति ।।१५९।

**[क० च०]**

**स्त्री०** । स्त्र्यर्थो न गृह्यते, 'आशिषि च' इति ज्ञापकात् । वद्ग्रहणस्य सादृश्यात् स्त्रियमतिक्रान्ताय 'अतिस्त्रियै' इत्यत्र '**एकदेशविकृतमनन्यवत्**' (कात० प० १) इति न्यायान्न भवतीति । ङवत्येवेति । ननु कथमिदमुक्तम्, यावता टाद्यनुवृत्तौ यथा ङवति प्रयोजनमस्ति, तथा आमि परेऽपि "**आमि च नुः**" (२।१।७२) इत्यनेन न्वागमोऽस्ति प्रयोजनमित्याह – "**आमि च**" इति । चकारः पुनरर्थे आमि परे पुनः "**स्त्र्याख्यावियुवौ वामि**" (२।२।४) इत्यनेन विकल्प एव विशेषोऽस्तीत्यर्थः । ननु स्त्री नदीवदित्यनेन स्त्रीशब्दमादाय नदीवद्भावेऽपि विशेषविधानमस्ति चेत्, नैवम् । अभिप्राया-परिज्ञानाद् विशेषविधानाद् विशेषेणोपादानादित्यर्थः । तथाहि – "**स्त्र्याख्यावियुवौ**

**वामि**" (२।२।४) इत्यत्र समासेन टाद्यनुवृत्तौ सत्यामपि ङ्वद्वचने "**ह्रस्वश्च ङ्वति**" (२।२।५) इत्यनेन नदीवद्भावविधानादामीत्येव लभ्यते। यत् पुनराम्विधानं तद्विशेषविधानमित्यर्थः।

यद् वा "**स्त्र्याख्यावियुवौ वामि**" (२।२।४) इत्यत्रामग्रहणं "**ह्रस्वश्च ङ्वति**" (२।२।५) इत्यत्र चकारकरणम् अनयोर्यद्विशेषेणोपादानं तद्विशेषविधानमित्यर्थः। अन्यथोभयोरपि सूत्रयोराम्ग्रहणं चकारश्च व्यर्थमेव स्यात्, टाद्यनुवृत्तावेव साध्यस्य सिद्धेः। ननु यथामि च विशेषविधानमुच्यते तथा ङ्वत्यपि विशेषविधानं कथन्न स्यात्। तथाहि- टाद्यनुवृत्तौ सत्यां पूर्वसूत्रेणैव इयुवृस्थानयोरामि सिद्धत्वात्। "**ह्रस्वश्च ङ्वति**" (२।२।५) इत्यत्र ङ्वतीति लभ्यत एव, यत् पुनर्ङ्वद्ग्रहणं तद् विशेषविधानार्थमिति। ननु कथमिदमुच्यते आम्ग्रहणेनैव टाद्यनुवृत्तेर्व्यवहितत्वात् सामान्यं वा निमित्तम् आम् वा निमित्तं स्यात्, तद्बाधनार्थं ङ्वद्ग्रहणम्। तत् कथं विशेषविधानार्थं भविष्यति, नैवम्। '**विशेषातिदिष्टः प्रकृतं न बाधते**' (कात० प० १९) इति न्यायात् टादिरेवानुवर्तिष्यते कुतः सामान्यं वा आम् वा निमित्तं स्यात्, तर्हि टाद्यनुवृत्तौ आमोऽपि संभवाद् आमि परे ह्रस्वस्य विभाषया नदीवद्भाव एव दूषणं तन्निवृत्त्यर्थं ङ्वद्ग्रहणं कथं विशेषविधानार्थं भविष्यति। नैवम्, आमि परतो ह्रस्वस्य विभाषया नदीवद्भावेऽपि निष्प्रयोजनं दूषणाभावात् (तथाहि ह्रस्वान्तस्य नदीवद्भावः पक्ष इति विशेषः)। ह्रस्वस्य नदीवद्भावद्वारा वा उभयथापि 'बुद्धीनाम्' इत्यादिप्रयोगस्य सिद्धिरिति। नैवम्, दूषणस्य सत्त्वात्। तथाहि ह्रस्वद्वारैवामि नागमसिद्धे यत् पुनर्विकल्पपक्षे नदीवद्भावः क्रियते तन्नदीद्वारैव नागमार्थमिति।

तथा च 'बुद्ध्याम्, बुद्धीनाम्' इति रूपद्वयं स्यात् तस्मात् टादिनिवृत्त्यर्थं ङ्वद्ग्रहणमवश्यमेव कर्तव्यम्। कुतो विशेषबाधनार्थं भविष्यति। अतः **पञ्जिकायामपि** आमि च विशेषविधानादिति यदुक्तं तद् युक्तमेवेति **साम्प्रदायिकाः**। तदसत्, टाद्यन्तनिविष्टत्वादानुषङ्गिकन्यायेन प्रवर्तमानस्यामो ह्रस्वनिबन्धनन्वागमबाधकत्वाभावात्। तस्मात् टाद्यनुवृत्तौ यत् पुनर्ङ्वद्ग्रहणं तद्विशेषविधानार्थमिति पूर्वपक्षोऽविरुद्ध एव। तस्मादयमेव **सिद्धान्तः** – यद्यपि क्रमेणोभयत्रापि विशेषविधानत्वं संगच्छते, तथापि आम्येव विशेषविधानता कल्प्यते, न तु ङ्वतीति।

यद् वा आमि विशेषविधानकल्पने "**स्त्री नदीवत्**" (२।२।३) इत्यनेन ङ्वत्सु बहूदाहरणानि सम्भवन्ति, ङ्वतीत्यस्य विशेषविधानकल्पने तु "**स्त्री नदीवत्**"

(२।२।३) इत्यनेनाम्येवोदाहरणं सिध्यतीति । तस्माद् बहूदाहरणसंभवे एकोदाहरणं प्रति योगारम्भस्यान्याय्यत्वादिति **गुरवः। वस्तुतस्तु** एवं योजनीया **पञ्जी**- ङवत्येव नदीवद्भावस्य प्रयोजनम्, आमि च नदीवद्भावस्य प्रयोजनमिति विशेषः। **टीकाया**मपि आमि ङवति च नदीवद्भावस्य प्रयोजनं स्यादित्युक्तमिति न विरोधः, तर्हि वक्ष्यमाणवचनाभ्यां विकल्पः कथन्न स्यादित्याह- विशेषविधानादिति। पृथक्करणादित्यर्थः। अन्यथा इयुवृस्थानत्वात् ताभ्यामेव योगाभ्यां साध्यस्य सिद्धिरिति। एवं च सति उत्सर्गापवादन्यायेन **"ह्रस्वश्च ङवति"** (२।२।५) इत्यनन्तरं **"स्त्री च"** (२।२।६१) इति विदध्यात्। तर्हि **"ह्रस्वश्च ङवति"** (२।२।५) इत्यनन्तरं 'स्त्री च' इति पाठे कथम् आम्- ङवतोरुपलब्धिः, यावता अनन्तरत्वाद् ङवतोऽनुवर्तनमेव युज्यते ? सत्यम्। 'स्त्र्याख्येयुव् ह्रस्वो वा नदीवत्' इत्येकयोगं कृत्वा तत्पश्चात् स्त्री चेति कर्तव्यमिति भावः। यच्च 'ह्रस्वश्च ङवति' इत्युक्तं तत् सिद्धशास्त्रानुसारेणैवेति **महान्तः** ॥१५९।

**[समीक्षा]**

'हे स्त्री + सि, स्त्री + ङे, स्त्री + आम्' इस स्थिति में उभयत्र संबुद्धि-ह्रस्व, ऐ आदेश (आट् आगम) तथा नु (नुट्) आगम करके 'हे स्त्रि !, स्त्रियै, स्त्रीणाम्' रूप सिद्ध किए गए हैं। कातन्त्रकार ने उक्त रूपों के साधनार्थ नदीसंज्ञाप्रयुक्त कार्यों को करने के लिए नदीवद्भाव (अतिदेश) किया है। पाणिनि तो स्त्रीभिन्न इयङ्- उवङ्स्थानवाले शब्दों की नदीसंज्ञा का निषेध करते हैं – **"नेयङुवङ्स्थानावस्त्री"** (अ० १।४।४), जिसके फलस्वरूप 'स्त्री' शब्द की नदीसंज्ञा अक्षुण्ण रूप में बनी रहती है। कातन्त्र के व्याख्याकारों ने इस सूत्र की आवश्यकता को स्पष्ट करते हुए कहा है कि 'आम्' तथा 'ङ्' अनुबन्धवाले प्रत्ययों में प्राप्त विकल्प का भी बाध करने के लिए अतिदेश किया गया है।

**[रूपसिद्धि]**

१. **हे स्त्रि।** हे स्त्री + सि। **"आमन्त्रिते सिः संबुद्धिः"** (२।१।५) से सि की संबुद्धि संज्ञा, प्रकृत सूत्र से 'स्त्री' शब्द को नदीवद्भाव, **"संबुद्धौ ह्रस्वः"** (२।१।४६) से ह्रस्वादेश तथा **"ह्रस्वनदीश्रद्धाभ्यः सिर्लोपम्"** (२।१।७१) से 'सि' का लोप।

२. **स्त्रियै।** स्त्री + ङे। प्रकृत सूत्र से नदीवद्भाव, **"नद्या ऐ आसासाम्"** (२।१।४५) से ङे को 'ऐ' आदेश, **"स्त्री च"** (२।२।६१) से धातुवद्भाव तथा **"ईदूतोरियुवौ स्वरे"** (३।४।५५, ५६) से ईकार को इयादेश।

३. **स्त्रीणाम्।** स्त्री + आम्। प्रकृत सूत्र से नदीवद्भाव, **"आमि च नुः"** (२।१।७२) से 'नु' आगम तथा **"रषृवर्णेभ्यः०"** (२।४।४८) से नकार को णकारादेश ॥१५९।

## १६०. स्त्र्याख्यावियुवौ वाऽऽमि [२।२।४]

### [सूत्रार्थ]

षष्ठीविभक्ति- बहुवचन 'आम्' प्रत्यय के परवर्ती होने पर जिनके स्थान में इय्- उव् आदेश प्रवृत्त होते हैं तथा जो स्त्रीत्व अर्थ के अभिधायक हैं – ऐसे ईकार- ऊकार का नदीवद्भाव विकल्प से होता है ॥१६०।

### [दु० वृ०]

स्त्र्याख्यावियुवृस्थानावामि परे नदीवद् भवतो वा। श्रीणाम्, श्रियाम्। भ्रूणाम्, भ्रुवाम्। स्त्र्याख्याविति किम् ? यवक्रियाम्, कटप्रुवाम् ॥१६०।

### [दु० टी०]

स्त्र्याख्या० ।इयुवौ तिष्ठतो ययोस्तावियुवृस्थानौ, तौ पुनरीदूतौ धातोरवयवाविति। तदेतत् कथमिह स्थानमन्तरेण लभ्यते इयुवोरेव नदीवद्भावात् 'श्रिय्नाम्, भ्रुव्नाम्' इत्यनिष्टरूपं स्यात्। न चेयुवाश्रयत्वाद् इयुवावित्युपचारो मुख्ये सति युज्यते। सत्यम्, वद्ग्रहणं हि सादृश्यार्थम्। तच्चेकारोकारोभ्यामृते न संभवतीति न विरुध्यते। भज श्रिञ् सेवायाम् **"श्रिद्रुस्रुप्रुज्वां क्विप्, दीर्घश्च"** इति क्विबन्तत्वाद् धातुत्वं न जहाति इति धातुत्वं श्रीशब्दस्य। श्रियामित्येवं लोके इष्यते। श्रीणाम् इति छन्दस्येव व्यवस्थितविभाषयेत्येके। "भ्रमेश्च (२।३०) डूः औणादिकः – भ्रूः। **"भ्रूर्धातुवत्"** (२।२।६०) इत्युवाश्रयो भवति। कथं पुनरियुवौ स्त्र्याख्यौ, स्त्र्याख्याववयवावपि, स्त्र्याख्यावित्युपचारात्। तेन श्रियं भ्रुवमिच्छतीति यिन्, ततः क्विप्। **"य्वोर्व्यञ्जनेऽये"** (४।१।३५) इति यलोपः। 'श्रीणाम्, भ्रूणाम् पुरुषाणाम्' इत्यपि भवति। तथा 'अतिश्रीणाम्, अतिभ्रूणां स्त्रीणां पुरुषाणां वा'।

एवमुत्तरत्र सूत्रेऽपि प्रतिपत्तव्यम्। **अन्यः** पुनराह-इयुवृस्थानौ च ह्रस्वौ च प्रवृत्तौ च प्राक् प्रवृत्तेः स्त्रीवचन एवेति। अतिश्रियै, अतिभ्रुवै ब्राह्मण्यै। क्व मा भूत्–अतिश्रिये, अतिभ्रुवे ब्राह्मणाय। अतिशकट्यै, अतिधेन्वै ब्राह्मण्यै। क्व मा भूत्- अतिशकटये, अतिधेनवे ब्राह्मणाय। **अपर** आह– इयुवृस्थानौ च ह्रस्वौ च प्रवृत्तौ प्राक्प्रवृत्तेरस्त्रीवचन एव– अतिश्रियै, अतिभ्रुवै ब्राह्मणाय। क्व मा भूत्– अतिश्रिये, अतिभ्रुवे ब्राह्मण्यै। अतिशकट्यै, अतिधेन्वै ब्राह्मणाय। क्व मा भूत्– अतिशकटये, अतिधेनवे ब्राह्मण्यै। **तदस्माभिरुभयं प्रमाणमित्यु**पचारेण गृह्यते। इयुवृस्थानाविति वचनाद् यत्व – वत्वस्थानयोर्न भवति। आधीनां प्रधीनां ब्राह्मणीनाम्, वर्षाभूणाम्, पुनर्भूणाम्। तथोत्तरत्रापि। आध्यै, प्रध्यै, वर्षाभ्वै, पुनर्भ्वै। आध्यायति, प्रध्यायति, वर्षासु भवति, पुनर्भवतीति क्विप्। स्वभावादेते स्त्र्याख्याः। न च वक्तव्यम्-अवयवावत्रापीयुवृस्थानाविति। अनेकाक्षरयोर्लिङ्गयोरीदूतोर्धात्वोरसंयोगात् परयोरिति विशेषाद् इयुवृस्थान इति निश्चितम्। व्यावृत्तिबलाच्च परं नित्यमपि यत्ववत्वविधिं बाधित्वा नदीकार्यमेव। प्रत्युदाहरणमिह मतान्तरेण प्रदर्शितम्। संग्रहणपक्षे तु यवक्रियाम्, कटप्रुवाम् इत्युक्तम्। ग्रामण्यादयो हि स्वभावतः पुंल्लिङ्गाः। स्त्रीत्वप्रतीतिस्तु स्त्रीशब्दसान्निध्यात् प्रकरणत्वाद् वा। षष्ठीबहुवचनमेवात्र व्याख्यानतो विशेषार्थप्रतिपत्तेरिति ॥१६०।

## [वि० प०]

**स्त्र्याख्या०।** इयुवृस्थानाविति इयुवौ तिष्ठतो ययोस्ताविय्-उवृस्थानौ तौ पुनः पारिशेष्यादिकारोकारौ। ननु कथमेतद् यावता साक्षात् सूत्रे इयुवावेव निर्दिष्टौ, अतस्तयोरेव नदीवद्भावो भवितुमर्हति न सूत्रे स्थानग्रहणमस्ति, येनैवमुच्यते। अतश्च इयुवादेशयोः कृतयोर्नदीवद्भावे न्वागमे सति 'श्रिय्नाम्, भ्रुन्नाम्' इत्यनिष्टरूपं प्रसज्यते इत्ययुक्तम्। नदीवदिति। **वत्करणं हि सादृश्यार्थम्।** तच्च सादृश्यम् ईकारोकाराभ्यामेव संभवति, कुतोऽन्यत्र प्रसङ्गः। कथं पुनरियुवृस्थानयोरीदूतोः स्त्र्याख्यत्वं न खलु स्त्रियामनयोर्विधानमस्ति, अपि तु समुदायेन शब्द एव स्त्र्याख्य इति। न देश्यम्, **स्त्र्याख्यावयवोऽपि स्त्र्याख्य इत्युपचारात्।** यथा 'ग्रामो दग्धः, पटो दग्धः' इति ग्रामाद्येकदेशे ग्रामादिशब्दः। श्रीणाम्, श्रियामिति। भज श्रिञ् सेवायाम्, क्विप्। वचिप्रच्छिश्रिद्रुस्रुप्रुज्वां क्विब् दीर्घश्चेति। नदीवद्भावपक्षे **"आमि च नुः"**

(२।१।७२) इति नुरागमः। अन्यत्र "**ईदूतोरियुवौ स्वरे**" (२।२।५६) इति इयादेशः। तथा 'भ्रूणाम्, भ्रुवाम्' इति "**भ्रमेर्डूः**" (२।३०) औणादिकः। "**भ्रूर्धातुवत्**" (२।२।६०) इति धातुवद्भावादुवृस्थानो भवति। स्त्र्याख्यावित्यादि आख्याग्रहणं नित्यस्त्रीविषयार्थम्, तेन 'यवक्रियाम्, कटप्रुवां स्त्रीणाम्' इत्यत्रापि न भवति ॥१६०।

**[क० च०]**

स्त्र्याख्यौ०। अप्राप्ते विभाषेयं यस्मात् पूर्वं नदीत्वस्य सर्वत्र व्यावर्तनात् प्राप्तेरभावः ॥१६०।

**[समीक्षा]**

'श्री + आम्, भ्रू + आम्' इस स्थिति में कातन्त्रकार ने वैकल्पिक नदीवद्भाव करके (नु-आगम तथा इयादेश) 'श्रीणाम्-श्रियाम्' एवं 'भ्रूणाम्-भ्रुवाम्' (नु-आगम तथा उवादेश) दो-दो रूप सिद्ध किए हैं। पाणिनि ने इनके साधनार्थ नदीसंज्ञा का वैकल्पिक निषेध किया है– "**नेयङुवङ्स्थानावस्त्री, वाऽऽमि**" (अ० १।४।४, ५)। इस प्रकार उभयत्र साम्य है।

**[रूपसिद्धि]**

१. **श्रीणाम्, श्रियाम्।** श्री + आम्। 'श्री' शब्दगत ईकार नित्य स्त्रीत्व-अर्थाभिधायक है तथा इसके स्थान में इय्– आदेश (श्रियौ, श्रियः) भी होता है, अतः प्रकृत सूत्र से वैकल्पिक नदीवद्भाव। नदीवद्भावपक्ष में "**आमि च नुः**" (२।१।७२) से 'नु' आगम, एवं "रषृवर्णेभ्यः" (२।४।४८) से नकार को णकारादेश। नदीवद्भाव न होने के पक्ष में "**ईदूतोरियुवौ स्वरे**" (२।२।५६) से ईकार को इयादेश करने पर 'श्रियाम्' शब्दरूप बनता है।

२. **भ्रूणाम्-भ्रुवाम्।** भ्रू + आम्। 'भ्रू' शब्दगत ऊकार नित्य स्त्रीत्वार्थाभिधायक है तथा इसके स्थान में उवादेश होता है। अतः प्रकृत सूत्र से वैकल्पिक नदीवद्भाव। नदीवद्भावपक्ष में 'नु' आगम एवं नकार को णकारादेश – 'भ्रूणाम्'। नदीवद्भाव न होने पर "**भ्रूर्धातुवत्**" (२।२।६०) से धातुवद्भाव एवं ऊकार को उवादेश ॥१६०।

## १६१. ह्रस्वश्च ङवति [२।२।५]

### [सूत्रार्थ]

ह्रस्व इकार-उकार का तथा स्त्रीत्व अर्थ के अभिधायक एवं इय्-उव् आदेश के स्थानी दीर्घ ईकार-ऊकार का भी नदीवद्भाव विकल्प से होता है ङ्-अनुबन्ध वाले 'ङे-ङसि-ङस्–ङि' प्रत्ययों के पर में रहने पर ॥१६१।

### [दु० वृ०]

ह्रस्वश्च इदुदेव स्त्र्याख्यावियुवुस्थानौ च ङवति परे नदीवद् भवतो वा । **बुद्ध्यै, बुद्धये । धेन्वै, धेनवे । श्रियै, श्रिये । भ्रुवै, भ्रुवे ।** पट्वै स्त्रियै वेति **केचित्** । ङवतीति किम् ? हे श्रीः, हे भ्रूः । अप्रसिद्धमुपमेयमिति ॥१६१।

### [दु० टी०]

**ह्रस्व०** । इदुदेवेति । ननु कथमिहेकार उकार एवेति लभ्यते, 'ह्रस्व' इति सामान्यनिर्देशात् **'मात्रे, दुहित्रे'** इत्यत्रापि स्यात्, नैवम् । इयुवाश्रयौ हि दीर्घावीकारोकारौ तदपेक्षया ह्रस्वौ इकारोकारावेवावसीयेते इति । किं च वत्करणं सादृश्यार्थम् । सादृश्यं पुनरिकारोकारयोरेव संभवति एकस्थानत्वान्न पुनः ऋकारस्येति । अग्निर्वा **मण्डूकप्लुतिन्यायेन** वर्तते । स्त्र्याख्येति उभयोर्विशेषणम्-ह्रस्वः, स्त्र्याख्यः, इयुवुस्थानौ च स्त्र्याख्याविति । पट्वै इत्यादि । ननु पट्वादयोऽपि स्त्रीशब्दसान्निध्यादेव स्त्रीत्वमाचक्षते । अन्यथा 'पटुः, शुचिः' इत्युक्ते न ज्ञायते– किं स्त्री पुमानिति वा सामान्यशब्दत्वात् । गुणवचना हि गुणयोगाद् गुणवति वर्तन्ते, गुणेन च पाटवादिना न स्त्र्येव युज्यते, किन्तु पुमानपि । तस्माद् ग्रामण्यादिवत् पट्वादीनामपि नदीत्वं न प्राप्नोति । नैवम्, शब्दान्तरसन्निधानेन केषांचिदर्थान्तरेऽपि प्रवृत्तानां प्रवृत्तिरेव क्रियते, यथा गौरयं पामर इति ।

**केषांचित्** सामान्येन । तत्रान्यत्र च प्रवृत्तानामन्यत्र च प्रवृत्तिर्व्यवच्छिद्यते । यथा **'नीलमुत्पलम्'** इति उत्पलशब्दोऽयमुत्पलजात्यध्यासिकेषु द्रव्येषु नीलेषु रक्तादिषु च प्रवृत्तोऽस्य रक्तादिषु या प्रवृत्तिः सा नीलशब्देन समानाधिकरणेन व्यवच्छिद्यते न पुनर्नीले वृत्तिः क्रियते, तत्र स्वयं प्रवृत्तत्वात् । स्वयं प्रवृत्तिस्तु तत्रापि प्रवृत्तिनिमित्तस्योत्पलजातेः संभवात्, तद्वदिहापि पट्वादीनां पाटवादिगुणयोगात् स्त्रियां पुंसि नपुंसके

च प्रवृत्तानां स्त्रीशब्देन समानाधिकरणेन पुंनपुंसकयोर्वृत्तिर्व्यवच्छिद्यते, न पुनः स्त्रियां वृत्तिः क्रियते इति विभाषया नदीवद्भावः स्यादिति **केचिदा**चक्षते। तदा तु आख्याग्रहणमनुपकारकमेव स्यात्। ग्रामण्यादयो हि पुंलिङ्गा एव निश्चिताः।

ङवतीत्यादि। ङवतीति व्यावृत्तिबलाद् 'हे श्रीः, हे भ्रूः' तथा 'हे चारुश्रीः, हे नम्रभ्रूः' स्त्री पुरुषो वा पूर्वेण प्राप्तावपीकारोकारलक्षणा नदीसंज्ञा न भवति, अत एवातिदेशबलाद् यतः **प्रसिद्धस्य साधर्म्यादप्रसिद्धस्य साधनमुपमानं** तत् पुनरेकदेशस्यैव वस्तुनः समानाधिकरणत्वाद् भवति। यथा 'मेरुसर्षपयोः' इति सर्वथा अर्थस्य समानधर्मत्वे पृथगध्यवसायानुपपत्तेः। तस्मादप्रसिद्धमुपमेयमिति नदीसंज्ञायामियुवाश्रया-वीकारोकारावप्रसिद्धाविति नदीलक्षणः सिलोपः संबुद्धौ ह्रस्वो न स्यात्। यवस्थानयोस्तु नदीसंज्ञा स्यात्- 'हे आधि ! हे प्रधि ! हे वर्षाभु ! हे पुनर्भु ! संबुद्धिसिलोपो ह्रस्वश्च भवति। यथा 'आधीः, प्रधीः, वर्षाभूः, पुनर्भूः' पश्येति शसोऽकारलोपः। कथं **'विमानना सुभ्रु कुतः पितुर्गृहे'** (कु० सं० ५।४४) इति मतान्तरेणास्त्रीवचन इत्यस्य व्यावर्तनाद् अस्त्रीवचने ङवति नदीवद्भावः स्यात्। अङवति न भवति। स्त्रीवचने तु सर्वत्र नदीसंज्ञाऽस्त्येवेति न विरुध्यते॥१६१।

## [वि० प०]

**ह्रस्वश्च**। ननु ह्रस्व इत्युक्ते कथमिकारोकारावेवावसीयेते यावता सामान्य-निर्देशात् 'मात्रे, दुहित्रे' इत्यत्रापि स्याद् इति चेत्, नैवम्। इयुवृस्थानौ हि दीर्घावीकारोकारावेव प्रवर्तेते, तत्सान्निध्यात् तयोरेव सवर्णो ह्रस्वः प्रतिपत्तव्यः। अथवा वत्करणं हि सादृश्यार्थमवगमयति। तच्च ह्रस्वयोरिकारोकारयोरेव किञ्चित् संभवति एकस्थानित्वात्, न पुनर्ऋकारस्याभिन्नस्थानित्वाद् वा। अथवा मण्डूकप्लुत्या अग्निरेवानु-वर्तते इत्यालोच्याह-ह्रस्व इदुदेव। पट्वा इत्यादि। पटुशब्दः पाटवगुणयोगात् स्त्रियां पुंसि नपुंसके च सामान्येन वर्तते, ततः स्त्रीशब्देन समानाधिकरणेन पुंनपुंसकयो-र्वृत्तिर्व्यवच्छिद्यते, न पुनः स्त्रियां वृत्तिः क्रियते, तत्र स्वत एव प्रवृत्तत्वादित्याह– स्त्रियै वेति **केचित्**। अतः स्त्र्याख्यत्वेन विभाषया नदीवद्भावः स्यादित्यर्थः। केचिदित्यन्ये, न वयम् इत्यर्थः। आख्याग्रहणस्य नित्यस्त्रीविषयत्वात् पटुशब्दस्य 'पटुः पुमान्' इत्यादिषु शब्दान्तरेण स्त्रीविषयस्य व्यवच्छिन्नत्वात् कुतो नित्यस्त्रीविषयतेति भाव्यम्।

**ङवतीत्यादि** । अथात्र कथम् ईदूतुस्त्र्याख्यौ नदीति नदीसंज्ञा न भवति, समुदायस्य स्त्र्याख्यत्वेऽवयवस्यापि स्त्र्याख्यत्वमुपचारात् प्राप्नोति, यथा लक्ष्मीशब्दस्य । कथमन्यथा 'हे लक्ष्मि' इति संबुद्धौ ह्रस्वः स्यात् । अथ ङवतीति व्यावृत्तिबलात् प्राप्तापि नदीसंज्ञा न भवतीति चेद् अयुक्तम्, इह नित्यनदीत्वेन नदीसंज्ञाया व्यावृत्तिरस्त्येव ? सत्यम् । अत एवातिदेशविधानादियुवृस्थानयोरीकारोकारयोः स्त्र्याख्यत्वेऽपि नदीत्वस्याप्रसिद्धिराख्यायते, यस्माद् **अप्रसिद्धस्यैवोपमेयत्वमिति** । अत एवाह – अप्रसिद्धमुपमेयमिति । प्रसिद्धमुपमानम्, तस्य ज्ञापकत्वात् । तथा चोक्तम् – **'प्रसिद्धस्य साधर्म्यादप्रसिद्धस्य साधनमुपमानम्'** इति । यदि पुनरिह नदीसंज्ञा स्यात् तदा सर्वथा समानधर्मत्वाद् उपमानोपमेययोरविषयत्वेन वत्करणम् अनर्थकं स्यादित्यर्थः ॥१६१।

[क० च०]

**ह्रस्वः** । ननु यथा दीर्घेकारसन्निहितो ह्रस्व इकारस्तथा ऋकारोऽपि सन्निहितः संभवतीत्याह – अथवेति । एकस्थानत्वादिति एकस्थानोच्चार्यत्वादित्यर्थः । ननु यथा स्थानकृतसादृश्यं गृह्यते तथा वर्णगतसादृश्यमादाय ऋकारस्यापि प्रसङ्गः कथन्न स्यादित्याह – अथवेति । पक्षान्तरमिति **साम्प्रदायिकाः** । मतान्तरमिति **महान्तः** । नदीसंज्ञा कथं न भवतीति । ननु कथमिदमुच्यते ईदूतोः स्त्र्याख्यत्वाभावादित्याह – समुदायस्येति । **केचित्तु** आख्याग्रहणं स्वभावतः स्त्रीपरिग्रहार्थम् । तन्मते 'पट्वै स्त्रियै' इति **केश्चिदुक्त**मिति भावः ॥१६१।

[समीक्षा]

'बुद्धि + ङे, धेनु + ङे, श्री + ङे, भ्रू + ङे' इस स्थिति में कातन्त्रकार ह्रस्व तथा दीर्घ ई-ऊ का वैकल्पिक नदीवद्भाव करके 'बुद्ध्यै, बुद्धये । धेन्वै, धेनवे । श्रियै, श्रिये । भ्रुवै, भ्रुवे' शब्दरूप सिद्ध करते हैं । पाणिनि इन शब्दों के निष्पादनार्थ विकल्प से नदीसंज्ञा का विधान करते हैं – **"ङिति ह्रस्वश्च"** (अ० १।४।६) ।

[रूपसिद्धि]

१. **बुद्ध्यै, बुद्धये** । बुद्धि + ङे । प्रकृत सूत्र से नदीवद्भाव, **"नद्या ऐ आसासाम्"** (२।१।४५) से ङे को 'ऐ' आदेश तथा **"इवर्णो यमसवर्णे न च**

**परो लोप्यः**" (१।२।८) से इकार को यकारादेश – 'बुद्ध्यै'। नदीवद्भाव के अभाव में "**इदुदग्निः**" (२।१।८) से अग्निसंज्ञा, "**ङे**" (२।१।५७) से इकार को एकार तथा "**ए अय्**" (१।२।१२) से ए को अयादेश।

२. **धेन्वै, धेनवे**। धेनु+ङे। प्रकृत सूत्र से नदीवद्भाव, "**नद्या ऐ आसासाम्**" (२।१।४५) से ङे को 'ऐ' आदेश तथा "**वमुवर्णः**" (१।२।९) से 'उ' को व्- 'धेन्वै'। नदीवद्भाव के न होने पर अग्निसंज्ञा, "**ङे**" (२।१।५७) से उकार को ओकार तथा "**ओ अव्**" (१।२।१४) से ओ का अवादेश – 'धेनवे'।

३. **श्रियै, श्रिये**। श्री+ङे। प्रकृत सूत्र से नदीवद्भाव, "**नद्या ऐ आसासाम्**" (२।१।४५) से 'ङे' को 'ऐ' तथा "**ईदूतोरियुवौ स्वरे**" (२।२।५६) से ईकार को इयादेश – 'श्रियै'। पक्ष में 'ऐ' आदेश प्रवृत्त नहीं होता, अतः केवल इयादेश होने पर 'श्रिये' शब्दरूप।

४. **भ्रुवै, भ्रुवे**। भ्रू+ङे। प्रकृत सूत्र द्वारा नदीवद्भाव, "**नद्या ऐ आसासाम्**" (२।१।४५) से 'ङे' को 'ऐ', "**भ्रूर्धातुवत्**" (२।२।६०) से धातुवद्भाव तथा "**ईदूतोरियुवौ स्वरे**" (२।२।५६) से उवादेश–'भ्रुवै'। नदीवद्भाव के न होने पर "**भ्रूर्धातुवत्**" (२।२।६०) से धातुवद्भाव एवं उवादेश –'भ्रुवे' ।।१६१।

## १६२. नपुंसकात् स्यमोर्लोपो न च तदुक्तम् [२।२।६]

### [सूत्रार्थ]

नपुंसकलिङ्ग वाले शब्दों से परवर्ती सि एवं अम् प्रत्ययों का लोप तथा प्रत्ययलक्षण मानकर होने वाले तत्प्रयुक्त कार्यों का निषेध भी होता है ।।१६२।

### [दु० वृ०]

नपुंसकलिङ्गात् परयोः स्यमोर्लोपो भवति, तदुक्तं च कार्यं न भवति। **पयः, पयः**। **तत्, तत्**। **सुसखि, सुसखि**। नपुंसकादिति किम्? सुपया गौः ।।१६२।

### [दु० टी०]

**नपुं०**। स्त्रीपुंनपुंसकानि लोकलिङ्गानुशासनगम्यानीति वक्ष्यति। नपुंसकार्थ-विशिष्टत्वादुपचारान्नाम च नपुंसकं सापेक्षत्वात् प्रकृतेनास्य संबन्धः। सिश्च अम् च

स्यमौ। इकारोऽत्र न सुपः सकारनिवृत्त्यर्थो यस्मादमैकवचनेन साहचर्यादेकवचनमेव गम्यते क्रियते च सुखप्रतिपत्त्यर्थ एव। ननु तदुक्तमिति कथं समासः, किन्तस्य नपुंसकस्योक्तं तदुक्तम्। तयोः स्यमोरुक्तं तदुक्तम्। तस्मिन् प्रत्ययलोपलक्षणेनोक्तं तदुक्तं वा? तत्राद्ये पक्षे 'दधीदम्, मध्वत्र' इति सन्धिलक्षणस्यापि प्रतिषेधः स्यात्। द्वितीयेऽपि सिशब्दोच्चारितामूशब्दोच्चारितविधिरेव। यथा अत्युशनः कुलम् "**उशनःपुरुदंश०**" (२।२।२२) इत्यादिना 'अन्' न भवति। 'सुद्यु कुलम्' इति "**वाम्या**" (२।२।२७) इत्याकारो न भवति। तदयुक्तम्। श्रुतलोपलक्षणे संबन्धे सत्यश्रुतसंबन्धिलक्षणं भवत्येव।

"**वाम्या**" (२।२।२७) इत्यस्यापि कुतः प्राप्तिः "**विरामव्यञ्जनादावुक्तम्**" (२।३।६४) इत्यस्य बाधकत्वादमूसहचरिते सावपि सामान्यकार्यमेव गम्यते, स्यमोर्निमित्तमात्रयोरित्यर्थः। तृतीयस्त्वनन्तरतच्छब्दपरामर्शयोग्यः सुखप्रतिपत्तिकरश्चेति। अथाद्यपक्षेऽङ्गीक्रियमाणे कथम् 'अदः कुलम्' इति "**अदसः पदे मः**" (२।२।४५) इति भवति? नैवम्। तत्र विभक्त्यनुवर्तनात् साक्षाद् विभक्तावेवावसीयते। 'पयः, पयः' इत्युदाहरणद्वयेन प्रतिषेधस्यान्वाचयशिष्टतां दर्शयति – यस्मादन्तस्य सौ दीर्घ उक्तः, अमि तु न किञ्चिदपि। ननु तत्कुलमिति परत्वात् त्यदाद्यत्वे कृतेऽकारान्तत्वात् मुः प्रसज्यते? नैवम्। यथा 'सुसखि' शब्दस्य परत्वादनं कृताकृतप्रसङ्गितया नित्यो लोपो बाधते, तथात्रापीति। सिलोपे तु कृते त्यदाद्यत्वं नास्ति तदुक्तप्रतिषेधात्, नैवम्। "**अकारादसंबुद्धौ मुश्च**" (२।२।७) इत्यनेन लक्षणान्तरेण स्यमोर्लोपो विधीयमानो न नित्यो भवितुमर्हतीति। तस्मात् "**त्यदादिभ्यश्च**" इति वक्तव्यम्। न च वक्तव्यम्, लक्षणान्तरेणाप्यकारान्तमेव नपुंसकं निमित्तीकृतं पञ्चमीनिर्देशादिति। अन्यथा अकारस्येति विदध्यात्। अकारान्तस्य मुर्भवन् 'आगमा यद्गुणीभूतास्ते तद्ग्रहणेन गृह्यन्ते' इत्यागमेऽपि कृते "**नपुंसकात् स्यमोर्लोपो०**" (२।२।६) भविष्यति, तस्मान्नित्य एव लोप इति।

**कश्चिदाह** – पञ्चमीनिर्देश उक्तिबाधानिरासार्थः। यथा '**ब्राह्मणेभ्यो दधि दीयताम्, तक्रं कौण्डिन्याय**' इति तक्रदानेन दधिदानं बाध्यते, तथा आगमेन स्यमोर्लोपः। अथागमे कृते चकारेण स्यमोर्लोप उच्यते, तर्हि आगम एव निमित्तम्, शब्दान्तरत्वाल्लोपः पुनरनित्य एव, नैवम्। उक्तितो लोपस्य बाधा गम्यते। अकारान्तत्वं तु निमित्तमेव यद्युक्तितो बाधा न स्यात्, अकारान्तत्वाल्लुक् स्यादेवेति युक्तमुक्तम्, पञ्चमीनिर्देशः

पुनर्लोपप्रवृत्तिहेतुतया उक्तिबाधानिरासार्थ एव सन् निमित्तमिति। **अपर** आह – पूर्वविप्रतिषेधेन त्यदाद्यत्वं लोपेन बाध्यते, लोपस्यावकाशो 'दधि, मधु'। त्यदाद्यत्वस्यावकाशः स पुमानिति। न च पूर्वविधेः प्रतिषेधो वक्तव्यः 'पूर्वपरयोः परविधिर्बलवान्' (पुरु० प० पा० ३९) इति परशब्दस्येष्टवाचित्वात्।

ननु लुगेव कथन्न विदध्यात् **'लुग्लोपे न प्रत्ययकृतम्'** इति भविष्यति ? सत्यम्। न च तदुक्तग्रहणं नाम्यन्तानां चतुरश्च वा तदुक्तमपि भवतीति प्रतिपत्त्यर्थम्। व्यवस्थित – वानुवर्तनाद् 'हे वारे !' इत्यादि सिद्धम्। नपुंसकादित्यादि – 'शोभनं त्रयो यस्या गोः' इत्यन्यपदार्थे स्त्रीलिङ्गता। तदन्तविधिरपि नैव, विहितविशेषणान्नपुंसकाद् विहितयोः स्यमोरिति। एवमुत्तरत्रापि विहितविशेषणमेव ॥१६२।

[वि० प०]

**नपुं०।** अथ कथमत्र समासः, किन्तस्य नपुंसकस्योक्तं तदुक्तम्। आहोस्वित् तयोः स्यमोरुक्तं तदुक्तम्। उतस्वित् तस्मिन् लोपे प्रत्ययलोपलक्षणेनोक्तं तदुक्तम् इति ? तत्र यदि षष्ठीलक्षणस्तत्पुरुषः स्यात्, तदा नपुंसकस्योक्तत्वात् 'दधीदम्, मध्वत्र' इत्यादौ लक्षणस्यापि कार्यस्य प्रतिषेधः स्यात्। द्वितीयेऽपि पक्षे साक्षात् स्यम्शब्दोच्चारितस्यैव कार्यस्य प्रतिषेधो भवेत्। यथा 'अत्युशनः कुलम्' इति **"उशनःपुरुदंश०"** (२।२।२२) इत्यादिना अन् न भवति। 'सुद्यु कुलम्' इति **"वाम्या"** (२।२।२७) इत्याकारो न भवति। अतो नानयोः पक्षयोर्ग्रहणमिति। तदयुक्तमिह प्रकरणे लोपलक्षणस्य श्रुतत्वाद् एतत्प्रकरणप्रणीतस्यैव कार्यस्य प्रतिषेध इष्यते, न सन्धिलक्षणविहितस्य प्रकरणान्तरत्वात्।

तथा द्वितीयेऽपि पक्षे न दोषः **"विरामव्यञ्जनादावुक्तं नपुंसकात् स्यमोर्लोपेऽपि"** (२।३।६४) इत्यतिदेशबलाद् व्यञ्जनोक्त उकार एवास्ति बाधक इति कुतो **"वाम्या"** (२।२।२७) इत्यस्य प्राप्तिः, येन प्रतिषेध उपपद्यते। तेनामि सामान्यमेव कार्यमवगम्यते, न पुनः अम्–शब्दोच्चारितमिति। तत्साहचर्यात् सावपि सामान्यमेव कार्यमवगम्यते। कथम् **"उशनःपुरुदंशोऽनेहसाम्"** (२।२।२२) इत्यादिनैव प्राप्तस्य प्रतिषेध इति ? सत्यम्। एवं सति प्रतिपत्तिगौरवमेवानयोः पक्षयोरिति, अतस्तृतीय एव पक्षो युक्तः। चकारोऽयमन्वाचयशिष्टः, तेन तदुक्तकार्यप्रतिषेधाभावेऽपि प्रधानवाक्यनिर्दिष्टो लोप एवेति। एतदेव 'पयः, पयः' इत्युदाहरणद्वयेन सूचितम्। इह हि प्रत्ययलोपलक्षणेन

**"अन्त्वसन्तस्य चाधातोः सौ"** (२।२।२०) इति सौ दीर्घं प्राप्नोति, अमि तु न किञ्चिदपीति। अत्र विसर्जनीयो भवत्येव, तस्य विरामविषयत्वात्। तदित्यत्र त्यदाद्यत्वप्रतिषेधे प्रथमो भवत्येव **"विरामव्यञ्जनादावुक्तम्०"** (२।३।६४) इत्यतिदेशबलात्।

शोभनः सखा यस्य कुलस्य तत् **'सुसखि'** इति। **"सख्युश्च"** (२।२।२३) इति सावन् न भवति। अमि तु नपुंसके घुट्त्वाभावान्न किञ्चिदपि प्राप्नोति, तदुक्तप्रतिषेधाभावेऽपि लोप एव भवतीति। एतेषु नित्यत्वात् स्यमोर्लोपे सति तदुक्तप्रतिषेधः। अथ न च तदुक्तग्रहणं किमर्थं लुगित्युच्यताम् **'लुग्लोपे न प्रत्ययकृतम्'** इति प्रतिषेधो भविष्यति ? सत्यम्। न च तदुक्तग्रहणं नाम्यन्तानां चतुरश्च पक्षे तदुक्तमपि कार्यं भवतीति ज्ञापयति। तेन 'हे वारि ! हे वारे! हे त्रपु ! हे त्रपो ! हे प्रियचत्वः ! हे प्रियचतुः ! इत्यादिषु **"संबुद्धौ च"** (२।१।३९, ५६) इत्येदोतौ पक्षे सिद्धौ चतुरश्च पक्षे ह्रस्व इति। नपुंसकादित्यादि। शोभनं पयो यस्या गोरित्यन्यपदार्थे बहुव्रीहौ स्त्रीलिङ्गता। ननु **'येन विधिस्तदन्तस्य'** (कात० प० ३) इति नपुंसकान्तस्य स्त्रीलिङ्गान्तस्यापि प्राप्नोति। नैवम्, नपुंसकादिति पञ्चम्या विहितविशेषणमाख्यायते नपुंसकाद् विहितयोः स्यमोरित्यर्थः। इह तु स्त्रीलिङ्गाद् विधानम्। एवमुत्तरत्रापि ॥१६२।

[क० च०]

**नपुं०**। ननु ह्रस्वादित्यनन्तरत्वात् कथं नानुवर्तते। नैवम्। नपुंसकादिति धर्मनिर्देशः। **धर्मश्च धर्मिणमपेक्षते**। न च ह्रस्वो धर्मीति वाच्यम्, धर्मावयवत्वाभावात्। अतः प्रकृतेन नाम्नाऽस्य नपुंसकस्य संबन्ध इति, न तु ह्रस्वेनेति **कुलचन्द्रः**। तन्न, तदन्तविधिना नाम्ना ह्रस्वान्वयसम्भवात्। तस्माद् विशेषणविशेष्यभावस्य इष्टत्वान्न ह्रस्वानुवृत्तिः। विभक्तिविपरिणामोऽपि गरीयानिति। इयुवोस्तु स्त्र्याख्यनिवृत्तौ निवृत्तिस्तत्संबन्धत्वात्। वाग्रहणस्य उत्तरत्र वाग्रहणादेव निवृत्तिः। अमि त्विति। ननु कथमिदमुच्यते यावता सुसखिशब्दस्यामि परे **"नामिनः स्वरे"** (२।२।१२) इति न्वागमोऽस्ति प्रत्ययलोपलक्षणेन ? सत्यम्। **'न वर्णाश्रये प्रत्ययलोपलक्षणम्'** (व्या० प० पा० ९६) इति न्यायान्नुर्न स्यादिति भावः। ननु पयः प्रभृतिषु परत्वाद् दीर्घादिकार्यस्य प्रथम एव प्रवृत्तत्वात् कथं तदुक्तप्रतिषेध उपपद्यते इत्याशङ्कां परिहरति– एतेष्वित्यादि। परान्नित्यमिति न्यायादित्यर्थः। ननु तथापि **'नित्यादन्तरङ्गं बलीयः'** (कात० प० पा० ९३) इति न्यायाल्लोपात् पूर्वमेव दीर्घादिकार्यं भविष्यति, नैवम्। **'सर्वविधिभ्यो**

**लोपविधिर्बलवान्'** (कात० प० ३४) इति प्रथमतो लोपेनैव भवितव्यम्। परिभाषया बलाबलबाधा न क्रियते। चेत् **तुष्यतु दुर्जनः,** तथापि अन्तरङ्गत्वात् प्रथमं दीर्घादिके कृते पश्चात् स्यमोर्लोपे सति निमित्ताभावन्यायेन दीर्घाद्यभावो भविष्यति, ततश्च प्रत्ययलोपलक्षणन्यायेन पुनर्दीर्घादिप्रसक्तौ तदुक्तप्रतिषेध उपपद्यते इति भावः।

नन्वेवं सति कथं **पञ्जिकायामु**क्तं नित्यत्वात् स्यमोर्लोप इत्यादि वाक्यम्, सत्यम्। अनावश्यकत्वादिति भावः। न च तदुक्तग्रहणमिति नञा निर्दिष्टत्वादित्यर्थः। नाम्यन्तानां चतुरश्च पक्ष इति। नन्वेवं सति 'सुपथि कुलम्' इत्यत्रापि पक्षे **"पन्थि-मन्थि-ऋभुक्षीणाम्"** (२।२।३५) इत्यादिना आत्वं स्यात्। 'सुसखि कुलम्' इत्यत्र च पक्षे **"सख्युश्च"** (२।२।२३) इत्यन् न स्यात्, सत्यम्। नञा निर्दिष्टस्यानित्यत्वादिति **कुलचन्द्रः। वस्तुतस्तु** नाम्यन्तानां तदुक्तं भवत् कार्यमपि नाम्यन्तमेवावगम्यते, श्रुतत्वात्। नाम्यन्तकार्यिणा साहचर्याच्चत्वार्शब्दस्यापि तदुक्तं नाम्यन्तकार्यमेवावसीयते, तेन 'प्रियचतुः, प्रियचतसृ' इति सिद्धम्। एतेन 'हे प्रियचत्वः' इति **कुलचन्द्रेण यदुक्तं तदशुद्धमेव, पाणिनि**सम्मत्या **श्रीपतिना** दूषितत्वात्। **कुलचन्द्रदृष्ट्या तु पञ्जिकायां** 'हे प्रियचत्वः' इति लिखितम्, किन्तु छात्रैः 'हे प्रियचतसृ' इति बोद्धव्यम्। शोभनं पयो यस्या गोरिति। ननु कथमिदं यावता –

**अनडुत्-पुं-पयोलक्ष्मी-नावामेकत्ववाचिनाम्।**
**नित्यं कः स्याद् बहुव्रीहौ वा स्याद् द्वित्वबहुत्वयोः॥**

इत्यनेनैकत्वे नित्यं कप्रत्यये सति सुपयस्केति वक्तुं युज्यते ? सत्यम्। एकवचनेनार्थमात्रं कृतम्, वाक्यं तु बहुवचनेन द्रष्टव्यम्। समासान्तविधेरनित्यत्वादिति **केचित्।** ननु तदिति कथं प्रत्युदाहृतं यावता त्यदादिषु विभक्ताविति वचनात् साक्षाद् विभक्तावेव त्यदाद्यत्वस्य विषयत्वात्, नैवम्। विभक्ताविति वचनाद् विभक्तावेव भवति, नान्यस्मिन् परत इति विरामे तु स्यादिति न दोषः॥१६२।

**[समीक्षा]**

'पयस् + सि-अम्, तद् + सि-अम्, सुसखि + सि-अम्' इस अवस्था में दोनों ही व्याकरणों में प्रथमा-द्वितीया विभक्तियों के एकवचन-प्रत्ययों का लोप किया

गया है। यह ज्ञातव्य है कि कातन्त्र में प्रथमा-एकवचन का प्रत्यय 'सि' माना गया है, जबकि पाणिनि 'सु' प्रत्यय पढ़ते हैं। पाणिनीय व्याकरण में 'सु-अम्' का लोपविधायक सूत्र है–"**स्वमोर्नपुंसकात्**" (अ० ७।१।२३)।

[रूपसिद्धि]

१. **पयः**। पयस्+सि, अम्। प्रकृत सूत्र से सिलोप। '**प्रत्ययलोपे प्रत्ययलक्षणम्**' (कात० प० ५२) के न्यायानुसार प्रत्ययलक्षण के बल से "**अन्त्वसन्तस्य चाधातोः सौ**" (२।२।२०) से जो दीर्घादेश प्राप्त होता है, उसका इस सूत्र से निषेध हो जाता है तथा "**रेफसोर्विसर्जनीयः**" (२।३।६३) से विसर्गादेश होता है। अम्प्रत्यय में लोपमात्र होता है।

२. **तत्**। तद्+सि, अम्। प्रकृत सूत्र से सिलोप, "**विरामव्यञ्जनादावुक्तम्**" (२।३।६४) से अतिदेश के कारण "**वा विरामे**" (२।३।६२) से द् को त् आदेश। यहाँ लोप होने के बाद प्रत्ययलक्षण से "**त्यदादीनाम विभक्तौ**" (२।३।२९) से प्राप्त दकार के स्थान में अकारादेश का प्रकृत सूत्र से निषेध हो जाता है।

३. **सुसखि**। सुसखि+सि, अम्। प्रकृत सूत्र द्वारा सि-अम् का लोप, प्रत्ययलक्षण के अनुसार "**सख्युश्च**" (२।२।२३) से प्राप्त 'अन्' का इस सूत्र से निषेध॥१६२।

## १६३. अकारादसंबुद्धौ मुश्च [२।२।७]

[सूत्रार्थ]

नपुंसकलिङ्ग वाले अकारान्त शब्द से परवर्ती 'सि-अम्' प्रत्ययों का लोप तथा असंबुद्धि के परे रहते 'मु' आगम भी होता है॥१६३।

[दु० वृ०]

अकारान्तान्नपुंसकलिङ्गात् परयोः स्यमोर्लोपो भवति, मुरागमश्चासंबुद्धौ। कुण्डम्, अतिजरम्। असंबुद्धाविति किम्? हे कुण्ड!॥१६३।

[दु० टी०]

**अका०**। मुरित्युकारो लिङ्गस्य "**आगम उदनुबन्धः स्वरादन्त्यात् परः**" (२।१।६) इति प्रतिपत्त्यर्थः, अन्यथा स्यमोरादेशे "**अकारो दीर्घं घोषवति**"

(२।१।१४) इति दीर्घमापद्यते। द्वितीयैकवचनस्य वचनबलादेवादेशे संयोगान्तलोपो न स्यात्। अथ अमादेश एव कथन्न विदध्यात्, असंबुद्धाविति वचनं न विधेयं स्यात् स्थानिवद्भावाद् ह्रस्वलक्षणः सिलोपो भविष्यति। नैवम् 'अतिजरसं कुलं तिष्ठति, अतिजरसं कुलं पश्य' इति **अपप्रयोगः स्यात्**।

नन्वकारान्तं नपुंसकलिङ्गमाश्रित्य प्रवृत्तोऽयं न जरसादेशस्य निमित्तम्, यस्मात् 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति। न त्विह वर्णग्रहणे निमित्तत्वाभावात् स्वरे हि वर्णे जरसादेशो विधीयते, जरसादेशे कृते तु नपुंसकात् स्यमोर्लोपो न भवति, सन्निपातलक्षणत्वात्। अथानित्यामिमामभ्युपगम्य **केनचिद्** इष्यते – **'अतिजरसम्, अतिजरं कुलम्'** तिष्ठति। अतिजरसम्, अतिजरं कुलं पश्येति। तदेतदुभयमतमेव प्रमाणं मन्यमानोऽसन्देहायागममेव कृतवान्। प्रमाणं तु उदाहृतम् अतिजरमिति। कारग्रहणमिह सुखप्रतिपत्त्यर्थम्। आदिति वर्णमात्रात् पञ्चमीनिर्देशे दुःखबोधः स्यात्। अत इत्युच्यमानेऽपि किमयं तकार उच्चारणार्थः कार्यार्थो वेति सन्देहः स्यात्। ततश्च **'दधत् कुलम्'** इत्यत्रादन्तत्वान्मुः प्रसज्येत ॥१६३।

## [वि० प०]

**अकारात्।** मुरित्युदनुबन्धः आगमार्थः, अन्यथा उकारमन्तरेण स्यमोरादेशोऽयं स्यात्, ततश्च **"अकारो दीर्घं घोषवति"** (२।१।१४) इति दीर्घत्वं प्रसज्येत। न च **'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य'** (कात० प० ३१) इति वक्तुं युज्यते, वर्णग्रहणे निमित्तत्वात्। आगमे तु नायं दोषस्तस्य प्रकृतिग्रहणेन ग्रहणादिति। अतिजरम्। जरामतिक्रान्तं कुलमिति विग्रहे **"स्वरो ह्रस्वो नपुंसके"** (२।४।५२) इति ह्रस्वः ॥१६३।

## [क० च०]

**अकारात्।** अन्यथोकारमन्तरेणेति। ननु अन्यथाशब्देनैवोकारमन्तरेणेत्यर्थो लभ्यते, किं पुनरुकारमन्तरेणेत्यनेन ? सत्यम्। एवं **पञ्जी** व्याख्येया अन्यथा यद्यागमो न स्यादित्यर्थः। आगम एव कथं न स्यादित्याह – उकारमन्तरेणेति ॥१६३।

## [समीक्षा]

'कुण्ड + सि, अम्। अतिजर + सि, अम्' इस अवस्था में कातन्त्रकार 'सि-अम्' प्रत्ययों का लोप करके अन्त्य स्वर के बाद 'मु' आगम करते हैं और इस

प्रकार 'कुण्डम्, अतिजरम्' रूप निष्पन्न होता है। पाणिनि **"अतोऽम्"** (अ० ७।१।२४) सूत्र द्वारा 'सु-अम्' प्रत्ययों को 'अम्' आदेश तथा **"अतो गुणे"** (अ० ६।१।९७) से पररूप करते हैं। इस प्रकार कार्यसंख्या की दृष्टि से साम्य होने पर भी कातन्त्रकार ने एक ही सूत्र से दो कार्य किए हैं, जबकि पाणिनि को दो सूत्र करने पड़ते हैं। अतः कातन्त्र में लाघव स्पष्ट है।

**[रूपसिद्धि]**

१. **कुण्डम्।** कुण्ड + सि, अम्। प्रकृत सूत्र द्वारा 'सि-अम्' का लोप, मु-आगम। **"आगम उदनुबन्धः स्वरादन्त्यात् परः"** (२।१।६) से अन्तिम स्वर (डकारोत्तरवर्ती अकार) के बाद उसकी प्रवृत्ति।

२. **अतिजरम्।** अतिजर + सि, अम्। प्रकृत सूत्र से 'सि-अम्' का लोप तथा 'मु' आगम ॥१६३।

## १६४. अन्यादेस्तु तुः [२।२।८]

**[सूत्रार्थ]**

अन्यादिगणपठित नपुंसकलिङ्गवाले शब्दों से परवर्ती 'सि-अम्' प्रत्ययों का लोप तथा 'तु' आगम भी होता है ॥१६४।

**[दु० वृ०]**

अन्यादेर्गणान्नपुंसकलिङ्गात् परयोः स्यमोर्लोपो भवति, तुरागमश्च। **अन्यत्, अन्यतरत्, इतरत्, कतरत्, कतमत्।** तुशब्दोऽसंबुद्धिनिवृत्त्यर्थः। हे अन्यत् ॥१६४।

**[दु० टी०]**

**अन्या०।** पूर्वेण म्वागमे प्राप्ते तदपवादस्तुरागमः। अन्यादिरयं सर्वनामान्तर्गणः पञ्चसंख्यापरिच्छिन्न एवावसीयते, तत्र वृत्करणात्। 'अन्य-अन्यतर-इतर-डतर-डतम'। अत्र त्रीणि लिङ्गानि। डतर-डतमौ तमादिपरिपठितौ प्रत्ययौ, अर्थात् प्रकृत्यन्तौ **"यत्तदेकेभ्यो द्वयोरेकस्य निर्धारणे डतरो वा बहूनां जातौ डतमः"**। तौ किम इति। तेन 'यतरत्, यतमत्, ततरत्, ततमत्' इत्याद्युदाहर्तव्यम्। कथम् 'एकतरत्' न भवति, **'गणकृतमनित्यम्'** (कात० प० २९) इति न्यायाद् 'व्यवस्थितवा – स्मरणाद्

वा' एकतरं पश्यति। अन्यादेरिति किम् ? त्वं तिष्ठति, त्वं पश्यति। कस्यचिन्मते त्वशब्दस्तान्त एव गणे पठ्यते तदा वृच्छब्देनापि किं तान्तत्वादयमेवान्तर्गणक इव निवारको न चातिक्रम्यादिशब्दः प्रवर्तते चरितार्थत्वात्। तदा नेमम् इति प्रत्युदाहरणम्।

**यस्तु** गणपाठमनाश्रयन्नादिशब्दव्यवस्थावचनमभ्युपगम्य एकतरं वर्जयति, तस्यापि अन्यदतिक्रान्तं कुलमिति 'अत्यन्यम्' इति न सिध्यति, विहितविशेषणबलात्। परमं च तदन्यच्चेति 'परमान्यत्' इति प्रधानत्वादन्यशब्दादेव विहितौ स्यमौ। यदा संज्ञायां वर्तते अन्यं नाम कुलम् इति तदापि नैव व्यवस्थाबलात्। तुशब्द इत्यादि। 'तु' इत्यविभक्तिकोऽयं निर्देशः। एकेनैव तुशब्देन सिद्धे पुनस्तुशब्दो व्यक्तिदर्शनावधारणार्थः संबुद्धावपि भवति। अव्ययो वा तुशब्दोऽसंबुद्धिनिवृत्तावनेकार्थत्वात्। ईयकारयोश्चाविधानाद् अन्यस्येदमन्यदीयम्। अन्यस्य कारकम् अन्यत्कारकम्। **"अषष्ठीतृतीयान्तस्य चाशीरास्थिताशास्थारागोत्सुकोतिषु समासे"** (कात० परि०-सं० १३१)। अन्यस्मिन्नाशीः अन्यदाशीः, अन्यदास्थितः, अन्यदाशा, अन्यदास्था, अन्यद्रागः, अन्यदुत्सुकः, अन्यदूतिः। यथासंबन्धं समासः कर्तव्यः। अषष्ठीतृतीयान्तस्येति किम् ? अन्यस्याशीः, अन्याशीः। अन्यस्यास्थितः, अन्यास्थितः। अन्येनाशीः, अन्याशीः। अन्येनास्थितः अन्यास्थित इत्यादि। अर्थे तु वा। अन्यदर्थः अन्यार्थः। इहापि यथायोगं समासः ॥१६४।

**[वि० प०]**

**अन्या०** ।अन्यादिरयं सर्वनामान्तर्गणः पञ्चसंख्यापरिच्छिन्न एव, तत्र वृत्करणात्। 'अन्य, अन्यतर, इतर, डतर, डतम' अत्र त्रीणि लिङ्गानि। डतरडतमौ प्रत्ययौ अतस्तदन्तस्य दर्शयति–'कतरत, कतमत्' इति। एवं 'यतरत्-यतमत्' इत्याद्यपि द्रष्टव्यम्। तमादित्वात् **"यत्तदेकेभ्यो द्वयोरेकस्य निर्धारणे डतरः, वा बहूनां जातौ डतमः"**। तौ किम इति। गणकृतमनित्यमिति **'एकतरं तिष्ठति, एकतमं पश्य'** इत्यत्र न भवति ॥१६४।

**[क० च०]**

**अन्यादेः**। **"नान्यत् सार्वनामिकम्"** (२।१।३३) इति वचनाद् अतद्गुणसंविज्ञानबहुव्रीहिर्नाशङ्कनीयः ॥१६४।

[समीक्षा]

'अन्य + सि, अम् । अन्यतर + सि, अम् । इतर + सि, अम् । कतर + सि, अम् । कतम + सि, अम्' इस अवस्था में कातन्त्रकार 'सि-अम्' का लोप-'तु' आगम करके 'अन्यत्, अन्यतरत्, इतरत्, कतरत्, कतमत्' शब्दरूप सिद्ध करते हैं। पाणिनि ने एतदर्थ **"अद्ड्डतरादिभ्यः पञ्चभ्यः"** (अ० ७।१।२५) से सु-अम् को 'अद्ड्' आदेश तथा 'डित्त्वाट्टिलोप' का विधान किया है। टिलोप के कारण ह्रस्वान्त रूप न रहने से **"एङ्ह्रस्वात् संबुद्धेः"** (अ० ६।१।६९) द्वारा – 'हे अन्यत्' इत्यादि में 'त्' का लोप नहीं होता।

इस प्रकार पाणिनि ने 'सु-अम्' प्रत्ययों के स्थान में 'अद्ड्' आदेश करके यद्यपि कातन्त्रकारीय दो कार्यों (लोप तथा तु-आगम) की अपेक्षा लाघव दिखाया है, तथापि 'सु-अम्' के स्थान में आदेश (अद्ड्) करने पर संबुद्धि में संभाव्य लोप के निवारण-हेतु 'ड्' अनुबन्ध की योजना तथा उससे होने वाले अन्य फलों का जो निरूपण करना पड़ता है, उसकी अपेक्षा कातन्त्रकार द्वारा दर्शित लोप तथा आगम रूप दो कार्यों की प्रक्रिया से लाघव प्रतीत होता है।

व्याख्याकारों ने सूत्रस्थ 'तु' शब्द का पाठ पूर्वसूत्रवर्ती 'असंबुद्धि' पद के निवृत्त्यर्थ माना है। अतः 'हे अन्यत्' आदि में भी लोप-आगम होते हैं।

[रूपसिद्धि]

१. **अन्यत्।** अन्य + सि, अम्। प्रकृत सूत्र द्वारा 'सि-अम्' प्रत्ययों का लोप, तु-आगम, **"आगम उदनुबन्धः स्वरादन्त्यात् परः"** (२।१।६) के न्यायानुसार यकारोत्तरवर्ती अकार स्वर के बाद उसकी योजना।

२-५. **अन्यतरत्, इतरत्, कतरत्, कतमत्।** अन्यतर + सि, अम्। इतर + सि, अम्। कतर + सि, अम्। कतम + सि, अम्। पूर्ववत् प्रकृतसूत्र द्वारा 'सि-अम्' प्रत्ययों का लोप, तु-आगम ॥१६४।

## १६५. औरीम् [२।२।९]

[सूत्रार्थ]

नपुंसकलिङ्ग वाले सभी शब्दों से परवर्ती 'औ' प्रत्यय के स्थान में 'ई' आदेश होता है ॥१६५।

[दु० वृ०]

सर्वस्मान्नपुंसकलिङ्गात् पर औरीमापद्यते ।कुण्डे, पयसी ॥१६५।

[दु० टी०]

**औ०।** ईमिति अम आदिलोपः **सुखनिर्देशाय**। अनन्तरस्य विधिः प्रतिषेधो वेति न्यायादनन्तरादेवान्यादेरौरिमापद्यते 'अन्ये- कतमे' इत्याशङ्क्याह- सर्वस्मादिति। यस्माद् **'विशेषातिदिष्टः प्रकृतं न बाधते'** (कात० प० १९) इति न्यायमनुसरन् दीर्घमीकारं कृतवान्। अन्यथा ह्रस्वेऽपि कृते एत्वे सति सिद्धं भवति। प्रकृतस्यादि- संबन्धाद् विहितविशेषणाद् वा। दध्यौपगवः। इः कामः, उरीशः, तत्र तिष्ठति- दध्यौ, मध्वौ। ङिरौ सपूर्वः॥१६५।

[वि० प०]

**औरीम्।** ईम् इति **सुखप्रतिपत्त्यर्थम्,** सूत्रत्वाद् अम आदिलोप उच्यते। यदि पुनरिहानन्तरत्वादन्यादिरेवानुवर्तते तदा दीर्घकरणमनर्थकमेव स्यात्। अन्यादेरकारान्तत्वाद् एत्वे सति विशेषाभाव इति ह्रस्वमिकारमेव कुर्वीत। न चैवं कृतम् अतः सामान्येन नपुंसकमेव प्रवर्तते इत्याह – सर्वस्मादिति॥१६५।

[क० च०]

**औरीम्।** सुखप्रतिपत्त्यर्थमिति। ननु कथमिदमुक्तं यावता आदिलोपाभावे य आदेशः कथन्न स्यात्, **"पदे तुल्याधिकरणे"** (२।५।५) इति ज्ञापकात्। ईमित्यादि। दुखं चैतद् यदि औरीरिति क्रियते, तदा अभेदोपचारेण कष्टं स्यात्। ननु **"स्त्रियामी- दूद्विरामैकाच् स्वयोनिप्राणिनाम च"** (अ०को० ३।५।२) इत्यमरकोशदर्शनाद् ईकार- स्यैकस्वरत्वेन स्त्रियां वृत्तित्वाद् **"अम्शसोरादिर्लोपम्"** (२।१।४७) इत्यनेनादिलोपस्य प्राप्तत्वात् कथमुक्तं सूत्रत्वादिति ? सत्यम्, शब्दानुकरणस्य स्वभावात् पुंलिङ्गत्वेनास्य विषयत्वात् **"स्त्रियामीदूद्"** इत्यभिधानवचनबाधा क्रियते। तथा च **अमरः** – **'लिङ्गशेष- विधिर्व्यापी विशेषैर्यद्यबाधितः'** (अ० को० ३।५।२) इति। तस्मादीकारस्य पुंस्त्वादमि परे यमिति रूपप्रसक्तौ सूत्रत्वाद् इति यदुक्तं तद् युक्तमिति। दीर्घकरणमनर्थकमिति। ननु कथमिदमुच्यते यावता विसन्धिश्रवणमेव प्रयोजनं भविष्यति। नैवम्, दीर्घकरणस्य 'पयसी' इत्यादौ सामान्यानुकर्षणे सार्थकत्वाद् विसन्ध्यर्थम् **"अवर्ण इवर्णे ए"** (१।२।२) इत्यादिकस्य बाधाकल्पनेनानौचित्यमिति।

**पाठाधिक्यम्–** य्वग्निरित्यत्र य्वग्निरिति यदा सूत्रं तदा औरीम् इति ज्ञापकाद् दीर्घयोरेव य्वग्निरित्यत्र कथं न ग्रहणम् ? सत्यम् । **"उमकारयोर्मध्ये"** (१।५।७) इति ज्ञापकाद् **"उमकारयोर्य्वग्निः"** इत्यत्र ह्रस्वो निश्चितः। तत्साहचर्यादिकारोऽपि ह्रस्व एव तत्रैव निश्चेतव्यः। अत एव सूत्रत्वादिति युक्तमुक्तम्। नन्वमीति कृते यकारः स्यात्, तद्वारणायैवादिलोपः कथं सुखार्थमादिलोप इत्युच्यते ? सत्यम्। तदा हि पदे द्वे इति निर्देशाद् यकारस्य निरासः। अथान्यादिवृत्तौ तदेव ज्ञापकमस्तु कथं दीर्घः स्यात्, ततः प्रयोजनमुच्यते चेद् ज्ञापकत्रयेण गतागतिस्ततः प्रयोजनमुक्तम् इति ॥१६५।

**[समीक्षा]**

'कुण्ड + औ, पयस् + औ' इस अवस्था में कातन्त्रकार 'औ' को 'ई' आदेश करके 'कुण्डे, पयसी' शब्दरूप निष्पन्न करते हैं। पाणिनि ने एतदर्थ 'शी' आदेश किया है – **"नपुंसकाच्च"** (अ० ७।१।१९)। इस प्रकार कोई गौरव-लाघव प्रतीत नहीं होता। केवल अपनी-अपनी सूत्ररचनापद्धति के अनुसार पाणिनि ने कार्यी का षष्ठ्यन्त तथा कार्य का प्रथमान्त निर्देश किया है और कातन्त्रकार ने कार्यी का प्रथमान्त एवं कार्य का द्वितीयान्त निर्देश।

**[रूपसिद्धि]**

१. **कुण्डे।** कुण्ड + औ। प्रकृत सूत्र से औकार को ईकार, **"अवर्ण इवर्णे ए"** (१।२।२) से अकार को एकार तथा ईकार का लोप।

२. **पयसी।** पयस्+ औ। प्रकृत सूत्र द्वारा औकार को ईकार आदेश ॥१६५।

## १६६. जस्शसोः शिः [२।२।१०]

**[सूत्रार्थ]**

नपुंसकलिङ्ग वाले शब्दों से परवर्ती प्रथमाबहुवचन 'जस्' तथा द्वितीया-बहुवचन 'शस्' प्रत्यय को 'शि' आदेश होता है ॥१६६।

**[दु० वृ०]**

सर्वस्मान्नपुंसकलिङ्गात् परयोः सर्वयोर्जस्शसोः स्थाने शिर्भवति। **पद्मानि, पयांसि** ॥१६६।

[दु० टी०]

**जस्०** । जसा सहचरितस्य शसो ग्रहणात् स्यादिसंबन्धाद् वा शतं देहि 'शतशो देहि' इत्यत्र न भवति "**बह्वल्पार्थात् कारकाच्छस् वा माङ्गल्ये गम्यमाने**" (२।६।४०-८ तमादिगणः) । पण्डकाः, पण्डकान् । षण्डकाः, षण्डकान् पश्यतीति । **नपुंसकेऽपि वस्तुनि शब्दकृतं पुंस्त्वं लोकतः सिद्धम्** । तथा च – "**स्त्रीवेषधारी पुरुषो नर्तको भ्रकुंश उच्यते**" । स्त्रीत्वेऽपि प्रवृत्तिनिमित्ते शब्दकृतपुंस्त्वबलात् "**स्त्रियामादा**" (२।४।४९) न भवति । ननु शिरित्येकवर्णः कथमिह सर्वस्य भवति । न च अनुबन्धकृतमनेकवर्णत्वं गृह्यते – उच्चरितप्रध्वंसिनो ह्यनुबन्धाः शकारोपादानादिति चेत् तदयुक्तम् । शौ नियमे शकारो विशेषणार्थः । "**इनृहन्पूषार्यम्णां शौ च**" (२।२।२१) इति कृते 'सुदण्डिनि' इत्यत्रापि दीर्घः स्यात् । एवं तर्हि '**घुटः शिः**' इति सिद्धे जस्शसोर्ग्रहणं सर्वादेशार्थम्, जस्शसोरुच्चारणप्रसङ्गे शिर्भवतीत्यर्थः ।

**ये** तु 'सन्ध्यक्षराणि' इति, 'व्यञ्जनानि' इति ज्ञापकात् सर्वादेशं प्रतिपद्यन्ते, तेषां नपुंसकाद् घुट्शब्दः श्रुतः सामर्थ्याज्जस्शसोर्ग्राहक इति प्रतिपत्तिगौरवनिरासार्थमेव न पुनर्विभक्त्यन्तनिरासार्थम् । अष्टौ फलानीत्यत्र द्वयोर्नित्यत्वे परत्वादौत्वमेव । किं च '**सकृद् बाधितो विधिर्बाधित एव**' (कात० प० ३६) इति न्यायात् ॥१६६।

[वि० प०]

**जस्शसो०** । ननु शकारोऽयमनुबन्धस्ततश्च '**नानुबन्धकृतम् अनेकवर्णत्वम्**' (व्या० प० वृ० १२) वक्तुं युज्यते इति "**इनृहन्पूषार्यम्णां शौ च**" (२।२।२१) इत्यस्य विशेषणत्वात् । अन्यथा शकारस्याभावे सति "**औ च**" इति निर्देशस्य सप्तम्येकवचनेऽपि समानत्वाद् 'दण्डिनि' इत्यत्र ङावपि दीर्घः स्यात् । नैवम्, जस्शसोर्ग्रहणमेव सर्वादेशं बोधयति । अन्यथा '**घुटः शिः**' इत्येवं ब्रूयात् । न चैवं सति वचनान्तरस्य प्राप्तिः । 'नपुंसके जसेव घुट्' इति नियमाद् अन्यस्य घुट्त्वमेव नास्ति ॥१६६।

[क० च०]

**जस्०** । ननु "**बह्वल्पार्थात् कारकात्**" (२।६।४०-८ तमादिगणः) इत्यादिना कृतस्य शसः कथं न दर्शितम् ? सत्यम् । जसः साहचर्याद् विभक्तिभूतः शसेव

गृह्यते । ननु जस्धातोः क्विबन्तस्य संभवात् कथं साहचर्यम् ? सत्यम् । नपुंसकाद् विहितस्य जसः शिर्भवतीत्यर्थो न घटते स्यादिसंबन्धो वा करणीयः । अन्यथा शकारस्याभावे सतीशब्दस्य विशेषबोधाय विवरणं कृतमिति भावः । यद् वा अन्यथा विशेषणं विनेत्यर्थः । ननु विशेषणार्थत्वाभावः कुत इत्याह– शकारस्येत्यादि । दण्डिनीति । ननु 'औ च' इति कृते दीर्घो न भवतीति घुटोऽनुवर्तनात् ? सत्यम् । घुट्संबन्धमनादृत्योक्तम् ।।१६६।

**[समीक्षा]**

'पद्म + जस्, शस् । पयस् + जस्, शस्' इस अवस्था में कातन्त्रकार तथा पाणिनि दोनों ही 'जस्- शस्' प्रत्ययों को 'शि' आदेश करके 'पद्मानि, पयांसि' शब्दरूप सिद्ध करते हैं । अतः उभयत्र साम्य ही परिलक्षित होता है । पाणिनि का भी यही सूत्र है– **"जस्शसोः शि"** (अ० ७।१।२०) ।

**[रूपसिद्धि]**

१. **पद्मानि ।** पद्म + जस्, शस् । प्रकृत सुत्र द्वारा 'जस्- शस्' को 'शि' आदेश, **"जस्- शसौ नपुंसके"** (२।१।४) से घुट्संज्ञा, **"धुट्स्वराद् घुटि नुः"** (२।२।११) से 'नु' आगम, **"आगम उदनुबन्धः स्वरादन्त्यात् परः"** (२।१।६) के नियमानुसार अन्तिम स्वर मकारोत्तरवर्ती अकार के बाद उसकी योजना तथा **"घुटि चासंबुद्धौ"** (२।२।१७) से दीर्घ आदेश ।

२. **पयांसि ।** पयस् + जस्, शस् । प्रकृत सूत्र द्वारा जस्- शस् को 'शि' आदेश, जस्- शस् की घुट्संज्ञा, नु-आगम, उसकी अन्तिम स्वर यकारोत्तरवर्ती अकार के पश्चात् योजना तथा यकारोत्तरवर्ती अकार को दीर्घ (सान्तमहतोर्नोपधायाः– २।२।१८) एवं अनुस्वारादेश ।।१६६।

## १६७. धुट्स्वराद् घुटि नुः [२।२।११]

**[सूत्रार्थ]**

नपुसंक लिङ्ग में घुट् के परे रहते कहीं पर 'धुट्' से पूर्व तथा कहीं पर स्वर से पर में 'नु' आगम होता है ।।१६७।

[दु० वृ०]

धुटः पूर्वः स्वरात् परो नपुंसकलिङ्गस्य घुटि परे नुरागमो भवति। **पयांनि, पयांसि। सुकर्तृणि, सुसखीनि।** कथं सुक्रुञ्चि, गोमन्ति, सुवल्गि ? धुटो व्यवहितत्वात्। गोरङ्क्षीति धुड्जातित्वाददोषः। 'बहूर्ज्जि, बहूर्ञ्जि' इति वा वक्तव्यम्॥१६७।

[दु० टी०]

**धुट्०**। धुट् च स्वरश्च धुट्स्वरम्। समाहारत्वादेकवचनं वर्णमात्रादेव पञ्चमी प्रस्तुतत्वाच्च सम्बन्धो नपुंसकाद् विहिते घुटि **"आगम उदनुबन्धः स्वरादन्त्यात् परः"** (२।१।६) इत्याह– धुटः पूर्व इत्यादि। एकापीयं पञ्चमी अर्थवशात् पूर्वपरदिग्-योगलक्षणा मन्तव्या। अर्थाच्च नपुंसकलिङ्गमागमि। विहितविशेषणत्वाच्च बहुपयसोऽतिदधीन् पश्यन्तीति नुर्न भवति। **"नामिनः स्वरे"** (२।२।१२) नुरस्त्येव 'आद् धुटो घुटि नुः' इति कथन्न विदध्यात्, 'सुकर्तृणि, सुसखीनि' इत्यत्र आरमैत्वं च बाधित्वा स्वरदर्शनादेव नुर्यथा स्यादेतदर्थं स्वरग्रहणम्। कथम् 'अतिजरांसि, प्रियतिसृणि कुलानि' नपुंसके-उक्तेन नुनावयवस्य व्यवधानादादेश इति।

**अन्य** आह – धुट्स्वरादिति नैव द्वन्द्वो वाक्यमेतत् स्वरात् परो धुट् चेत् नपुंसकस्य नुरिति कथं कुण्डानि, वनानि। सन्ध्यक्षराणि व्यञ्जनानि इति ज्ञापकादप्यकारान्नुरनुमीयते, नैवम्। द्वन्द्व एव युक्तः परत्वादेवारादीन् नुर्बाधते। 'सुसखीनि' इत्यत्र परत्वाद् घुट्यैत्वेऽपि कृते **"स्वरो ह्रस्वो नपुंसके"** (२।४।५२) इत्यन्तरङ्गत्वाद् ह्रस्वे पश्चान्नु-र्भवति तथा 'अतिजरांसि, प्रियतिसृणि' परत्वादेव तर्हि **"अकाराद् घुटि नुः"** इत्युक्ते **"नामिनः स्वरे"** (२।२।१२) इत्युक्तिबाधापि स्यात्, तस्मात् स्वरग्रहणं कथमित्यादि चोद्यम्, धुटो व्यवस्थितत्वादिति परिहारः। स्वरात् परो धुटः पूर्वो नुर्विधीयमानोऽन्तः-स्थानुनासिकाभ्यां व्यवहितत्वाद् धुटः पूर्वो न भवतीत्यर्थः। **गोरङ्क्षीति।** धुडिति जातिनिर्देशोऽयं जातेरेकत्वाद् व्यवधानता नास्तीति भावः। यद्यपि जातिरेका निरवयवा सर्वासु विभक्तिषु लीना, तथापि गुणभूताधारापेक्षया पूर्वपरप्रतिपत्तिः प्रतीतैव। यस्तु धुट्स्वरेण लिङ्गं विशेषयति। विशेषणेन च तदन्तविधिः। धुडन्तात् स्वरान्ताच्च विहिते धुट्यर्थाद् धुट्स्वरान्तस्य नुर्भवति। तन्मतेनाधुट्पूर्वादपि धुटः प्राङ् नुरिति परिभाषासामर्थ्यात् परत्वे लब्धे यत्परग्रहणं तद्बलादिह मन्यते-सुक्रुञ्चि, सुवल्गीत्यादि। 'बहूर्जि, बहूर्ञ्जि' इति वा वक्तव्यम् इति मतान्तरमपेक्ष्य 'वात्र समुच्चये' वक्तव्यमिति।

उच्चारणीयमित्यर्थः। तर्हि 'कुर्वन्ति कृष्यन्ति कुलानि' इति पूर्वस्य नस्य णत्वं स्यात्। अनुस्वारीभूतो हि णत्वमतिक्रामति। नैवम् **'असिद्धं बहिरङ्गमन्तरङ्गे'** (कात० प० ३३) इति पूर्वस्याप्यनुस्वारः।'श्रेयांसि' इत्यनुस्वारद्वित्वेऽपि श्रुतेरभेदः। बह्व्यः ऊर्जो येषु कुलेष्विति बहुव्रीहिः। **वार्त्तिककारोऽ**प्याह – तत्र 'बहूर्जि प्रतिषेधः' इति तत्रेति द्वन्द्वपक्षे। ननु गोमन्तीति किमिति प्रत्युदाहृतम्, श्रुतेरभेदात्। नैवम्, 'गोमत्कुलानि' इति समासे नलोपे पुनर्नलोपो न स्यात्, जातौ चरितार्थत्वाद् **"व्यञ्जनान्तस्य यत्सुभोः"** (२।५।४) इति शास्त्रातिदेशे च न-संयोगान्तयोरलुप्तवद्भावात् पुनर्लोपो न स्यात्, अनुषङ्गसंज्ञाभावात्। धुट्स्वरादिति किम्? सुदिवि स्वहानि। वकारस्य दन्त्योष्ठ्यस्य धुट्संज्ञा नास्तीति। धुटीति वचनं जस्शसोरागमित्वनिरासार्थं न्वागमेन च येन नाप्राप्तिन्यायेन शिरादेशो बाध्यते। परभावे लिङ्गस्यासंबन्धात् 'शौ' इति कृतेऽपि किन्नाम लाघवमिति ॥१६७।

## [वि० प०]

**धुट्०**। धुट् च स्वरश्च धुट्स्वरमिति समाहारत्वादेकवचनं पञ्चम्याः। तत् पुनरर्थवशाद् द्विधा भिद्यते – पूर्वदिग्योगतया परदिग्योगतया चेत्याह – धुटः पूर्व इति। पयांसीति। **"सान्तमहतोर्नोपधायाः"** (२।२।१८) इति दीर्घः, तथा स्वरात् परं दर्शयति –'पद्मानि' इति। शोभनः कर्ता, शोभनः सखा येषु कुलेष्विति विग्रहः। कथमित्यादि। सुष्ठु क्रुञ्चस्तीति क्विप्, **"अनुषङ्गश्चाक्रुञ्चेत्"** (२।२।३९) इति ज्ञापकाद् अनुषङ्गलोपः, क्विप् नास्तीति। गावो विद्यन्ते येषां कुलानामिति विग्रहे भूम्नि मन्तुप्रत्ययः। सुष्ठु वल्गन्तीति क्विप्। 'उख नख' इत्यादिना [1]दण्डको धातुः। सर्वत्र **"जस्शसोः शिः"** (२।२।१०)। अन्त्यात् स्वरात् परो धुटः पूर्वो नुर्विधीयमानोऽन्तस्थानुनासिकाभ्यां व्यवस्थितत्वाद् धुटः पूर्वो न भवतीति परिहरति – धुटो व्यवस्थितत्वाद् इति।

गोरङ्क्षीति। अव रक्ष पालने। गां रक्षतीति क्विप्। **"जस्शसोः शिः"** (२।२।१०) इह धुडिति जातिनिर्देशोऽयं जातेश्चैकत्वान्नास्ति व्यवधानमिति जातेर-

---

१. उख णख वख मख रख लख रखि लखि इखि ईखि वल्ग रगि लगि अगि वगि मगि ष्वगि इगि रिगि लिगि गत्यर्थाः (१।३८)।

मूर्तत्वेऽपि धुटः पूर्व इति व्यवहारो व्यक्त्यपेक्षया भवति। बहूर्जीत्यादि। ऊर्ज बल-प्राणधारणयोश्चुरादाविनन्तात् **"क्विप् च"** (४।३।६८) इति कर्तरि क्विप् सम्पदादित्वाद् भावे वा। बहवो ऊर्जो येषु कुलेष्विति बहुव्रीहिः। वक्तव्यम् इति। व्याख्यानं वक्तव्यमित्यर्थः। तत्रेदं व्याख्यानम्, केचिदिच्छन्ति केचिन्नेच्छन्ति। ये नेच्छन्ति तन्मतमिह प्रमाणमित्यर्थः ॥१६७।

**[क० च०]**

**धुट्०**। ननु स्वरग्रहणं किमर्थम् **"आगम उदनुबन्धः"** (२।१।६) इत्यादिना स्वरात् परम् आगमस्य सिद्धेः ? सत्यम्। यत् पुनरिह स्वरग्रहणं तत् केवलान्त्यस्वरादप्यागमार्थम्, यथा 'पद्मानि' इति। शोभनः कर्तेति बहुव्रीहौ **"नयृदन्ताद् बहुव्रीहौ"** इति को न भवति, समासान्तविधेरनित्यत्वात्। ननु 'उपकुम्भम्' इत्यत्र जस्-शसोरमादेशे कृते न्वागमः कथन्न स्यात्। **"स नपुंसकलिङ्गं स्यात्"** (२।५।१५) इत्यनेनाव्ययीभावसमासस्य नपुंसकत्वेन जस्शसोर्घुट्त्वात् ? सत्यम्। पूर्वसूत्रात् शेरनुवर्तने शिरूपे घुटि नुर्भवतीत्युक्ते कुतोऽमूरूपे नुप्रसङ्ग इति **कुलचन्द्रः**। ननु अमादेशे कृतेऽपि 'यस्य स्थाने' (कात० प० पा० ९१) इति न्यायात् शिरेव कथन्न स्यात्, नैवम्। 'सकृद्गत०' (कात० प० ३६) इति न्यायान्न भवति। नपुंसकस्य लक्ष्यानुसारित्वादित्यादिना। ननु पूर्वसूत्रात् शेरनुवर्तने सिध्यति, किमर्थं घुड्ग्रहणम् ? सत्यम्। **कुलचन्द्र**मते सुखार्थम्।

**(पाठाधिक्यम्)** ननु यदि घुटीति निमित्तसप्तमी तदा 'आगमादेश०' (कात० प० ४०) इत्यादिपरिभाषा नास्त्यस्मादिति किमर्थं परान्न भविष्यति, निमित्तस्य व्यवधानादेवेति **केचित्** ? सत्यम्। नपुंसकप्रत्यासन्नघुटीति संबन्धे पकाराद् भवन्नपि समुदायस्यानन्तर्यम् अस्त्येवेति अन्त्यादित्युक्तम्। 'बहूर्जि' इत्यत्र जात् प्राक् तेन रेफात् पूर्व इति शङ्का निरस्तेति **हेमकरस्याशयः** ॥१६७।

**[समीक्षा]**

'पद्म + जस्, पयस + जस्' इस स्थिति में कातन्त्रकार 'नु' आगम का विधान स्वर (स्वरान्त्य लिङ्ग) के बाद तथा धुट् से पूर्व में करके 'पद्मानि, पयांसि' शब्दरूप सिद्ध करते हैं। पाणिनि ने **"नपुंसकस्य झलचः"** (अ० ७।१।७२) सूत्र द्वारा 'नुम्'

आगम करके इन रूपों की सिद्धि की है। अपनी-अपनी प्रक्रिया की भिन्नता के कारण पाणिनि ने उकार अनुबन्ध के साथ 'म्' अनुबन्ध की भी योजना की है, जबकि कातन्त्र में केवल उकार अनुबन्ध ही दृष्ट है।

व्याख्याकारों के अनुसार 'सुकुञ्चि, गोमन्ति, सुवल्गि' में धुट् का व्यवधान होने से 'नु' आगम नहीं होता है। **'गोरङ्क्षि'** में धुड्जाति होने के कारण 'नु' आगम उपपन्न होता है। 'बहूर्जि' में वैकल्पिक 'नु' आगम होने के कारण 'बहूर्ञ्जि' रूप भी निष्पन्न होता है।

**[रूपसिद्धि]**

१. **पद्मानि।** पद्म + जस्, शस्। प्रकृत सूत्र से स्वर ( मकारोत्तरवर्ती ) अकार के बाद 'नु' आगम तथा दीर्घ आदेश।

२. **पयांसि।** पयस् + जस्, शस्। प्रकृत सूत्र द्वारा यहाँ धुट् सकार से पूर्व 'नु' आगम की योजना, दीर्घ तथा अनुस्वारादेश।

३. **सुकर्तॄणि।** सुकर्तृ + जस्, शस्। शोभनाः कर्तारो येषां तानि। समास, जस्-शस् को शि-आदेश, उसकी 'घुट्' संज्ञा, 'नु' आगम, **"घुटि चासंबुद्धौ"** (२।२।१७) से दीर्घ' तथा नकार को णकारादेश।

४. **सुसखीनि।** सुसखि + जस्, शस्। शोभनाः सखायो येषां तानि। समास। जस्-शस् को 'शि' आदेश, उसकी घुट्संज्ञा, 'नु' आगम तथा दीर्घ आदेश ॥१६७।

## १६८. नामिनः स्वरे [२।२।१२]

**[सूत्रार्थ]**

नपुंसकलिङ्ग में स्वर के परवर्ती होने पर [1]नाम्यन्त लिङ्ग = प्रातिपदिक से 'नु' आगम होता है ॥ १६८।

**[दु० वृ०]**

नाम्यन्तान्नपुंसकलिङ्गात् स्वरे परे नुरागमो भवति। **वारिणी, वारिणे।** नामिनः स्वर इति किम्? कुलयोः ॥१६८।

---

१. नामी = अवर्ण को छोड़कर शेष १२ स्वर = इ, ई। उ, ऊ। ऋ, ॠ। ऌ, ॡ। ए, ऐ। ओ, औ = **"स्वरोऽवर्णवर्जो नामी"** (१।१।७) ॥ १६८।

[दु० टी०]

**नामिनः** । वारिणी इति । औरीमापद्यते नपुंसके घुट्त्वाभावाद् दीर्घो न भवति । 'वारिणे' इति परादित्वे सत्यपि अविकृते ङेवचने अग्नेरेत्वमोत्वं च नास्ति । शौ परत्वान्नुरागमश्चेत्, न च तेन अनेन वा कश्चिद् विशेषोऽस्तीति द्वयोरप्येकार्थकारित्वात् । **"नामिनः स्वरे"** इति, किमिति कोऽर्थो नाम्यन्ताद् विहिते स्वरादावित्यर्थः । तेन 'कुलयोः' इत्यकारान्ताद् विहिते न भवति । तथा 'बहुदध्नोः पुंसोः' इति तदन्तविधिना न भवति । कथमिहादिमन्तरेणादिर्लभ्यते 'मधुनी, मधुने' इत्यत्रैव स्यात्, 'वारिणोः, मधुनोः' इत्यत्र न स्यात् । **'वर्णग्रहणे तदादौ कार्यसंप्रत्ययः'** (कलाप०, पृ० २२२, क्रम० ७२) इति प्रतिपत्तव्यम् । अथवा समुदायविधानेऽवयवोऽपि विहित एव **'अर्थवद्ग्रहणे नानर्थकस्य'** (कात० प० ४) इतीयमनित्येति ।

स्वरग्रहणं किमर्थम् ? घुटीत्यपि न वर्तते तेनैव सिद्धत्वात् । न च निर्निमित्तस्य नुर्भवतीति वक्तव्यम् । स्यादिसंबन्धः प्रस्तुत इति । अन्यथा सिद्धान्तेऽपि तुम्बुरुणो विकारश्चूर्णं 'तौम्बुरवम्' इत्येवमादेरणि कृते नुः प्राप्नोति, अतः स्यादावित्यर्थाद् निमित्तं भविष्यति । एवं सति 'दधिभ्याम्, मधुभ्याम्' इत्यत्र **"तृतीयादौ तु परादिः"** (२।१।७) इति वचनान्नास्य स्थितिः स्यात् । तर्हि वक्ष्यमाणमन्तग्रहणमिहैव क्रियताम्, तद्बलाल्लिङ्गान्तनकारस्य लोपो भवति, नैतदेवम् । 'अतिराभ्यां प्रियतिसृभ्यां कुलाभ्याम्' इति नस्य पूर्वविधौ अलुप्तवद्भावाद् रायः आत्वं तिसृभावश्च न स्यात् । समुदायभक्तो न्वागमो न त्ववयवभक्तः इति अवयवव्यवधानतैव परत्वात् **'सकृद्गतो विप्रतिषेधो यद् बाधितं तद् बाधितमेव'** (कात० प० ३६) इति न्यायात् तिसृभावेन हि नित्यो नुरागमः ।

कथन्तर्हि 'प्रभूणाम्' इति परत्वान्नामिनोऽन्त इति न्वागमे सति ह्रस्वान्तत्वाभावान्नुर्न भवति, नैवम् । तत्र नदीश्रद्धाभ्यो विहित आमिति विशेषणान्नुः स्यात्, नस्यालुप्तवद्भावाच्च **"नान्तस्य चोपधायाः"** (२।२।१६) दीर्घः, यथा 'पञ्चानाम्' इति । तर्हि 'शुचीनाम्' इति **"इन्-हन्-पूषार्यम्णां शौ च"** (२।२।२१) इति नियमाद् दीर्घो न स्यात्, नैवम् । तत्र प्रतिपदोक्तस्य इनन्तस्य नियमो घुडपेक्षको वा । तस्मात् 'हे त्रपो !' न सिध्यति । नकारागमे कृते **"न संबुद्धौ"** (२।३।५७) इति नलोपप्रतिषेधादग्निकार्यं न स्यात्, नैवम् । **'सर्वविधिभ्यो लोपविधिर्बलवान्'**

(कात० प० ३४) इति प्रागेव लोपः। तत्र हि लोप इति अदर्शनमात्रं विवक्षितं पश्चात् तदुक्तप्रतिषेधान्नुरागमो न भवति। यद्येवं तर्हि तत्र लुगेव क्रियताम् इह स्वरग्रहणं ज्ञापयति – क्वचिल्लुक्यपि प्रत्ययकृतं भवतीति। नैवम्। स्वरग्रहणमुत्तरार्थं कथं ज्ञापनार्थं स्यात्, तस्माल्लोपग्रहणे सति न च तदुक्तग्रहणम् अस्मिंश्च व्यवस्थित-वाऽनुवृत्त्या नाम्यन्तस्य वा तदुक्तमुपपद्यते। एवन्तर्हि स्वरग्रहणेऽत्राक्रियमाणे प्रस्तुतस्यादिसंबन्धस्य विहितविशेषणमेव गरीय इति यथान्यासमेवाश्रयः ॥१६८।

**[वि० प०]**

**नामिनः**। 'नामिनः' इति पञ्चम्या विहितविशेषणमाख्यायते, नाम्यन्तान्नपुंसक-लिङ्गाद् विहिते स्वरे नुरित्यर्थः। तेनाकारान्ताद् विहिते स्वरे न भवतीत्याह– नामिनः स्वर इति किम् ? कुलयोरिति। ननु कथमत्र प्राप्तिर्येनेदमुच्यते। न ह्यत्र स्वरो विहितः किन्तर्हि स्वरादिप्रत्ययः, न चात्रादिग्रहणमस्ति। तेन 'वारिणा, वारिणे' इत्यादिस्वरे प्राप्नोति तत्कथम् ओसि प्रसङ्गः ? सत्यम्। समुदायविधानेऽवयवोऽपि विहित एवेति **'अर्थवद्ग्रहणे नानर्थकस्य'** (कात० प० ४) इत्ययं पुनरनित्य एव न्यायः इति। अथवा **'वर्णग्रहणे तदादौ कार्यसंप्रत्ययः'** (कलाप०, पृ०२२२, क्रम० ७२) इहाश्रीयते इति, तेन नाम्यन्ताद् विहिते स्वरादावित्यर्थः। यत्र स्वरमात्रं तत्र व्यपदेशिवद्भाव एवेति। तेन 'वारिणोः, मधुनोः' इत्याद्यपि सिद्धमेव ॥१६८।

**[क० च०]**

**नामिनः**। नामिनः स्वर इति किम् ? कुलयोरिति **वृत्तिः**। विहितविशेषणं किमर्थमित्यर्थः। ननु तथापि नपुंसके द्वयोः कुलयोरित्यत्र नाम्यन्ताद् विहिते ओसि परे न्वागमः कथं न स्याच्चेत्, नैवम्। नाम्यन्ताद् विहिते स्वरे नुर्भवन् नाम्यन्तादेव भवति। अत्र त्यदाद्यत्वेन नाम्यन्तताविरह एव। न च वाच्यम्, प्रागेव नुः कथन्न स्यात्, यावता परत्वान्नित्यत्वादन्तरङ्गत्वाच्च त्यदाद्यत्वस्यैव विषयत्वात्, तदस[illegible]। **"ओसि च"** (२।१।२०) इत्येत्वे सति नाम्यन्तान्नुर्भवतु। नैवम्, **"त्यदादीनाम"** (२।३।२९) इत्यत्र विषयसप्तम्याश्रयणीया। ततश्चानुत्पन्नायामेव विभक्तौ त्यदाद्यत्वेऽकारान्तादेव विभक्तिर्विहिता न तु नाम्यन्तादिति श्रुतव्याख्यानात् कुतो न स्यात्।

यद्येवं तर्हि कथं तत् कुलमिति सिध्यति, यावता विभक्ताविति विषयसप्तमीत्वादग्रे त्यदाद्यत्वे पश्चात् स्यमोर्विहितत्वात् **"अकारादसंबुद्धौ मुश्च"** (२।२।७) इत्यनेन

'मु' आगमे तमित्यनिष्टरूपं स्यात्, कथं वा **"न च तदुक्तम्"** इति प्रतिषेध उपपद्यते। नैवम्, इष्टसिद्ध्यर्थमुपादीयमाना विषयसप्तमी न सर्वत्र युज्यते इति **कुलचन्द्रः। वस्तुतस्तु "त्यदादीनाम"** (२।३।२९) इत्यत्र परसप्तम्येवेति न दोषः। तथाहि यस्मान्नामिनः स्वरो विहितः श्रुतत्वात् तस्मान्नामिनः एव नुर्भवतीत्युक्ते कुतो द्वयोरित्यत्र न्वागमप्रसङ्गः, कथन्तर्हि 'प्रियतिसृणी वने' इति सिध्यति। न ह्यत्र 'प्रियतिसृ' शब्दात् स्वरो विहितः किन्तु 'प्रियत्रि' शब्दाद् इति ? सत्यम्। **"त्रिचतुरोः स्त्रियाम्"** (२।३।२५) इत्यत्र विभक्ताविति विषयसप्तमी आश्रयणीया। ततश्चानुत्पन्नायामेव विभक्तौ तिस्रादेशे कृते पश्चाद् विहितः स्वर इति श्रुतव्याख्यानं सुतरामेव घटते। कथन्तर्हि 'प्रियत्रि कुलम्' इति विषयसप्तम्या प्रथमं तिस्रादेशस्य प्राप्तत्वात्तदुक्त-प्रतिषेधस्यानुपपत्तेर्निमित्तकार्यत्वात् ? सत्यम्। त्रिचतुरोरित्यत्र परसप्तम्येव निश्चिता तर्हि 'प्रियतिसृणी कुले' इति न सिध्यति, प्रियत्रिशब्दात् स्वरस्य विहितत्वात्। तिस्रादेशे नुर्न स्यात् ? सत्यम्। **"न नामि दीर्घम्"** (२।३।२७) इत्यत्र नकारेण न्वागमो ज्ञापितः। तथाहि **"दीर्घमामि सनौ"** (२।२।१५) इत्यनेव विहितस्य दीर्घस्य निषेधादर्थान्न्वा-गमेन सह आमिति लभ्यते, किं **"न नामि दीर्घम्"** (२।३।२७) इत्यत्र नकारकरणेन ? तस्मान्नकारकरणं बोधयति – न्वागमेन **"तौ रं स्वरे"** (२।३।२६) इत्यनेन प्राप्तं रत्वं बाध्यते। ततश्चामि परे सूत्रबलादेव रत्वबाधा गम्यते, अन्यथा न्वागमाभावे प्रसक्त्यभावान्निषेधानुपपत्तेः, ततस्तत्र न ज्ञापकस्य फलमित्यर्थः। ज्ञापकफलं तु 'प्रियतिसृणी' इत्यादौ ज्ञापकस्य सर्वोद्दिष्टत्वात्।

तत्र रत्वबाधा तदैव संभवति, यदि तिस्रादेशे कृतेऽपि नुर्भवति। तस्मात् तिस्रादेशं प्रति श्रुतव्याख्या नास्तीति **संक्षेपः।** यत्संज्ञकान्नाम्यन्ताद् विहितः स्वरः श्रुतत्वात् तत्संज्ञकान्नाम्यन्तादेवेत्युक्ते नास्ति दोष इति **केचित्।** यद् वा **"शासेरिदुपधायाः"** (३।४।४८) अण्व्यञ्जनयोरिति ज्ञापकानुविधाने सामान्यनामिनोऽग्रहणान्न दोषः। ततः सन्ध्यक्षरे नामिव्यावृत्तिः। 'वारिणी' इत्युदाहृतं लाक्षणिकस्वरे यथा स्यादिति। 'अर्थवद्ग्रहणे नानर्थकस्य' (कात० प० ४) इत्यनित्योऽयं न्यायः 'अनिनस्मनामेव' इत्याह – अथवेति ॥१६८।

**[समीक्षा]**

'वारि + औ, वारि + ङे' इस अवस्था में कातन्त्रकार 'नु' आगम तथा पाणिनि 'नुम्' आगम करके 'वारिणी, वारिणे' शब्दरूप सिद्ध करते हैं। पाणिनि का सूत्र

है – "**इकोऽचि विभक्तौ**" (अ० ७।१।७३)। अपनी-अपनी रचनाशैली के अनुसार अनुबन्धयोजना भिन्न-भिन्न की गई है। अतः उभयत्र प्रक्रियासाम्य है।

**[रूपसिद्धि]**

१. **वारिणी**। वारि+औ। "**औरीम्**" (२।२।९) से औ को ई, प्रकृतसूत्र से 'नु' आगम, उसकी स्वर से बाद में योजना तथा "**रषृवर्णेभ्यः ०**" (२।४।४८) इत्यादि से नकार को णकारादेश।

२. **वारिणे**। वारि + ङे। प्रकृत सूत्र से 'नु' आगम, उसकी स्वर के पश्चात् योजना तथा नकार को णकारादेश ॥१६८।

## १६९. अस्थिदधिसक्थ्यक्ष्णामनन्तष्टादौ [२।२।१३]

**[सूत्रार्थ]**

टा-आदि विभक्तिस्थ स्वर वर्ण के परवर्ती होने पर नपुंसकलिङ्ग में नाम्यन्त 'अस्थि, दधि, सक्थि तथा अक्षि' शब्दों के अन्तिम वर्ण के स्थान में 'अन्' आदेश होता है ॥१६९।

**[दु० वृ०]**

नाम्यन्तानां नपुंसकलिङ्गानामस्थ्यादीनां टादौ स्वरेऽन्तोऽन् भवति। अस्थ्ना, दध्ना, सक्थ्ना, अक्ष्णा, अत्यस्थ्ना, अतिदध्ना छात्रेण। अकारोच्चारणं किम् ? अस्थ्नि, अस्थनि वा स्यात् ॥१६९।

**[दु० टी०]**

**अस्थि०**। नपुंसकग्रहणं नामिग्रहणं चास्थ्यादीनां विशेषणम् इति पञ्चम्यन्तमपि षष्ठ्यन्ततया विपरिणमते इत्याह – नपुंसकलिङ्गानामिति। पञ्चमीनिर्देशमन्तरेण विहितविशेषणं नास्ति, तदन्तविधिरेवेत्याह – अत्यस्थ्नेत्यादि। अस्थ्यतिक्रान्तेन दध्यतिक्रान्तेन वा छात्रेण इति विगृह्य तत्पुरुषः। तथा अत्यस्थ्ना स्त्रिया, नपुंसकलिङ्गास्थ्याद्यन्तायाः प्रकृतेरनपुंसकवृत्तेरपि ग्रहणमुपपद्यते। केवलानामपि भवितव्यम्, व्यपदेशिवद्भावात्। 'त्रपुणी' इति नोरवकाशः 'प्रियास्थ्ना' इत्यनादेशस्य अस्थ्ना, दध्ना इत्युभयप्राप्तौ परत्वादन् भवति। नन्वस्थ्यादीनि स्वभावतो नपुंसकान्येव, नपुंसकाधिकारः संज्ञाशब्दा-

नामेषां निवृत्त्यर्थः। तेन 'अस्थिना छात्रेण' क्रियावचनोऽप्यस्थिदधिशब्दः। दधातीति दधि, – **"आदृवर्णोपधालोपिनां किर्द्वे च"** (४।४।५३) इति। ताच्छील्ये – दधिना द्विजेनेति।

नाम्यधिकारोऽपि तदन्तविधावेव प्रयोजयति यथासंभवम्। तेन **"सक्थ्यक्षिणी स्वाङ्गे"** (२।६।७३-५०) इति राजादौ राजादीनामदन्तत्वाद् एकदेशविकृतस्यानन्यवद्भावाद् इति न्यायादकारस्य सक्थ्यक्ष्णोरवयवस्य न भवति। प्रियं सक्थ्यस्य, पद्मे इवाक्षिणी अस्येति बहुव्रीहिः – प्रियसक्थेन पद्माक्षेण। अन्तशब्दः कथमिहागमार्थो न भवति, अन् भवत्येषामन्त इति, नैवम्। अस्थ्यादीनामन्तो वर्णो यः सोऽन् भवति इत्यस्मादेव निर्देशाद् अवसीयते। नन्वादेशेऽपि कृते **"अवमसंयोगात्"** (२।२।५३) इत्यकारलोपेन भवितव्यम्, वर्णान्तस्य विधिरित्यन्तग्रहणं च न विधेयमित्याशङ्क्याह- अकारेत्यादि। **"ईङ्योर्वा"** (२।२।५४) इति पक्षेऽकारस्य श्रवणं यथा स्यादित्यर्थः। टादाविति किम्? अस्थिनी, दधिनी। स्वर इति किम्? अस्थिभ्याम्, दधिभ्याम् ॥१६९।

## [वि० प०]

**अस्थि०**। नपुंसकलिङ्गानां नाम्यन्तानामित्यधिकारवशाद् इत्युक्तम्। अथ किमर्थमिदमुच्यते, न ह्यस्थ्यादयो नपुंसकत्वं नाम्यन्तत्वं वा व्यभिचरन्ति, सत्यम्। एषां संज्ञारूपाणामस्त्येव नपुंसकत्वाभिचारस्तत्र मा भूदिति। यथा 'अस्थिना छात्रेण' इत्यादि। किंच दधातीति दधि **"आदृ ऋवर्णोपधालोपिनां किर्द्वे च"** (४।४।५३) इति किप्रत्ययान्तः क्रियावाचकोऽपि दधिशब्दस्ताच्छील्ये दृश्यते। यथा दधिना द्विजेनेति नाम्यन्तविशेषणमपि तदन्तार्थम्। अन्यथा **"सक्थ्यक्षिणी स्वाङ्गे"** (२।६।७३-५०) इति राजादित्वाद् अत्प्रत्यये नामिनो लोपे सति एकदेशविकृतस्यानन्यवद्भावादकारान्तस्यापि प्राप्नोति। यथा प्रियं सक्थ्यस्य, पद्मे इवाक्षिणी यस्येति विग्रहे **'प्रियसक्थेन, पद्माक्षेण'** इत्यादि। इह पञ्चमीनिर्देशस्याभावाद् विहितविशेषणाभावे तदन्तविधिना अस्थ्यन्तस्यानपुंसकवृत्तेरपि स्यादित्याह – अस्थ्नेत्यादि। अस्थ्यतिक्रान्तेन, दध्यतिक्रान्तेन इति विग्रहः केवलस्य च व्यपदेशिवद्भावात्।

अथ किमर्थम् अन् विधीयते, नकार एवोच्यताम्, यतः कृतस्याप्यकारस्यायम् असंयोगाद् इत्यादिना लोपेन भवितव्यम्। एवं सत्यन्तग्रहणमपि न कृतं स्यात्।

एकवर्णत्वादन्ते भविष्यतीत्याह – अकार इत्यादि। "**ईङ्योर्वा**" (२।२।५४) इति विकल्पपक्षे अकारस्य स्थितिरस्तीति भावः ॥१६९।

**[क० च०]**

अस्थि०। प्रसिद्धे शास्त्रप्रवृत्तिर्ज्यायसीत्याह – किञ्चेति ॥१६९।

**[समीक्षा]**

'अस्थि + टा, दधि + टा' इस अवस्था में कातन्त्रकार 'इ' को 'अन्' आदेश और पाणिनि "**अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः**" (अ० ७।१।७५) से 'अनङ्' आदेश करते हैं। पाणिनि ने 'ङ्' अनुबन्ध की योजना "**ङिच्च**" (अ० १।१।५३) सूत्र के प्रवृत्त्यर्थ की है, जबकि कातन्त्रकार "**अन्तः**" पद सूत्र में पढ़कर अन्त्य वर्ण के स्थान में आदेश का विधान करते हैं। इस प्रकार कातन्त्रकार ने एक ही सूत्र द्वारा दो निर्देश करके लाघव किया है।

**[रूपसिद्धि]**

१. **अस्थ्ना**। अस्थि + टा। प्रकृत सूत्र द्वारा 'अस्थि' शब्द के अन्त्यावयव इकार के स्थान में 'अन्' आदेश तथा "**अवमसंयोगादनोऽलोपः**" (२।२।५३) से 'अन्' के अकार का लोप।

२. **दध्ना**। दधि + टा। प्रकृत सूत्र द्वारा 'दधि' शब्द के अन्त्यावयव इकार के स्थान में 'अन्' आदेश तथा "**अवमसंयोगादनोऽलोपोऽलुप्तवच्च पूर्वविधौ**" (२।२।५३) से 'अन्' के अकार का लोप।

३-६. **सक्थ्ना**। सक्थि + टा। **अक्ष्णा**। अक्षि + टा। **अत्यस्थ्ना**। अत्यस्थि + टा। **अतिदध्ना**। अतिदधि + टा। प्रकृत सूत्र से अन्त्यावयव इकार को **'अन्'** आदेश तथा 'अन्' के अकार का लोप।

**[विशेष]**

व्याख्याकारों ने कहा है कि 'अन्' आदेश की जगह 'न्' आदेश करना ही उचित था। इससे न्-रूप एकवर्णविधि होने के कारण **'एकवर्णविधिरन्ते प्रवर्तते, अनेकवर्णविधिः सर्वस्य'** (कात० प० पा० ६) अन्तिम वर्ण के ही स्थान में प्रवृत्त

होती और लाघव भी होता। इसका समाधान यह है कि **"ईङ्योर्वा"** (२।२।५४) सूत्र से 'ङि' प्रत्यय में वैकल्पिक अकारलोप होकर 'अस्थ्नि- अस्थनि' आदि दो-दो रूप सिद्ध हों, अतः 'अन्' आदेश किया गया है। अन्यथा 'अस्थ्नि, दध्नि' आदि एक ही रूप निष्पन्न होता ॥१६९।

## १७०. भाषितपुंस्कं पुंवद् वा [२।२।१४]

### [सूत्रार्थ]

भाषितपुंस्क तथा नाम्यन्त नपुंसकलिङ्गवाले शब्दों का टा-आदि प्रत्ययस्थ स्वर वर्ण के परे रहने पर विकल्प से पुंवद्भाव होता है ॥१७०।

### [दु० वृ०]

भाषितपुंस्कं नाम्यन्तं नपुंसकलिङ्गं टादौ स्वरे पुंवद् भवति वा। कर्त्रा, कर्तृणा कुलेन। मृदवे, मृदुने वस्त्राय। भाषितपुंस्कमिति किम् ? वारिणे। नाम्यन्तमिति किम् ? सोमपेन कुलेन। नपुंसकमिति किम् ? कल्याण्यै। भाषितपुंस्कोऽर्थ इति किम् ? पीलुने फलाय ॥१७०।

### [दु० टी०]

**भाषित०**। इदुदन्तस्य तृतीयैकवचनं नोदाहृतं नादेशे न्वागमे चाविशेषात् 'वारिणः' इति सर्वकालं नपुंसकवृत्तित्वादस्येति न पुंवद्भावः। सोमपेनेति यदि पुंवद्भावः स्यात् तदा **"आधातोरघुट्स्वरे"** (२।२।५५) इत्याकारलोपेऽनिष्टरूपं स्यात्। 'सोमं पिबति' इति विच्। नपुंसके त्वन्तरङ्गत्वाद् ह्रस्वत्वे सति इनादेशः। कल्याण्यै इति। यद्यत्र पुंवद्भावः स्यात् तदाकारान्तत्वात् **"ङेर्यैः"** (२।१।२४) स्यात्। टादाविति किम् ? ग्रामणिनी कुले। नपुंसकत्वाद् ह्रस्वे औकारस्य चेकार इति।

स्वर इति किम् ? अतिनुभ्याम्। यदि पुंवद्भावः स्यात् तदा औकारस्य स्थितिः स्यात्। यथा 'अतिनावा, अतिनुना' इति। भाषितपुंस्कं नाम्यन्तमिति चाधिकृतस्य नपुंसकस्य विशेषणं भाषितपुंस्कस्य नपुंसकस्यान्यार्थवृत्तेर्बहुव्रीहिः। भाषितः पुमान् येन नपुंसकलिङ्गेन तद् **भाषितपुंस्कं** पुंशब्दादेकार्थान्नित्यं कप्रत्ययो बहुलत्वात्,

तर्हि 'पीलुर्वृक्षः, पीलु फलम्, पीलुने फलाय' इत्यत्र पुंवद्भावः स्यात् । पीलुशब्दश्चायं पुंसि **वृक्षे** वर्तित्वा यदि पीलोः फले विकारे वर्तते तदा नपुंसके फले वर्तते इति भवति हि भाषितपुंस्कम् । विकारेऽणपि न भवत्यभिधानात्, ततः समानायामाकृताविति न वक्तव्यम् । आक्रियेते जन्येते बुद्धिशब्दावनयेत्या**कृतिः।** शब्दस्य प्रवृत्तिकारणमिहाकृतिरभिप्रेता न सन्निवेशो न जातिमात्रम् । तदेवं तुल्ये प्रवृत्तिनिमित्ते भाषितपुंस्कं नपुंसकं वा पुंवद् भवति ।

तथाहि कर्तृशब्दस्य पुंसि नपुंसके च वर्तमानस्य करणक्रियानिवर्तनं प्रति कर्तृत्वं समानाकृति प्रवृत्तिनिमित्तं तथा मृदुशब्दस्य मृदुत्वं गुणः, पीलु-शब्दस्य तु पुंसि वृक्षजातिः प्रवृत्तिनिमित्तं नपुंसके च फलजातिरिति समानायामाकृतौ भाषितपुंस्कं पीलुशब्द इति तदेतन्न वक्तव्यम् । शब्दोऽत्र नाश्रीयतेऽन्यपदार्थत्वेन किन्तर्हि अर्थ इति भाषितः पुमान् यस्मिन्नर्थे स **भाषितपुंस्कोऽर्थ** इति प्रत्यासत्तेरेव । यदि येन केनचिच्छब्देन भाषितपुंस्क इहाश्रीयते, तदा व्यावृत्तेरभावाद् भाषितपुंस्कग्रहणम् अनर्थकमेव स्यात्, तस्माद् **यस्मिन् प्रवृत्तिनिमित्ते यत्र पुमान् भाषितः स एव भाषितपुंस्क** इति ।

ननु शब्दस्येह प्रवृत्तिनिमित्तकृतोऽर्थोऽन्यपदार्थत्वेनाश्रितो न तु नपुंसकम् । नैष दोषः । एतत्समवायलक्षणेन संबन्धेन संबन्धान्नपुंसकमपि भाषितपुंस्कमुच्यते । भवति हि तद्योगात्ताच्छाब्द्यम् । यथा **'यष्टीः प्रवेशय' । यष्टिहस्ताः पुरुषा यष्टय उच्यन्ते ।** तथा भाषितपुंस्कनपुंसकाभिधायि शब्दरूपमपि भाषितपुंस्कमित्युच्यते वाच्यवाचकलक्षणसंबन्धात् । तत्र यद्यपि सूत्रेऽर्थो भाषितपुंस्कशब्देनोक्तस्तथाप्यर्थे कार्यासंभवाद् यथोक्तप्रकारेण भाषितपुंस्को यः शब्दः स पुमर्थो भवतीत्यर्थः । किं पुनस्तत् कार्यं यत् पुंलिङ्गस्य नपुंसकस्य वा भवतीति न्वागमाभावो ह्रस्वाभावश्च । तेन ह्रस्वाश्रयाणि न कार्याणि । **'टा ना'** (२।१।५३) । ग्रामण्या कुलेन । ङे एत्वम् - ग्रामण्यै कुलाय । ङसिङसोरलोपश्च - ग्रामण्यः कुलात् कुलस्य वा । आमि च नुः - ग्रामण्यां कुलानाम् । ङिरौ सपूर्वः - ग्रामण्यां कुले इति । ग्रामनयनं प्रति कर्तृत्वाद् भाषितपुंस्कता । न च वक्तव्यम्- परत्वान्न्वागमादीन् यत्वं बाधते । यस्मादन्तरङ्गो ह्रस्वो यत्वमेव बाधते । पुमानिव पुंवदिति वतिप्रत्यये पुंसोऽन्-शब्दलोपसंयोगान्तलोपाविति ॥१७०।

[वि० प०]

**भाषितपुं०** । सोमपेनेति । सोमं पिबतीति **"आतो मनू"** (४।३।६६) इत्यादिना विच् । यद्यत्र पुंवद्भावः स्यात् तदा नपुंसकलक्षणे ह्रस्वनिवृत्तौ **"आ धातोरघुट्स्वरे"** (२।२।५५) इत्याकारलोपः स्यात् । नपुंसके पुनरन्तरङ्गत्वात् **"स्वरो ह्रस्वो नपुंसके"** (२।४।५२) इति ह्रस्वे सति नादेश एव । कल्याण्या इति । यदि पुंवद्भावः स्यात् तदा ईकारनिवृत्तावकारान्तत्वात् **"ङेर्यः"** (२।१।२४) स्यात् । नात्र भाषितः पुमान् येन शब्देन तद् **भाषितपुंस्कमिति** शब्दोऽन्यपदार्थत्वेनाश्रीयते, किन्तर्हि अर्थ इत्याह- **भाषितपुंस्कमिति** । भाषितः पुमान् यस्मिन्नर्थे इति विग्रहे पुंशब्दादेकार्थान्नित्यं कप्रत्ययस्तत्र बहुलार्थत्वादिति ।

केन पुनः शब्देनात्र पुमान् भाषितः इति चेत्, यस्य पुंवद्भावो विधातुमिष्यते, तेनैव तस्यैव प्रत्यासन्नत्वात् । यदि पुनर्येन केनचिच्छब्देन भाषितपुंस्कत्वमिहाश्रीयते तदा भाषितपुंस्कग्रहणमनर्थकमेव स्यात् । अर्थशब्देनाप्यविधीयमानत्वात् सर्वस्यैवार्थस्य भाषितपुंस्कतया व्यावृत्तेरयोगात् । यदि पुनरिह बहुव्रीहिणा शब्द उक्तः स्यात् तदा पीलुशब्दस्यापि पुंवद्भावः स्यात् । तथा ह्ययं वृक्षे पुंसि वर्तित्वा यदा **लोकोपचारात्** फले नपुंसके वर्तते तदा भवति भाषितपुंस्क इति ।

अर्थे तु समाश्रीयमाणे नैष दोषः । **यतः प्रत्यासत्त्या एकस्मिन्नेव प्रवृत्तिनिमित्तेऽर्थे यत्र पुमान् भाषितः स एव भाषितपुंस्कोऽर्थः ।** यथा कर्तृशब्दः पुंसि, नपुंसके, स्त्रियां च वर्तमानः करणक्रियानिमित्तमेकमुपादाय वर्तते, तथा मृदुशब्दश्च मृदुत्वमिति । तेन करणक्रियालक्षणो मृदुलक्षणश्चार्थो भवति भाषितपुंस्क इति । इह तु पुंसि वर्तमानस्य पीलुशब्दस्य वृक्षत्वं प्रवृत्तिनिमित्तं नपुंसके च फलत्वमिति । न फलत्वलक्षणोऽर्थो भाषितपुंस्क इति । अत एव समानायामाकृताविति न वक्तव्यम्, अस्यार्थस्य सामर्थ्यलब्धत्वात् ।

तथाहि आक्रियेते जन्येते अनया बुद्धिशब्दावित्य**।कृतिः** । शब्दस्य प्रवृत्तिनिमित्तमर्थ एवोच्यते । ननु यदि शब्दस्य प्रवृत्तिहेतुरर्थो मृदुत्वादिलक्षणो भाषितपुंस्कशब्देनोक्तः किन्तर्हि नपुंसकलिङ्गं भाषितपुंस्कमिति तस्यार्थधर्मान्तरत्वेन प्रवृत्तिहेतुत्वानुपपत्तेः ? सत्यमेतत् । किन्तु समवायलक्षणसंबन्धेन संबन्धित्वा**न्नपुंसकमपि भाषितपुंस्क**मुच्यते । भवति हि तत्सम्बन्धात् तद्व्यपदेशः । यथा दण्डयोगाद् दण्डः पुरुष इति । तथार्थे

कार्यस्यासंभवात् तद्वाचिनि शब्दे कार्यसंप्रत्यय इति भाषितपुंस्कं नपुंसकाभिधायि शब्दरूपमपि भाषितपुंस्कमुच्यते, तत्रापि वाच्यवाचकलक्षणसंबन्धस्य विद्यमानत्वात्। अतो यद्यपि सूत्रे भाषितपुंस्कशब्देनार्थो निर्दिष्टस्तथापि शब्द एव पुंवत्कार्यं लभ्यते, नार्थस्तत्र तस्यासंभवात्। भाषितपुंस्को नपुंसकलिङ्गो यः शब्दः स पुंलिङ्गकार्यभाग् भवतीत्यर्थः। **तत् पुनः** पुंलिङ्गकार्यं न्वागमाभावो ह्रस्वाभावश्च नपुंसकस्य भवतीति ॥१७०।

**[क० च०]**

भाषित०। पुमानिव **पुंवत्, स्त्रीति लोकतः सिद्धमिति** न्यायात् स्त्रीलिङ्ग एव पुंवद्भावः प्रतीयते। अत एव वृत्तौ कल्याण्या इति प्रत्युदाहृतम्। नपुंसकग्रहणे तु विवाद एव नास्तीति। ननु कथं प्रत्युदाहृतं **वृत्तौ** कल्याण्या इति द्व्यङ्गविकलत्वात्। तथाहि भाषितपुंस्कस्य कल्याणशब्दस्य यथा नपुंसकवृत्तिता नास्ति तथा नाम्यन्ततापि नास्ति, तस्या एव प्रकृतेरुपयुक्तत्वात्। नाम्यन्तकल्याणीशब्दस्य स्त्रीविषयत्वेन भाषितपुंस्कताया अभावात्, सत्यम्। कल्याणीसमुदायावयवस्य कल्याणशब्दस्य भाषितपुंस्कत्वाद् अवयविनोऽपि **कल्याणीशब्दस्य भाषितपुंस्कत्वमुच्यते, उपचारात्।** अन्यथा यद्येवं व्याख्यानं न स्यात् तदा पुंवद्भाषित इत्यत्र पूरण्यादिवर्जनमनर्थकं स्यात्।'पञ्चमीभार्यः' इत्यादिषु स्त्रीकारान्तस्य भाषितपुंस्कत्वाभावादिति **केचित्**।तन्न। अन्यथोपपत्तावुपचाराश्रयणस्यानौचित्यात्। तथाहि पुंवत्कार्यं भाषितपुंस्कशब्दस्य विधीयते। तस्मिंश्च सति अर्थात् स्त्रीप्रत्ययादिकं निवर्तते इति। ननु तथापि प्रकृतेर्द्व्यङ्गविकलता केन निवारिता ? उच्यते – न हीह **"नामिनः स्वरे"**(२।२।१२) इत्यतो नामिन इति प्रथमान्ततयानुवर्तते। किन्तु **"अस्थिदधि०"** (२।२।१३) इत्यत्र दृष्टेन षष्ठ्यन्तेनार्थस्य संभवात् ततश्च नामिसंबन्धे भाषितपुंस्कमित्यर्थे सति प्रकृते प्रत्युदाहरणे सति सुतरां भाषितपुंस्कार्थकल्याणशब्देनपि संबन्धोऽस्त्येव। तर्हि सोमपेनेत्यत्र एकारनामिसंबन्धेनातिप्रसङ्गः स्यादिति। नैवम्। टादावित्यनेन नामिनः इत्यस्यापि संबन्धात् ततष्टादौ वर्तमानो यो नामी तत्संबन्धिभाषितपुंस्कष्टादौ पुंवद् भवतीत्यर्थः। एकारस्तु टादेरेव।

यद् वा नपुंसकाभावपक्षे वृत्तौ नाम्यन्तमपि न व्याख्येयम्। न च ईकारेण टादीनां व्यवधानाद् भाषितपुंस्कस्य कल्याणशब्दस्य तथापि पुंवन्न भवतीति वाच्यम्, **"साऽस्य देवता"** (२।६।७) इति निर्देशात् स्त्रीप्रत्ययेन व्यवधानता नेष्यते इति।

कथम् अन्यथा 'सा' इत्यत्र आप्रत्ययेन व्यवधानात् तस्य सकार इति। एकार्थादिति एकवचनान्तादित्यर्थः। ननु भाषितः पुमान् यस्मिन्नर्थे इत्युक्ते वास्तुत्वं प्रवृत्तिनिमित्तमादाय एकस्मिन् विशेष्यार्थेऽपि भाषितपुंस्कत्वाद् वास्तुशब्दस्यापि पुंवद्भावः कथन्न स्यात्। अथ पुंवद्भावेऽपि किं दूषणं यावता **"वेश्मभूर्वास्तुरस्त्रियाम्"** (अ०को० २।२।१९) इति कोशदर्शनात् 'वास्तुने, वास्तवे' इत्यादि रूपद्वयं स्यात्। नैवम्। 'वास्तुने स्थानाय, वास्तवे स्थानाय' इत्यपि पुंवद्भावे प्रयोगः स्यात्। अत एव परेणापि समानायामाकृताविति सूत्रमुच्यते।

**अयमभिप्रायः।** आकृतिः शब्दस्य प्रवृत्तिनिमित्तं तदेव यत्र समानं तत्रैव भवति। न तु यत्र विशेष्योऽर्थः समानस्तत्रेति, सत्यम्। भाषित इति अतीतकाले क्तप्रत्ययस्य विधानाद् भिन्न एव विशेष्ये पुंवद्भावः संभवतीति वास्तुशब्दे एकविशेष्ये तु अधुनापि पुमान् भाषित इति पुंवद्भावो न भवतीति **कुलचन्द्रः।** एतत् सर्वम् अनुचितमिति **महान्तः।** समानायामाकृताविति न कृतं सूत्रम्। किन्तु तात्पर्यपरिप्राप्तमर्थकथनं **काशिकायामुक्तम्,** ततश्च वास्तुशब्दे पुंवद्भावो भवत्येव, तेन 'वास्तुने, वास्तवे स्थानाय' इत्यपि प्रयोगः केन वार्यताम् इति। ह्रस्वाभावश्चेति। ननु न्वागमस्य प्रकृतत्वात् तदभावोऽतिदिश्यताम्। ननु ह्रस्वाभावोऽप्रकृतत्वात् किं च टाद्युत्पत्तेः प्रागेव प्रवृत्तो ह्रस्वः कथं पुंवद्भावेन निवर्तयितुं शक्यते, भिन्नकालीनत्वेन बाध्यबाधकत्वाभावात्? सत्यम्। टादाविति विषयसप्तमीति **कुलचन्द्रः। वस्तुतस्तु** 'भाषितपुंस्कान्नुर्वा' इति सिद्धे पुंवद्ग्रहणं ह्रस्वाभावार्थमिति ॥१७०।

**[समीक्षा]**

'कर्त्री- कर्तृणा कुलेन, मृदवे- मृदुने वस्त्राय' इत्यादि प्रयोगों में कातन्त्रकार और पाणिनि दोनों ही विकल्प से पुंवद्भाव करते हैं। अन्तर यह है कि कातन्त्रकार ने किसी पूर्वाचार्य का स्मरण किए विना ही 'वा' पद सूत्र में पढ़कर आदेश का वैकल्पिक विधान किया है, परन्तु पाणिनि 'गालव' आचार्य (**तृतीयादिषु भाषितपुंस्कं पुंवद् गालवस्य**– अ० ७।१।७४) के मतानुसार पुंवद्भाव का निर्देश करते हैं।

वस्तुतः 'गालव' आचार्य से पूर्व भी वैकल्पिक पुंवद्भाव की प्रवृत्ति होने के कारण उनके नाम का उल्लेख पूजार्थ किया गया है। यहाँ यह कहना तो अधिक संगत हो सकता है कि गालव आचार्य या उनके शिष्यगण पुंवद्भाववाले शब्दरूप

का अधिक प्रयोग करते रहे हों। इस प्रकार आचार्य के नाम का उल्लेख पुंवद्भाव-रूपविधि का ज्ञापक नहीं हो सकता है और इसीलिए विधिनिर्देश कातन्त्रकार का अधिक संगत है।

**[रूपसिद्धि]**

१. **कर्त्रा, कर्तृणा कुलेन।** (नपुंसकलिङ्ग) कर्तृ + टा। प्रकृत सूत्र से वैकल्पिक पुंवद्भाव तथा "**रम् ऋवर्णः**" (१।२।१०) से ऋ को 'र्' आदेश। पुंवद्भाव के अभाव में "**नामिनः स्वरे**" (२।२।१२) से 'नु' आगम एवं "**रषृवर्णेभ्यो नो णमनन्त्यः स्वरहयवकवर्गपवर्गान्तरोऽपि**" (२।४।४८) से नकार को णकारादेश।

२. **मृदवे, मृदुने वस्त्राय।** (नपुंसकलिङ्ग) मृदु + ङे। प्रकृत सूत्र से वैकल्पिक पुंवद्भाव, "**ङे**" (२।१।५७) से उकार को ओकार तथा "**ओ अव्**" (१।२।१४) से 'ओ' को 'अव्' आदेश। पुंवद्भाव न होने पर "**नामिनः स्वरे**" (२।२।१२) से 'नु' आगम ॥१७०।

## १७१. दीर्घमामि सनौ [२।२।१५]

**[सूत्रार्थ]**

नाम्यन्त लिङ्ग को नु-आगमसहित आम्-प्रत्यय के पर में रहने पर दीर्घ आदेश होता है॥१७१।

**[दु० वृ०]**

नाम्यन्तं लिङ्गं सनावामि परे दीर्घमापद्यते। **अग्नीनाम्, धेनूनाम्, कर्तृणाम्।** सनौ ग्रहणमुत्तरार्थम् इह कृते च न्वागमे दीर्घार्थं च ॥१७१।

**[दु० टी०]**

**दीर्घ०।** 'वा' न वर्तते 'नृ वा' इति वचनात्। नपुंसकमपि न वर्तते, सहग्रहणात्। सह नुना वर्तते इति **सनुः। सहशब्दो व्याप्त्यवधारणार्थः।** अन्यथा नामीति विदध्यात्, सनाविति गम्यते। अथ तिसृचतस्रोर्दीर्घप्रतिषेधादवसीयते, नैवम्। 'प्रियतिसृणां कुलानाम्' इति प्रतिषेधस्य चरितार्थत्वात्। तत्र वन्सीनामिति प्रतिषेधान्न वर्तते चेद् ज्ञापकं कष्टमिति सहग्रहणम्। तर्हि नामीत्यनुवर्तमानमनामिव्यावर्तकमिति वृक्षाणामिति न

सिध्यति । नैवम् । घोषवद्ग्रहणसामर्थ्याद् अन्यथा तत्र भ्योरिति विदध्यात् । तर्हि नाम्यनुवर्तनेन किं चेत् स्वरूपमेतत् । सनौग्रहणमित्यादि । अन्यथा परत्वात् प्रागेव दीर्घः स्यात् । कृते च दीर्घे नुर्न स्यात् । तत्र ह्रस्वग्रहणसामर्थ्यान्नुरागमश्चेत्, न । वृक्षाणामिति चरितार्थत्वात् । न च **'आगमादेशयोरागमविधिर्बलवान्'** (कात० प० ४०) इति, **'पूर्वपरयोः परविधिर्बलवान्'** (कलाप०, पृ० २२१, क्रम० ५०) इति बलाबलं बाधते । अत आह –

**आमि दीर्घं सनौ चेत् स्यात् कृते दीर्घे न नुर्भवेत् ।**

**वचनाद् यत्र तन्नास्ति नोपधायाश्च बर्मणाम् ॥** इति ॥१७१ ।

**[वि० प०]**

**दीर्घम्०** । सह नुना वर्तते इति **सनुः,** सहस्य सभावो ज्ञापित एव । सहग्रहणं किमर्थम्, नामीत्युक्तेऽपि सनाविति गम्यत एव । नकारयुक्त आमि नामीति व्याख्यानेऽन्यस्य नकारस्याभावात् ? सत्यम् । व्याप्त्यर्थं सहग्रहणम्, यावान् सह नुना वर्तते तावत्यामीति । तेन नपुंसकमिह न संबध्यते, अतः पुंस्त्रियोरपि दर्शयति– अग्नीनाम्, धेनूनामिति । तथाप्यनर्थकं सहग्रहणं **"न नामि दीर्घम्"** (२।३।२७) इति तिसृचतस्रोर्दीर्घ-प्रतिषेधादनुमीयते । नपुंसकस्य निवृत्तिरिति चेत्, नैवम् । 'प्रियंतिसृणां कुलानाम्' इति नपुंसके तस्य प्रतिषेधस्य चरितार्थत्वात् । एवमपि **"अनडुन्नहिवन्तीनाम्"** (२।३।४४) इति दीर्घनिर्देशान्नपुंसकनिवृत्तिरवसीयते इति चेत् तर्हि **प्रतिपत्तिगौरवनिरासार्थमेव सहग्रहणमिति ।** वाशब्दोऽप्यत्र न वर्तते **"नृ वा"** (२।३।२८) इति विकल्पविधानात् ।

अथ किमर्थं सनौग्रहणम् **"दीर्घमामि"** इत्युच्यताम् **'आगमादेशयोरागम-विधिर्बलवान्'** (कात० प० ४०) इति न्वागमे कृते अर्थात् सनाविति गम्यते । न च व्यवधानताऽस्ति **"तृतीयादौ तु परादिः"** (२।१।७) इति वचनाद् इत्याह - सनौग्रहण-मित्यादि । तेनोत्तरसूत्रे 'वर्मणाम्' इत्यत्र सनुत्वाभावे सति **"नान्तस्य चोपधायाः"** (२।२।१६) इति दीर्घो न भवति । यद्येवमिह किमर्थमित्याह – कृते चेति । **अयमभिप्रायः-** नित्यत्वात् परत्वाच्च प्रागेव दीर्घः स्यात् ततश्च कृते दीर्घे ह्रस्वाभावान्न नुर्भवेत् । तत्र ह्रस्ववचनान्नुरागमश्चेत्, तदयुक्तम् । यत्र नाम्यन्तत्वं नास्ति तत्र चरितार्थं ह्रस्ववचनम् । वृक्षाणाम् इति । अत्र नित्यत्वात् परत्वाच्च प्राप्तं दीर्घं कथं नुर्बाधेत । तस्मादिहापि कृते न्वागमे दीर्घार्थं सनौग्रहणम् । तथा चोक्तम् –

**आमि दीर्घ सनौ चेत् स्यात् कृते दीर्घे न नुर्भवेत्।**
**वचनाद् यत्र तन्नास्ति नोपधायाश्च वर्मणाम्॥** इति।

**[क० च०]**

**दीर्घ०**। **"नृ वा"** (२।३।२८) इति विकल्पविधानादिति। **अयमभिप्रायः**– यद्यत्र विकल्पोऽनुवर्तते, तदाऽनेनैव 'नृणाम्, नृणाम्' इति रूपद्वयं सिध्यति। किं पुनर्विकल्पविधानेन **"नृ वा"** इत्यनेन। ननु कथमिदमुच्यते यतः **'सिद्धे सत्यारम्भो विधिर्नियमाय'** (कात० प० ५९) इति न्यायात्। अनेनैव विकल्पे सिद्धे यत् पुनः **"नृ वा"** (२।३।२८) इति विकल्पविधानं तद् ऋदन्तानां मध्ये नृ-शब्दस्यैव दीर्घो भवति, नान्येषामिति नियमः कथन्न स्यात्, तिसृचतस्रोस्तु नित्यं दीर्घे प्राप्ते **"न नामि दीर्घम्"** (२।३।२७) इति वचनं संगच्छते? सत्यम्। विकल्पानुवृत्तौ **"नृ वा"** (२।३।२८) इति नियमस्तदननुवृत्तौ विधिरतो **'विधिनियमसम्भवे विधिरेव ज्यायान्'** (कात० प० पा० ८४) इति न्यायान्न नियमः।

तथाहि वाग्रहणस्यानुवृत्तौ **"नृ वा"**(२।३।२८) इति नियमः स्यात्, अननुवृत्तौ विधिरेवेत्यननुवृत्तिरेव कल्पनीयेति **प्राञ्चः**, व्याप्तिन्यायाद् वा। **सागरस्तु**– यदि नियमेनान्यत्र दीर्घाभावः साध्यते, तर्हि **"न नामि दीर्घम्"** (२।३।२७) इति प्रतिषेधोऽनर्थकः स्यात्, प्राप्तेरभावात्। ननु तथापि नृशब्दस्य पुंलिङ्गत्वात् पुंलिङ्गानाम् ऋदन्तानां मध्ये नृशब्दस्यैव इति नियमः स्यात्। **"न नामि दीर्घम्"** (२।३।२७) इत्यस्य तु स्त्रीनपुंसकयोश्चरितार्थत्वाच्चेदुच्यते, संनियोगशिष्टेति न्यायान्नपुंसकाधिकाराभावे वाशब्दो वर्तते इति भावः। न च नाम्यन्तमिति कथं वर्तते इति वाच्यम्, अकारान्तस्य **"अकारो दीर्घं घोषवति"** (२।१।१४) इत्यनेन सिद्धत्वान्नाम्यन्तस्य परिशिष्टत्वान्नाधिकारवशादिति शेषः। **पञ्जीकृता** तु **"नृ वा"** (२।३।२८) इत्यादि यदुक्तं तत् प्रथमकक्षायाम्। दीर्घं नामीति। नच टादौ दीर्घे आमि न स्याद् इति वाच्यं वाक्यद्वयेन गौरवापत्तेः। नित्यत्वादिति। न च यथा दीर्घस्य नित्यत्वं तथा विहितविशेषणपक्षे न्वागमस्यापि नित्यत्वमित्याशङ्क्याह– परत्वादिति। कथं दीर्घस्य परत्वं सर्वत्रामि च नोर्विषयत्वेन तस्यावकाशाद् इत्याह– नित्यत्वादिति व्यस्तेनान्वयः। **व्याघ्रभूति**मतमवलम्ब्य द्वयोरेकत्र सावकाशत्वमिति **केचित्**, सूत्रपरत्वादित्**यपरे**। वृक्षाणाम् इत्यस्यैव तस्य विषये सावकाशत्वम्। वारीणाम् इति। अत्र **"नामिनः स्वरे"**

(२।२।१२) इत्यस्य विषयत्वे **"आमि च नुः"** (२।१।७२) इत्यस्याविषयत्वे दीर्घस्यावकाश इति **हेमकरस्याशयः**। उक्तव्याख्यानमुपसंहरति – तथा चोक्तमिति ॥१७१।

**[समीक्षा]**

'अग्नि + आम् , धेनु + आम्' इस अवस्था में 'नु' आगम (पाणिनि - नुडागम = **"ह्रस्वनद्यापो नुट्"** अ०७।१।५४) के अनन्तर कातन्त्रकार नाम्यन्त लिङ्ग को दीर्घ करते हैं, परन्तु पाणिनि के निर्देशानुसार अङ्ग को दीर्घ होता है। अतः कार्य की दृष्टि से किसी में भी गौरव-लाघव प्रतीत नहीं होता। पाणिनि का दीर्घविधायक सूत्र है – **"नामि"** (अ० ६।४।३)।

**[रूपसिद्धि]**

१. **अग्नीनाम्**। अग्नि + आम्। **"आमि च नुः"** (२।१।७२) से 'नु' आगम, "तृतीयादौ तु परादिः" (२।१।७) के निर्देशानुसार 'आम्' प्रत्यय से पूर्व उसकी प्रवृत्ति तथा प्रकृत सूत्र से इकार को दीर्घ आदेश।

२. **धेनूनाम्**। धेनु + आम्। पूर्ववत् 'नु' आगम, उसकी आम् - प्रत्यय से पूर्व प्रवृत्ति एवं उकार को दीर्घ आदेश।

३. **कर्तॄणाम्**। कर्तृ + आम्। पूर्ववत् 'नु' आगम, उसकी आम्- प्रत्यय से पूर्व प्रवृत्ति एवं ऋकार को दीर्घ आदेश ॥१७१।

## १७२. नान्तस्य चोपधायाः [२।२।१६]

**[सूत्रार्थ]**

नु-आगमसहित आम् – प्रत्यय के परे रहते नकारान्त लिङ्ग = **प्रातिपदिक** की उपधा को दीर्घ आदेश होता है ॥१७२।

**[दु० वृ०]**

नान्तस्य लिङ्गस्योपधाया दीर्घो भवति सनावामि परे। पञ्चानाम्, सप्तानाम्। सनाविति किम्? वर्म्मणाम् ॥१७२।

**[दु० टी०]**

**नान्त०**। नान्तस्येति किम्? चतुर्णाम्, षण्णाम्। तदन्तविधिना सिद्धेऽन्त-ग्रहणमुत्तरार्थं क्रियमाणमिहापि सुखप्रतिपत्त्यर्थम्। अन्यथा **"नस्योपधादीर्घः"** इति

विप्रतिपद्येत । चकार उक्तसमुच्चयमात्रे । दीर्घादयः स्वरस्यैव स्थानेऽविशेषाल्लोकतः सिद्धा इत्यन्वर्थत्वान्नान्तस्यावयवो ह्रस्वः स्थानी भविष्यति, एकेन वर्णेन व्यवधानमाश्रीयते न त्वनेकेनेति न्यायाद् एकवर्णव्यवहित एव किमुपधाग्रहणेन ? सत्यम् । **प्रतिपत्तिरियं गरीयसीति** ।।१७२।

[वि० प०]

**नान्तस्य०** । पञ्चानाम्, सप्तानाम् इति । "**सङ्ख्यायाः ष्णान्तायाः**" (२।१।७५) इति न्वागमः । प्रकृतिनकारस्य लिङ्गान्तनकारस्येति लोपः ।।१७२।

[क० च०]

**नान्तस्य०** । नस्यान्तो नान्तस्तस्योपधा अर्थान्नकारस्य तस्य दीर्घ इति नाशङ्क्यते "**कादीनि**" (१।१।९) इति निर्देशादिति भावः ।।१७२।

[समीक्षा]

'पञ्चन् + आम्, सप्तन् + आम्' इस स्थिति में कातन्त्रकार और पाणिनि दोनों ही उपधा 'अकार' को दीर्घ करके 'पञ्चानाम्, सप्तानाम्' शब्दरूप सिद्ध करते हैं । पाणिनि का दीर्घविधायक सूत्र है – "**नोपधायाः**" (अ० ६।४।७) । अतः उभयत्र साम्य ही है ।

[रूपसिद्धि]

१. **पञ्चानाम्** । पञ्चन् + आम् । "**सङ्ख्यायाः ष्णान्तायाः**" (२।१।७५) से 'नु' आगम, प्रकृत सूत्र से दीर्घ तथा "**लिङ्गान्तनकारस्य**" (२।३।५६) से नकार का लोप ।

२. **सप्तानाम्** । सप्तन् + आम् । पूर्ववत् 'नु' आगम, दीर्घ तथा नकार का लोप ।।१७२।

## १७३. घुटि चासंबुद्धौ [२।२।१७]

[सूत्रार्थ]

संबुद्धिभिन्न घुट्संज्ञक अर्थात् 'सि, औ, जस्, अम्, औ तथा शि' (जस्-शस्) प्रत्ययों के परवर्ती होने पर नकारान्त लिङ्ग = प्रातिपदिक की उपधा को दीर्घ आदेश होता है ।।१७३।

[दु० वृ०]

नान्तस्य लिङ्गस्योपधाया दीर्घो भवति घुट्यसंबुद्धौ । राजा, राजानौ, सामानि । नान्तस्येति किम् ? जनम्, जनौ । असंबुद्धाविति किम् ? हे राजन् ! ।।१७३।

[दु० टी०]

**घुटि०** । नान्तस्येत्यादि । अकारेऽकारस्य लोपे, औकारे औत्वे च सति **'परनिमित्तादेशः पूर्वस्मिन् स एव'** (कात० प० ४४) इति न्यायान्नान्तत्वमस्त्येवेति दीर्घः प्राप्नोति । न च 'दीर्घविधिं प्रति स्वरादेशः स्थानिवद् भवति' इत्यन्तग्रहणे सति न एव अन्तो यस्य स नान्त इति तदेव लिङ्गं नान्तम्, कुतो 'जनम्, जनौ' इति दीर्घप्रसङ्गः । सखेति नान्त एवायमेकयोगेनापि सिध्यति चकारेण 'सनौ' इत्यनुकृष्यते, **भिन्नयोगस्तु सुखप्रतिपत्त्यर्थ एव ।।१७३।**

[वि० प०]

**घुटि०** । जनम्, जनाविति । ननु चाकारेऽकारस्य लोपे औकारे औत्वे च सति नान्तत्वमस्त्येव, ततश्च **'परनिमित्तादेशः पूर्वस्मिन् स एव'** (कलाप०, पृ० २२१, क्रम० ४७) इति न्यायाद् घुट्त्वस्य विद्यमानत्वात् कथमिह दीर्घो न भवतीति ? सत्यम्, **'येन विधिस्तदन्तस्य'** (कात० प० ३ ) इति सिद्धे यदन्तग्रहणं पूर्वसूत्रे तदिहार्थमिति वक्तव्यम् । तेन न एवान्तो यस्य तदेव नान्तं लिङ्गम्, कुतोऽत्र प्रसङ्गो जनशब्दस्याकारान्तत्वात् । तर्हि अकारस्य स्थानिवद्भावादेव नान्तत्वाभावे दीर्घो न भविष्यति, किमन्तग्रहणेनेति, नैवम् । **"न पदान्त०"** (कलाप०, पृ०२२६, क्रम०११) इत्यादिना दीर्घविधिं प्रति स्थानिवद्भावस्य प्रतिषेधात् स्यादेव दीर्घः । यद्येवं सखेति न सिध्यति ? सत्यम् । यदा नकारस्तदा नान्त इति नकार एवान्तो यस्येति दीर्घो न विहन्यते ।।१७३।

[क० च०]

**घुटि०** । नान्तस्येति किमिति **वृत्तिः** । नस्येत्युच्यतां किमन्तग्रहणेनेति भावः । सखेत्युपलक्षणमिदं पन्थानमित्याद्यपि बोध्यम् । न एवेति अन्त एव नकारो यस्येति योजना अन्तग्रहणे चान्तमात्रस्य नियमात् ।।१७३।

[समीक्षा]

'राजन् + सु-औ, सामन् + जस्-शस्' इस अवस्था में कातन्त्रकार तथा पाणिनि दोनों ने ही उपधादीर्घ करके 'राजा, राजानौ, सामानि' शब्दरूप सिद्ध किए हैं । अतः

उभयत्र साम्य ही हे। पाणिनि का उपधादीर्घविधायक सूत्र है– "**सर्वनामस्थाने चासंबुद्धौ**" (अ० ६।४।८)।

## [रूपसिद्धि]

१. **राजा**। राजन्+सि। प्रकृत सूत्र से न् की उपधा को दीर्घ, "**व्यञ्जनाच्च**" (२।१।४९) से सि-प्रत्यय का लोप तथा "**लिङ्गान्तनकारस्य**" (२।३।५६) से नकार का लोप।

२. **राजानौ**। राजन्+औ। प्रकृत सूत्र से नान्त उपधा को दीर्घ आदेश।

३. **सामानि**। सामन्+जस्-शस्। "**जस्शसोः शिः**" (२।२।१०) से 'शि' आदेश, "**जस्शसौ नपुंसके**" (२।१।४) से 'शि' की 'घुट्' संज्ञा तथा प्रकृत सूत्र से दीर्घ आदेश ॥१७३।

# १७४. सान्तमहतोर्नोपधायाः [२।२।१८]

## [सूत्रार्थ]

संबुद्धिभिन्न घुट्संज्ञक प्रत्ययों केपरे रहने पर सकारान्त शब्दों में तथा 'महन्त्' शब्द में न् की उपधा को दीर्घ आदेश होता है ॥१७४।

## [दु० वृ०]

'सान्त-महन्त्' इत्येतयोर्नकारस्योपधाया दीर्घो भवति घुट्यसंबुद्धौ। **श्रेयान्, श्रेयांसौ। महान्, महान्तौ।** असंबुद्धाविति किम् ?हे श्रेयन्, हे महन्। सान्तस्येति किम् ? हंसम्, हंसौ। महतः साहचर्याद् धातोर्न स्यात्– सुहिन्, सुहिंसौ ॥१७४।

## [दु० टी०]

**सान्त०**। श्रेयानिति प्रशस्यस्य श्रः, ईयन्सुश्च निपात्यते। संयोगान्तस्यालुप्तवद्भावाल्लोपेऽपि दीर्घो भवति। सान्तमहतोरिति किम् ? उदश्विन्ति। नोपधाया इति किम् ? सुमनसौ। ननु सान्तमहतोर्नस्योपधाया इत्युच्यमाने नकारः पुनरनियत एव कथमिह दीर्घो न भवति ? नैवम्। नश्चासावुपधा चेति विगृह्य अधिकृतेनोपधाग्रहणेन संबन्धो नोपधाया उपधाया इति। यदि पुनः '**अन्त्याभावेऽन्त्यसदेशस्य**' (कात० प० ३९) ग्रहणमुच्यते, तदा पुनरुपधाग्रहणं सुखप्रतिपत्त्यर्थमेव। ननु अन्त्याद् वर्णाद् यः पूर्वः स उपधोच्यते, कथमतिपूर्वस्य उपधात्वमिति चेत्, वचनसामर्थ्यादपेक्षया

गृह्यते । अत्रापि पूर्ववदन्तग्रहणं व्याख्येयमित्याह – सान्तस्येत्यादि । महच्छब्दोऽयमक्विबन्तस्तत्सहचरितोऽक्विबन्तो गृह्यते इत्याह – महतः साहचर्यादिति । सुष्ठु हिनस्तीति क्विप् ।।१७४।

## [वि० प०]

**सान्त०।** नश्चासावुपधा चेति **नोपधा,** न तु नस्योपधा नोपधा इति । तदा नकारस्यानियतत्वात् 'सुमनसौ' इत्यत्रापि दीर्घः स्यात् । कर्मधारये तु नकारस्योपधाभूतस्योपधाया इत्यर्थो भवति ।अधिकृतोपधासंबन्धाद् उपधात्वं पुनर्व्यवहितस्य वचनाद् एकवर्णापेक्षया वेदितव्यम् इति । श्रेयानिति । प्रशस्यते इति **प्रशस्यः "दुहिशंसिभ्यां क्यप्"** इति वचनात् क्यप् । ततस्तमादिदर्शनाद् द्वयोरेकस्य निर्धारणे ईयन्सुप्रत्ययः । तस्मिन् **"प्रशस्यस्य श्रः"** (अ० ५।३।६०) इति चुरादिवचनात् श्रादेशः । यद्यत्र संयोगान्तस्य परत्वाल्लोपः, तदाप्यलुप्तवद्भावाद् दीर्घो भवति । पूर्ववदिहापि अन्तग्रहणं मन्तव्यमित्याह – सान्तस्येत्यादि । महच्छब्दोऽयमक्विबन्तस्तत्साहचर्यात् सान्तस्याप्यक्विबन्तस्य ग्रहणम् इत्याह – महतः साहचर्याद् इत्यादि । सुहिन् इति । **'हिसि हिंसायाम्'** (६।१५), सुष्ठु हिनस्तीति क्विप् ।।१७४।

## [क० च०]

**सान्त०।** नित्यत्वादन्तरङ्गत्वादपवादत्वात् स्वरादेशत्वाद् वा आदौ दीर्घे पश्चात् संयोगान्तलोपे निमित्ताभावाद् दीर्घाभावः कथं न स्यादित्याह - अलुप्तवद्भावादिति । 'समहतोर्नोपधायाः' इति कृते येन विधिरित्यादिन्यायेनान्तत्वे लब्धे यदन्तग्रहणं तदवधारणार्थम्, स एवान्तो यस्येत्याह – पूर्ववद् इति । नन्वत्र नकार एव नास्ति, सानुस्वारत्वादिति चेत्, न ।**"हनिकणिवणिभ्यः सः"** इत्यनेनैव हनेरौणादिकसकारविधानात् नकारोऽस्त्येव, तथाप्यनुस्वारस्य व्यक्तौ प्रवृत्तत्वादनुस्वारपरो नकार इति भाव इति चेत् कथं 'श्रेयांसि' इत्यत्र दीर्घः ? व्यक्तित्वादनुस्वारे प्रवृत्ते नकाराभावात् । तत्र च वाच्यं वचनादनुस्वारविधिं बाधित्वा दीर्घ इति चेत् प्रकृतेऽपि तुल्यम् इति **हेमकरस्याशयः।**

**महच्छब्दोऽयमक्विबन्त** इति । ननु कथमिदमुच्यते – महत्यतीति यिनन्तात् क्विपि कृते **"य्वोर्व्यञ्जनेऽये"** (४।१।३५) इति यलोपे महान् इति पदं **स्यादेव।**

ततो महच्छब्दोऽपि क्विबन्तोऽस्त्येव । सत्यम् । **अयमाशयः** – महच्छब्दोऽयमनामधातु-प्रकृतित्वेऽक्विबन्त इति न दोषः । सान्तस्येति किम् ? हंसम्, हंसाविति **वृत्तिः** । ननु द्व्यङ्गविकलमिदं नकारस्याभावात् । नैवम्, अक्रुञ्चेद् इति प्रतिषेधो ज्ञापयति - अनुस्वारोऽपि नकारकार्यभाग् भवति । अन्यथा अनुस्वारस्य व्यक्तौ प्रवृत्तत्वात् नकारलोपाप्राप्तौ प्रतिषेधो व्यर्थः स्यात् । अत एव **"धुटश्च धुटि"** (३।६।५१) इत्यत्र 'अमंस्त' इति प्रत्युदाहृतम् ॥१७४।

**[समीक्षा]**

'श्रेयन्स् + सि, महन्त् + सि' इस स्थिति में कातन्त्रकार तथा पाणिनि दोनों ही 'न्' की उपधा को दीर्घ आदेश करके 'श्रेयान्, महान्' शब्दरूप सिद्ध करते हैं । अतः उभयत्र साम्य है । यह ज्ञातव्य है कि पाणिनि 'श्रेयस् - महत्' रूप शब्दों को प्रातिपदिक मानते हैं, जबकि कातन्त्रकार ने 'श्रेयन्स् - महन्त्' ये नकारघटित प्रातिपदिक स्वीकार किए हैं ।

**[रूपसिद्धि]**

१. **श्रेयान्** । श्रेयन्स् + सि । प्रकृत सूत्र से नकार की उपधा अकार को दीर्घ, **"व्यञ्जनाच्च"** (२।१।४९) से 'सि' प्रत्यय का लोप तथा **"संयोगान्तस्य लोपः"** (२।३।५४) से 'स्' का लोप ।

२. **श्रेयांसौ** । श्रेयन्स् + औ । प्रकृत सूत्र से नकार की उपधा अकार को दीर्घ तथा **"मनोरनुस्वारो धुटि"** (२।४।४४) से नकार को अनुस्वारादेश ।

३. **महान्** । महन्त् + सि । प्रकृत सूत्र द्वारा नकार की उपधा अकार को दीर्घ, **"व्यञ्जनाच्च"** (२।१।४९) से सि-लोप तथा **"संयोगान्तस्य लोपः"** (२।३।५४) से त्-लोप ।

४. **महान्तौ** । महन्त् + औ । प्रकृत सूत्र से दीर्घ ॥१७४।

## १७५. अपश्च [२।२।१९]

**[सूत्रार्थ]**

सम्बुद्धिभिन्न घुट्संज्ञक प्रत्यय के परे रहते 'अप्' शब्द की उपधा को तथा अप्संबन्धी शब्द में नकार की उपधा को दीर्घ आदेश होता है ॥१७५।

[दु० वृ०]

अप इत्येतस्य नोपधाया अनोपधायाश्च दीर्घो भवति, घुट्यसम्बुद्धौ । **आपः, स्वाम्पि तडागानि।** असंबुद्धाविति किम् ? हे शुच्यप् ।।१७५।

[दु० टी०]

**अप०।** अप्शब्दोऽयं स्वभावादेकार्थोऽपि बहुवचनान्तो यद्यपि, तथापीहानुकार्यानुकरणयोर्भेदस्याविवक्षयैकवचनम् । चकारोऽयमधिकृतेन नोपधाग्रहणेन संबध्यमानोऽनुक्तं समुच्चिनोतीत्याह– नोपधाया अनोपधायाश्चेति । एतच्च भिन्नयोगाल्लभ्यते । शोभना आपो येषु तडागेषु इति विगृह्य **'समासान्तविधिरनित्यः'** (व्या० प० वृ० ७५) इति राजादित्वाददन्तता नास्ति । ये तु सनुकस्यापो दीर्घत्वं नेच्छन्ति, तन्मते चकारोऽयमनुक्तसमुच्चयमात्रे । तदन्तविधिना च **"स्वाप्ये ह्रस्वः"** इति स्वाम्पीति अत्र न भवति, योगविभागबलात् सत्यपि सामान्येऽप इत्यवयवावयविसंबन्धेन षष्ठीत्वादपः स्वरस्यैकवर्णव्यवहितस्यैव भवति ।।१७५।

[वि० प०]

**अपः।** अप्शब्दोऽयं स्वभावाद् बहुवचनान्तो यद्यपि तथाप्यत्रैकवचनमनुकार्यानुकरणयोर्भेदस्याविवक्षितत्वात् । चकारोऽयमधिकृतेन नोपधाग्रहणेन संबध्यते । अतोऽनुक्तमप्यनोपधात्वं समुच्चिनोति योगविभागबलादित्याह–नोपधाया अनोपधायाश्च इति । स्वाम्पीति । शोभना आपो येषु तडागेषु इति विग्रहे **"पन्थ्यपुर्"** (२।६।७३-१९) इति राजादिपाठेऽपि **"स्वतिभ्यां पूजायाम्"** (२।६।७३-६२) अदन्तता नास्तीति समासान्तविधेरनित्यत्वात् **"धुट्स्वराद् घुटि नुः"** (२।२।११) इति नुरागमः ।।१७५।

[समीक्षा]

'अप्+जस्, स्वम्प्+जस्' इस अवस्था में कातन्त्रकार नोपध तथा अनोपध उभयविध 'अप्' शब्द में दीर्घविधान करके 'आपः, स्वाम्पि' शब्दरूप सिद्ध करते हैं। पाणिनि ने केवल अनोपध ही 'अप्' शब्द में दीर्घ-विधान किया है – **"अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम्"** (अ०६।४।११)। काशिकाकार आदि व्याख्याकारों के अनुसार कुछ आचार्य 'बह्वाम्पि' प्रयोग भी साधु मानते हैं – **"बह्वाम्पि तडागानि इति केचिदिच्छन्ति। तत्र समासान्तो विधिरनित्य इति समासान्तो न क्रियते। नित्यमपि च नुममकृत्वा दीर्घत्वमिष्यते"** (का० वृ० ६।४।११)।

### [रूपसिद्धि]

१. **आपः।** अप् + जस्। प्रकृत सूत्र से उपधासंज्ञक अकार को दीर्घ तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से सकार को विसर्ग आदेश।

२. **स्वाम्पि तडागानि।** (नपुंसकलिङ्ग) स्वप् + जस्। शोभना आपो येषु तडागेषु, तानि। **"जस्शसोः शिः"** (२।२।१०) से जस् को शि आदेश, **"धुट्स्वराद् घुटि नुः"** (२।२।११) से नु आगम, प्रकृत सूत्र से न् की उपधा को दीर्घ तथा नकार को अनुस्वारादेश ॥१७५।

## १७६. अन्त्वसन्तस्य चाधातोः सौ [२।२।२०]

### [सूत्रार्थ]

सम्बुद्धिभिन्न 'सि' प्रत्यय के पर में रहने पर अन्त्वन्त तथा असन्त शब्दों में अकार को दीर्घ होता है, धातु को छोड़कर ॥१७६।

### [दु० वृ०]

'अन्तु - अस्' इत्येवमन्तस्याधातोः श्रुतस्यातः सावसम्बुद्धौ दीर्घो भवति। भवान्, गोमान्, सुस्रोताः। पुंस्यपि – दीर्घाहो निदाघः। अधातोरिति किम् ? पिण्डग्रः, चर्मवः। असंबुद्धाविति किम् ? हे सुस्रोतः! ॥१७६।

### [दु० टी०]

**अन्तु०।** अन्तुश्च अस् च अन्त्वसौ तावन्तौ यस्येति बहुव्रीहिः। समुच्चयाद् यत् परं श्रूयते तत् प्रत्येकमभिसंबध्यते। अन्त्वन्तस्यासन्तस्य चेत्यर्थः। श्रुतस्यात इति। अन्तुशब्दस्यास्शब्दस्याव्यवहितस्य नातिव्यवहितस्येत्यर्थः। **केचिद्** अन्तु- इत्यस्य नोपधायाः, असन्तस्य चोपधाया दीर्घ इति यथासंबन्धं संबध्नन्ति। अन्तुग्रहणमुपदेशपरिग्रहार्थम्। गोमत्यतीति क्विपि कृतेऽधातोरिति प्रतिषेधो न भवति, यिनो लोपे सति पुनर्नकारश्रुतिरेव व्यञ्जनेऽनुषङ्गलोपः स्यात्। मलोपश्चेति नियमोऽयम् अतो **'न वर्णाश्रये प्रत्ययलोपलक्षणम्'** (व्या० प० पा० ९६) इति युज्यते। क्विप्प्रत्ययेऽपि नैव नलोपोऽनिदनुबन्धानाम् इति पर्युदासाद् गणपठितानामेव, तेन 'गोमान्' इति सिद्धम्।

पुंस्यपि 'दीर्घाहो निदाघः' इति। नपुंसके पुंसि च रूपभेदो नास्तीत्यर्थः। नायमुपदेशेऽसन्तः **'अह्नः सः"** (२।३।५३) इति विधानात्। तर्हि किमन्तग्रहणेन **'औपदेशिकप्रायोगिकयोरौपदेशिकस्यैव ग्रहणम्'** (कात० प० ४२) भविष्यति ? नैवम्। यिनन्तो हि धातुरौपदेशिक एव (ते धातव इति वचनाल्लभ्यते) अन्तुरित्युदनुबन्धविशेषणात् पचन्नित्यत्र न स्यात्। ननु **"सर्वधातुभ्योऽसुन्"** (५।३४) इति कृते ऊरुव्यचा इत्यादिष्वेव स्यात्।**'अर्थवद्ग्रहणे नानर्थकस्य'** (कात० प० ४) इति न्यायात्, नैवम्। अधातोरिति प्रतिषेधादनर्थकस्यापि भवति। अथ अस् इति अस्यतीति क्विपि दृश्यते चेत् तथापि **'अनिनस्मन्ग्रहणान्यर्थवताऽनर्थकेन च तदन्तविधिं प्रयोजयन्ति'** (व्या० प० पा० १२९) इति ज्ञापितमेव।'ग्रसु ग्लसु अदने, वस आच्छादने' (१।४४५; २।४७)। पिण्डं ग्रसति, चर्म वस्ते इति क्विप्॥१७६।

## [वि० प०]

**अन्त्व०।** अन्तुश्च अस् च अन्त्वसौ तावन्तौ यस्येति विग्रहे बहुव्रीहिणा यद्यपि समुदाय उच्यते, तथापि श्रुतत्वादन्त्वसोरेव स्वरस्य दीर्घो न व्यवहितस्येत्याह – श्रुतस्यात इति। पुंस्यपीत्यादि। दीर्घाण्यहानि यस्मिन् निदाघे **"अह्नः सः"** (२।३।५३) इति नकारस्य सकारः, नपुंसके तावत् तदुक्तप्रतिषेधाद् दीर्घो न भवति। पुंलिङ्गेऽपि अन्तग्रहणस्योपदेशार्थत्वादित्यपेरर्थः। यद्येवं न विद्यते प्रजा यस्येति **अप्रजाः**, शोभनाः प्रजा यस्येति **सुप्रजाः** इत्यत्र दीर्घो न स्यात्। न ह्ययमुपदेशोऽसन्तः किन्तर्हि प्रजाशब्दस्य बहुव्रीहावसन्तता विधीयते। तथा च टीकायामुक्तम् – **"नञ्सुदुर्भ्यः प्रजायास्तु बहुव्रीहावसन्तता"** इति। तदयुक्तम्। नैतच्छर्ववर्मणा कृतं लक्षणमपि त्वेवम्भूता एवामीशब्दा इति। तथा च तत्रैव दर्शितम् – 'किमेतेन प्रयत्नेन शब्दा एवेदृशा अमी' इति। 'पिण्डग्रः, चर्मवः' इति। ग्रसु ग्लसु अदने, वस आच्छादने। पिण्डं ग्रसति, चर्म वस्ते इति क्विप्॥१७६।

## [क० च०]

**[illegible]तु०।** दीर्घाहो निदाघ इति **वृत्तिः।** **'अह्नो रेफे"** (द्र०, कात० परि०, सं० ८०) इति रेफो न भवति। **"न सिलोपे व्यञ्जनात्"** (कात० परि०, सं० ८१) इति **श्रीपतिना** प्रतिषेधात्। 'दीर्घाहो निदाघः' इत्यत्र दीर्घं पठन्ति **पाणिनीयाः।** **तन्त्रान्तरे**ऽप्यदृष्टत्वात् तदुपेक्षितम्।अत एव **श्रीपति**नाप्यत्र दीर्घ इष्यते इत्युक्तम्॥१७६।

**[समीक्षा]**

'भवन्त् + सि, गोमन्त् + सि, सुस्रोतस् + सि' इस अवस्था में कातन्त्रकार तथा पाणिनि दोनों ही दीर्घविधान करके 'भवान्, गोमान्, सुस्रोताः' शब्दरूप सिद्ध करते हैं। पाणिनीय दीर्घविधायक सूत्र है – **"अत्वसन्तस्य चाधातोः"** (अ० ६।४।१४)। पाणिनीय 'मतुप्' के लिए कातन्त्रकार 'मन्तु' प्रत्यय करते हैं – **"तदस्यास्तीति मन्त्वन्त्वीन्"** (२।६।१५)। अतः तदनुसार अत्वन्त तथा अन्त्वन्त भिन्न-भिन्न निर्देश किए गए हैं।

**[रूपसिद्धि]**

१. **भवान्।** भवन्त् + सि। प्रकृत सूत्र से दीर्घ, **"व्यञ्जनाच्च"** (२।१।४९) से सि-लोप एवं **"संयोगान्तस्य लोपः"** (२।३।५४) से त् का लोप।

२. **गोमान्।** गोमन्त् + सि। प्रकृत सूत्र से दीर्घ, **"व्यञ्जनाच्च"** (२।१।४९) से सि-लोप तथा **"संयोगान्तस्य लोपः"** (२।३।५४) से त् का लोप।

३. **सुस्रोताः।** सुस्रोतस् + सि। प्रकृत सूत्र से दीर्घ। **"व्यञ्जनाच्च'** (२।१।४९) से सि-लोप तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से स् को विसर्गादेश ॥१७६।

## १७७. इन्हन्पूषार्यम्णां शौ च [२।२।२१]

**[सूत्रार्थ]**

सम्बुद्धिभिन्न सि तथा शि (जस्-शस्) के परे रहते 'इन्-हन्-पूषन्-अर्यमन्' की उपधा को दीर्घ होता है ॥१७७।

**[दु० वृ०]**

'इन्-हन्-पूषन्-अर्यमन्' इत्येतेषामुपधाया दीर्घो भवति सौ शौ च परे असंबुद्धौ। सुदण्डीनि, सुवृत्रहाणि, सुपूषाणि, स्वर्यमाणि। दण्डी, वृत्रहा, पूषा, अर्यमा। असम्बुद्धाविति किम्? हे दण्डिन्! शौ सावेवेति नियमात्। दण्डिनौ, वृत्रहणौ, पूषणौ, अर्यमणौ। अस्मादेव हन उपधाया दीर्घात् क्विपि न दीर्घः ॥१७७।

[दु० टी०]

इन्० ।**'येन विधिस्तदन्तस्य'** (कात० प० ३) इति केवलस्य व्यपदेशिवद्भावात् । शोभना दण्डिनो येषु कुलेषु इति विग्रहः । हनः **'अर्थवतो ग्रहणेऽनर्थकस्य ग्रहणं न भवति'** (कात० प० ४) इति 'प्लीहानौ, बह्वहानौ' इति । इनस्त्वनर्थकस्यापि ग्रहणम् भवतीत्युक्तमेव - स्रग्वी, वाग्मी । **वाचो ग्मिनिः** । शौ सावेवेत्यादि **"घुटि चासंबुद्धौ"** (२।२।१७) इति सिद्धे सत्यारम्भो नियमार्थः– इनादीनां प्रकृतीनां शौ सौ नियमे क्रियमाणे प्रत्यययोरनियतयोरन्येषां दीर्घो भवत्येव-वनानि, राजेति ।

यदि पुनरयं प्रत्ययनियमः स्याद् इनादीनामेवेति, तदा सन्ध्यक्षराणीति निर्देशो न स्यात् ।अस्मादेवेत्यादि ।**"हनः क्विब् ब्रह्मभ्रूणवृत्रेषु"** (अ० ३।२।८७) इति क्विप् । यदि पुनः **"पञ्चमोपधाया धुटि चागुणे"** (४।१।५५) इति क्विपि दीर्घः स्यात् तदा हन्ग्रहणमनर्थकमेव स्यात् । तेन भ्रूणहनी, भ्रूणघ्नीति सिद्धमेव । ननु घुड्विषये हनः क्विपि दीर्घो नास्तीति प्रत्यासत्त्या न कथं ज्ञापकंभवति ? नैवम् ।**"हनेर्हेर्घिरुपधालोपे"** (२।२।३२) भवति, अनुपधालोपे न भवतीति व्यावर्तनाद् व्याप्तिः सिद्धेति घुट्युपधाया इति प्रकृतित्वादनुपधालक्षण आयिप्रत्यये दीर्घः स्यादेव- भ्रूणहायते इति ॥१७७।

[वि० प०]

इन्० । 'सुदण्डीनि' इत्यादौ शोभनो दण्डी येषु कुलेषु इति विग्रहे नपुंसके **"जस्शसोः शिः, घुटि चासम्बुद्धौ"** (२।२।१०, १७) इति दीर्घत्वं सिद्धम्, अतो नियमार्थमेवेत्याह – शौ सावेवेत्यादि ।प्रकृतिनियमश्चायं तेनामीषाम् अन्यस्मिन् घुट्यपि दीर्घो न भवति । कथन्तर्हि 'प्लीहानौ, बह्वहानौ' इति, सत्यम् । हनोऽनर्थवतो ग्रहणेऽनर्थकस्येति नियमेन व्यावृत्तेरभावादिति दीर्घः स्यादेव । यद्येवं 'स्रग्विणौ' इत्यत्रापि दीर्घप्रसङ्गः, विन्प्रत्ययैकदेशस्य इनोऽनर्थकतया व्यावृत्तेरयोगादिति ? सत्यम् ।इनोऽनर्थकस्यापि ग्रहणम् **"ओदन्ताः"** (१।३।१) इत्यत्रान्तग्रहणेन ज्ञापितमेव । तथा चोक्तम् – **'अनिनस्मन्ग्रहणान्यर्थवता अनर्थकेन च तदन्तविधिं प्रयोजयन्ति'** (व्या० प० पा० १२९) ।

इनादीनामेवेति कथं न प्रत्ययनियमः इति चेत्, नैवम् । सन्ध्यक्षराणीति दीर्घनिर्देशात् । **"क्विब् ब्रह्मभ्रूणवृत्रेषु"** (अ० ३।२।८७) इति हनः क्विपि कृते

“**पञ्चमोपधाया धुटि चागुणे**” (४।१।५५) इति दीर्घो न स्यादित्याह – अस्मादेवेत्यादि। यदि पुनः क्विपि दीर्घः स्यात् तदा हन्ग्रहणमनर्थकमेव स्यात्, साध्यस्य सिद्धत्वादिति। तेन भ्रूणहनीति सिद्धम्, तथा हनोऽकारलोपे **भ्रूणघ्नीत्याद्यपि** सिद्धम्, अन्यथा कथमकारस्य लोपः स्यादिति ॥१७७।

### [क० च०]

इन्०। अनिनस्मन् इत्यादि। ग्रहणानुच्चारणीयानीत्यर्थः। अर्थवतेत्यादि। यथा अन् - प्रतिदीव्नः। दिवेः क्वनिप्। इन् - दण्डी। तदस्यास्तीति इन्। अस् - ऊरुवाचाः। असुन् औणादिकत्वात्। मन् - शर्मा। “**सर्वधातुभ्यो मन्**” (उ० ४।२८)। अनर्थकेनेति। अन् - दोष्णः। विन् - स्रग्वी। अस्-सुपयाः। मन् - प्रियधर्मा। बहुव्रीहौ धर्मस्य धर्मन्। अस्य तु प्रयोजनं मनन्तमान्तशब्देभ्यः इत्यत्र बोध्यम्। भ्रूणहनीति। ननु घुड्विषयेऽनेनैव दीर्घविधानात् प्रत्यासत्त्या घुड्विषये एव क्विपि दीर्घभावस्य ज्ञापयितुमुचितत्वात् कथं वृत्रहणी, भ्रूणहनीति प्रयोजनम् अघुड्विषय इति, नैवम्। “**हनेर्हेर्घिरुपधालोपे**” (२।२।३२) इति वचनाद् ज्ञापकमिदं सर्वोद्दिष्टम्, कथमन्यथा उपधालोप इत्युपपद्येत इति अघुड्विषये क्विपि दीर्घविधानेनाकारलोपाभावात् ॥१७७।

### [समीक्षा]

सुदण्डिन् + (जस् - शस्) शि, दण्डिन् + सि' इस अवस्था में उभयत्र उपधादीर्घ - विधान करके 'सुदण्डीनि, दण्डी' शब्दरूप सिद्ध किए गए हैं। पाणिनि ने 'शि' तथा 'सु' में दीर्घविधायक दो सूत्र बनाए हैं – “**इन्हन्पूषार्यम्णां शौ, सौ च**” (अ० ६।४।१२, १३)। कातन्त्रकार तो चकारपाठ से पूर्ववर्ती सूत्र “**अन्त्वसन्तस्य चाधातोः सौ**” (२।२।२०) में पठित 'सौ' पद की अनुवृत्ति कर कार्यनिर्वाह करते हैं। अतः उनका लाघव स्पष्ट है।

### [रूपसिद्धि]

१. **सुदण्डीनि।** (नपुंसकलिङ्ग) सुदण्डिन् + जस् - शस्। शोभना दण्डिनो येषु कुलेषु। “**जस्शसौ नपुंसके**” (२।१।४) से घुट्संज्ञा, “**जस्शसोः शिः**” (२।२।१०) से 'शि' आदेश तथा प्रकृत सूत्र से दीर्घ।

२. **सुवृत्रहाणि।** (नपुंसकलिङ्ग) सुवृत्रहन् + जस् - शस्। शोभनो वृत्रहा येषु कुलेषु तानि। पूर्ववत् घुट्संज्ञा, शि आदेश, प्रकृत सूत्र से दीर्घ एवं नकार को णकारादेश।

३. **सुपूषाणि।** (नपुंसकलिङ्ग) सुपूषन् + जस् - शस्। शोभनः पूषा येषु कुलेषु तानि। पूर्ववत् घुट्संज्ञा, शि - आदेश, दीर्घ तथा णकारादेश।

४. **स्वर्यमाणि।** (नपुंसकलिङ्ग) स्वर्यमन् + जस् - शस्। शोभनः अर्यमा येषु कुलेषु तानि। पूर्ववत् घुट्संज्ञा, शि - आदेश, दीर्घ तथा नकार को णकारादेश।

५. **दण्डी।** दण्डिन् + सि। प्रकृत सूत्र से नकार की उपधा को दीर्घ, "**व्यञ्जनाच्च**" (२।१।४९) से सि - लोप तथा न - लोप।

६. **वृत्रहा।** वृत्रहन् + सि। पूर्ववत् नकारोपधा - अकार को दीर्घ, सि - लोप तथा न - लोप।

७. **पूषा।** पूषन् + सि। पूर्ववत् अकार को दीर्घ, सिलोप तथा नलोप।

८. **अर्यमा।** अर्यमन् + सि। पूर्ववत् अकार को दीर्घ, सिलोप तथा नलोप ।।१७७।

## १७८. उशनःपुरुदंशोऽनेहसां सावनन्तः [२।२।२२]

### [सूत्रार्थ]

'उशनस्, पुरुदंशस्, अनेहस्' शब्दों के अन्तिम वर्ण 'स्' के स्थान में अन् आदेश होता है सि - प्रत्यय के पर में रहने पर ।।१७८।

### [दु० वृ०]

'उशनस् - पुरुदंशस् - अनेहस्' इत्येतेषामन्तोऽन् भवति सावसंबुद्धौ। **उशना, पुरुदंशा, अनेहा।** असंबुद्धाविति किम्? हे पुरुदंशः! हे अनेहः! हे उशनः! हे उशनन्! हे उशन! नञोऽनित्यत्वात्। अकार उच्चारणार्थः ।।१७८।

### [दु० टी०]

उश०। व्युत्पत्तिपक्षे वशेः क्वनश्, कानुबन्धत्वात् सम्प्रसारणम् उशना। पुरो दशतीति असुन् औणादिको निपातनात् **पुरुदंशेति**। तथा अनेहा इति। असुन् निपातनादनेहा। हे उशन इत्यादि। संबुद्धावप्यन् भवति। **केचिन्न**कारलोपस्यापि

विकल्पमिच्छन्ति – हे उशन इति । **तन्मतेनापि 'नञा निर्दिष्टम् अनित्यम्'** (कालापप० पा० ६७) इति नलोपः स्यात् । यदि **"शौ च"** (२।२।२१) इति चकार उक्त-समुच्चयार्थः क्रियते तदा प्रकृतः सिरेवानुवर्तते तदेह शावित्यस्याप्यनुवर्तनं न स्यात् । 'प्रियोशनांसि कुलानि' इति न सिध्यति । अन्तरङ्गोऽयमागमार्थो न भवति, यथा **"अन्तस्थो डे र्वोः"** (२।६।१९)। **"दीङोऽन्तो यकारः"** (३।४।२६) इति विशेषणविशेष्ययोः प्रयोक्तुरायत्तत्वादन्तो वर्णोऽन् भवतीत्यर्थः ।

ननु न-मात्रमेव कथं न विदध्यात्, सत्यप्यकारेऽकारलोपादन्तग्रहणं च न विधेयमिति एकवर्णत्वादन्ते भविष्यतीत्याह - अकार उत्तरार्थ इति । तर्हि **"सेर्डा"** इत्युच्यताम्, डानुबन्धेऽन्त्यस्वरादेर्लोपे व्यञ्जनान्तत्वात् सिलोपो नास्ति, सन्निपात-लक्षणत्वाड् डा इति दीर्घच्चारणाच्च । नैवम्, असंबुद्धावित्यर्थवशात् **षष्ठीप्रतिपत्तिरियं गरीयसीति** ॥१७८।

## [वि० प०]

**उश०।** हे उशन इत्यादि। उशनसः सम्बुद्धावप्यन् पक्षे भवति। तथा नकारस्यापि पक्षे लोपः, **"न संबुद्धौ"** (२।३।५७) इत्यत्रापि नञा निर्देशस्य विद्यमानत्वाद् अनित्यमेवेति। तेन सान्तं नान्तमदन्तं चेति रूपत्रयं सिद्धं भवति। तथा च **व्याघ्रभूतिः** –

**'संबोधने तूशनसस्त्रिरूपं सान्तं तथा नान्तमथाप्यदन्तम्'** इति।

ननु किमर्थमन् विधीयते नकार एवोच्यताम्, यतः कृतस्याप्यकारस्य लोपेन भवितव्यम्। एवं सत्यन्तग्रहणमप्यकरणीयं स्यात्। एकवर्णत्वादन्ते भविष्यतीत्याह – अकार उत्तरार्थ इति। **"सख्युश्च"**(२।२।२३) इत्यत्र लोपाभावे फलमित्यर्थः ॥१७८।

## [क० च०]

**उश०।** नञोऽनित्यत्वादिति **वृत्तिः**। **"न संबुद्धौ"** (२।३।५७) इत्यत्र तु नञा निर्दिष्टत्वादनित्यार्थः। यतः कृतस्यापीत्यादि। ननु कथं कृतस्याप्यकारस्य लोप इत्युच्यते। यतस्तस्मिन् निमित्ते सति पूर्वोऽकार एव लुप्यते ? सत्यम्। कृतस्याकारस्य पूर्वो योऽकारस्तस्य लोपेन भवितव्यमिति साध्याहारान्वयः। निमित्तसंबन्धे वा षष्ठी ॥१७८।

**[समीक्षा]**

'उशनस् + सि, पुरुदंशस् + सि, अनेहस् + सि' इस अवस्था में दोनों ही आचार्य अन्त्य वर्ण सकार के स्थान में 'अन्' आदेश करके 'उशना, पुरुदंशा, अनेहा' प्रयोग सिद्ध करते हैं। पाणिनि ने इस आदेश के साथ 'अ' तथा 'ङ्' अनुबन्ध भी लगाए हैं। इनमें अकार तो उच्चारणार्थ है तथा ङकार **"ङिच्च"** (अ० १।१।५३) इस परिभाषासूत्र के प्रवृत्त्यर्थ। अस्तु, कातन्त्रकार की प्रक्रिया में स्पष्टतया लाघव विद्यमान है, क्योंकि यहाँ प्रकृत सूत्र में ही 'अन्तः' पद पठित है।

आचार्य **व्याघ्रभूति** आदि के मतानुसार सम्बुद्धि में 'उशनस्' शब्द के तीन रूप बनते हैं - 'हे उशनः ! हे उशनन् ! हे उशन !'। व्याख्याकार 'अन्' की अपेक्षा 'न्' आदेश का पक्ष प्रस्तुत करते हैं।

**[रूपसिद्धि]**

१. **उशना।** उशनस् + सि। प्रकृत सूत्र द्वारा 'स्' को 'अन्' आदेश, **"अकारे लोपम्"** (२।१।१७) से नकारोत्तरवर्ती अकार का लोप, **"घुटि चासंबुद्धौ"** (२।२।१७) से अकार को दीर्घ, **"व्यञ्जनाच्च"** (२।१।४९) से सि-लोप तथा **"लिङ्गान्तनकारस्य"** (२।३।५६) से न-लोप।

२. **पुरुदंशा।** पुरुदंशस् + सि। प्रकृत सूत्र द्वारा 'स्' को 'अन्' आदेश, **"अकारे लोपम्"** (२।१।१७) से शकारोत्तरवर्ती अकार का लोप, **"घुटि चासंबुद्धौ"** (२।२।१७) से अकार को दीर्घ, **"व्यञ्जनाच्च"** (२।१।४९) से सि-लोप तथा **"लिङ्गान्तनकारस्य"** (२।३।५६) से न-लोप।

३. **अनेहा।** अनेहस् + सि। पूर्ववत् 'स्' को 'अन्' आदेश, पूर्ववर्ती अकार का लोप, 'अन्' आदेशस्थ अकार को दीर्घ, सिप्रत्यय एवं नकार का लोप ॥१७८।

## १७९. सख्युश्च [२।२।२३]

**[सूत्रार्थ]**

'सखि' शब्द के अन्त्य वर्ण 'इ' के स्थान में 'अन्' आदेश होता है, संबुद्धिभिन्न 'सि' प्रत्यय के पर में रहने पर ॥१७९॥

[दु० वृ०]

सख्युरन्तोऽन् भवति सावसंबुद्धौ । सखा । असंबुद्धाविति किम् ? हे सखे ! ॥१७९।

[दु० टी०]

**सख्युः** । ननु कथं सखीति **'लिङ्गग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्'** (कात० प० १७) इति प्राप्नोति । न 'सख्युः' इति रूपप्रधानोऽयं निर्देशः । यस्यैतद् रूपं संभवति तस्य सखिशब्दस्य तथैत्वमपि न भवति – सख्यौ, सख्यः । 'अतिसखा, अतिसखायौ' इति भवति । अत्र अतिसखिशब्दस्यातिसख्युरिति रूपम् इह निश्चितम् । तत्र न केवलस्य सखिशब्दस्य ग्रहणमिति, अथवा **'विभक्तौ लिङ्गग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्'** (कात० प० १७) इत्यनित्येयम् । प्रयोजनं यथा शोभनाः पन्थानो यस्याः सा सुपथी स्त्री **"पन्थिमन्थिऋभुक्षीणां सौ"** (२।२।३५) इत्यात्वं न भवति । यथा 'युवतीः पश्य' इति **"श्वयुवमघोनां च"** (२।२।४७) इत्युत्वं न भवति । यदि सखीयतीति क्विब् दृश्यते, सखीरिति रूढ्याश्रयणात् सिद्धम् । **पृथग्योगोऽयमुत्तरार्थः** ॥१७९।

[वि० प०]

**सख्युः** । सख्युरिति रूपप्रधानोऽयं निर्देशः । यस्यैतद् रूपं संभवति, तस्यैवानादेशः । तेन सत्यपि **'लिङ्गग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्'** (कात० प० १७) इति वचने 'सखी स्त्री' इत्यत्र न भवति, विभक्तौ वाऽनित्यत्वमस्याः परिभाषायाः इति ॥१७९।

[क० च०]

**सख्युः** । ननु यदि रूपप्रधान एव कर्तुमिष्टः स्यान्निर्देशस्तदा सखेरित्युच्यताम्, किंसन्देहमूलकेनार्थानुकरणनिर्देशेन, तस्मादर्थप्रधाननिर्देशात् 'सखी स्त्री' इत्यत्रापि अन् स्यादित्याह – विभक्तौ वेति ॥१७९।

**[समीक्षा]**

'सखि + सि' इस स्थिति में कातन्त्रकार और पाणिनि दोनों ही आचार्य सखि-शब्दस्थ अन्त्य वर्ण इकार के स्थान में 'अन्' आदेश करके 'सखा' शब्द सिद्ध करते हैं । पाणिनि ने उच्चारणार्थ अकारानुबन्ध तथा **"ङिच्च"** (अ० १।१।५३)

परिभाषा के निर्वाहार्थ ङ्–अनुबन्ध की भी योजना की है – **"अनङ् सौ"** (अ० ७।१।९३)।

**[रूपसिद्धि]**

१. **सखा**। सखि + सि। प्रकृत सूत्र से 'इ' को 'अन्' आदेश, **"घुटि चासंबुद्धौ"** (२।२।१७) से नकार की उपधा को दीर्घ, **'व्यञ्जनाच्च'** (२।१।४९) से सिलोप तथा **"लिङ्गान्तनकारस्य"** (२।३।५६) से न्-लोप ॥१७९।

## १८०. घुटि त्वै [२।२।२४]

**[सूत्रार्थ]**

'सखि' शब्दस्थ अन्तिम वर्ण के स्थान में 'ऐ' आदेश होता है, घुट्-संज्ञक प्रत्यय के पर में रहने पर ॥१८०।

**[दु० वृ०]**

सख्युरन्त ऐर्भवति घुटि परे। **सखायौ, सखायः।** घुटीति किम्? सखीन्। तुशब्द उत्तरत्रासम्बुद्धिनिवृत्त्यर्थः ॥१८०।

**[दु० टी०]**

**घुटि०**। प्रथमैकवचनेऽना बाधितत्वात् शेषे घुटीति। तुशब्द इत्यादि। **'अव्ययाश्चानेकार्थाः'** इत्युत्तरत्र निवृत्तावपि तुशब्दोऽयं वर्तते। तेन 'हे द्यौः' इति सिद्धं भवति ॥१८०।

**[वि० प०]**

**घुटि०**। पूर्ववदिहापि स्त्रियां न भवति, 'सख्यौ, सख्यः' इति ॥१८०।

**[क० च०]**

**घुटि०**। तु–शब्द इत्यादि उत्तरत्र **"औ सौ"** (२।२।२६) इत्यर्थः। उत्तरत्राप्यसंबुद्धिनिवृत्तिं कुर्वाणोऽपि तुशब्दो वाक्यभेदे एव वर्तते। ऐत्वं घुटि त्वसंबुद्धौ दिवो वकारस्यौर्भवन् घुटि त्वसंबुद्धौ। सौ तु संबुद्धावपीत्यर्थः । यदि पुनरत्रैवा-संबुद्धिनिवृत्त्यर्थस्तुशब्दः स्यात् तदा 'हे सखे' इति प्रयोगः स्यात् ॥१८०।

**[समीक्षा]**

'सखि+औ, सखि+जस्' इस अवस्था में 'इ' को 'ऐ' आदेश तथा 'ऐ' को 'आय्' करके कातन्त्रकार 'सखायौ, सखायः' शब्दरूप सिद्ध करते हैं। पाणिनि ने 'औ' आदि कुछ प्रत्ययों में णिद्वद्भाव मानकर वृद्धि करके उक्त रूप सिद्ध किए हैं। पाणिनि का सूत्र है–**"सख्युरसंबुद्धौ"** (अ० ७।१।९२)।

इस प्रकार अतिदेश की व्यवस्था के विना ही सिद्धि प्रदर्शित करने वाले कातन्त्र का लाघव स्पष्ट है।

**[रूपसिद्धि]**

१. **सखायौ।** सखि+औ। प्रकृत सूत्र द्वारा 'इ' को 'ऐ' आदेश तथा **"ऐ आय्"** (१।२।१३) से ऐकार को 'आय्' आदेश।

२. **सखायः।** सखि+जस्। प्रकृत सूत्र से इकार को ऐकार, **"ऐ आय्"** (१।२।१३) से आय् आदेश तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से सकार को विसर्ग ॥१८०।

## १८१. दिव उद् व्यञ्जने [२।२।२५]

**[सूत्रार्थ]**

व्यञ्जन वर्ण के परवर्ती होने पर 'दिव्' शब्दस्थ वकार को उकारादेश होता है ॥१८१।

**[दु० वृ०]**

दिवो वकारस्योद् भवति व्यञ्जने परे। द्युभ्याम्, द्युषु, द्युगतः, द्युत्वम्। ये न स्याद्– दिव्यम् ॥१८१।

**[दु० टी०]**

दिव०। एकवर्णत्वादन्तस्य वकारस्य भविष्यति **'येन विधिस्तदन्तस्य'** (कलाप०, पृ०२२२, क्रम० ६४) इति। अतिद्युभ्याम्, परमद्युभ्याम्। यत्वं भवत्येव। स्वरानन्तर्ये **'असिद्धं बहिरङ्गमन्तरङ्गे'** (कात० प० ३३) इत्यनित्येयम्। अनेन न्यायेन पूर्वविधिं प्रति स्वरादेशोऽपि न स्थानिवदिति। अथ 'अक्षैर्दीव्यति' इति क्विपि कृते अक्षद्युभ्याम्,

कथमत्र न भवति, अन्तरङ्गत्वाद् ऊट् चेत् तथापि 'एकदेशविकृतस्यानन्यवद्भावात् प्राप्नोति ? सत्यम् । दिव्शब्दस्याव्युत्पन्नस्यैव ग्रहणं **'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्'** (कात० प० पा० ७५) इति न्यायात् । सत्यपि स्यादिसंबन्धे सामान्यव्यञ्जने भवति, अन्यथा 'सुभोः' इति विदध्यात् । तावन्तरेण च स्यादावन्यद् व्यञ्जनमस्ति । 'दिवं गतो दिवो भावः' इति विग्रहः **"व्यञ्जनान्तस्य यत् सुभोः"** (२।५।४) इत्यनेन स्वरेऽन्त्यत्वं प्राप्तम् अनेन व्यावर्त्यते । दिवाश्रयो दिवौकस इति ।

**ये न स्यादिति ।** परिशिष्टोऽत्र यशब्दोऽर्थवांस्तद्धित एव गृह्यते । दिवि यज्ञो **द्युयज्ञ** इति भवत्येव । तदेतत् कथम्, **लोकोपचारात् ।** दिवि भवं **दिव्यम् ।** कथम् अद्यौर्द्यौर्भवति द्युर्भवतीति च्वौ न दीर्घः स्यादिति तत्र **"नाम्यन्तानां यणु०"** (३।४।७०) इत्यादिसूत्रेऽन्तग्रहणस्य साक्षान्नाम्यन्तार्थत्वात् । तकारः पुनरिहोच्चारणार्थ एव । तकारस्योच्चारणे प्रायो दृष्टं सामर्थ्यमिति । उरित्युच्यमाने रेफान्तोऽपि आशङ्क्येत । **यस्त्वाह** - उकारबलाच्च्वौ न दीर्घ इति तदा द्युकामस्यापत्यं **'द्यौकामिः'** इति वृद्धिं प्रति यत्न एव स्यात् ॥१८१।

**[वि० प०]**

**दिव० ।** एकवर्णत्वादन्तस्य वकारस्योद् भवति – द्युगतः, द्युत्वमिति । 'दिवं गतः, दिवो भावः' इति वाक्यम् । इह सत्यपि स्यादिप्रस्तावे व्यञ्जनग्रहणबलात् सामान्यव्यञ्जने भवति । अन्यथा 'सुभोः' इति कुर्यात् । नहि सकार – भकारमन्तरेण **स्यादेरन्यद्** व्यञ्जनमस्तीति । स्वरे तु न भवति । दिवाश्रयो दिवौकसः इत्यत्र **व्यावृत्तिबलात्** **"व्यञ्जनान्तस्य यत् सुभोः"** (२।५।४) इत्यनेनापि प्राप्तमुत्त्वं बाधते । **ये न स्यादिति** दिवि भवं **दिव्यम् ।** दिगादिषु भवार्थे य इह दृश्यते ।

दिवि यज्ञो **द्युयज्ञ** इति भवत्येव निरर्थकत्वादस्य यकारस्येति । पारिशेष्याद् अर्थवान् यकारस्तद्धित एवेति, तदेतत् कथमुच्यते **"इवर्णावर्णयोर्लोपः स्वरे प्रत्यये ये च"** (२।६।४४) इत्यत्र प्रकरणबलात् तद्धित एव यकारोऽवसीयते स प्रत्ययत्वं न व्यभिचरतीति यत् तत्र प्रत्ययग्रहणम्, तद् विशिष्टसंज्ञावधारणार्थम् । तेन तद्धितयकारस्याघुट्स्वरत्वमध्यारोप्यते । ततोऽघुट्स्वरकार्यमेव तद्धिते ये प्रवर्तते न तु व्यञ्जनादिकार्यम् । एवं च सति टादिवत् तद्धिते य इति न वक्तव्यं भवतीति ॥१८१।

[ क० च० ]

**दिव०।** दिवो लिङ्गस्येति **कुलचन्द्र**सम्मतः पाठः। दिवाश्रयो **दिवौकस** इति। ननु कृतेऽप्युत्वे किं दूषणम्। तथाहि वकारस्योत्वे यत्वे च कृते 'द्यु' इति स्थिते आकारे औकारे च वत्वे कृते निमित्ताभावन्यायेन यत्वनिवृत्तौ पुनरिकारस्य स्थितिः। सिद्धं दिवाश्रयो दिवौकस इति किमेतद् व्यावृत्त्यर्थं व्यञ्जनग्रहणम् इति, सत्यम्। यत्ववत्वप्राप्तौ अन्तरङ्गत्वाद् वत्वं बाधित्वा यत्वे कृते पुनर्वकारो न भवति **'सकृद्गत०'** ( कात० प० ३६) इति न्यायादित्याशयः। यद् वा निमित्ताभावेऽपि असिद्धवद्भावस्याङ्गीकृतत्वात् कर्माणीत्यादिवद् आश्रयणीयमिति भावः। बहुव्रीहाविति वचनात् तथा च अन्तरङ्गे नैमित्तिकाभावे कर्तव्ये बहिरङ्गो निमित्ताभावोऽसिद्धः स्यात्। ननु यदि व्यञ्जनग्रहणव्यावृत्त्या स्वरे उत्त्वं न स्यात् तदा कथम् **'उद्यद्द्यूद्यानवाप्याम्'** इति स्वरे उत्वं स्यात् चेत्, न। गगनपर्यायो द्युशब्दोऽप्यस्ति। अथवा **'वीक्ष्यमाणं द्युनक्षत्रैः कुमुदैर्मण्डितं सरः'** इति **कुलचन्द्रः। भट्टनारायणस्तु** उकार इष्यते इत्याचष्टे। अन्ये तु सूत्रे कार्यिनिमित्तयोर्व्यतिक्रमनिर्देशात् क्वचित् स्वरेऽपि उत्वम्॥१८१।

[ समीक्षा ]

'दिव् + भ्याम्, दिव् + सुप्, दिव् + अम् + गत + सि, दिव् + त्व + सि' इस अवस्था में कातन्त्रकार ने व्यञ्जन वर्ण के परवर्ती होने पर 'दिव्' शब्दघटित वकार को उकारादेश करके 'द्युभ्याम्' द्युषु, द्युगतः, द्युत्वम्' शब्दरूप सिद्ध किए हैं। पाणिनि ने भी उकारादेश का विधान किया है– **"दिव उत्"** (अ० ६।१।१३१)।

[ रूपसिद्धि ]

१. **द्युभ्याम्।** दिव् + भ्याम्। प्रकृत सूत्र से व् को उ तथा **"इवर्णो यमसवर्णे न च परो लोप्यः"** (१।२।८) से इकार को यकारादेश।

२. **द्युषु।** दिव् + सुप्। पूर्ववत् वकार को उकार, **"इवर्णो यम्०"** (१।२।८) से इकार को यकार तथा **"निमित्तात् प्रत्ययविकारागमस्थः सः षत्वम्"** (३।८।२६) से सकार को मूर्धन्य षकारादेश।

३. **द्युगतः।** दिव् + अम् + गत + सि। 'दिवं गतः' इस लौकिक विग्रह में **"विभक्तयो द्वितीयाद्या नाम्ना परपदेन तु। समस्यन्ते समासो हि ज्ञेयस्तत्पुरुषः स च"**

(२।६।८) से द्वितीया तत्पुरुष समास, **"तत्स्था लोप्या विभक्तयः"** (२।६।२) से 'दिव्+अम्+गत+सि में अम् तथा सि- विभक्ति का लोप, प्रकृत सूत्र से वकार को उकार, १।२।८ से इकार को यकार, **"धातुविभक्तिवर्जनर्थवल्लिङ्गम्"** (२।१।१) से 'द्युगत' की लिङ्गसंज्ञा, प्रथमाविभक्ति– एकवचन में 'सि' प्रत्यय तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से स् को विसर्गादेश।

४. **द्युत्वम्।** दिव्+त्व। 'दिवो भावः' इस लौकिक विग्रह में **"तत्वौ भावे"** (२।६।१३) से 'त्व' प्रत्यय, प्रकृत सूत्र से व् को उ्, लिङ्गसंज्ञा, सि-प्रत्यय, सि-लोप तथा **"अकारादसंबुद्धौ मुश्च"** (२।२।८) से 'मु' आगम ॥१८१।

# १८२. औ सौ [२।२।२६]

## [सूत्रार्थ]

'सि' प्रत्यय के पर में रहने पर 'दिव्' शब्दघटित वकार को उकारादेश होता है ॥१८२।

## [दु० वृ०]

दिवो वकारस्यौर्भवति सौ परे। द्यौः, हे द्यौः॥ १८२।

## [दु० टी०]

**औ०**। उत्त्वस्यापवादोऽयम्।इहापि पूर्ववद् व्याख्येयम्।स्वरादेशत्वान्नित्यत्वाच्च औत्वे कृते सिलोपो न भवति, स्थानिवदादेशो ह्यवर्णविधाविति न्यायात्। वर्णाश्रिते विधौ स्थानिवद्भावो न दृश्यते॥१८२।

## [समीक्षा]

'दिव्+सि' इस अवस्था में कातन्त्रकार तथा पाणिनि दोनों वकार को औकारादेश करके 'द्यौः' शब्दरूप सिद्ध करते हैं। पाणिनि का सूत्र है **"दिव औत्"** (अ० ७।१।८४)। अतः उभयत्र प्रक्रियासाम्य है।

## [रूपसिद्धि]

१. **द्यौः**। दिव्+सि। प्रकृत सूत्र द्वारा वकार को औकार, **"इवर्णो यमसवर्णे न च परो लोप्यः"** (१।२।८) से इकार को यकार तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से विसर्गादेश।

२. **हे द्यौः।** हे दिव्+सि। पूर्ववत् व् को औ, इ को य् तथा स् को विसर्गादेश ॥१८२।

## १८३. वाम्या [२।२।२७]

### [सूत्रार्थ]

द्वितीयाविभक्ति–एकवचन 'अम्' प्रत्यय के परे रहते 'दिव्' शब्दस्थ वकार को आकारादेश विकल्प से होता है ॥१८३।

### [दु० वृ०]

दिवो वकारस्या भवति वा अमि परे। **द्याम्, दिवम्, अतिद्याम्, अतिदिवम्** ॥१८३।

### [दु० टी०]

**वा।** अथ दीर्घोच्चारणं किमर्थम्, अकारे लोपः स्यादिति चेत्, नैवम्। स्त्रीलिङ्गत्वान्मध्ये **"स्त्रियामादा"** (२।४।४९) भविष्यति, चेदुपसर्जने दुष्यति - दिवमतिक्रान्तं पुरुषम् 'अतिद्यां पश्य' इति। तुल्यायामपि संहितायां न षष्ठी-बहुवचनमिह गृह्यते, दीर्घोच्चारणसामर्थ्यात्। तत्र हि दीर्घे ह्रस्वे वा कृते न्वागमे विशेषाभावात्। अथोपसर्जने न्वागमो मा भूदिति तर्हि व्याख्यानान्निश्चयः सिद्धः ॥१८३।

### [वि० प०]

**वाम्या०।** अथ दीर्घोच्चारणं किमर्थम्, अकारे लोपः स्यादिति चेत्, नैवम्। स्त्रीलिङ्गत्वान्मध्ये **"स्त्रियामादा"** (२।४।४९) भविष्यति, तर्हि उपसर्जने न स्यात्। अत आह – अतिद्यामिति। दिवमतिक्रान्तं पुरुषमिति विग्रहः। इह तु दीर्घात् परलोपे सति **"वाम्या"** (२।२।२७) इति निर्देशस्य समानत्वेऽपि द्वितीयैकवचनमेवेदं न षष्ठीबहुवचनम्, **'व्याख्यानतो विशेषार्थप्रतिपत्तेः'** (कात० प० ६५) इति ॥१८३।

### [क० च०]

**वाम्या०।** व्याख्यानत इति पूर्वस्मिन् परस्मिन् सूत्रे घुट्प्रस्तावादित्यर्थः ॥१८३।

### [रूपसिद्धि]

१. **द्याम्, दिवम्।** दिव्+अम्। प्रकृत सूत्र से वकार को आकार, **"इवर्णो यमसवर्णे न च परो लोप्यः"** (१।२।८) से इकार को यकार, **"समानः सवर्णे

**दीर्घीभवति परश्च लोपम्**" (१।२।१) से दीर्घ आदेश तथा परवर्ती अकार का लोप। आकारादेश के अभाव में 'दिवम्' रूप।

२. **अतियाम्, अतिदिवम्**। अतिदिव्+अम्। पूर्ववत् व् को आ, इ को य्, दीर्घ तथा अकारलोप। आकारादेश के अभाव में **'अतिदिवम्'** शब्दरूप ॥१८३।

## १८४. युजेरसमासे नुर्घुटि [२।२।२८]

### [सूत्रार्थ]

घुट्संज्ञक प्रत्यय के परवर्ती होने पर असमास में क्विप्प्रत्ययान्त 'युज्' शब्द में 'नु' आगम होता है ॥१८४।

### [दु० वृ०]

युजिरः क्विबन्तस्यासमासे नुर्भवति घुटि परे। युङ्, युञ्जौ, युञ्जः। असमास इति किम्? अश्वयुक्॥१८४।

### [दु० टी०]

**युजे०**।युजिर इत्यादि।युनक्तीति "**सत्सूद्विष०**"(४।३।७४) इत्यादिना क्विप्। **'युज समाधौ'** (३।११५) इत्यस्य नुर्न भवति, युजमापन्ना **ऋषयः**। संपदादित्वाद् भावे क्विप्। तदेतत् कथं चेद् इकारेण **'युजिर् योगे'** (६।७) इत्युपलक्ष्यते। ननु **'असमासे'** इति वचनात् समासविषये समाध्यर्थस्य प्रयोगाद् युजिरेव गम्यते, किमिकारग्रहणेन। यथासम्भवम् असमासग्रहणं प्रयोजयतीति चेत्, समासे युजिरेव निश्चितोऽसमासे कुतो विसदृशस्येति तर्हि **प्रतिपत्तिरियं गरीयसीति**।**'अश्वयुञ्जि'** इति नपुंसकलक्षणो नुर्भवत्येव। **'द्वयोर्विभाषयोर्मध्ये यो विधिः स नित्य एव'** (कलाप०, पृ० २२१, क्रम०३४) भवति ॥१८४।

### [वि० प०]

**युजेः**।युजेरिति सूत्रे इकारनिर्देशात् तदुपलिक्षतो **'युजिर् योगे'**(६।७) इत्ययमेव गृह्यते न पुनः **'युज समाधौ'** (३।११५) इत्याह - युजिरः क्विबन्तस्येति। युनक्तीति "**सत्सूद्विष०**" (४।३।७४) इत्यादिना क्विप्। युङ्ङिति। अनेन न्वागमे सति संयोगान्तलोपं बाधित्वा तत्र वर्णग्रहणबलात् "**चवर्गदृगादीनां च**" (२।३।४८) इति

गत्वे वर्गे वर्गान्तत्वे च पश्चात् संयोगान्तलोपः। वा-ग्रहणमिह न वर्तते, वक्ष्यमाणवाग्रहणाद् इति ॥१८४।

**[समीक्षा]**

'युज्+सि, युज्+औ, युज्+जस्' इस अवस्था में कातन्त्रकार ने 'नु' आगम करके 'युङ्, युञ्जौ, युञ्जः' शब्दरूप सिद्ध किए हैं। पाणिनि ने एतदर्थ नुम् आगम किया है–"**युजेरसमासे**" (अ० ७।१।७१)। अतः प्रक्रियासाम्य है।

**[रूपसिद्धि]**

१. **युङ्**। युज्+सि। "**व्यञ्जनाच्च**" (२।१।४९) से सि-लोप, प्रकृत सूत्र से नु-आगम, अन्त्य स्वर उकार के बाद नकार की योजना, "**चवर्गदृगादीनां च**" (२।३।४८) से ज् को ग्, "**मनोरनुस्वारो धुटि**" (२।४।४४) से न् को अनुस्वार, "**वर्गे वर्गान्तः**" (२।४।४५) से अनुस्वार को ङ् तथा "**संयोगान्तस्य लोपः**" (२।३।५४) से ग् का लोप।

२. **युञ्जौ**। युज्+औ। पूर्ववत् 'नु' आगम, न् को अनुस्वार एवं अनुस्वार को ञ्।

३. **युञ्जः**। युज्+जस्। पूर्ववत् नु-आगम, न् को अनुस्वार, अनुस्वार को ञ् तथा स् को विसर्ग ॥१८४।

## १८५. अभ्यस्तादन्तिरनकारः [२।२।२९]

**[सूत्रार्थ]**

अभ्यस्तसंज्ञा वाले शब्दों तथा धातुओं से होने वाला अन्त् (शन्तृङ्) प्रत्यय नकार-रहित होता है, घुट्संज्ञक प्रत्ययों के पर में रहने पर ॥१८५।

**[दु० वृ०]**

"**द्वयमभ्यस्तम्, जक्षादिश्च**" (३।३।५,६) इति वक्ष्यति। अभ्यस्तात् परोऽन्तिरनकारको भवति घुटि परे। **ददत्, दधत्, जक्षत्, जाग्रत्**। अभ्यस्तादिति किम्? लिहन् ॥१८५।

## [दु० टी०]

**अभ्य०** । एवं दरिद्रत् । अभ्यस्तत्वादकारस्य लोपः । चकासत्, शासत् । परिशिष्टे पुंसि चरितार्थं वचनमिदम् । घुट्यनुषङ्गलोप एव नास्ति । अन्तिरितीकार उच्चारणार्थः । स पुनर्घुटीति वचनात् शन्तृङेव गम्यते । न विद्यते नकारोऽस्येति विग्रहः । न पुनर्न विद्यतेऽकारोऽस्येति स्वरेऽक्षरविपर्यये सति **"तुदभादिभ्यः"** (२।२।३१) इति वचनाद् यस्मादन्तरङ्गत्वादसन्ध्यक्षरलोपे दीर्घात् परलोपश्च ईकारे परे नास्त्यकार इति भावः । ईकारविषयेऽन्तिरकाररहितो भवतीति चेत्, अनकारत्वे परभावेनैव सप्तमी चरितार्था दृष्टा । कथं विषयभावेन कल्पयितुं युज्यते कारशब्दस्तु वर्णात् प्रयुज्यते इति सूत्रार्थः । अन्तेरदादेशे नलोपे वा कृते घुटि तु सिध्यति, यदिहानकारग्रहणं तदुत्तरार्थमेव ॥१८५।

## [वि० प०]

**अभ्यस्तात्०** । अनकारको भवतीति । न विद्यते नकारो यस्य इति अनकारकस्तत्र बहुव्रीहौ **"शेषाद् वा"** इति कप्रत्ययः । अभ्यस्तात् परोऽन्तिर्नकाररहितो भवतीत्यर्थः । न पुनर्न विद्यतेऽकारो यस्येति स्वरे अक्षरविपर्यये सति । तदा हि अकाररहितोऽन्तिरिति वाक्यार्थः स्यात् । तदा तु वक्ष्यमाणे **"तुदभादिभ्य ईकारे"** (२।२।३१) इत्यत्रानकारता नोपपद्येत । यतस्तुदभादेरवर्णान्तत्वाद् असन्ध्यक्षरविधौ अन्तरङ्गे दीर्घात् परलोपे कृते च पश्चाद् ईकार इति कथम् ईकारेऽकारलोपः स्यात् । विषयविवक्षायां पूर्वमेवानकारतेति न वक्तव्यम् । नकारलोपपक्षे निमित्तत्वेनैव सप्तम्यघटनात् । ददत्, दधद् इति दाञ्-धाञोः शन्तृङ् । अनुषङ्गलोपः, जुहोत्यादित्वाद् द्विर्वचनम् । **"अभ्यस्तानामाकारस्य"** (३।४।४२) इत्याकारलोपः ॥१८५)

## [क० च०]

**अभ्यस्तात्०** । विषयविवक्षायामिति । ननु विषयविवक्षया अकारलोपार्थम्, सूत्रमिदं किमर्थम् ? तुदादेरसन्ध्यक्षरविधित्वाद् भादिभ्यो दीर्घात् परलोपेनैव सिद्धत्वात् ? सत्यम् । अवर्णान्तानां मध्ये तुदभादिभ्य एवान्तिरकाररहितो भवति, नान्येभ्य इति । 'पचन्ती, दीव्यन्ती' इत्यादौ नियमबलादसन्ध्यक्षरविधिर्दीघात् परलोपविधिश्च न भवतीति **कुलचन्द्रः । वस्तुतस्तु** प्राप्ते विभाषया पक्षे लोपनिवृत्तिरेव सूत्रफलमिति किं दूरावधारणेनेति **महान्तः** ॥१८५।

**[समीक्षा]**

'ददन्त्+सि, दधन्त् + सि, जक्षन्त्+सि, जाग्रन्त्+सि' इस अवस्था में कातन्त्रकार 'ददन्त्' आदि में किए गए नकारघटित 'शन्तृङ्' प्रत्यय को नकाररहित किए जाने का निर्देश करके 'ददत्, दधत्, जक्षत्, जाग्रत्' शब्दरूप सिद्ध करते हैं। यहाँ ज्ञातव्य है कि पाणिनि नकाररहित 'शतृ' प्रत्यय करते हैं, परन्तु **"उगिदचां सर्वनामस्थानेऽधातोः"** (अ० ७।१।७०) से प्राप्त नुमागम का निषेध उन्हें करना ही पड़ता है – **"नाभ्यस्ताच्छतुः"** (अ० ७।१।७८)। अतः कातन्त्रीय प्रक्रिया में लाघव स्पष्ट है।

**[रूपसिद्धि]**

१. **ददत्।** ददन्त्+सि। 'डु दाञ् दाने' (२।८४) धातु से 'शन्तृङ्' प्रत्यय, द्वित्व तथा अभ्यासकार्य से निष्पन्न 'ददन्त्' लिङ्ग का प्रकृत सूत्र द्वारा नकाररहित होना तथा सि-लोप।

२-४. **दधत्।** दधन्त्+सि। **जक्षत्।** जक्षन्त्+सि। **जाग्रत्।** जाग्रन्त् +सि। पूर्ववत् नकार-रहित होना ॥१८५।

## १८६. वा नपुंसके [२।२।३०]

**[सूत्रार्थ]**

नपुंसकलिङ्ग में घुट्संज्ञक प्रत्यय के परवर्ती होने पर अभ्यस्तसंज्ञक शब्द से परवर्ती अन्ति विकल्प से नकाररहित होता है ॥१८६।

**[दु० वृ०]**

अभ्यस्तात् परोऽन्तिरनकारको भवति वा नपुंसके घुटि परे। ददति-ददन्ति। जक्षति-जक्षन्ति। जाग्रति-जाग्रन्ति कुलानि ॥१८६।

**[दु० टी०]**

**वा नपुं०।** पूर्वेण नित्ये प्राप्ते विभाषार्थमिदमुच्यते, तर्हि वाग्रहणमनर्थकम्, वचनसामर्थ्याद् विकल्पो लभ्यते। नैवम्। पूर्व एव विकल्पः स्यान्नपुंसके नित्य इति कथं न स्यात्? किं च उत्तरार्थं वाग्रहणमिति। **'वा शौ'** इति न कृतम्, सामर्थ्याच्छिशब्देनानुमीयमानं नपुंसकं गरीय इति ॥१८६।

## [ समीक्षा ]

'ददन्त् + जस्, जक्षन्त् + जस्' इस अवस्था में कातन्त्रकार ने वैकल्पिक नकारहीनता का विधान करके नपुंसकलिङ्ग में 'ददति - ददन्ति, जक्षति - जक्षन्ति' ये दो-दो रूप साधु माने हैं। पाणिनीय प्रक्रिया केअनुसार शतृ- प्रत्यय यद्यपि नकाररहित किया जाता है, तथापि **"उगिदचां सर्वनामस्थानेऽधातोः"** (अ० ७।१।७०) से प्राप्त नुमागम का निषेध तो **"नाभ्यस्ताच्छतुः"** (अ० ७।१।७८) से करना ही पड़ता है। तदनुसार निषेध के कारण 'ददति' आदि नकार- रहित ही शब्दरूप निष्पन्न होंगे, ऐसा न हो किं च दो- दो रूप (नकाररहित - नकारसहित) सिद्ध हों- एतदर्थ **"वा नपुंसकस्य"** (अ० ७।१।७९) सूत्र द्वारा वैकल्पिक नुमागम किया गया है। इस प्रकार पाणिनीय प्रक्रिया गौरवाधायिका है।

## [रूपसिद्धि]

१. **ददति - ददन्ति।** ददन्त् + जस्, शस्। **"जस्शसौ नपुंसके"** (२।१।४) से 'जस् - शस्' प्रत्ययों की घुट्संज्ञा, **"जस्शसोः शिः"** (२।२।२०) से 'शि' आदेश तथा प्रकृत सूत्र द्वारा वैकल्पिक नकारहीनता - ददति। नकारहीनता के अभाव में नकारघटित प्रयोग - ददन्ति।

२. **जक्षति - जक्षन्ति।** जक्षन्त् + जस्, शस्। पूर्ववत् घुट्संज्ञा, शि - आदेश तथा वैकल्पिक नकारहीनता ॥१८६।

३. **जाग्रति – जाग्रन्ति।** जाग्रन्त् + जस्, शस्। पूर्ववत् घुट्संज्ञा, शि-आदेश, वैकल्पिक नकारहीनता ॥१८६।

# १८७. तुदभादिभ्य ईकारे [ २।२।३१ ]

## [ सूत्रार्थ ]

तुदादि तथा भादि से परवर्ती अन्ति विकल्प से नकाररहित होता है, ईकार के परे रहते ॥१८७।

## [दु० वृ०]

तुद इत्यदन्तोऽनुक्रियते। तुदभादिभ्यः परोऽन्तिरनकारको भवति ईकारे परे। तुदती, तुदन्ती स्त्री। तुदती, तुदन्ती कुले। भाती, भान्ती स्त्री। भाती, भान्ती कुले। तुदभादिभ्य इति किम्? पचन्ती, दीव्यन्ती ॥१८७।

[दु० टी०]

**तुद०** । तुद इति नायमकार उच्चारणार्थः, किन्तर्हि कार्यार्थः, यस्माद-कारमन्तेरेणाप्युच्चारयितुं शक्यते । 'तुदभादिभ्यः' इति । समुच्चयात् पर आदिशब्दः प्रत्येकमभिसंबध्यते । तुदभादिभ्यो भादिभ्य इति । तुदादय आगणान्ताः, भादयो मापर्यन्ताः, वृत्करणात् । सत्यपि नपुंसकाधिकारे औस्थानिको नदादिविहितश्च ईकारो गृह्यते । वर्णात् परो हि कारशब्दः स्वरूपग्राहको दृष्टः । अन्यथा तकारेणापि लघुनिर्देशो भवत्येव । तुदभादयस्तावदवर्णान्तास्तद्व्यावृत्तिरप्यवर्णान्तेभ्य एव भवति, सादृश्यात् । तुदभादिभ्य एवान्तिरनकारको भवति, अन्येभ्योऽन्तिरनकारको न भवति । सनकार एवेत्यर्थः । व्यावर्तने विभाषापि न संबध्यतेऽनर्थकत्वात् । तेन **"अनुषङ्गश्चाक्रुञ्चेत्"** (२।२।३९) इत्यपि बाध्यते । एतच्चानकारग्रहणसामर्थ्यादुपपद्यते । अनवर्णान्तेभ्यस्तु स्यादनुषङ्गलोपः । यथा – अदती, कुर्वती, क्रीणाती ।

मालेवाचरतीत्यायिः, आयेश्च लोपेऽन्विकरणे सति **'मालान्ती, वीणान्ती'** इत्यत्र नकारस्य स्थितिरेव । ननु वर्णाश्रयोऽन्तरङ्गः, तुदभादिभ्यः शन्तृङ ईकारापेक्षयाऽन-कारकत्वं बहिरङ्गम्, ततोऽन्तरङ्गे कृतेऽवयविधर्माभावात् तुदभादिभ्यः परोऽन्तिरिति वक्तुं न युज्यते । अवयवावयविनोर्भेदे हि इदं पूर्वम् इदं परम् इति बुद्धिरुत्पद्यते, नान्यथेति ? सत्यम् । भूतपूर्वस्तदुपचारस्तुदभादिभ्यः परो योऽन्तिः पूर्वमासीत् । एवं चेत्, 'दधती, जानती' इत्यादावपि व्यावृत्तिप्रसङ्गः । तत्राप्यवर्णादुत्तरोऽन्तिर्भूत एव । नैतदेवम् । इहान्त्यावयवेऽपि अन्तिशब्द उपचारात् । **समुदायप्रवृत्ताः शब्दा अवयवेऽपि वर्तन्ते** । यथा – 'ग्रामो दग्धः, पटो दग्धः' इति । स चान्तेरेवावयवोऽन्तरङ्गे कृतेऽवर्णात् परो भवतीति । यद्येवं तदापि 'अदती, जानती' इति दुष्यति । यस्मादत्राप्यवर्णात् परेऽन्तिरवयवो भवतीति । तर्हि तुद इत्यकारविशेषणम् अनर्थकं स्यात्, व्यावृत्तेरभावात् । तुदभादिभ्यो विहितोऽन्तिरिति ब्रूयात् । तस्मादन्तेरवयवाद् अकारात् पूर्वो योऽकार-स्तस्मात् परो योऽन्त्यावयव इति ।

**केचित्** पुनरभ्यस्ताद् अन्तेरनकार इति पठित्वावयवावयविसंबन्धे षष्ठीं प्रतिपद्यन्ते । अन्तेरवयवोऽनकार इति, तत्र यदि पूर्वभाग उच्यते, घुटि व्यवहितेऽपि भवति, वचनात् । अथ परो भागस्तदाभ्यस्ताद् व्यवहितादपि वचनात् । अवयवलक्षणा षष्ठी पुनरुत्तरार्थैव । अथवा नात्र पूर्वपरयोरेकः क्रियते, किन्तु परलोपस्ततश्च **'एकदेश-विकृतमनन्यवत्'** (कात० प० १) इति न्यायात् 'तुदभादिभ्यः' परोऽन्तिरुच्यत एव ।

अथोभयोर्निमित्तयोरुत्पन्न उभयभाग् भवति। नैवम्। यथा मृत्पिण्डस्य स्थाने घटो दण्डादिभिर्निमित्तैरुत्पन्नोऽपि मृत्पिण्डस्यैव घट इति संबन्धः। दण्डादयस्तु निमित्तमात्रं **लोकोपचारात् सिद्धम्,** तथात्रापीति। स्यशब्दाद् विभाषामिच्छन्ति – करिष्यती, करिष्यन्तीति ॥१८७।

[वि० प०]

**तुदभा०।** तुदधातोर्व्यञ्जनान्तत्वात् परगमने सति 'तुदभादिभ्यः' इति निर्देशेन भवितव्यम्, तत्कथमयं विसन्धिनिर्देश इत्याह – तुद इत्यादि। तुद इत्यदन्त इत्यादि। अनुक्रियते इत्यनेनाकारस्य कार्यार्थत्वं दर्शयति। अनुकरणानामनन्यार्थत्वान्न पुनरकार उच्चारणार्थस्तेन विनाप्युच्चारयितुं शक्यते। कार्यं पुनरग्रे वक्ष्यति। नपुंसकाधिकारस्य प्रस्तुतत्वाद् औस्थानिके एव ईकारे प्राप्नोति न तु स्त्रियां विहित इति न चोद्यम्, यतो वर्णात् परः श्रूयमाणकारशब्दः स्वरूपस्यैव ग्राहको भवति। अन्यथा तकारमेव लाघवार्थमुच्चारयेदित्याह – तुदती, तुदन्ती स्त्रीति।

तुदधातोरकारान्तस्यानुकृतत्वाद् भादेश्च स्वभावादाकारान्तत्वात् तुदभादयोऽवर्णान्ताः सिद्धाः। ततस्तत्साहचर्याद् व्यावृत्तिरपि अवर्णान्तेभ्य एव भवतीति दर्शयति - पचन्ती, दीव्यन्तीति। ननु व्यावृत्तिबलाद् विकल्पो नाम मा भूदिति **"अनुषङ्गश्चाक्रुञ्चेत्"** (२।२।३९) इति नित्यमनुषङ्गलोपः कथन्न भवति ? सत्यम्। अभ्यस्तादन्तिरिति सिद्धे यदनकारग्रहणं पूर्वसूत्रे, तदिहार्थमिति मन्तव्यम्। तेन तुदभादिभ्य एवान्तिरनकारको भवति, अन्येभ्यः पुनः सनकार एवेति व्यावृत्तिबलेन प्राप्तोऽपि नित्यलोपो बाध्यते। अनवर्णान्तेभ्यस्तु व्यावृत्तेरयोगात् **"अनुषङ्गश्चाक्रुञ्चेत्"** (२।२।३९) इति नित्यमनुषङ्गलोपः स्यादेव। यथा – 'अदती, क्रीणती, कुर्वती' इत्यादि ॥१८७।

[क० च०]

**तुद०।** तुदभादिखण्डने पूर्वत्राभ्यस्तादन्तिरदिति सिद्धेऽनकारग्रहणं व्याप्तिबलादत्राभ्यस्तनिवृत्त्यर्थं वाच्यम्। अवर्णादिति वा कार्यम्। तुदादयश्च भादयश्च तुदभादयस्तेभ्यस्तुदभादिभ्य इति। ननु तुदश्च भादिश्चेति कथं न प्रतीयते ? सत्यम्। व्याप्तिन्यायादादिशब्दः प्रत्येकमभिसंबध्यते। यद् वा दन्शिसन्जिष्वन्जिरन्जीनाम् इति वचनादादिशब्दस्य प्रत्येकमभिसंबन्धः करिष्यते। अन्यथा यदि केवलस्य तुदो ग्रहणं

तदा दन्श्यादींस्तदाद्यावेव निर्दिशेत् तदा तुदादेरनीत्यगुणत्वाद् "**अनिदनुबन्धानाम्**" (३।६।१) इत्यादिना अनुषङ्गलोपः क्रियताम्, किं पृथक्सूत्रोपादानेन। तस्माद् "**तुदभादिभ्यः**"(२।२।३१)इत्यनेन विकल्पेनन्तेरनकारत्वभीत्या तुदादौ दन्श्यादयो न पठ्यन्ते। अतोऽनुमीयते– तुदशब्दसंबन्धात् तुदादयो गृह्यन्त इति।कथमित्यादि। अकारान्तत्वाद् विसन्धिनिर्देशः अकारनिर्देश इत्यर्थः। अन्यार्थत्वादिति कार्यार्थत्वाद् इत्यर्थः ॥१८७।

**[समीक्षा]**

'तुदन्त् + ई, तुदन्त् + औ, भान्त् + ई, भान्त् + औ' इस अवस्था में कातन्त्रकार को विकल्प से नकारलोप करके 'तुदती - तुदन्ती स्त्री, तुदती - तुदन्ती कुले, भाती - भान्ती स्त्री' तथा 'भाती - भान्ती कुले' शब्दरूप सिद्ध करने पड़ते हैं। पाणिनि 'शतृ'-प्रत्ययान्त शब्दों में प्राप्त नुम् आगम का वैकल्पिक विधान करके कार्यनिर्वाह करते हैं– "**आच्छीनद्योर्नुम्**" (अ० ७।१।८०)। फलतः कातन्त्रीय प्रक्रिया में लाघव सन्निहित है।

**[रूपसिद्धि]**

१. **तुदती - तुदन्ती स्त्री।** तुदन्त् + ई। "**नदाद्यन्चिवाह्व्यन्स्यन्तृसखिनान्तेभ्य ई**" (२।४।५०) से स्त्रीलिङ्ग में 'ई' प्रत्यय तथा प्रकृत सूत्र द्वारा वैकल्पिक नकार - लोप – तुदती। नकारलोपाभावपक्ष में 'तुदन्ती' रूप। तदनन्तर प्रथमा - एकवचन में 'सि' प्रत्यय तथा "**ईकारान्तात् सिः**" (२।१।४८) से उसका लोप।

२. **तुदती- तुदन्ती कुले।** तुदन्त् + औ। नपुंसकलिङ्ग में "**औरीम्**" (२।२।९) से औ को ई आदेश, प्रकृत सूत्र द्वारा वैकल्पिक नकारलोप - तुदती। नकारलोपा-भावपक्ष में 'तुदन्ती'।

३. **भाती - भान्ती स्त्री।** भान्त् + ई। "**नदाद्यन्चिवाह्व्यन्स्यन्तृसखिनान्तेभ्य ई**" (२।४।५०) से स्त्रीलिङ्ग में 'ई' प्रत्यय तथा प्रकृत सूत्र से वैकल्पिक नकारलोप - भाती। नकारलोपाभावपक्ष में – 'भान्ती' रूप। तदनन्तर प्रथमाविभक्ति-एकवचन में 'सि' प्रत्यय एवं "**ईकारान्तात् सिः**" (२।१।४८) से उसका लोप।

४. **भाती - भान्ती कुले।** भान्त् + औ। नपुंसकलिङ्ग में "**औरीम्**" (२।२।९) से औ को ई आदेश एवं प्रकृत सूत्र द्वारा विकल्प से नकारलोप - भाती। नलोपा-भावपक्ष में –'भान्ती' ॥१८७।

## १८८. हनेर्हेर्घिरुपधालोपे [ २।२।३२ ]

### [ सूत्रार्थ ]

'हन्' में उपधालोप हो जाने पर ह् को 'घ्' आदेश होता है ।।१८८।

### [ दु० वृ० ]

हनेरुपधाया लोपे कृते हेः स्थाने घिर्भवति । **वृत्रघ्नः, वृत्रघ्ना ।** उपधालोप इति किम् ? वृत्रहयति ।।१८८।

### [ दु० टी० ]

**हने०** । हेर्घिरिति द्वयोरपि इकार उच्चारणार्थः । हनेः पुनर्धातुनिर्देशाय । तेन 'अह्ना, प्लीह्ना' इत्यत्र न भवति । व्युत्पत्तिपक्षे नञि जहातेः कन् । 'प्लीहन्, तक्षन्, मज्जन्' इति निपातः । यद्येवम्, **'अर्थवद्ग्रहणे नानर्थकस्य'** (कात० प० ४) इति सिद्धम् । तर्हीकारमन्तरेण 'घ्न' इति निर्देशः स्यात्, **ततो बाला विप्रतिपद्यन्ते विलक्षण-निर्देशोऽपि गरीयानेव ।** हनेर्हेर्घिरलोप इति सिद्धे उपधाग्रहणम् उपधाया लोपे यथा स्यादित्याह – उपधेत्यादि । वृत्रहणमाचष्टे इतीन् । तत्रान्त्यस्वरादेर्लोपः **"हस्य हन्तेर्घिरिनिचोः"**(३।६।२८) । ततो ने चेति कृते हस्य हन्तेर्घिर्भवति नेऽन्तरेऽर्थादुपधा-लोपो भवतीति । नैवम् । प्रकरणवशादाख्यातिकोपधालोप एव स्यादिति यथान्यासम् एवाश्रयः ।।१८८।

### [ वि० प० ]

**हनेः** । वृत्रघ्न इति । **"अवमसंयोगात्"** (२।२।५३) इत्यादिना हनेरकारलोपः । अलोप इति सिद्धे किमुपधाग्रहणेन ? सत्यम् । उपधामात्रस्यैव लोपे यथा स्यादित्याह-उपधेत्यादि । तेन वृत्रहणमाचष्टे इति **"इनि लिङ्गस्य"** (३।२।१२) इत्यादिनाऽन्त्य-स्वरादिसमुदायलोपे न भवतीति ।।१८८।

### [ क० च० ]

**हनेः** । ननु पूर्वसूत्रादीकारो वाशब्दश्च कथन्न वर्तते, नैवम्, उपधाग्रहण-सामर्थ्यात् । अतो यावत् स्वरप्रत्ययेषु उपधालोपः संभवति, तावन्त एव निमित्तभूता इह गृह्यन्ते । अलोप इति कृते नैवं साध्यस्यासिद्धिरिति भावः । अलोप इत्यादि

लोपाभावेऽपि घिरिति कथन्नाशङ्क्यते ? नैवम्, अलोप इत्यर्थकथनमात्रम् । अल्लोप इत्येव सूत्रं कार्यमित्यर्थः ॥१८८।

**[ समीक्षा ]**

'वृत्रहन् + शस्, वृत्रहन् + टा' इस अवस्था में अकारलोप के अनन्तर कातन्त्रकार तथा पाणिनि दोनों ने ही ह् को घ् आदेश करके 'वृत्रघ्नः, वृत्रघ्ना' शब्दरूप सिद्ध किए हैं । पाणिनि का सूत्र है – **"हो हन्तेर्ञ्णिन्नेषु"** (अ० ७।३।५४)।

**[ रूपसिद्धि ]**

१. **वृत्रघ्नः ।** वृत्रहन् + शस् । **"अवमसंयोगाद्०"** (२।२।५३) से नकार की उपधा (अकार) का लोप, प्रकृत सूत्र से हकार को घकारादेश तथा **"रेफसो-र्विसर्जनीयः"** (२।३।६३) से स् को विसर्गादेश ।

२. **वृत्रघ्ना ।** वृत्रहन् + टा । पूर्ववत् नकार की उपधा (अकार) का लोप तथा ह् को घ् आदेश ॥१८८।

## १८९. गोरौ घुटि [ २।२।३३ ]

**[ सूत्रार्थ ]**

घुट्-संज्ञक प्रत्यय के परे रहते मुख्य 'गो' शब्द के अन्त को औ आदेश होता है ॥१८९।

**[दु० वृ०]**

गोर्मुख्यस्यौर्भवति घुटि परे । गौः, गावौ, गावः । गोर्घुटीति किम् ? हे चित्रगो ! हे चित्रगवः ॥१८९।

**[दु० टी०]**

**गोः ।** गोर्मुख्यस्येत्यादि । **'गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः'** (कात० प० २) भवतीति । अथ किमर्थमिदमाश्रीयते चित्रा गौर्यस्येति विग्रहे गोरप्रधानस्यान्त्यस्य **"स्त्रियामादादीनां च"** (२।४।४९) इति ह्रस्वत्वे पदान्तरत्वान्न भविष्यति, नैवम् । **'एकदेशविकृतमनन्यवद्'** (कात० प०१) इति प्राप्नोति । यथा **'अतिराभ्याम्'** इत्यत्रात्वं **'येन विधिस्तदन्तस्य'** (कात० प० ३)।

**'येन विधिस्तदन्तस्य'** (कात० प० ३)। इति वचनात्। तथा **"युजेरसमासे नुर्घुटि"** (२।२।२८) इत्यत्रासमानग्रहणम्, नैवम्।**'प्रकृतिवृत्तेः पुनर्वृत्तावविधिर्निष्ठितस्य'** (चा० प० पा० ५९) इत्यभ्युपगमात्। तथापि संबुद्धौ जसि चौत्वे कृते विधेरनिष्ठितत्वात् प्राप्नोति। ननु लक्षणप्रतिपदोक्तन्यायान्न भविष्यति, नैवम्। साध्यमात्रमिह दर्शितम्, तेनानेन वा को विशेष इति। **अथवा** गोः सम्बन्धी यो घुट् तस्मिन्निति समाससंबन्धिनि घुटि न भवतीति पक्षान्तरं दर्शयन्नाह– गोर्घुटि इति किम्? 'परमगौः' इत्यत्र समासेऽपि गोशब्द एव प्रधानमिति गोसंबन्धी घुड् भवत्येव। गोशब्द ओकारान्तोपलक्षणम् इति **एके**। तेन द्योशब्दस्यापि भवति **द्यौः, द्यावौ, द्यावः**। तथोत्तरत्रापि **'द्यां द्याः पश्य'** इति। **"वाम्या"** (२।२।२७) इति सूत्रं विदधद् उपलक्षणं न मन्यते **भगवान**यमिति। अन्यथा द्योशब्देन द्यामिति भविष्यति। दिव्शब्देन च दिवमिति ॥१८९॥

## [वि० प०]

गोः। चित्रा गौर्यस्येति विग्रहे गोरप्रधानस्यान्त्यस्येत्यादिना ह्रस्वत्वे गौणोऽपि गोशब्दो विद्यते, ततः कस्येह ग्रहणम् इत्याह – **गोर्मुख्यस्येत्यादि**। **'गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः'** (का० परि०२) इत्यर्थः। अथवा श्रुतत्वाद् गोशब्दसंबन्धिन्येव घुटि वर्तते, न तु समाससंबन्धिनीति प्रत्युदाहरणेन पक्षान्तरं सूचयन्नाह – **गोर्घुटीत्यादि**। ननु किमर्थमिदमुच्यते ह्रस्वत्वे सति गोशब्दे एवायं न भवति चेत्, नैवम्। एकदेश विकृतस्यानन्यवद्भावात् प्राप्नोति। किं च संबुद्धौ जसि चौत्वे गोशब्द एवायं वर्तते ॥१८९॥

## [क० च०]

गोः। गोर्मुख्यस्यौरिति **वृत्ति**र्मतान्तरेणेति **कुलचन्द्रः**। **स्वमते** गौर्वाहीकः इति उपमानवृत्त्या गौणेऽपि दर्शनात्, तन्नेति **महान्तः**।मुख्यम् अनुपसर्जनम्, ततो गौर्बाहीक इत्यत्रापि स्यात्। यतः पाणिनिना समास एव उपसर्जनसंज्ञाभिधानं क्रियत इति। अथवा मुख्यस्य गोशब्दस्य गौरिति पदं निष्पाद्य पश्चात् पदाध्यारोपाद् बाहीके **वृत्तिरिति भाष्यकार**वचनात्। गोर्घुटीति किमिति **वृत्तिः**। गोः संबन्धिनि घुटीति किमित्यर्थः। न शब्दाश्रये गौणमुख्यव्यवहार इति न्यायाद् गौणस्यापि गोशब्दस्य

प्राप्नोतीत्यर्थः, इत्याह – **अथवेति**। अथ गौरिति व्यक्तिराश्रयणीया। तथा च गकारादेर्गोरिति ओकारान्तस्यैव भविष्यतीत्याह – **किञ्च** इति ॥१८९।

**[समीक्षा]**

'गो + सि, गो + औ, गो + जस्' इस अवस्था में 'गो' शब्दघटित ओ को 'औ' आदेश करके कातन्त्रकार 'गौः, गावौ, गावः' शब्दरूप सिद्ध करते है। पाणिनि ने एतदर्थ **"गोतो णित्"** (अ० ७।१।९०) सूत्र से सु आदि प्रत्ययों में णित्त्व का अतिदेश किया है, जिससे **"अचो ञ्णिति"** (अ० ७।२।११५) से वृद्धि आदेश होकर उक्त रूप संपन्न होते हैं। अतः यहाँ पाणिनीय प्रक्रिया में गौरवप्रतीति होती है और कातन्त्रीय प्रक्रिया में लाघवप्रतीति।

**[रूपसिद्धि]**

१. **गौः**। गो + सि। प्रकृत सूत्र द्वारा गोशब्दघटित ओकार को औकारादेश तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से सकार को विसर्ग।

२. **गावौ**। गो + औ। प्रकृत सूत्र से गो-घटित ओ को औ आदेश तथा **"औ आव्"** (१।२।१५) से औ को 'आव्' आदेश।

३. **गावः**। गो + जस्। प्रकृत सूत्र द्वारा गोशब्द-घटित ओकार को औकार, **"औ आव्"** (१।२।१५) से औ को आव् आदेश तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से सकार को विसर्ग ॥१८९।

## १९०. अमृशसोरा [२।२।३४]

**[सूत्रार्थ]**

द्वितीयाविभक्ति – एकवचन 'अम्' प्रत्यय तथा द्वितीयाबहुवचन 'शस्' प्रत्यय के परे रहते 'गो शब्द के अन्तिम वर्ण 'ओ' के स्थान में 'आ' आदेश होता है ॥१९०।

**[दु० वृ०]**

गोशब्दस्यान्त आ भवति अम्शसोः परयोः। गाम्, गाः। दीर्घः किम्? पुंसि **"स्त्रियामादा"** (२।४।४९) न स्यात् ॥१९०।

### [दु० टी०]

अम्० । गोशब्दस्य स्थानित्वेनानुवर्तनाद् अम्शसोरिति सप्तम्येव । दीर्घ इत्यादि । यदा गोशब्दः स्त्रियां वर्तते तदा नाम "**स्त्रियामादा**" स्यात् । पुंसि तु अकारलोपमापद्यते इति भावः । पूर्ववदप्रधानेऽपि गामतिक्रान्ताम्, अतिक्रान्तान् वा '**अतिगुम्, अतिगून् पश्य**' इति ॥१९०।

### [वि० प०]

अम्० । ननु ह्रस्वेऽप्यकारे कृते मध्ये "स्त्रियामादा" (२।४।४९) भविष्यति किं दीर्घग्रहणेत्याह – दीर्घ इति गोशब्दोऽयमुभयलिङ्गः । ततः पुंलिङ्गपक्षे आप्रत्ययो न स्यादिति भावः ॥१९०।

### [क० च०]

अम्० । पुंसि स्त्रियामादा न स्यादिति वृत्तिः । ननु कथमिदमुच्यते, यावता "**स्त्रियामादा**" (२।४।४९) इत्यनेन आप्रत्ययं विनापि गामिति सिध्यति । तथाहि अमि गावौ घुटीत्यनेन औत्वे सति आवादेशे कृते "**अम्शसोरा**" (२।२।३४) इत्यनेन वकारस्यादेशे कृते पुनर्दीर्घात् परलोपे कृते गामिति सिध्यति । तथा शसि परेऽवादेशे वकारस्य स्थानेऽनेनाकारे कृते समानलक्षणदीर्घत्वे '**गाः**' इति सिध्यतीति ।

न च शस्यकारलोपो भवतीति वाच्यम्, अकारकरणसामर्थ्यात् । अन्यथा "**गोश्च**"(२।१।५९) इत्यनन्तरम् 'अम्शसोरा' इति क्रियताम्, ततश्च **पूर्वसूत्राल्लोपा**नुवृत्तौ गोशब्दस्यापि अम्शसोः परयोर्वकारस्य लोप इत्यर्थे साध्यं **सिद्धम्** । न चैवं कृते "**ङिरौ सपूर्वः**" (२।१।६०) इत्यत्र गोशब्दस्य प्रवृत्तिर्भविष्यतीति वाच्यम्, प्रकृतत्वात् "**हौ च**" (३।५।२४) इति ज्ञापकाद् वेति **पञ्जिकायां** दर्शितत्वात्? सत्यम् । उत्तरार्थं क्रियमाणमिहापि **प्रतिपत्तिगौरवं भवतीति संक्षेपः** ॥१९०।

### [समीक्षा]

'गो + अम्, गो + शस्' इस अवस्था में कातन्त्रकार तथा पाणिनि दोनों ही आचार्य गोशब्दघटित ओकार को आकारादेश करके 'गाम्, गाः' शब्दरूप निष्पन्न करते हैं । पाणिनीय प्रक्रिया के अनुसार गोशब्दघटित ओकार तथा अम्प्रत्ययघटित अकार के स्थान में आकारादेश विहित है - "**औतोऽम्शसोः**" (अ० ६।१।९३) ।

परन्तु कातन्त्रीय प्रक्रिया के अनुसार केवल ओकार को आकारादेश किया गया है, तदनन्तर दीर्घ तथा लोप भी करना पड़ता है। अतः यहाँ पाणिनीयप्रक्रिया में ही लाघव है।

**[रूपसिद्धि]**

१. **गाम्**। गो + अम्। प्रकृत सूत्र से गो-शब्दान्त्य ओकार को आकार, **"समानः सवर्णे दीर्घीभवति परश्च लोपम्"** (१।२।१) से दीर्घ आदेश तथा अम्प्रत्ययस्थ अकार का लोप।

२. **गाः**। गो + शस्। पूर्ववत् ओ को आ-आदेश, समानलक्षण दीर्घ, अकार-लोप तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से स् को विसर्ग आदेश ॥१९०।

## १९१. पन्थिमन्थिऋभुक्षीणां सौ [२।२।३५]

**[सूत्रार्थ]**

'सि' प्रत्यय के परवर्ती होने पर 'पन्थि' आदि शब्दों के अन्त को 'आ' आदेश होता है ॥१९१।

**[दु० वृ०]**

पथ्यादीनामन्त आ भवति सौ परे। **पन्थाः, हे पन्थाः!; मन्थाः, हे मन्थाः!; ऋभुक्षाः, हे ऋभुक्षाः!** ॥१९१।

**[दु० टी०]**

पन्थि०। पन्थिमन्थिरित्यौणादिको निपातः। ऋभुक्षा विद्यते अस्येति, अस्मादेव वचनाद् 'इ' प्रत्ययो ज्ञातव्यः। संबुद्धौ च परत्वाद् आत्मेवेत्याह – 'हे पन्थाः'! इति। मन्थि-ऋभुक्षिभ्यां सहचरितः पन्थिशब्द इकारान्तो गृह्यते। तेन 'राज्ञां पन्थाः' इति विग्रहे राजादित्वाददन्तता **राजपथः** इति। कथं **सुपथी, सुमथी स्त्री; अनृभुक्षी सेना,** विभक्तिषु लिङ्गविशिष्टस्याग्रहणात्। तर्हि पथीयतेः क्विप् **पथीः**; एवं **मथीः**। **ऋभुक्षी**रित्यत्रापि स्यात्, नैवम्। 'ऋभुक्षीणाम्' इत्यस्य सहचरितस्य रूपप्रधाननिर्देशात्।

**केचित्** 'पन्थिन्, मन्थिन्, ऋभुक्षिन्' इति नान्तां प्रकृतिं गृह्णन्ति। तन्मते **"अनन्तो घुटि"** (२।२।३६) इत्यत्र न अन्तोऽनन्तः इति पर्युदासाद् अन्तसमीपस्य अकारो

भवति । **"अघुट्स्वरे लोपम्"** (२।२।३७) इत्यत्र चानन्त एव वर्णो लोपमापद्यते इति । एषां-ग्रहणसामर्थ्याद् व्यञ्जने चैषामन्तराणां व्यवहितस्यापि नस्य लोपो भवति । अत्र पक्षे नपुंसकसंबोधने नकारस्थितिरपि भवति । **"स्वतिभ्यां पूजायाम्"** (२।६।७३-६२) अदन्तता नास्त्येव । हे सुपथिन् कुलेति । आद्ये तु पक्षे 'हे सुपथि कुल' इति नित्यं तदुक्तं न भवत्येवेति ॥१९१।

**[वि० प०]**

पन्थि० । हे पन्थाः! इति संबुद्धौ चैत्वम् अनेन चात्वं प्राप्तम्, **उभयप्राप्तौ परत्वाद्** आत्वम् ॥१९१।

**[क० च०]**

पन्थि० । ननु 'हे पन्थाः!' इत्यत्र भूतपूर्वं ह्रस्वमाश्रित्य संबुद्धेर्लोपः कथन्न भवति ? सत्यम् । नदीश्रद्धाभ्यां साहचर्याद् ह्रस्वादपि भूतपूर्वादिति यदुक्तं **पञ्जिकायां** तन्न सर्वत्र । किन्तु साहचर्याद् यत्र संबुद्धिमाश्रित्य ह्रस्वो विकृतस्तत्रेति **हेमकरः,** तन्न । **"ह्रस्वनदी०"** (२।१।७१) इत्यत्र **टीकायां** सह इना वर्तते इति से, तस्य संबोधने हे से! इत्यत्र संबुद्धिमनाश्रित्य विकृताद् भूतपूर्वह्रस्वात् सेर्लोपस्योक्तत्वात् । साविति सेरेव ग्रहणं न सुपः पूर्वपरयोर्घुट्प्रस्तावात् । यद् वा अस्मिन् सूत्रे सामान्याघुड्व्यञ्जने एव नकारलोपप्राप्तौ यत् पुनर्नकारं निर्दिशति तज्ज्ञापयति – नकारसंबन्ध एवात्वम् । एतेनापि नकाराभावादेव न भवत्यात्वम् । अतो 'राजपथः' इत्यादौ न दोषः ।

अत्र **वैद्यः** –

**श्रद्धाविकारे भवतीह नामी नदीविकारेऽपि स एव दृष्टः ।**

**ह्रस्वे विकारे किल साहचर्याद् हे पन्थिशब्दस्य कुतो न लोपः॥** इत्याह ।

तन्न । 'हे अम्ब !' इत्यादौ श्रद्धाविकारेऽनामिनोऽपि दृष्टत्वात् । तस्माद् **"आ च न संबुद्धौ" (२।१।७०)** इत्यतो ह्रस्वनदीत्यत्र आ च नेति प्रवर्तते । तच्चार्थ-वशात् पञ्चम्यन्ततया आकाराच्च न भवतीत्यर्थः । 'हे पन्थाः' इत्यत्र कुतः प्राप्तिरिति **कुलचन्द्रः** ॥१९१।

[समीक्षा]

'पन्थि + सि, मन्थि + सि, ऋभुक्षि + सि' इस अवस्था में कातन्त्रकार अन्तिम वर्ण इ के स्थान में आ आदेश करके 'पन्थाः, मन्थाः, ऋभुक्षाः' शब्दरूप सिद्ध करते हैं। पाणिनीय व्याकरण में 'पथिन्, मथिन्, ऋभुक्षिन्' प्रातिपदिक माने गए हैं, उनसे सु-प्रत्यय आने पर **"पथिमथ्यृभुक्षामात्"** (अ० ७।१।८५) से न् को आ, **"इतोऽत् सर्वनामस्थाने"** (अ० ७।१।८६) से इ को अ (पथ+आ) **"थो न्थः"** (अ० ७।१।८७) से थ् को न्थ तथा सवर्णदीर्घ आदेश होकर ही उक्त रूप सिद्ध होते हैं। इस प्रकार पाणिनीय प्रक्रिया तथा सूत्ररचना गौरवाधायक ही कही जा सकती है।

[रूपसिद्धि]

१. **पन्थाः, हे पन्थाः!।** पन्थि + सि, हे पन्थि + सि। प्रकृत सूत्र से इकार को आकार तथा **"रफसोर्विसर्जनीयः"** (२।३।६३) से सकार को विसर्गादेश।

२. **मन्थाः, हे मन्थाः!।** मन्थि + सि, हे मन्थि + सि। प्रकृति सूत्र से इकार को आकार तथा **"रफसोर्विसर्जनीयः"** (२।३।६३) से सकार को विसर्गादेश।

३. **ऋभुक्षाः, हे ऋभुक्षाः!।** ऋभुक्षि + सि, हे ऋभुक्षि + सि। प्रकृत सूत्र द्वारा इकार को आकार तथा **"रफसोर्विसर्जनीयः"** (२।३।६३) से सकार को विसर्गादेश ॥१९१।

## १९२. अनन्तो घुटि [२।२।३६]

[सूत्रार्थ]

घुट्संज्ञक प्रत्यय के परवर्ती होने पर 'पन्थि - मन्थि- ऋभुक्षि' शब्दों के अन्तिम वर्ण को 'अन्' आदेश होता है ॥१९२।

[दु० वृ०]

पथ्यादीनामन्तोऽन् भवति घुटि परे। पन्थानौ, मन्थानौ, ऋभुक्षाणौ ॥१९२।

[दु० टी०]

अन०। सावात्वेनाघ्रातत्वाच्छेषे घुटि विधिरयं **'सुपन्थानि वनानि'** इत्यत्र परत्वादना नुर्बाध्यते। घुटीति किम्? सुपथी कुले। एवं घुटीति सिद्धे अन्तग्रहणमु-

भयपक्षे **वैचित्र्यार्थमेव।** पूर्ववत् पथीयतेः क्विप्। **पथ्यौ, मथ्यौ, ऋभुक्षियौ।** संयोग-पूर्वत्वाद् यत्वन्न भवति ॥१९२।

[क० च०]

अन०। घुटीति किम्? 'सुपथी कुले' इति **दुर्गः**। ननु कथमिदमुच्यते **"अघुट्स्वरे लोपम्"** (२।२।३७) इत्यस्य विषयत्वात्। अथ कृतेऽपीकारलोपे थकारस्य भविष्यति, नैवम्। **'असिद्धं बहिरङ्गम्०'** (का० परि० ३३) इति न्यायान्न भविष्यति, स्थानिवद्भावात्, **'सकृद् गतौ०'** (का० परि० ३६) इति न्यायाच्च। सत्यम्। घुङ्ग्रहणाभावे स्यादिप्रस्तावात् स्यादेर्विषयविवक्षायां तदनपेक्षयैव स्यात्। तद्विषये तदनपेक्षयैवानो विधानाद् अघुट्स्वरे इकारलोपम् अपि बाधते। यथा 'स्त्री नदीवद्' इत्यत्र निरपेक्षत्वाद् विकल्पं बाधते इति। न च 'सौ' इत्यनुवर्तनं पूर्वसूत्रादिति वाच्यम्, आत्वेनाघ्रातत्वात्। नापि पाक्षिकप्रवृत्तिः स्यादिति वाच्यम्, एकयोगाकरणात्। अथ तर्हि इकारलोपस्य कुत्र विषय इति चेद् अपपथम् इत्यादौ।

तथाहि पन्थिशब्दादिनि कृतेऽघुट्स्वरग्रहणस्य व्याप्त्यर्थत्वाद् इकारलोपे समान-लोपात् सन्वद्भावनिषेधात् **"सन्यवर्णस्य"** (३।३।२६) इतीत्वं न स्यात्, तेन 'अपपथम्' इति सिद्धम्। अथ **"इनि लिङ्गस्य"** (३।२।१२) इत्यादिना इकारलोपे साध्यस्य सिद्धिरिति चेत्, न। **"अस्योपधायाः"** (३।६।५) इत्यत्र परत्वादन्तलोपं बाधित्वा नामिग्रहणसामर्थ्यात् पन्थिशब्दस्यापीनि वृद्धौ समानस्यालोपे सन्वद्भावात् **"सन्यवर्णस्य"** (३।३।२६) इतीत्वे **'अपीपथत्'** इत्येवानिष्टरूपं स्यादिति वृद्धौ सन्ध्यक्षरलोपे यथा **'अपीपटत्'** इत्युक्तम् ॥१९२।

**[समीक्षा]**

'पन्थि' शब्द से औ-आदि प्रत्ययों में 'पन्थानौ, पन्थानः' आदि शब्द सिद्ध करने के लिए इ को अन् तथा न् की उपधा को दीर्घ करना पड़ता है। पाणिनि एतदर्थ इ को अ, थ् को न्थ तथा दीर्घविधान करते हैं–"इतोऽत् सर्वनामस्थाने, थो न्थः" (अ० ७।१।८६, ८७)। यह भी ज्ञातव्य है कि पाणिनि पथिन्, मथिन्' आदि प्रातिपदिक मानते हैं, जबकि कातन्त्रकार ने 'पन्थि-मन्थि' प्रातिपदिक माने हैं।

**[रूपसिद्धि]**

१. **पन्थानौ।** पन्थि+औ। प्रकृत सूत्र द्वारा इ को अन् तथा "घुटि चासंबुद्धौ" (२।२।१७) से दीर्घादेश।

२. **मन्थानौ।** मन्थि+औ। इ को अन् तथा न् की उपधा को दीर्घ।

३. **ऋभुक्षाणौ।** ऋभुक्षि+औ। इ को अन्, अ को दीर्घ तथा न् को ण् आदेश ॥१९२।

## १९३. अघुट्स्वरे लोपम् [२।२।३७]

### [सूत्रार्थ]

घुट्-भिन्न स्वर के पर में रहने पर 'पन्थि' आदि शब्दों में अन्तिम वर्ण का लोप होता है ॥१९३।

### [दु० वृ०]

पथ्यादीनामन्तोऽघुट्स्वरे लोपमापद्यते। **पथः, पथा। मथः, मथा। ऋभुक्षः, ऋभुक्षा** ॥१९३।

### [दु० टी०]

अघुट्०। अघुट्-ग्रहणं किमर्थम्? 'स्वरे' इत्युच्यमानेऽपि घुट्स्वरेऽना बाधितत्वादघुट्स्वरे भविष्यति। स्यादिसंबन्धाच्च पथ्योदनादिषु न भविष्यतीति। सत्यम्। उत्तरार्थमिहार्थं च घुट्प्रत्ययादन्योऽघुट्प्रत्यय इति पर्युदासार्थः। तेन पन्थानमकरोद् 'अपपथत्' इति नित्यत्वादिनि परामपि वृद्धिमयं लोपो बाधते। समानलोपत्वाच्च न सन्वद्भाव इति तद्धिते पुनरिवर्णलोपोऽस्तीति न प्रयोजनम्, पथोऽनपेतं पथ्यम्। मथि भवं मथ्यम्। एवम् **ऋभुक्ष्य**मिति तद्धिते ये **लोकोपचारात्** ॥१९३।

### [समीक्षा]

'पन्थि+शस्, पन्थि+टा, मन्थि+शस्, मन्थि+टा, ऋभुक्षि+शस्, ऋभुक्षि+टा' इस अवस्था में कातन्त्रकार अन्तिम इकार वर्ण का लोप करके 'पथः, पथा, मथः, मथा, ऋभुक्षः, ऋभुक्षा' शब्दरूप सिद्ध करते हैं। पाणिनीय व्याकरण के अनुसार 'पथिन्, मथिन्, ऋभुक्षिन्' शब्दों की शस्-टा प्रत्ययों के परे रहते "यचि भम्" से भसंज्ञा, **"अचोऽन्त्यादि टि"** (अ० १।१।६४) से इन् भाग की टिसंज्ञा तथा **"भस्य टेर्लोपः"** (अ० ७।१।८८) से इन् का लोप करना पड़ता है। इस प्रकार पाणिनीय प्रक्रिया में अपेक्षाकृत गौरव सन्निहित है।

## [रूपसिद्धि]

१-२. **पथः, पथा** । पन्थि + शस्, टा । प्रकृत सूत्र द्वारा अन्तिम इ-वर्ण का लोप, **"व्यञ्जने चैषां निः"** (२।२।३८) से नलोप, तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से सकार को विसर्गादेश ।

३-४. **मथः, मथा** । मन्थि + शस्, टा । प्रकृत सूत्र से इकार का लोप "व्यञ्जने चैषां निः" (२।२।३८) से नलोप एवं **"रेफसोर्विसर्जनीयः"** (२।३।६३) से सकार को विसर्गादेश ।

५-६. **ऋभुक्षः, ऋभुक्षा** । ऋभुक्षि + शस्, टा । प्रकृत सूत्र से इकार का लोप, नलोप तथा सकार को विसर्गादेश ॥१९३।

# १९४. व्यञ्जने चैषां निः [२।२।३८]

## [सूत्रार्थ]

घुट्-भिन्न स्वर तथा व्यञ्जन वर्ण के पर में रहने पर 'पन्थि-'मन्थि' शब्दों में नकार का लोप होता है ॥१९४।

## [दु० वृ०]

एषां पथ्यादीनामघुट्स्वरे व्यञ्जने च निर्लोपमापद्यते । पथः, पथिकः, पथयति । मथः, मथिकः, मथयति । पथिभ्याम्, पथित्वम् । मथिभ्याम्, मथित्वम् । एषां ग्रहणमघुट्स्वरव्यञ्जनमात्रे निर्लोपार्थम् । तेन 'पथिगतः, पथ्युत्तमः, मथिगतः, मथ्युत्तमः ॥१९४॥

## [दु० टी०]

व्यञ्जने० । निरितीकार उच्चारणार्थः सुभोरिति सिद्धे व्यञ्जनग्रहणं सामान्यार्थम्, अघुट्स्वरसाहचर्यात् प्रत्ययव्यञ्जने प्राप्नोति । एषां ग्रहणं व्यक्त्यर्थम्, व्यक्तौ च बहुवचनमुपपद्यते, यावान् पन्थिशब्दो यावान् मन्थिशब्दश्च तावतो लोप इत्यर्थः स्यात् । व्यञ्जनमात्रसाहचर्याद् अघुट्स्वरमात्रे भवतीत्याह – एषामित्यादि । पन्थानं सततं वहतीति **"क्रीतादित्वाद्"** (२।६।८) इकण् । क्वचिदधिकारादादौ न वृद्धिरिति, पन्थानं सततं वहतीत्येवमादित्वाद् (२।६।७) अण् 'पान्थः' इत्यत्र नलोपो न

भवति, **लोकोपचारात्** । चकारेणाघुट्स्वरानुवर्तनं स्वरादेशस्य स्थानिवद्भावादनुषङ्गलोपो नास्तीति 'पन्थाः' इत्यत्र परत्वान्नित्यत्वाच्च विसर्जनीय इति । तस्मात् कर्तव्यमघुट्स्वरानुवर्तनम् ॥१९४।

### [वि० प०]

व्यञ्जने० । **पथिक** इति । पन्थानं सततं वहतीत्यर्थे **"क्रीतादित्वाद्"** (२।६।८) इकण् । तत्र क्वचिदधिकाराद् द्विस्वरस्य न वृद्धिः । **पथय**तीति । पन्थानमाचष्टे **"इन् कारितं धात्वर्थे"** (३।२।९) इतीन् । अथानन्तरत्वादेव पथ्यादयोऽनुवर्तन्ते, तत् किमेषांग्रहणेन । न चेह बहुलार्थत्वमुपपद्यते इति द्वयोरेव नकारवत्त्वादित्याह – एषां ग्रहणमित्यादि । **व्यक्तौ** हि बहुवचनं भवतीति ततो व्यक्तिभेदेन यावान् पन्थिशब्दो यावान् मन्थिशब्दस्तावतो नकारलोप इति वाक्यार्थे परपदसम्बन्धिन्यपि अघुट्स्वरे व्यञ्जने च लोपः स्यात् । अन्यथा प्रत्ययसम्बन्धिन्येव स्यादिति भावः । पन्थानं गतः, पथ्युत्तमः इति विग्रहः कार्यः ॥१९४।

### [समीक्षा]

'पन्थि + शस्, पन्थि + इकण्, मन्थि + शस्, मन्थि + इकण्' इस अवस्था में कातन्त्रकार नकार-इकार का लोप करके 'पथः, पथिकः, मथः, मथिकः' शब्दरूप सिद्ध करते हैं। पाणिनीय प्रक्रिया के अनुसार 'पथिन्, मथिन्' प्रातिपदिक माने जाते हैं। इनसे शस् आदि प्रत्यय किए जाने पर **"भस्य टेर्लोपः"** (अ० ७।१।८८) से टि = इन् का लोप करके उक्त प्रयोग निष्पन्न किए जाते हैं।

### [रूपसिद्धि]

१. **पथः** । पन्थि + शस् । प्रकृत सूत्र से नकारलोप, **"अघुट्स्वरे लोपम्"** (२।२।३७) से इकारलोप तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से सकार को विसर्गादेश।

२. **पथिकः** । पन्थि + इकण् । पन्थानं सततं वहति । **"तेन दीव्यति संसृष्टम्"** (२।६।७) से इकण् प्रत्यय, नकार-इकारलोप, लिङ्गसंज्ञा, सिप्रत्यय तथा सकार को विसर्ग।

३. **पथयति** । पन्थि + इन् । **"इन् कारितं धात्वर्थे"** (३।२।९) से इन् प्रत्यय, **"इनि लिङ्गस्यानेकाक्षरयो०"** (३।२।१२) से इकारलोप, प्रकृत सूत्र से नकारलोप, धातुसंज्ञा, वर्तमाना में प्रथमपुरुष-एकवचन 'ति' प्रत्यय, अन् विकरण, इकार को गुण तथा एकार को अयादेश।

४-६. **मथः** । मन्थि + शस् । **मथिकः** । मन्थि + इकण् । **मथयति** । मन्थि + इन् । रूपसिद्धि-संख्या १-३ के अनुसार ॥१९४।

## १९५. अनुषङ्गश्चाक्रुञ्चेत् [२।२।३९]

### [सूत्रार्थ]

घुट्-भिन्न स्वर तथा व्यञ्जन के पर में रहने पर अनुषङ्गसञ्ज्ञक नकार का लोप होता है, परन्तु क्रुन्च् तथा इदनुबन्ध धातु द्वारा निष्पादित शब्द में अनुषङ्ग-संज्ञक नकार का लोप नहीं होता है ॥१९५।

### [दु० वृ०]

क्रुञ्चश्च इच्च क्रुञ्चेदिति लुप्तविभक्तिकं पदम् । अनुषङ्गसंज्ञको नकारो लोपमापद्यते अघुट्स्वरव्यञ्जनयोः । क्रुन्चेरिदनुबन्धस्य च न भवति । विदुषः, विदुषा, विदुषी, वैदुष्यम् । महतः, महता, महद्भ्याम्, महत्सु, महत्ता । अक्रुञ्चेदिति किम् ? क्रुञ्चः, क्रुङ्भ्याम्, सुकंसः, सुकन्भ्याम् ॥१९५।

### [दु० टी०]

**अनु०।** ननु चानुकृष्टत्वादघुट्स्वरग्रहणमप्रधानम्, ततः प्रधानस्यैव अनन्तरस्य व्यञ्जनस्यानुवर्तनं स्यात् । अघुट्स्वरग्रहणं प्रधानीकृत्य व्यञ्जने चेत्युच्यते ~~तदा~~ अघुट्स्वर एवानुवर्तते । नैवम् । इहापि चकारोऽनुवर्तते, तद्बलाच्चाघुट्स्वरग्रहणं चेति हृदि कृत्वाह – अघुट्स्वरव्यञ्जनयोरिति । अयं तु चकार उक्तसमुच्चयार्थ एव । अस्मादेव प्रतिषेधात् क्वौ क्रुन्चेरनुषङ्गलोपोऽगुणे नास्तीति लिङ्गं विशिष्यते । विशेषणेन च तदन्तविधिः साक्षादिकारस्यानुषङ्गसंज्ञो नास्तीति भूतपूर्व इकार इत्याह – इदनुबन्धस्य चेति । **केचिद्** अक्रुन्चेरिति पठन्ति । अनिदनुबन्धानामिति प्रतिषेधाद् इदनुबन्धानामनुषङ्गः साधित एव । अतो ज्ञापकं च लक्षणं स्यादिति **'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्'** (का०परि० ७५) इति इकारोऽपि अनुपकारक एवेति गरीयनयं पक्ष इति । **"वेत्तेः शन्तुर्वन्सुः"** (४।४।४) वैदुषम् इति । **"तस्येदम्"** (२।६।७) इत्यण् । 'महन्त्' इत्यव्युत्पन्नं लिङ्गम्, औणादिको वा निपातः । 'कुच् क्रुन्च् कौटिल्याल्पीभावयोः' (१।४५, ४६) क्रुञ्चतीति क्विप् । 'कसि गतिशातनयोः' (२।४८) सुष्ठु कंस्ते इति क्विप् । 'अघुट्स्वरव्यञ्जनयोः' इति सामान्यं न प्रयोजयति **"व्यञ्जनान्तस्य यत्सुभोः"** (२।५।४) इति वचनात् ॥१९५।

[वि० प०]

अनु० । लुप्तविभक्तिकं पदमिति । लुप्ता विभक्तिर्यस्येति विग्रहे बहुव्रीहौ **"शेषाद् वा"** (अ० ५।४।१५४) इति कप्रत्ययः । इह यद्यपि इता लिङ्गं विशिष्यते तत्र विशेषणेन च तदन्तविधिः, तदापि साक्षाद् इदन्तस्य सानुषङ्गप्रसङ्गो नास्ति । भूतपूर्व इदन्त इह गृह्यते स च इदनुबन्ध एवेति न्यायादित्याह– इदनुबन्धस्य चेति । विदुष इति । 'विद ज्ञाने' (२।२७) शन्तृङ् । **"वेत्तेः शन्तुर्वन्सुः"** (४।४।४), 'अघुट्स्वरादौ' इत्यदिना वकारस्योकारः । **वैदुषम्** इति । विदुष इदमिति **"तस्येदम्"** (२।६।७) इत्यण् । अक्रुञ्चेदित्यादि । क्रुञ्चतीति क्विप् । अत एव ज्ञापकात् क्वावप्यगुण-लक्षणोऽनुषङ्गलोपो नास्तीति । 'कसि गतिशातनयोः' (२।४८) । अत एव वर्जनाद् इदनुबन्धानां नोऽस्तीति नकारागमः ।।१९५।

[क० च०]

अनु० । इता लिङ्गं विशिष्यते इत्यादि । ननु लिङ्गस्य कथम् इदनुबन्धता, धातोरिदनुबन्धत्वात् ? सत्यम् । यस्याः प्रकृतेर्धात्ववस्थायामिदनुबन्धत्वं तस्याः प्रकृतेर्लिङ्गावस्थायामपीदनुबन्धत्वं केन वार्यतामिति ।।१९५।

[समीक्षा]

'विद्वन्स् + शस्, महन्त् + शस्, विद्वन्स् + ई, महन्त् + त' इस अवस्था में कातन्त्रकार को नकारलोप अनिवार्यतः करना पड़ता है, क्योंकि यहाँ 'विद्वन्स्' आदि लिङ्ग नकारघटित माने गए हैं । पाणिनीय व्याकरण में नकारघटित प्रातिपदिक नहीं माने जाते, अतः वहाँ नकारलोप की आवश्यकता नहीं होती है ।

[रूपसिद्धि]

१. **विदुषः** । विद्वन्स् + शस् । **"अघुट्स्वरादौ"** (२।२।४६) से व् को उ, प्रकृत सूत्र से नलोप, **"नामिकरपरः"** (२।४।४७) से स् को ष् तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से स् को विसर्गादेश ।

२. **विदुषा** । विद्वन्स् + टा । पूर्ववत् व् को उ, नलोप, स् को ष् ।

३. **विदुषी** । विद्वन्स् + ई । **"नदाद्यन्चि०"** (२।४।५०) से ई-प्रत्यय, लिङ्गसंज्ञा, प्रथमाविभक्ति- एकवचन 'सि' प्रत्यय तथा उसका लोप ।

४. **वैदुष्यम्** । विद्वन्स् + यण् । विदुषो भावः । **"यण् च प्रकीर्तितः"** (२।६।१) से यण् प्रत्यय, नलोप, **"वृद्धिरादौ सणे"** (२।६।४९) से वृद्धि, लिङ्गसंज्ञा, सि-प्रत्यय, अम्- आदेश ।

५-८. **महतः** । महन्त् + शस् । **महता** । महन्त् + टा । **महद्भ्याम्** । महन्त् + भ्याम् । **महत्सु** । महन्त् + सुप् । पूर्ववत् प्रकृत सूत्र नकार-लोप ।

९. **महत्ता** । महन्त् + त । महतो भावः । "तत्वौ भावे" (२।६।१३) से त-प्रत्यय, नलोप, "**स्त्रियामादा**" (२।४।४९) से आ-प्रत्यय, लिङ्गसंज्ञा, सि-प्रत्यय तथा "**ह्रस्वनदीश्रद्धाभ्यः सिर्लोपम्**" (२।१।७१) से सि का लोप ॥१९५।

## १९६. पुंसोऽनुशब्दलोपः [२।२।४०]

### [सूत्रार्थ]

घुट्-भिन्न स्वर तथा व्यञ्जन वर्णों के परवर्ती होने पर 'पुमन्स्' शब्दस्थ 'अन्' भाग का लोप होता है ॥१९६।

### [दु० वृ०]

'पुमन्स्' इत्येतस्य अन्शब्दस्य लोपो भवति अघुट्स्वरव्यञ्जनयोः । पुंसः, पुंसा, पुम्भ्याम्, पौंस्नम्, पुंस्त्वम् । अघुट्स्वरव्यञ्जनयोरिति किम् ? पुमांसौ ॥१९६।

### [दु० टी०]

पुंसो० । व्युत्पत्तिपक्षे पुनातेर्मन् सिरन्तो ह्रस्वः । **पौंस्नम्** इति । **तस्येदम्** इति स्नण् । बहवः पुमांसो ययोस्ते **बहुपुंसी कुले** । तदन्तविधिरत्र प्रकरणेऽस्तीति पुंसोऽलोप इति कृते "**न पदान्त०**" (का० परि० १०) इत्यादिना अनुस्वारविधिं प्रति स्थानिवद्भावो नास्तीति । नैवम्, 'पुंस्यति-पुंस्यतः' इत्यत्र 'यिन्नाय्योर्नलोप एव इति नियमादनो लोपो न स्याद् इत्यन्ग्रहणम् । शब्दग्रहणं च **सुखार्थम्** । तथा नकारस्य अकारः शकारेण क्रियत इति ॥१९६।

### [वि० प०]

पुंसो० । पौंस्नम् इति । पुंस इदमित्यर्थे "**स्त्रीपुंसाभ्यां नञ्-स्नणौ**" इति तमादिनिपातनात् स्नण्प्रत्ययः । पुंस्त्वमिति भावे त्वप्रत्ययः ॥१९६।

### [क० च०]

पुंसो० । पुंसोऽनुशब्द इति क्रियतां लोप इत्यनुवर्तते । अन्शब्दो लोपमापद्यते इत्यर्थो भविष्यति किं लोपग्रहणेन ? सत्यम्, सुखार्थं लोपग्रहणम् ॥१९६।

[समीक्षा]

'पुमन्स् + शस्, पुमन्स् + टा, पुमन्स् + भ्याम्, पुमन्स् + स्नण्, पुमन्स् + त्व' इस अवस्था में 'पुंसः, पुंसा, पुंभ्याम्, पौंस्नम्, पुंस्त्वम्' शब्दरूप सिद्ध करने के लिए कातन्त्रकार को 'अन्' भाग का लोप अनिवार्यतः करना ही पड़ता है। पाणिनीय व्याकरण में सर्वनामस्थानसंज्ञक प्रत्ययों के पर में रहने पर, पुम्स् (पुंस्) से 'असुङ्' आदेश करने पर 'पुमस्' प्रातिपदिक बनता है **"पुंसोऽसुङ्"** (अ० ७।१।८९)। 'शस्' प्रत्यय में इस आदेश के प्रवृत्त न होने पर केवल म् को अनुस्वार तथा स् को रुत्व-विसर्ग ही करना पड़ता है।

[रूपसिद्धि]

१. **पुंसः** ।पुमन्स् + शस् ।प्रकृत सूत्र द्वारा 'अन्' भाग का लोप, **"मनोरनुस्वारो घुटि"** (२।४।४४) से म् को अनुस्वार तथा स् को विसर्ग आदेश।

२-३ **पुंसा** । पुमन्स् + टा । **पुंभ्याम्** । पुमन्स् + भ्याम् । पूर्ववत् ।

४. **पौंस्नम्** । पुमन्स् + स्नण् । **"स्त्रीपुंसाभ्यां नञ्-स्नणौ"** से स्नण्-प्रत्यय, अन्-लोप, **"वृद्धिरादौ सणे"** (२।६।४९) से वृद्धि तथा म् को अनुस्वार आदेश।

५. **पुंस्त्वम्** ।पुमन्स् + त्व ।पुंसो भावः ।**"तत्वौ भावे"** (२।६।१३) से त्वप्रत्यय, अन्भाग का लोप, म् को अनुस्वार तथा विभक्तिकार्य ॥१९६।

## १९७. चतुरो वाशब्दस्योत्वम् [२।२।४१]

[सूत्रार्थ]

घुट्-भिन्न स्वर तथा व्यञ्जन वर्णों के परवर्ती होने पर चत्वार्-शब्दस्थ 'वा' शब्द को उत्त्व आदेश होता है ॥१९७।

[दु० वृ०]

'चत्वार्' इत्येतस्य वाशब्दस्योत्वं भवति, अघुट्स्वरव्यञ्जनयोः ।चतुरः, चतुर्भिः, चातुरिकः, चतुर्थः, चातुर्यम्, प्रियचतयति ॥१९७।

[दु० टी०]

चतुरः । 'चत्वार्' इत्येतस्येति व्युत्पत्तिपक्षे **"चतेर्वार्"** (कात०उ० ५।३८)। शब्दप्रधानत्वादेकवचनम् ।चातुरिक इति ।क्रीतादित्वादिकण् ।चतुर्थ इति ।**"अन्तस्थो**

**डे र्थोः"** (२।६।१९)। प्रियाश्चत्वारो यस्येति विग्रहः। तमाचेष्ट इतीन्। **'लोपात् स्वरादेशो विधिर्बलवान्'** (का० परि० ३५) इति प्रागुक्तम्, पश्चादन्त्यस्वरादिलोपः। **'शब्दान्तरस्य विधिः प्राप्नुवन्न नित्यो भवितुमर्हति'** (व्या० प० ७७) इति, तदयुक्तम्। परत्वाद् अन्त्यस्वरादिलोप एव स्यात्। परिभाषां हि बलाबलयुक्तिर्बाधते। अन्यथा 'तत्कुलम्' इत्यादिषु लोपात् स्वरादेश एव स्यात्। तर्हि भावप्रत्ययबलात्। **भावः खलु जातिः**। तस्याश्च सदा सद्भावात् कुतस्तदपेक्षया परत्वं युज्यते। **जातिरन्वाख्यायमाना** व्यक्तिमन्तरेण नोपलभ्यते इति उकारः प्रवर्तते। शब्दग्रहणं **स्पष्टार्थमेव**। 'वा उत्त्वम्' इति कृते विकल्पो नाशङ्क्यते, असंहितत्वाच्चतुरः इति निर्देशाच्च ॥१९७।

## [वि० प०]

चतुरः। **चातुरिक** इति। चतुर्भिः क्रीत इति क्रीतादित्वाद् इकण् (२।६।८)। चतुर्थ इति। **"संख्यायाः पूरणे डमौ"** (२।६।१६) इति डप्रत्ययः। **"अन्तस्थो डे र्थोः"** (२।६।१९) इति मध्ये थकारागमः। प्रियचतयतीति। प्रियाश्चत्वारो यस्यासौ प्रियचत्वः, प्रियचत्वारमाचष्टे इतीनि कृते 'लोपस्वरादेशयोः स्वरादेशविधिर्बलवान्' (का० परि० ३५) इति पूर्वम् उत्वे कृते पश्चादिनि **"लिङ्गस्य"** (२।३।५६) इत्यादिनाऽन्त्यस्वरादिलोपः। ननु नित्यत्वात् प्रागेव अन्त्यस्वरादिलोपः कथन्न स्यात्, नैवम्। **'शब्दान्तरस्य विधिः प्राप्नुवन्ननित्यो भवितुमर्हति'** (व्या० प० ७७) इति, तर्हि परत्वाल्लोपः प्राप्नोति? सत्यमेतत्। किन्तु उत्वमिति भावप्रत्ययान्तोऽयम्। भावश्च जातिः तस्याश्चामूर्तत्वात् पूर्वपरव्यवहारायोगान्न परत्वमस्तीति। उकारस्तर्हि कथं प्रवर्तते इति चेत्, सत्यम्। व्यक्तिमन्तरेण जातिर्न संभवतीति उकारः प्रवर्तते। **चातुर्यम्** इति। चतुर्णां भाव इति विग्रहे **"यण् च प्रकीर्तितः"** (२।६।१४) इति यण् ॥१९७।

## [समीक्षा]

'चत्वार् + शस्, चत्वार् + भिस्, चत्वार् + इकण्, चत्वार् + ड, चत्वार् + यण्, प्रियचत्वार् + इन्' इस अवस्था में कातन्त्रकार 'वा' शब्द को 'उ' आदेश करके 'चतुरः, चतुर्भिः, चातुरिकः, चतुर्थः, चातुर्यम्, प्रियचतयति' शब्दरूप सिद्ध करते हैं। पाणिनि 'चतुर्' को ही प्रातिपदिक मानते हैं, अतः उन्हें इन शब्दों के सिद्ध्यर्थ यह प्रक्रिया नहीं अपनानी पड़ती है। जस्प्रत्ययान्त 'चत्वारः' रूप बनाने के लिए उन्हें **"चतुरनडुहोरामुदात्तः"** (अ० ७।१।९८) से 'आम्' आगम करना पड़ता है।

**[रूपसिद्धि]**

१. **चतुरः**। चत्वार् + शस्। प्रकृत सूत्र से 'वा' को उ-आदेश तथा सकार को विसर्ग।

२. **चतुर्भिः**। चत्वार् + भिस्। पूर्ववत् वा को उ तथा विसर्गादेश।

३. **चातुरिकः**। चत्वार् + इकण्। इकण् प्रत्यय, वा को उ, **"वृद्धिरादौ सणे"** (२।६।४९) से आदिवृद्धि तथा विभक्तिकार्य। चतुर्भिर्दीव्यति।

४. **चतुर्थः**। चत्वार् + ड। चतुर्णां पूरणः। **"संख्यायाः पूरणे डमौ"** (२।६।१६) से ड-प्रत्यय **"अन्तस्थो डे र्थोः"** (२।६।१९) से 'य' आगम, वा को उ, अलोप तथा विभक्तिकार्य।

५. **चातुर्यम्**। चत्वार् + यण्। चतुर्णां भावः। **"यण् च प्रकीर्तितः"** (२।६।१४) से यण् प्रत्यय, वा को उ, वृद्धि तथा विभक्तिकार्य।

६. **प्रियचतयति**। प्रियचत्वार् + इन्। प्रियाश्चत्वारो यस्य, तमाचष्टे। **"इन् कारितं धात्वर्थे"** (३।२।९) से इन्प्रत्यय, **'लोपस्वरादेशयोः स्वरादेशो विधिर्बलवान्'** (का० परि० ३५) इस न्याय के अनुसार पहले वा को उ, तदनन्तर **"इनि लिङ्गस्यानेका०"** (३।२।१२) से उर्-भाग का लोप, धातुसंज्ञा, वर्तमाना में 'ति' प्रत्यय, अन्-विकरण, गुण तथा **"ए अय्"** (१।२।१२) से ए को **'अय्'** आदेश ॥१९७।

## १९८. अनडुहश्च [२।२।४२]

**[सूत्रार्थ]**

घुट्-भिन्न स्वर तथा व्यञ्जन वर्णों के पर में रहने पर 'अनड्वाह्' शब्दान्तर्गत 'वा' शब्द को उत्व होता है ॥१९८।

**[दु० वृ०]**

'अनड्वाह्' इत्येतस्य वाशब्दस्योत्वं भवति अघुट्स्वरव्यञ्जनयोः। अनडुहः, अनडुहा, अनडुद्भ्याम्, आनडुहिकः, अनडुह्यम्, अनडुही, अनड्वाही स्त्री वेत्येके ॥१९८।

[दु० टी०]

**अन०।** अनड्वाहीत्यादि। "**अनसि डश्च**" (४।३।६२) इति विण्। 'अनड्वाहीमालभेत' (द्र०, म० भा०-पस्प०, पृ० १७) इति **छन्दस्येव** दृश्यते, **भाषायामप्यन्ये** वर्णयन्तीति। अनडुहयतीति पूर्ववत् ॥१९८।

[वि० प०]

**अन०।** आनडुहिक इति। अनडुहा चरतीति "**तेन दीव्यति**" (२।६।८) इत्यादिना इकण्। अनडुद्भ्यामिति "**विरामव्यञ्जनादिषु०**" (२।३।४४) इत्यादिना हकारस्य दकारः। अनडुह्यम् इति। अनडुहि साध्विति "**नावस्तार्ये**" (२।६।९) इति यप्रत्ययः। यदा तु '**आनडुह्यम्**' इति पुस्तकान्तरे पाठस्तदा भावे यण् प्रत्यय एव। अनडुहीत्यदि।'**अनड्वाहीमालभेत**' (द्र०, म० भा०- पस्प०, पृ० १७) प्रयोगो दृश्यते। **भाषायामपि केचिद्** वर्णयन्ति। **अयं** पुनर्मन्यते- **भाषायामी**दृशः प्रयोगो न दृश्यते इति ॥१९८।

[समीक्षा]

'अनड्वाह्+शस्, अनड्वाह्+टा, अनड्वाह्+भ्याम्, अनड्वाह्+इकण्, अनड्वाह्+य, अनड्वाह्+ई' इस अवस्था में कातन्त्रकार को 'अनडुहः, अनडुहा, अनडुद्भ्याम्' आदि शब्दों के साधनार्थ 'अनड्वाह्' -घटित 'वा' को 'उ' आदेश करना पड़ता है। पाणिनि 'अनडुह्' शब्द को ही प्रातिपदिक मानते हैं, अतः उन्हें यह प्रक्रिया नहीं अपनानी पड़ती है, 'सि से औ' (५ प्रत्यय) तक '**अनड्वान्**' आदि शब्दों के निष्पादनार्थ "**चतुरनडुहोरामुदात्तः**" (अ० ७।१।९८) से '**आम्**' का आगम करना पड़ता है।

[रूपसिद्धि]

१. **अनडुहः**। अनड्वाह्+शस्। प्रकृत सूत्र से 'वा' को उ तथा सकार को विसर्गादेश।

२. **अनडुहा**। अनड्वाह्+टा। पूर्ववत् 'वा' को 'उ'।

३. **अनडुद्भ्याम्**। अनड्वाह्+भ्याम्। प्रकृत सूत्र से 'वा' को उ तथा "**विरामव्यञ्जनादिष्वनडुन्नहिवन्सीनां च**" (२।३।४४) से हकार को दकारादेश।

४. **आनडुहिकः** । अनड्वाह् + इकण् । अनडुहा चरति । **"तेन दीव्यति संसृष्टं तरतीकण् चरत्यपि"** (२।६।८) से इकण्-प्रत्यय, प्रकृत सूत्र से 'वा' को 'उ' **"वृद्धिरादौ सणे"** (२।६।४९) से आदिवृद्धि तथा विभक्तिकार्य ।

५. **अनडुह्यम्** । अनड्वाह् + य । अनडुहि साधु । **"तत्र साधौ यः"** (२।६।९) से य-प्रत्यय, वा को उ तथा विभक्तिकार्य ।

६. **अनडुही-अनड्वाही** । अनड्वाह् + ई । **"नदाद्यन्चिवाह्यनूस्यन्तृसखिनान्तेभ्य ई"** (२।४।५०) से स्त्रीलिङ्ग में 'ई' प्रत्यय, वा को उ तथा विभक्तिकार्य । 'अनड्वाहीमालभेत' इस वैदिक वचन के आधार पर कुछ आचार्य यहाँ विकल्प से वा को उ आदेश मानते है। अतः पक्ष में 'अनड्वाही' प्रयोग ।

## १९९. सौ नुः [२।२।४३]

### [सूत्रार्थ]

'सि' प्रत्यय के पर में रहने पर 'अनड्वाह्' शब्द में 'नु' का आगम होता है ।।१९९।

### [दु० वृ०]

'अनड्वाह्' इत्येतस्य सौ परे नुरागमो भवति । अनड्वान् । साविति किम्? अनड्वाहौ ।।१९९।

### [दु० टी०]

**सौ०** । नुरित्युकारः **"आगम उदनुबन्धः स्वरादन्त्यात् परः"** (२।१।६) इति प्रतिपत्त्यर्थः ।।१९९।

### [क० च०]

**सौ०** । अथ 'सौ न्' इति क्रियताम्, किमुकारग्रहणेन । **'वर्णान्तस्य विधिः'** (का० परि० ५) इति न्यायाद् अकारस्य नकारे साध्यं सिध्यति । नैवम् । **"चतुरो वाशब्दस्योत्वम्"** (२।२।४) इत्यतो वाशब्दानुवृत्त्या वाशब्दस्य प्राप्नोति, ततोऽनिष्टरूपं स्यात् । नैवम् । **"सम्बुद्धावुभयोर्ह्रस्वः"** (२।२।४४) इति ह्रस्वविधानाद् वाशब्दस्य भविष्यति ।अन्यथा वाशब्दस्य नकारे कृते ह्रस्वस्थानाभावाद् वचनस्य वैफल्यं स्यात् ।

अथ संबुद्धौ तस्य चरितार्थत्वादसंबुद्धौ वाशब्दस्य नकारः स्यादिति । नैवम् । **"चतुरो वाशब्दस्योत्वम्"** (२।२।४१) इत्यतः उत्वस्यानुवर्तनाभावात् तत्सम्बन्धी वाशब्दोऽपि नानुवर्तते, एकयोगनिदिष्टत्वात् ततोऽकारस्य भविष्यति, किमुकारग्रहणेन । नैवम् । तथापि लिङ्गान्तत्वान्नकारलोपः स्यादिति ।

अथ नकारकरणसामर्थ्यादिव नलोपो न भविष्यति चेत्, न । सम्बुद्धौ नकारकरणस्य सार्थकत्वात् । यथा हे अनड्वन्! इति । तस्मादसंबुद्धावपि नकारस्थित्यर्थं नुरित्येवं विधेयमिति । वृत्तौ सिग्रहणखण्डने **'अघुट्स्वरव्यञ्जनयोः'** इति कथन्नानुवर्तते, सत्यम् । **"अनडुहो नुश्च"** इत्येकयोगाकरणात् । अत एव **'अनड्वाहौ'** इति घुटि प्रत्युदाहृतम् । नुरिति स्वरानुबन्धसाहचर्यात् साविति सेरेव ग्रहणं न सुपः, तस्य व्यञ्जनानुबन्धत्वात् ॥१९९।

**[समीक्षा]**

'अनड्वाह् + सि' इस अवस्था में कातन्त्रकार 'नु' आगम करके 'अनड्वान्' शब्द सिद्ध करते हैं । पाणिनि 'अनडुह्' प्रातिपदिक मानते हैं, अतः उन्हें **"सावनडुहः"** (अ० ७।१।८२) से नुमागम के अतिरिक्त **"चतुरनडुहोरामुदात्तः"** (अ० ७।१।९८) से 'आम्' आगम भी करना पड़ता है ।

**[रूपसिद्धि]**

१. **अनड्वान् ।** अनड्वाह् + सि । प्रकृत सूत्र से 'नु' आगम, **"आगम उदनुबन्धः स्वरादन्त्यात् परः"** (२।१।६) के नियमानुसार अन्तिम स्वर 'आ' के अनन्तर उसकी योजना, सि- लोप तथा "संयोगान्तस्य लोपः" (२।३।५४) से संयोगान्त हकार का लोप ॥१९९॥

## २००. संबुद्धावुभयोर्ह्रस्वः [२।२।४४]

**[सूत्रार्थ]**

सम्बुद्धि- संज्ञक 'सि' प्रत्यय के परे रहते 'चत्वार्-अनड्वाह्' इन शब्दों में ह्रस्व आदेश होता है ॥२००।

**[दु० वृ०]**

उभयोश्चतुरनडुहोः संबुद्धौ ह्रस्वो भवति । हे प्रियचत्वः ! हे अनड्वन्! ॥२००।

[दु० टी०]

संबुद्धौ० । उभयोरित्यवयवावयविसंबन्धे षष्ठी उभयोः स्वरस्य ह्रस्व इत्यर्थः । तयोरिति न कृतम्, उत्तरार्थं पर्यायश्चेति ॥२००।

[वि० प०]

संबुद्धौ । हे प्रियचत्वरिति । प्रियाश्चत्वारो यस्यासौ प्रियचत्वाः, तस्य संबोधने हे प्रियचत्वः! **"आमन्त्रणे च"** (२।४।१८) इति सिः ॥२००।

[क० च०]

संबुद्धौ० ।ननु 'सम्बुद्धावुभयोरत्' इति क्रियताम्, ततश्च तकारस्योच्चारणार्थत्वादेकवर्णत्वे सति ह्रस्वस्य स्वरसादृश्यादाकारस्य स्थाने भविष्यति, किं ह्रस्वग्रहणेन । न च **'वर्णान्तस्य विधिः'** (का० परि० ५) इति न्यायात् संबुद्धेर्व्यवहितत्वाच्च चत्वार्-शब्दस्थरेफस्य अनड्वाह्शब्दस्थहकारस्य च स्थान इति वाच्यम्, विशेषाभावात् । तथाहि चत्वार्- शब्दस्थरेफस्य स्थानेऽकारे कृते दीर्घात् परलोपे संबुद्धेः सकारस्य विसर्गे कृते 'हे प्रियचत्वाः' इति प्रयोगः साध्यः । एतच्च रूपं सूत्रमकृत्वापि व्यञ्जनात् सिलोपे रेफस्य विसर्जनीये कृते सिध्यति ।

एवम् 'अनड्वाह्'-शब्दस्थहकारस्य स्थानेऽकारे ततः परं **"सौ नुः"** (२।२।४३) इति न्वागमे कृते पश्चाद् दीर्घात् परलोप इत्यकारलोपे 'अनड्वान्' इति रूपं साध्यम् । एतच्चाकारग्रहणमकृत्वापि हकारात् पूर्वं न्वागमे संयोगान्ताकारलोपे व्यञ्जनात् सिलोपे सिध्यति । तस्मात् सूत्रवैयर्थ्यादिव रेफहकारयोः स्थाने न भविष्यति किन्त्वाकारस्यैव किं ह्रस्वग्रहणेन ? नैवं विशेषोऽस्ति ।तथाहि चत्वार्- शब्दस्थरेफस्याकारे संबुद्धिसकारस्य विसर्गे विसर्गस्यारेफप्रकृतित्वाभाव एव प्रयोजनम् । ततश्च **'हे प्रियचत्वः ! आगतः'** इत्यत्र **"रप्रकृति०"** (१।५।१४) इत्यादिना रेफाभावः सिद्धः । अन्यथा यदि भवन्मतेन साध्यते तदा विसर्गस्य रेफप्रकृतित्वात् 'हे प्रियचत्वरागतः' इति रेफेऽनिष्टप्रयोगः स्यात् । तन्न युक्तम् । यावता रेफस्थानेऽकारे कृते दीर्घात् परलोपे भूतपूर्वह्रस्वमाश्रित्य संबुद्धौ सेर्लोपे कृते कुतो रेफस्य विसर्गः, कुतो वा संबुद्धिसकारस्य विसर्ग इति ।

न च यत्र संबुद्धिमाश्रित्य ह्रस्वः कृतस्तत्रैव भूतपूर्वगतिरिति **हेमकर**मतं वाच्यम्, **"ह्रस्वनदी०"** (२।१।७१) इत्यत्र दूषितत्वात्, तर्हि तद्ग्रहणे कृते 'हे

प्रियचत्वा' इति आकारान्तं पदं भविष्यति, तदेव दूषणम् । तस्मात् हे प्रियचत्वरिति प्रयोगसिद्ध्यर्थं ह्रस्वग्रहणं कर्तव्यमेव, ततश्च तदर्थं क्रियमाणं 'हे अनड्वन्' इत्यपि विषयीकरोति ॥२००।

**[समीक्षा]**

'हे प्रियचत्वार् + सि, हे अनड्वाह् + सि' इस अवस्था में कातन्त्रकार वकारोत्तरवर्ती अकार को ह्रस्व आदेश करके 'हे प्रियचत्वः ! हे अनड्वन्!' रूप सिद्ध करते हैं । पाणिनि यतः 'चतुर्, अनडुह्' प्रातिपदिक मानते हैं, अतः संबुद्धि-संज्ञक 'सु' प्रत्यय के परे रहते 'आम्' आगम न करके **"अम् संबुद्धौ"** (अ० ७।१।९९) से 'अम्' आगम का विधान करते हैं, फलतः 'हे प्रियचत्वः! हे अनड्वन्!' शब्दरूप सिद्ध होते हैं।

**[रूपसिद्धि]**

१. **हे प्रियचत्वः!** हे प्रियचत्वार् + सि । **"व्यञ्जनाच्च"** (२।१।४९) से सि-लोप, प्रकृत सूत्र से ह्रस्व तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से रेफ को विसर्गादेश । प्रियाश्चत्वारो यस्य तत्संबुद्धौ ।

२. **हे अनड्वन्!** हे अनड्वाह् + सि । पूर्ववत् सिलोप, नु-आगम, ह्रस्व तथा संयोगान्तलोप ॥२००।

## २०१. अदसः पदे मः [२।२।४५]

**[सूत्रार्थ]**

विभक्ति के परे रहते अदस्-शब्दसंबन्धी पदकार्य के प्रसङ्ग में द् को म् आदेश होता है ॥२०१।

**[दु० वृ०]**

अदसः पदे सति दस्य मो भवति विभक्तौ । अमुष्मात्, अमुष्मिन् । विभक्ताविति किम् ? अदस्यति, अदस्त्वम्, अदःपुत्रः । अदमुयङ्, अमुद्र्यङ्, अमुमुयङ्, अदद्र्यङ् इति वक्तव्यम् ॥२०१।

[दु० टी०]

**अदसः ।** अदस इत्यादि । पूर्वपरयोः समुदायोऽर्थप्रतिपत्तिहेतुः पदं मकारमन्तरेण तन्नास्तीति पदग्रहणं सर्वकार्यप्रतिपत्त्यर्थम्, श्रुतत्वाद् अदस एव । **"एद् बहुत्वे त्वी"** (२।३।४२) इति वचनादेकवर्णोऽयम् **'अन्त्याभावेऽन्त्यसदेशस्य'** (का० परि० ३९) ग्रहणं भवति । कथम् 'अमुकस्मात्' इति, दकारोऽयमनेकवर्णव्यवहित इति ? सत्यम् । व्यवस्थितवाचनात् पश्चाद् अग् भवति यद्येवम्, 'अमुया स्त्रिया, अमुयोः स्त्रियोः' इति न सिध्यति, तर्हि 'बहुवचनम् अमि' इति निर्देशात्, दकारः स्थानी दृश्यते । अन्यत्रापि दकार एव स्थानी समूहनीयः इति को हि नाम दृष्टपरिकल्पनां विहायादृष्टं परिकल्पयतीति । पद इति भावलक्षणा सप्तमी पदं वाऽऽधारः, पदावयवस्य दकारस्य मकार इति 'उभयोः' इत्यनुवर्तनाद् विभक्ताविति लभ्यते । उभयोः प्रकृतिविभक्त्योः सत्योरदसः पदे मो भवतीत्यर्थः ।

अमुमिच्छतीति यिन्, **"तत्वौ भावे"** (२।६।१३) अमुष्य पुत्र इति विग्रहः । वाक्यसमासपक्षे अन्तर्वर्तिनीं विभक्तिम् आश्रित्य पदसंज्ञास्तीति । किञ्च 'अदः कुलम्' इति स्यमोर्लोपे सिद्धं भवति, अदसोऽप्रधानत्वे तु न भवति । तस्मान्नेदम् अदसः पदं किन्तर्हि समासश्चेति अमुमतिक्रान्तौ **अत्यदसौ, अत्यदसः** इति । अदसोऽद्र्यन्तस्य यथासम्भवं विभाषेत्यर्थः ।

उक्तं च,

> **परतः केचिदिच्छन्ति केचिदिच्छन्ति पूर्वतः ।**
>
> **उभयोः केचिदिच्छन्ति केचिन्नेच्छन्ति चोभयोः** ॥इति ॥२०१।

[वि० प०]

**अदसः ।** पद इति । अदसः सम्बन्धिनि पदे सति श्रुतत्वाद् अदस एव दकारस्य अकारः । पूर्वपरयोः समुदायोऽर्थप्रतिपत्तिहेतुः **पदम्** । तच्च यद्यपि मकारमन्तरेण न संभवति, तथापि पदग्रहणादिहान्येषु पदसम्बन्धिकार्येषु कृतेषु सत्सु पश्चान्मकारो भवतीत्यर्थः । ननु **'वर्णान्तस्य विधिः'** (का० परि० ५) इति अन्तस्यैव सकारस्य प्राप्नोति कथं दस्येति ? सत्यम् । तस्य त्यदाद्यत्वेनाघ्रातत्वात् । तर्हि अकारस्य कथन्न भवतीति । नैवम् । **"एद् बहुत्वे त्वी"** (२।३।४२) इति वचनाद् यद्यन्तस्याकारस्य मत्वं स्यात्

तदानीमकारस्याभावे नास्त्येकार इति कथमीकारः स्यादिति । आदेरपि न भवति **'अन्त्याभावेऽन्त्यसदेशस्य ग्रहणम्'** (का० परि० ३९) इति न्यायात् ।

यद्येवम्, कथममुकस्मादिति अकि कृते सति अनेकवर्णव्यवहितस्य दकारस्य मत्वं स्यादिति । नैवम्, तत्र बहुलत्वात् कृते मकारे पश्चादग् भविष्यति । तर्हि कथम् 'अमुया स्त्रिया, अमुयोः स्त्रियोः' इत्ययादेशे पदकार्ये कृतेऽनेकवर्णव्यवधानादिति ? सत्यम् । बहुवचनममीति निर्देशादकार एव स्थानी दृश्यते । अतोऽन्यत्रापि स एव स्थानी समूहनीयः । **को हि नाम दृष्टपरिकल्पनां विहाय अदृष्टं परिकल्पयतीति ।** विभक्ताविति पूर्वसूत्रादुभयोरित्यनुवर्तनाद् विभक्ताविति लभ्यते । उभयोः प्रकृतिविभक्त्योः सत्योः अदसः पदे मो भवतीत्यर्थः । 'अमुष्माद्, अमुष्मिन्' इति कृते त्यदाद्यत्वे ङसिः स्यात् । **"ङिः स्मिन्"** (२।१।२७) इति कृते दकारस्य मकारः, **"उत्वं मात्"** (२।३।४१) इति उत्वम् ।

विभक्ताविति । अमुमिच्छति यिन्, अमुष्य भाव इति त्वप्रत्ययः । असौ पुत्रोऽस्येति विग्रहेऽन्तर्वर्तिनीं विभक्तिमाश्रित्य सत्यामपि पदसंज्ञायां न भवति । तथा 'अदः कुलम्' इति स्यमोर्लोपे न भवति उभयोरभावात् । तथा अमुमतिक्रान्तेन **अत्यदसेति** । सत्यामपि विभक्तौ न भवति । न खल्वदसः पदमिदम्, किन्तर्हि समासस्येति । अदमुयङ्ङित्यादि । अदसः परादञ्चतेः अमुमञ्चतीति क्विप् । **"विष्वग्देवयोश्च"** (४।६।७०) अन्त्यस्वरादेरद्र्यञ्चतौ क्वाविति अदसः अस्-शब्दस्याद्र्यादेशः । ततो यथायोगं दस्य मकारः **"उत्वं मात्"** (२।३।४१) इत्युत्वम् । वक्तव्यमिति व्याख्यानं कर्तव्यमिति तत्रेदं व्याख्यानम् – **केचिदिच्छन्ति, केचिन्नेच्छन्ति** । **ये** नेच्छन्ति तन्मतमिह प्रमाणमित्यर्थः । तथा चोक्तम् –

**परतः केचिदिच्छन्ति केचिन्नेच्छन्ति पूर्वतः ।**
**उभयोः केचिदिच्छन्ति केचिन्नेच्छन्ति चोभयोः ॥२०१।**

## [क० च०]

**अदसः ।** वर्णान्तस्य विधिरिति । ननु पदग्रहणसामर्थ्यदिवमकारातिरिक्तेषु पदकार्येषु पदशब्दो लक्षणया वर्तते इत्युक्तम्, तदा कथं 'वर्णान्तस्य विधिः' (का० परि० ५) इति न्यायेनान्तभूतस्य सकारस्य प्राप्तिरिति ? सत्यम् । पदशब्देन पदकार्यं

लक्ष्यते । ततश्च यावद् यत् किञ्चिच्च संभवति, तत्र यावत् पदकार्यपक्षे देश्यमेव नास्ति । यदि यत् किञ्चित् पदकार्यं लक्ष्यते तदा लिङ्गसंज्ञाविभक्तिकरणादिस्वरूपे पदकार्ये कृते **'वर्णान्तस्य विधिः'** (का० परि० ५) इति न्यायेनान्तभूतस्य सकारस्य कथं मकारो न स्यादित्याह – **नन्वित्यादि** ।

सत्यमिति पदग्रहणसामर्थ्यादिव मकारातिरिक्तस्य यावत् पदकार्यस्य लक्षितत्वेन त्यदादित्वेनाघ्रातत्वादित्यर्थः । अन्यथा पदग्रहणाभावेऽपि लिङ्गसंज्ञाविभक्तिविधान-करणादिति स्वरूपपदकार्यं सर्वत्र संभवतीति । आदेरपीति । पर्यायेण दस्याकारस्य च स्यात्, न त्वादेः । तदा पुनः **"एद् बहुत्वे त्वी"** (२।३।४२) इति वचनं व्यर्थं स्यात्, परस्यैत्वस्याभावात् । पर्यायपक्षेऽपि यदा दकारस्य मकारस्तदा सार्थकः स्यादिति भावः । **भट्टेन** पुनरन्यथैव व्याख्यातम् । नैवम्, तत्र बहुलार्थत्वादित्यादि । अथ पदैकदेशस्य विभक्तिनिमित्ताश्रयणेनाव्यवधानेन प्राप्तौ **"एद् बहुत्वे त्वी"** (२।३।४२) इति बहुवचनसामर्थ्यादेकवर्णव्यवधानेऽपि भवतीति । एतद् युक्तिमूलकेन **'अन्त्यसदे-शस्यापि ग्रहणम्'** (का० परि० ३९) इति परिभाषेति । ततोऽमुकस्मादित्यत्राक्प्रत्ययात् पूर्वं दस्य स्थाने मकारे कृते पश्चादक्प्रत्यये सति निमित्तस्य विभक्तेरति-व्यवधानान्निमित्ताभावान्नैमित्तिकमकारस्याभावः कथं न स्यात्, सत्यम् । **'प्राक् प्रवृत्तं कार्यं बहिरङ्गेण नापसार्यते'** इति न्यायान्न निवर्तते । अक्प्रत्ययस्य बहिरङ्गत्वम्, बाहुलकत्वात् । पश्चाद् भूतत्वेनोभयाश्रितत्वात् । अन्यथा बाहुल्याश्रयणेन किं साधितम् ।

अथ मकारे कृते मकारदर्शनादेव **"उत्वं मात्"** (२।३।४१) इति कथन्न वर्तते ? सत्यम् । अत्रापि बाहुल्याश्रयणेन उत्वस्य पूर्वमक्प्रत्ययो बोद्धव्य इति न दोषः । बहुवचनममीति निर्देशादिति । ननु 'अमी' इत्यत्र **'अन्त्याभावेऽन्त्यसदेशस्य ग्रहणम्'** (का० परि० ३९) इति न्यायमादाय एकवर्णव्यवधानेनैव ज्ञापकस्य सिद्धत्वात् 'अमुया स्त्रिया' इत्यत्र दृष्टान्तेनातिव्यवधाने कथं साध्यते । अतः को हि नाम दृष्टेत्यादिना यदुक्तं तदपि न संगच्छते, अतिव्यवधाने प्राप्तेरभावात् । सत्यम् । विभक्तिनिमित्तमाश्रित्य **'अन्त्याभावेऽन्त्यसदेशस्यापि ग्रहणम्'** (का० परि० ३९) इत्याद्रियते, तस्यानादरेणापि साध्यस्य सिद्धिर्भवति । तथाहि **"एद् बहुत्वे त्वी"** (२।३।४२) इत्यत्र मादिति विशेषणाद् दकारस्यैव मकारो दृष्टः । अतोऽन्यत्रापि क्लिप्तौ व्यवधानेऽपि स एव

कल्प्यते ।एतदेवाह – **को हि नामे**त्यादि ।अस्तु वा विभक्तिनिमित्तत्वेन परिभाषावतारस्तथापि न दोषः । एतत्प्रकरणप्रस्तावान्मकारातिरिक्तं पदकार्यमेतत्प्रकरणविहितमेव ग्राह्यम्, न सन्धिप्रकरणमिति । एतदेवाह – **को हि नामे**त्यादि ।

मकारे कृते इति । एतेनायादेशात् प्राङ् मकारे कृते मादिति विशेषणाद् एकारस्योत्वं कथं न स्यात् ? सत्यम् । **'वार्णो विधिरन्तरङ्गः'** (का० परि० ८०) इति न्यायादयादेशः प्राप्नोति । **अन्तर्वर्तिनीं विभक्ति**माश्रित्येति । ननु कथमिदमुक्तम् । 'अदस्यति' इत्यादौ यिन्नाय्येर्नलोप एव करणीय इति नियमान्न भविष्यति तथा 'अदस्त्वम्, अदःपुत्रः' इत्यादिषु सुभोर्यदुक्तं तदेवेति न्यायान्न स्यादित्याह – तथेति । किञ्चेत्यर्थः ॥२०१।

**[समीक्षा]**

'अदस् + ङसि, अदस् + ङि' इस स्थिति में द् को म् तथा अ को उ आदेश करके कातन्त्रकार तथा पाणिनि दोनों ही 'अमुष्मात्, अमुष्मिन्' शब्दरूप सिद्ध करते हैं । एतदर्थ कातन्त्रकार को दो सूत्र बनाने पड़े हैं, जबकि पाणिनि ने **"अदसोऽसेर्दादु दो मः"** (अ० ८।२।८०) इस एक ही सूत्र से दो कार्य निर्दिष्ट किए हैं।

**[रूपसिद्धि]**

१. **अमुष्मात्** । अदस् + ङसि । **"त्यदादीनाम विभक्तौ"** (२।३।२९) से स् को अ, "अकारे लोपम्" (२।१।१७) से उस 'अ' का लोप, "ङसिः स्मात्" (२।१।२६) से ङसि को 'स्मात्' आदेश, प्रकृत सूत्र से द् को म् "उत्वं मात्" (२।३।४१) से अकार को उकार तथा दन्त्य स् का मूर्धन्यादेश ।

२. **अमुष्मिन्** । अदस् + ङि । **"त्यदादीनाम विभक्तौ"** (२।३।२९) से स् को अ, "अकारे लोपम्" (२।१।१७) से उसका लोप' "ङिः स्मिन्" (२।१।२७) से ङि को 'स्मिन्' आदेश, प्रकृत सूत्र से द् को म्, "उत्वं मात्" (२।३।४१) से मकारोत्तरवर्ती अकार को उकार तथा **"नामिकरपरः प्रत्ययविकारागमस्थः सिः षं नुर्विसर्जनीयषान्तरोऽपि"** (२।४।४७) से स् को मूर्धन्यादेश ॥२०१।

## २०२. अघुट्स्वरादौ सेट्कस्यापि वन्सेर्वशब्दस्योत्वम् [२।२।४६]

**[सूत्रार्थ]**

घुट्-भिन्न स्वरादि प्रत्यय के परे रहते इडागमसहित तथा इडागमरहित वन्स्-प्रत्ययस्थ 'व' के स्थान में 'उ' आदेश होता है ॥२०२।

[दु० वृ०]

अघुट्स्वरादौ प्रत्यये परे सेट्कस्याप्यसेट्कस्यापि वन्सेर्वशब्दस्योत्वं भवति। पेचुषः, पेचुषा, पेचुषी, पैचुषम्। विदुषः, विदुषा, विदुषी, वैदुषम्। ये च वक्तव्यम् – पैचुष्यम्, वैदुष्यम् ॥२०२।

[दु० टी०]

**अघुट्०।** घुट्प्रत्ययादन्योऽघुट्प्रत्ययः उच्यते। स्वर एवादिर्यस्येति बहुव्रीहिः। अघुट् चासौ स्वरादिश्चेति विग्रहः। आदिग्रहणबलात् प्रत्ययकृत इह पर्युदासो न स्यादिकृत इति। तेन विद्वदाश्रयो विद्वदर्थ इति सिद्धं भवति। सह इटा वर्तते इति सेट्कः वशब्द उच्यते न वन्सिः सन्निकृष्टोऽपि, विशेषणस्य विफलत्वाद् नघृदन्ताभ्यामन्यत्र कप्रत्ययो विभाषयेति। अपिशब्दो व्यभिचारार्थः। यद्येवम्, सेट्कग्रहणं किमर्थं व्यञ्जनादिभूत इट् तदभावे निवर्तते **'निमित्ताभावे नैमित्तिकस्याप्यभावः'** (का० परि० २६) इति न्यायात्। यथा स्फोटकाभावे तद्गतव्यथाभाव इति। ननु च वन्सुरत्र निमित्तम्, नैवम्। **"अर्तीणूघसैकस्वरातामिड्वन्सौ"** (४।६।६६) इत्यत्र 'वन्सौ' य एकस्वरस्तस्मादिड् भवत्यादिर्व्यञ्जनादेरसार्वधातुकस्येटष्टकारानुबन्धबलान्निश्चितम्, नैवम्। **प्रतिपत्तिगौरवं स्यात्।** किञ्च निमित्ताभावेऽपि क्वचिन्नैमित्तिकस्य सद्भावोऽपि दृश्यते।

**'पाचितः, पाचितवान्'** इति कारिताभावेऽपीटः स्थितिरेव यथा पितुरभावे पुत्रस्येति। वन्सेरिति क्वन्सुवन्सोर्ग्रहणम् अविशेषनिर्देशात्। इकारस्तु धातुनिरासार्थः, अन्यथा अनुषङ्गलोपे 'वस' इति निर्देशे 'चर्म वस्ते' इति क्विपि **'चर्मवस्'** इत्यत्रापि स्यात्। 'वन्सेरुस्' इति कृते सिद्धे इह साध्यसाधनप्रतीतिर्लघु निर्दिश्यते, उत्तरार्थं च वस्योत्वमिति कृतेऽप्यकार उच्चारणार्थ इत्यपि प्रतिपद्यते। अतः शब्दग्रहणम्। पेचुष इत्यादि। **"अस्यैकव्यञ्जन०"** (३।४।५१) इत्यादिनेत्वम् **"वेत्तेः शन्तुर्वन्सुः"** (४।४।४), 'परमविदुषः' इति भवत्येव। नात्र **'यस्मात् प्रत्ययविधिस्तदादेस्तदन्तस्य'** (कालाप० २२२-५९) इत्याद्रियते। कारिते तु 'पेचिवयति, विदुषयति' इति भवितव्यम्, प्रकरणान्तरत्वात्। भावप्रत्ययनिर्देशस्तु **सुखार्थ** एव। शब्दस्योरित्युच्यमाने सान्तोऽयमप्याशङ्क्यते। अधिकृतं पुनरघुट्स्वरग्रहणं प्रकरणान्तरग्राहकमेव मन्तुप्रत्ययेऽपि वक्तव्यम् – 'पेचुष्मान्, विदुष्मान्' इति ॥२०२।

[वि० प०]

**अघुट्०।** पेचुष इति। पचेः क्वन्सुकानौ परोक्षावच्चेति क्वन्सौ द्विर्वचनम्। अस्यैकव्यञ्जनेत्यादिना एत्वम् अभ्यासलोपश्च। ततः **"अर्तीण्घसैकस्वरातामिड्वन्सौ"** (४।६।७६) इतीट्' 'पेचिवन्स्' इति स्थिते **"अघुट्स्वरादौ"** (२।२।४६) इत्यादिना वकारस्य इटा सह उकारः। पेचुषीति। अन्सान्तत्वाद् ईः। पैचुषमिति "तस्येदम्" (२।६।७) इत्यण्। विदुष इति। **"वेत्तेः शन्तुर्वन्सुः"** (४।४।४)। इहासेट्कस्यैव वशब्दस्योत्वम्। ये च वक्तव्यमिति। तद्धितयकारस्याघुट्स्वरत्वमस्तीति उक्तमेव। 'पेचुषो भावः, विदुषो भावः' इति। **"यण् च प्रकीर्तितः"** (२।६।१४) इति यण्॥२०२।

[समीक्षा]

'पेचिवन्स्+शस्, पेचिवन्स्+टा, पेचिवन्स्+ई, पेचिवन्स्+अण्, विद्वन्स्+शस्, विद्वन्स्+टा, विद्वन्स्+ई, विद्वन्स्+अण्' इस स्थिति में कातन्त्रकार 'व' (व्+अ) को उ आदेश करके 'पेचुषः, पेचुषी, विदुषः, वैदुषम्' आदि शब्दरूप सिद्ध करते हैं। पाणिनि **"वसोः सम्प्रसारणम्"** (अ० ६।४।१३१) से व् को उ आदेश तथा **"सम्प्रसारणाच्च"** (अ० ६।१।१०८) से अकार को पूर्वरूप करते हैं। यह ज्ञातव्य है कि कातन्त्रकार शन्तृङ्प्रत्यय तथा 'वन्स्' आदेश नकारघटित करते हैं, परन्तु पाणिनि ने शतृ प्रत्यय तथा 'वस्' आदेश नकाररहित ही किए हैं।

[रूपसिद्धि]

१. **पेचुषः।** पेचिवन्स्+शस्। प्रकृत सूत्र द्वारा इकारसहित 'व' को उ आदेश, **"अनुषङ्गश्चाक्रुञ्चेत्"** (२।२।३९) से नलोप, **"नामिकरपरः"** (२।४।४७) से सकार को मूर्धन्य तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से स् को विसर्गादेश।

२. **पेचुषा।** पेचिवन्स्+टा। पूर्ववत् इकारसहित 'व' को उ, नलोप तथा सकार को मूर्धन्य आदेश।

३. **पेचुषी।** पेचिवन्स्+ई। **"नदाद्यन्चि०"** (२।४।५०) से ईप्रत्यय इकारसहित 'व' को उ, नलोप, सकार को मूर्धन्य, लिङ्गसंज्ञा, प्रथमाविभक्ति–एकवचन में 'सि' प्रत्यय, नदीसंज्ञा तथा **"ह्रस्वनदीश्रद्धाभ्यः सिर्लोपम्"** (२।१।७१) से सि–लोप।

४. **पेचुषम्।** पेचिवन्स् + अण्। पेचुष् इदम्। **"रागान्नक्षत्र०"** (२।६।७) से अण्– प्रत्यय, इकारसहित 'व' को उ, नलोप, स् को ष्, **"वृद्धिरादौ सणे"** (२।६।४९) से आदिवृद्धि, लिङ्गसंज्ञा, सिप्रत्यय तथा **"अकारादसम्बुद्धौ मुश्च"** (२।२।७) से सिलोप – 'मु' आगम।

५. **विदुषः।** विद्वन्स् + शस्। प्रकृत सूत्र से इट्रहित 'व' को उ, नलोप, सकार को मूर्धन्य तथा सकार को विसर्गादेश।

६. **विदुषा।** विद्वन्स् + टा। पूर्ववत् इट्– रहित 'व' को उ, नलोप तथा सकार को मूर्धन्य आदेश।

७. **विदुषी।** विद्वन्स् + ई। **"नदाद्यन्चिवाह्व्यन्स्यन्तृ०"** (२।४।५०) से ई– प्रत्यय, इट्रहित 'व' को उ, नलोप, स् को मूर्धन्य आदेश, लिङ्गसंज्ञा, सि - प्रत्यय तथा **"ह्रस्वनदीश्रद्धाभ्यः सिर्लोपम्"** (२।१।७१) से सिप्रत्यय का लोप।

८. **वैदुषम्।** विद्वन्स् + अण्। विदुष इदम्। **"रागान्नक्षत्र०"** (२।६।७) इत्यादि से अण् प्रत्यय, प्रकृत सूत्र द्वारा इट्रहित 'व' को उ, नलोप, सकार को मूर्धन्य, **"वृद्धिरादौ सणे"** (२।६।४९) से आदिवृद्धि, लिङ्गसंज्ञा, सि- प्रत्यय तथा **"अकारादसंबुद्धौ मुश्च"** (२।२।७) से सिलोप – 'मु' आगम ॥२०२।

## २०३. श्वयुवमघोनां च [२।२।४७]

### [सूत्रार्थ]

घुट्- भिन्न स्वरादि प्रत्यय के परे रहते 'श्वन्, युवन्, मघवन्' शब्दों में 'व' को 'उ' आदेश होता है ॥२०३।

### [दु० वृ०]

'श्वन् - युवन्- मघवन्' इत्येतेषां वशब्दस्योत्वं भवति, अघुट्स्वरादौ प्रत्यये परे। शुनः, शुना, शुनी। यूनः, यूना, यूनी। मघोनः, मघोना, मघोनी। अप्यधिकारात् **शौवनं** मांसम्। **यौवनं** वर्तते। **माघवनः** स्थालीपाकः। तद्धिते लक्ष्यतः **उपशुनम्,** शुनः सङ्कोचः **शौवः** ॥२०३।

[दु० टी०]

**श्वयुव०।** 'युवन्- मघवन्' शब्दयोरुत्वे समानदीर्घे उवर्णे ओ भवति। **'असिद्धं बहिरङ्गमन्तरङ्गे'** (का० परि० ३३) इत्यस्याभ्युपगमात् 'श्वन्' शब्दोऽयमधिकृतो नान्तो वा तत्साहचर्याद् इतरयोरपि नान्तयोर्ग्रहणम्, तेन युवतीनां समूहो **यौवतम्।** मघवतः पश्येति। श्वन्- युवन्- मघोनां चेति नान्तं पठन्**त्यन्ये** अनान्तव्यावृत्त्यर्थम्। अप्यधिकारादित्यादि।'शुनो विकारः, यूनो भावः' इति एवमादेरण्, गुणो वृद्धिरागमश्च द्वारादित्वात्। मघवा देवता अस्य स्थालीपाकस्येति देवतार्थेऽण्। तद्धिते लक्ष्यतः इति। लक्ष्यानुरोधेन भवति चेत्यर्थः। शुनः समीपम् इत्यव्ययीभावे राजाद्यन्तर्गणशब्दादेरत्प्रत्ययः संकोचार्थेऽणि न स्यादित्यर्थः। कारिते तु **'श्वनयति, यवयति'** **"स्थूलदूर०"** (अ०६।४।१५६) इत्यादिना अन्तस्थादेर्लोपो गुणश्च – **मघवयति**॥२०३।

[वि० प०]

**श्वयुव०।** अप्यधिकारादित्यादि।'शुनो विकारः, यूनो भावः' इत्येवमादित्वादण्। **"द्वारादीनां च"** (अ० ७।३।४) अपदाद्योरपीति वचनात् शुनो वृद्धिरागमः। यूनश्च **"वृद्धिरादौ सणे"** (२।६।४९) इति वृद्धिः। **माघवन** इति। मघवा देवता अस्य स्थालीपाकस्य इति देवतार्थे अण्। तद्धिते लक्ष्यतः इति। अप्यधिकारादिति सम्बन्धः। लक्ष्यतः इति लक्षणमनुसृत्य भवतीत्यर्थः। तेन पूर्वत्र न भवति, अत्र तु भवत्येव। उपशुनम् इति। शुनः समीपम् इति विग्रहे 'उपश्वन्' इति राजादिनिपातनाद् अत्। तथा संकोचार्थेऽण्प्रत्ययेऽपि न भवति। शुनः संकोचः **'शौवः'** इति **"तस्येदम्"** (२।६।७) इत्यण्, **"नस्तु क्वचित्"** (२।६।४५) इति नलोपः॥२०३।

[क० च०]

**श्वयुव०। वृत्तौ** यूनीति पाठो नास्तीति **केचित्। 'यूनी काममियं दुनोति हृदयं वैधव्यभावाद् वधूः'** इति **कुलचन्द्रः। अन्ये** तु **"यूनस्तिः"** (अ० ४।१।७७) इति नदादिविहितस्य ईकारस्य बाधकस्तिप्रत्ययोऽस्तीति। तेन युवतिरित्येव प्रयोगः। न चात्र **'लिङ्गग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्'** (का० परि० १७) इति न्यायादुत्वं वाच्यम्, विभक्तौ तस्यानित्यत्वात्। यन्मते यूनीति पाठस्तन्मते **"यूनस्तिः"** (अ० ४।१।७७) इत्यत्र वाऽनुवृत्तिरित्याशयः॥२०३।

**[समीक्षा]**

'श्वन् + शस्, श्वन् + टा, श्वन् + ई । युवन् + शस्, युवन् + टा, युवन् + ई । मघवन् + शस्, मघवन् + टा, मघवन् + ई, इस अवस्था में कातन्त्रकार 'श्वन्, युवन्, मघवन्' शब्दों के 'व' को 'उ' आदेश करके 'शुनः शुनी, यूना, मघोनः, मघोनी' आदि शब्दरूप सिद्ध करते हैं । पाणिनि ने एतदर्थ **"श्वयुवमघोनामतद्धिते"** (अ० ६।४।१३३) सूत्र से व् को सम्प्रसारण तथा **"सम्प्रसारणाच्च"** (अ० ६।१।१०८) से अकार को पूर्वरूप किया है । इस प्रकार पाणिनि का संज्ञाविधान, सम्प्रसारणविधि तथा पूर्वरूप कार्य प्रक्रियागौरव के ही साधक कहे जा सकते हैं ।

**[रूपसिद्धि]**

१. **शुनः** । श्वन् + शस् । प्रकृत सूत्र द्वारा 'व' को उ तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से स् को विसर्गादेश ।

२. **शुना** । श्वन् + टा । प्रकृत सूत्र से 'व' का 'उ' आदेश ।

३. **शुनी** । श्वन् + ई । **"नदाद्यन्चिवाह्यन्स्यन्तृ०"** (२।४।५०) से 'ई' प्रत्यय, प्रकृत सूत्र से 'व' को उ, लिङ्गसंज्ञा, सि-प्रत्यय तथा **"ह्रस्वनदीश्रद्धाभ्यः सिर्लोपम्"** (२।१।७१) से सि-प्रत्यय का लोप ।

४-६. **यूनः** । युवन् + शस् । **यूना** । युवन् + टा । **यूनी** । युवन् + ई । पूर्ववत् 'व' को 'उ' आदि आदेश ।

७-९. **मघोनः** । मघवन् + शस् । **मघोना** । मघवन् + टा । **मघोनी** । मघवन् + ई । पूर्ववत् 'व' को 'उ' आदि आदेश ।।२०३।

## २०४. वाहेर्वाशब्दस्यौ [२।२।४८]

**[सूत्रार्थ]**

घुट्-भिन्न स्वरादि प्रत्यय के परे रहते 'वाह्' शब्द-घटित 'वा' को 'औ' आदेश होता है ।।२०४।

**[दु० वृ०]**

वाहेर्वाशब्दस्यौर्भवति अघुट्स्वरादौ प्रत्यये परे । प्रष्ठौहः, प्रष्ठौहा, प्रष्ठौही, प्राष्ठौह्यम् ।।२०४।

[दु० टी०]

**वाहेर्वा०** । वाहेरितीकारः श्रुतिसुखार्थः । ननु किमर्थमौत्वम् अधिकृतेन उत्वेन । विणि गुणे अकारस्यौत्वं भविष्यति । अनवर्णान्ते चोपपदे वहेर्विण् दृश्यते? सत्यम् । एतद् औत्वम् **'असिद्धं बहिरङ्गमन्तरङ्गे'** (का० परि० ३३) इति न्यायस्य प्रमाणकम् । तेन 'संस्क्रियते, संस्क्रियात्' । भिन्नपदाश्रयः सुडसिद्धो भवति । यद्येवम् अनेन वाशब्दस्योत्वे कृते कथम् अकारस्यौत्वम्, अनित्यत्वाभ्युपगमाद् भविष्यति । शब्दग्रहणं विस्पष्टार्थम् । अन्यथा वाहेर्वाशब्दस्य विकल्पेन और्भवतीति मन्यते ॥२०४।

[वि० प०]

**वाहेर्वा०** । **प्रष्ठौह** इति । प्रष्ठो वहतीति **"वहश्च"** (४।३।६१) इति विण् ॥२०४।

[समीक्षा]

'प्रष्ठवाह् + शस्, प्रष्ठवाह् + टा, प्रष्ठवाह् + ई, प्रष्ठवाह् + यण्' इस अवस्था में कातन्त्रकार 'वा' को 'औ' आदेश करके 'प्रष्ठौहः, प्रष्ठौहा । प्रष्ठौही, प्राष्ठौह्यम्' शब्दरूप सिद्ध करते हैं। पाणिनि ने एतदर्थ ऊठ् सम्प्रसारण तथा वृद्धिविधान किया है – **"वाह ऊठ्, एत्येधत्यूठ्सु"** (अ० ६।४।१३२; १।८९) । कातन्त्रीय प्रक्रिया के भी अनुसार 'औ' आदेश के बाद 'अ' को 'औ' तथा परवर्ती औ का लोप होता है – **"ओकारे औ औकारे च"** (१।२।७)। अतः उभयत्र कार्यसंख्या की दृष्टि से साम्य ही कहा जा सकता है।

[रूपसिद्धि]

१. **प्रष्ठौहः** । प्रष्ठवाह् + शस् । प्रकृत सूत्र द्वारा 'वा' को 'औ' **"ओकारे औ औकारे च"** (१।२।७) से ठकारोत्तरवर्ती अ को 'औ' एवं परवर्ती औ का लोप, सकार को विसर्गादेश – **"रेफसोर्विसर्जनीयः"** (२।३।६३)।

२. **प्रष्ठौहा** । प्रष्ठवाह् + टा । पूर्ववत् 'वा' को 'औ' आदि ।

३. **प्रष्ठौही** । प्रष्ठवाह् + ई । **"नदाद्यन्चिवाह्०"** (२।४।५०) से स्त्रीलिङ्ग में 'ई' प्रत्यय, प्रकृत सूत्र से 'वा' को औ, लिङ्गसंज्ञा, सि-प्रत्यय तथा उसका लोप ।

४. **प्राष्ठौह्यम्** । प्रष्ठवाह् + यण् । **"यण् च प्रकीर्तितः"** (२।६।१४) से 'यण्' प्रत्यय, प्रकृत सूत्र से वा को औ, लिङ्गसंज्ञा, सि- प्रत्यय तथा **"अकारादसंबुद्धौ मुश्च"** (२।२।७) से सिलोप-'मु' आगम ।।२०४।

## २०५. अन्चेरलोपः पूर्वस्य च दीर्घः [२।२।४८]

### [सूत्रार्थ]

घुट्- भिन्न स्वरादि प्रत्यय के परे रहते 'अन्च्' के अकार का लोप तथा उससे पूर्ववर्ती को दीर्घ आदेश होता है ।।२०५।

### [दु० वृ०]

अन्चेरकारस्य लोपो भवति अघुट्स्वरादौ प्रत्यये परे, पूर्वस्य च दीर्घ आन्तरतम्यात् । प्रतीचः, प्रतीचा, प्रतीची, प्रातीच्यम् । गोऽचः, गोऽचा, गोऽची, गौच्यम् ।।२०५।

### [दु० टी०]

**अन्चे०** । अत एव ज्ञापकात् क्वावनुषङ्गलोपो नास्तीति गम्यते । नैवम् । अच इति निर्देशे किमयमच्प्रत्ययः, स्वरपर्यायो वेति विप्रतिपद्येत । ततश्च 'नोनुवः' इति अचोऽकारलोपेनैव नैमित्तिकस्याप्यभावे दीर्घः स्यात् । स्वरपर्याये च प्रतिगतोऽच्, अनुगतोऽच् **'प्रत्यच्, अन्वच्'** इत्यत्रापि स्यात् ।अचो विप्रतिपत्तिनिरासार्थं नकारोच्चारणं कथं ज्ञापकं भविष्यति । ननु इगेव धातुनिर्देशाय कल्प्यते कथं न ज्ञापकम्, **लोकोपचाराद्** वा । कथं प्रागिति अन्चेरस्तातिलोपे अनुषङ्गलोप इति । यद्येवम्, गुरुमञ्चतीति क्विपि कृते, 'गुर्वञ्च' इत्यत्रापि स्यात् ? सत्यम् । अप्यधिकारादन्चेः पूजायां न भवतीति प्रतिपत्तव्यम्, पूर्वस्य च दीर्घ इति अन्वाचयशिष्टोऽयञ्चकारः गामञ्चतीति क्विपि कृते यथासंभवं दीर्घ इति अलोपः स्यात् । अत एव 'अञ्चेरत् पूर्वम्' इति न कृतम् ।अन्चेरकारः पूर्ववर्णमापद्यते अपेक्षयेति पूर्वग्रहणे क्रियमाणेऽकारस्यैव दीर्घः स्याद् इति मन्यते, न च वक्तव्यम् 'अलोपदीर्घौ' इति विदध्यात् । एवमपि नैव स्थानिनियम इति ।। २०५।

### [वि० प०]

**अन्चे०** । ननु क्वावनुषङ्गलोपे सति अचेरिति निर्देशेन भवितव्यम्, ततः कथमयं **सानुषङ्गनिर्देशः** ? सत्यम् ।अयमेव निर्देशो ज्ञापयति – अन्चेः क्वावनुषङ्गलोपो

नास्तीति। प्रतीच इति। प्रत्यञ्चतीति क्विप्, ततः शस्, ङसिः, ङस् वा। **"अनुषङ्गश्चाक्रुञ्चेत्"** (२।२।३९) इत्यनुषङ्गलोपः। तथा गामञ्चतीति क्विप्, अत्र पूर्वो ह्रस्वो नास्तीति दीर्घत्वाभावेऽलोप एव स्यात्। इह चकारस्यान्वाचय-शिष्टत्वादिति ॥२०५।

**[क० च०]**

**अन्चे०।** ननु क्वावनुषङ्गलोप इति **पञ्जी**। ननु क्विबन्त एवान्चेरिति निर्देशः कथमवधारयितुं शक्यते। यावता धातुस्वरूपे इकारं कृत्वाऽप्यन्चेरिति निर्देशेन भवितव्यम् ? सत्यम्। अनेन सूत्रेण क्विबन्तधातोः कार्यं विधीयते तत औचित्यात् सूत्रेऽपि क्विप्यनुषङ्गलोपे इकारमुच्चारणार्थं कृत्वा निर्देश इत्याशयः। यद् वा साध्याहारं युज्यते इति **पञ्जी**। तथाहि अनेन क्विपि अनुषङ्गलोपे कार्यं विधीयते तत औचित्यात् क्विप्प्रत्ययं विधाय अनुषङ्गलोपे कृते अचेरिति निर्देशो युज्यते इत्याशयः। सत्यम् इत्यादि। अयमेव सानुषङ्गनिर्देशो ज्ञापयति – सानुषङ्ग एव कार्यभाग् भवतीति। एतदपि तदैवोपपद्यते, यदि अनुषङ्गलोपो न भवतीति ॥२०५।

**[समीक्षा]**

'प्रत्यन्च् + शस्, प्रत्यन्च् + टा, प्रत्यन्च् + ई, प्रत्यन्च् + यण्, गो अन्च् + शस्, गो अन्च् + टा, गो अन्च् + ई, गो अन्च् + यण्' इस अवस्था में कातन्त्रकार प्रकृत सूत्र द्वारा 'अन्च्' के अकार का लोप पूर्ववर्ती इकार को दीर्घ आदेश करके 'प्रतीचः, प्रतीचा, प्रतीची, प्रातीच्यम्' आदि शब्दरूप सिद्ध करते हैं। एतदर्थ पाणिनि ने दो पृथक् सूत्र बनाए हैं – **"अचः, चौ"** (अ० ६।४।१३८; ३।१३८)।

**[रूपसिद्धि]**

१. **प्रतीचः**। प्रत्यन्च् + शस्। प्रकृत सूत्र द्वारा 'अन्च्' के अकार का लोप, **'निमित्ताभावे नैमित्तिकस्याप्यभावः'** (का० परि० २७) के अनुसार अकार के अभाव में य् की निवृत्ति (प्रति न्च् अस्) हो जाने पर इकार को दीर्घ, **"अनुषङ्गश्चाक्रुञ्चेत्"** (२।२।३९) से न-लोप तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से विसर्गादेश।

२. **प्रतीचा**। प्रत्यन्च् + टा। पूर्ववत् अ-लोप, इ को दीर्घ तथा नकार का लोप।

३. **प्रतीची** । प्रत्यन्च् + ई । "नदाद्यन्चिवाह्०" (२।४।५०) इत्यादि से स्त्रीलिङ्ग में 'ई' प्रत्यय, अलोप, इकारदीर्घ, नलोप, लिङ्गसंज्ञा, सिप्रत्यय तथा उसका लोप ।

४. **प्रातीच्यम्** । प्रत्यन्च् + यण् । प्रतीचो भावः । "**यण् च प्रकीर्तितः**" (२।६।१४) से यण् – प्रत्यय, अकारलोप, इकारदीर्घ, नलोप, "**वृद्धिरादौ सणे**" (२।६।४९) से आदिवृद्धि, लिङ्गसंज्ञा, सि- प्रत्यय, सिलोप तथा 'मु' आगम – "**अकाराद् असंबुद्धौ मुश्च**" (२।२।७) ।

५-८. **गोऽचः** । गोऽन्च् + शस् । **गोऽचा** । गोऽन्च् + टा । **गोऽची** । गोऽन्च् + ई । **गौच्यम्** । गोऽन्च् + यण् । पूर्ववत् सभी कार्य, केवल पूर्ववर्ती ओकार को दीर्घभाव, क्योंकि सन्ध्यक्षर 'ए, ऐ, ओ, औ' ह्रस्व नहीं होते । व्याख्याकारों ने सूत्रस्थ चकार को अन्वाचयशिष्ट मानकर यह मन्तव्य व्यक्त किया है कि चकार के अन्वाचयशिष्ट होने के कारण असंभव स्थल में केवल अकारलोप ही प्रवृत्त होगा । जैसे – 'गोऽचः, गोऽचा' इत्यादि । '**अन्वाचयशिष्टत्वम् एकविधिविधेयस्य कार्यद्वयस्य परस्परानपेक्षकत्वम्**' ॥२०५।

## २०६. तिर्यङ् तिरश्चिः [२।२।५०]

### [सूत्रार्थ]

घुट्- भिन्न स्वरादि प्रत्यय के परवर्ती होने पर 'तिर्यन्च्' को 'तिरश्चि' आदेश होता है ॥२०६।

### [दु० वृ०]

'तिर्यन्च्' इत्ययं तिरश्चिर्भवति अघुट्स्वरादौ । तिरश्चः, तिरश्चा, तिरश्ची, तैरश्च्यम् ॥२०६।

### [दु० टी०]

**तिर्यङ्** । अघुट्स्वरादाविति किम् ? तिर्यञ्चौ, तिर्यञ्चः । तिरोऽञ्चतीति क्विप् । "**सहसन्तिरसाम्**" (४।६।७१) इत्यादिना तिरस्शब्दस्य तिरिभावः । इकार उच्चारणार्थः । पृथग्योगस्तु **विस्पष्टार्थ** इति तु तिरयति ॥२०६।

[वि० प०]

**तिर्यङ्।** तिरश्च इति। तिरोऽञ्चतीति क्विपि कृते **"सहसन्तिरसां सध्रि-समितिरयः"** (४।६।७१) इति तिरसस्तिरिभावः। पश्चादनेन तिरश्चादेशः ॥२०६।

[समीक्षा]

'तिर्यन्च् + शस्, तिर्यन्च् + टा, तिर्यन्च् + ई, तिर्यन्च् + यण्' इस अवस्था में कातन्त्रकार 'तिर्यङ्' को 'तिरश्चि' आदेश करके 'तिरश्चः, तिरश्चा, तिरश्ची, तैरश्च्यम्' शब्दरूप सिद्ध करते हैं। पाणिनि के अनुसार 'तिरस् + अन्च् + शस्' इत्यादि अवस्था में **"अचः"** (अ० ६।४।१३८) सूत्र से 'अन्च्' के अकार का लोप हो जाने पर **"तिरसस्तिर्यलोपे"** (अ० ६।३।९४) से 'तिरस्' को 'तिरि' आदेश नहीं होता। फलतः स् को श्चुत्वकार्य करने पर उक्त शब्द सिद्ध होते हैं।

[रूपसिद्धि]

१. **तिरश्चः**। तिर्यन्च् + शस्। प्रकृत सूत्र द्वारा 'तिर्यन्च्' शब्द को 'तिरश्च्' आदेश तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से स् को विसर्ग।

२. **तिरश्चा**। तिर्यन्च् + टा। प्रकृत सूत्र से 'तिर्यन्च्' को 'तिरश्च' आदेश।

३. **तिरश्ची**। तिर्यन्च् + ई + सि। **"नदाद्यन्चिवाह्०"** (२।४।५०) से स्त्रीलिङ्ग में 'ई' प्रत्यय, प्रकृत सूत्र से 'तिर्यन्च्' को 'तिरश्च्' आदेश, लिङ्गसंज्ञा, प्रथमा विभक्ति – एकवचन में सिप्रत्यय तथा **"ह्रस्वनदीश्रद्धाभ्यः सिर्लोपम्"** (२।१।७१) से सिलोप।

४. **तैरश्च्यम्।** तिर्यन्च् + यण्। तिरश्चो भावः। **"यण् च प्रकीर्तितः"** (२।६।१४) से यण् प्रत्यय, प्रकृत सूत्र से तिरश्च् आदेश, **"वृद्धिरादौ सणे"** (२।६।४९) से आदिवृद्धि, लिङ्गसंज्ञा, सिप्रत्यय, उसका लोप तथा 'मु' आगम – **"अकारादसंबुद्धौ मुश्च"** (२।२।७) ॥२०६।

## २०७. उदङ् उदीचिः [२।२।५१]

[सूत्रार्थ]

घुट्-भिन्न स्वरादि प्रत्यय के परे रहते 'उदन्च्' शब्द को 'उदीचि' आदेश होता है ॥२०७।

[दु० वृ०]

'उदन्च्' इत्ययम् उदीचिर्भवति अघुट्स्वरादौ। उदीचः, उदीचा, उदीची, औदीच्यम् ॥२०७।

[दु० टी०]

**उदङ्।** यदि 'तिरेरिरश्, उद ई' इति विदध्यात्, अञ्चतेरलोपः, तिरिशब्दस्येकारस्य अश् भवति, नैवम्। उद एव स्थाने भवतीति प्रतिपद्येत, अतो विस्पष्टार्थं यथान्यासम् इति। इनि तु उदयति ॥२०७।

[समीक्षा]

'उदन्च् + शस्, उदन्च् + टा, उदन्च् + ई + सि, उदन्च् + यण्' इस अवस्था में कातन्त्रकार 'उदङ्' को 'उदीचि' आदेश करके 'उदीचः, उदीचा, उदीची, औदीच्यम्' शब्दरूप सिद्ध करते हैं। पाणिनि ने 'उद्' उपसर्ग के बाद आने वाले 'अन्च्' शब्द के आदि वर्ण अ के स्थान में 'ई' आदेश करके उक्त शब्दरूप सिद्ध किए हैं– **"उद ईत्"** (अ० ६।४।१३९)। इस प्रकार कार्यसंख्या की दृष्टि से उभयत्र साम्य ही कहा जा सकता है।

[रूपसिद्धि]

१. **उदीचः**। उदन्च् + शस्। प्रकृत सूत्र द्वारा 'उदन्च्' को 'उदीचि' आदेश तथा स् को विसर्ग।

२. **उदीचा**। उदन्च् + टा। पूर्ववत् 'उदीचि' आदेश।

३. **उदीची**। उदन्च् + ई + सि। स्त्रीलिङ्ग में ई प्रत्यय, 'उदीचि' आदेश तथा विभक्तिकार्य।

४. **औदीच्यम्**। उदन्च् + यण्। उदीचो भावः। यण्प्रत्यय, उदीचि आदेश, आदिवृद्धि तथा विभक्तिकार्य ॥२०७।

## २०८. पात् पदं समासान्तः [२।२।५२]

[सूत्रार्थ]

घुट्-भिन्न स्वरादि प्रत्यय के परे रहते समासान्त-स्थित 'पात्' शब्द को 'पद्' आदेश होता है ॥२०८।

## [दु० वृ०]

समासान्तः पाच्छब्दः पदमापद्यते अघुट्स्वरादौ । व्याघ्रपदः, व्याघ्रपदा, व्याघ्रपदी, वैयाघ्रपद्यम् । एकपदः, सुपदः, कुम्भपदी । असमासान्त इत्यपि – पदः पश्य । पादसमानार्थः पादप्यस्तीति मतम् ॥२०८।

## [दु० टी०]

**पात्०** । 'व्याघ्रस्येव पादावस्य, एकः पादोऽस्य, शोभनः पादोऽस्य, कुम्भ इव पादोऽस्याः स्त्रियाः' इति विग्रहः । **"बहुव्रीहावहस्त्यायुपमानसंख्यासुभ्यः"** - पादस्य पाद्भावः । कुम्भपद्यादिषु च सद्यआद्येषु निपातनम् प्रति दर्शनाद् इष्टलक्षणमुपपद्यते हस्त्यादेरुपमानान्न भवति । तेन 'हस्तिपादान् पश्य' इति । 'हस्तिन्- कटोल- कण्डोल- गडोल- महिला- दासी-गण्डिका- कुशूल - कुम्भपद्यादयश्च' – 'कुम्भपदी, शतपदी, जालपदी, अलिपदी, अशीतिपदी, सूत्रपदी, गोधापदी, कलसीपदी, विपदी, दासीपदी, अपदी, निष्पदी, आर्द्रपदी, कृष्णपदी, कल्याणीपदी, द्रोणीपदी, शूकरपदी, शकृत्पदी, अष्टापदी, शुचिपदी' । यच्चोपमानपूर्वं संख्यापूर्वं च पठ्यते, तस्य स्त्रियामेव ईकार एव इत्यवधारणार्थं निदर्शनम् ।

द्वौ द्वौ पादौ ददाति **द्विपादिकं** ददाति । पादस्य संख्यादेर्वीप्सायामक्प्रत्ययो दृश्यते । तद्धितार्थ इह समासः । अप्यधिकारादसमासान्त इत्यपि समासस्य योऽन्तोऽवयवो न भवति तथाप्यविशेषाद् भवतीत्यर्थः । पादसमानार्थ इत्यादि कथं पुनरेतत् ? सत्यम्, यदा पादयतेः क्विब् दृश्यते, विवक्षितेऽपि हेत्वर्थे साध्यभेदो नास्ति । तथा च दृश्यते – 'गूढपाद् भुजङ्गः' इति पाद्भावनिपातनं च पादस्थितिनिवृत्त्यर्थम् । यद्येवम्, समासान्तग्रहणमनर्थकं स्यात् । सत्यपि तदन्तत्वे **'निर्दिश्यमानस्यादेशः'** (का० परि० ७) इति पाच्छब्दस्यैव भविष्यति केवलस्य व्यपदेशिवद्भावात् । तर्हि **मन्दधियां सुखप्रतिपत्त्यर्थमिदम्** । अघुट्स्वरादाविति किम् ? व्याघ्रपान्दि कुलानि । पादास्तिष्ठन्ति पादमाचष्टे – पादयति । पादमासनिशाहृदययूषदोषां पद्मास्निशृहृद्यूषन्दोषणो वा, अघुट्स्वरव्यञ्जनयोर्यथासंख्यम् । पदः, पादान् । पदा, पादेन । पद्भ्याम्, पादाभ्याम् । पद्भ्यः, पादेभ्यः । पत्सुः, पादेषु । मासः, मासान् । मासा, मासेन । माभ्याम्, मासाभ्याम् । निशः, निशाः । निशा, निशया । निड्भ्याम्, निशाभ्याम् । हृदा, हृदयेन । हृद्भ्याम्, हृदयाभ्याम् । यूष्णा, यूषेण । दोषा, दोष्णा । न वक्तव्यमेतत् । पदादयो हि

शब्दाः अघुट्स्वरव्यञ्जनादिषु दृश्यन्ते शब्दशक्तिस्वभावाद् व्युत्पत्तिरपि सिद्धा । 'पद गतौ' (३।१०७), क्विप् । 'मसी परिमाणे' (३।६०), ततः इनन्तात् क्विप् । 'निश समाधौ' (१।२६६), क्विप् । हृद्‌यूषन्दोषन्-इत्यौणादिका निपाताः ॥२०८।

• [वि० प०]

**पात्०।** व्याघ्रपद इत्यादि । व्याघ्रस्येव पादौ यस्य, एकः पादो यस्य, शोभनौ पादौ यस्य, कुम्भाविव पादौ यस्याः इति विग्रहे **"सद्यआयत्वात्"** (२।६।३७) पादशब्दस्य पाद्भावे कृते पश्चादघुट्स्वरे **"पात् पदं समासान्तः"** (२।२।५२) इति । प्रवर्तते । तथा चोक्तम् – बहुव्रीहावहस्त्याद्युपमानसंख्यासुभ्यः । पादस्य पाद्भावः । तथा **"कुम्भपद्यादिषु च"** (अ० ५।४।१३९) इति सद्यआद्येषु निपातनं प्रति दर्शनादिष्टलक्षणमुपपद्यते इति । **अस्यार्थः।** हस्त्यादिवर्जितादुपमानात् संख्यायाः सुशब्दाच्च पादशब्दस्य पाद्भावस्तथा कुम्भपद्यादिषु चेति । तत्र **हस्त्यादयः** 'हस्तिन्-कटोल-कण्डोल-गडोल-गण्डोल- महिला- दासी-गणिका-कुशूल' एभ्यो न भवति । यथा हस्तिन इव पादौ येषां तान् हस्तिपादान् पश्येति ।

'कुम्भपदी- कलसीपदी- शतपदी- जालपदी- अलिपदी- अशीतिपदी- सूत्रपदी- गोधापदी- द्विपदी-अपदी- निष्पदी- विपदी- आर्द्रपदी- कल्याणीपदी-कृष्णपदी-द्रोणीपदी- शूकरपदी-शकृत्पदी- अष्टापदी- चतुष्पदी- त्रिपदी- दासीपदी- शुचिपदी' इति **कुम्भपद्यादयः।** अत्रोपमानपूर्वं संज्ञापूर्वकं यत् पठ्यते तस्य सुखार्थेनैव सिद्धे स्त्रियामीकार एवेत्यव-धारणार्थं पुनरिह पाठः । उपमानपूर्वं च यथा – गोधापदी, शूकरपदीत्यादि । संज्ञापूर्वं च यथा – शतपदी, अष्टापदीत्यादि । अन्यत्र गोधापादान् पश्येत्यादि असमासान्त इत्यपीति अप्यधिकारादित्यर्थः । ननु कथमत्र पादस्य पाद्भावः, उक्तलक्षणस्यायो-गादित्याह – पादेत्यादि । कथं पुनरेतद्, यावता **"पदरुज०"** (४।५।१) इत्यादिना घञन्तः पादशब्दः अकारान्त एवेति ? सत्यम् । यदा पादयतेः क्विप् क्रियते तदैवमिति । न चेह हेत्वर्थो न घटत इति वक्तव्यम्, तस्येह विवक्षितत्वाद् अवश्यं चैतदङ्गीकर्तव्यम् – **'गूढपाद् भुजङ्गः'** इत्यादिसिद्धये ।

न चात्र पद्भावनिपातनं प्रति लक्षणमस्तीति । यद्येवम्, सद्यआद्येषु निपातनमनर्थकं स्यात्, अनेनैव सिद्धत्वात् । सत्यमेतत्, किन्तु उपमानादिभ्यः पादस्य स्थितिनिवृत्त्यर्थं पाद्भावनिपातनम् । तेन 'व्याघ्रपादान् पश्य' इत्यादि प्रयोगो न भवतीति । अथ यदि

केवलस्यापि पदादेशस्तदा किमिह समासान्तग्रहणेन। **'येन विधिस्तदन्तस्य'** (का० परि० ३) इति न्यायात् समासान्तस्यापि भविष्यति। न चानेकवर्णत्वात् तदन्त-समुदायस्य प्रसङ्गः 'निर्दिश्यमानानामादेशिनामादेशाः' (का० परि० ७) इति न्यायात् पाच्छब्दस्यैव भविष्यति, केवलस्यापि व्यपदेशिवद्भावात् ? सत्यम्। **सुखार्थमेव समासान्तग्रहणमिति** ॥२०८।

[**क० च०**]

**पात्०।** स्त्रियामीकार एवेति। स्त्रियामेव ईकार एवेत्युभयनियमोऽपि बोध्यः। 'स्त्रियामेव' इत्यस्य व्यावृत्तिः **पञ्जिकायां** गोधापादानिति इकार एवेत्**यन्ये**। व्यावृत्तिस्तु 'द्वौ द्वौ पादौ ददाति **द्विपादिका'** इत्यत्र द्विपादशब्दात् **"पादस्य संख्यादेर्वीप्सायाम्"** इति तद्धिताक्प्रत्यये **"इवर्णावर्णयोः"** (२।६।४४) इत्यादिना अकारलोपे स्त्रियामाकारे पाद्भावो नास्ति। ननु स्त्रियामाकारे पाद्भावो नाम मा भवतु **"इवर्णावर्णयोः"** (२।६।४४) इत्यादिना अकारलोपे पादिति स्थिते तद्धिताघुट्स्वरे **"पात् पदं समासान्तः"** (२।२।५२) इति कथन्न प्रवर्तते ? सत्यम्। स्थानिवद्भावादत्र पदादेशो न भवतीति **कुलचन्द्रः**।

तदसङ्गतमिति **महान्तः**। यतः कुम्भपद्यादौ द्विपदी-शब्द एव नास्ति कथं प्रत्युदाहरणं संगच्छते। कथमन्यथा **"नद्यादौ वा पादः"** इत्यत्र 'द्विपदी, द्विपात्, त्रिपात्' इत्युदाहरणं कृतम्, ईकाराभावेऽपि पाद्भावदर्शनात्। तथा काशिकायामपि संख्यापूर्वस्योदाहरणं 'द्विपदिका' इत्येव प्रदत्तम्। तस्मात् **टीकायामपि** द्विपदिकेति अहस्त्यादिसूत्रस्योदाहरणं बोद्धव्यम्। ततश्च द्विपदीति ईकारान्तात् शब्दात् तद्धिते इकण्प्रत्ययो वेदितव्यः। ईकार इत्यस्य व्यावृत्तिश्च शतपदिकेति द्रष्टव्या। एतेन कुम्भपद्यादौ द्विपदीशब्द इति यद् व्याख्यातम्, तदप्यशुद्धमेवेति दिक्॥२०८।

[**समीक्षा**]

'व्याघ्रपाद् + शस्, व्याघ्रपाद् + टा, व्याघ्रपाद् + ई + सि, व्याघ्रपाद् + यण्, एकपाद् + शस्, सुपाद्+ शस्, कुम्भपाद् + ई + सि' इस अवस्था में कातन्त्रकार तथा पाणिनि दोनों ही 'पाद्' को 'पद्' आदेश करके 'व्याघ्रपदः, वैयाघ्रपद्यम्, सुपदः' आदि शब्दरूप सिद्ध करते हैं। पाणिनीय सूत्र है – **"पादः पत्"** (अ० ६।४।१३०)।

व्याख्याकारों के अनुसार असमासान्त में भी यह आदेश देखा जाता है–'पदः पश्य'। अकारान्त तथा दकारान्त दोनों ही शब्द (पाद-पाद्) समानार्थक माने जाते हैं– **'पादसमानार्थः पादप्यस्तीति मतम्'** (द्र०, दु० वृ०)

**[रूपसिद्धि]**

१. **व्याघ्रपदः** । व्याघ्रपाद् + शस् । व्याघ्रस्य पादाविव पादौ येषां तान् । प्रकृत सूत्र द्वारा 'पाद्' को 'पद्' आदेश तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से स् को विसर्ग ।

२. **व्याघ्रपदा** । व्याघ्रपाद् + टा । व्याघ्रस्य पादाविव पादौ यस्य तेन । प्रकृत सूत्र द्वारा 'पाद्' को 'पद्' आदेश ।

३. **व्याघ्रपदी** । व्याघ्रपाद् + ई + सि । व्याघ्रस्य पादाविव पादौ यस्याः सा । **"नदाद्यन्चिवाह्०"** (२।४।५०) इत्यादि से स्त्रीलिङ्ग में 'ई' प्रत्यय, प्रकृत सूत्र से 'पाद्' को 'पद्' आदेश, लिङ्गसंज्ञा, प्रथमाविभक्ति-एकवचन में 'सि' प्रत्यय तथा "ह्रस्वनदीश्रद्धाभ्यः सिर्लोपम्" (२।१।७१) से उसका लोप ।

४. **वैयाघ्रपद्यम्** । व्याघ्रपाद् + यण् । व्याघ्रपदो भावः । **"यण् च प्रकीर्तितः"** (२।६।१४) से यण्-प्रत्यय, प्रकृत सूत्र से 'पाद्' को 'पद्' आदेश, **"न य्वोः पदाद्योर्वृद्धिरागमः"** (२।६।५०) से वृद्धि आगम (य् में ऐकार), लिङ्गसंज्ञा, प्रथमाविभक्ति-एकवचन सिप्रत्यय तथा **"अकारादसंबुद्धौ मुश्च"** (२।२।७) से सिलोप-'मु' आगम ।

५. **एकपदः** । एकपाद् + शस् । एकः पादो येषां तान् । प्रकृत सूत्र से 'पाद्' को 'पद्' आदेश तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से सकार को विसर्ग ।

६. **सुपदः** । सुपाद् + शस् । सु = शोभनः पादो येषां तान् । प्रकृत सूत्र द्वारा 'पाद्' को 'पद्' आदेश तथा स् को विसर्ग ।

७. **कुम्भपदी** । कुम्भपाद् + ई + सि । कुम्भाविव पादौ यस्याः सा । **"नदाद्यन्चिवाह्"** (२।४।५०) से स्त्रीलिङ्ग में 'ई' प्रत्यय, प्रकृत सूत्र से 'पाद्' को 'पद्' आदेश, लिङ्गसंज्ञा, प्रथमाविभक्ति-एकवचन 'सि' प्रत्यय तथा **"ह्रस्वनदीश्रद्धाभ्यः सिर्लोपम्"** (२।१।७१) से उसका लोप ॥२०८।

## २०९. अवमसंयोगादनोऽलोपोऽलुप्तवच्च पूर्वविधौ [२।२।५३]

### [सूत्रार्थ]

घुट्-भिन्न स्वरादि प्रत्यय के परे रहते 'अन्' के अकार का लोप होता है यदि वह व् तथा म् से परवर्ती न हो तो तथा उसका अलुप्तवद्भाव होता है, यदि उससे पूर्ववर्ती वर्ण की कोई विधि करनी हो तो ।।२०९।

### [दु० वृ०]

अनोऽकारस्य लोपो भवति अघुट्स्वरादौ, स चेद् अवमसंयोगात् परो भवति। स चालुप्तवद् भवति पूर्वस्य वर्णस्य विधौ कर्तव्ये। राज्ञः, राज्ञा। दध्नः, दध्ना। प्रतिदीव्नः, प्रतिदीव्ना। अवमसंयोगादिति किम् ? पर्वणः, चर्मणः।।२०९।

### [दु० टी०]

**अवम०**। सम्यग् योजनं **संयोगः**। व्यञ्जनानामानन्तर्यमेव सिद्धम्, तद्वांश्च धर्मी **संयोग** उच्यते। वमाभ्यां संयोगो विशिष्यते इति वमान्तो 'वम' उच्यते, **उपचारात्**। वमश्चासौ संयोगश्चेति विग्रहः, पश्चान्नञ्समासः। न पुनर्न विद्येते वमौ यस्मिन् संयोगे इति बहुव्रीहिः। 'तक्ष्णः, सक्थ्नः' इत्यतोऽन्यत्रासंयोगान्न स्यात्। तदेतत् कथं नाम्नेति निर्देशात् तथा अनो नकारस्य लोप इति च गम्यते। अतोऽर्थवतोऽनर्थकस्यापि ग्रहणमिति। अशनयतिं क्विप्– अश्ना, अश्ने। अलुप्तवद्भावाल्लोपो गम्यते चेत्,नैवम्। **'सविकल्पान्यपि ज्ञापकानि भवन्ति'**।

तथा चाह–**'ज्ञापकज्ञापिता विधयो ह्यनित्याः'** (का० परि० ६०) इति लोपग्रहणम्। वद्ग्रहणं तु **सुखप्रतिपत्त्यर्थम्**। विधीयते इति **विधिः** कार्यम्, पूर्वस्य स्थाने विधिरिति न पुनर्विधानं **विधिः**। तदा पूर्वस्येति कर्मणि षष्ठी। न कश्चित् पूर्वो विधातव्यः संभवतीति भावः। ननु किमर्थमलुप्तवच्च पूर्वविधाविति वचनं 'स्वरादेशः परनिमित्तिकः पूर्वविधिं प्रति स्थानिवद् भविष्यति' ? सत्यम्। **"न पदान्त०"** (का० परि० १०) इत्यादिना प्रतिषेधात् स्थानिवद्भावो नास्तीति ततः किं स्यात्–'तक्ष्णो राज्ञः' इत्यत्र डत्वम् 'मज्जः' इत्यत्राकारलोपे गत्वम्। दह्नः इति। दहनयतीति क्विपि कृतेऽकारलोपे सति **"दादेर्हस्य गः"** (२।३।४७) स्यात्। तदयुक्तम्। हशषछान्तानां यजादीनां च लिङ्गानां च वर्गान्तस्य लिङ्गस्येति विशेषणात् 'प्रतिदीव्नः' इत्यत्र च

स्थानिवद्भावात् कुत उडादेशप्रसङ्गः, नैवम्। 'दध्ना' इत्यत्र **"धुटां तृतीयः"** (२।३।६०) इति तृतीयस्तथा 'तक्ष्णः, सक्थ्नः' इत्यलुप्तवद्वचनं लोपमपेक्ष्य पूर्व इह गृह्यते, अतः 'प्रतिदीव्नः' इत्यत्रापि पूर्वस्य दीर्घोऽनिवार्य एव। परविधिस्तु **"तवर्गश्चटवर्गयोगे चटवर्गौ"** (२।४।४६) इति भवत्येव। 'राजपुरुषः' इति। समासे प्रत्ययलोपलक्षणं न भवति **'न वर्णाश्रये प्रत्ययलोपलक्षणम्'** (व्या० प० पा० ९६) इति वचनात्। यद्यपि स्वरादावित्यनेनाघुड् विशिष्यते, तथापि वस्तुतः स्वर एव निमित्तमिति। ननु न कथं वर्णाश्रयत्वम्, किञ्च परत्वात् **"व्यञ्जनान्तस्य यत्सुभोः"** (२।५।४) इति नलोपे कथमकारमात्रस्य लोप इति। अथ **'एकदेशविकृतमनन्यवत्'** (का० परि० १) इति मन्यते। तथापि **"प्रकृतिश्च स्वरान्तस्य"** (२।५।३) भविष्यति, अप्यधिकारात् वन्हन्धृतराज्ञामेवाणि भवति। यपूर्वोऽण् यण्णुच्यते - ताक्ष्णः शत्रुघ्नः, धार्तराज्ञः। अन्येषामणि न भवति – सामनो वैमनः ॥२०९।

## [वि० प०]

**अवमसं०।** वमाभ्यां संयोगो विशिष्यते-विशेषणेन च तदन्तविधिरिति। अतो वमान्तसंयोगो 'वम' इहोच्यते, उपचारात्। ततो वमश्चासौ संयोगश्चेति कर्मधारये पश्चान्नञ्समास इत्याह – न चेत्यादि। न पुनर्न विद्येते वमौ यस्मिन् संयोगे असाववमसंयोग इति बहुव्रीहौ अवमश्चेति संयोगश्चेति कर्मधारयः। एवं सति संयोगादेव स्यात्। 'अक्ष्णः, सक्थ्नः' इत्यादिष्वेव स्यात् 'राज्ञो दध्नः' इत्यादिषु न स्यात्। मा भूद् इति चेत्, नैवम्। नाम्नाम् इत्यादिनिर्देशात्। तथा अनो लोपः इति संहितानिर्देशेऽप्यलोप इति गम्यते। अत एव निर्देशाद् विधिशब्दः कर्मसाधनः। विधीयते इति **विधिः** कार्यम्। पूर्वस्य वर्णस्य स्थाने विधिः पूर्वविधिः स पुनर्विधानं विधिरिति भावसाधनम्, तदा हि **"कर्तृकर्मणोः कृति नित्यम्"** (२।४।४१) इति वचनात् पूर्वस्येति कर्मणि षष्ठी स्यात्। ततश्च पूर्वस्मिन् वर्णे विधातव्य इत्यर्थः स्यात्।

न चायमिह घटते, नहि अपूर्वको वर्णः कश्चिदिह पूर्वो विधातव्यः सम्भवति इत्याह – पूर्वस्येत्यादि। पूर्वस्य वर्णस्य स्थाने यत् कार्यं वचनान्तरेण प्राप्तं तस्मिन् कर्तव्य इत्यर्थः। तेन 'दध्ना' इत्यादिषु **"धुटां तृतीयः"** (२।३।६०) इत्यादिकं न भवतीत्यर्थः। न चात्र वक्तव्यः **'स्वरादेशः परनिमित्तकः पूर्वविधिं प्रति स्थानिवत्'**

(का० परि० ९) इति, अनेनैव सिद्धत्वात्। अनर्थकम् अलुप्तवद्वचनं **"न पदान्तद्विर्वचन०"** (का० परि० १०) इत्यादिषु स्थानिवद्भावप्रतिषेधात्। परविधिं प्रति लुप्त एवेति परस्य वर्णस्य विधिर्भवत्येव। यथा 'राज्ञः' इति **"तवर्गश्चटवर्गयोगे"** (२।४।४६) इति नकारस्य ञकारः। 'प्रतिदीव्नः' इति दिवेः क्वन् औणादिकः। लोपमपेक्ष्य पूर्व इह गृह्यते। तेनातिपूर्वस्य **"नामिनो र्वोः"** (३।८।१४) इत्यादिना इकारस्य दीर्घः स्यादेव।अलुप्तवद्भावस्य प्रयोजनं यथासंभवमेव द्रष्टव्यमिति ॥२०९।

**[क० च०]**

**अवम०।** ननु 'वम' इति वर्णद्वयमात्रं संयोगश्च व्यंञ्जनसमूहस्ततो भिन्नाधिकरणत्वात् कथं कर्मधारय इत्याह– वमाभ्यामित्यादि। एतेन वकारमकारविशिष्टः संयोग इत्यर्थः। कथन्तर्हि मव्यतेर्जृम्भतेश्च युडन्तादिनि क्विपि कृते 'सुमव्नः' सुजृम्भ्णः' इत्यत्र वमादिसयोगाद् अनोऽकारलोप इत्याह – विशेषणेत्यादि। **'येन विधिस्तदन्तस्य'** (का० परि० ३) इति न्यायाद् इत्यर्थः। तेन वान्त- मान्तसंयोग इत्यर्थः प्रतिपत्तव्यः। अत इत्यादि। ननु तदन्तविधिना वमपदेन वमान्तसंयोगस्योक्तत्वात् सामानाधिकरण्यात् सुतरां कर्मधारयः संभवति किं सामानाधिकरण्यार्थमुपचार आंश्रीयते इति ? सत्यम्।

**अस्यायमाशयः**– वकारमकारयोर्वर्णमात्रे शक्तिर्न तु वमान्तसंयोग इत्युपचारः क्रियते। उपचारे हेतुमाह – **अत** इति। **'येन विधिस्तदन्तस्य'** (का० परि० ३) इति न्यायादित्यर्थः। एतेन यत्र यत्र परिभाषया तदन्तो गृह्यते तत्र तत्र **उपचारः**। यद् वा **'येन विधिस्तदन्तस्य'** (का० परि० ३) इत्यत्र तदन्तपदे कर्मधारयमाश्रित्य **पञ्ची** योजनीया। तथाहि वमश्चासावन्तश्चेति 'वमान्तः' इत्यनेन अन्तभूतवमान्त उच्यते न तु संयोगः। अतः सामानाधिकरण्याभावात् कथं कर्मधारयः इत्यवश्यमेवोपचारः कर्तव्यः। एतदुक्तं भवति **'येन विधिस्तदन्तस्य'** (का० परि० ३) इति न्यायात् प्राप्तेन अन्तभूतेन वमकारेण वकारमकारान्तः संयोगः उच्यते, उपचर्यते इत्यर्थः। ततो वमश्चासावित्यादि वश्च मश्चेति समाहारत्वेन नपुंसकत्वम्।इतरेतरे च द्विवचनं युक्तम्, तत् कथं वमश्चेति समाहारत्वादेकत्वे पुंसा निर्देशः।

अत्र **हेमकरः** सिद्धान्तयति – संयोग इत्यस्य विशेषणत्वान्न दोष इति। यथा रक्तश्च विकारश्च **रक्तविकारस्त**द्धित इति। ननु संयोगविशेषणानामपि स्वलिङ्गपरित्यागे

मानाभावात्। रक्तविकार इत्यत्र कर्मधारयेणैव सिध्यति। तथाहि रक्तार्थे विहितत्वाद् रक्तो विकारार्थे विहितत्वाद् विकारस्ततः कर्मधारयः। तस्मादयं समाधिः – समाहारद्वन्द्वे नपुंसकत्वप्रसक्तावपि उपचारात् स्वलिङ्गत्यागः। यथा **'शिवो मे श्रीयशोमुखः'**। पूर्वस्येति कर्मणि षष्ठी स्यादिति। ननु कथमत्र कर्मणि षष्ठीप्रसङ्गः, यावता **"न निष्ठादिषु"** (२।४।४२) इत्यनेन किप्रत्ययस्य निष्ठादित्वात् षष्ठी न स्यादिति चेत्, नैवम्। ताच्छीलिकेन तृना साहचर्याद् **"आदृ ऋवर्णोपधालोपिनाम्"** (४।४।५३) इत्यादिना विहितस्य किप्रत्ययस्य निष्ठादौ विहितत्वादत्र पुनः **"उपसर्गे दः किः"** (४।५।७०) इति किप्रत्यये रूपम्। नहि अपूर्वक इत्यादि। ननु कथमिदमुच्यते यावता **"धुटां तृतीयः"** (२।३।६०) इत्यनेन दः इत्यादावपूर्वत्वविशिष्टस्य विधाने कर्तव्ये पूर्वस्य तृतीयस्य विधानसम्भवात्? सत्यम्।

अत्र **हेमकरः** – नायं तृतीयविधिः पूर्वशब्दवाच्यः, येनात्र प्रसङ्ग इति। **अन्ये** तु यथा 'प्रासादो धवलः क्रियताम्' इत्युक्ते स्थितस्य प्रासादस्य धावल्यकरणमेव प्रतीयते। तत्र च परत्र च स्थितस्य वर्णस्य पूर्वत्वविधानमेव प्रतीयते। एतत्तु न संभवत्येव परवर्णस्य पूर्वत्वविधाने सूत्राभावाद् इत्याहुः। **वस्तुतस्तु** पूर्वत्वविशिष्टस्य तृतीयस्य विधाने कर्तव्ये पूर्वस्य सापेक्षत्वेन किमपेक्षया पूर्वत्वं गृह्यते इति चेत्, अकारापेक्षया वक्तव्यम्। नैवम्, तृतीयविधानकालेऽकारस्याविद्यमानत्वात्। अतः पूर्वत्वमेव न सम्भवतीति कर्मसाधनमेव वाच्यम्। धुटां तृतीय इत्यादिकम् इति। अत्रादिग्रहणं व्यक्तिपक्षमवलम्ब्योक्तम्। **'व्यक्तौ प्रतिलक्ष्यं लक्षणानि क्रियन्ते'** इति न्यायाद् इति भावः॥२०९।

**[समीक्षा]**

'राजन् + शस्, दधि- दधन् + टा, प्रतिदीवन् + शस्' इस अवस्था में कातन्त्रकार तथा पाणिनि 'अन्' के अकार का लोप करके 'राज्ञः, राज्ञा, दध्नः, दध्ना, प्रतिदीव्नः, प्रतिदीव्ना' शब्दरूप सिद्ध करते हैं। पाणिनि का सूत्र है – **"अल्लोपोऽनः"** (अ० ६।४।१३४)। सूत्ररचना-शैली की दृष्टि से कातन्त्र की यह विशेषता है कि इसी सूत्र में 'अवमसंयोगात्' पद का पाठकर 'पर्वणः, चर्मणः' में अकारलोप का निषेध कर दिया गया है, जबकि पाणिनि को इस निषेध के लिए स्वतन्त्र सूत्र बनाना पड़ा है – **"न संयोगाद् वमन्तात्"** (अ० ६।४।१३७)।

**[रूपसिद्धि]**

१. **राज्ञः**। राजन्+शस्। प्रकृत सूत्र से 'अन्' के अकार का लोप, **"तवर्गश्चटवर्गयोगे चटवर्गौ"** (२।४।४६) से न् को ञ्-आदेश, 'ज्+ञ्' संयोग से ज्ञ् तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से स् को विसर्ग।

२. **राज्ञा**। राजन्+टा। प्रकृत सूत्र से 'अन्' के अकार का लोप, **"तवर्गश्चटवर्गयोगे चटवर्गौ"** (२।४।४६) से न् को ञ्-आदेश तथा 'ज्+ञ्' संयोग से ज्ञ्।

३. **दध्नः**। दधि+शस्। **"अस्थिदधिसक्थ्यक्ष्णामन्नन्तष्टादौ"** (२।२।१३) से इ को अन्, प्रकृत सूत्र से 'अन्' के अकार का लोप तथा सकार को विसर्गादेश।

४. **दध्ना**। दधि+टा। **"अस्थिदधिसक्थ्यक्ष्णामन्नन्तष्टादौ"** (२।२।१३) से इ को 'अन्' तथा प्रकृत सूत्र द्वारा अकार का लोप।

यहाँ यह ज्ञातव्य है कि 'दध्नः, दध्ना' में अकारलोप होने पर **"धुटां तृतीयः"** (२।३।६०) से धकार के स्थान में तृतीय वर्ण दकार प्राप्त होता है, उसके निवारणार्थ सूत्र में कहा गया है–'अलोपोऽलुप्तवच्च पूर्वविधौ'। अर्थात् जिस 'अन्' के अकार का लोप होता है, यदि उससे पूर्व की कोई विधि प्राप्त हो तो वहाँ लुप्त अकार का अलुप्तवद्भाव हो जाता है। जिसके फलस्वरूप धकार को दकारादेश नहीं होने पाता है।

५. **प्रतिदीव्नः**। प्रतिदीवन्+शस्। प्रकृत सूत्र से अकार का लोप तथा सकार को विसर्गादेश।

६. **प्रतिदीव्ना**। प्रतिदीवन्+टा। प्रकृत सूत्र द्वारा 'अन्' के अकार का लोप यहाँ भी लुप्त अकार का अलुप्तवद्भाव होता है, जिसके फलस्वरूप **"छ्वोः शूटौ पञ्चमे च"** (४।१।५६) से वकार को 'ऊट्' आदेश नहीं हो पाता है।

## २१०. ईङ्योर्वा [२।२।५४]

**[सूत्रार्थ]**

'ई' तथा 'ङि' प्रत्ययों के परे रहते संयोगसंज्ञक 'व्-म्' से परवर्ती न होने पर 'अन्' के अकार का वैकल्पिक लोप होता है। यदि उससे पूर्ववर्ण की कोई विधि प्राप्त हो तो उसका अलुप्तवद्भाव भी होता है ॥२१०।

**[दु० वृ०]**

ईङीत्येतयोः परयोरवमसंयोगात् परस्याऽनोऽकारस्य लोपो भवति स चालुप्तवद् भवति पूर्वस्य वर्णस्य विधौ कर्तव्ये । साम्नी, सामनी । राज्ञि, राजनि । ङिसाहचर्याद् 'राज्ञी' इति नित्यम् । अवमसंयोगादिति किम् ? पर्व्वणी, चर्म्मणी ॥२१०।

**[दु० टी०]**

**ईङ्योः ।** प्राप्ते विभाषेयं साहचर्यादिति । ङिविभक्तिसहचरितः औस्थानिक ईकारो गृह्यते. तेन स्त्रीकारे नित्यं भवति । ड्योर्वेति न कृतम्, अविस्पष्टत्वात् । ङिच्च ईश्चेति विग्रहे दीर्घ एव संभवति न ह्रस्व इति ॥२१०।

**[वि० प०]**

**ईङ्योः ।** ङेर्विभक्तेः साहचर्याद् ईकारो विभक्तेरेव ग्रहीतव्यः, स चौकारस्थानिक एवेत्याह – ङिसाहचर्याद् राज्ञीति नित्यमिति । तेन नदादिविहिते ईकारे पूर्वेणैव लोपो नित्यः इति भावः ॥२१०।

**[समीक्षा]**

'सामन् + औ- ई, राजन् + ङि' इस अवस्था में कातन्त्रकार तथा पाणिनि दोनों ही वैकल्पिक-अकारलोप करके 'साम्नी- सामनी, राज्ञि- राजनि' शब्दरूप सिद्ध करते हैं। पाणिनि का सूत्र है– **"विभाषा ङिश्योः"** (अ० ६।४।१३६)

**[रूपसिद्धि]**

१. **साम्नी. सामनी** । सामन् + औ (नपुंसकलिङ्ग)। "औरीम्" (२।२।९) से औ को ई- आदेश तथा प्रकृत सूत्र द्वारा 'अन्' के अकार का लोप 'साम्नी'। अकार- लोप न होने पर 'सामनी ।

२. **राज्ञि, राजनि** । राजन् + ङि । प्रकृत सूत्र द्वारा वैकल्पिक अकार- लोप, **"तवर्गश्चटवर्गयोगे चटवर्गौ"** (२।४।४६) से न् को ञ् तथा 'ज् + ञ्' संयोग से ज्ञ् । अकारलोप के अभाव में – राजनि ॥२१०।

## २११. आ धातोरघुट्स्वरे [२।२।५५]

**[सूत्रार्थ]**

घुट्- भिन्न स्वर के परे रहते धातु- गत अकार का लोप होता है ॥२११।

[दु० वृ०]

धातोरकारस्य लोपो भवति अघुट्स्वरे । कीलालपः, कीलालपा । पुनरघुट्स्वर-ग्रहणं संबद्धाधिकारनिवृत्त्यर्थम् । तेन शङ्खध्मः ॥२११।

[दु० टी०]

**आ धातो०।** आ इति ङसोऽकारस्य दीर्घात् परलोपे निर्देशोऽयं प्रथमैकवचने हि 'काष्ठभिदः पश्य' इति अन्तस्याकारः प्रसज्येत । तदेतल्लोपानुवृत्तौ भवतीति । लोपानुवृत्तिश्च क्वचिदेकविभक्तिप्रयुक्तानामप्येकदेशोऽनुवर्तते एव । धातोरिति किम् ? 'खट्वाः पश्य' इति । **"क्त्वो यप्"** (४।६।५५) इत्यादिनिर्देशस्तु योगविभागाद् 'आ' इत्येकयोगः **'विशेषातिदिष्टः प्रकृतं न बाधते'** (का० परि० १९) इत्यघुट्स्वरग्रहणं संबध्यते । ततो **'धातोरघुट्स्वरे'** इति यदृच्छाशब्दानामप्याकारान्तानां यदि कप्रत्ययो न दृश्यते तत्राप्याकारस्य लोपेन भवितव्यमिति मतम् । तथा च **पदकारो**ऽप्याह – आतो लोपोऽनाप इति वक्तव्यम्, स्त्र्याकारं वर्जयित्वेत्यर्थः ।

पुनरघुट्स्वर इत्यादि । अवमसंयोगो विभाषा च संबन्धशब्देनोच्यते । यथा लोके बहुशो भोक्तुकामेष्वागच्छत्सु देवदत्तेनात्र भोक्तव्यमित्युक्ते इतरेषां व्यावृत्तिः सिद्धा, तथेहापीत्यर्थः । तेन शङ्खं धमतीति विचि आकारलोपो नित्यत्वं च साधितमेव । **अन्यः** पुनराह – धमतेर्विच् न दृश्यते, तथापि विभाषानिवृत्त्यर्थमघुट्स्वरग्रहणं भविष्यति ॥२११।

[वि० प०]

**आ धातो०।** कीलालप इति । कीलालं पिबतीति **"आतो मन्"** (४।३।६६) इत्यादिना विच् । पुनरित्यादि । यथा बहुषु भोक्तुकामेषु आगच्छत्सु सत्सु देवदत्तेनात्र भोक्तव्यम् इत्युक्ते यज्ञदत्तादीनां निवृत्तिरवसीयते । तथेहाप्यघुट्स्वरग्रहणात् तत्संबद्धस्य निवृत्तिरर्थात् । तेन वमसंयोगे नित्यं भवतीति । **'शङ्खध्मः'** इति । शङ्खं धमतीति पूर्ववत् विच् ॥२११।

[क० च०]

**आ धातोः।** ननु 'अब्जे देहि, अब्जि तिष्ठति' इत्यादौ कथम् आकारलोपो लाक्षणिकत्वात् । तथाहि – अप्सु जायते इति अप्पूर्वाज्जनधातोः **"विट्क्रमि०"**

(४।३।६४) इत्यादिना विटि कृते **"विड्वनोरा"** (४।१।७०) इत्यनेनान्ते अकारस्य कृतत्वात्। नैवम्। वर्णविधौ लाक्षणिकपरिभाषाया अनित्यत्वात्। अत एव टीकाकृतापि धातोरिति किम्? 'खट्वाः पश्य' इत्यत्र लाक्षणिकोऽपि प्रत्युदाहृतः। **श्रीपतिनापि** धातुग्रहणमश्रद्धोपलक्षणमित्युक्तम्। तेन स्मृतः अः विष्णुर्येनासौ स्मृतास्तस्मै देहि स्मृते देहि। आ ब्रह्म स्मृतो येन असौ स्मृताः, तस्मै देहीत्यादिकं सिद्धम्। **केचित्तु "विट्क्रमि०"** (४।३।६४) इत्यत्र विड्ग्रहणमपनीय 'डा' इति कृते **"विड्वनोः"** (४।१।७०) इत्यत्र विड्ग्रहणमपाकृतं भवति। तथापि यद् विड्ग्रहणं क्रियते तद् बोधयति आदेशाकारस्य लोप इत्याहुः ॥२११।

**[समीक्षा]**

'कीलालपा + शस्, कीलालपा + टा' इस अवस्था में पा-धातुगत आकार का लोप कातन्त्र तथा पाणिनीय दोनों ही व्याकरणों में किया जाता है, जिससे 'कीलालपः, कीलालपा' शब्दरूप सिद्ध होते हैं। पाणिनि का सूत्र है – **"आतो धातोः"** (अ० ६।४।१४०)

**[रूपसिद्धि]**

१. **कीलालपः**। कीलालपा + शस्। प्रकृत सूत्र से आकार-लोप तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से सकार को विसर्गादेश।

२. **कीलालपा**। कीलालपा + टा। पूर्ववत् प्रकृत सूत्र से पा-धातुगत आकार का लोप ॥२११।

## २१२. ईदूतोरियुवौ स्वरे [२।२।५६]

**[सूत्रार्थ]**

विभक्तिगत स्वर के परे रहते धातुस्थ ईकार को 'इय्' तथा ऊकार को 'उव्' आदेश होता है ॥२१२।

**[दु० वृ०]**

धातोरीदूतोरियुवौ भवतो यथासंख्यं विभक्तिस्वरे। नियौ, नियः। लुवौ, लुवः। विभक्ताविति किम्? न्यर्थः, ल्वर्थः। स्वायम्भुवम् इति वक्तव्यम्।

[दु० टी०]

**ईदू०।** ईच्च ऊच्चेति द्वन्द्वः । निर्दिश्यमानयोरिदुतोरेकवर्णयोरप्यनेकवर्णावियुवौ भवतो यथासंख्यम् । इवर्णोवर्णान्तस्य धातोरियुवौ स्वरादावगुण इति । लिङ्गाख्यस्य धातोरिदं विधानम् । अन्तरङ्गसंबन्धाच्च स्यादेरेव स्वरः संभवतीत्याह – विभक्तिस्वर इत्यादि । 'नियोऽर्थः, लुवोऽर्थः' इति विग्रहः । स्वयम्भवतीति स्वयम्भूः, तस्येदमित्यण् । **"उतोऽयुरुनुस्नुक्षुवः"** (३।७।१५) इत्यादिनिर्देशः सूत्रत्वात्, तपरकरणम् असन्देहार्थम् । **"य्वोः"** (४।१।३५) इत्युक्ते यकारवकारयोरित्याशङ्क्यते चेत्, नैवम् । य्वोर्व्यञ्जने लोपविधानात्? सत्यम् । अव्ययं वृक्षवृश्चमाचक्षाणौ अव्ययौ 'वृक्षावौ' इत्यत्र च कारितस्य य्वोर्व्यञ्जने लोपो नास्तीति तदा दुष्यति । नैवम् । **"नियो ङिराम्"** (२।१।७७) इति निर्देशादिति चेत्, अत्रापि यत्वे सति पश्चादियादेश इति । धातोरिति किम् ? लक्ष्म्यौ, लक्ष्म्यः इति ॥२१२।

[वि० प०]

**ईदूतोः।** अनेकवर्णावपि इयुवौ एकवर्णयोरीदूतोरेव यथाक्रमं प्रवर्तेते । समुदायस्य **'निर्दिश्यमानानामादेशिनामादेशाः'** (का० परि० ७) इति न्यायात् शुद्धस्य धातोः **"स्वरादाविवर्णोवर्णान्तस्य"** (३।४।५५) इत्यादिना इयुवौ सिद्धौ । इह लिङ्गाख्यस्य धातोर्न स्यादिति वचनम् । यत्र च लिङ्गं तत्रान्तरङ्गसंबन्धाद् विभक्तेरेवेत्याह – विभक्तिस्वर इति । नयतेः **"सत्सूद्विष०"** (४।३।७४) इत्यादिना क्विप्, लुनातेः क्विप् । चेति क्विप् । 'न्यर्थः, ल्वर्थः' इति 'नियोऽर्थः, लुवोऽर्थः' इति विग्रहः । तर्हि तद्धिते स्वरे कथमित्याह – स्वयम्भवतीति क्विप् । स्वयम्भुव इदमिति **"तस्येदम्"** (२।६।७) इत्यण् । वक्तव्यमिति **रूढित्वादिति** भावः ॥२१२।

**[समीक्षा]**

'नी + औ, नी + जस्, लू + औ, लू + जस्' इस अवस्था में कातन्त्रकार तथा पाणिनि दोनों ही ई को इय् तथा ऊ को उव् आदेश करके 'नियौ, नियः लुवौ, लुवः' शब्दरूप सिद्ध करते हैं। पाणिनि का सूत्र है – **"अचि श्नुधातुभ्रुवां य्वोरियङुवङौ"** (अ०६।४।७७)।

[रूपसिद्धि]

१. **नियौ** । नी + औ । **'णीञ् प्रापणे'** (१।६००) से क्विप् प्रत्यय- निष्पन्न 'नी' लिङ्गगत ईकार को प्रकृत सूत्र से 'इय्' आदेश।

२. **नियः** । नी + जस् । क्विप्प्रत्ययान्त तथा लिङ्गसंज्ञक 'नी' के अन्तर्गत ईकार को इयादेश तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से सकार को विसर्ग।

३. **लुवौ** । लू + औ । **'लूञ् छेदने'** (८।९) धातु से क्विप् प्रत्यय करके निष्पन्न 'लू' की लिङ्गसंज्ञा तथा प्रकृत सूत्र से ऊ को उव् आदेश।

४. **लुवः** । लू + जस् । क्विप्प्रत्ययान्त तथा लिङ्गसंज्ञक 'लू' के अन्तर्गत ऊ को उवादेश तथा सकार को विसर्गादेश ॥२१२।

## २१३. सुधीः [२।२।५७]

[सूत्रार्थ]

विभक्तिसंबन्धी स्वर के परे रहते सुधीशब्दगत ईकार के स्थान में 'इय्' आदेश होता है ॥२१३।

[दु० वृ०]

सुधीशब्द इयं प्राप्नोति विभक्तिस्वरे। सुधियौ, सुधियः। सुधीरिति किम् ? प्रध्यौ, प्रध्यः ॥२१३।

[दु० टी०]

**सुधीः ।** सुष्ठु ध्यायतीति क्विप् सुधीः । ध्याप्योः क्विपि सम्प्रसारणे दीर्घः । ध्यानं वा धीः, सम्पदादित्वाद् भावे क्विप् । शोभना धीर्यस्येति विग्रहः । ईकारान्तोऽय-मित्यन्तरतम इय् प्रवर्तते ।अनेकाक्षरत्वाद् यत्वे प्राप्ते वचनम् ।क विमला धीरनयोरिति विग्रहे **'विमलधियौ, विमलधियः'** इति ? सत्यम् । अव्ययकारकाभ्यामेवायं विधिरिति ॥२१३।

[वि० प०]

**सुधीः ।** ईकारान्तोऽयं **सुधी**शब्द इति आन्तरतम्याद् इयादेश एव प्रवर्तते इत्याह – इयमिति । सुष्ठु ध्यायतीति क्विप् । सम्प्रसारणे ध्याप्योरिति वचनाद् दीर्घः,

संप्रसारणं च । अत एव ज्ञापकात् तथा च वक्ष्यति – वचनात् संप्रसारणं सिद्धम् इति । अथवा ध्यानं धीः, सम्पदादित्वाद् भावे क्विप् । पूर्ववत् सम्प्रसारणे दीर्घे च पश्चात् 'शोभना धीर्यस्य' इति विग्रहे **"अनेकाक्षरयोः"** (२।२।५९) इत्यादिना यत्वे प्राप्ते वचनम् । अत एव प्रत्युदाहरणे यत्वं दर्शयति – 'प्रध्यौ, प्रध्यः' इति । यद्येवं 'विमलधियौ, विमलधियः' इति कथमियादेशः ? सत्यम्, तत्राव्ययकारकाभ्यामेवायं विधिरिति वक्ष्यति ॥२१३।

## [क० च०]

**सुधीः।** ध्यानं वा धीरित्यादि । ननु शोभना धीर्यस्येति विग्रहे कथम् **"अनेकाक्षरयोः"** (२।२।५९) इत्यादिना यत्वस्य प्राप्तिः, यावता अव्ययकारकाभ्यां भवद् यत्वं क्विप् समास एव भवति, यथा 'ग्रामण्यौ, ग्रामण्यः' इति । क्विप् समासाभावे अव्ययकारकाभ्यामपि न भवति । यथा 'कुधियौ, वृश्चिकभियः' इत्यादि । तस्माद् यत्वबाधनार्थमिदं वचनमिति कथमुच्यते ? सत्यम् । सुष्ठु ध्यायतीति प्रथमोक्तक्विप् समासपक्षमाश्रित्योक्तम् । शोभना धीर्यस्येति पक्षस्तु क्विप् समासस्थ इति पक्षमनादृत्य विषयोऽस्तीति न दोषः । ननु 'विमलधियः' इत्यत्र यत्वे प्राप्ते चोद्ये अव्ययकारकाभ्यामेव यत्वं वक्ष्यतीति कथं **सिद्धान्तः** । विमला धीर्विद्यते यस्येति क्रियासंबन्धाद् विमलेत्यस्यापि कर्तृकारकत्वात् । नैवम् । विमलेत्यस्य विशेषणत्वेन क्रियासंबन्धाभावान्न कर्तृकारकत्वम्, किन्तु समानाधिकरणत्वादेका विभक्तिरिति **हेमक**राशयः ॥२१३।

## [समीक्षा]

'सुधी + औ, सुधी + जस्' इस अवस्था में कातन्त्रकार और पाणिनि दोनों ही ईकार को 'इय्' आदेश करके 'सुधियौ, सुधियः' शब्दरूप सिद्ध करते हैं । अन्तर यह है कि कातन्त्रकार ने साक्षात् सुधीशब्दस्थ ईकार को इय् आदेश का विधान किया है, जबकि पाणिनि ने "न भूसुधियोः" (अ० ६।४।८५) सूत्र द्वारा साक्षात् यणादेश का निषेध करके इयङ् आदेश किया है ।

## [रूपसिद्धि]

१. **सुधियौ** । सुधी + औ । प्रकृत सूत्र द्वारा सुधीशब्दस्य ईकार को 'इय्' आदेश ।

२. **सुधियः** । सुधी + जस् । प्रकृत सूत्र द्वारा सुधीशब्दस्थ ईकार को इयादेश तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से सकार को विसर्गादेश ।

## २१४. भूरवर्षाभूरपुनर्भूः [२।२।५८]

### [ सूत्रार्थ]

विभक्तिसंबन्धी स्वर के परे रहते 'वर्षाभू- पुनर्भू' शब्दों को छोड़कर 'भू' के ऊकार को 'उव्' आदेश होता है ।

### [दु० वृ०]

भूरुवं प्राप्नोति विभक्तिस्वरे अवर्षाभूरपुनर्भूः । मित्रभुवौ, मित्रभुवः । अतिभुवौ, अतिभुवः । अवर्षाभूरपुनर्भूरिति किम् ? वर्षाभ्वौ, पुनर्भ्वौ ।।२१४।

### [दु० टी०]

**भू०।** भूशब्द ऊकारान्त इत्यन्तरतम उव् प्रवर्तते, लिङ्गस्यानेकाक्षरत्वाद् वत्वे प्राप्ते तदपवाद उव् आदिश्यते। 'मित्राद् भवति, मित्रं भूयात्' इति वा तिक्कृते संज्ञायामाशिषीति क्विप् ।मित्रस्य भवनक्रियायाः कर्तव्यमिति कारकात् परो भूर्भवतीति, अतिभवतीति, अव्ययाच्च परो भवतीति । वर्षासु भवति, पुनर्भवतीति क्विप् । अथ किमर्थम् अवर्षाभूरपुनर्भूरिति नञ्द्वयं वर्षाभूश्च पुनर्भूश्चेति द्वन्द्वे पश्चान्नञ्समासे कृते सिध्यति ? सत्यम् । समाहारे ह्रस्वे सति प्रतिपत्तिगौरवं द्विवचनेऽप्युच्चारणगौरवं स्यात् ।

ननु च 'भूरवर्षापुनर्भ्याम्' इति कथन्न विदध्यात् ? सत्यम् । न वर्षा अवर्षा, अवर्षा च पुनश्चेति विप्रतिपद्यते । यदि बाधकानन्तरं वर्षापुनर्भ्यां भुव इति नियमः क्रियते तदा विपरीतनियमोऽपि संभाव्येत – वर्षापुनर्भ्यां भुव एवेति । तथा च 'वर्षाभ्वौ, पुनर्भ्वौ' इति न सिध्यति । वर्षाभूपुनर्भ्वोश्चेति कृतेऽपि सादृश्यात् कारकादाकारान्तादेव व्यावृत्तिः स्यात् । अव्ययाच्च व्यञ्जनान्तादिति । **'क्षमाभुवौ, स्वर्भुवौ'** इति सिध्यति । **'क्षितिभुवौ, दिवाभुवौ'** इति न सिध्यति । तस्माद् यथान्यासमेवाश्रयः इति । दृन्कराभ्यां भुवः प्रतिषेधः । दृन्भ्वौ । यदा कर एव कार इति स्वार्थे अण्, तदैकदेशविकृतस्यानन्यवद्भावात् 'कारभ्वौ' इति । काराशब्दश्च स्त्रीलिङ्गविशिष्टो दृश्यते । कारभ्वाविति **मतान्तरमेतत्** ।।२१४।

[वि० प०]

**भूः ।** इदमप्यनेकाक्षरत्वाद् वत्वे प्राप्ते वचनम् । यस्मान्मित्राद् भवतीति क्विपि अव्ययकारकाभ्यां परो भूर्भवतीति 'वर्षाभ्वौ, पुनर्भ्वौ' इति । वर्षासु भवति, पुनर्भवतीति क्विप् ॥२१४।

[क० च०]

**भूरवर्षाभू० ।** ननु दृन्भ्वम्, करभ्वमिति सिद्धये पुनर्भुवम्, **"दृन्करादू भुवः"** इति **परै**राख्यायते । तेन वत्वं स्यात् । **अस्मन्मते**ऽतिदेशाभावात् कथमुवादेशो न स्यात् ? सत्यम् । अवर्षाभूरपुनर्भूरित्यत्र अवर्षापुनर्भ्यामिति सिद्धे यद् नञ्द्वयं तद् बोधयति – वर्षाभूपुनर्भूशब्द उपलक्षणम् । अन्यत्रापि न स्यात्, तेन 'दृन्भ्वम्' इत्यादि सिद्धम् । ननु भूरुवं प्राप्नोतीत्युक्ते वत्वस्य प्रसङ्गो नास्त्येव अनेकाक्षरत्वाभावात् कथमुक्तम्, वत्वे प्राप्ते वचनमिति चेत्, अनर्थकमिदम् ईदूतोरित्यनेन केवलस्य उवूसिद्धेः । वर्षाभूः, पुनर्भूरित्यस्य वर्जनं च भविष्यति । नहि भूरुवमित्युक्तेऽनयोः प्रसङ्गो येन प्रतिषेधोऽर्थवानिति । तस्माद् भूपदेन तदन्त उपलक्ष्यते तदन्तता चाव्ययकारकाभ्यां सह सूत्रसामर्थ्यात् । ततश्च वर्षाभूप्रकृतेः स्याद् इति वचनम् । धातोरुपस्थितिः कुर्वता क्रियावाचकशब्द उपस्थाप्यते तत्राह – कीलालपादेर्धातुत्वं नास्ति । कर्त्रर्थः प्रतीयते कर्तृवाचकत्वात् ततश्च धातूपदेशलक्षणया ईदूद्धातोरुपस्थितिः क्रियते । ततश्च लक्षणया इदमुक्तं तथा श्रद्धाकारो लक्ष्यते इत्याह – धातुग्रहणम् इत्यादि ॥२१४।

**[समीक्षा]**

'मित्रभू + औ, मित्रभू + जस्, अतिभू + औ, अतिभू + जस्' इस अवस्था में कातन्त्रकार तथा पाणिनि दोनों ही ऊकार को 'उव्' आदेश करके 'मित्रभुवौ, मित्रभुवः, अतिभुवौ, अतिभुवः' शब्दरूप सिद्ध करते हैं । अन्तर यह है कि पाणिनि **"न भूसुधियोः"** (अ० ६।४।८५) सूत्र से साक्षात् यण् आदेश का निषेध करते हैं , तब **"अचि श्नुधातुभ्रुवां य्वोरियङुवङौ"** (अ० ६।४।७७) से उवङ् आदेश प्रवृत्त होता है ।

**[रूपसिद्धि]**

१. **मित्रभुवौ** । मित्रभू + औ । प्रकृत सूत्र से 'मित्र-भू' शब्दगत ऊकार को 'उव्' आदेश ।

२. **मित्रभुवः** । मित्रभू + जस् । प्रकृत सूत्र द्वारा भू- गत ऊकार को 'उव्' आदेश तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से सकार को विसर्ग ।

३. **अतिभुवौ** । अतिभू + औ । प्रकृत सूत्र से ऊकार को 'उव्' आदेश ।

४. **अतिभुवः** । अतिभू + जस् । पूर्ववत् प्रकृत सूत्र द्वारा ऊकार को उव् तथा सकार को विसर्गादेश ॥२१४।

## २१५. अनेकाक्षरयोस्त्वसंयोगाद् यवौ [२।२।५९]

**[सूत्रार्थ]**

अनेकाक्षर वाले लिङ्ग में विद्यमान तथा संयोगसंज्ञक ईकार- ऊकार के स्थान में क्रमशः य्-व् आदेश होते हैं विभक्तिगत स्वर के परे रहने पर ॥२१५।

**[दु० वृ०]**

अनेकाक्षरयोर्लिङ्गयोर्यावीदूतौ तयोर्धातुसंयोगात् परयोर्यवौ भवतो यथासङ्ख्यं विभक्तिस्वरे । ग्रामण्यौ, ग्रामण्यः, यवल्वौ, यवल्वः । अनेकाक्षरयोरिति किम् ? नियौ, लुवौ । असंयोगादिति किम् ? यवक्रियौ, यवक्रियः । कटप्रुवौ, कटप्रुवः । अव्यय-कारकाभ्यामेवायं विधिः

**[दु० टी०]**

**अने०** । इयुवोरपवादः । न क्षीयते वा **अक्षर**मिति, तत् पु**नर्नित्यवादिनां** मते वर्ण एवान्वर्थतया घटते । **अनित्यवादिनां** तु रूढिनो व्युत्पत्तिर्यथाकथंचित् । तथा चाक्षरसमाम्नाये वर्णसमाम्नाय इति प्रक्रियामपेक्ष्य च न क्षरति न चलतीति कृत्वा अक्षरं स्वर उच्यते **पूर्वाचार्यैः** । इह वर्णपर्यायाक्षरग्रहणे न विद्यते एकमक्षरं यस्येति विग्रहो नोपपद्यते, व्यावृत्तेरभावात् । अथ व्यपदेशिवद्भावाद् वेञः संप्रसारणे क्वौ दीर्घे सति ऊ इति, ईङ् गताविति । अतश्च क्विपि ई इति । तदयुक्तम् । ईङः क्विपोऽनभिधानात् । अथ अस्यापत्यम् इः कामः, तमिच्छतीति यिन्, एवमप्यरूढत्वात् **"नियो ङिराम्"**

(२।१।७७) इति निर्देशाच्च स्वर एवात्र निश्चीयते इति अनेकाक्षरयोरिति। अर्थायातस्य लिङ्गस्य विशेषणम् ईदूतोर्द्वयोः संबन्धाद् द्विवचनमिति।

अथानन्तरे धात्वधिकारे कथमेतद्धातुरप्यनेकाक्षरः संभवति। मतीयति, वसूयतीति क्विपि कृते मत्यौ, वस्वाविति। यद्येवं भूरवर्षाभूरपुनर्भूरिति वचनमनर्थकम्। अथ तदापि यिन्विषये इति चेद् अयुक्तम। अप्रसिद्धत्वाद् विशेषणविशेष्यभावयोरिष्टत्वाच्च। धात्वधिकारेण त्वसंयोगो विशिष्यते, धात्ववयवसंयोगान्न भवतीत्यर्थ। 'यवं क्रीणाति, कटं प्रवते' इति क्विप्। अधातुसंयोगाद् भवत्येव – 'उन्न्यौ, सकृत्ल्वौ' इति। अत आह- अनेकाक्षरयोरित्यादि। अव्ययकारकाभ्यामेवायं विधिरिति यदुक्तं तदिह भूशब्दस्य व्यवस्थावाचित्वाल्लभ्यते। तेन महान्तौ च तौ नियौ चेति। परमौ च तौ लुवौ चेति – महानियौ, परमलुवाविति। एवं शोभननियौ, उत्तमलुवाविति। नेति सिद्धे यवग्रहणं सवर्णेऽपि यत्वार्थम्। पथीयति, मथीयतीति क्विपि कृते सप्तम्येकवचने 'पथ्यि, मथ्यि' इति भवितव्यम् ॥२१५।

**[वि० प०]**

**अनेका०।** न क्षरति न चलतीति प्रधानत्वा**दक्षरं स्वर** उच्यते। न विद्यते एकमक्षरं यस्येति विशेषणविशेष्यभावस्येष्टार्थत्वाल्लिङ्गमुच्यते, न धातुरित्याह – **अनेकाक्षरयोर्लिङ्गयोरिति।** ईदूतोर्द्वयोरिह संबन्धाद् द्विवचनम्। धात्वधिकारेण पुनः संयोगो विशिष्यते इत्याह – धातोरसंयोगान्न भवतीत्यर्थः। नियौ, लुवाविति। ननु कथमिदं प्रत्युदाहरणं द्व्यङ्गविकलत्वात्, यथेहानेकाक्षरत्वं न संभवति, तथा अव्यय-कारकाभ्यामपि न भवतीति। तदयुक्तम्। उपपदान्तरव्यवच्छेदेनैवाव्ययकारकाभ्यामेवेति नियम उक्तो न सर्वत्र। यदि शब्दान्तराद् भवति तदा अव्ययकारकाभ्यामेव नान्यस्मादिति। तेनाव्ययकारकमन्तरेणापि अनेकाक्षरस्य भवत्येव। यथा मतिमिच्छति, वस्विच्छतीति यिन् – मतीयति, वसूयतीति क्विपि कृते **"य्वोर्व्यञ्जनेऽये"** (४।१।३५) इति यलोपे च मत्यौ, वस्वाविति। तथेहापि स्याद् इत्यनेकाक्षरग्रहणम्।

कटप्रुवाविति। कटं प्रवते इति क्विप् **"वचिप्रच्छिश्रिद्रुप्रुज्वां क्विब् दीर्घश्च"** (उ० २।२३) इति। अव्यय इत्यादि। एतत्पुनरिह तुशब्दस्य व्यवस्थितार्थत्वादव-गन्तव्यम्। तेन ग्रामं नयति, यवं लुनातीति क्विपि कृते कर्मकारकाद् भवति। एवमव्ययादपि 'अतिन्यौ, अतिल्वौ' इत्यादि। यत्र तु नाव्ययकारकयोः संभवस्तत्र न

भवत्येव । यथा महान्तौ च तौ नियौ चेति । परमौ च तौ लुवौ चेति विग्रहे **'महानियौ, परमलुवौ'** इति ॥२१५।

### [क० च०]

**अनेका०।** ननु ग्रामण्यादौ कथं यकारवकारौ अव्ययकारकाभ्यां यल्लिङ्गं तस्मादनेकाक्षरत्वाभावात् ? सत्यम् । सुधीरिति वचनाद् अव्ययकारकमादायानेकाक्षरत्वं ग्राह्यम् । अन्यथाऽनेकाक्षरत्वाभावादेव सुधियावित्यत्र यत्वस्याविषयत्वादीदूतोरियुवौ स्वर इत्यनेन इयादेशः सिद्धः, किं सुधीरिति वचनेन । तस्माद् यदि शब्दान्तराद् भवति तदा अव्ययकारकाभ्यामेव नान्यस्मादिति **पञ्जी** । नन्वेवं सति 'वृश्चिकभिया पलाय-मानस्य' इत्यत्र 'कुधियौ, कुधियः' इत्यत्र च यत्वस्य विषयत्वात् कथम् इय् स्यात् ? सत्यम् । अव्ययकारकाभ्यामिति धातुमात्रस्य विशेषणं न लिङ्गस्य **विशेष्यविशेषणभावस्य प्रयोक्तुरायत्तत्वात् ।**

**तेनायमर्थः** – अव्ययकारकाभ्यां परो यो धातुस्तस्य संयोगात् परौ यावीदूतौ तयोर्यवौ भवतः इति धातोर्विशेषणत्वे विभक्तेः पूर्वमेव अव्ययकारकाभ्यां धातोः संबन्धे सति क्विप् समासो लब्धः । अत एव क्विप् "समासस्थस्यैव धातोरेकस्वरस्य य्वौ" इति **श्रीपतिसूत्रम्** । 'वृश्चिकभिया, कुधियौ' इत्यादौ स्याद्यन्तलिङ्गस्यैवाव्यय-कारकाभ्यां सह संबन्ध इति कथमत्र यवयोः प्रसङ्गः । अत एव **वररुचि**नापि समासो यदि धातुप्रधानो भवति तदैव स्याताम् इत्येतदेव भण्यते । यद् वा क्वचिदपवादविषये उत्सर्गस्यापि समावेश इति न्यायाद् यवयोर्विषयेऽपि इयुवादेश इति **नैयासिकाः** । **अन्ये** तुशब्दस्य बहुलार्थत्वात् क्विप् समासस्थस्यैव मन्यते ।

### [समीक्षा]

'ग्रामणी + औ, ग्रामणी + जस्, यवलू + औ, यवलू + जस्' इस अवस्था में कातन्त्रकार तथा पाणिनि दोनों ही ईकार को यकार तथा ऊकार को वकार आदेश करके 'ग्रामण्यौ, ग्रामण्यः, यवल्वौ, यवल्वः' रूप सिद्ध करते हैं । पाणिनि का यण्-विधान सामान्य है, परन्तु ई को य् तथा ऊ को व् ही प्रवृत्त होता है – **"एरनेकाचोऽसंयोगपूर्वस्य"** (अ० ६।४।८२)।

### [रूपसिद्धि]

१. **ग्रामण्यौ।** ग्रामणी + औ। ग्रामं नयतः। प्रकृत सूत्र द्वारा ई को य् आदेश।

२. **ग्रामण्यः।** ग्रामणी + जस्। ग्रामं नयन्ति। प्रकृत सूत्र द्वारा नी - गत ईकार को यकार तथा "**रेफसोर्विसर्जनीयः**" (२।३।६३) से स् को विसर्ग।

३. **यवल्वौ।** यवलू + औ। यवान् लुनीतः। प्रकृत सूत्र से लू- धातुगत ऊकार को वकारादेश।

४. **यवल्वः।** यवलू + जस्। यवान् लुनते। प्रकृत सूत्र से ऊ को व् तथा "**रेफसोर्विसर्जनीयः**" (२।३।६३) से सकार को विसर्गादेश ॥२१५।

## २१६. भ्रूर्धातुवत् [२।२।६०]

### [सूत्रार्थ]

विभक्तिसम्बन्धी स्वरवर्ण के परवर्ती होने पर 'भ्रू' शब्द में धातुवद्भाव होता है ॥२१६।

### [दु० वृ०]

भ्रूशब्दो धातुवद् भवति विभक्तिस्वरे। भ्रुवौ, भ्रुवः। अतिदेशोऽयम् ॥२१६।

### [दु० टी०]

भ्रूसादृश्यं पुनः कार्यकृतमेव, तन्निष्ठत्वात्। प्रवृत्तेः शास्त्रकृतमपि यदि भवति, न कश्चिदिह दोषः। धातोर्यच्छास्त्रं तद् भ्रूशब्दस्यापीत्यर्थः। निमित्तादेशो नैव धातोर्निमित्तं क्रिया, सा भ्रूशब्दे स्वभावाद् द्रव्यवाचिनि नैव संभवति। रूपातिदेशो नैव, भ्रूशब्दो धातुरूपो भवति। भ्रमेर्डूः भ्रूरिति अन्तरतमत्वाद् भ्रम्धातुः प्रतिपत्तव्यः। तदा वत्करणमनर्थकं स्यात्, भ्रूर्भ्रम इति वा विदध्यात्। अथ प्रकरणबलात् भ्रूधातुरूपमुवादेशश्चेत् तर्हि कार्यातिदेशादिह को भेदः। व्यपदेशातिदेशेऽपि प्रतिपत्तिरियं गरीयसीति सन्निहितपरित्यागे व्यवहितं प्रति कारण वाच्यम् इत्युवादेश एव न तु नाम्यन्तलक्षणो गुणः पश्चाद् उपधालक्षणो गुणश्चेत्, नैवम्। वत्करणस्य स्वाश्रयार्थत्वात् लिङ्गत्वमप्यस्ति। प्रकरणं वा नियामकमिति ॥२१६।

### [वि० प०]

**भ्रूः।** अतिदेशोऽयमिति। स च **निमित्तरूपव्यपदेशशास्त्रकार्यभेदात् पञ्चधा भिद्यते।** तत्र निमित्तातिदेशो यथा ब्राह्मणवत् क्षत्रियेऽपि प्रवर्तितव्यमिति। ब्राह्मणनिमित्तस्य

यजनादेः क्षत्रियेऽपि संभवात्, तथापि तद्वृत्तिरतिदिश्यते। नैवमिह घटते, यतो धातोर्निमित्तं क्रिया, सा च स्वभावाद् द्रव्यवाचिनि भ्रूशब्दे न संभवतीति। नापि रूपातिदेशः, भ्रमेर्डूः भ्रूः इति।तत्र धातुरूपो भ्रूशब्दो भवतीत्युक्ते प्रत्यासत्त्या भ्रमधातुः प्रतिपत्तव्यो भवतीति।ततश्च धातुवद् इत्यपनीय भ्रूर्भ्रम इति विदध्यात्।अथेह प्रकरणे श्रुतत्वाद् धातुरूप उवादौ इति चेत् तर्हि कार्यातिदेशप्रकार एवायं किमिदमुच्यते रूपातिदेश इति। व्यपदेशातिदेशोऽपि नैव, यतो व्यपदेशः संज्ञा, भ्रूशब्दो धातुसंज्ञो भवति, तदा वत्करणमनर्थकं स्यात्।

अथास्य विविधप्रकारत्वात् साक्षात् संज्ञा न बुध्यते इति वत्करणमुच्यते, तथापि **प्रतिपत्तिरियं गरीयसीति**। शास्त्रातिदेशस्तु घटते। धातोर्यत् शास्त्रं तदस्य भवतीति, तत्पुनः "**ईदूतोरियुवौ स्वरे**" (२।२।५६) इति। किन्तु तत्रापि गृह्यमाणे कार्यमेवानुसर्तव्यम्, तन्निष्ठत्वात् प्रवृत्तेः। अतः कार्यातिदेशोऽयमुच्यते तत् पुनः कार्यम् उवादेशलक्षणमस्तीति तदेव दर्शयन्नाह–'भ्रुवौ, भ्रुवः' इति ॥२१६।

**[समीक्षा]**

'भ्रू+औ, भ्रू+जस्' इस अवस्था में पाणिनि ने "**अचि श्नुधातुभ्रुवां य्वोरियङुवङौ**" (अ० ६।४।७७) से साक्षात् 'भ्रूशब्द'–गत ऊकार को उवङ् आदेश करके 'भ्रुवौ, भ्रुवः' शब्दरूप सिद्ध किए हैं। परन्तु कातन्त्रकार ने भ्रू को धातुवद्भाव किया है, जिससे परम्परया "**ईदूतोरियुवौ स्वरे**" (२।२।५६) से ऊ को उव् आदेश सम्पन्न होता है, यह ज्ञातव्य है कि "आ धातोरघुट्स्वरे" (२।२।५५) सूत्र से 'धातोः' पद की अनुवृत्ति उवादेशविधायक सूत्र (२।२।५६) में की जाती है। इसके कारण धातु-गत ही ईकार को इय् तथा ऊकार को उव् आदेश होता है। 'भ्रम' धातु से 'डू' प्रत्यय करने से निष्पन्न 'भ्रू' शब्द के धातु न होने से उव् आदेश संभव नहीं था। इसके निष्पादनार्थ यहाँ अतिदेश किया गया है।

**[रूपसिद्धि]**

१. **भ्रुवौ**। भ्रू+औ। प्रकृत सूत्र से धातुवद्भाव तथा "**ईदूतोरियुवौ स्वरे**" (२।२।५६) से ऊ को उवादेश।

२. **भ्रुवः**। भ्रू+जस्। पूर्ववत् धातुवद्भाव, "**ईदूतोरियुवौ स्वरे**" (२।२।५६) से ऊ को उव् तथा "**रेफसोर्विसर्जनीयः**" (२।३।६३) से सकार को विसर्गादेश ॥२१६॥

## २१७. स्त्री च [२।२।६१]

### [सूत्रार्थ]

विभक्तिसम्बन्धी स्वरवर्ण के परे रहते स्त्रीशब्द को धातुवद्भाव होता है ॥२१७।

### [दु० वृ०]

स्त्रीशब्दो धातुवद् भवति विभक्तिस्वरे । स्त्रियौ, स्त्रियः ॥२१७।

### [दु० टी०]

**स्त्री०।** स्त्रियमतिक्रान्ताविति विग्रहे यदा अप्रधानस्य ह्रस्वो विधीयते, तदौकारे, ओसि च कथमियादेशः, अम्-शसोरपि कथं विभाषा अतिस्त्रियौ, अतिस्त्रियः। अतिस्त्रियम्, अतिस्त्रीम्। अतिस्त्रियः, अतिस्त्रीन् पश्य इति धातुवद्भावे नहि दीर्घयोरियुवौ प्रवर्तेते ? सत्यम्। एषु वचनेषु स्त्रीशब्दस्याप्रधानस्यापि न **"स्वरो ह्रस्वो नपुंसके"** (२।४।५२) इति योगविभागादियमिष्टसिद्धिरिति। अन्येषु विभक्तिस्वरेषु ह्रस्व एवेति इदुत्कार्यमेव। यथा 'अतिस्त्रियः, अतिस्त्रिणा' इत्यादि समूहनीयम्। 'शस्त्र्यौ, शस्त्र्यः' इत्यत्र न भवति **'अर्थवद्ग्रहणे नानर्थकस्य'** (का० परि० ४) इति न्यायात् **"भूरवर्षाभूरपुनर्भूः"**(२।२।५८)इति वचनानन्तरं "भ्रूः स्त्री च, वाऽम्शसोः, अनेकाक्षरयोस्त्वसंयोगाद् यवौ' इति कृते विभाषा संबध्यते यत्वव[illegible]विधौ। अथ **"भवतो वादेरुत्वम्"** (२।२।६३) इति पुनर्वचनं क्रियते। **'द्वयोर्विभाषयोर्मध्ये यो विधिः स नित्यः'** (का० परि० ११) इति किं धातुवद्भावेन चेत्, न। **प्रतिपत्तिरियं गरीयसी।** अथ **"आ धातोरघुट्स्वरे"** (२।२।५५) ततः "ईदूतोरनेकाक्षरयोस्त्वसंयोगाद् यवौ स्वरे" तदनन्तरम् इयुवावीत्यादौ कृतेऽसंयोगादिति संबध्यते, तदा 'श्रियौ, श्रियः' इति न सिध्यति। चकार उक्तसमुच्चयमात्रे ॥२१६।

### [समीक्षा]

'स्त्री + औ, स्त्री + जस्' इस स्थिति में कातन्त्रकार तथा पाणिनि दोनों ही ई को इय् आदेश करके 'स्त्रियौ, स्त्रियः' शब्दरूप सिद्ध करते हैं। अन्तर यह है कि पाणिनि **"स्त्रियाः"** (अ० ६।४।७९) सूत्र द्वारा साक्षात् इयङ् आदेश का विधान करते हैं, जबकि कातन्त्रकार ने धातुवद्भाव करके इय् आदेश किया है।

**[रूपसिद्धि]**

१. **स्त्रियौ**। स्त्री+औ। प्रकृत सूत्र से 'स्त्री' शब्द को धातुवद्भाव तथा **"ईदूतोरियुवौ स्वरे"** (२।२।५६) से ईकार को इयादेश।

२. **स्त्रियः**। स्त्री+जस्। प्रकृत सूत्र से धातुवद्भाव, ई को इयादेश तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से सकार को विसर्गादेश ॥२१७।

## २१८. वाऽम्शसोः [२।२।६२]

**[सूत्रार्थ]**

अम् और शस् प्रत्ययों के परे रहते 'स्त्री' शब्द को वैकल्पिक धातुवद्भाव होता है ॥२१८।

**[दु० वृ०]**

स्त्रीशब्दो धातुवद् भवति वा अम्-शसोः परयोः। स्त्रियम्, स्त्रीम्। स्त्रियः, स्त्रीः ॥२१८।

**[दु० टी०]**

**वाम्०**। तुल्यायामपि संहितायां षष्ठीबहुवचनस्य न ग्रहणम्, शसा साहचर्यात् ॥२१८।

**[समीक्षा]**

'स्त्री+अम्, स्त्री+शस्' इस स्थिति में दोनों ही व्याकरणों में विकल्प से ई को इय् आदेश करके 'स्त्रियम्, स्त्रीम्। स्त्रियः, स्त्रीः' शब्दरूप सिद्ध किए गए हैं। अन्तर यही है कि पाणिनि ने **"वाऽम्शसोः"** (अ० ६।४।८०) सूत्र द्वारा साक्षात् ही इयङ् आदेश किया है, परन्तु शर्ववर्मा ने वैकल्पिक धातुवद्भाव करके उक्त रूप सिद्ध किए हैं।

**[रूपसिद्धि]**

१. **स्त्रियम्,** स्त्रीम्। स्त्री+अम्। प्रकृत सूत्र द्वारा वैकल्पिक धातुवद्भाव। धातुवद्भावपक्ष में इयादेश– स्त्रियम्। धातुवद्भाव के अभाव में अम् के अकार का लोप – **"अमूशसोरादिर्लोपम्"** (२।१।४७)–स्त्रीम्।

२. **स्त्रियः, स्त्रीः** । स्त्री + शस् । धातुवद्भाव के पक्ष में ई को इयादेश - स्त्रियः । धातुवद्भाव के अभाव में शस् प्रत्यय के अकार का लोप तथा सकार को विसर्गादेश ॥२१८।

## २१९. भवतो वादेरुत्वं संबुद्धौ [२।२।६३]

### [सूत्रार्थ]

सम्बुद्धिसंज्ञक 'सि' प्रत्यय के पर में रहने पर 'भवन्त्' शब्दान्तर्गत 'वन्तु' भाग को उत्व होता है ॥२१९।

### [दु० वृ०]

भवतोऽवयवस्य वादेरुत्वं भवति वा संबुद्धौ । हे भोः, हे भवन्! सन्निपात-लक्षणत्वात् संबुद्धेर्लोपो न स्यात् ॥२१९।

### [दु० टी०]

**भवतो०** । भवतः इत्यवयवलक्षणा षष्ठी । व् एवादिर्यस्येति **तद्गुणसंविज्ञानो बहुव्रीहिरयम्** । सर्वनामगणपठितस्य भवच्छब्दस्य ग्रहणम् । तेन भानि नक्षत्राणि सन्त्यस्येति वन्तुना शन्तृङा च नित्यं हे **भवन्!** तदन्तविधिरपि भवत्येव । परमश्चासौ भवंश्चेति हे परमभोः! लिङ्गग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् – हे भो ब्राह्मणि! हे भवति ब्राह्मणि! कथन्तर्हि भो ब्राह्मणौ, भो ब्राह्मणा इति ? भोः – शब्दोऽयम-व्ययम् आमन्त्रणार्थोऽस्ति, तेन द्विवचनबहुवचनयोरदोष इति । यद्येवं सूत्रेणापि किम्, प्रथमैकवचनेऽपि तेनैव सिद्धत्वात् सामान्यप्रयोगे विशेषः प्रयुज्यते, इति भोःशब्दस्याव्ययस्य भवतु नाम प्रयोगः । अपरः कथं भोः - शब्दः प्रयुज्यते, हे भो देवदत्त! भो भो देवदत्त! इति संबोधने सम्भ्रमे यावद्बोधं पदस्य द्विरुक्तिर्युक्तैव । किञ्च तदन्तविधिरपि न सिध्यति । अन्यच्च भवद्दीर्घायुरायुष्मद्देवानां प्रियैर्योगे उसादयोऽन्याभ्योऽपि विभक्तिभ्यो वा भवन्ति । 'सभोः, सभवन् । ततोभोः, ततोभवन् । अयंभोः, अयंभवन् । इहभोः, इहभवन्' इत्यादि एकदेशविकृतस्यानन्यवद्भावात् सिद्धं भवति ।

ननु उत्वे सति **"सम्बुद्धौ च"** (२।१।५६) इत्योत्वे, उत्वमोकारस्य प्रसज्येत 'हे भोः' इति, सत्यम् । **'प्रकृतेः पूर्वं पूर्वं स्यादन्तरङ्गम्'** (कात० प० पा० ७१) इत्युवर्णे

ओ भवति । अथवा **'स्वरादेशः परनिमित्तकः पूर्वविधिं प्रति स्थानिवत्'** (का० परि० ९) इत्युवर्णे ओत्वमिति । सन्निपातेत्यादि । ननु वर्णग्रहणे निमित्तत्वाद् इत्यङ्गीकर्तव्यम् 'वृक्षाय' इत्यादि सिध्यर्थम् । ह्रस्वश्च वर्ण इति न कथं सेर्लोपो भवति ? सत्यम् । 'भवतो भोः सम्बुद्धौ' इति कृते यद् वादेरुत्व विधत्ते तज्ज्ञापयति – अनित्यमिदमिति । अन्यथा वर्णग्रहणे निमित्तत्वाद् **"व्यञ्जनाच्च"** (२।१।४९) इति सेर्लोपो भविष्यति ।

**अन्यः** पुनराह – वादेरुत्वं योगविभागार्थं 'वादेरुत्वम्' इत्येकयोगस्ततो भवत इति । विभञ्जनं विभागोऽन्यथाकरणमिति कृत्वा तेन भगवदघवतोरपि भवति । भगो ज्ञानम्, अघं पापम्; तद् विद्यतेऽस्येति वन्तुः । 'भवतः' इति पुनर्वचनं पूर्वविधेर्लक्ष्यानुरोधार्थम् आभ्यामन्यत्र न स्यात् – हे भगोः ! हे भगवन्! हे अघोः, हे अघवन्! नैवम्, भाषायां शिष्टप्रयोगो दृश्यते इति **सूत्रकारमतम्** । यदि भावप्रत्ययनिर्देशो न स्यात् प्रथमैकवचनस्य विसर्जनीये सति 'उस्' इत्यपि प्रतिपद्येत । अन्तरङ्गत्वाद् अक्-प्रत्ययेऽपि वादेरुत्वमिति ॥२१९।

## [वि० प०]

**भवतः ।** वादेरिति । व् एवादिर्यस्येति विग्रहः । ननु उत्वे सति ह्रस्वस्य विद्यमानत्वात् **"ह्रस्वनदी०"** (२।१।७१) इत्यादिना संबुद्धेर्लोपः कथं न स्यादित्याह – सन्निपातलक्षणेत्यादि । तथापि वर्णग्रहणे निमित्तत्वात् प्राप्नोतीति चेत्, सत्यम् । भवतो भोः संबुद्धाविति भोसादेशेन सिद्धे यद् वादेरुत्वमिति तद् बोधयति – अनित्योऽयं न्याय इति । अन्यथा भोसादेशस्य व्यञ्जनान्तत्वात् **"व्यञ्जनाच्च"** (२।१।४९) इति सेर्लोपो भविष्यति । सत्यपि सन्निपातलक्षणे वर्णग्रहणे निमित्तत्वादिति भावः ॥२१९।

## [क० च०]

**भवतः ।** सन्निपातेत्यादि **वृत्तिः** । ननु हे भो इत्यत्र वादेरवयवस्योत्वे **"उवर्णे ओ"** (१।२।३) इति कृते कथम् ओकारात् सिलोपप्राप्तिर्येन सन्निपात इत्युच्यते ? सत्यम् । भूतपूर्वोकारमाश्रित्य प्राप्तिरिति **हेमकरः** । तन्न, यतोऽनेनैवोक्तम् – पन्थिमन्थीत्यत्र भूतपूर्वाश्रयणं न सर्वत्र, किन्तु यत्र सम्बुद्धिमाश्रित्य ह्रस्वो विकृतस्तत्रैव । न ह्यत्र संबुद्धिमाश्रित्य **"उवर्णे ओ"** (१।२।३) विकृतिर्विहिता । **अस्मन्मते** 'हे से!' इत्यादिवदत्रापि सिलोपः प्राप्नोत्येव, तस्माद् अयुक्तं सन्निपाताश्रयणमिति ।

भोसोदेशेनैव सिद्ध इत्यादि। ननु कथमिदमुच्यते – उत्वे कृते वर्णग्रहणे निमित्तत्वादिति न्यायात् **"ह्रस्वनदी०"** (२।१।७१) इत्यादिना सिलोपे निर्विसर्गः प्रयोगः स्यात्, भोसादेशे च सविसर्गः प्रयोगः, तत्कथं भोसादेशेनैव सिद्धे इत्युक्तम्। सत्यमत्र सिलोपे विवादोऽध्यासितो न तु विसर्गनिर्विसर्गं प्रति विवादः। ततश्च सिलोपमादायैव विवादस्तन्निरासाय **सिद्धान्तो** ज्ञेयः। यदि निर्विसर्गं प्रति विवादस्तदा वादेरुत्वमित्यपनीय भवतो भूः संबुद्धावित्येवं कृतं स्यादिति **कुलचन्द्रः**। तन्नातिपेशलम्। यस्मादिदमपि वक्तुं शक्यते। यथा भूरित्यकृत्वा वादेरुत्वमिति वचनं संबुद्धिलोपाभावार्थमुच्यते, तदा भोसादेशमकृत्वा यद् गुरुकरणं तत् संबुद्धिलोपार्थमिति किं नोच्यते।

तस्मादयमेव **सिद्धान्तः** – भवतो भोः संबुद्धाविति सूत्रस्यैकदेशानुकीर्तनं सूत्रसमुदायस्तु भवतो भोः संबुद्धौ सलुगिति बोध्यम्। सकारं विधाय यत् तस्य लोप-विधानं तद् **"व्यञ्जनाच्च"** (२।१।४९) इति सिलोपविधानार्थम्। तस्मादुभयपक्ष एव विसर्गाभावस्य सिद्धत्वात् नास्ति पूर्वपक्षावतारः। **वस्तुतः पञ्जिका** एवं योज्या वर्णग्रहणे निमित्तत्वात् सिलोपः प्राप्नोतीति। एतेन विसर्गभावः प्रयोगः साध्यः। अथ यदि विसर्गभाव एव साध्यस्तदा भवतो भूः संबुद्धाविति कृतं स्यात्, किं गुरुकरणेनेति? तस्मादीदृशमकृत्वा वादेरुत्वमिति यत् क्रियते, तद्वर्णग्रहणे निमित्तत्वादित्यस्यानित्यत्वं प्रतिपाद्य सविसर्ग एव साध्य इति। ननु यदि सविसर्ग एव साध्यस्तदा भोसादेश एव विधीयताम्, किमनेन गुरुप्रयत्नेन? एतदेव पूर्वपक्षवादिनो मतं श्लाघयन् सिद्धान्तयति चेत्, सत्यमित्यादि।

**अयमभिसन्धिः** – यदि विसर्गान्त एव साध्यः स्यात् तदा भोसादेश एव कृतः स्याद् विसर्गान्तसाधकं भोसादेशमकृत्वा यद् गुरुकरणं तेनानुमीयते – भोसादेशेऽपि **"व्यञ्जनाच्च"** (२।१।४९) इति सिलोपाभावाद् विसर्गद्वयस्थितिरेव स्यादिति। एतच्च तदैवोपपद्यते यदि वर्णग्रहणे निमित्तत्वाद् इत्यस्यानित्यत्वं गृह्यते इति स्थितम्। अन्यथा वर्णग्रहणे निमित्तत्वादित्यस्यानित्यत्वं विनेत्यर्थः ॥२१९।

**[समीक्षा]**

'भवन्त् + सि' इस स्थिति में कातन्त्रकार ने 'वन्त्' को वैकल्पिक उ, **"उवर्णे ओ"** (१।२।३) से अ को ओ तथा स् को विसर्गादेश करके 'भोः' तथा उ-आदेश

के अभाव में 'भवन्' शब्दरूप सिद्ध किया है। इस सम्बन्ध में ज्ञातव्य है कि पाणिनीय व्याकरण में 'भोः' शब्द की निष्पत्ति के लिए सूत्र उपलब्ध नहीं है।

**[रूपसिद्धि]**

१. **हे भोः!** हे भवन्त् + सि। प्रकृत सूत्र से वन्त् को उ, **"उवर्णे ओ"** (१।२।३) से भकारोत्तरवर्ती अ को ओ – उ का लोप तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से स् को विसर्गादेश।

२. **हे भवन्!** हे भवन्त् + सि। **"व्यञ्जनाच्च"** (२।१।४९) से सि-लोप तथा **"संयोगान्तस्य लोपः"** (२।३।५४) से संयोगसंज्ञक – 'न्-त्' वर्णों के अन्त में स्थित त्-वर्ण का लोप ॥२१९।

## २२०. अव्ययसर्वनाम्नः स्वरादन्त्यात् पूर्वोऽक् कः [२।२।६४]

**[सूत्रार्थ]**

अव्ययसंज्ञक तथा सर्वनामसंज्ञक शब्दों में अन्तिम स्वर से पूर्व विकल्प से अक् प्रत्यय होता है तथा अन्य साधारण शब्दों के बाद बाहुल्येन क-प्रत्यय होता है। 'भिस्-भ्याम्-भ्यस्-ओस्-सुप्' प्रत्ययों को छोड़कर अन्य प्रत्ययों के परे रहते अक् प्रत्यय होता है ॥२२०।

**[दु० वृ०]**

अव्ययसर्वनाम्नां चान्त्यात् स्वरात् पूर्वोऽक्प्रत्ययो भवति वा, कप्रत्ययश्च बहुलम्। उच्चकैः, उच्चैः। नीचकैः, नीचैः। सर्वकः, सर्वः। विश्वकः, विश्वः। युष्मकाभिः, युष्माभिः। अस्मकाभिः, अस्माभिः। विभक्तेश्च पूर्व इष्यते– त्वयका, मयका। आख्यातस्य च – पचतकि, पचति। भिन्धकि, भिन्धि। कप्रत्ययश्च – यावकः, मणिकः। अज्ञाने कुत्सायां च – अश्वकः। दयायाम् – वत्सकः। एहकि, एहि। इह नु ते धानाकाः, गृहाद् दूरं मा गाः। अल्पे – तैलकम्। ह्रस्वे – वृक्षकः। संज्ञायाम् – देवदत्तकः ॥२२०।

**[दु० टी०]**

**अव्यय०।** अव्ययानि च सर्वनामानि चेति समाहारत्वादेकवचनम्। कथमयं प्रत्ययोऽनुपघातेनागच्छतीत्या**गमः** एव स्यात्। ततः 'सर्विका, विश्विका' इति के प्रत्यये

इत्वं न स्यात् ? प्रतीयते येनार्थः स प्रत्यय उच्यते। इह तु प्रकृतिरेव तदर्थमभिधत्ते। न चात्र प्रत्ययानां विधानं येन तत् तत्प्रस्तावबलात् कल्प्यते ? सत्यम्। **'अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति'** (पुरु० प० पा० ९०), स्वार्थश्च प्रकृत्यर्थ इति शब्दस्य प्रवृत्तिनिमित्तम्, तत्र सहायभावेन कथं न प्रत्यय इति। अज्ञातादयश्चार्थाः अभिधानगम्याः, तानन्तरेणाप्यक् दृश्यते इति **सूत्रकृता** नोक्ताः।

अथवा अधिकृतस्य वाशब्दस्य बहुलार्थत्वादज्ञाताद्यर्थे कप्रत्ययः। तदा अन्वर्थता स्पष्टैव। स्वार्थमभिधाय शब्दो निरपेक्षद्रव्यमाह समवेतं समवेतस्य चोक्तौ लिङ्गं संख्यावचनं विभक्तिं च अभिधाय तान् विशेषानपेक्षमाणः कृत्स्नमात्मानं च लब्ध्वा कुत्सनादिषु पुनर्वर्तते असौ विभक्त्यन्तः –

**कुत्सादिभिः समाप्त्यर्थं पदं सद्भिः प्रयुज्यते।**
**लोके जात्यादयः सर्वे यस्मात् कुत्सादिहेतवः॥**

तथा चाह – **कुत्सितस्था तु या कुत्सा तदर्थः को विधीयते।**
**कुत्सितत्वेन कुत्स्यो वा न सम्यग् वापि कुत्सितः।**
**स्वशब्दाभिहितः केन विशिष्टोऽर्थः प्रतीयते॥**

अव्ययानाम् अक्प्रत्यये सति ककारस्य तकारः, सद्यआद्यत्वात्। हिरुक्, हिरकुत्। पृथक्, पृथकत्। धिक्, धकित्। तथा कुत्सितादिषु तूष्णींशब्दात् कप्रत्ययो यलोपश्च। तूष्णींशीलेऽपि **तूष्णीकः**। शीलं स्वभावो नियमोऽप्युच्यते। **यथा 'शीलवान् भिक्षुः'**। योऽपि नियमपरतया वाचं नियच्छति सोऽपि तूष्णीकः। **'विभक्तेश्च पूर्व इष्यते'** इति सर्वनाम्नां विभक्तेरित्यर्थः। अव्ययानामनन्तरत्वाद् विभक्ते**रन्त्यात्** स्वराद् इति श्रुतसंबन्धः। तथाप्यनोऽकारसकारभकारादेरित्यर्थः। युवकयोः, **आवकयोः**। **युष्मकासु**, अस्मकासु इति। भकारादेर्दर्शितमेव।

आख्यातस्य चेति। अन्त्यात् स्वरादिति संबन्धः एव। कुत्सितं पचतीत्यादि **वाक्यम्**। भिन्नदेशकालानामप्येकार्थतया बाधकमिति अका द्योतितेऽर्थे को न भवति। कप्रत्ययश्च बहुलमिति बहुलशब्दः प्रत्येकमभिसंबध्यते, भिन्नविभक्तिनिर्देशाच्च अव्ययसर्वनामभ्यामिति न संबध्यते त्वया युक्तः। अन्यथा 'अक्कौ' इति विदध्यात्। सर्वनामसु व्यञ्जनान्तेषु अक्प्रत्ययस्य कप्रत्ययस्य च रूपभेदो यथा **त्वयका कृतम्**,

**त्वकत्कृतम् । मयका कृतम्, मकत्कृतम् । त्यकत्, भवकत्** कुलम् । **भवकान्,** प्रकृत्यन्तःपातित्वात् । स्मैप्रभृतयश्च भवन्ति, कप्रत्ययेन व्यवधानं स्यादिति ।

**यावक** इत्यादि । यावादिभ्यः स्वार्थे को बहुलत्वादेव । याव-मणि-स्वस्ति-इन्दु-नील-कृष्ण-सान्द्र-श्रीकृष्ण-वामन-पीत-लोष्ट-अस्थि-भिक्षु-पत्र-नल-स्तब्ध ।तथा ऋतौ उष्णशीते पशौ लूनविदाते ।अणु निपुणे ।पुत्र कृत्रिमे ।पुष्प विमाने ।स्नात वेदसमाप्तौ । शून्य रिक्ते । दान कुत्सिते । तन्तु सूत्रे । बृहती आच्छादने । ईयन्सु चाज्ञाने । कन्दु कुमारक्रीडने । उष्णकः, शीतकः ऋतुः । अन्यत्र उष्णं शीतं जलम् । लूनको विदातकः पशुः । अन्यत्र लूनं विदातम् । अणुको निपुणः , अन्यत्र अणुः । कृत्रिमः पुत्रः पुत्रकः, अन्यत्र पुत्रः । पुष्पकं विमानम्, अन्यत्र पुष्पम् । यस्य वेदः समाप्तः स स्नातक उच्यते । वेदसमाप्ताविति किम् ? नद्यां स्नातः । शून्यको रिक्तः । अन्यत्र शून्यम् । दानकं कुत्सितम्, अन्यत्र दानम् । तन्तुकं सूत्रम्, अन्यत्र तन्तुः । बृहतिका आच्छादनम् (प्रावारः); अन्यत्र बृहतीच्छन्दः ।अज्ञाने श्रेयस्कः, अन्यत्र श्रेयान् ।कुमारः क्रीडत्यनेन कुमारक्रीडनः कन्दुकः । आकृतिगणत्वाद् बहुलमेव श्रेय इति । अज्ञान इति अश्व इत्युक्ते प्रयोगसामर्थ्यात् सम्बन्धिविशेषाज्ञानं गम्यते, नहि सर्वथा अविज्ञानार्थः शब्दः प्रयोगमर्हति । तस्मात् स्वेन रूपेण परिज्ञातस्याज्ञाने इत्यर्थः ।

कुत्सायां चेति । कुत्सायां वर्तमानादित्यर्थः! कुत्सितोऽश्वः अश्वकः, तथा कुत्सितकम्, ईषत् कुत्सितम् अतिकुत्सितं वेत्यर्थः । क्षेपेऽपि – व्याकरणकेन त्वं गर्वितः इति । अथवा क्षेपोऽपि कुत्सितार्थ इति किं भेदेनेति । कुत्सिते संज्ञाया च को भवति, तदन्तेन चेत् संज्ञा गम्यते । शूद्रकः, साधकः, बाधकः, वाहकः, पूर्णकः, पुष्पकः, पृथुकः । किं भेदेन ? कुत्सायामित्यनेनैव सिद्धत्वात् । दयायामिति । दयायां गम्यमानायामित्यर्थः । अनुकम्पितो वत्स इति विगृह्य कः । एवं दुर्बलकः, बुभुक्षितकः, हरीतकः । तद्युक्तनीतावपि भवति । सामदानभेददण्डलक्षणा नीतिः । भेददण्डौ त्वनुकम्पायां न स्त इति सामदानात्मिकेह नीतिरिति । अथवा भेददण्डात्मिकायामपि ऐहलौकिकं पारलौकिकं वाऽनर्थकं पश्यन्ननुकम्पमानोऽनर्थपरिहारार्थं प्रयुञ्जीत ।तदापि दयायामित्येव सिद्धत्वादिति **वृत्तौ** मतभेदेन दर्शितम् ।

न चानुकम्प्यमानादित्युक्तं व्यवहितादपि भवति – 'एहकि धानाकास्तवेति' । तत्रापि दया गम्यते एव । अल्प इत्यपचितपरिमाणे वर्तमानादित्यर्थः । अल्पकमिति

स्तोककम् अत्यल्पकमित्यर्थः । ह्रस्व इति दीर्घविपरीते वर्तमानादित्यर्थः । ह्रस्वकोऽतिह्रस्व इत्यर्थः । ननु ह्रस्वोऽल्प एव किं भेदेन दर्शितम् । नैवं सत्यपि ह्रस्वत्वे महत्त्वगुणयुक्तं महदेव भवति । ह्रस्वहेतुकायामपि संज्ञायां गम्यमानायां को भवत्येव – वंशको दण्डकः । संज्ञायामिति संज्ञामात्रे गम्यमाने को दृश्यते इति भावः । तथा च 'धानुयाकः, शङ्खयाकः' इत्यादि लोकप्रयुक्तो दृश्यते । आचार्यमतं तु,

**अज्ञाने कुत्सिते चैव संज्ञाया (दयाया) – मनुकम्पने ।**

**तद्युक्तनीतादप्यल्पे वाच्ये ह्रस्वे च कः स्मृतः ॥**

किमनेन नियमेन यत्र को दृश्यते तत्रानेन प्रतिपत्तव्यः । तथा च – बहुव्रीहौ नद्यृदन्ताद् इत्यादि यथालक्ष्यम् । दयायां मनुष्याणामविषये 'इक - इय- इन' एते तद्धिता दृश्यन्ते लोकोपचारात् – देविकः, देवियः, देविनः । बहुस्वरान्न दृश्यन्ते- देवदत्तकः । दृश्यन्ते च – प्रजापतिकः, प्रजापतियः, प्रजापतिनः । शेवलिकः, शेवलियः, शेवलिनः । उपात् तश्च – उपिकः, उपियः, उपिनः, उपितः (उप्तः) । तथा षषश्चान्तस्य डः- षडिकः, षडियः, षडिनः, षड्डः । ऋदन्तान्नयौ –सवितृयः । उदन्ताच्च – 'भानुनः, भानुयः' इत्यादि न वक्तव्यमिति भावः । ह्रस्वे – "कुटीशमीशुण्डाभ्यो रः" । कापवादस्तद्धित एव **लोकतः सिद्धः** – 'कुटीरः, शमीरः, शुण्डारः' स्वभावतः पुंल्लिङ्गा । कासूगोणीभ्यां तमादिनिपातनादेव तरः – ह्रस्वा कासूः कासूतरी, ह्रस्वा गोणी गोणीतरी । नदादित्वाद् ईः । कासूरिति शक्तिरायुधविशेष उच्यते । गोणीति लोकप्रसिद्धम् । कापवादोऽयं योगः । तथा **"वत्सोक्षाश्वर्षभाणां स्वभावस्य तनुत्वे गम्यमाने"** । शैशवस्य तनुत्वे वत्सतरः । यौवनस्य तनुत्वे उक्षतरः । अश्वभावस्य तनुत्वे अश्वतरः, यो गर्दभेनाश्वायामुत्पन्नः स उच्यते । सामर्थ्यस्य तनुत्वे ऋषभतरः, भारवहनाक्षम ऋषभ उच्यते । तथा तमादिनिपातनादेव यत्तदेकेभ्यो द्वयोरेकस्य निर्धारणे डतरो वा । यतरो भवतोर्देवदत्तः । ततरः आगच्छतु । यो भवतोर्देवदत्तः स आगच्छतु । एकतरो भवतोर्देवदत्तः, एको भवतोर्देवदत्तः । तथा जातिवृत्तिभ्यश्च बहूनां डतमः । यतमो भवतां कठस्ततम आगच्छतु । यो भवतां कठः स आगच्छतु । एकतमो भवतां कठः, एको भवतां कठः । तौ किमः – कतरो भवतोर्देवदत्तः, कतरो भवतोः । कतमो भवतां देवदत्तः, कतमो भवतां कठः । एकस्य निर्धारणे वेति तत्रापि संबध्यते ।

अजातावपि भवत्येव सादृश्यवृत्तेः, संज्ञाप्रकृत्योः को भवति बहुललक्षण एव। प्रतिकृतिः प्रतिरूपकम् प्रतिच्छन्दकमित्यर्थः। संज्ञायाम् इति अप्रतिकृत्यर्थम्। प्रतिकृताविति।प्रतिकृतिविषये यत् सादृश्यम्, तत्र को भवति।प्रतिकृतिग्रहणसामर्थ्यात् सादृश्यविशेषणम्–अश्व इवायमश्वकः। अश्वसदृशस्य संज्ञेयम्। देवदत्त इवायं देवदत्तकः। देवदत्तप्रतिकृतिरयमित्यर्थः। संज्ञाप्रतिकृत्योरिति किम्? गौरिव गवयः, काष्ठादिमयं यत् प्रतिच्छन्दकं तत् प्रतिकृतिरुच्यते। चञ्चेव चञ्चा, वध्रिकेव वध्रिका, खरकुटीव खरकुटी दर्शनीयो मनुष्य इति सोऽयमित्यभिसंबन्धात् तच्छब्देनाभिधानम्। चञ्चा तृणमयः पुरुषः, वध्रिका चर्ममयी वरत्रा। खरकुटी नापितस्य शालिका इति। एवं प्रतिमासु स्कन्दो विष्णुरिति। आलेख्येषु भीमोऽर्जुन इति। ध्वजेषु सिंहो गरुड इति।एवमादिषु बहुलत्वात् कप्रत्ययो दृश्यते।एते खल्वज्ञातादयोऽर्थाः।एष्वक्प्रत्ययोऽपि यथायोगमुदाहरणीयः॥२२०।

## [वि० प०]

अव्यय०। अनुपघातेनान्त्यात् स्वरात् पूर्वो भवन्नायमागमः अभिधानादज्ञातादयोऽप्यर्थाः प्रतीयन्तेऽनेनेति प्रत्ययोऽपीति आह–अक्प्रत्यय इति। क इति सामान्यनिर्देशाद् बहुत्वमेव गम्यते इत्याह–कप्रत्ययश्च बहुलमिति। न च वक्तव्यमिह श्रुतत्वाद् अव्ययसर्वनाम्न एव कप्रत्ययोऽपि भवतीति भिन्नविभक्तिनिर्देशात्। अन्यथा अक् च कश्चेति द्वन्द्वे सति 'अक्कौ' इत्येकविभक्तिनिर्देशमेव कुर्वीतेति। कप्रत्ययश्चेति।चकारेणाक्प्रत्ययो हि क्वचिद् बहुलं भवतीति वेदितव्यम्, यद् वक्ष्यति विभक्तेश्च पूर्व इष्यते आख्यातस्य चेति।

युष्मकाभिरिति। एषां विभक्तावन्तलोपे पश्चादात्वं व्यञ्जनादाविति आत्वं विभक्तेश्चेति सर्वनाम्नो विभक्तेरित्यर्थः।अव्ययानां विभक्तेरसम्भवाद् इहापि विभक्तेरन्त्यात् स्वरात् पूर्वोऽक् इति प्रतिपत्तव्यम्। तत्राप्योकारभकारसकारादिविभक्तिं वर्जयित्वा द्रष्टव्यम्।अत एव बहुलत्वादिति।तेन 'युवकयोः, आवकयोः।युष्मकासु, अस्मकासु। युष्मकाभिः, अस्मकाभिः' इति। इह सर्वनाम्न एव अन्त्यात् स्वरात् पूर्वो भवति, न तु विभक्तेः।'त्वयका, मयका' इति विभक्तेरन्त्यात् स्वरात् पूर्वोऽक् स च विभक्तिग्रहणेन गृह्यते, एवम् 'अस्थानिनि' इत्येवं भवति। आख्यातस्य चेति तत्राप्यन्त्यात् स्वरात् पूर्व इति संबन्धः। कुत्सितं पचति, कुत्सितं भिन्द्धीति वाक्यम्। भिन्द्धकीति। भिदिर्

विदारणे (६।२) ततो हि रुधादित्वान्नशब्दः रुधादेर्विकरणान्तस्य लोप इति। हुधुड्भ्यां हेर्धिः (३।५।३५) इति कप्रत्ययश्चेति। याव एव यावकः। मणिरेव मणिकः। यावादिभ्यः स्वार्थे को भवति, अत एव बहुलत्वात्। तथा स्वस्तिकः, इन्दुकः, पीतकः, नीलकः इति। यावादिराकृतिगणः।

अज्ञाने कुत्सायां चेति। बहुलत्वादेवाज्ञातादिष्वर्थेषु कप्रत्यय। तथा च **वृद्धैरुक्तम्** –

**अज्ञाने कुत्सिते चैव संज्ञायामनुकम्पने।**
**तद्युक्तनीतिरप्यल्पे वाच्ये ह्रस्वे च कः स्मृतः॥**

कस्यायमश्वः, कुत्सितो वा अश्वः इत्यश्वकः। अज्ञानमपि सम्बन्धिविशेषविषयमेव द्रष्टव्यम्। न पुनः स्वेन रूपेण तदेव वस्तु न विज्ञातम्, तदा अश्वादिशब्दस्याप्रयोगप्रसङ्गात्। नहि अविदितार्थः शब्दो लोके प्रयोगमर्हतीति तत्र स्वेन रूपेण ज्ञातस्य सम्बन्धिविशेषाज्ञाने कप्रत्ययः। दयायामिति। अनुकम्पने गम्यमाने इत्यर्थः। वत्सक इति। अनुकम्पितो वत्स इति विगृह्य कप्रत्ययः। तद्युक्तनीतावपि दर्शयति। तेनानुकम्पनेन युक्ता तद्युक्ता चासौ नीतिश्चेति तस्यामपीत्यर्थः। अत्र यद्यपि साम-दान-भेद-दण्डलक्षणा **नीतिश्चतुर्विधा** तथापि सामदानात्मिका नीतिरिह गृह्यते, अस्या एवानुकम्पायुक्तत्वात् न तु भेददण्डौ तयोर्हिंसार्थत्वादित्याह -- एहकीत्यादि। तदा पुनरनर्थकपरिहारद्वारेण आत्मानमनुकम्पयिष्यन् भेददण्डात्मिकामपि नीतिं प्रयुञ्जीत इति विवक्षा। तदाप्यनुकम्पाविषयत्वाद् भवितव्यमेवेति। वृत्तौ पुनस्ताद्-युक्तनीतावित्यभेदेन दर्शितम्। इहाप्यनुकम्पाया विद्यमानत्वाद् दयायामित्येवं सिद्धम्। एहकीति आङ्पूर्वाद् **'इण् गतौ'** (२।१३) ततो हि आख्यातस्य चेति हिशब्दस्येकारात् पूर्वं तद्युक्तनीतावित्यक्प्रत्ययः। 'धानाका' इत्यत्र च क एवेति॥२२०।

**[क० च०]**

**अव्यय०।** अनपघातेनेत्यादि। **"अद् व्यञ्जनेऽनक्"** (२।३।३५) इत्यत्र अग्वर्जनमेव आगमत्वे ज्ञापकम्। अन्यथा आगमत्वं विना साकोऽदादेशासंभवाद् वर्जनमनर्थकं स्यात्। **अभिधानादिति**। अस्य प्रत्ययत्वे उदनुबन्धाकरणमपि प्रमाणम्। श्रुतत्वादिति। **"अव्ययसर्वनाम्नः"** (२।२।६४) इत्यस्य पश्चाद् अन्त्यात् स्वरात् पूर्वमित्यवधार्यमिति ध्येयम्। अन्यथा अक् च कश्चेति द्वन्द्वे सतीत्यादि। ननु

कथमिदमुच्यते यावता अव्ययादक् सर्वनाम्नश्च कः इति यथासंख्यनिरासार्थमेव भिन्नविभक्तिनिर्देश इति ? सत्यम् । **"अद्व्यञ्जनेऽनक्"** (२।३।३५) इत्यग्वर्जनान्न यथासङ्ख्यम् । अन्यथा सर्वनाम्नोऽकोऽसम्भवादिति **दिक्** ॥२२०।

**[समीक्षा]**

'उच्चैस् + सि, नीचैस् + सि, सर्व + सि, युष्मद् + भिस्, अस्मद् + भिस्, युष्मद् + टा, अष्मद् + टा, पच् + अन् + ति' इत्यादि अवस्था में कातन्त्रकार तथा पाणिनि दोनों ही अन्तिम स्वर से या विभक्ति से पूर्व 'अक्' आदेश करके उच्चकैः, नीचकैः, सर्वकः, युष्मकाभिः, अस्मकाभिः, त्वयका, पचतकि' आदि शब्दरूप सिद्ध करते हैं। पाणिनीय 'अकच्' प्रत्ययविधायक सूत्र है– **"अव्ययसर्वनाम्नामकच् प्राक् टेः"** (अ०५।३।७१)। अज्ञात आदि अर्थों में 'क-कन्' प्रत्यय करने के लिए पाणिनि ने **"अज्ञाते, कुत्सिते, संज्ञायां कन्, अनुकम्पायाम्, नीतौ च तद्युक्तात्"** (अ० ५।३।७३-७७) ये पाँच सूत्र अकच्प्रत्ययविधायक सूत्र से पृथक् बनाए हैं। कातन्त्रकार ने एक ही सूत्र द्वारा 'अक्- क' प्रत्ययों का विधान किया है। अर्थों का निर्देश वृत्तिकार आदि ने वार्त्तिक सूत्रों में किया है। अतः सूत्रसंख्या की दृष्टि से पाणिनीय व्याकरण में गौरव स्पष्ट है।

**[रूपसिद्धि]**

१-१०. **उच्चकैः** । उच्चैस् + सि । **नीचकैः** । नीचैस् + सि । **सर्वकः** । सर्व + सि । **विश्वकः** । विश्व + सि । **युष्मकाभिः** । युष्मद् + भिस् । **अस्मकाभिः** । अस्मद् + भिस् । **त्वयका** । युष्मद् + टा । **मयका** । अस्मद् + टा । **पचतकि** । पच् + अन् + ति । **भिन्धकि** । भिन्द् + हि । प्रकृत सूत्र द्वारा अन्तिम स्वर या विभक्ति से पूर्व अक् प्रत्यय तथा विभक्तिकार्य ।

११-१९. **यावकः** । याव + सि । **मणिकः** । मणि + सि । **अश्वकः** । अश्व + सि । **वत्सकः** । वत्स + सि । **एहकि** । आ + इण् + हि । **धानाकाः** । धाना + जस् । **तैलकः** । तैल + सि । **वृक्षकः** । वृक्ष + सि । **देवदत्तकः** । देवदत्त + सि । प्रकृत सूत्र द्वारा क-प्रत्यय ।

## २२१. के प्रत्यये स्त्रीकृताकारपरे पूर्वोऽकार इकारम् [२।२।६५]

### [सूत्रार्थ]

स्त्रीलिङ्ग कृत आकार के परवर्ती होने पर प्रत्ययगत ककार से पूर्ववर्ती अकार को इकारादेश होता है ॥२२१।

### [दु० वृ०]

के प्रत्यये स्त्रीकृताकारपरे पूर्वोऽकार इकारमापद्यते । सर्विका, उष्ट्रिका, पाचिका, पाठिका । क इति किम् ? चेतना । प्रत्यय इति किम् ? तका स्त्रीति किम् ? पाचकाभ्याम् । कृत इति किम् ? **पुत्रकाम्या** । बहुलाधिकारात् 'यका, सका' । जीवका, नन्दका ! आशिष्यकः ॥२२१।

**॥ इति दौर्गसिंह्यां वृत्तौ नाम्नि चतुष्टये द्वितीयः सखिपादः समाप्तः॥**

●

### [दु० टी०]

**के०** । प्रत्यय इति विषयसप्तमीयम् । प्रत्ययावयवोऽपि प्रत्यय इहोपचारादिति । अकारेण ककार उच्चार्यते । समानदीर्घत्वे सति **'परनिमित्तादेशः पूर्वस्मिन् स एव'** (का० परि० ४४) इति स्त्रीकृत आकार उच्यते । अथ **'स्वरादेशः परनिमित्तकः पूर्वविधिं प्रति स्थानिवत्'** (का० परि० ९) इति चेत्, तथाप्येकेन वर्णेन व्यवधानमाश्रीयते न त्वनेकेनेति न्यायात् समानदीर्घात् प्रागित्वं स्यात् । संभवे हि के गृह्यमाणे पाचिकेति सिध्यति । व्यपदेशिवद्भावाद् उष्ट्रिकेति च । सर्विकेति न सिध्यति, तदेतत्प्रकरण-सन्निधानाद् व्यवहितस्याकारस्य प्रत्ययग्रहणबलादिति । स्त्रियां कृत आकारः परो यस्मादिति विग्रहः । पूर्वशब्दयोगाविवक्षायां क इति परसप्तमीमाह – **सर्विकेति** । सर्व + अक **"स्त्रियामादा"** (२।४।४९) । उष्ट्रिकेति अज्ञाताद्यर्थे कप्रत्ययः । पाठिकेति । पठ व्यक्तायां वाचि, वुण् । "युवुझामनाकान्ताः" (४।६।५४) इत्यकः । **चेतनेति** । चेतयतेः **"ईषिश्रन्थ्यासि"** (४।५।८५) इत्यादिना स्त्रियां युः । तकेति । तक हसने, पचाद्यच् । पाचकाभ्यामिति । यदि स्त्रीग्रहणं न क्रियते तदा घोषवति दीर्घे सति कृताकारपरः ककारो भवतीत्वं स्यात् । यदि कृतग्रहणं न क्रियते तदा स्त्रीलिङ्गविषये अकारे स्यात् । पुत्रस्येच्छा 'पुत्रकाम्या' इति काम्यप्रत्ययस्ततः शंसिप्रत्ययादः **"स्त्रियामादा"**

(२।४।४९)। स्त्रीकृत आकारो यस्मादिति विग्रहे परार्थो लभ्यते यत् परग्रहणं कृतं स्त्रीकृत आकारः परो यस्मात् तस्मिन्नेव के यथा स्यात्। यस्माद् विभक्तिरपि परा तस्मिन् मा भूत्। बहवः परिव्राजका यस्यां नगर्यां सा **'बहुपरिव्राजका नगरी'** इति लुप्तायामपि विभक्तौ परग्रहणसामर्थ्यादित्वं न भवतीत्यर्थः। **'सप्तम्या निर्दिष्टे पूर्वस्य'** (का० परि० २१) इति यत् पूर्वग्रहणं तत् श्रुतिमात्रपूर्वत्वप्रतिपत्त्यर्थम्, तेन नस्यालुप्तवद्भावेऽपि सतीत्वं भवत्येव। बहूनि चर्माणि यस्यां सा **'बहुचर्मिका शाला'** इति। बहुव्रीहौ शेषान्नाम्नः को विभाषया भवति स्त्रियामादा, ततो विभक्तिरिति।

आकार इति किम्? नर्तकी, रजकी। **"शिल्पिनि वुष्"** (४।२।६१)। अकार इति किम्? गोका, नौका, वाका, धाका। गोनौभ्यामज्ञाताद्यर्थे कः शेषाभ्यां **"कृवाधार्चिभ्यः"**(द्र०,उ० २।५७) औणादिकलक्षणः कः। बहुलेत्यादि। यत्तदोस्त्यदाद्यत्वे सर्वनामत्वादक्। **'जीव बल प्राणधारणे, टु नदि समृद्धौ'** (१।१९२, २५) जीवतात्, नन्दतात् इति वाक्यम्। तथा इष्टका। इषेस्तु कः, **उणादिषु सर्वे विधयो विकल्प्यन्ते वा।** क्षिपादीनां च न भवति – क्षिपका, ध्रुवका। धारयतीति **धारका। 'क्षिप प्रेरणे, ध्रु स्थैर्ये'** (३।१२; १।२८५), आभ्यामौणादिको वुण्। आकृतिगणोऽयम्। तारका ज्योतिषि। तरतेर्वुण्। अन्यत्र तारिका। वर्णका तान्तवे। तन्तूनां विकारस्तान्तवः। स च न सर्वो गृह्यते, किन्तर्हि प्रावरणविशेषः। वर्णशब्दात् कप्रत्ययः। वर्ण वर्णक्रियाया चुरादौ पठ्यते। ततो वुण्। वर्णिका अन्या नटादीनाम्। अष्टका पितॄणाम्। पितृसम्बन्धिनीत्यर्थः। पितॄनधिकृत्य यत् कर्म क्रियते तत्र 'अष्टका' इति भावः। अशू व्याप्तौ। अशेस्तक औणादिकः। षत्वटत्वे। अन्यत्र 'अष्टिका' खारी। अष्टौ आढकाः परिमाणानि यस्या इति विगृह्य कः, के प्रत्यये इतीत्वम्। तथा उपाधिभ्यां त्यकन् – उपत्यका, अधित्यका। तदयुक्तम्, संज्ञाशब्दावेतावेवम्भूतावित्यर्थः। निपातनमतेनापि निपातनबलादेवेत्वं न स्यात्। शकुनौ - 'वर्तिका, वर्तका' विभाषात्र दृश्यते। **'वृतु वर्तने'** (१।४८४) वुण्। शकुनिः। पक्षिविशेष एव रूढः। अन्यत्र नित्यमेव। वर्तिका दीपस्य। यथा **"सूतका – पुत्रका – वृन्दारकाणां वा"** सूतका – सूतिका। यावादित्वात् कः। तथा 'पुत्रका, पुत्रिका'। पुत्रशब्दः स्त्रियामपि वर्तते। वृन्दारका, वृन्दारिका। अस्त्यर्थे आरकप्रत्ययो दृश्यते। वृन्दं दारयतीति वृन्दारिका। निरुक्तमप्यस्ति तथा अभाषितपुंस्काद् विहितस्य स्त्रीकृताकारस्य ह्रस्वस्य वा खट्विका – खट्वका।

अभाषितपुंस्काद् विहितस्येति किम् ? न विद्यते खट्वा अस्या इति बहुव्रीहावप्रधानस्य कृते ह्रस्वे पुनः स्त्रियामादा । अज्ञाताद्यर्थे पुनः कप्रत्यय : । अखट्विका नित्यं भवति । तथा खट्वामतिक्रान्ता अतिखट्विका । ह्रस्वस्येति किम् ? खट्वाका । ह्रस्वविधाने क्वचिदिति वचनाद् दीर्घोऽप्यत्र दृश्यते । यदा तु न विद्यते खट्वा अस्या इति **"शेषाद् वा"** इति कः, तदा भवत्येव विकल्पः । 'अखट्विका, अखट्वका' इत्यपि दृश्यते । तथा "अधातोर्यकाभ्यां स्त्रीकृताकारस्य ह्रस्वस्य वा" । दण्डमर्हतीति दण्डादिभ्योऽर्हतीत्यर्थे यो दृश्यते । दन्त्यका,दन्त्यिका । चटकिका , चटकका । अज्ञाताद्यर्थे कः । अधातोरिति किम् ? शोभनः पाकोऽस्याः, शोभनो नयोऽस्याः इति **सुपाकिका, सुनयिका** । त्यण् – त्यपोर्नित्यम् - दाक्षिणात्यिका । अत्रत्यिका दक्षिणापरा । पश्चाद्भ्यस्त्यण् शेषे दृश्यते । तथा क्वेहामात्रतत्रतसन्त्यबिति । भस्त्राजाज्ञेषाद् व्यस्वानां नञश्च वा – बहुभस्त्रिका, बहुभस्त्रका । अभस्त्रिका, अभस्त्रका । प्रधानस्य भस्त्राशब्दस्याभाषित-पुंस्कत्वात् सिद्धमेव । अजिका, अजका । अनजिका, अनजका । ज्ञिका, ज्ञका । अज्ञिका, अज्ञका । **"नाम्युपध०"** (४ । २ । ५१ ) इत्यादिना कः । आलोपोऽसार्वधातुके । जानातीति ज्ञा । एषिका, एषका । द्विके, द्वयके। एषा द्वे । अनञ्पूर्वके एकोदाहरणे एतदः **"सौ सः"** (२ । ३ । ३२) सत्वम्, द्विशब्दाद् औकारद्विवचनम् । त्यदाद्यत्वे । सर्वनामत्वान्मध्येऽकृप्रत्ययः । स्विका, स्वका । अस्विका, अस्वका । ज्ञातिधनाख्ययोः सर्वनामत्वं नास्तीति । अज्ञाताद्यर्थ एव कप्रत्ययः प्रतिपत्तव्यः । अण्प्रत्ययेऽपि दृश्यते – मामिका युक्तिः, नरिका स्त्री । मामकशब्दोऽयम् अनन्तो निपातः शेषाद्यर्थे दृश्यते । नदादेराकृतिगणत्वाद् ईर्न भवति । नरं कामयतीति 'कै गै रै शब्दे' (१ । २५६) । "आतोऽनुपसर्गात् कः" । (४ । ३ । ४) । नरान् कामयते इति । **"अन्यतोऽपि च"** (४ । ३ । ४९) इति ड **इत्येके** ॥ २२१ ।

**॥ इति दुर्गसिंहविरचितायां कातन्त्रवृत्तिटीकायां नामचतुष्टये द्वितीयः सखिपादः समाप्तः ॥**

●

## [वि० प०]

**के प्रत्यये०** । क इत्यकारस्योच्चारणार्थत्वात् । अस्वर इह ककारो गृह्यते । के प्रत्यय इति विषयसप्तमीयम् । प्रत्ययविषये यः ककारस्तस्मिन्नित्यर्थः । स्त्रियां कृतः **स्त्रीकृतः** , स चासावाकारश्चेति स्त्रीकृताकारः स एव परो यस्मादिति विग्रहः । सर्विकेति

सर्वनामत्वाद् अन्त्यात् स्वरात् पूर्वोऽकृप्रत्ययस्ततः स्त्रियामादा ।उष्ट्रिकेति ।अज्ञाताद्यर्थे कप्रत्ययः। पाचिकेति। पचेर्वुण्। न त्वकारमन्तरेणापि के प्रत्यय इति उच्चारयितुं शक्यते। तत्कथमकार उच्चारणार्थः, येनास्वरः ककारो गृह्यते तस्मात् स्वरस्य निर्दिष्टत्वात् प्रत्ययविषये के भवन्निकारः'पाठिका' इत्यत्रैव स्यात् ।'उष्ट्रिका' इत्यत्रापि व्यपदेशिवद्भावेन कस्य प्रत्ययत्वमुच्यते ।इह पुनः सर्वथा न स्यात् ।'सर्विका' इत्यत्र अस्वरत्वादिति। नैतदेवम्। इह पुनः सन्निधानात्कृकयोरेव ककारस्य ग्रहणं वेदितव्यम् । तच्चास्वरस्य ग्रहणे सत्युपपद्यते इत्यदोषः । तयोश्च प्रत्ययत्वादव्यभिचार एवेति । यत् प्रत्ययग्रहणं तदिह प्रत्ययसंज्ञाचोदितस्यैव ग्रहणार्थमिति । तेन व्यवहितस्य वुणादेरपि ग्रहणं भवतीति सर्वत्रेकारः प्रवर्तते ।

चेतनेति ।चिती संज्ञाने ।हेत्विनन्ताद् **"ईषिश्रन्थ्यासि०"** (४।५।८५) इत्यादिना स्त्रियां युप्रत्ययः, स्त्रियामादा तकेति। **'तक हसनार्थः'** (१।३२)। पचादित्वादच्। 'पाचकाभ्याम्' इति **"अकारो दीर्घं घोषवति"** (२।१।१४) इति दीर्घः ।यदि कृतग्रहणं न स्यात् तदा स्त्रीलिङ्गविषये योऽकारस्तस्मिन्नपि स्यादित्याह – कृत इति ।पुत्रकाम्येति। पुत्रस्येच्छा पुत्रकाम्या। पुत्रशब्दात् काम्यप्रत्ययः। ततः **"शंसिप्रत्ययादः, स्त्रियामादा"** (२।४।४९; ४।५।८०) बहुलेत्यादि। यत्तदोस्त्यदाद्यत्वं सर्वनामत्वादकृप्रत्ययः इति। 'जीवका, नन्दका' इति। 'जीवतात्, नन्दतात्' इति वाक्यम् ।।२२१।

**॥ इति त्रिलोचनदासकृतायां कातन्त्रवृत्तिपञ्जिकायां नामचतुष्टये द्वितीयः सखिपादः समाप्तः॥**

●

## [क० च०]

**के प्रत्यये०।** ननु कथं तकेति प्रत्युदाहृतम्, प्रत्ययग्रहणाभावेऽनन्तरत्वादक्-कयोरनुवृत्तौ सत्यां 'पाठिका, पाचिका' इति न स्यादित्युत्तरं युज्यते ? सत्यम्। प्रकरणमाश्रित्य प्रत्युदाहरणमिति **केचित्। अन्ये** तु प्रत्ययग्रहणाभावे ककारे इति क्रियताम्। ततः कारग्रहणस्य व्याप्त्यर्थत्वात् सामान्ये ककारे भविष्यतीत्याहुः। **अपरे** तु कृतग्रहणसामर्थ्यादिव सामान्यककारोपलब्धिः। अन्यथा स्त्रियामाकारपर इति कृतेऽपि अक् – कयोरेवानुवर्तनात् 'पुत्रकाम्या' इत्यत्रैव सर्वथा न स्यादिति **दिक्।**

ननु 'ष्णान्ताः संख्या अलिङ्गकाः' इत्यत्र कथम् इकारो न स्यात् ? सत्यम् । के प्रत्यय इत्यत्र स्त्रीकृताकारे इति कृते सिध्यति किं परग्रहणेनेति तज्ज्ञापयति – स्त्रीकृताकारमात्रं यत् परस्मिंस्तत्रैवास्य विषयः । अत्र हि लिङ्गशब्दात् स्वार्थे कप्रत्यये न विद्यते लिङ्गकम् आसामिति विग्रहे तदन्ताद् आप्रत्ययः ॥२२१।

**॥ इति सुषेणविद्याभूषणकृते कलापचन्द्रे नाम्नि चतुष्टये द्वितीयः सखिपादः समाप्तः॥**

●

## [समीक्षा]

'सर्वक + आ, उष्ट्क + आ, पाचक + आ, पाठक + आ' इस अवस्था में 'क' से पूर्ववर्ती अकार के स्थान में इकारादेश करके कातन्त्रकार तथा पाणिनि दोनों ही 'सर्विका, उष्ट्रिका, पाचिका, पाठिका' शब्दरूप सिद्ध करते हैं। पाणिनि का सूत्र है – **"प्रत्ययस्थात् कात् पूर्वस्यात इदाप्यसुपः"** (अ० ७।२।४४) ।

## [रूपसिद्धि]

१. **सर्विका** । सर्व + अक् + आ । **"स्त्रियामादा"** (२।४।४९) से स्त्रीलिङ्ग में 'आ' प्रत्यय, **"अव्ययसर्वनाम्नः स्वरादन्त्यात् पूर्वोऽक् कः"** (२।२।६४) से अक् प्रत्यय, **"समानः सवर्णे दीर्घीभवति परश्च लोपम्"** (१।२।१) से ककारोत्तरवर्ती अकार को दीर्घ, आकार का लोप, प्रकृत सूत्र से अकार को इकारादेश तथा विभक्तिकार्य ।

२. **उष्ट्रिका** । उष्ट् + क + आ । पूर्ववत् स्त्रीलिङ्ग में 'आ' प्रत्यय, कप्रत्यय, दीर्घ, आकारलोप, प्रकृत सूत्र से अकार को इकारादेश तथा विभक्तिकार्य ।

३. **पाचिका** । पच् + वुण् = पाचक + आ । 'पच' धातु से वुण्प्रत्ययान्त निष्पन्न 'पाचक' शब्द से स्त्रीलिङ्ग में 'आ' प्रत्यय, समानलक्षण दीर्घ, आकारलोप, प्रकृत सूत्र से अकार को इकारादेश एवं विभक्तिकार्य ।

४. **पाठिका** । पठ् + वुण् = पाठक + आ । 'पठ्' धातु से वुण्प्रत्ययान्त निष्पन्न 'पाठक' शब्द से स्त्रीलिङ्ग में 'आ' प्रत्यय, समानलक्षण दीर्घ, आकारलोप, प्रकृत सूत्र से अकार को इकारादेश एवं विभक्तिकार्य ॥२२१।

**॥ इत्याचार्यशर्ववर्मविरचिते कातन्त्रव्याकरणे नामचतुष्टयात्मके द्वितीयाध्याये समीक्षात्मको द्वितीयः सखिपादः समाप्तः॥**

●

# अथ द्वितीये नामचतुष्टयाध्याये तृतीयो युष्मत्पादः

## २२२. युष्मदस्मदोः पदं पदात् षष्ठीचतुर्थीद्वितीयासु वस्नसौ [२।३।१]

**[सूत्रार्थ]**

पद से परवर्ती 'युष्मद् – अस्मद्' शब्दों से षष्ठी - चतुर्थी –द्वितीया विभक्तियों के बहुवचन में निष्पन्न (अर्थात् 'युष्माकम् - युष्मभ्यम् - युष्मान्' तथा 'अस्माकम्- अस्मभ्यम्- अस्मान्') पदों के स्थान में क्रमशः 'वस्- नस्' आदेश विकल्प से उपपन्न होते हैं ॥२२२।

**[दु० वृ०]**

युष्मदस्मदोः पदं पदात् परं षष्ठी- चतुर्थी- द्वितीयासु बहुत्वे निष्पन्नं यथासंख्यं **वस्नसौ** प्राप्नोति वा । पुत्रो युष्माकम्, पुत्रोऽस्माकम् – पुत्रो वः, पुत्रो नः । पुत्रो युष्मभ्यम्, पुत्रोऽस्मभ्यम् – पुत्रो वः , पुत्रो नः । पुत्रो युष्मान्, पुत्रोऽस्मान्- पुत्रो वः, पुत्रो नः ।युष्मदस्मदोरिति किम् ? पुत्रस्तेषाम् ? पदादिति किम् ? युष्माकम्, अस्माकम् ॥२२२ ।

**[दु० टी०]**

**युष्मदस्मदो०** । यद्यपि प्रकृतिविभक्त्योः समुदायः पदम्, तथापि युष्मदस्मदोरेव पदमुच्यते ।उभयोः स्थाने यो निष्पद्यते स लभतेऽन्यतरस्य व्यपदेशम् । यथा देवदत्तयोः पुत्रो देवदत्तस्य चेति । युष्मदस्मदोरित्यनेन सह द्वयोरपि संबन्धः । युष्मदस्मदोः सम्बन्धि पदं तयोरेव युष्मदस्मदोः सम्बन्धिनः पदादिति । संबन्धः पुनरप्रधानार्थेनार्थसङ्गतिलक्षण एव, न त्वेकेनैव सम्बन्धेनेति चरितार्थः, कथम् अन्येन संबध्यते ? सत्यम् । **विशेषण-विशेष्यभावस्य प्रयोक्तुरायत्तत्वमिति लोकप्रसिद्धम्** । तेन भिन्नवाक्ये न भवति । स पचति, युष्माकं पुत्रो गायति । स पचति, अस्माकं पुत्रो रोदिति । **आख्यातप्रधानं वाक्यम्** । ननु ओदनं पचति, युष्माकं भविष्यति । ओदनं पचति, अस्माकं भविष्यति । व्यपेक्षालक्षणः संबन्धः पाकस्य युष्मदस्मदोरप्यस्त्येव, नैवम् । **एकवाक्याश्रितो हि संबन्धोऽन्तरङ्ग इति** ।

अत एव पदात् युष्मदस्मदोः पदमिति न कृतः क्रमः । अथवा वाक्यादपोद्धृत्य पदानि संस्क्रियन्ते । यस्य वाक्यस्य युष्मदस्मदी तस्यैव वाक्यस्य श्रुतस्य पदादिति ।

**आपिशलीयमतं तु,**

**पादस्त्वर्थसमाप्तिर्वा ज्ञेयो वृत्तस्य वा पुनः।**

**मात्रिकस्य चतुर्भागः पाद इत्यभिधीयते ॥**

मात्रा परिमाणमस्य आर्यादिर्मात्रिक उच्यते, तेन **"न पादादौ"** (२।३।४) इत्यनेनैव प्रतिषेधः । पादग्रहणं सविभक्त्यर्थम्, भावलक्षणा सप्तमीयम् । षष्ठीचतुर्थीद्वितीयासु सतीषु भवति, लुप्तासु न भवति । अत एव युस्मदस्मदोः सषष्ठीचतुर्थीद्वितीययोरिति न विदध्यात्, समासपदावयवत्वाद् वा गौणत्वम् । तेन युष्मत्पुत्र इति, अस्मत्पुत्र इति च सिद्धम् । युष्मदः पदम्, अस्मदः पदमिति प्रत्येकमभिसंबन्धात् पदे द्वे इति यथासंख्यं सामर्थ्याल्लब्धम् । इह द्विवचनार्थमित्यौसर्गिकमेकवचनम् । यथा – माषेण क्रीतम्, मुद्गेन क्रीतम् । एकेन द्वाभ्यां च क्रयो नास्तीति बहुवचनमन्तरेणापि बहुभिरिति गम्यते । बहुत्वेऽर्थे वर्तमानासु इति कथं पुनरिह बहुत्वमिति लभ्यते इति चेत्, द्वित्वैकत्वयोरादेशान्तरविधानात् । न च वक्तव्यं तत्र विकल्पपक्षे कथमेतौ न भवत इति, यतः **'अपवादविषयं परित्यज्य उत्सर्गः प्रवर्तते'** (का० परि० ५५) ।

पदं कर्तृ प्रकृतिः वस्नसौ विकारौ प्राप्नोतीत्यर्थः विभाषानुवर्तते एव । न च पदान्तरमधिकारनिवृत्तिकारणमिति । ननु प्रिया यूयं येषाम्, प्रिया वयं येषामिति विग्रहे प्रिययुष्मयाम्, प्रियास्मयाम् । प्रिययुष्मभ्यम्, प्रियास्मभ्यम् । प्रिययुष्मान्, प्रियास्मान् इति कथं वस्नसौ न भवतः इति । इहान्तर्वर्तिनीं विभक्तिम् आश्रित्य पदादिति ? सत्यम् । युष्मदस्मदोरेव संबन्धिनीषु षष्ठीचतुर्थीद्वितीयासु श्रुतत्वान्न समासस्येति । अथवा युष्मदस्मदोर्वाक्यस्यावयवयोरिति निश्चितम्, कथं पदावयवयोर्वस्नसाविति ॥२२२।

**[वि० प०]**

**युष्मदस्मदोः०** । ननु कथं युष्मदस्मदोः पदमुच्यते यावता प्रकृतिविभक्त्योः समुदायः पदम् ? सत्यमेतत् । तथाप्युभयोः स्थाने यो निष्पद्यते स लभतेऽन्यतरव्यपदेशम् । यथा देवदत्तयोः पुत्रो देवदत्तस्य चेति तथेहाप्यदोषः । यस्यैव वाक्यस्य

युष्मदस्मदोः पदं श्रुतत्वात् तस्यैव वाक्यस्य पदादिति वेदितव्यम् । तेन 'स पचति, युष्माकं पुत्रो गायति । स पचति, अस्माकं पुत्रो रोदिति ' तथा 'ओदनं पचति, युष्माकं पुत्रो भविष्यति । ओदनं पचति, अस्माकं पुत्रो भविष्यति' इत्यादिषु भिन्नवाक्येषु पदाद् वस् - नसादयो न भवन्तीति षष्ठीचतुर्थीद्वितीयास्विति कालभावयोः सप्तमी एतासु सतीषु भवति, लुप्तासु न भवतीत्यर्थः । बहुत्वे इति बहुत्वेऽर्थे वर्तमानास्वित्यर्थः । एतच्च वक्ष्यमाणयोगाभ्यां द्वित्वैकत्वयोराघ्रातत्वादवसीयते ।

न च वक्तव्यम्, तत्र विकल्पपक्षे कथं वस्नसौ न भवतः इति यस्माद् **'अपवादविषयं परिहृत्य उत्सर्गः प्रवर्तते'** (का० परि० ५५) इति । यथासंख्यमिति । यद्यपीह पदमित्येकवचनं तथापि युष्मदः पदम्, अस्मदः पदम् इति प्रत्येकमभिसंबन्धाद् अर्थाद् द्वे पदे इति यथासंख्यं न विरुध्यते । द्विवचनं च द्वित्वार्थस्य सामर्थ्यलब्धत्वादेव न भवति । औत्सर्गिकं पुनरेकवचनं स्यादेव, यथा 'माषेण क्रीतम्, मुद्गेन क्रीतम्' इत्येकेन द्वाभ्यां च क्रयो न संभवति, अर्थाद् बहुभिरिति गम्यत एवेति **"वाऽमृशसोः"** (२।२।६२) इत्यतो वाग्रहणमनुवर्तते, अधिकारस्येष्टार्थत्वात् । पुत्रो युष्माकमिति युष्मदस्मद्भ्यां षष्ठीबहुवचनम् एषां विभक्तावन्तलोपः, **"सुरामि सर्वतः, साामकम्"** (२।१।२९; ३।१६) इत्याकमादेशः, पक्षे वस्नसौ यथाक्रमं भवतः, चतुर्थीबहुवचनस्य **"भ्यसभ्यम्"** (२।३।१५) इत्यभ्यमादेशः, द्वितीयाबहुवचनस्य **"आन् शस्"** (२।३।९) इत्यान् ॥२२२।

## [क० च०]

**युष्मदस्मदोः।** पदादिति नाशङ्क्यते **"पदात् पदम्"** इत्यकरणात् तद्ग्रहणे कारणाभावाच्च । द्वितीयाचतुर्थीषष्ठीष्विति क्रमं विहाय यद् व्यतिक्रमं निर्दिशति, तद् बोधयति-क्वचिद् विभक्त्यन्तरेष्वपि वस्नसादयो भवन्ति । तेन 'श्रुतं वश्चित्रगुप्तस्य भाषितं मम चाप्रियम्' इति वो युष्माभिरित्यर्थः । तथा 'किं वो भीता इव स्थिताः' । वो यूयमित्यर्थ इति **कश्चित्। वस्तुतस्तु** संबन्धविवक्षयैव तत्र षष्ठी । पदादिति न पूर्वदिग्योगलक्षणा पञ्चमी **'पञ्चम्या निर्दिष्टे परस्य'** (का० परि० २२) इति न्यायात् तद्ग्रहणे कारणाभावाच्च ॥२२२।

**[समीक्षा]**

'युष्माकम्, युष्मभ्यम्, युष्मान्' के स्थान में 'वः' तथा 'अस्माकम्, अस्मभ्यम्, अस्मान्' के स्थान में 'नः' आदेश कातन्त्रकार तथा पाणिनि दोनों ही आचार्य करते हैं, जिससे 'पुत्रो युष्माकम्, पुत्रो वः' तथा 'पुत्रोऽस्माकम्, पुत्रो नः' शब्दरूप सिद्ध होते हैं। पाणिनि का सूत्र है – **"बहुवचनस्य वस्नसौ"** (अ० ८।१।२०)। यह ज्ञातव्य है कि ये आदेश केवल युष्मद्– अस्मद् शब्दों के ही होते हैं तथा 'युष्माकम्' आदि से पूर्व किसी पद के रहने पर ही होते हैं। इसके फलस्वरूप 'पुत्रस्तेषाम्' तथा 'युष्माकं पुत्रः, अस्माकं पुत्रः' आदि स्थलों में ये आदेश प्रवृत्त नहीं होते हैं।

**[रूपसिद्धि]**

१. **पुत्रो वः**। पुत्रो युष्माकम्। यहाँ 'पुत्रः' पद पूर्व में स्थित है, इससे 'युष्मद् + आम्' इस अलौकिक विग्रह में निष्पन्न षष्ठीविभक्तिबहुवचनान्त 'युष्माकम्' के स्थान में प्रकृत सूत्र द्वारा 'वस्' आदेश तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से विसर्गादेश।

२-३. **पुत्रो वः**। पुत्रो युष्मभ्यम्। **पुत्रो वः**। पुत्रो युष्मान्। पूर्ववत् 'पुत्रः' पद के पूर्ववर्ती होने पर 'युष्मभ्यम्' (युष्मद् + भ्यस्= चतुर्थीबहुवचन) तथा 'युष्मान्' (युष्मद् + शस्= द्वितीयाबहुवचन) को 'वस्' आदेश, स् को विसर्ग।

४-६. **पुत्रो नः**।पुत्रोऽस्माकम्।**पुत्रो नः** ।पुत्रोऽस्मभ्यम्।**पुत्रो नः**।पुत्रोऽस्मान्। 'पुत्रः' पद के पूर्व में रहने के कारण परवर्ती अस्मद् शब्द से षष्ठी-चतुर्थी-द्वितीयाविभक्तियों के बहुवचन में निष्पन्न 'अस्माकम्, अस्मभ्यम्, अस्मान्' के स्थान में 'नस्' तथा स् को विसर्गादेश ॥२२२।

## २२३. वां नौ द्वित्वे [२।३।२]

**[सूत्रार्थ]**

पद से परवर्ती तथा युष्मद्- अस्मद् शब्दों से षष्ठी-चतुर्थी- द्वितीया विभक्तियों के द्विवचन में निष्पन्न 'युवयोः, युवाभ्याम्, युवाम्' के स्थान में 'वाम्' आदेश तथा 'आवयोः, आवाभ्याम्, आवाम्' के स्थान में 'नौ' आदेश होता है ॥२२३।

## [दु० वृ०]

युष्मदस्मदोः पदं पदात् परं षष्ठी- चतुर्थी- द्वितीयासु द्वित्वे निष्पन्नं यथासंख्यं 'वां नौ' इत्येतौ प्राप्नोति वा । ग्रामो युवयोः , ग्राम आवयोः – ग्रामो वाम्, ग्रामो नौ । एवं दीयते, पातु । आस्विति किम् ? भद्रौ युवाम्, भद्रावावाम् ।।२२३।

## [दु० टी०]

**वांनौ०** । वामिति मकारान्तो नौ इत्यौकारान्तोऽयम् आम्नायात् । लुप्तद्वितीया-द्विवचनं पदं पूर्ववदिहापि व्याख्यानम् । द्वित्वे वर्तमानयोर्युष्मदस्मदोरिति प्रकृतिविशेषणे नास्ति साध्यमिति द्वित्व इति विभक्तिविशेषणमेव । एवमित्यादिना चतुर्थीद्वितीययोरेवमेव रूपम् अर्थभेदाय क्रियापदद्वयमात्रं दर्शितम् ।।२२३।

## [वि० प०]

**वांनौ०** । इहापि पूर्ववद् व्याख्यानम् । वामिति मकारान्तोऽयम्, नावित्यौकारान्तः । आम्नायाद् 'वां नौ' इति लुप्तद्वितीयाद्विवचनम् । ग्रामो युवयोरित्यादि ओसि परे कृतान्तलोपयोर्युष्मदस्मदोर्युवावौ द्विवाचिषु, "**एत्वमस्थानिनि**" (२ । ३ । १७) इत्येत्वम् । एवमिति । चतुर्थीद्वितीययोरप्येवमुदाहरणम् प्रतिपत्तव्यम् । केवलम् अर्थो भिद्यते इति तत्प्रकाशार्थं क्रियापदद्वयं दर्शितम् । ग्रामो युवाभ्याम्, ग्राम आवाभ्याम् –ग्रामो वाम्, ग्रामो नौ । 'दीयते' इति सम्प्रदाने चतुर्थी । ग्रामो युवाम्, ग्राम आवामिति – ग्रामो वाम, ग्रामो नौ । 'पातु' इति कर्मणि द्वितीया । प्रत्युदाहरणलाघवार्थमिदमाह । प्रकृत्या विभक्तीः परामृशन्नाह – आस्वित्यादि । तेन प्रथमाद्विवचने न भवतः ।।२२३।

## [क० च०]

**वांनौ** । ननु भद्रे युवामिति नपुंसकमेव युज्यते वक्तुम् । तथा **अमरः** – 'श्वः श्रेयसं शिवं भद्रम्' (१ ।४ ।२५) इति । तत् कथमत्र पुंलिङ्गनिर्देशः ? सत्यम् । भद्रशब्दोऽस्त्रीलिङ्गोऽपि दृश्यते । तथा च [1]**सुभूतिः 'भद्रोऽस्त्री मङ्गलेऽपि स्याच्चातके हरिणान्तरे'** इति दर्शनात् पुंसा निर्देशः । आम्नायादिति आचार्यपारम्पर्योपदेशाद् इत्यर्थः । पूर्वसूत्रे पूर्ववद् विभक्तिव्यतिक्रमनिर्देशात् **'गेये केन विनीतौ वां कस्य चेयं कृतिः कवेः'** इति राज्ञा स्वयं पृष्टौ तौ **'वाल्मीकिः'** इत्यशंसताम् इत्यत्र वामिति प्रथमाद्विवचनमिति केचित् । **वस्तुतस्तु** 'वां युवयोर्गेये भवन्तौ केन विनीतौ' इति

---

१. सुभूतिनामकेनाचार्येणामरकोशस्य कामधेनुनाम्नी टीका प्रणीता आसीत् । प्रकृतमिदं वचनं तत्रैव स्याद् इति मन्ये ।

षष्ठ्यर्थो विवक्षित इति । गेये गानविषये वामिति युवयोर्मध्ये कस्य कवेरियं कृतिरिति राज्ञा स्वयं पृष्टौ तौ विनीतौ वाल्मीकीति केन मूर्ध्नाऽशंसताम् इत्यन्वयेऽपि न दोषः ।।२२३।

**[समीक्षा]**

'ग्रामो युवयोः, ग्राम आवयोः' इस अवस्था में कातन्त्रकार तथा पाणिनि दोनों ही आचार्य 'युवयोः' के स्थान में 'वाम्' तथा 'आवयोः' के स्थान में 'नौ' आदेश करके 'ग्रामो वाम्, ग्रामो नौ' इन शब्दों का भी साधुत्व घोषित करते हैं। पाणिनि का सूत्र है– **"युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ"** (अ० ८।१।२०)।

**[रूपसिद्धि]**

१-२. **ग्रामो वाम्**। ग्रामो युवयोः। **ग्रामो नौ**। ग्राम आवयोः। 'ग्रामः' इस पद के पूर्ववर्ती होने पर 'युष्मद्' शब्द से षष्ठीविभक्ति – द्विवचन 'ओस्' प्रत्यय में निष्पन्न 'युवयोः' के स्थान में 'वाम्' तथा 'अस्मद्' शब्द से षष्ठीद्विवचन में निष्पन्न 'आवयोः' के स्थान में 'नौ' आदेश।

३-६. **ग्रामो वां दीयते**। ग्रामो युवाभ्याम्। **ग्रामो नौ दीयते**। ग्राम आवाभ्याम्। **ग्रामो वां पातु**। ग्रामो युवां पातु। **ग्रामो नौ पातु**। ग्राम आवाम्। 'ग्रामः' पद के पूर्व में होने से 'युष्मद्' शब्द से चतुर्थी – द्विवचन 'भ्याम्' प्रत्यय में निष्पन्न 'युवाभ्याम्' एवं द्वितीया – द्विवचन 'औ' प्रत्यय में निष्पन्न 'युवाम्' के स्थान में 'वाम्' आदेश अथ च 'अस्मद्' शब्द से चतुर्थी – द्वितीया – द्विवचन में निष्पन्न 'आवाभ्याम् – आवाम्' के स्थान में 'नौ' आदेश ।।२२३।

## २२४. त्वन्मदोरेकत्वे ते-मे त्वा-मा तु द्वितीयायाम् [२।३।३]

**[सूत्रार्थ]**

षष्ठी-चतुर्थी विभक्तियों के एकवचन में 'युष्मद् – अस्मद्' शब्दों से निष्पन्न 'तव – तुभ्यम्' के स्थान में 'ते'। 'मम – मह्यम्' के स्थान में 'मे' आदेश होता है किसी पद से पर में रहने पर परन्तु 'युष्मद् – अस्मद्' शब्दों के द्वितीया – एकवचन के रूप 'त्वाम् – माम्' के स्थान में क्रमशः 'त्वा-मा' आदेश होता है।

[दु० वृ०]

एकत्वे वर्तमानयोर्युष्मदस्मदोस्त्वन्मद्भूतयोः पदं पदात् परं षष्ठी-चतुर्थी-द्वितीयास्वेकत्वे निष्पन्नं यथासंख्यं 'ते-मे' इत्येतौ प्राप्नोति वा। त्वा–मा तु द्वितीयायाम्। पुत्रस्तव, पुत्रो मम–पुत्रस्ते, पुत्रो मे। एवं दास्यति। पुत्रस्त्वा, पुत्रो मा पातु ॥२२४।

[दु० टी०]

त्वन्मदोः। युष्मदस्मदोरितीह वर्तते एवेत्याह–एकत्व इत्यादि। एकत्वे एकत्वार्थे वर्तमानयोर्युष्मदस्मदोः स्थाने ये त्वन्मदी भूते तयोः पदं षष्ठीचतुर्थीद्वितीयास्वेकत्वे इति एकत्वार्थस्य विभक्तिसामर्थ्यलब्धत्वात्। अतः पूर्ववदिहापि व्याख्यानम्। उभय-विशेषणं वा सुखार्थं क्रियते। एकत्वेन युष्मदस्मदोर्विशेषणात् समासार्थस्यैकत्वे त्वन्मदी न स्तः इति प्रतिपद्यते। युष्मान् अस्मान् अतिक्रान्तेन अतियुष्मया, अत्यस्मया। समासार्थस्य द्वित्वबहुत्वयोर्विद्येते त्वन्मदी। यथा त्वां मामतिक्रान्ताभ्याम् अतिक्रान्तैर्वा अतित्वाभ्याम् अतिमाभ्याम् अतित्वाभिरतिमाभिरिति। अस्मादेव वचनाद् युष्मदस्मदोः स्थाने एकत्वमात्रे त्वन्मदी सिद्धे। पदादिति षष्ठीचतुर्थीद्वितीयासु इति च प्रधानेनैव पदशब्देन सम्बध्यते। न च त्वन्मदी प्रकृत्यन्तरस्वभावाद् एकत्वाभिधायिनी। युष्मदस्मदोश्च द्वित्वबहुत्वयोरेव वृत्तिः स्वभावादिति वक्तुं शक्यते, यस्मात् त्वं यासि, अहं यामीति **"युष्मदि मध्यमः, अस्मद्युत्तमश्च"** (३।१।६, ७) न सिध्यति।

अथ युष्मदस्मदोरेव विशिष्टार्थप्रतिपादकत्वाद् अनयोरपि युष्मदस्मद्व्यपदेशो लोकतः सिद्धः? सत्यम्, युक्तमेतन्निरपेक्षत्वात् प्रत्ययोत्तरपदयोरपि त्वन्मदी भवत एव। यथा त्वामिच्छति, मामिच्छति। त्वमिव अहमिवात्मानमाचरति–'त्वद्यति, मद्यति, त्वद्यते, मद्यते'। त्वां मामाचष्टे–त्वदयति, मदयति। तव पुत्रः, त्वत्पुत्रः। मम पुत्रः, मत्पुत्रः इति। तुशब्दो वाक्यभेदार्थे द्वितीयायामेकत्वे पुनः त्वा-मादेशावित्यर्थः। पूर्ववदिहापि लुप्तद्वितीयाया द्विर्वचनं पदमिति 'ते–मे' विधानकाले सूत्रार्थे द्वितीया-निदर्शनं यथासंख्यनिरासार्थमेव प्रतिपत्तव्यम्। त्वा–मा त्वमीति कृते द्वितीयाग्रहणं सुखार्थमेव ॥२२४।

[वि० प०]

**त्वन्मदोः** । युष्मदस्मदोरित्यनुवर्तते, तयोश्च कार्यित्वमिह नास्ति साक्षात् त्वन्मदोरिह कार्यिणोर्निर्देशात् । अत एकत्वे वर्तमानयोर्युष्मदस्मदोः स्थाने ये त्वन्मदीभूते तयोः पदं पदात् परं षष्ठीचतुर्थीद्वितीयास्वेकत्वे निष्पन्नं 'ते- मे' इत्येतौ प्राप्नोतीत्याह – एकत्वे वर्तमानयोरित्यादि । त्वन्मद्भूतयोरिति । त्वन्मदीभूते त्वन्मद्भूते भवतिरत्र प्राप्तौ सकर्मकः । त्वन्मदादेशं प्राप्तयोर्युष्मदस्मदोरित्यर्थः । केन पुनः सूत्रेण युष्मदस्मदोस्त्वन्मदादेश इति चेत्, अत एव ज्ञापकाद् एकत्वमात्रे युष्मदस्मदोः स्थाने त्वन्मदीति सिद्धे कथमन्यथा त्वन्मदोः कार्यित्वं निर्दिश्यते इति भावः । पदादिति षष्ठीचतुर्थीद्वितीयास्विति च प्रधानेनैव पदेन संबध्यते न तु त्वन्मदादेशेन, स च सामान्येन एकत्वमात्रे वेदितव्यः । अस्य ज्ञापकस्य सर्वोद्दिष्टत्वात् समासार्थस्य पुनरेकत्वे त्वन्मदी न भवतः । यथा युष्मानतिक्रान्तेन अतियुष्मया, अष्मानतिक्रान्तेन अत्यस्मया । अत एवैकत्वे वर्तमानयोर्युष्मदस्मदोरित्युक्तम् ।

त्वा – मा त्विति । तुशब्दोऽयं वाक्यभेदे वर्तते, द्वितीयायामेकत्वे पुनस्त्वामादेशावित्यर्थः । यद्येवं 'ते – मे' विधानकाले सूत्रार्थविवरणे द्वितीयानिर्देशो न युक्तः । षष्ठीचतुर्थीद्वितीयास्वेकत्वे इति षष्ठीचतुर्थ्योरेकत्वे इति वक्तुं युज्यते ? सत्यमेतत् । किन्तु द्वितीयानिर्देशेन विभक्तीनां बहुत्वं दर्शयन् यथासंख्यमपि नास्ति वैषम्यादिति सूचयति । अन्यथा यथा त्वन्मदोर्द्वयोस्तेमे इत्येताभ्यां यथासंख्यम्, तथा षष्ठीचतुर्थीभ्यामपि स्यादिति भावः । 'ते – मे' इति, 'त्वा – मा' इति च लुप्तद्वितीयाद्विवचनं पदम् । एवमिति पुत्रस्तुभ्यम्, पुत्रो मह्यम् – पुत्रस्ते, पुत्रो मे दास्यतीति सम्प्रदाने चतुर्थी । 'पुत्रस्त्वा, पुत्रो मा' इति पक्षे 'पुत्रस्त्वाम्, पुत्रो माम्' पात्विति कर्मणि द्वितीया ।।२२४।

[क० च०]

**त्वन्मदोः०** । वृत्तौ एकत्व इति । उभयविवरणे को हेतुः, एकेनैव सिद्धेः । तथाहि एकत्वे वर्तमानयोर्युष्मदस्मदोस्त्वन्मद्भूतयोः पदं पदाद् एतान् आदेशान् प्राप्नोति इत्युक्ते 'पुत्रस्तव' इत्यत्रैव स्याद् इति चेद् आचक्षाणे दोषः स्यात् । तथा च युष्मान् आचक्षाणान् पश्यामि । त्वन्मदादेशस्य 'ते- मे- त्वा- मा' इत्येतेषां विषये ज्ञापितत्वात् । तेन निमित्तं नाशङ्क्यते । ततश्च पुत्रो युष्मान् पातु इत्यत्र 'पुत्रस्त्वा पातु' इति न दोषः स्यादेव ।

त्वन्मदोः कार्यिणोरिति । ननु पदस्यैव कार्यित्वम्, न तु त्वन्मदोः । कार्यिसम्बन्धवानिति यः कार्यीति कथमुक्तं त्वन्मदोः कार्यिणोरिति ? कार्यपरम्परया अत्रापि भवतीति त्वन्मदोरपि कार्यित्वं न तु त्वन्मदादेशेनेति व्याप्तिन्यायादित्यर्थः । तुशब्द इत्यादि । ननु द्वितीयायां कथं ते- मे न भवतः, तत्र त्वामित्यस्ति बाधकमित्याह – न चेति ।

न च विकल्पपक्षे तिष्ठतु । अत्र **कश्चित्** 'ते-मे' इति कृत्वा उभयोरेवार्थत्वात्, तन्न चारुतरम् । द्वितीयायामेकत्वे पुनस्त्वामादेश इति **पञ्जी**स्वरसात् । तस्माद् विशिष्टमेतत् सामान्यं बाधते । ननु कथमत्र सामान्यविशेषभावः षष्ठीचतुर्थ्योर्मध्ये द्वितीया नास्त्येव उभयोर्विशेषरूपत्वाद् यथा सामान्यविशेषभावे ।**"अथ परस्मैपदानि"** (३ । १ । १) इत्यत्र अथशब्देन द्योतकमात्रं स्यामहिपर्यन्तं परस्मैपदसामान्यं सर्वत्रैवास्ति । अतः **"नव पराण्यात्मने"** (३ । १ । २) इति सामान्यं बाधते । ननु कथमत्रानेनैवमत्रापि विद्यते, यतः षष्ठीचतुर्थीद्वितीयास्विति द्वन्द्वे निष्पन्नं नाम्नां समुच्चयो हि द्वन्द्वः ततः समुच्चीयमानत्वात् पर्यनुगतमिति तस्मिन् द्वितीयापि विद्यते ।"त्वा मा तु द्वितीयायाम्" इत्यत्र द्वितीयात्वेनास्य विशेषत्वमेव । अतस्त्वन्मद्भूतयोरित्यतिदेशबलम्, अनेनोक्तं मुख्यत्वात् ।।२२४।

**[समीक्षा]**

'पुत्रस्तव, पुत्रस्तुभ्यं दास्यति' वाक्यों में 'तव- तुभ्यम्' के स्थान में 'ते' तथा 'पुत्रो मम, पुत्रो मह्यं दास्यति' आदि में 'मम- मह्यम्' के स्थान में 'मे' अथ च पुत्रस्त्वां पातु, पुत्रो मां पातु' इत्यादि स्थलों में 'त्वाम्- माम्' के स्थान में 'त्वा- मा' आदेश कातन्त्रकार तथा पाणिनि दोनों ही वैयाकरण करते हैं। इसके फलस्वरूप 'पुत्रस्ते, पुत्रस्त्वा, पुत्रो मे, पुत्रो मा' आदि रूप सिद्ध होते हैं। 'ते- मे' तथा 'त्वा- मा' आदेशों के लिए पाणिनि के दो पृथक् सूत्र हैं– **"तेमयावेकवचनस्य, त्वामौ द्वितीयायाः"** (अ० ८।१।२२, २३)।

**[रूपसिद्धि]**

१-२. **पुत्रस्ते** । पुत्रस्तव । **पुत्रो मे** । पुत्रो मम । 'पुत्रः' पद के पूर्व में रहने पर 'युष्मद्- अस्मद्' से षष्ठी- एकवचन 'ङस्' प्रत्यय में निष्पन्न 'तव- मम' के स्थान में क्रमशः 'ते- मे' आदेश ।

३-४. **पुत्रस्ते दास्यति** । पुत्रस्तुभ्यं दास्यति । **पुत्रो मे दास्यति** । पुत्रो मह्यं दास्यति । 'पुत्रः' पद के पूर्ववर्ती होने पर 'युष्मद्-अस्मद्' के चतुर्थी-एकवचन 'ङे' प्रत्यय में निष्पन्न 'तुभ्यम्–मह्यम्' के स्थान में क्रमशः 'ते-मे' आदेश ।

५-६. **पुत्रस्त्वा पातु** । पुत्रस्त्वां पातु । **पुत्रो मा पातु** । पुत्रो मां पातु । 'पुत्रः' पद के पूर्व में रहने पर 'युष्मद्-अस्मद्' शब्दों से द्वितीयाविभक्ति – एकवचन 'अम्' प्रत्यय में निष्पन्न 'त्वाम्-माम्' के स्थान में क्रमशः 'त्वा-मा' आदेश ।।२२४।

## २२५. न पादादौ [२।३।४]

### [सूत्रार्थ]

'युष्मद्-अस्मद्' शब्दों से षष्ठी-चतुर्थी-द्वितीया विभक्तियों के बहुवचन-द्विवचन-एकवचन में निष्पन्न पद यदि श्लोकपाद के आदि में प्रयुक्त हों तो उनके स्थान में उपर्युक्त 'वस्-नस्-वाम्-नौ-ते -मे-त्वा-मा' आदेश नहीं होते हैं ।।२२५।

### [दु० वृ०]

पादस्यादौ वर्तमानानां युष्मदस्मदादीनां पदमेतान् आदेशान् न प्राप्नोति ।

**रुद्रो विश्वेश्वरो देवो युष्माकं कुलदेवता ।**
**स एव नाथो भगवान् अस्माकं पापनाशनः ।।**

पादादाविति किम् ? 'पान्तु वो नरसिंहस्य' इत्यादि ।।२२५।

### [दु० टी०]

न पादा० । वृत्तानामार्यादीनां चतुर्थो भागः पाद इह गृह्यते । आदिशब्दोऽयमिह गुणमात्रे वर्तते, विषयसप्तमीयम् । **'आमन्त्रितं पूर्वमविद्यमानवत्'** इति न वक्तव्यम् । यस्माद् आमन्त्रणमाक्षिप्तक्रियापदं वर्तते । हे देवदत्त! अभिमुखे भवः इत्याभिमुख्ये नियुज्यते ।अभिमुखीभूतः क्रियायां विनियुज्यते ।तत्र देवदत्तेत्येतावतार्थस्य समाप्तत्वात् कुतो भिन्नवाक्यपदात् प्राप्तिरिति । छात्रा युष्माकं स्वम्, छात्रौ युवयोः स्वम्, छात्र तव स्वम् । यदा पुनरियं युक्तिरनित्या तदा विभाषा भवत्येव ।

अत आह- जसन्तं विशेष्य वाऽऽमन्त्र्य परमविद्यमानवदिति । छात्रा वैयाकरणा युष्माकं स्वम् । छात्रा वैयाकरणा वः स्वम् इत्यादि व्यवस्थितविभाषया च सामान्यवचनं

परिशिष्टम् आमन्त्र्ये नित्यं नाविद्यमानवत् । छात्रौ गुणिनौ वां स्वम् । छात्र ! गुणिन्! ते स्वम्, सामान्यवचनमित्येव । देवदत्त! जटिलक तव स्वम् । कथमुचितं रचयामि देवि! ते ।अविद्यमानवद् वादी पुनराह – व्यवधायकत्वं नास्तीति पदान्तराद् भविष्यतीति । इह तु व्यवस्थितविभाषयैव प्रतिपत्तव्यम् । दृश्यार्थैर्मनोविज्ञाने प्रतिषेधो न वक्तव्यः । यथा- ग्रामो युष्मान्, ग्रामोऽस्मान् समीक्ष्य गतः, तथा ग्रामस्तव स्वम्, ग्रामो मम स्वं समीक्ष्य गतः । ग्रामस्त्वाम्, ग्रामो मां समीक्ष्य गतः । ग्रामस्त्वां मनसाऽऽलोच्य गत इत्यर्थः । **मनोविज्ञानं हि स्मरणम्,** स इति पूर्वप्रक्रान्तव्यपेक्षासम्बन्धितया गौणत्वात् ।

**अन्वादेशे** तु वसादयो नित्यं वक्तव्याः । कथितानुकथन**मन्वादेशः** । तेनान्येन वा शब्देन कस्यचित् किञ्चित् प्रतिपादयितुं कथितस्य प्रतिपाद्यान्तरप्रतिपादनाय तेन द्वितीयं कथनम्, तस्मिन् विषये इत्यर्थः । तस्माद् व्यपेक्षासम्बन्धेन गौणत्वात् । अतो गौणेऽपि विधिश्चेत् तथापि नित्यार्थं व्यवस्थितविभाषा वाच्या । अथ यो ग्रामः, अथ नो धनमित्यादि । सपूर्वपदात् प्रथमान्ताद् वा भवत्येव अन्वादेशेऽपि । अथो ग्रामे धनं युष्माकम्, अथो ग्रामे धनं वः ।अथो ग्रामे धनमस्माकम्, अथो ग्रामे धनं नः इत्यादि । वाक्यादावपि पक्षे वाधिकार इष्टसंसिद्ध्यर्थ एव वाक्यस्य नित्यत्वाद् विभाषा सिद्धैव ।।२२५।

## [वि० प०]

न पादा० ।वृत्तानामार्यादीनां चतुर्थो भागः **पादः** इह गृह्यते, अर्थसमाप्तिरपी**त्यपरे** । यथोक्तमपि **चापिशलीयैः** –

**पादस्त्वर्थसमाप्तिर्वा ज्ञेयो वृत्तस्य वा पुनः।**

**मात्रिकस्य चतुर्भागः पाद इत्यभिधीयते॥**

तस्मात् 'स पचति युष्माकं पुत्रो गायति, स पचति अस्माकं पुत्रो रोदिति' इत्यादिष्वप्यनेनैव प्रतिषेध इति । मात्रिकस्येति । मात्रा परिमाणमस्येति इकण्, आर्यादिर्मात्रिक उच्यते । 'पान्तु वः' इति । पान्तु युष्मानित्यर्थः इत्यादीत्यनेन वृत्तस्य पादत्रयपरं सूचयति । यथा,

**पान्तु वो नरसिंहस्य नखलाङ्गलकोटराः।**

**हिरण्यकशिपोर्वक्षः क्षेत्रासृक्कर्दमारुणाः॥** इति ॥२२६॥

[क० च०]

न पादा० । ननु युष्मदस्मदादीनां विवरणं पर्यवसितार्थकथनम्, **वस्तुतस्तु** प्रकृतत्वाद् युष्मदस्मदोरेवानुवृत्तिरेतत्प्रकरणविहितं कार्यं निषिध्यते । न च त्वामा एवेति, पृथग्योगात् । पादादाविति किमिति **वृत्तिः** । नादावित्यास्तामित्यर्थः । एतेन यत् किञ्चित् पदापेक्षया आदित्वे 'पान्तु वो नरसिंहस्य' इत्यादौ निषेधः स्यादिति पादग्रहणम् । पादस्येत्यास्ताम् इति **हेमकरः** । चतुर्भाग इति । चतुर्थश्चासौ भागश्चेति । समासे पूरणप्रत्ययस्य लोप इति **विद्यानन्दः । अन्यस्तु** चतुर्थो भागश्चतुरित्युपचारात् । कर्दमारुणा इति । ननु कर्दमे कथम् अरुणवर्णत्वम् ? सत्यम् । विवर्णभावे सति स्यादिति **केचित् । विद्यानन्द**स्त्वाह – प्रायेण लाङ्गलकोट्यां पङ्के शुद्धे रक्तत्वं लाङ्गलकोट्या भवतीति ॥२२५।

[समीक्षा]

'युष्माकं कुलदेवता, अस्माकं पापनाशनः' में द्वितीय तथा चतुर्थ पाद में पठित 'युष्माकम् – अस्माकम्' के स्थान में 'वस्- नस्' आदेशों का निषेध कातन्त्रकार तथा पाणिनि दोनों ही शाब्दिकाचार्यों ने किया है । कातन्त्रकार ने 'वस्- नस्' आदि आदेशों का विधान करने के अनन्तर प्रकृत सूत्र से पाद के आदि में उनका निषेध किया है, जबकि पाणिनि उक्त आदेशों का विधान ही अपादादि में करते हैं – **"अनुदात्तं सर्वमपादादौ"** (अ० ८।१।१८)।

[रूपसिद्धि]

१. **युष्माकं कुलदेवता** । 'युष्मद्' शब्द से षष्ठीविभक्ति – बहुवचन 'आम्' प्रत्यय में निष्पन्न 'युष्माकम्' शब्द के स्थान में **"युष्मदस्मदोः पदं पदात् षष्ठीचतुर्थीद्वितीयासु वस्नसौ"** (२।३।१) सूत्र द्वारा 'वस्' आदेश प्राप्त होता है, परन्तु पाद के आदि में पठित होने के कारण प्रकृत सूत्र से उसका निषेध हो जाता है।

२. **अस्माकं पापनाशनः** । 'अस्मद्' शब्द के षष्ठी – बहुवचनान्त रूप 'अस्माकम्' शब्द के स्थान में (२।३।१) सूत्र से प्राप्त 'नस्' आदेश का प्रकृत सूत्र द्वारा निषेध ॥२२५।

## २२६. चादियोगे च [२।३।५]

### [सूत्रार्थ]

'च' आदि शब्दों के योग में 'युष्माकम्-अस्माकम्' आदि शब्दों के स्थान में 'वस्-नस्' आदि आदेश नहीं होते हैं ॥२२६।

### [दु० वृ०]

चादिना योगे वर्तमानानां युष्मदस्मदादीनां पदम् एतान् आदेशान् न प्राप्नोति। पुत्रो युष्माकं च। पुत्रोऽस्माकं च। एवमादि – च, वा, ह, अह, एव। गौणयोगे न स्यात्। ग्रामश्च ते स्वम्, नगरं च मे स्वम् ॥२२६।

### [दु० टी०]

चादि०। चादिना योग इति। चादिना गणेन योगे संबन्धे सति युष्मदस्मदादीनामित्यर्थः। आदिशब्द इह व्यवस्थावचनः। यथा देवदत्तादीन् उपविष्टान् आनयेत्युक्ते यथाव्यवस्थितानेवानयति। एवमादीति। ग्रामो युष्माकम्, ग्रामोऽस्माकं वा। ग्रामो युष्माकं ह, ग्रामोऽस्माकं ह। ग्रामो युष्माकमह, ग्रामोऽस्माकमह। ग्रामो युष्माकमेव, ग्रामोऽस्माकमेव। एवं वांनावादयोऽपि न भवन्तीति प्रतिपत्तव्यम्। गौणयोग इति। ग्रामश्चादिभिर्युक्तस्तेन युक्तानां युष्मदस्मदादीनाम् आदेशा भवन्त्येवेत्यर्थः। तर्हि **'गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययो भविष्यति'** (का० परि० २) किं योगग्रहणेन ? सत्यम्। अप्यत्र गौणयोगेऽपि विधिर्भवतीति ज्ञापयति। तेन 'ग्रामस्तव स्वं समीक्ष्य गतः' इति स्वशब्दस्य हि दर्शनार्थैर्मुख्ययोगो न युष्मदस्मदादीनामिति ॥२२६।

### [वि० प०]

चादि०।एवमादीति।'पुत्रो युष्माकं वा, पुत्रोऽस्माकं वा' इत्याद्यप्युदाहर्तव्यमिति भावः। पञ्चैव चादयः। इह आदिशब्दस्य व्यवस्थावाचित्वाद् गौणयोगे न स्यादिति। चादिना चेति सहयोगविवक्षायां तृतीयानिर्देशन सिध्यति यद् योगग्रहणं तन्मुख्ययोगपरिग्रहार्थम्, तेनेह न भवति प्रतिषेधः। 'ग्रामश्च ते स्वम्, नगरं च मे स्वम्' इति। ग्रामो हि चादिना युक्तस्तद्वाचकश्चादियोगो न युष्मदस्मदोः साक्षाद् अतो गौणत्वं चादियोगस्य न केवलं तव स्वं ग्रामश्चेत्यर्थः। यद्येवं **'गौणमुख्ययोर्मुख्ये**

**कार्यसम्प्रत्ययो भविष्यति'** (का० परि० २) किं योगग्रहणेन ? सत्यम्, **सुखार्थमेव**। टीकायां पुनरन्यदेव प्रयोजनम् उक्तम्, तच्च वृत्तिव्याख्यानेऽप्रस्तुतमिति नोच्यते ॥२२६।

**[क० च०]**

चादि०। पञ्चैव चादय इति **पञ्जी**। च-वा-ह-अह-एवेति। कस्याश्चित् पुस्तिकायामेवमित्येव पाठः। स चायुक्त एवेति अव्ययगणपरिपठितानां चादीनां ग्रहणसम्भवे अस्य ग्रहणे प्रमाणाभावात्। अन्यथा अहशब्दात् पूर्वम् एवंशब्दमेव पठेत्। चादिनेति तृतीयायाः सहार्थे समासाभावात् चादेर्योग इति षष्ठीसमासः चादिना योग इति वाक्यम् अनुकथनमात्रप्रदर्शनार्थं दर्शितम्। गौणश्चेति युष्मदस्मदादयश्चादिना समुच्चीयन्ते, न तु सम्बन्धिवस्त्वन्तरं तदेतैः सह मुख्ययोग इति ॥२२६।

**[समीक्षा]**

'पुत्रो युष्माकं च, पुत्रोऽस्माकं च' आदि 'च-वा-ह-अह-एव' इन पाँच शब्दों के प्रयोग वाले वाक्यों में 'वस्-नस्' आदि आदेशों का निषेध कातन्त्र तथा पाणिनीय दोनों ही व्याकरणों में किया जाता है। पाणिनि का सूत्र है – **"न च-वा-हाहैवयुक्ते"** (अ० ८।१।२४)।

**[रूपसिद्धि]**

१. पुत्रो युष्माकं च, पुत्रोऽस्माकं च, पुत्रोऽस्माकं वा, पुत्रोऽस्माकं ह, पुत्रोऽस्माकम् अह, पुत्रोऽस्माकम् एव' इत्यादि वाक्यों में **"युष्मदस्मदोः पदं पदात् षष्ठीचतुर्थीद्वितीयासु वस्नसौ"** (२।३।१) इत्यादि से प्राप्त 'वस्-नस्' आदि आदेशों का प्रकृत सूत्र द्वारा निषेध ॥२२६।

## २२७. एषां विभक्तावन्तलोपः [२।३।६]

**[सूत्रार्थ]**

विभक्ति के परे रहने पर 'युष्मद्-अस्मद्-त्वद्-मद्' के अन्तिम वर्ण का लोप होता है ॥२२७।

**[दु० वृ०]**

विभक्तौ परतो वर्तमानानामेषामन्तस्य लोपो भवति। युष्मभ्यम्, अस्मभ्यम्। अतियुष्मभ्यम्, अत्यस्मभ्यम्। अतित्वान्, अतिमान्। त्वयि, मयि। अतित्वयि, अतिमयि। विभक्ताविति किम् ? युष्मत्पुत्रः, त्वदीयः ॥२२७।

[दु० टी०]

एषाम्० । ननु युष्मदस्मदोर्ग्रहणेन त्वन्मदोरपि ग्रहणमुक्तम् । अथानन्तरत्वात् त्वन्मदी वर्तेते त्वन्मदी चेत् तर्हि **"न पादादौ, चादियोगे च"** (२।३।४,५) इति कथं समासः, तत्र 'विशेषातिदिष्टः प्रकृतं न बाधते' (का० परि० १९) इति चेत्, इहापि तद्वद् 'एषाम्'–ग्रहणं किमर्थम् ? सत्यम् । सम्बद्धाधिकारनिवृत्त्यर्थम् । अन्यथा 'पदात्' इत्यपि वर्तते (पदं तु न वर्तते), विभक्तौ परत इति वचनात् । यद्येवम् 'एषां विभक्तौ' इत्युच्यमाने श्रुतत्वात्, त्वामतिक्रान्तान् 'अतित्वान्' इति सिध्यति । नेयं विभक्तिर्युष्मदः किन्तर्हि समासस्य, नैवम्, विशेषणविशेष्यभावस्येष्टार्थत्वादित्याह – विभक्तौ परत इत्यादि । बहुवचनं तु (न) व्यक्तिभेदादिति, तेन प्रत्ययलोपलक्षण-न्यायेनापि उत्तरपदे प्रत्यये न लोपो न भवति, विभक्तावित्यस्य व्यावृत्तेरभावाद् इत्यर्थः । कथं युष्मभ्यम्, युष्म्यम्, अस्भ्यम् । युष्मानस्मान् वाचष्ट इतीनन्तात् क्विपि कृते विभक्तौ मान्तस्य लोपो वा भवति । एकदेशविकृतस्यानन्यवद्भावाद् इहापि इष्टार्थो वाऽधिकार इति ।

ननु प्रत्ययस्य सर्वापहारी लोपः प्रकृतेः पुनरन्त्यापहारी लोपो दृश्यते इत्यादि । यथा **"व्रश्चिमस्जोर्धुटि"** (३।६।३५) इति, सत्यम् । इहान्तग्रहणमन्तदर्शनादेव लोपार्थम् । अन्यथा 'त्वया, मया' इत्यत्र परत्वात् लोपात् **'स्वरादेशो विधिर्बलवान्'** (का० परि० ३५) इति प्रागेत्वं स्यात् । ननु 'युष्मभ्यं ब्राह्मणीभ्यः' इत्यन्तलोपे **"स्त्रियामादा"** (२।४।४९) कथं न स्यात्, युष्मदस्मदोरलिङ्गत्वाद् इति । न च वक्तव्यम् 'नालिङ्गे युष्मदस्मदी, सत्त्वार्थत्वात्' । सत्त्वार्थस्य हि लिङ्गसंख्याभ्यां योगो दृश्यते । तस्माल्लिङ्ग-विशेषद्योतकस्य विधेर्निमित्तभावात् **"स्त्रियामादा"** (२।४।४९) भवितुमर्हति, कथमिति चेत् । यथा इन्द्रियाणां नियतविषयवर्तित्वम्, स्वभावात् । तथा संस्थानाद्ययुक्तेऽप्यर्थे वर्तमानयोर्युष्मदस्मदोरपि लिङ्गत्वमवसीयते । संस्थानादेरना-श्रयत्वाद् अनुरूपमेवेदम् एवंजातीयकमिति वा । यथा 'पञ्च, सप्त' इति लिङ्गमन्तरेण व्यपदेशात् स्त्रियाम् ईप्रत्ययो न भवति । तथा च **भाष्यकृतापि** ष्णान्तायाः संख्यायाः प्रतिषेधः प्रत्याख्यायते । किञ्च स्त्रियामादाभिर्विनापि स्त्रीत्वप्रतीतेः । यथा 'दृशत्, समित्' इति रूपान्तरम् । पुंलिङ्गं तु उत्सर्गतया प्रयुज्यते येन केनचिल्लिङ्गेन निर्देशः कर्तव्य इति ।

**कश्चिद**ाह – अव्यक्तलिङ्गे अलिङ्गे वा सामान्यरूपत्वान्नपुंसकस्येत्यव्यक्तगुणसंदेहे नपुंसकलिङ्गं प्रयुज्यते । तथाहि 'युष्मभ्यं ब्राह्मणीभ्यः' इति समासेऽपि सामान्येन प्रतिपत्तिः । **अपरः** कश्चिदाह – सलिङ्गयोरपि युष्मदस्मदोः स्त्रियामादा न स्यात् 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' (का० परि० ३१) इति । कथं 'या, सा' ? अनित्यत्वमपि दृश्यते अस्या इत्यविरोधः । तेनात्रान्त्यस्वरादिलोपो नाद्रियते इति व्यवस्थितम् ।अत्वविधौ द्विपर्यन्ता हि त्यदादयः अप्रदानयोश्च युष्मदस्मदोर्विधिरयमिति वचनमारभ्यते ।।२२७।

## [वि० प०]

एषाम्० । युष्मदस्मदी प्रवर्तेते तद्ग्रहणेन त्वन्मदोरपि ग्रहणं भवत्येव तयोस्तत्स्थानित्वात् तत् किमेषांग्रहणेनेति । अथानन्तरत्वात् त्वन्मदी एव प्रवर्तेते, अतः एषामित्युच्यते । यद्येवं पूर्वयोरपि योगयोः कथं सामान्यम्, अथ **'विशेषातिदिष्टः प्रकृतं न बाधते'** (का० परि० १९) इति चेद् अत्रापि भविष्यति ? सत्यम्, एषांग्रहणं सम्बन्ध्यधिकारनिवृत्त्यर्थम्, तेन पदादिति न वर्तते । पदं तु स्वत एव निवृत्तं विभक्तौ परत इति वचनात् । यद्येवम् **"एषां विभक्तौ"** इत्युक्ते श्रुतत्वादेषामेव विभक्तावन्तलोपः स्यात्, न समाससंबन्धिन्याम् ।

'त्वामतिक्रान्तान्, मामतिक्रान्तान्, अतित्वान्, अतिमान्' इति ? सत्यम् । विशेषणविशेष्यभावस्य प्रयोक्तुरायत्तत्वात् नैवं सम्बन्धः, किन्त्वन्यथैव इत्याह – 'विभक्तौ परतः' इत्यादि । युष्मभ्यम्, अस्मभ्यम् इत्यादि अन्तलोपे **"भ्यसभ्यम्"** (२।३।१५) । युष्मान्, अस्मान् इत्यादि । आन् शस् । त्वयि, मयीति **"एत्वमस्थानिनि"** (२।३।१७) इत्येत्वम् । इह परत्वात् लोपात् स्वरादेशस्य बलवत्त्वात् नित्यात्वाच्च प्रागेव दकारस्यैत्वं प्राप्तम् इहान्तग्रहणबलात् प्रागेव लोप इति । यतः **'प्रत्ययस्य सर्वापहारी लोपः, प्रकृतेरन्त्यापहारी लोपः'** (का० परि० २५, ५६) इति न्यायात् । अन्तस्यैव लोपे सिद्धे यदन्तग्रहणं तदन्तदर्शनादेव लोपार्थमिति भावः । विभक्तावित्यादि । युष्मत्पुत्र इति युष्माकं पुत्रो यूयं वा पुत्रा यस्येति विग्रहः । त्वदीय इति तत्र योगविभागात् त्यदादिभ्यः शेषेऽर्थे ईयो दृश्यते । तवायं त्वदीय इति । अथवा **"ईयस्तु हिते"** (२।६।१०) इत्येव भवति । तुभ्यं हितस्त्वदीय इति । न च वक्तव्यम् इह प्रत्ययलोपलक्षणन्यायेन कथं न भवतीति विभक्तावित्यस्य व्यावृत्तेरभावात् ।।२२८।

[क० च०]

एषाम्० । इह परत्वादिति । ननु कथमत्र परत्वम्, उभयोः सावकाशे हि तद् भवति । न ह्यन्तलोपमन्तरेण एकस्य सावकाशोऽस्तीत्याह – लोपात् स्वरादेशस्य बलवत्त्वादिति । **'अन्त्यलोपस्वरादेशयोः स्वरादेशो विधिर्बलवान्'** (का० परि० ३५) इति षष्ठीतत्पुरुषपक्षे कथमेत्वस्य स्वरादेशत्वं दकारस्य स्थाने विधीयमानत्वादित्याह – नित्यत्वादिति । नित्यत्वं च कृताकृतप्रसङ्गिन एव । ननु **"ईयस्तु हिते"** (२।६।१०) इत्यत्र योगविभागस्य नियतविषयत्वात् कथमत्र भविष्यतीत्याह – अथवेत्यादि । विभक्तावित्यस्य व्यावृत्तेरभावादिति । ननु कथमेतदुक्तं यावता 'अतित्वन्' इत्यादौ **"लुग्लोपे न प्रत्ययकृतम्"** (३।८।२९) इति न्यायात् प्रत्ययलोपलक्षणन्यायस्याभावाद् अत्रैव व्यावृत्तिर्घटते इति । कथं 'युष्मत्पुत्रः, त्वदीयः' इत्यादौ नान्तलोपः ? सत्यम् । मा भूत्, समुदायाश्रितविभक्तेरन्यस्माद् इत्यादिना लुकि प्रत्ययलोपलक्षणस्याविषयः, किन्तु त्वय्यधि अधित्वदित्यादौ वाक्ये **"अन्यस्माल्लुक्"** (२।४।३) इत्यादिना लोपात् प्रत्ययलोपलक्षणेनात्राप्यन्तलोपप्रसङ्गः, तस्माद् युक्तमुक्तम् 'व्यावृत्तेरभावात्' इति । अतो विभक्तिग्रहणं साक्षाद् विभक्तिप्रतिपत्त्यर्थमेवेति भावः । ननु तथापि कथमिदमुच्यते समासे लुप्तायां विभक्तौ प्रत्ययलोपलक्षणन्यायस्याभावात् । तथाहि समासे लुप्तायां विभक्तौ प्रत्ययलोपलक्षणन्यायेन सिद्धे यद् व्यञ्जनान्तस्य यत्सुभोरिति वचनं तन्नियमार्थम् **"व्यञ्जनान्तस्य यत्सुभोः"** (२।५।४) इत्युक्तमेव कार्यं भवति नान्यदिति । अत एव राजेव राजवदित्यत्र प्रत्ययलोपलक्षणन्यायेन घुटमाश्रित्य प्राप्तोऽपि दीर्घो न भवति । न च तर्हि 'त्वत्पुत्रः' इत्यादौ कथं प्रत्ययलोपलक्षणन्यायेन प्राप्तिर्येन प्रत्युदाह्रियते इति वाच्यम् । विभक्त्युक्तकार्यस्यापि सुभोक्तत्वादिति चेत् प्रकृतेऽपि दीयतां दृष्टिः ।

तथाहि 'अधित्वत्' इत्यत्र विभक्त्युक्तत्वेन सुभोक्तत्वादन्तलोपश्च प्रवर्तते इति दिक् । अथ 'युवाभ्याम्' इत्यादौ कथमकारस्य लोपः, नैवम् । अकारकरणसामर्थ्यादिति चेत्, अकारलोपाभाव एवाकारकरणस्य फलम् । अन्यथा अन्तस्थत्वाद् वलोप एव गम्यते । अथ अकारकरणेनैव कथं लोपाभावः साध्यते, अकारस्य स्थानिवद्भावादिति चेत्, न । लोपविधिं प्रति स्थानिवद्भावस्य निषिद्धत्वात् तस्मादकारकरणादेव नाकारलोपः । यद् वा 'एषाम्' इत्यनेन बहुवचनेन पूर्वोक्ता आकार एव गृह्यन्ते, न तु स्थानिनौ युवावाविति ।।२२७।

**[समीक्षा]**

'युष्मद् + भ्यस्, अस्मद् + भ्यस्, अतियुष्मद् + शस्, अत्यस्मद् + शस्, युष्मद् + ङि, अस्मद् + ङि' इत्यादि अवस्था में कातन्त्रकार तथा पाणिनि दोनों ही दकार – लोप करके 'युष्मभ्यम्, अस्मभ्यम्, अतियुष्मभ्यम्, अत्यस्मभ्यम्, अतित्वान्, अतिमान्, त्वयि, मयि' आदि शब्दरूप सिद्ध करते हैं। पाणिनि का सूत्र है – **"शेषे लोपः"** (अ० ७।२।९०)।

**[रूपसिद्धि]**

१. **युष्मभ्यम्** । युष्मद् + भ्यस् । प्रकृत सूत्र द्वारा अन्तिम वर्ण दकार का लोप, **"भ्यसभ्यम्"** (२।३।१५) से भ्यस् को 'अभ्यम्' आदेश तथा **"अकारे लोपम्"** (२।१।१७) से मकारोत्तरवर्ती अकार का लोप।

२. **अस्मभ्यम्** । अस्मद् + भ्यस् । पूर्ववत् प्रकृत सूत्र से दकार-लोप, भ्यस् को अभ्यम् आदेश तथा अकार-लोप।

३-४. **अतियुष्मभ्यम्** । अतियुष्मद् + भ्यस् । **अत्यस्मभ्यम्** । अति + अस्माद् + भ्यस् । युष्मान् अतिक्रान्तेभ्यः, अस्मान् अतिक्रान्तेभ्यः । पूर्ववत् दकारलोप, भ्यस् को अभ्यम् आदेश तथा अकार-लोप।

५-६. **अतित्वान्** । अति + युष्मद् + शस् । त्वामतिक्रान्तान् । **अतिमान्** । मामतिक्रान्तान् । अत्यस्मद् + शस् । पूर्ववत् दकार-लोप, 'त्वद्-मद्' आदेश, पुनः दलोप, शस् के स्थान में **"आन् शस्"** (२।३।९) से 'आन्' आदेश, **"समानः सवर्णे दीर्घीभवति परश्च लोपम्"** (१।२।१) से समानलक्षण दीर्घ – आकारलोप।

७-८. **त्वयि** । युष्मद् + ङि । **मयि** । अस्मद् + ङि । पूर्ववत् प्रकृत सूत्र द्वारा दकार-लोप, 'त्वद्-मद्' आदेश, पुनः दकार-लोप (यावत्सम्भवस्तावद्विधिः – का० परि० ५४), **"एत्वमस्थानिनि"** (२।३।१७) से एकार तथा **"ए अय्"** (१।२।१२) से अयादेश।

९-१०. **अतित्वयि** । त्वामतिक्रान्ते । अतियुष्मद् + ङि । **अतिमयि** । मामतिक्रान्ते । अत्यस्मद् + ङि । पूर्ववत् दकारलोप, 'त्वद्-मद्' आदेश, पुनः दलोप, एत्व तथा अयादेश ॥२२७।

## २२८. युवावौ द्विवाचिषु [२।३।७]

### [सूत्रार्थ]

'औ' आदि द्विवचन के परे रहते 'युष्मद्' को 'युव' तथा 'अस्मद्' को 'आव' आदेश होता है ॥२२८।

### [दु० वृ०]

युष्मदस्मदोर्द्विवाचिषु परतो युवावौ भवतो यथासंख्यम्। युवाभ्याम्, आवाभ्याम्। अतियुवाभिः, अत्यावाभिः। श्रुतयोर्द्विवाचिष्विति किम्? त्वां युष्मानतिक्रान्तौ – अतित्वाम्, अतियुष्माम्। युवयोः पुत्रः युष्मत्पुत्रः। युवयोरयं युष्मदीयः। प्रत्ययलोपलक्षणेनान्तालोपात् ॥२२८।

### [दु० टी०]

युवा०। अकारान्तावेतावादेशौ। **व्याख्यानाद् विशेषार्थप्रतिपत्तिः।** द्वौ वक्तुं शीलमेषामिति नाम्न्यजातौ णिनिः। द्विवाचिन इह स्यादय एवार्थात् 'युवामतिक्रान्तैः, आवामतिक्रान्तैः' इति विग्रहे अन्तर्वर्तिद्विवचनमाश्रित्य युवावौ भवत एव **'प्रत्ययलोपे प्रत्ययलक्षणम्'** (का० परि० ५२) इति न्यायात्। एतदुक्तं भवति यदा युष्मदस्मदी द्वित्वे वर्तेते समासप्रकृतिश्चैकत्वबहुत्वयोस्तदापि युवावौ परत्वाद् यदि त्वमहमादिभिर्न बाध्यते। एवं युवामावामतिक्रान्तेन अतियुवया, अत्यावया। युवामावामतिक्रान्तेभ्योऽतियुवभ्यम्, अत्यावभ्यम्। युवामावामतिक्रान्तादतिक्रान्तेभ्यो वा अतियुवत्, अत्यावत्। युवामावामतिक्रान्तानाम् अतियुवयाम्, अत्यावयाम्। युवामावामतिक्रान्ते अतियुवयि, अत्यावयि। युवामावामतिक्रान्तेषु अतियुवासु, अत्यावासु। श्रुतयोरित्यादि। युष्मदस्मदोर्युवावौ युष्मदस्मदोरेव द्विवाचिषु **'श्रुतानुमितयोः श्रौतसंबन्धो विधिर्बलवान्'** (का० परि० ९२) इति न्यायात्। तेन यदा युष्मदस्मदी एकत्वबहुत्वयोर्वर्तेते समासप्रकृतिश्च द्वित्वे तदा युवावौ न भवतः इत्यर्थः।

युवयोः पुत्र इत्यादि। उत्तरपदे प्रत्यये च प्रत्ययलोपे प्रत्ययलक्षणमिति वचनेऽपि सति न युवावौ युष्मदस्मदोरन्तस्यालोपात्, तदेतत् कथम् अन्तलोप इति सप्तम्यन्तमर्थवशाद् वर्तते तेनान्तलोपे सतीत्यर्थः। एषामिति वा वर्तते। अर्थवशाद् द्विवचनेन संबन्धः, एकत्वे त्वन्मदोर्विषयत्वात्। तेनानयोर्युष्मदस्मदोः कृतान्तलोपयोरित्यर्थः।

**अथवा** द्विवाचिषु येषु युष्मदस्मदी तयोर्युवावौ विभक्तौ परत इति। अत एव द्विवाचिन्यां विभक्ताविति सामानाधिकरण्यं न कृतम् इति। यद्येवं युवावौ द्वित्वे इति कथन्न विदध्यात्। द्वित्वेन युष्मदस्मदोर्विशेषणाद् अभिमतं भविष्यति, नैवम्, विभक्तिविषय इत्यपि संदेहः स्यात्। युवामावामाख्यातुम् एषकः युयुष्मयिषकः, असिष्मयिषकः। द्वयोरिति कृते किं द्वयोरर्थयोर्वर्तमानयोरुत द्वयोरेव युष्मदस्मदोर्न त्वन्मदोरिति। द्विवचन इत्यपि कृते, किमिदं भावसाधनं करणसाधनं वेति विप्रतिपद्येत। तस्माद् द्विवाचिष्विति न्याय्यम्। युष्मदस्मदोरिनन्तयोः क्विपि कृते विभक्तौ, सत्यम्। एकदेश-विकृतस्यानन्यवत्त्वाद् युवावादय आदेशाः।

युवाम् आवाम् आचक्षाणौ युवाम् आवाम्, युष्मान् अस्मान् आचक्षाणस्त्वम् अहम्। युष्मान् अस्मान् आचक्षाणा यूयं वयम्। युष्मान् अस्मान् आचक्षाणस्य तव मम। यदा पुनरन्तरङ्गत्वात् त्वन्मदी तदा त्वां माम आचक्षाणस्त्वम् अहम् इत्यादिना भवितव्यम्। स्थानिवत्त्वं च तत्र इनः क्वौ लुप्तत्वान्न विद्यते। कथं युवकाम्, आवकाम् अन्तरङ्गत्वादकि कृते साकोरेव युष्मदस्मदोर्युवावौ स्याताम् ? सत्यम्। 'यावत्संभवस्तावद् विधिः' (का० परि० ५४) इति पुनरक् भविष्यति, तत्र बहुलत्वात् कृतयोरादेशयोः पश्चादक्। तथा च वक्ष्यति – युवावादिषु कृतेषु पश्चाद् अगिति ॥२२८।

**[वि० प०]**

युवा०। इह **'श्रुतानुमितयोः श्रौतसंबन्धो विधिर्बलवान्'** (का० परि० ९२) इति न्यायाद् युष्मदस्मदोरेव द्विवाचिनः प्रत्यया प्रतिपत्तव्याः न तु समासस्येत्याह – 'युष्मदस्मदोर्द्विवाचिषु' इति। द्वौ वक्तुं शीलं येषामिति **"नाम्न्यजातौ णिनिस्ताच्छील्ये"** (४।३।७६) इति णिनिः। अतियुवाभिः, अत्यावाभिरिति युवामतिक्रान्तैः आवामतिक्रान्तैरिति विग्रहः। यद्यपि समासार्थे बहुवचनं तथापि युष्मदस्मदोर्द्वित्वे वर्तमानत्वाद् अन्तर्वर्तिद्विवचनमाश्रित्य युवावौ भवतः एव प्रत्ययलोपलक्षणन्यायात्। **"आत्वं व्यञ्जनादौ"** (२।३।१८) इत्यात्वम्। किमर्थं पुनः श्रुतत्वाद् युष्मदस्मदोरेव द्विवाचिनः प्रत्यया गृहीता इत्याह – **श्रुतयोरित्यादि**। तेन यदा युष्मदस्मदी एकत्वबहुत्वयोर्वर्तेते समासप्रकृतिश्च द्वित्वे तदा युवावौ न भवत इत्यर्थः। तथा चोक्तम् –

**समस्येते यदैकत्वे बहुत्वे युष्मदस्मदी।**
**समासो वर्तते द्वित्वे न युवावौ तदा तयोः॥**

अतिक्रान्ताविति प्रत्येकमभिसंबध्यते ।त्वामतिक्रान्तौ युष्मान् अतिक्रान्तावित्यर्थः। **"अमौ चाम्"** (२।३।८) इत्यौकारस्यामादेशः ।युष्मदीय इति ।युवयोरयमिति विगृह्य पूर्ववद् ईयप्रत्ययः। इह यद्यपि **"प्रत्ययलोपलक्षणन्यायेन"** (का० परि० ५२) द्विवचनं दृश्यते तथापि युवावौ न भवतः अन्तस्यालोपाद् इत्याह – प्रत्यय इत्यादि। एतदुक्तं भवति पूर्वसूत्रादन्तलोप एवानुवर्तते, स चार्थवशात् सप्तम्या संबध्यते। ततोऽन्तलोपे सति युवावावित्यर्थः।इह चान्तलोपो नास्ति साक्षाद् विभक्तौ तस्य विहितत्वादित्याह – प्रत्यय इत्यादि ॥२२८।

## [क० च०]

युवावौ०। युवावादेशौ अकारान्तौ। अन्तलोपे सति आदेशिनोऽकारान्तस्य साहचर्यात्, तन्न। आचक्षाणे व्यञ्जनान्तयोरपि दर्शनात्। तस्मादकारान्तत्वे आम्नाय एव शरणमिति **साम्प्रदायिकाः**। ननु 'अव' इति कथं नाशङ्क्यते, नैवम्। सन्धावपि आव एव प्रतीयते, न तु अवः, दृष्टपरिकल्पनावशात्। **पञ्जीप्रदीपे**ऽधिकमाह – प्रत्ययलोपलक्षणेनान्तालोपादिति। अथ युष्मत्पुत्र इत्यादौ "व्यञ्जनान्तस्य यत् सुभोः" (२।५।४) इत्यतिदेशबलात् प्रत्ययलोपलक्षणं न कुर्यात्, सत्यम्! तस्य बाधकं युवावैनमघवदर्वत्स्वेव प्रत्ययवदिति प्राप्नोति ॥२२८।

## [समीक्षा]

'युष्मद् + औ, युष्मद् + भ्याम्, अस्मद् + औ, अस्मद् + भ्याम्' इस अवस्था में कातन्त्रकार तथा पाणिनि दोनों ने ही 'युष्मद्' को 'युव' तथा 'अस्मद्' को 'आव' आदेश करके 'युवाम्, युवाभ्याम्, आवाम्, आवाभ्याम्' शब्दरूप सिद्ध किए हैं। पाणिनि का सूत्र है – "युवावौ द्विवचने" (अ० ७।२।९२)। अतः उभयत्र गौरव-लाघव निश्चित नहीं किया जा सकता।

## [रूपसिद्धि]

१. **युवाभ्याम्।** युष्मद् + भ्याम्। **"एषां विभक्ताव०"** (२।३।६) से अन्तिम वर्ण द् का लोप, प्रकृत सूत्र से 'युव' आदेश तथा **"आत्वं व्यञ्जनादौ"** (२।३।१८) से अकार को आकारादेश।

२. **आवाभ्याम्।** अस्मद् + भ्याम्। अन्त्य दकार का लोप, प्रकृत सूत्र 'आव' तथा अकार को आकारादेश।

३. **अतियुवाभिः** । अतियुष्मद् + भिस् । **अत्यावाभिः** । अति + अस्मद् + भिस् । युवामतिक्रान्तैः, आवामतिक्रान्तैः । पूर्ववत् दकारलोप, प्रकृत सूत्र से 'युव-आव' आदेश तथा अन्त्य अकार को आकार आदेश ॥२२८।

## २२९. अमौ चाम् [२।३।८]

### [सूत्रार्थ]

'युष्मद्-अस्मद्' शब्दों से आने वाले द्वितीयाविभक्ति-एकवचन 'अम्' प्रत्यय तथा प्रथमा-द्वितीया-द्विवचन 'औ' प्रत्यय इन दोनों के स्थान में 'आम्' आदेश होता है ॥२२९।

### [दु० वृ०]

युष्मदस्मदादिभ्यः परोऽमौ चाम् भवति । त्वाम्, माम् । युवाम्, आवाम् । द्विवाच्यधिकाराद् वा साहचर्यं न स्यात् ॥२२९।

### [दु० टी०]

अमौ । प्रत्येकम् इह लुप्तप्रथमैकवचनम् अतश्चकारः क्रियते । तेन अम्सहचरित औकारो न गृह्यते । सत्यपि युष्मदस्मदोर्द्वित्वे यथासंख्यं न भवति, वैषम्यसंबन्धात् । द्विवाच्यधिकाराद् वेति पक्षान्तरं सूचयति । भवतु अत्रैकं पदम् अधिकृतद्विवाचि-विशेषणबलात् सामान्ये औकारो भविष्यति । एषामित्यर्थवशात् पञ्चम्यन्त इहेति । एभ्यो युष्मदस्मदादिभ्य इत्यर्थः कुतो व्यक्तिभेदे यथासंख्यमिति चकारस्तूक्तसमुच्चयमात्रे । दीर्घवानयमादेशो ह्रस्ववांश्चेदमोऽम्विधानमनर्थकं स्यात् । न चानर्थकम् **"एत्वम-स्थानिनि"** (२।३।१७) स्यात् । यद्येवं मकारमात्रमेव विदधीत वर्णान्तत्वादन्ते तर्हि तद् भवति । परस्यादेरिति कैश्चिदिष्यते, तन्न सम्मतम्, अतो व्याख्यानतो विशेषार्थप्रतीतेः ॥२२९।

### [वि० प०]

अमौ । चकारोपादानादिह प्रत्येकं लुप्तप्रथमैकवचनम् । अत आह – अम् औ चेति । 'अम्' तावद् द्वितीयैकवचनम्, तत्सहचरित औकारोऽपि द्वितीयाया एव कथं न गृह्यते इत्याह – **द्विवाच्यधिकाराद्** इत्यादि । युवावौ द्विवाचिष्विति । अतो

द्विवाच्यधिकारोऽनुवर्तते स चौकारेणैव सह संबध्यते, अमोऽसम्भवात् । अतो द्विवाची य औकार इति सूत्रार्थे कुतः साहचर्याशङ्केति भावः । वाशब्देन तु प्रत्येकं भिन्नविभक्तिनिर्देशादिति सूच्यते । अन्यथा द्वन्द्वे सति एकपदे चकारोऽपि न कृतः स्यात्, तेन प्रथमाद्विवचनस्यापि आम् सिद्धमिति भावः ।।२२९।

**[क० च०]**

अमौ । कुतः साहचर्याशङ्का इति **पञ्जी** । ननु द्विवाच्यधिकारेण कथं साहचर्याशङ्का निराक्रियते, द्वितीयाद्विवचनस्यापि द्विवाच्यधिकारादिति विशेषणत्वेन चरितार्थत्वादिति चेत्, नैवम् । अभिप्रायापरिज्ञानाद् द्विवाचिपदेन सामान्य औकार एव गृह्यते । अत एव प्रथमाद्विवचनस्यापि ग्रहणम्, अन्यथा द्विवाचिग्रहणमेव व्यर्थं स्यात्, द्वितीयाद्विवचनस्यापि द्विवाचित्वव्यभिचारात् । तथा च तस्य व्याप्त्यर्थ इति भावः । ननु अर्थवशाद् विभक्तिविपरिणामः क्रियते, स चार्थः प्रकारान्तरेणैव घटते इति, किं विभक्तिवचनयोर्विपरिणामेन द्विवाच्यधिकारः क्रियते इत्याह – वाशब्देनेति ।

अन्यथेति । भिन्नविभक्तिनिर्देशेन साहचर्याभावं विनेत्यर्थः चकारोऽपि न कृतः स्यादिति । ननु यथासङ्ख्यनिरासार्थं भिन्नपदपरिचायकश्चकारः कर्तव्य एव । तत्कथमुक्तम् – चकारोऽपि न कृतः स्याद् इति ? सत्यम् । **साहचर्यं** हि एकवाक्योपात्तेनैव संभवति, तत्र यदि साहचर्यार्थमेकवाक्यमङ्गीक्रियते तदा यथासङ्ख्यमपि दुर्निवारम्, चकारोऽपि व्यर्थ एव स्यादिति । तेन साहचर्यसम्भवे यथासंख्यं संभवति, तन्निवृत्तौ तस्यापि निवृत्तिः । **कुलचन्द्रस्तु** 'अमौ' इति स्वरूपेण प्रथमा, अतः औकारस्वरूपं गृह्यते इति द्वयोरेव औकारयोर्ग्रहणात् कुतः साहचर्यम्, भिन्नविभक्तिनिर्देशाद् युष्मदस्मदोरम् आम् भवति । युष्मदस्मदोरौकार आम् भवति । वैषम्यसंबन्धात् कुतो यथासंख्यमिति भावः । आकारवानयमादेश इति । नन्वकारवानेव कथं न क्रियते । एवं सति त्वाम् इति पदं स्यात् । तदा अमः आम्-विधानम् अनर्थकमिति, नैवम् । **"एत्वमस्थानिनि"** (२।३।१७) इत्यस्य वारणार्थं भविष्यति । अथ यदि एत्ववारणमेव साध्यम्, तदा मकारमेव विदध्यात् । एकवर्णत्वादन्ते भविष्यति, न च प्रथमया चेति न्यायेन सर्वस्य भविष्यतीति वाच्यम्, अस्याः परिभाषाया अनङ्गीकरणात् ।

अथ आम्-विधानस्याकारे, प्रयोजनमस्ति, अन्यथा मकारे कृते **'अकारो दीर्घं घोषवति'** (२।१।१४) इति दीर्घः स्यादिति, नैवम् । **"आत्वं व्यञ्जनादौ"** (२।३।१८)

इत्यत्रास्थानिनीति व्यावृत्तिबलान्न भविष्यति । तस्मादकारकरणादेवाकारेऽकारलोपस्याभावे समानलक्षणदीर्घत्वे 'त्वाम्, युवाम्' इति सिध्यति, किं दीर्घविधानेन ? तदसङ्गतम् । यस्माद् 'युष्मानाचक्षाणौ पश्यामि' इत्यत्र इनि अन्त्यस्वरादिलोपे क्विपि कारितलोपे च व्यञ्जनान्तत्वाद् युष्मानिति न सिध्यति, तस्माद् दीर्घविधानं कुर्यात् । अथ दीर्घादिरिति कथं निश्चितम्, सन्धौ सति समानरूपत्वाद् ह्रस्वादेरपि प्रतीयते ? सत्यम् । **आचार्यपारम्पर्याद्** यथादृष्टपरिकल्पनावशाद् दीर्घादिरेवायमादेशः इत्यनेन टीकापि व्याख्याता ।। २२९ ।

**[समीक्षा]**

'युष्मद् + अम्, अस्मद् + अम्, युष्मद् + औ, अस्मद् + औ' इस अवस्था में कातन्त्रकार अम् तथा औ को आम् आदेश करके 'त्वाम्-माम्-युवाम्-आवाम्' शब्दरूप सिद्ध करते हैं । पाणिनि ने "ङेप्रथमयोरम्" (अ० ७।१।२८) से 'अम्' आदेश किया है । यद्यपि पाणिनि ने 'ङे-सु-औ-जस्-अम्-औट्' इन छह प्रत्ययों को अम् आदेश एक ही सूत्र द्वारा करके शब्दलाघव उपस्थित किया है, जबकि कातन्त्रकार ने अम्-औ (प्रथमा-द्वितीया-द्विवचन) प्रत्ययों को 'आम्' आदेश, सु-प्रत्यय परे रहते युष्मद्-अस्मद् को 'त्वम्-अहम्' आदेश, जस्-प्रत्यय परे रहते 'यूयम्-वयम्' एवं ङे-प्रत्यय परे रहते 'तुभ्यम्-मह्यम्' आदेश चार सूत्रों में प्रदर्शित किए हैं । परन्तु अर्थकृत लाघव की दृष्टि से कातन्त्ररचना ही अधिक सुविधाजनक कही जा सकती है ।

**[रूपसिद्धि]**

१. **त्वाम्** । युष्मद् + अम् । **"एषां विभक्तावन्तलोपः"** (२।३।६) सूत्र से 'युष्मद्' शब्द के अन्तिम वर्ण दकार का लोप, 'युष्म' को त्वद् आदेश, द्लोप, अम् को आम्, समानलक्षणदीर्घ एवं आकारलोप ।

२. **माम्** । अस्मद् + अम् । पूर्ववत् द्लोप 'अस्म्' को 'मद्' आदेश, दकारलोप, अम् को आम्, समानलक्षणदीर्घ एवं आकारलोप ।

३. **युवाम्** । युष्मद् + औ । द्लोप, **"युवावौ द्विवाचिषु"** (२।३।७) से 'युव' आदेश, औ को आम्, दीर्घ-आकारलोप ।

४. **आवाम्** । अस्मद् + औ । दकारलोप । आव- आदेश, औ को आम् - आदेश, दीर्घ - आकारलोप ।।२२९।

## २३०. आन् शस् [२।३।९]

### [सूत्रार्थ]

'युष्मद् - अस्मद्' शब्दों से परवर्ती द्वितीयाबहुवचन – 'शस्' प्रत्यय के स्थान में 'आन्' आदेश होता है ।।२३०।

### [दु० वृ०]

युष्मदस्मदादिभ्यः परः शस् आन् भवति । युष्मान्, अस्मान् । अतित्वान्, अतिमान् ।।२३०।

### [दु० टी०]

आन्० । ननु किमर्थमिदं शब्दमात्राश्रितो विधिरन्तलोपे सति **"शसि सस्य च नः"** (२।१।१६) इति भविष्यति । 'युष्मान् स्त्रियः, अस्मान् कुलानि' इति सिद्धमेव । अथ परत्वाच्छिरादेश इति चेत्, न । तत्र नपुंसकादिति विशिष्टाद् भविष्यति । नैवम्, **"एत्वम् अस्थानिनि"** (२।३।१७) स्यादिति । युष्मयतेः क्विपि कृते युष्मान् इत्यपि स्यात् ।।२३०।

### [वि० प०]

आन्० । ननु किमर्थमिदम्, यावता अन्तलोपे सत्यकारान्तत्वात् **"शसि सस्य च नः"** (२।१।१६) इति दीर्घत्वे सकारस्य च नत्वे सिद्धं युष्मानिति । न च वक्तव्यम् 'युष्मान् स्त्रियः' इत्यत्र स्त्रियामादाप्रत्यये कृते न सिध्यतीति यावता युष्मदस्मदादीनां स्त्रीत्वादियोग एव न संभवति, स्वभावात् । तथा चोक्तम् – 'ष्णान्ताः संख्या अलिङ्गकाः कत्यव्ययुष्मदस्मदश्च' इति । ततः कुतोऽत्र "स्त्रियामादा" (२।४।४९) आप्रत्ययप्रसङ्गः । तथा 'युष्मान् कुलानि' इत्यत्र च सत्यपि परत्वे कुतः शिरादेशो नपुंसकत्वस्यायोगात् । नैवम् **"एत्वमस्थानिनि"** (२।३।१७) इत्येत्वं स्याद्, अनादेशित्वात् । किं च यदा 'युष्मान् आचष्टे' इतीनि कृतेऽन्त्यस्वरादिलोपे च युष्मयतेः क्विप् क्रियते, तदापि युष्मानितीष्यते, तन्न स्याद् अकारान्तत्वाभावात् ।।२३०।

**[क० च०]**

आन्० । ननु संख्याविशेषणात् कथमलिङ्गका इति । अलिङ्गका इति प्रयोगो भवितुमर्हति ? सत्यम् । लिङ्गमेव लिङ्गकम्, न विद्यते लिङ्गकं यासामिति । अत एव के प्रत्यय इत्यादिनैव इकारो न भवति । अतस्तत्रोक्तं परग्रहणात् स्त्रीकृताकार एव परो यस्मात् ककारात् तस्मिन्नेव । अत्र तु अन्या विभक्तिः कृता तत्र आप्रत्ययः । विभक्त्यन्त्यकृताकार इति । यद् वा कत्यव्ययादीनां विशेषणम् । एत्वविधावशसीति क्रियतामित्याह – **किं चेति** ।।२३०।

**[समीक्षा]**

'युष्मद् + शस्, अस्मद् + शस्, अतियुष्मद् + शस्, अत्यस्मद् + शस्' इस अवस्था में कातन्त्रकार 'शस्' को 'आन्' आदेश करके 'युष्मान्, अस्मान्' आदि शब्द सिद्ध करते हैं। जबकि पाणिनि ने **"शसो न"** (अ० ७।१।२९) से केवल 'न्' ही आदेश किया है, अतः उन्हें **"द्वितीयायां च"** (अ० ७।२।८७) से आकार भी करना पड़ता है । अतः प्रक्रिया की दृष्टि से पाणिनीय प्रक्रिया को ही गौरवधायक कहा जा सकता है ।

**[रूपसिद्धि]**

१. **युष्मान्** । युष्मद् + शस् । **"एषां विभक्तावन्तलोपः"** (२।३।६) से दकारलोप, प्रकृत सूत्र से शस् को 'आन्' आदेश, **"समानः सवर्णे दीर्घीभवति परश्च लोपम्"** (१।२।१) से समानलक्षण दीर्घ तथा 'आन्' के आकार का लोप ।

२. **अस्मान्** । अस्मद् + शस् । पूर्ववत् दकार-लोप, शस् को आन्, समानलक्षण दीर्घ एवं आकार का लोप ।

३. **अतित्वान्** । अतियुष्मद् + शस् । त्वामतिक्रान्तान् । त्वद्-आदेश, दकारलोप, आन्, समानलक्षणदीर्घ, आकारलोप ।

४. **अतिमान्** । अत्यस्मद् + शस् । मामतिक्रान्तान् । मद्-आदेश, दलोप, शस् को आन्, समानलक्षण दीर्घ एवं आन् के आकार का लोप ।।२३०।

## २३१. त्वमहं सौ सविभक्त्योः [२।३।१०]

### [सूत्रार्थ]

प्रथमाविभक्ति-एकवचन 'सि' प्रत्यय के परवर्ती रहने पर 'युष्मद्-अस्मद्' शब्दों के स्थान में सिविभक्ति सहित 'त्वम्-अहम्' आदेश होते हैं ।।२३१।

### [दु० वृ०]

त्वन्मदोर्युष्मदस्मदोश्च सौ सविभक्त्योस्त्वमहम् इत्येतौ भवतो यथासंख्यम् । त्वम्, अहम्, अतित्वम्, अत्यहम् । सविभक्त्योरिति किम् ? अधित्वत्, अधिमत् । लुक् ।।२३१।

### [दु० टी०]

त्वम् अहम् । लुप्तप्रथमाद्विवचनोऽयं निर्देशः । युष्मदस्मदोर्ग्रहणेन त्वन्मदोरपि ग्रहणं भविष्यति यथासंख्यं भवत्येव । सूत्रार्थे तु **मन्दधियां सुखप्रतिपत्त्यर्थं** त्वन्मदोर्निदर्शनम् । अतित्वम्, अत्यहमिति । त्वाम्, युवां युष्मान् वा । माम्, आवाम् अस्मान् वा अतिक्रान्त इति विग्रहः । एवं प्रियौ युवाम्, प्रिया यूयं वा यस्य स **प्रियत्वम्, प्रियाहम्** इति तदन्तविधिनापि निर्दिश्यमानस्यैवादेशो भविष्यति ।सविभक्त्योरित्यादि ।'त्वय्यधि, मय्यधि' इत्यव्ययीभावात् । लुगिति परत्वादन्यस्माल्लुगित्यनेन लुग् भवतीत्यर्थः । तस्मान्न युष्मदस्मदी सविभक्ती वर्तेते इति । एवं युष्मासु अधि अधियुष्मत्, एवम् अध्यस्मत् । त्वां युवां युष्मान् वा अतिक्रान्तं कुलम् अतित्वम्, एवम् अत्यहम् इति भवितव्यम् इति स्वभावात् समासेऽप्यलिङ्गे युष्मदस्मदी अव्यतिरिक्तलिङ्गपक्षेऽपि न नपुंसकात् स्यमोर्लोपः स्यात् तत्र मुख्यनपुंसकग्रहणात् ! येषां सलिङ्गे युष्मदस्मदी इति निदर्शनम्, तन्मतेनापि नपुंसकादेशेभ्यः परत्वाद् युष्मदस्मदादेशो भवति । सम्बोधनेऽपि हे त्वम्, हे अतित्वम्, हे अत्यहमिति भवितव्यम् ।अन्तदर्शनादन्तलोपेऽपि कृते ह्रस्वलक्षणः सिलोपो न भवति, पूर्वविधित्वात् । त्वं पुत्रोऽस्य, अहं पुत्रोऽस्येति विग्रहे 'त्वत्पुत्रो मत्पुत्र' इति प्रत्ययलोपे प्रत्ययलक्षणमपि न भवति ।.न हि मृतपुत्रो देवदत्तः सपुत्रः उच्यते।

अथान्तलोपोऽधिक्रियते उत्तरत्रापि न दुष्यति - यूयं पुत्रा अस्य युष्मत्पुत्रस्तुभ्यं हितस्तद्धितः, तव पुत्रस्त्वत्पुत्र इति न कष्टम्, व्यवहितत्वात् । त्वमहं सिनेति कृते विना सह भविष्यति उत्तरत्रापि तृतीयैव निर्दिश्यताम् । ननु पुत्रेण सह निर्धार्य्यो देवदत्त

इत्युक्ते यदि दैवात् पुत्रो नास्ति तदापि देवदत्तो निर्धार्यते । एवम् इहापि सिलोपे प्रसज्यते । स्वयोगव्यवस्थापनपक्षेऽन्ययोगव्यवच्छेदपक्षेऽपि सविभक्तिग्रहणं **सुखप्रतिपत्त्यर्थमेव** । कथं निरहंकारोऽयम् इति अव्ययोऽयमहंशब्दः ॥२३१।

## [वि० प०]

त्वमहम्० । त्वमहमिति लुप्तप्रथमाद्विवचनं पदम् - त्वन्मदोर्युष्मदस्मदोश्चेति । ननु कथमिह यथासंख्यम् आदेशिनां बहुत्वात्, नैवम् । युष्मदस्मदोरेव आदेशित्वं सिद्धम् । त्वन्मदोस्तु तदग्रहणेन ग्रहणमिति यथासंख्यं न विरुध्यते । यस्तु सूत्रार्थे त्वन्मदोर्युष्मदस्मदोर्निर्देशः स च स्पष्टार्थ एव । अतित्वमिति । त्वां युवां युष्मान् वातिक्रान्तः । अत्यहमिति । माम् आवाम् अस्मान् अतिक्रान्त इति विग्रहः । इह युष्मदस्मदोर्द्वित्वे वर्तमानयोरपि न युवावौ भवत इति त्वम्- अहम्- आदेशस्य परत्वात् । एवमुत्तरत्रापि । सविभक्त्योरित्यादि । 'त्वय्यधि, मय्यधि' इति कारकार्थेऽव्ययीभावः ।

लुगिति परत्वात् **"अन्यस्माल्लुक्"** (२।४।३) इत्यनेन लुगित्यर्थः । तथा त्वं पुत्रोऽस्य, अहं पुत्रोऽस्येति विग्रहे **'त्वत्पुत्रो मत्पुत्रः'** इति सविभक्तित्वाभावात् त्वमहमादेशौ न भवतः इति । न च वक्तव्यं प्रत्ययलोपलक्षणेन सविभक्तित्वं नहि मृतपुत्रः सपुत्र उच्यते लोके । यद्येवं पूर्वसूत्राद् अन्तलोपोऽधिक्रियताम्, अन्तलोपे सति भविष्यतीति किं सविभक्तिग्रहणेन ? सत्यम् । व्यवहितस्याधिकारे कष्टं स्यात् । तर्हि 'त्वमहं सिना' इत्युच्यताम्, सिना सहैव भवतीति, तथोत्तरत्रापि तृतीयैकवचनं निर्दिश्यताम् - "यूयं वयं जसि" इत्यादि । एतदप्ययुक्तम्, यथा 'देवदत्तः पुत्रेण सह निर्धार्यताम्' इत्युक्ते पुत्राभावे केवलोऽपि देवदत्तो निर्धार्यते लोके, तथेहापि सेर्लोपे कृते केवलयोरपि युष्मदस्मदोः प्रसज्येतेति सविभक्तिग्रहणम् ॥२३१।

## [क० च०]

त्वम्० । सविभक्त्योरिति किमिति वृत्तिः । 'त्वमहं सौ' इत्यास्ताम्, ततश्च त्वमहमादेशे कृते सति **"व्यञ्जनाच्च"** (२।१।४९) इति सिलोपः सिद्धः । चेद् अधित्वम् इत्यादौ **"अन्यस्माल्लुक्"** (२।४।३) इति कृते प्रत्ययलोपलक्षणन्यायेन त्वमहमादेशे प्राप्ते तन्निरासार्थं सविभक्तिग्रहणम् । चेत् तथापि न क्रियताम् । साविति भावसाधनं व्याख्येयम् । सौ विद्यमाने आदेशो नाविद्यमाने । यद् वा **'लुग्लोपे न प्रत्ययकृतम्'** इति

न्यायाद् अधित्वद् इत्यादौ न भविष्यति ? सत्यम् । साविति विषयसप्तम्यपि प्रतिपद्यते । ततः सिलोपेऽपि विषयस्य त्रैकालिकत्वाद् इत्यादावपि स्यात् । निमित्तसप्तमीपक्षे सौ परतो युष्मदस्मदी, तयोस्त्वमहमित्येतौ भवतः इत्यन्वये सति आदेशाभ्यां सह संबन्धस्याभावाल्लुग्लोपे इत्यादिना निषेधो न स्यात् । अतोऽनया परिभाषया लुक्शब्दोच्चारितलोपे सति प्रत्यये परे यत् कार्यं तदेव निषिध्यते, तथापि आदेशिद्वयं प्रत्येव सेर्निमित्तता इति नाशङ्कैव, अतः प्रत्युदाहृतम् । यथा 'त्वं पुत्रोऽस्य, अहं पुत्रोऽस्य' इत्यादि ।

ननु कथमत्र प्रत्ययलोपलक्षणन्यायेन प्राप्तिः, यावता समासे विभक्तिलोपे सति सुभोक्तमेव कार्यं नान्यदिति नियमः कृतः, कुतः सावुक्तम्, येन प्रत्युदाहरणं सार्थकमिति ? सत्यम्, लुप्तासु विभक्तिषु सुभोर्युगपदेकदेशकार्यमेव संभवति, अतो नियमोऽपि एकदेशकार्यं प्रत्येव न समुदायकार्यं प्रति इदन्त्वनेकदेशकार्यम् इत्यदोषः ॥२३१।

**[समीक्षा]**

'युष्मद् + सि, अस्मद् + सि, अतियुष्मद् + सि, अत्यस्मद् + सि' इस अवस्था में सिविभक्ति के साथ युष्मद् शब्द को 'त्वम्' तथा अस्मद्-शब्द को 'अहम्' आदेश करके कातन्त्रकार 'त्वम्, अहम्, अतित्वम्, अत्यहम्' शब्दरूप सिद्ध करते हैं । पाणिनि के अनुसार 'युष्म्-अस्म्' को **"त्वाहौ सौ"** (अ० ७।२।९४) से 'त्व-अह' आदेश, **"शेषे लोपः"** (अ० ७।।९०) से अद्-भाग का लोप तथा "ङेप्रथमयोरम्" (अ० ७।१।२८) से सु को 'अम्' आदेश करने पर त्वम्-अहम् रूप सिद्ध होते हैं । इस प्रकार पाणिनीय प्रक्रिया का गौरव स्पष्ट है ।

**[रूपसिद्धि]**

१. **त्वम्** । युष्मद् + सि । **"एषां विभक्तावन्तलोपः"** (२।३।६) से दकार-लोप, युष्मद को त्वद्-आदेश ( [illegible] ), पुनः दकारलोप तथा प्रकृत सूत्र से 'त्व-सि' को 'त्वम्' आदेश ।

२. **अहम्** । अस्मद + सि । पूर्ववत् द्-लोप, अस्म को मद् आदेश ( [illegible] ), पुनः दकारलोप तथा प्रकृत सूत्रद्वारा 'अह + सि' को 'अहम्' आदेश ।

३-४. **अतित्वम्।** अतियुष्मद् + सि ।त्वामतिक्रान्तः ।**अत्यहम्** ।अत्यस्मद् + सि । मामतिक्रान्तः। पूर्ववत् 'अतियुष्मद् + सि' को 'त्वम्' तथा 'अत्यस्मद् + सि' को अहम् – आदेश ॥२३१।

## २३२. यूयं वयं जसि [२।३।११]

### [सूत्रार्थ]

'जस्' विभक्तिसहित 'युष्मद्- अस्मद्' शब्दों के स्थान में क्रमशः 'यूयम्- वयम्' आदेश होते हैं ॥२३३।

### [दु० वृ०]

त्वन्मदोर्युष्मदस्मदोश्च जसि सविभक्त्योः 'यूयम्- वयम्' इत्येतौ भवतो यथासंख्यम्। यूयम्, वयम् । अतियूयम्, अतिवयम् ॥ २३२।

### [दु० टी०]

यूयम्० । अकि तु **यूयकम्, वयकम्।** त्वां युवां युष्मान् वा अतिक्रान्ताः, माम्, आवाम् अस्मान् वा अतिक्रान्ताः इति विग्रहः ॥२३२।

### [वि० प०]

यूयम्० । **अतियूयम्, अतिवयम्** इति । त्वाम्, युवाम्, युष्मान् वा अतिक्रान्ताः। माम् आवाम् अस्मान् वा अतिक्रान्ता इति विग्रहः ॥२३२।

### [क० च०]

यूयम्० । अत्र युष्मदस्मदोर्मुख्यत्वात् तयोरादौ विवरणम्, अन्यत्र त्वन्मदोरिति ॥२३२।

### [समीक्षा]

'युष्मद् + जस्, अस्मद् + जस्, अतियुष्मद् + जस्, अत्यस्मद् + जस्' इस अवस्था में कातन्त्रकार जस्विभक्तिसहित 'युष्मद्- अस्मद्' शब्दों को क्रमशः 'यूयम् - वयम्' आदेश करके अभीष्ट रूप सम्पन्न करते हैं। पाणिनि के अनुसार **"यूय- वयौ जसि"** (अ० ७।२।९३) से 'यूय- वय' आदेश, **"शेषे लोपः"** (अ० ७।२।९०)

से अद्-भाग का लोप तथा "**ङेप्रथमयोरम्**" (अ० ७।१।२८) से अमादेश होने पर उक्त शब्द निष्पन्न होते हैं। इस प्रकार पाणिनीयप्रक्रिया गौरवाधायिका कही जा सकती है।

**[रूपसिद्धि]**

१. **यूयम्।** युष्मद् + जस्। प्रकृत सूत्र द्वारा 'यूयम्' आदेश।

२. **वयम्।** अस्मद् + जस्। प्रकृत सूत्र द्वारा 'वयम्' आदेश।

३. **अतियूयम्।** अतियुष्मद् + जस्। त्वां युवां युष्मान् वाऽतिक्रान्ताः।

४. **अतिवयम्।** अत्यस्मद् + जस्। माम् आवामस्मान् वाऽतिक्रान्ताः। पूर्ववत् 'युष्मद् + जस्' को 'यूयम्' तथा 'अस्मद् + जस्' को 'वयम्' आदेश ॥२३२।

## २३३. तुभ्यं मह्यं ङयि [२।३।१२]

**[सूत्रार्थ]**

चतुर्थी विभक्ति-एकवचनं 'ङे' प्रत्यय के पर में रहने पर विभक्तिसहित 'युष्मद्' को 'तुभ्यम्' तथा 'अस्मद्' को 'मह्यम्' आदेश होता है ॥२३२।

**[दु० वृ०]**

त्वन्मदोर्युष्मदस्मदोश्च ङयि सविभक्त्योः 'तुभ्यं मह्यम्' इत्येतौ भवतो यथासंख्यम्। तुभ्यम्, मह्यम्। अतितुभ्यम्, अतिमह्यम् ॥२३३।

**[दु० टी०]**

**तुभ्यम्०।** अकि तु 'तुभ्यकम्, मह्यकम्'। उभयनिष्पन्नत्वान्नेदं सर्वनाम, तत्र बहुलत्वाद् अग् भविष्यति। त्वां युवां युष्मान् वा अतिक्रान्ताय इति विग्रहः ॥२३३।

**[वि० प०]**

**तुभ्यम्०।** अतितुभ्यम्, अतिमह्यम् इति पूर्ववद् वाक्यम्। केवलम् अतिक्रान्ताय इत्यन्यपदार्थे विशेषः ॥२३३।

**[समीक्षा]**

'युष्मद् + ङे, अस्मद् + ङे, अतियुष्मद् + ङे, अत्यस्मद् + ङे' इस अवस्था में कातन्त्रकार विभक्तिसहित युष्मद् - अस्मद् को 'तुभ्यम्- मह्यम्' आदेश करते हैं। एतदर्थ

पाणिनीय व्याकरण में **"तुभ्य-मह्यौ ङयि"** (अ० ७।२।९५) से 'युष्म्' को तुभ्य तथा अस्म् को मह्य आदेश, **"शेषे लोपः"** (अ० ७।२।९०) से 'अद्' भाग का लोप तथा **"ङेप्रथमयोरम्"** (अ० ७।१।२८) से 'ङे' को अमादेश का विधान किया गया है। इससे पाणिनीय व्याकरण का गौरव स्पष्ट है।

**[रूपसिद्धि]**

१. **तुभ्यम्** । युष्मद्+ ङे । त्वद्- आदेश ( ?), **"एषां विभक्तावन्तलोपः"** (२।३।६) से दकार का लोप, 'त्वद् + ङे' को 'तुभ्यम्' आदेश।

२. **मह्यम्** । अस्मद् + ङे । मद्- आदेश ( ? ), **"एषां विभक्तावन्तलोपः"** (२।३।६) से अन्तिम द् वर्ण का लोप तथा 'मद् + ङे' को 'मह्यम्' आदेश।

३. **अतितुभ्यम्** । अतियुष्मद् + ङे । त्वाम्, युवाम्, युष्मान् वा अतिक्रान्ताय। 'युष्मद् + ङे' को 'तुभ्यम्' आदेश।

४. **अतिमह्यम्** । अत्यस्मद् + ङे । माम्, आवाम्, अस्मान् वा अतिक्रान्ताय। 'अस्मद् + ङे' को 'मह्यम्' आदेश ॥२३३।

## २३४. तव मम ङसि [२।३।१३]

**[सूत्रार्थ]**

षष्ठीविभक्ति- एकवचन 'ङस्' प्रत्यय के परवर्ती होने पर उसके साथ युष्मद्- अस्मद् को क्रमशः 'तव- मम' आदेश होते हैं ॥२३४।

**[दु० वृ०]**

त्वन्मदोर्युष्मदस्मदोश्च ङसि सविभक्त्योः 'तव- मम' इत्येतौ भवतो यथासङ्ख्यम् । तव, मम, अतितव, अतिमम । युवावादिषु कृतेषु पश्चादक् – युवकाभ्याम्, आवकाभ्याम् ॥२३४।

**[दु० टी०]**

**तव०** । 'तवक - ममक' पूर्ववत् । त्वां युवां युष्मान् वाऽतिक्रान्तस्य इति विग्रहः ॥२३४।

## [वि० प०]

**तव०। 'अतितव, अतिमम'** इत्यत्रापि अतिक्रान्तस्येति विशेषः। ननु च युष्मदस्मदादीनां सर्वनामत्वात् कृतस्याकस्तद्ग्रहणेनैव ग्रहणात् तेनैव सह युवावादय आदेशा भवितुमर्हन्ति। तत् कथं युवकाभ्याम्, आवकाभ्याम् इत्यादिषु अकः श्रवणं स्यात् ? सत्यम्। तत्र बहुलत्वाद् आदेशेषु युवावादिषु कृतेषु पश्चादक् भविष्यतीत्याह – युवावादिषु इत्यादि। एवं 'तवक – ममक' इति उभयोः स्थाने निष्पन्नत्वाद् आदेशस्य सर्वनामत्वं नास्तीति, तत् कथं 'तवक-ममक' इत्यादौ अक्-प्रत्ययः स्यात् ? सत्यम्। तत्र बहुलत्वाद् अग् वेदितव्यः ॥२३४।

## [क० च०]

**तव०।** अक्-श्रवणम् इत्यकः ककारस्य श्रवणमित्यर्थः। सत्यमित्यादि। ननु किमर्थं बहुलाश्रयणम् **'आगमात् सर्वादेशविधिर्बलवान्'** (का० परि० ४१) इत्यनेनैवाग्रतो युवावादेशे कृते पश्चाद् अक् भविष्यति ? सत्यम्। अन्तरङ्गत्वाद् युवेत्यनुत्पत्तिदशायामेवाकि युवकाभ्याम् इति न सिध्यतीति बहुलाश्रयणम् ॥२३४।

## [समीक्षा]

'युष्मद् + ङस्, अस्मद् + ङस्, अतियुष्मद् + ङस्, अत्यस्मद् + ङस्' इस अवस्था में कातन्त्रकार ङस्प्रत्यय के साथ युष्मद् को 'तव' तथा अस्मद् को 'मम' आदेश करके अभीष्ट रूप निष्पन्न करते हैं। पाणिनि ने 'युष्म्- अस्म्' को 'तव- मम' आदेश, **"ङसोऽश्"** (अ० ७।१।२७) से ङस् को अश् तथा अद्- भाग का **"शेषे लोपः"** (अ० ७।२।९०) से लोप का विधान किया है। इससे पाणिनीय प्रक्रिया का गौरव स्पष्ट है।

## [रूपसिद्धि]

१. **तव**। युष्मद् + ङस्। युष्मद् को त्वद् आदेश ( ? ), **"एषां विभक्तावन्तलोपः"** (२।३।६) से दूलोप तथा प्रकृत सूत्र द्वारा 'त्व + ङस्' के स्थान में 'तव' आदेश।

२. **मम**। अस्मद् + ङस्। अस्मद् को 'मद्' आदेश ( ? ) दकारलोप एवं प्रकृत सूत्र से 'म + ङस्' को 'मम' आदेश।

३. **अतितव** । अतियुष्मद् + ङस् । त्वां युवां युष्मान् वाऽतिक्रान्तस्य । प्रकृत सूत्र द्वारा 'युष्मद् + ङस्' को 'तव' आदेश ।

४. **अतिमम** । अत्यस्मद् + ङस् । माम्, आवाम्, अस्मान् वाऽतिक्रान्तस्य । प्रकृत सूत्र द्वारा 'अस्मद् + ङस्' को 'मम' आदेश ॥२३४।

## २३५. अत् पञ्चम्यद्वित्वे [२।३।१४]

### [सूत्रार्थ]

'युष्मद्-अस्मद्' शब्दों से पञ्चमी विभक्ति के द्विवचन 'भ्याम्' प्रत्यय को छोड़कर 'ङसि' तथा 'भ्यस्' प्रत्यय के स्थान में 'अत्' आदेश होता है ॥२३५।

### [दु० वृ०]

युष्मदस्मदादिभ्योऽद्वित्वे वर्तमाना पञ्चमी 'अत्' भवति । त्वत्, मत्, युष्मत्, अस्मत्, अतियुवत्, अत्यावत् । अद्वित्व इति किम् ? युवाभ्याम्, आवाभ्याम् ॥२३५।

### [दु० टी०]

**अत्०** । पञ्चमीत्यभेदविवक्षया प्रथमा । श्रुतत्वाद् अद्वित्व इति पञ्चम्या विशेषणं न, युष्मदस्मदोरधिकृतत्वात् । तेन युवामतिक्रान्ताद् अतिक्रान्तेभ्यो वेति विग्रहे प्रतिषेधो न भवति । अद्वित्व इति किम् ? युवाभ्याम्, आवाभ्याम् । ननु 'ङसिभ्यसोरत्' इति कथं न विदध्यात् । ङसिसहचरितो भ्यस् गृह्यते, चतुर्थ्या एव भ्यसोऽभ्यमादेशो भविष्यति, नैवम् । सविभक्त्यधिकाराद् यथासंख्याद् वा दोषः स्यादिति ॥२३५।

### [वि० प०]

**अत्०** । श्रुतत्वाद् अद्वित्व इति पञ्चम्या एव विशेषणं न पुनर्युष्मदस्मदोः । तेन यदा द्वित्वेऽपि युष्मदस्मदी वर्तेते समासप्रकृतिश्चैकत्वबहुत्वयोः, तदाप्यत्वं दर्शयति । अतियुवत्, अत्यावदिति । युवामतिक्रान्तात्, अतिक्रान्तेभ्यः । आवा ।तिक्रान्तात्, अतिक्रान्तेभ्य इति वा विग्रहे ङसेरदादेशो भ्यसो वेत्यर्थः । अद्वित्व इति किम् ? युवाभ्याम्, आवाभ्याम् ॥२३५।

### [समीक्षा]

'युष्मद् + ङसि, अस्मद् + ङसि, युष्मद् + भ्यस्, अस्मद् + भ्यस्, अतियुष्मद् + ङसि, भ्यस्, अत्यस्मद् + ङसि, भ्यस्' इस अवस्था में पाणिनि तथा शर्ववर्मा दोनों ही

शाब्दिकाचार्य 'ङसि' को 'अत्' आदेश करके 'त्वत्, मत्, युष्मत्, अस्मत्' आदि शब्दरूप सिद्ध करते हैं। पाणिनीय सूत्र भी एतादृश है – **"पञ्चम्या अत्, एकवचनस्य च"** (अ० ७।१।३१, ३२)।

**[रूपसिद्धि]**

१. **त्वत्।** युष्मद् + ङसि। प्रकृतसूत्र की व्याख्या से इसे ज्ञापक मानकर 'युष्मद्' को 'त्वद्' आदेश, **"एषां विभ०"** (२।३।६) इत्यादि से दकारलोप, प्रकृत सूत्र द्वारा ङसि को 'अत्' **"अकारे लोपम्"** (२।१।१७) से वकारोत्तरवर्ती अकार का लोप।

२. **मत्।** अस्मद् + ङसि। पूर्ववत् 'अस्मद्' को 'मद्' आदेश, दकारलोप, ङसि को अत्, तथा **"अकारे लोपम्"** (२।१।१७) से अकार का लोप।

३-४. **युष्मत्।** युष्मद् + भ्यस्। **अस्मत्।** अस्मद् + भ्यस्। प्रकृत सूत्र से भ्यस् को अत्, दलोप तथा अलोप।

५-६. **अतियुवत्।** अतियुष्मद् + ङसि, भ्यस्। युवाम् अतिक्रान्तात्, युवामतिक्रान्तेभ्यः। **अत्यावत्।** अत्यस्मद् + ङसि, भ्यस्। आवामतिक्रान्तात्, आवामतिक्रान्तेभ्यः। पूर्ववत् 'ङसि-भ्यस्' को 'अत्' आदेश, दलोप, युष्मद् को युव, अस्मद् को आव तथा **"अकारे लोपम्"** (२।१।१७) से अकार का लोप ॥२३५।

## २३६. भ्यसभ्यम् [२।३।१५]

**[सूत्रार्थ]**

'युष्मद्-अस्मद्' शब्दों से चतुर्थीविभक्ति-बहुवचन 'भ्यस्' प्रत्यय के स्थान में 'अभ्यम्' आदेश होता है ॥२३६।

**[दु० वृ०]**

युष्मदस्मदादिभ्यः परो भ्यस् अभ्यम् भवति। युष्मभ्यम्, अस्मभ्यम्, अतित्वभ्यम्, अतिमभ्यम्। अकारोच्चारणं किम्? धुट्येत्वं मा भूत् ॥२३६।

**[दु० टी०]**

**भ्यस्०।** त्वां मामतिक्रान्तेभ्यः इति विग्रहः। तथा युवामावाम् अतिक्रान्तेभ्यः **'अतियुवभ्यम्'**। एवम् अत्यावभ्यम्। केचित् **'लिङ्गवृत्तेः पुनर्वृत्तावविधिर्निष्ठितस्य'** इति वचनम् उपगम्य **'भ्यस् भ्यम्'** इति पठन्ति, तदा अकारमन्तरेणापि धुट्येत्वं न स्यात्। निष्ठितस्य परिनिष्पन्नस्य लिङ्गवृत्तेः (लिङ्गवर्तने) पुनर्वृत्तौ पुनः कार्यप्रवर्तने खलु विधिर्न भवतीत्यर्थः ॥२३६।

[वि० प०]

**भ्यस्०।** अतित्वभ्यम्, अतिमभ्यम् इति ।'त्वामतिक्रान्तेभ्यः, मामतिक्रान्तेभ्यः' इति विग्रहे भ्यसोऽभ्यमादेशे कृते **"अकारे लोपम्"** (२।१।१७) इत्यकारलोपः। अकारोच्चारणमित्यादि ।अथवा **"धुटि बहुत्वे त्वे"**(२।१।१९)इत्येत्वं स्यात् ।।२३६।

[क० च०]

**भ्यस्०।** अकारोच्चारणं किमिति **वृत्तिः।** नन्वात्वं मा भूत् स्थानिनीति व्यावृत्त्या कथमेत्वस्य प्रवृत्तिः ? सत्यम् । आत्वं व्यञ्जनादौ इत्युक्तिबाधया स्वरादौ स्यादावस्य विषयो व्यावृत्तिरपि । ततश्चात्र न व्यावृत्तिरिति **"धुटि बहुत्वे त्वे"** (२।१।१९) इत्यस्य प्राप्तिः ।।२३६।

[समीक्षा]

'युष्मद् + भ्यस्, अस्मद् + भ्यस्, अतियुष्मद् + भ्यस्, अत्यस्मद् + भ्यस्' इस अवस्था में पाणिनि तथा कातन्त्रकार दोनों ही शाब्दिकाचार्य भ्यस् को 'अभ्यम्' आदेश करके 'युष्मभ्यम्, अस्मभ्यम्' आदि शब्दरूप सिद्ध करते हैं। पाणिनि का भी एतादृश सूत्र है – **"भ्यसोऽभ्यम्"** (अ० ७।१।३०)।

'अभ्यम्' आदेश में अकार के विना भी इष्टरूप – सिद्धि निर्बाध रूप में हो सकती है, फिर अकारविशिष्ट आदेश क्यों किया गया ? इसका स्पष्टीकरण वृत्तिकार आदि ने किया है। उनके अनुसार यदि केवल 'भ्यम्' आदेश माना जाए तो **"धुटि बहुत्वे त्वे"** (२।१।१९) से मकारोत्तरवर्ती अकार को एकारादेश होने लगेगा, वह प्रवृत्त न हो अतः अकारविशिष्ट 'अभ्यम्' आदेश किया गया है।

[रूपसिद्धि]

१. **युष्मभ्यम्।** युष्मद् + भ्यस् । **"एषां विभक्तावन्तलोपः"** (२।३।६) से दकार-लोप, प्रकृत सूत्र द्वारा 'भ्यस्' को 'अभ्यम्' आदेश तथा **"अकारे लोपम्"** (२।१।१७) से मकारोत्तरवर्ती अकार का लोप।

२. **अस्मभ्यम्।** अस्मद् + भ्यस् । पूर्ववत् दलोप, भ्यस् को अभ्यम् आदेश तथा दकारलोप।

३-४. **अतित्वभ्यम्।** अतियुष्मद् + भ्यस् । त्वामतिक्रान्तेभ्यः । **अतिमभ्यम्।** अत्यस्मद् + भ्यस् । मामतिक्रान्तेभ्यः । व्याख्यानानुसार 'त्वद्- मद्' आदेश, दलोप, भ्यस् को अभ्यम् तथा मकारोत्तरवर्ती अकार का लोप ।।२३६।

# २३७. सामाकम् [२।३।१६]

## [ सूत्रार्थ ]

'युष्मद्-अस्मद्' शब्दों से परवर्ती षष्ठीविभक्ति – बहुवचन 'आम्' प्रत्यय को सु-आगमसहित (साम्) 'आकम्' आदेश होता है ॥२३७।

## [दु० वृ०]

आभ्यां परः स्वागमयुक्तः आम् आकम् भवति। युष्माकम्, अस्माकम्। सामिति किम् ? प्रिययुष्मयाम्, अतित्वयाम् ॥२३७।

## [दु० टी०]

**साम्०।** **"एत्वमस्थानिनि"** (२।३।१७) इत्येत्वे प्राप्तेऽयमादेशः अन्तदर्शनादन्तलोपे सयुक्त आम् आकम् भवतीति सामित्युच्यते। आमित्युक्ते **'आगमादेशयोरागमो विधिर्बलवान्'** (का० परि० ४०) इति वचनं बाधित्वा **'आगमात् सवदिशो विधिर्बलवान्'** (का० परि० ४१) इति स्यात्, सकारस्तु केन निवार्यते ? अथ **'सकृद्बाधितो विधिर्बाधित एव'** (का० परि० ३६) इति, तथापि सकारग्रहणं कर्तव्यमित्याह-सामित्यादि। 'प्रिया यूयं येषाम्, त्वामतिक्रान्तानाम्' इति विग्रहे युष्मदस्मदोरुपसर्जनयोरसर्वनामत्वान्न सुरागम इति। किञ्च युवामावाम् इत्यत्र चाकम् स्यात्, एत्वात्वविषयादन्यत्र येषां युष्मदस्मदोरन्त्यस्वरादिलोप इति दर्शनम्, तेन षष्ठीबहुवचनं प्रतिपद्य आकमं विदधति सकारस्याभावेऽपि तदा प्रिययुष्माकम्, अतित्वाकम् इति भवितव्यम्। तदा प्रिययुवाकमिति। दीर्घोच्चारणमकारलोपः स्यात् तदा कमिति विदध्याच्चेत्, नैवम्। धुट्येत्वं स्यादिति ॥२३७।

## [वि० प०]

**सामा०।** अथ किमिदं सामिति ? सत्यम्, अन्तलोपे सति यदा **"सुरामि सर्वतः"** (२।१।२९) इति सुरागमस्तदा तद्युक्तं षष्ठीबहुवचनमेवाम् सामित्याह – **स्वागमयुक्त आमिति।** ननु सकारग्रहणं किमर्थम् 'आम्' इत्युच्यताम् **'आगमादेशयोरागमो विधिर्बलवान्'** (का० परि० ४०) इति स्वागमे कृते **"तृतीयादौ तु परादिः"** (२।१।७) इति परादित्वे सति सामेव भविष्यति। तदयुक्तम्। अनेकवर्णत्वात् सर्वस्यैवायमादेश इति। **'आगमात् सवदिशो विधिर्बलवान्'** (का० परि० ४१) इति पूर्वमाकमादेश एव स्यात्। अस्तु को दोषः, साध्यस्य सिद्धत्वादिति चेत्, तदयुक्तम्।

आकमः स्थानिवद्भावाद् यदा पुनः पश्चात् सुरागमस्तदा कथं सिध्यति । अथ **'सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव'** (का० परि० ३६) इति न्यायात् सुरागमो न भविष्यति ? सत्यम् । तथापि सकारग्रहणं केवलस्य मा भूद् इत्याह-सामित्यादि । प्रिया यूयं येषां त्वामतिक्रान्तानाम् इति विग्रहे युष्मदस्मदोरुपसर्जनत्वादिह सर्वनामत्वं नास्तीति, न च सुरागमः । किं च युवाम् आवाम् इत्यत्र **"अमौ चाम्"** (२।३।८) इति कृतेऽपि स्यात्, विशेषाभावादिति ॥२३७।

## [क० च०]

**सामा०।** सामाकम् आपद्यते इति द्वितीया कथन्न प्रतीयते ? सत्यम् । सर्वत्रादेशस्य प्रथमान्ततया दृष्टत्वादादेशिनामकारस्तेन सह साहचर्याद् वा नेयं शङ्का आगमयुक्तत्वाद् युष्मदस्मदोरेव न गौणस्येति ।अतो युष्मदस्मदोर्निदर्शनार्थम् आभ्यामिति **वृत्तौ** पाठः । अथ किमिदं सामित्यस्य किमभिधेयमित्यर्थः । अथ युष्मदस्मत्सम्बन्धिन्यामिति भविष्यति इत्याह – **किञ्चेति। "अमौ चाम्"** (२।३।८) इति कृते स्यादिति **पञ्जी।** नन्वत्र लाक्षणिकत्वादेव न भविष्यति ? सत्यम् । युष्मानाचक्षाणानामित्यर्थे **'यूषां युष्माम्'** इति ।अत्र आकम् न स्यादिति । एतदपि विषयीकरोति ॥२३७।

## [समीक्षा]

'युष्मद् + आम्, अस्मद् + आम्' इस अवस्था में सु या सुट् आगम करके 'साम्' के स्थान में 'आकम्' आदेश का विधान कातन्त्रकार तथा पाणिनि दोनों ही आचार्य करते हैं, जिसके फलस्वरूप 'युष्माकम्, अस्माकम्' शब्दरूप सिद्ध होते हैं । पाणिनि का भी एतादृश ही सूत्र है – **"सामाकम्"** (अ० ७।१।३३) । अतः उभयत्र समानता ही है ।

## [रूपसिद्धि]

१. **युष्माकम्।** युष्मद् + आम् । **'युष्मद्'** शब्द की सर्वनामसंज्ञा, **"सुरामि सर्वतः"** (२।१।२९) से **'सु'** का आगम, **"तृतीयादौ तु परादिः"** (२।१।७) के नियमानुसार आम् के आकार से पूर्व में इसकी योजना तथा प्रकृत सूत्र से साम् को आकम् आदेश ।

२. **अस्माकम्।** अस्मद् + आम् । पूर्ववत् सर्वनामसंज्ञा, सु का आगम तथा प्रकृत सूत्र से साम् को आकम् आदेश ॥२३७।

## २३८. एत्वमस्थानिनि [२।३।१७]

### [ सूत्रार्थ ]

आदेशभिन्न स्यादि प्रत्यय के परे रहते **'युष्मद्-अस्मद्'** शब्दों में अन्त्य वर्ण को एकारादेश होता है ।।२३८।

### [ दु० वृ० ]

स्थानं प्रसङ्गो वा । अप्रसङ्गिनि अनादेशिनि स्यादावेषाम् अन्तस्यैत्वं भवति । त्वया, मया । युवयोः, आवयोः । त्वयि, मयि, अतित्वयि, अतिमयि । अस्थानिनीति किम् ? युष्मान्, अस्मान् । अतित्वान्, अतिमान् ।।२३८।

### [ दु० टी० ]

**एत्वम्०** । ननु भूत्वा यो विनश्यति स स्थानी । अभूत्वा य उत्पद्यते, सोऽस्थानी । शब्दा नित्याश्चेद् विनाशेऽपि उत्पादनेऽपि नित्यत्वहानिप्रसङ्गः ? नैष दोषः । **स्थितिः स्थानम्,** तच्च त्रिधा – निवृत्तिः, अपकर्षः, प्रसङ्गश्च । तद् यथा – श्लेष्मणः स्थाने त्रिकटुकमौषधं प्रयुञ्जीत । श्लेष्मणो निवृत्तिरिति गम्यते । गवां स्थाने अश्वा बध्यन्ताम् । गवामपकर्ष इति । दर्भाणां स्थाने शरैरास्तरितव्यम् । दर्भाणां प्रसङ्ग इति । निवृत्त्यपकर्षयोर्द्रव्यधर्मवाचित्वात् प्रसङ्गे स्थानमिदम् । अस्तेरर्थकृते प्रसङ्गे भूर्भवतीति ।

अथवा तिष्ठत्यस्मिन् शब्द इति स्थानमर्थ उच्यते । अस्तेरर्थे भूरुच्चार्यते इत्यर्थः । एकदेशेऽप्यर्थोऽस्ति, तेन विना तस्याप्रतीतेरित्याह – स्थानमित्यादि । यद्येवम्, अत् पञ्चम्यादिषु षष्ठी भवितुमर्हतीति ? नैवम् । यस्य प्रसङ्गे (प्रयोगे) यो भवति स एवेत्युपचारान्न विरुध्यते । प्रसङ्गो वेति वाशब्देन निवृत्तिवचनमपि स्थानं प्रमाणीकृतम्, वर्णादिसङ्केतप्रक्रियामवलोक्य **बालादिसुखबोधहेतुरिति** । स्थानं विद्यतेऽस्येति भेदेऽप्यवस्थानिवृत्तिस्तु न विरुध्यते तथा प्रतिभाषणात् । उक्तं च,

**प्रयोगकाले शब्दानां लोपादेशागमादयः ।**
**न सन्ति तत्स्वभावस्य सिद्धस्यैव प्रसिद्धितः ।।**
**व्युत्पादने पदानां तु तेषु लक्षणसाक्षिणः ।**
**व्यवहाराः प्रवर्तेरन् विकारेष्वप्यदः समम् ।।**

स्थानिवदादेशो ह्यवर्णविधाविति यथा विकारे न्यायतया भासते तथा प्रसङ्गेऽपि। यथा 'उपाध्यायस्य स्थाने शिष्यः स्थापनीयः' इति शिष्योऽप्युपाध्याय इति गम्यते तत्कार्यकरणात्। तथा च **लोके 'गुरुवद् गुरुपुत्रेऽप्युपचारः'** इति। लिङ्गधातुविभक्तीनामादेशा हि तद्वद् भवन्ति। वर्णस्य स्थाने वर्णाश्रितविधावुभयथा पक्षे सत्यपि तथा ज्ञाने न दोषः। नहि राजामात्यो राजवदुपचर्यमाणो राजव्यक्तिं लभते। तेन 'क इष्टः, क उप्तः' इत्यत्र संप्रसारणे कृते व्यक्त्याश्रिता घोषवत्संज्ञा कथं प्रवर्तते, येनोत्वमाशङ्क्यते। द्यौरित्यत्र च व्यक्त्याश्रितव्यञ्जनसंज्ञा, कथं व्यञ्जनात् सिलोपः, यत्वमपि कथन्न भवतीति। किं च **"घोषवन्तोऽन्ये"** (१।१।१२) इति ज्ञापकाद् यदि वर्णोऽपि स्थानी भवति विसर्जनीयस्योत्वे कृते **"उवर्णे ओ"** (१।२।३) इति 'ओ' न स्यात्। तेषामित्यत्र च घुट्येत्वं यत्वं च न स्याद्, एवमन्येऽपि। **"आत्वं व्यञ्जनादौ"** (२।३।१८) इति वचनात् स्वरादावयं विधिः।

ननु कथं स्यादाविति लभ्यते, विभक्त्यधिकारादिति चेत्, तदा तु स्थानिन्यामिति भवितव्यम्। नैवम्। तत्र सामानाधिकरण्यं विभक्तिविषये योऽस्थानीत्यर्थः, स्यादिप्रस्तावाद् वेति। ननु युष्मयतेरस्मयतेश्च क्विपि कृतेऽन्त्यस्वरादिलोपे 'युष्मा, अस्मा' इत्यत्राप्येत्वं कथन्न भवति ? सत्यम्। इहापि व्यवस्थितविभाषा स्मर्तव्येति। तथा त्वदयतेर्मदयतेश्च त्वेन, मेन इति। **अन्यस्त्वाह**–एत्वमिति नायं भावप्रत्ययः, किं तु 'ए+तु+अम्' प्राप्नोति। अकारस्य स्थानम् उपचारादकारशब्दवाच्यम्। तन्मते न क्विपि सति 'त्वया, मया' स्यात्। **"एत्वमस्थानिनि"** (२।३।१७) इति सर्वस्मिन् प्रतिपत्तव्यम् ॥२३८।

**[वि० प०]**

**एत्वम्०**। स्थानशब्दोऽयं निवृत्तावपकर्षे प्रसङ्गे च वर्तते। तद् यथा– 'श्लेष्मणः स्थाने त्रिकटुकमौषधं प्रयुञ्जीत'। श्लेष्मणो निवृत्तिरिति गम्यते। 'गवां स्थाने अश्वा वध्यन्ताम्'। गवाम् अपकर्ष इति। 'दर्भाणां स्थाने शरैरास्तरितव्यम्'। दर्भाणां प्रसङ्ग इति। तत् किमर्थस्यात्र स्थानशब्दस्य ग्रहणमित्याह– स्थानमिति। यदा शसादीनां प्रसङ्गे प्रयोगे आनादय आदेशा उच्चार्यन्ते तदा एत्वं न भवतीत्यर्थः। वाशब्देन निवृत्तिमपि दर्शयति। यद्यपि शब्दानां नित्यत्वं तथापि प्रक्रियाद्वारेण निवृत्तेः संभवात् शसादिकं निवर्त्य यदा आनादय आदेशा भवन्ति

इत्यर्थः। अपकर्षस्तु न घटते। स हि द्रव्यस्य देशाद् देशान्तरसंचारलक्षणः कथं शसादीनां घटते। स्थानमस्यास्तीति **स्थानी,** पश्चान्नञ्समासः। अस्थानिनीत्यस्य पर्यायेणार्थमाह – अप्रसङ्गिनि इति। पुनः स्पष्टार्थं तदेव विवृणोति। अनादेशीति। न विद्यते आदेशो यस्येति विग्रहः। 'अतित्वयि, अतिमयि' इति। 'त्वामतिक्रान्ते, मामतिक्रान्ते' इति विग्रहे तत्रान्तग्रहणबलादन्तस्य लोपे सत्यकारस्यैत्वम्॥२३८।

**[ क० च० ]**

**एत्वम्०।** स्थानशब्द इत्यादि। अत्र निवृत्त्यादिरर्थ एव शक्तिरिति **केचिदाहुः। अन्ये** तु स्थानशब्दो (विषये) निवृत्तावेव वर्तते। निवर्तनादयस्तु तात्पर्यगम्याः। ते विषयशक्तिकरणेनैव सिद्धाः, **प्रत्येकशक्तिकल्पने गौरवापत्तेः।** आदिशब्दस्य प्रधानशक्तिकल्पने अवयवाद्यर्थवत्। यद्यपीत्यादि। ननु नित्यं पक्षमाश्रित्य कथं पूर्वपक्षः। अनित्यपक्षेऽपि समानत्वात्। न ह्यनित्यपक्षेऽपि युष्मानित्यादौ शसं निवर्त्य अनूच्चार्यते? सत्यम्। नित्यत्वमिह प्रवाहनित्यत्वमुच्यते न प्रसिद्धं नित्यानित्यमादाय विचार्यते॥२३८।

**[ समीक्षा ]**

'युष्मद् + टा, अस्मद् + टा, युष्मद् + ओस्, अस्मद् + ओस्, युष्मद् + ङि, अस्मद् + ङि, अतियुष्मद् + ङि, अत्यस्मद् + ङि' इस स्थिति में कातन्त्रकार अकार को एकार एवं एकार को अयादेश करके 'त्वया, मया, युवयोः, आवयोः, त्वयि, मयि, अतित्वयि, अतिमयि' शब्दरूप सिद्ध करते हैं। पाणिनि ने उक्त रूपों के साधनार्थ दकार को यकारादेश किया है– **"योऽचि"** (अ० ७।२।८९)। इस प्रकार कार्यसंख्या की दृष्टि से पाणिनीय प्रक्रिया में लाघव सन्निहित है।

**[ रूपसिद्धि ]**

१. **त्वया।** युष्मद् + टा। दलोप, त्वद् आदेश, पुनः दलोप, प्रकृत सूत्र से अ को ए तथा **"ए अय्"** (१।२।१२) से अयादेश।

२. **मया।** अस्मद् + टा। **"एषां विभक्तावन्तलोपः"** (२।३।६) से दलोप, प्रकृत सूत्र को ज्ञापक मानकर (मद्) आदेश, **'यावत् सम्भवस्तावद् विधिः'** (का० परि० ५४) के नियमानुसार पुनः दलोप, प्रकृत सूत्र से अ को ए तथा ए को अयादेश।

३-४. **युवयोः।** युष्मद् + ओस्। **आवयोः।** अस्मद् + ओस्। दकारलोप, 'युव-आव' आदेश, प्रकृत सूत्र से अ को ए तथा ए के स्थान में अयादेश।

५-६. **त्वयि।** युष्मद् + ङि । **मयि।** अस्मद् + ङि । 'त्वद्- मद्' आदेश, दलोप, एकार तथा उसको अयादेश ।

७-८. **अतित्वयि।** अतियुष्मद् + ङि । त्वामतिक्रान्ते । **अतिमयि।** अत्यस्मद् + ङि । मामतिक्रान्ते । 'त्वद्- मद्' आदेश, दलोप, एकार तथा उसके स्थान में अयादेश ।

**[ विशेष ]**

१. 'स्थानम्' – पदार्थ 'अर्थ' स्वीकार किया गया है – तिष्ठत्यस्मिन् शब्द इति स्थानम् ।

२. 'स्थान' शब्द का ३ अर्थों में प्रयोग – निवृत्ति, अपकर्ष एवं प्रसङ्ग । यहाँ 'स्थितिः स्थानम्' स्वीकार्य' है ।।२३८।

## २३९. आत्वं व्यञ्जनादौ [ २।३।१८]

**[ सूत्रार्थ ]**

ऐसी व्यञ्जनादि स्यादि विभक्ति, जिसका कोई आदेश न हुआ हो, उसके परे रहते 'युष्मद्- अस्मद्' शब्दों के अन्तिम वर्ण को आकारादेश होता है ।।२३९।

**[ दु० वृ० ]**

एषामन्तस्यात्वं भवति अस्थानिनि व्यञ्जनादौ स्यादौ । युवाभ्याम्, आवाभ्याम् । अतियुवाभिः, अत्यावाभिः । अतित्वासु, अतिमासु । आदिग्रहणं साक्षात् प्रतिपत्त्यर्थम् । तेन 'युष्मत्पुत्रः, अधित्वत्, अधिमत् । लुक् ।।२३९।

**[ दु० टी० ]**

**आत्वम्०।** अस्थानिनीत्यत्राधिकारो मन्दधियां सुखप्रतिपत्त्यर्थः । नहि व्यञ्जनादिः स्थानी संभवति । ननु सभोरिति कृते सकारभकारयोरिति गम्यते, न च ताभ्यामन्तरेणान्यद् व्यञ्जनमस्ति ? सत्यम् । व्यञ्जनग्रहणं सुखप्रतिपत्त्यर्थम् । तर्ह्यादिग्रहणं किमर्थम्, विभक्तिविषये व्यञ्जने सतीति सिद्धम् । **'वर्णग्रहणे तदादौ कार्यसम्प्रत्ययः'** (कलाप० २२२-७२) **इत्येके,** सत्यम् । आदिग्रहणे लब्धे यदादिग्रहणं तद् बहुव्रीह्यर्थम् । व्यञ्जनमेवादिर्यस्येति आदिमध्यान्तव्यवहारोऽपि स्वतो भवति । न तु लुप्तस्येत्याह – आदिग्रहणमित्यादि । युष्माकं युवयोर्वा पुत्रः इति विग्रहे **"व्यञ्जनान्तस्य यत् सुभोः"** (२।५।४) इत्यात्वं बाधते, लुग्लोपयोः पर्यायत्वात् । यस्तु युष्मयतेरस्मयतेश्च विभक्त्योरन्तलोपे 'युष्माभ्याम्, युष्भ्याम्, अस्माभ्याम्, अस्भ्याम्' इत्यत्र व्यवस्थितवाधिकारमनाश्रयन्, आ तु अम् अकारस्थानम् प्राप्नोतीति प्रतिपद्यते तन्मतेनादिग्रहणं **स्पष्टार्थम्** ।।२३९।

[वि० प०]

आत्वम् अस्थानिनीति **सुखार्थ**मिदमधिकृतम् अव्यभिचारात्। नहि व्यञ्जनादिः स्यादिः स्थानी संभवतीति। अथ व्यञ्जनग्रहणं किमर्थम्, सुभोरिति क्रियतां न हि स्यादीनां सकारभकाराभ्याम् अन्यद् व्यञ्जनमस्तीति, सत्यम्। सुखार्थमेव व्यञ्जनग्रहणम्। तर्हि आदिग्रहणं किमर्थम्, सत्यम्। इदमपि व्यञ्जनमेवादिर्यस्येति बहुव्रीहावादिर्मध्यान्तव्यवहारार्थम्। स पुनः स्वत एव संभवतीति न लुप्तस्येत्याह – आदिग्रहणमित्यादि। तेन युष्माकं युवयोर्वा पुत्रः इति विग्रहे **"व्यञ्जनान्तस्य यत्सुभोः"** (२।५।४) इत्यनेन प्राप्तमात्वं बाध्यते। तथा **"विरामव्यञ्जनादावुक्तम्"** (२।३।६४) इत्यादिना प्राप्तस्य बाधा इत्याह – अधित्वदिति। 'त्वय्यधि, मय्यधि' इति। कारकार्थेऽव्ययीभावः। लुगिति। परत्वात् **"अन्यस्माल्लुक्"** (२।४।३) इत्यनेन परत्वात् लुगित्यर्थः। कथन्तर्हि प्राप्तिः आत्वस्य तस्य स्यमोर्लोपे विधीयमानत्वाद् इति चेत्, नैवम्। लुग्लोपयोः पर्यायत्वात् प्राप्नोति आत्वमनेन प्रतिषिध्यते ॥२३९।

[क० च०]

**आत्वम्०।** व्यञ्जनग्रहणं **सुखार्थमिति।** दुःखमेतत्। **केनचिद्** 'भ्यस् भ्यम्' इति भकारादिरयमादेशः क्रियते। अस्थानिनीत्यत्रापि। ननु वृत्त्या अस्मिन्नपि आत्वं स्यात्। अत्र च वक्तव्यम्। **अस्मन्मते** आकारादिरयमादेशः। अन्यथा धुट्येत्वं स्यात्। इदमेव दुःखम्। अतो व्यञ्जनग्रहणं **सुखार्थमिति।** ननु सुखार्थमिति कथमुच्यते, यावता व्यञ्जनग्रहणात् सामान्यव्यञ्जने कथन्न स्यात्, यथा **"दिव उद् व्यञ्जने"** (२।२।२५) इत्यत्र ? सत्यम्। आदिग्रहणं **साक्षात् प्रतिपत्त्यर्थ**मवश्यं कर्तव्यम्, तदा तेन सह बहुव्रीहित्वाद् अन्यपदार्थे गृह्यमाणे सति प्रकृतत्वाद् **"एषां विभक्तौ"** (२।३।६) इत्यतोऽन्यपदार्थत्वेन विभक्तिरेव गृह्यते इति **हेमकरः।** ननु तथापि व्यञ्जनग्रहणं कथं सुखार्थप्रयोजनस्यैव वक्तुं शक्यत्वात्। तथाहि व्यञ्जनग्रहणं व्यञ्जनसामान्यत्वेन विभक्तिपदयोर्व्यञ्जनपरिग्रहार्थं भवति। आदिग्रहणं च प्रत्ययोत्तर-व्यञ्जनानां साक्षात् प्रतिपत्त्यर्थम्। तेन 'युष्मदागमनम्' इत्यादौ **"व्यञ्जनान्तस्य"** (२।५।४) इत्यादिना अतिदेशबलात् प्राप्तमप्यात्वं व्यञ्जनव्यावृत्तिबलान्न भविष्यति।

अथ व्यञ्जने भवति, स्वरे न भवतीत्यर्थे स्वरे व्यावृत्त्या व्यञ्जनग्रहणस्य सार्थकत्वात् 'अधित्वत्' इत्यादौ **"विरामव्यञ्जने०"** (२।३।४४) इत्यादिना निरपेक्षे

कथन्न स्यात् ? नैवम् । इत्यादिग्रहणं साक्षाद् व्यञ्जनप्रतिपत्त्यर्थमित्युक्तमेव । तस्मात् 'त्वत्पुत्रः' इत्यादौ व्यञ्जने आत्वं स्यात्, कथं सुखार्थमिति ? सत्यम् । आम्नायविरुद्धस्य ज्ञापयितुमयोग्यत्वादिति **हेमकरः।** ननु युष्मभ्यम् "**हशषछान्ते०**" (२।३।४६) इत्यादिना डकारः कथन्न स्यात्, सत्यम् । "**न सयोगान्त०**" (२।३।५८) इत्यादिना मकारस्यालुप्तवद्भावात् ......... 'न सन्ति आदौ' इत्यनेन **श्रीपतिना** लुप्तवद्भावनिषेधस्य उक्तत्वाड्डत्वापत्तिरेव । अत्र **केचिद्** डत्वमेव प्रमाणम् इत्याहुः । सुवेश्मयतेः क्विपि कृते सुवेट्, सुवेड्भ्यामिति । तन्न । विरामे व्यञ्जनादौ च लुप्तस्य नकारस्यालुप्तवद्भावस्तत्साहचर्याद् यत्र विरामे व्यञ्जनादौ च संयोगान्तलोपस्तत्रैवालुप्तवद्भावः । अत्र पुनर्विभक्तिमाश्रित्य "**एषां विभक्तौ**" (२।३।६) इत्यनेन कृतस्य संयोगान्तलोपस्यालुप्तवद्भावस्य कुतः प्रसङ्ग इति, येन "**न सन् डादौ**" (कात० परि०-नाम० ५५) इत्यनेनालुप्तवद्भावप्रसङ्गः स्यात् । अतो युष्भ्याम्, युवभ्याम् इत्यत्र न **श्रीपति**सूत्रस्य विषयः, यत्तु 'सुवेट्, सुवेड्भ्याम्' इत्यादौ डत्वमुक्तम्, तत्तु तद्विधायकविरामव्यञ्जनादिप्रकरणीयसंयोगान्तलोपत्वादेव । तस्माल्लोपे कृते डत्वे प्राप्ते मकारलोपस्यासिद्धवद्भावान्न डत्वप्राप्तिरिति **सिद्धान्तो** युक्तः ।

अथ 'अस्भ्याम्' इत्यत्र "**संयोगादेर्धुटः**" (२।३।५५) इति सलोपः कथन्न स्यात्, 'स्कोऽहृतदड्श्च्युतामादेः' इत्यत्र सकारस्य विहितत्वात् ? सत्यम्, अन्तस्थानुनासिकपरस्य धुटो लोपो नाभिधीयते । तथा च **भाष्यम्**– अन्तस्थानुनासिकपरस्याधुटः संयोगादेर्न लोप इति । अथ 'अस्भ्याम्' इत्यादौ "**धुटां तृतीयः**" (२।३।६०) इत्यनेन सकारस्य दकारः कथन्न स्यादिति चेत्, कस्कादित्वात् सस्य सः कर्तव्यस्तृतीयबाधनार्थ इति ।

**वस्तुतस्तु** मकारलोपस्यासिद्धवद्भावादेव न तृतीय इति । 'त्वाभ्याम्' इत्यादौ "**अकारो दीर्घं घोषवति**" (२।१।१४) इति दीर्घः स्यादेव । 'त्वेभ्यः, त्वेषु' इत्यत्र "**धुटि बहुत्वे**" (२।१।१९) इति स्यात्, आत्ववर्जनात् । तदुक्तम्–

**इनन्तयोस्तु तद् वाच्यं यदुक्तं युष्मदस्मदोः।**

**वर्जयित्वैत्वमात्वं च मान्तलोपो विभाषया॥**

एत्ववर्जनविषयस्त्वेन येन इत्यादाविति ॥२३९।

## [ समीक्षा ]

'युष्मद् + भ्याम्, अस्मद् + भ्याम्, अतियुष्मद् + भिस्, अत्यस्मद् + भिस्' इस अवस्था में कातन्त्रकार तथा पाणिनि दोनों ही दोनों शब्दों के अन्त को आकारादेश करके 'युवाभ्याम्, आवाभ्याम्, अतियुवाभिः, अत्यावाभिः' आदि शब्दरूप सिद्ध करते हैं। पाणिनि का सूत्र है– **"युष्मदस्मदोरनादेशे"** (अ० ७।२।८६)।

## [ रूपसिद्धि ]

१. **युवाभ्याम्।** युष्मद् + भ्याम्। 'युष्मद्' के दकार का **"एषां विभक्तावन्तलोपः"** (२।३।६) से लोप, **"युवावौ द्विवाचिषु"** (२।३।७) से 'युव' आदेश तथा प्रकृत सूत्र से वकारोत्तरवर्ती अकार को आकार।

२. **आवाभ्याम्।** अस्मद् + भ्याम्। पूर्ववत् दलोप, 'आव' आदेश एवं प्रकृत सूत्र से अकार को आकार।

३-४. **अतियुवाभिः।** अतियुष्मद् + भिस्। युवामतिक्रान्तैः। **अत्यावाभिः।** अत्यस्मद् + भिस्। आवामतिक्रान्तैः। पूर्ववत् दलोप, 'युव-आव' आदेश तथा अकार को आकार।

५-६ **अतित्वासु।** अतियुष्मद् + सुप्। त्वामतिक्रान्तेषु। **अतिमासु।** अत्यस्मद् + सुप्। मामतिक्रान्तेषु। त्वद्- मद् आदेश, दलोप तथा आकारादेश ॥२३९।

# २४०. रैः [२।३।१९]

## [ सूत्रार्थ ]

आदि में व्यञ्जन वर्ण वाली 'सि' आदि विभक्तियों के परे रहते 'रै' के अन्तिम वर्ण के स्थान में 'आ' आदेश होता है ॥२४०।

## [ दु० वृ० ]

'रै' शब्द आत्वं प्राप्नोति व्यञ्जनादौ स्यादौ। राः, राभ्याम्, अतिराभ्यां कुलाभ्याम्। साक्षादिति किम् ? अतिरि कुलम् ॥२४०।

## [ दु० टी० ]

**रै०। निर्देशसुखप्रतिपत्त्यर्थ**मात्वं न कृतम्। रैशब्द आत्वं विकारं प्राप्नोतीति। यथा देवदत्तो लब्धकर्णत्वं प्राप्नोति इति वर्णान्तस्य विधिर्भवति। **केचिद्** ङस

आदिलोपं कुर्वते। अतिराभ्याम् इति नपुंसके ह्रस्वेऽपि **'एकदेशविकृतमनन्यवद् भवति'** (का० परि० १) इति न्यायात् ॥२४०।

## [वि० प०]

रैः। ननु रैशब्द आत्वं प्राप्नोतीत्युक्ते समुदायेनैवात्वं प्राप्तुमर्हति, न त्वेकदेशेन। न ह्येकदेशो रैशब्दः किन्तर्हि समुदाय इति ? सत्यम्। यथा देवदत्तो लब्धकर्णत्वं प्राप्नोतीत्युक्ते एकदेशेनैव प्राप्नोति न समुदायेन, तथात्रापीत्यदोषः। अतिराभ्यामिति। रायमतिक्रान्ताभ्यां कुलाभ्यामिति विग्रहे नपुंसकलक्षणह्रस्वत्वेऽपि **'एकदेशविकृतस्यानन्यवद्भावाद् भवति'** (का० परि० १) इति। अत्राप्यादिग्रहणं वर्तते इत्याह-साक्षादित्यादि। रायमतिक्रान्तं कुलमिति विग्रहे नपुंसकलक्षणः सिलोपः, इहापि **"विरामव्यञ्जनादावुक्तम्"** (२।३।६४) इत्यादिना प्राप्तमात्वं बाध्यते ॥२४०।

## [क० च०]

रैः। समुदायेनैवात्वं प्राप्तुमर्हतीति। ननु रैशब्दः समुदायाद् भिन्नोऽभिन्नो वेति। भिन्नश्चेत् तर्हि एकदेशो रैशब्दः किन्तु समुदा[य]स्यैव विरुद्धता अतो भिन्नं वक्तुं न पार्यते। स एव हि समुदाय इति आत्वं समुदायेनैव प्राप्नोति, न ह्येकः कर्ता करणं च संभवतीति ? सत्यम्। समुदायशब्दो धर्मिपरो धर्मपरश्च स्यात् तस्मात् समुदायो धर्मी, समुदायेन साकल्येन सर्वात्मना आत्वं प्राप्तुमर्हतीति, यथेत्यादि। ननु कथमत्र दृष्टान्तो घटते। लम्बौ कर्णौ यस्येति बहुव्रीहिणा समुदायवाच्यत्वेन लम्बसमुदाय एव धर्मः। अतः समुदायेन धर्मेणैव लम्बकर्णत्वं प्राप्तुमर्हतीति ? सत्यम्। कृत्तद्धितसमासेभ्यस्त्वतल्भ्यामिति सम्बन्धाभिधानमिति न्यायात्। लम्बकर्णशब्देन बहुव्रीहिणापि लम्बकर्णत्वस्य संबन्धः पुरुषः प्रतीयते त्वप्रत्ययात्। अतस्तत्सम्बन्धेनैकदेशेनैव प्राप्नोतीत्यदोषः। यद् वा लम्बकर्णत्वशब्देन लम्बकर्णपुरुषप्रवृत्तिनिमित्तत्वम् उच्यते, तच्च लम्बकर्णत्वमेव। यथा दण्डिनो दण्ड एव प्रवृत्तिनिमित्तत्वम् ॥२४०।

## [समीक्षा]

'रै+सि, रै+भ्याम्, अतिरि+भ्याम्' इस अवस्था में कातन्त्रकार तथा पाणिनि दोनों ने ही आकारादेश का विधान करके 'रैः, राभ्याम्, अतिराभ्याम्' शब्दरूप सिद्ध किए हैं। पाणिनि का सूत्र है – **"रायो हलि"** (अ० ७।२।८५)। अतः उभयत्र प्रक्रियासाम्य है।

[ रूपसिद्धि ]

१. राः । रै + सि । प्रकृत सूत्र द्वारा ऐकार को आकार तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से स् को विसर्गादेश ।

२. **राभ्याम्।** रै + भ्याम् । प्रकृत सूत्र द्वारा ऐकार को आकारादेश ।

३. **अतिराभ्याम्।** अतिरै + भ्याम् । रायमतिक्रान्ताभ्याम् **"स्वरो ह्रस्वो नपुंसके"** (२।४।५२) से नपुंसकलिङ्ग में ऐ को ह्रस्व इ तथा प्रकृत सूत्र से इ को आ आदेश ।।२४०।

## २४१. अष्टनः सर्वासु [ २।३।२० ]

[ सूत्रार्थ ]

सभी विभक्तियों के परे रहते 'अष्टन्' शब्द के अन्तिम वर्ण को आकारादेश होता है ।।२४१।

[ दु० वृ० ]

अष्टनोऽन्तस्यात्वं भवति सर्वासु विभक्तिषु । अष्टाभिः, अष्टाभ्यः, अष्टासु, प्रियाष्टाः, प्रियाष्टौ ।।२४१।

[ दु० टी० ]

अष्टनः । अष्टन इति । अनुकार्यानुकरणयोरिह भेदात् संख्यार्थो नास्तीत्येकवचनम् । अनोऽकारलोपो न क्रियते **मन्दधियां सुखार्थम्।** ननु **'स्थानेऽन्तरतमः'** (का० परि० १६) इति न्यायाद् अनुनासिक आकारो भवितुमर्हतीति व्यक्तिरपि तिरोहिता । साक्षाद् आत्वमिति जातिनिर्देशात्, नैवम् । प्रायश्छन्दस्येव सानुनासिकस्य वर्णस्य दृष्टत्वाद् भवाँल्लुनातीति दृश्यते । भाषायां यो यत्र दृश्यते स एव तत्र प्रयुज्यते । यथा 'देवदत्तोऽलं क्रियताम्' इति विषयविभागनिर्देशेऽपि योग्यतया व्यवस्था स्यात्, न विपर्ययो न सङ्करः, संदेहो वा सानुनासिकम् इह विदध्यात् । अथवा निरनुनासिकतया श्रुतोऽयमाकारोऽस्यैव स्वरूपम् अभिधत्ते । भावप्रत्ययश्च वचनादिति । सर्वग्रहणं व्यञ्जनाधिकारनिवृत्त्यर्थम् । प्रिया अष्टौ यस्य ययोर्वेति विग्रहः । एवं **प्रियाष्ट्ना, प्रियाष्टा पुरुषेण**त्यादि यथालक्षणं योज्यम् ।

स्त्रीलिङ्गनिर्देशाद् विभक्तिर्विशिष्यते अविभक्तिषु न भवति – **अष्टता, अष्टत्वम्।** 'अष्टपुत्रा नारी' इति प्रत्ययलोपलक्षणं **"व्यञ्जनान्तस्य यत्सुभोः"**

(२।५।४) इत्यपि न भवति, व्यावृत्तिबलादित्यर्थः। अष्टनः कपाले हविषि वाच्ये क्वचिद् ह्रस्वस्य दीर्घता स्यादेव। अष्टसु कपालेषु संस्कृतं हविः **अष्टाकपालम्** इति तद्धिताभिधेये समासः, **"संस्कृतं भक्ष्यम्"** इत्यण् नास्ति,अभिहितत्वात्। तथा गवि युक्ते वाक्ये अष्टानां गवां समाहारः **'अष्टगवम्'**। गोरतद्धिताभिधेये राजादित्वादत् तद्योगाद् **अष्टागवम्।** अर्शआदित्वादस्त्यर्थेऽत् श्रुतत्वात् तैरेव गोभिर्युक्तमित्यर्थः। तथा संज्ञायां च – अष्टौ वक्राण्यस्य **अष्टावक्रो** नाम ऋषिः। यथाकथंचिद् व्युत्पत्तिः। तथा शतात् प्राक् संख्यायामबहुव्रीहौ – अष्टाभिरधिका दश, अष्टौ च दश चेति वा **अष्टादश।** अष्टाभिरधिका विंशतिः, अष्टौ च विंशतिश्चेति वा अष्टाविंशतिः। समाहारपक्षेऽपि स्वभावादनपुंसकता। शतात् प्रागिति किम् ? अष्टशतम्। अबहुव्रीहाविति किम् ? अष्टौ दश वा परिमाणमेषाम् अष्टादशाः, राजादित्वादत्। द्वेरात्वं शतात् प्रागनशीतिसंख्यायामबहुव्रीहाविति वक्तव्यम्। **द्वादश, द्वाविंशतिः,** पूर्ववत् समासः। अनशीति संख्यायामिति किम् ? द्व्यशीतिः। अबहुव्रीहाविति किम् ? द्वौ वा त्रयो वा परिमाणमेषां (दशानाम्) द्विदशाः, त्रिदशाः। राजादित्वादत्। तन्न वक्तव्यम्। यस्तु **लोकोपचारात्** सिद्धस्तत्र किं यत्नेनेति।

तथा 'त्रेस्त्रयस्'। त्रयोविंशतिः। पूर्ववदिहापि व्यावृत्तिरिति। एषां चत्वारिंशदादौ वा दृश्यते – अष्टचत्वारिंशत्, अष्टाचत्वारिंशत्। द्विचत्वारिंशत्, द्वाचत्वारिंशत्। त्रिचत्वारिंशत्, त्रयश्चत्वारिंशत्। प्राप्ते विभाषेयं प्रत्यायते ॥२४१।

**[वि० प०]**

**अष्टनः।** इहानुकार्यानुकरणयोर्भेदस्याविवक्षितत्वात् संख्यार्थत्वान्नास्तीत्येकवचनम्। अनोऽकारोऽपि न लुप्यते, सूत्रत्वात्। **प्रियाष्ट, प्रियाष्टाविति।** प्रिया अष्टौ यस्य ययोर्वेति विग्रहः ॥२४१।

**[क० च०]**

**अष्टनः।** अथ किमर्थं सर्वास्विति चेद्, अनन्तरत्वाद् व्यञ्जनानुवृत्तिः स्यात्, नैवम्। **"औ तस्माज्जस्शसोः"** (२।३।२१) इत्यत्र तस्माद्-ग्रहणेन जस्शसोरपि कृताकारस्याष्टनः परामर्शित्वात् सङ्ख्यायाः ष्णान्तायाः इत्यत्रान्तग्रहणाच्च। तथाहि **'येन विधिस्तदन्तस्य'** (का० परि० ३) इति सिद्धे यदन्तग्रहणं तद् भूतपूर्वनान्तार्थमित्युक्तम्। तेनापि कृतस्याकारस्य भूतपूर्वनान्तत्वान्नागमः सिध्यतीति किं सर्वग्रहणेन ? सत्यम्। विभक्तिरित्यनुवर्तने लब्धे यत् सर्वग्रहणं तद् व्याप्त्यर्थम्। तेन गौणेऽपि स्यात्

**प्रियाष्टाः, प्रियाष्टाविति।** अथाष्टनो बहुवचनान्तत्वात् 'अष्टाभिः' इत्यादावेव स्यादिति **केचित्,** तन्न। **'शब्दाश्रये गौणमुख्यव्यवहारः'** इति न्यायाद् गौणस्यापि परिगृहीतत्वात्। तस्माद् विभक्तिषु भवति, अविभक्तिषु न भवतीति यदुक्तं **टीकायां** तदेव फलं किमन्यद्विचारेण। तेन **'अष्टपुत्रा नारी'** इत्यत्र न भवति ॥२४१।

**[ समीक्षा ]**

'अष्टन्+ भिस्, अष्टन् + भ्यस्, अष्टन् + सुप्, प्रियाष्टन् + सि, प्रियाष्टन् + औ' इस अवस्था में कातन्त्रकार तथा पाणिनि दोनों ही नकार को आकारादेश करके 'अष्टाभिः, अष्टाभ्यः, अष्टासु, प्रियाष्टाः, प्रियाष्टौ' शब्दरूप सिद्ध करते हैं। पाणिनि का सूत्र हैं– **"अष्टन आ विभक्तौ"** (अ० ७।२।८४)। अतः उभयत्र प्रक्रियासाम्य है।

**[ रूपसिद्धि ]**

१. **अष्टाभिः।** अष्टन् + भिस्। प्रकृत सूत्र द्वारा नकार को आकार, **समानः सवर्णे दीर्घीभवति परश्च लोपम्"** (१।२।१) से टकारोत्तरवर्ती अकार को दीर्घ आकार तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से स् को विसर्ग आदेश।

२. **अष्टाभ्यः।** अष्टन् + भ्यस्। प्रकृत सूत्र से न् को दीर्घ आ, समानलक्षण दीर्घ, आकारलोप तथा स् को विसर्ग।

३. **अष्टासु।** अष्टन् + सुप्। पूर्ववत् न् को आत्व, समानलक्षण दीर्घ तथा आकारलोप।

४. **प्रियाष्टाः।** प्रियाष्टन् + सि। प्रिया अष्टौ यस्य सः। परत्व तथा नित्यत्व के कारण पूर्व ही आकारादेश, समानलक्षणदीर्घ, आकारलोप तथा स् को विसर्ग।

५. **प्रियाष्टौ।** प्रियाष्टन् + औ। प्रिया अष्टौ ययोस्तौ। न् को आत्व तथा वृद्ध्यादेश ॥२४१।

## २४२. औ तस्माज्जस्शसोः [ २।३।२१ ]

**[ सूत्रार्थ ]**

आकारादेशविशिष्ट 'अष्टन्' शब्द से परवर्ती प्रथमा-द्वितीया-बहुवचन जस्- शस् प्रत्ययों के स्थान में 'औ' आदेश होता है ॥२४२।

**[ दु० वृ० ]**

तस्मादष्टनः कृताकारात् परयोः सर्वयोर्जस्शसोः स्थाने और्भवति । अष्टौ, अष्टौ । तस्माद्ग्रहणमात्वस्यानित्यार्थम्, तेन 'अष्टभिः, अष्टसु' वा स्यात् ॥२४२।

**[ दु० टी० ]**

औ० । सर्वयोरित्यादि । 'अष्टनः सर्वासु' इत्यतः सर्वग्रहणम् अधिकृतम्, जस्-शसोर्विशेषणमित्यर्थः। ननु **'परस्यादेः'** (भोजप० सू० १६) इतीह परिभाषा नोपकारिणीत्युक्तं **"क्र्यन्तरुपसर्गेभ्योऽप ईः"** (अ० ६।३।९७) इत्यादि नादृतम् । द्वीपादयो हि संज्ञाशब्दा लोकोपचारात् सिद्धा इति । ततश्च 'वर्णान्तस्य विधिर्भविष्यति' । औकारे अकारस्यौत्वं पुनरष्टनः अकारस्यौत्वं दीर्घात् परलोपो वा ? सत्यम् । तर्हि **प्रक्रियागौरवनिरासार्थमिति ।**

तस्मादित्यादि । किं विशिष्टादष्टनः, तस्मादन्यस्मान्न भवतीत्यर्थः । कः पुनरन्यो योऽसावकृताकारः । किं तत्र विभाषास्ति ? नैवम्, अस्मादेव तस्माद्ग्रहण-विशेषणबलाल्लभ्यत इति । अथवा तच्छब्देनाकारः परामृश्यते । **'विशेषणेन च तदन्तविधिः'** इत्यष्टन आकारान्तादित्यर्थः । तेन 'अष्ट तिष्ठन्ति, अष्ट पश्य' इत्यत्र न भवति । विषये यस्यारभ्यते औत्वं तस्य लुकोऽपवादः । युक्तार्थलक्षणो लोपो भवत्येव – **'अष्टपुत्रः, अष्टभार्यः'** इति । तदन्तविधिरत्र प्रकरणेऽस्तीति 'परमाष्टौ' । प्रिया अष्टौ येषाम्, अष्टावतिक्रान्तान् 'प्रियाष्टौ, अत्यष्टौ' इति भवितव्यमेव ।

इन्यिन्नाय्यन्तानां न च क्विब् दृश्यते । **अन्यः** पुनराह – अष्टनः सम्बन्धिनो-र्विहितयोर्जस्शसोस्तस्मात् कृताकाराद् और्भवतीति 'प्रियाष्टानः, प्रियाष्ट्नः पश्यन्ति' इति भवितव्यम् । इह वा गौणमुख्ये कार्यसम्प्रत्यय आश्रीयते, नैतद् युक्तम् । यत्रात्वं तत्रौत्वं स्यात्, नात्रात्वमस्तीति । अथ यदात्वं तदौत्वं स्यात् । न च प्रियाष्टास्तिष्ठन्ति, प्रियाष्टाः पश्यन्तीति प्रयोगो दृश्यते । अथ ज्ञापकज्ञापिता विधयो ह्यनित्या लक्ष्यमनुसरन्ति, तत्र व्यवस्थितविभाषा स्मर्यते । तेन जस्शसोरात्वमपि न भवति अप्रधानस्य तर्हि किमौत्वविधानेऽप्रधानचिन्तयेति । न चैतद् **भाष्यकृता**ऽपि चोदितमिति ओत्वे औत्वे वा न किञ्चिल्लाघवम् । **यस्त्वाह** – तस्मात् परौ यौ जस्शसौ तयोः परयोरष्टनः और्भवति, भूतपूर्वनान्तत्वाच्च जस्शसोर्लुग् भवति । एवं व्याख्यानेऽपि न किञ्चित् फलमिति जस्शसोः सर्वादेशे च कारणमुक्तमेव ॥२४२।

**[ वि० प० ]**

औ० । पूर्वसूत्रात् सर्वग्रहणमनुवर्तते, तच्च जस्शसोर्विशेषणमिति दर्शयन्नाह – **सर्वयोरिति** । ननु **'परस्यादेः'** (भोजप० सू० १६) इति परिभाषा नाङ्गीकृता इत्युक्तम् । अतश्चैकवर्णत्वादन्तस्य सकारस्य भविष्यति, अकारस्य दीर्घात् परलोपे कृते **"ओकारे औ औकारे च"** (१।२।७) इति कृते पुनरष्टनः आकारस्यौत्वे सति सिद्धम्, किं सर्वग्रहणानुवर्तनेन ? सत्यमेतत् । किन्तु प्रक्रियागौरवनिरासार्थमेव सर्वग्रहणानुवर्तनम् । अथ किमर्थं तस्माद्ग्रहणम् ? अष्टनो विशेषणार्थम् । किम्भूताद् अष्टनस्तस्मात् कृताकारादित्यर्थः । यः पुनरकृताकारस्तस्माद् और्न भवतीति । ननु तत्र नित्यमाकारः क्रियते, तत् कथम् अकृताकारस्य सम्भवः ? सत्यम् । अस्मादेव तस्माद्ग्रहण-बलादनित्यत्वमात्वस्य वेदितव्यमित्याह – **तस्माद्ग्रहणमि**त्यादि । तेन **'अष्ट तिष्ठन्ति, अष्ट पश्य'** इत्यपि भवति ॥ २४२ ।

**[ क० च० ]**

औ० । दीर्घात् परलोपमित्यादि **पञ्जी ।** तथाष्टन आकारस्यौत्वे कर्तव्ये परलोपस्यासिद्धवद्भावः कथन्न स्यात्, अन्यस्मिन् पक्षे जस्शसोरकारस्य स्थाने यश्चौकारस्यासिद्धवद्भावः स्थानिवद्भावः कथन्न स्यात् । नैवम् । स्वरानन्तर्येऽसिद्धवद्भावस्यानित्यत्वात्, अत एव स्थानिवद्भावस्याप्यनित्यता । 'यदि स्थानिवद्भावो न भविष्यति' इत्युच्यते तदाऽसिद्धवद्भावस्यानित्यत्वं विफलं स्यात् । अथ जस्शसोरकारस्य कथमौत्वम् अन्तरङ्गत्वात् परलोप एव प्राप्नोतीत्याह – **दीर्घात् परलोप इत्यादि व्यस्तम् ।** तस्माद्ग्रहणबलादित्यादि ।

ननु कथं सामर्थ्यमुच्यते, तस्माद्ग्रहणमन्तरेण जस्शसोः परयोरष्टनोऽन्तस्यौत्वं भवतीत्यर्थः कथन्न स्यात् । तस्माद् इत्यनेनाष्टनः पञ्चम्यन्ततयाऽनुवर्तनेन जस्शसोरिति न षष्ठी लभ्यते, न च जस्शसोः परयोरष्टनोऽन्तस्यौत्वे भूतपूर्वनान्तत्व-माश्रित्य कतेश्चेत्यनेन जस्शसोर्लुका **'अष्टौ'** इति सिध्यतीति वाच्यम् । तत्र हि मुख्याष्टान्तसंख्यासंबन्धिजस्शसोर्लोपविधानात् 'प्रियाष्टौ येषाम्' इत्यत्रानेन गौणे जस्शसोर्लोपो न स्यात् ? सत्यम् । तस्माद्ग्रहणं विना जस्शसोरिति षष्ठी लभ्यते । अन्यथा समाहारं कृत्वा जस्शसिति सप्तम्येकवचनमेव निर्दिशेत्, नैवम् । यद्यत्र षष्ठी स्यात् तदा जस्शस इति षष्ठ्येकवचनस्यापि सुगमत्वात् तस्मादयमेव **सिद्धान्तः ।** कार्यित्वकल्पने कृतानुमितयोरिति न्यायात् सूत्रश्रुतयोरेव जस्शसोः कार्यित्वं प्रयुज्यते, न त्वधिकारानुमितस्याष्टनः ।

न चात्र पञ्चम्या विपरिणामे गौरवमिति वाच्यम्। समीपषष्ठ्याप्यर्थस्य घटनात्। अतस्तस्मादग्रहणबलादिति यदुक्तं तदेव भद्रम्। ननु यथा 'अष्टौ' इत्यत्र प्राप्तमपि जस्शसोर्लोपं बाधित्वा और्भवति, तथा 'अष्टौ पुत्रा यस्या इत्यष्टपुत्रा नारी' इत्यत्र **"तत्स्था लोप्याः"** (२।५।२) इत्यनेन प्राप्तं लोपं कथन्न बाधते। अत एवास्मिन् विषये पक्षे पाणिनिनापि **'मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते न परान्'** (व्या० प० पा० १०) इत्यङ्गीक्रियते इति, भवन्मते का गतिः स्यात्? सत्यम्। **'येन नाप्राप्तिन्यायेन'** (व्या० परि० ४२) **"कतेश्च"** (२।१।४६) इत्यनेन प्राप्तो लुग् बाध्यते। न तु युक्तार्थलक्षणो लोपस्तद्भिन्नविषये **'अष्टौ, अष्टौ'** इत्यत्र चरितार्थत्वात्।

यद्येवम् **"कतेश्च"** (२।१।४६) इत्यनेनैव बाधकः कथं कल्प्यते, प्रियाष्टाविल्यत्र गौणे चरितार्थत्वात् 'अष्टौ' इत्यत्र मुख्ये लुग्विधानं न स्यात्? सत्यम्, किन्तु परत्वादेवात्रौकारः। न तु लुक्परत्वं न 'पञ्च, सप्त' इत्यत्र लुकोऽवकाशत्वात् 'प्रियाष्टौ' इत्यत्र गौणे औत्वस्यावकाशादिति। न चौकारे कृते **'यस्य स्थाने य आदेशाः'** (का० परि० पा० ९१) इति न्यायात् **"कतेश्च"** (२।१।४६) इत्यनेन लोपः स्यादिति वाच्यम् **'सकृद् गत०'** (का० परि० १६) इति न्यायात्। अत एव युक्तार्थेऽपि परत्वात् **"तत्स्था लोप्याः"** (२।५।२) इत्यस्यैव विषयः इति **सिद्धान्तः। कुलचन्द्रस्यापि** मतमेतत्। ननु परत्वं युक्तार्थे कथं संगच्छते, युगपत् प्राप्त्यभावात्। तथाहि, आदावेवौकारं कृत्वा पदं निष्पाद्य पश्चात् पदान्तरसंबन्धे समासे **"तत्स्था लोप्याः"** (२।५।२) इति प्रवर्तते। उच्यते, **'स्यादयः पुनरुत्थाप्य लुप्यन्ते'** इति न्यायस्याङ्गीकारात् सकलविभक्तिकार्यनिवृत्तौ पुनरुत्थापितायां विभक्तौ सत्यां लुगौकारयोर्युगपत्प्राप्तौ परत्वाल्लुगिति **संक्षेपः।** एतेन विषयसप्तमी लभ्यते इति **टीका**पङ्क्तिरपि व्याख्याता ॥२४३।

**[ समीक्षा ]**

'अष्टन् + जस्, अष्टन् + शस्' इस अवस्था में पाणिनि तथा कातन्त्रकार दोनों ही शाब्दिकाचार्य 'न्' को आत्व करके 'जस्-शस्' के स्थान में औकारादेश द्वारा 'अष्टौ, अष्टौ, शब्दरूप सिद्ध करते हैं। पाणिनि के दो सूत्र इस प्रकार हैं – **"अष्टन आ विभक्तौ, अष्टाभ्य औश्"** (अ० ७।२।८४; १।८४)।

**[ रूपसिद्धि ]**

१. **अष्टौ।** अष्टन् + जस्। **"अष्टनः सर्वासु"** (२।३।२०) से न् को आत्व, **"समानः सवर्णे दीर्घीभवति परश्च लोपम्"** (१।२।१) से टकारोत्तरवर्ती अकार को

आकार – परवर्ती आकार का लोप, प्रकृत सूत्र द्वारा जस् को औ तथा **"ओकारे औ औकारे च"** (१।२।७) से आ को औ तथा परवर्ती औ का लोप।

२. **अष्टौ।** अष्टन् + शस्। पूर्ववत् तथा शस् के स्थान में प्रकृत सूत्र से औकारादेश ॥२४२।

## २४३. अर्वन्नर्वन्तिरसावनञ् [ २।३।२२ ]

**[ सूत्रार्थ ]**

सि-भिन्न प्रत्ययों के परे रहते नञ्भिन्न 'अर्वन्' शब्द के स्थान में 'अर्वन्ति' आदेश होता है ॥२४३।

**[ दु० वृ० ]**

'अर्व्वन्' शब्दोऽर्वन्तिर्भवति असौ प्रत्यये परे, स चेदनञ् । अर्व्वन्तौ, अर्व्वन्तः, अर्वत्सु । आर्वतम्, अर्वत्यम्, अर्वती । असाविति किम् ? अर्व्वा । अनञिति किम् ? अनर्वाणौ ॥२४३।

**[ दु० टी० ]**

अर्व्वन्० । इकार उच्चारणार्थः । असाविति पर्युदासोऽयं नञ् । तद्बलाच्च विशेषातिदिष्टतया विभक्तिर्न वर्तते तेन सेरन्यस्मिन् प्रत्यये भवति । विषयसप्तमीयम् अनुत्पन्ने बुद्धिस्थ एव प्रत्यये विधिरयम् । तेन अनुस्यन्तविहिताया नद्यास्तरतम-कल्परूपचेलब्रुवगोत्रमतहतेषु वा ह्रस्वः पुंवद्भावश्चेष्टसिद्धौ भवति – अर्वतीतमा, अर्व्वतितमा, अर्वत्तमेति ।समासेऽपि प्रत्ययलोपलक्षणं भवत्येव – अर्व्वन्तं गतोऽर्व्वद्गतः, अर्व्वतो वनम् अर्व्वद्वनम् । अथवा प्रसज्यार्थो नञ् शिश्चेत् परो न भवति, विभक्त्यधिकारोऽपि न स्मर्यते । तेन प्रतिषेधार्थस्य मुख्यत्वान्निरपेक्ष एवार्वन्तिर्भवति । न ,विद्यते नञ् यस्य स एवार्वन् अनञ् इत्युच्यते ।

**केचित्** पञ्चमीं व्याचक्षते – स चेद् अर्वन् नञः परो न भवति प्रसज्यार्थे नञ् । 'नार्वन्तौ' इति सिद्धे पदे पश्चान्नञा संबन्ध इति न दुष्यति । अर्व्वन्तान् इति कृते तकारागमः स्याच्चेत्, तर्हि णत्वमपि प्रसज्येत । ननु **'असिद्धं बहिरङ्गमन्तरङ्गे'** (का० परि० ३३) इति । किञ्च अनुस्वारो व्यक्तौ ? सत्यम् । **प्रतिपत्तिश्च गरीयसीति** 'आर्व्वतम्' इति । **"तस्येदम्"** (२।६।७) इत्यण् । 'अर्व्वत्यम्' इति **"तत्र साधौ यः"** (२।६।९) ॥२४३।

**[ वि० प० ]**

अर्व्वन्० । असाविति पर्युदासोऽयं नञ् । पर्युदासश्च सदृशग्राही, सादृश्यं चेह प्रत्ययकृतमेव वेदितव्यम् । अतः सिसदृशे प्रत्यये सति भवतीत्याह– असौ प्रत्यये इत्यादि । तेनात्र विभक्तिरधिकृतापि न संबध्यते इत्यणादिष्वपि भवति । असाविति विषयसप्तमीयम् । तेनानुत्पन्ने प्रत्यये बुद्धिस्थ एवार्व्वन्तिर्भवति, प्रत्ययस्तु पश्चात् । तेन अन् – स्यन्तविहिताया नद्यास्तमतररूप-कल्प- चेल- ब्रुव- गोत्र- मत- हतेषु वा ह्रस्वः , पुंवद्भावश्चेष्टसिद्धो भवति – अर्व्वतितमा, अर्व्वतीतमा, अर्व्वत्तमा इत्यादि। तथा विदुषीतमा, विदुषितमा, विद्वत्तमा । पचन्तीतमा, पचन्तितमा, पचत्तमा इत्यादि । प्रत्ययलोपलक्षणन्यायेन समासेऽपि अर्व्वन्तिर्भवत्येव । यथा अर्व्वन्तं गतो अर्व्वद्गतः । प्रसज्यार्थो वा नञ्, सिश्चेत् परो न भवति । विभक्त्यधिकारोऽप्यत्र न स्मर्यते । स चेद् अनञ् इति। न विद्यते नञ् यस्यासौ अनञ् अर्व्वन् उच्यते । आर्व्वतमिति, **"तस्येदम्"** (२।६।७) इत्यण् । अर्व्वत्यमिति, अर्व्वति साधुरिति **"नावस्तार्य्ये"** (२।६।९) इत्यादिना साधावर्थे यः ।।२४३।

**[ क० च० ]**

अर्व्वन्० । ननु असाविति सौ परे न भवति इत्युक्ते विभक्त्यधिकारोऽनुवर्तते इति अर्व्वत इत्यादौ सामान्यप्रत्यये कथं स्यादित्याह – पर्युदासोऽयं नञिति । अथ अर्व्वसादृश्याद् विभक्तिकृतसादृश्यं कथन्न भवति ? सत्यम् । मध्ये कार्यस्य पाठात् पर्य्युदासाश्रयणवैफल्याद् व्याप्तिन्यायाच्च प्रत्ययकृतमेव गृह्यते इत्याह – तेनेत्यादि । ननु कार्यि, निमित्तम्, कार्यम् इत्येष निर्देशक्रमः, तत्कथं कार्येण व्यवधानं कृत्वा निमित्तपाठः ? सत्यम् । अत्र व्यतिक्रमपाठो बोधयति – कार्यिदर्शनादेव कार्योत्पत्तिः पश्चान्निमित्तानुसन्धानम् । ततश्च विषयसप्तम्येव घटत इत्याह – **विषय इति ।**

अथ विषयसप्तम्याश्रयणेन किं फलम्, निमित्तसप्तम्यापि आर्व्वत्यम् इत्यादि सिध्यति । तथाहि अर्व्वन्शब्दान्नान्तत्वादीप्रत्यये परे अर्व्वन्त्यादेशः । न ह्यत्र निमित्तस्य ईप्रत्ययस्याभावे ईकार – निवृत्त्यभावेन निवृत्तोऽर्व्वन्त्यादेशः पुनः प्रत्ययलोपलक्षणमाश्रित्य प्रवर्तते । ततश्च पश्चादन्तत्वादीप्रत्यये 'अर्व्वतीतमा' इत्यादौ पुंवद्भावादिकं सिध्यतीति तस्मान्निमित्तसप्तम्यपि घटते, नैवम् । नैमित्तिकाश्रयनिमित्ताभावे इति निषेधान्न भविष्यतीति तर्हि कथं समासे निमित्तता घटते विभक्तेर्लोपादित्याह -- **प्रत्ययलोपेत्यादि ।** अथवा विषयसप्तम्या 'अर्व्वतीतमा' इत्यादौ पुंवद्भावादिरेव

प्रयोजनं कथमुक्तं समासेऽपि प्रयोजनस्य सत्त्वात्, नैवम्। तत्र निमित्तसप्तम्यापि साध्यस्य सिद्धत्वात्। तत्र युक्तार्थत्वात् लोपे कथ निमित्तता इत्याह-प्रत्ययेत्यादि। अस्मिन् व्याख्याने विषयसप्तम्येव।

ननु "**व्यञ्जनान्तस्य यत् सुभोः**" (२।५।४) इत्यत्र सुभोर्यदुक्तं तदेव भवति नान्यद् इति नियमेन प्रत्ययलोपलक्षणस्यानवकाशात् कथम् अर्व्वन्त्यादेशः, किन्तु व्यञ्जनोक्तत्वान्नलोप एव प्राप्नोति इत्याह- प्रसज्यार्थो वेति **कुलचन्द्रः**, तन्न। सुभोः परयोरेकदेशकार्यमेव संभवति। अतो नियमोऽपि एकदेशकार्यमेव व्यावर्तयति, न समुदायकार्यमिति। कथमन्यथा युवाम् अतिक्रान्तेन इत्यादौ प्रत्ययलोपलक्षणन्यायाद् युवादय आदेशाः स्युः। तथा च **श्रीपतिः** – वृत्तौ युवावैनमघवदर्व्वत्स्वेव प्रत्ययवदिति। यद्येवम्, अत्यर्व्वेत्यादौ अन्तर्वर्तिनीं द्वितीयामाश्रित्य अर्व्वदादेशः कथं न स्यात्, नैवम्। अवयवसमुदायाश्रितयोर्विभक्त्योः परयोः कार्यद्वयप्रसक्तौ समुदायाश्रितस्य सेर्निषेध-स्वरूपं यत् कार्यं मुख्यं तदेव भवति, न त्ववयवाश्रितम् अर्व्वादेशकार्यम्, गौणत्वादिति। तस्मादिदमेव युक्तम्।

ननु मुख्यार्थप्रसज्यसम्भवे लक्षणया पर्युदास इति कथमुच्यते कारणाभावा-दित्याह – **प्रसज्यार्थो वेति।** ननु अर्व्वन्तम् अतिक्रान्तं कुलम् इत्यत्र किं रूपं स्यात्। अत्र अत्यर्व्व कुलम् इति **हेमकरस्याशयः**। अर्व्वन्शब्दान्नपुंसकलक्षणसिलोपे प्रत्ययलोपलक्षणन्यायेन प्राप्ते असावित्यनेनार्व्वदादेशनिषेधप्राप्तौ न च तदुक्तमित्यने-नार्व्वदादेशनिषेधस्य प्रतिषेधाद् अर्व्वदादेशः प्राप्नोति "**विरामव्यञ्जनादावुक्तम्**" (२।३।६४) इत्यतिदेशबलाद् व्यञ्जनोक्तनकारलोपः प्राप्नोति तत्रातिदेशस्य परत्वाद् व्यञ्जनोक्तनलोप एव प्राप्नोति। अथ नकारलोपेऽपि अर्व्वदादेशः कथं न स्यात्, नैवम्। सूत्रे अर्व्वेति निर्देशे प्राप्ते यद् अर्वन्निति नकारान्तं निर्दिशति तत् सनकारस्यैव विधिर्न त्वनकारस्येति। **अन्ये** तु 'अत्यर्वत् कुलम्' इति वदन्ति, नकारलोपेऽप्येक-देशविकृतस्यानन्यवद्भावादिति न्यायादित्याह। तन्नातिपेशलम्। नकारनिर्देशेनैष एकदेशविकृतस्यानन्यवदित्यस्य बाधितत्वात् सकृद्गतन्यायेनेति दिक्॥२४३।

**[ समीक्षा ]**

'अर्वन् + औ, अर्वन् + जस्, अर्वन् + सुप्, अर्वन् + अण्, अर्वन् + य, अर्वन् + ई' इस अवस्था में कातन्त्रकार अर्वन् शब्द को 'अर्वन्त्' आदेश करके 'अर्वन्तौ, अर्वन्तः, अर्वत्सु, आर्वतम्, अर्वत्यम्, अर्वती' शब्दरूप सिद्ध करते हैं। पाणिनि ने 'अर्वन्'

शब्द के अन्तिम वर्ण न् को 'तृ' आदेश **"अर्वणस्त्रसावनञः"** (अ० ६।४।१२७) तथा **"उगिदचां सर्वनामस्थानेऽधातोः"** (अ० ७।१।७०) से नुमागम करके उक्त रूप सिद्ध किए हैं। अतः पाणिनीय प्रक्रिया में गौरव स्पष्ट रूप में परिलक्षित है।

**[ रूपसिद्धि ]**

१. **अर्वन्तौ।** अर्वन् + औ। प्रकृत सूत्र द्वारा अर्वन्- शब्द को 'अर्वन्त्' आदेश।

२. **अर्वन्तः।** अर्वन् + जस्। पूर्ववत् अर्वन्त् आदेश तथा स् को विसर्ग।

३. **अर्वत्सु।** अर्वन् + सुप्। अर्वन्त् आदेश तथा **"अनुषङ्गश्चाक्रुञ्चेत्"** (२।२।३९) से नलोप।

४. **आर्वतम्।** अर्वन् + अण्। अर्वत इदम्। **"रागान्नक्षत्रयोगात् समूहात् साऽस्य देवता, तद् वेत्त्यधीते तस्येदमेवमादेरणिष्यते"** (२।६।७) से 'अण्' प्रत्यय, अर्वन्त् आदेश, **"अनुषङ्गश्चाक्रुञ्चेत्"** (२।२।३९) से नलोप, **"वृद्धिरादौ सणे"** (२।६।४९) से वृद्धि, 'आर्वत' की लिङ्गसंज्ञा तथा विभक्तिकार्य।

५. **अर्वत्यम्।** अर्वन् + य। अर्वति भवम् (साधु)। **"तत्र साधौ यः"** (२।६।९) से 'य' प्रत्यय, अर्वन्त् आदेश, नलोप, लिङ्गसंज्ञा तथा विभक्तिकार्य।

६. **अर्वती।** अर्वन् + ई। **"नदाद्यन्चिवाह्व्यन्स्यन्तृसखिनान्तेभ्य ई"** (२।४।५०) से स्त्रीलिङ्ग में ईप्रत्यय, अर्वन्त् आदेश, नलोप, सिप्रत्यय तथा उसका लोप ॥२४३।

## २४४. सौ च मघवान् मघवा वा [ २।३।२३ ]

**[ सूत्रार्थ ]**

'सि' आदि विभक्तियों के परे रहते 'मघवन्' शब्द को 'मघवन्तु' आदेश होता है ॥२४४।

**[ दु० वृ० ]**

विभक्तौ सौ च परतो मघवन् - शब्दो मघवन्तुर्भवति वा। मघवान्, मघवन्तौ, मघवन्तः, मघवत्सु। तद्धिते स्वरे ये च स्त्रीकारे च – माघवतम्, मघवत्यम्, मघवती। पक्षे 'मघवा, मघवानौ' इत्यादि ॥२४४।

**[ दु० टी० ]**

**सौ च०।** मघवन्तुरित्युदनुबन्धोऽयं व्याख्यानाद् गम्यते। विभक्तिश्चेद् वर्तते कथं तद्धिते इत्यादि ? सत्यम्, वाशब्दस्य बहुलार्थत्वात्। अथवा असाविति वर्तते

तिसदृशे प्रत्यये सौ च भवतीत्यर्थः । बहुलत्वं तु तथैव समासेऽपि प्रत्ययलोपलक्षणाद् भवत्येव । छन्दस्येतौ योगाविति **भाष्यकारो** भाषते । **सर्ववर्म्मणस्तु** वचनाद् **भाषायाम-**प्यवसीयते । तथा च **मघवद्वज्रलज्जानिदान**मिति, **'श्लथीकृतप्रग्रहमर्वतां व्रज'** इति च दृश्यते । वन्तुना प्रयोग इति परो ब्रूते तर्हि व्याप्तिरपि स्यात् ॥२४४।

**[ वि० प० ]**

**सौ च०** । प्रकृतत्वादिह विभक्तिरेवानुवर्तते । यद्यपि विभक्तिग्रहणेन सेरपि ग्रहणं तथापि 'असौ' इति प्रतिषेधनिरासार्थं सौ चेति कृतमित्याह – विभक्तौ सौ चेति । कथन्तर्हि माघवतम् इत्याह – तद्धित इत्यादि । इहायं वाशब्दो वक्ष्यमाणे पुनर्वाग्रहणाद् बहुलार्थः प्रतिपत्तव्यः, तद्बलादेतेष्वपि भवतीत्यर्थः ॥२४४।

**[ क० च० ]**

**सौ च०** । ननु मघवन्तुरादेश इति कथं विज्ञायते, मघवानिति दीर्घो वनान्त एवादेशः कथन्न स्यात् । नैवम् । अर्वन्तिप्रस्तावाद् ह्रस्वोपधस्त्वन्त एवादेश इति । ननु तथाप्युदनुबन्धत्वं कथं ज्ञातमिति चेद् अत एव दीर्घात् । कथमन्यथा **"अन्त्वसन्तस्य चाधातोः सौ"** (२।२।२०) इत्यनेन दीर्घः स्यादिति ॥२४४।

**[ समीक्षा ]**

'मघवन् + सि, मघवन् + औ, मघवन् + जस्, मघवन् + सुप्, मघवन् + अण् + सि, मघवन् + य + सि, मघवन् + ई' इस अवस्था में मघवन्- शब्द को 'मघवन्तु' आदेश करके कातन्त्रकार ने 'मघवान्, मघवन्तौ, मघवन्तः, मघवत्सु, माघवतम्, मघवत्यम्, मघवती' शब्द सिद्ध किए हैं । पाणिनि ने 'मघवन्' शब्द के अन्तिम वर्ण को 'तृ' आदेश (**मघवा बहुलम्** – अ० ६।४।१२८) तथा नुमागम (अ० ७।१।७०) का विधान किया है । इस प्रकार पाणिनीय प्रक्रिया में गौरव स्पष्ट है ।

सूत्र में 'मघवान्' शब्द का उल्लेख है 'मघवन्तु' का नहीं; फिर मघवन्तु आदेश का उल्लेख वृत्तिकार ने क्यों किया है, इसके कारणों का स्पष्टीकरण व्याख्याकारों ने किया है ।

**[ रूपसिद्धि ]**

१. **मघवान्** । मघवन् + सि । सिलोप, मघवन्तु - आदेश, **"अन्त्वसन्तस्य०"** (२।२।२०) से दीर्घ तथा संयोगान्तलोप ।

२. **मघवन्तौ।** मघवन्+औ। प्रकृत सूत्र द्वारा मघवन्तु आदेश।

३. **मघवन्तः।** मघवन्+जस्। प्रकृत सूत्र से मघवन्तु आदेश तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से स् को विसर्ग।

४. **मघवत्सु।** मघवन्+सुप्। प्रकृत सूत्र से मघवन्तु-आदेश तथा "अनुषङ्गश्चाक्रुञ्चेत्" (२।२।३९) से नलोप।

५. **माघवतम्।** मघवन्+अण्+सि। मघवत इदम्। **"रागान्नक्षत्रयोगाच्च समूहात् साऽस्य देवता। तद् वेत्त्यधीते तस्येदमेवमादेरणिष्यते"** (२।६।७) से अण् प्रत्यय, प्रकृत सूत्र से मघवन्तु आदेश, **"अनुषङ्गश्चाक्रुञ्चेत्"** (२।२।३९) से नलोप, **"वृद्धिरादौ सणे"** (२।६।४९) से आदि स्वर को वृद्धि, 'माघवत' की लिङ्गसंज्ञा तथा विभक्तिकार्य।

६. **मघवत्यम्।** मघवन्+य+सि। मघवति भवम्। यप्रत्यय, मघवन्तु-आदेश, नलोप, लिङ्गसंज्ञा तथा विभक्तिकार्य।

७. **मघवती।** मघवन्+ई+सि। **"नदाद्यन्चिवाह्व्यन्स्यन्तृसखिनान्तेभ्य ई"** (२।४।५०) से स्त्रीलिङ्ग में ईप्रत्यय, मघवन्तु आदेश, नलोप, सिप्रत्यय तथा उसका लोप॥२४४।

## २४५. जरा जरस् स्वरे वा [२।३।२४]

### [सूत्रार्थ]

विभक्तिस्वर (स्वरादि विभक्ति) के परवर्ती होने पर 'जरा' शब्द को विकल्प से जरस् आदेश होता है॥२४५।

### [दु० वृ०]

जराशब्दो जरस् भवति वा विभक्तिस्वरे। जरे-जरसौ। जराः-जरसः। **गण-पाठाच्चो**पजरसम् इति नित्यम्॥२४५।

### [दु० टी०]

जरा०। विभक्तिविषये स्वरे स्वरादौ विभक्ताविति वा मतम्। जरामतिक्रान्ताः, अतिक्रान्तानि वा 'अतिजरसः, अतिजरांसि' इति एकदेशविकृतस्यानन्यवद्भावात् निर्दिष्टस्य जराशब्दस्य भवति, न तदन्तस्य। विभक्ताविति किमर्थम्-जरेयम्, जरस इदं जारम्। तस्येदमित्यण्। पुनर्वाग्रहणं पूर्वस्य बहुलत्वं निश्चिनोतीति॥२४५।

## [ वि० प० ]

**जरा० । गणपाठाच्चेति** । राजादौ गणे 'जरा जरस्' च इति पठ्यते, तेनाप्रत्ययेऽपि भवति, तच्च नित्यम् । तत्र विकल्पाभावाच्चकारः पूर्वापेक्षया **समुच्चयार्थः** ।।२४५।

## [ क० च० ]

**जरा० ।** ननु सान्तोऽयमादेशः कथं लभ्यते, रेफान्त इति कथन्नाशङ्क्यते, नैवम् । तदा जरस् इति रेफान्तनिर्देशे जरा, स्वरे जरस् इत्येव निर्देश्येत । ननु तथापि 'जर' इत्यकारान्तः कथन्न स्यात्, नैवम् । जराशब्दस्य स्त्रीलिङ्गत्वात् पुनः **"स्त्रियामादा"** (२।४।४९) इति स्यात्, नैवम् । पुनः स्त्रियामादेति कृते विशेषो नास्तीति । तथा अकारबलादेव स्त्रियामादा न भविष्यतीति चेत्, जरसादेशेनैव चरितार्थत्वात् स्त्रियामादेत्यस्य बाधाकल्पनमयोग्यमिति **हेमः । अन्ये** तु व्यञ्जनान्तप्रस्तावात् सान्त एवादेश इत्याहुः ।।२४५।

## [ समीक्षा ]

'जरा + औ, जरा + जस्' इस अवस्था में पाणिनि तथा शर्ववर्मा दोनों ही शाब्दिकाचार्य विकल्प से 'जरा' शब्द को 'जरस्' आदेश करके 'जरे- जरसौ, जराः- जरसः' शब्दरूप सिद्ध करते हैं । पाणिनि का सूत्र है – **"जरायाः जरसन्यतरस्याम्"** (अ० ७।२।१०१) ।

## [ रूपसिद्धि ]

१. **जरे- जरसौ ।** जरा + औ । प्रकृत सूत्र से वैकल्पिक जरसादेश – जरसौ । पक्ष में – **"औरीम्"** (२।१।४१) से औ को ई तथा **"अवर्ण इवर्णे ए"** (१।२।२) से आ को ए – परवर्ती ईकार का लोप ।

२. **जराः – जरसः ।** जरा + जस् । समानलक्षण दीर्घ - अकारलोप तथा सकार को विसर्ग - जराः । वैकल्पिक जरस् आदेश होने पर **'रेफसोर्विसर्जनीयः"** (२।३।६३) से सकार को विसर्गादेश – जरसः ।।२४५।

# २४६. त्रिचतुरोः स्त्रियां तिसृ चतसृ विभक्तौ [ २।३।२५]

## [ सूत्रार्थ ]

विभक्ति के परवर्ती होने पर स्त्रीलिङ्ग में त्रि को 'तिसृ' तथा चत्वार् शब्द को 'चतसृ' आदेश होता है ।।२४६।

[दु० वृ०]

स्त्रियां वर्तमानयोस्त्रिचतुरोः 'तिसृ-चतसृ' इत्येतौ भवतो विभक्तौ यथासङ्ख्यम् । तिस्रः, चतस्रः । तिसृभिः, चतसृभिः । प्रियतिसृ, प्रियचतसृ कुलं वा ।।२४६।

[दु० टी०]

स्त्रियामिति त्रिचतुरोरेव विशेषणम् अन्तरङ्गत्वात् श्रुतत्वाच्च न समासप्रकृतेरित्याह – स्त्रियां वर्तमानयोरिति । यदा समासप्रकृतिः पुंसि नपुंसके च वर्तते - त्रिचतुरी च । स्त्रियां तदा तिसृचतसृभावः । यदा समासप्रकृतिः स्त्रियां त्रिचतुरी अपि स्त्रियां तदा नास्ति विशेष इति । प्रियास्तिस्रः, प्रियाश्चतस्रो वा यस्य ययोर्येषामिति विग्रहे 'प्रियतिसा, प्रियतिस्रौ, प्रियतिस्रः । प्रियचतसा, प्रियचतस्रौ, प्रियचतस्रो ब्राह्मणाः । एवं **प्रियतिसृ, प्रियतिसृणी, प्रियतिसृणि** कुलानि ।

यदा समासप्रकृतिः स्त्रियां त्रिचतुरी च पुंसि नपुंसके वा तदा न भवतः – प्रियास्त्रयस्त्रीणि वा यस्य प्रियत्रिः, प्रियत्री, प्रियत्रयः । एवं प्रियचत्वाः, प्रियचत्वारौ, प्रियचत्वारः । कथं "**नपुंसकात् स्यमोर्लोपे तदुक्तम्**" (२।२।६) इत्याह – प्रियतिसृ, प्रियचतसृ कुलं वेति । वाशब्देनैतत् सूचितम् । तदुक्तमपि तत्र नाम्यन्तचतुरां निश्चितम् इति पक्षे प्रियत्रि, प्रियचतुः कुलम् इति बहुव्रीहावृदन्तलक्षणः को न भवति, **'असिद्धं बहिरङ्गम्'** (का० परि० ३३) इति न्यायात् । युष्मदस्मदी इव त्रिचतुरी अपि अलिङ्ग इति मतम् । स्त्रियामिति विशेषणं शब्दाश्रयसंबन्धे सति ।

**अन्यः** पुनराह – 'तिस्रः, चतस्रः' इत्यत्र **'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य'** (का० परि० ३१) इति न वक्तव्यम् । ईप्रत्ययेनापि विना स्त्रीत्वप्रतीतेः । विभक्तिग्रहणं स्वराधिकारनिवृत्त्यर्थं चेत्, नैवम्, "**तौ रं स्वरे**" (२ । ३ ।२६) इति स्वरग्रहणात् । तर्हि सम्बन्धविभाषानिवृत्त्यर्थं भविष्यति । विभक्ताविति । किमियं परसप्तमी विषयसप्तमी वा । तत्र यदि परसप्तमी स्यात्, नाम्यन्तान्नपुंसकाद् विहिते स्वरे नुरागम उक्तः । प्रियचतसृणा । नाम्यन्तरत्वात् प्रियतिसृणा च न सिध्यति । विषयसप्तमी चेत्, कथं प्रियत्रि, प्रियचतुः कुलम् इति । प्रवृत्तत्वात् तदुक्तप्रतिषेधो न स्यात् । अस्तु परसप्तमी, "**न नामि दीर्घम्**" (२।३।२७) इत्यत्र नकारग्रहणं ज्ञापयति – तिसृचतस्रे ! न्वागमेन रत्वं बाध्यते इति । तेन लिङ्गेन तिसृचतस्रोर्नुरवगम्यते । ननु 'प्रियतिसृणि, प्रियचतसृणि कुलानि' इत्यत्र "**धुट्स्वराद् घुटि नुः**" (२।२।११)

इति न्वागमे चरितार्थत्वान्न व्याप्तौ प्रवृत्तिः। ज्ञापकं व्याप्तिमेवावधारयतीति। अथवा **'व्याख्यानतो विशेषार्थप्रतिपत्तिः' इत्येकापीयं सप्तमी द्विधा भिद्यते** – तिसृकाः ग्राम इति। इति तिसृ एव तिसृकाः। त्रिशब्दात् संज्ञायां के विहिते तिसृभावः स्त्रीलिङ्गं बहुवचनं च निपातनीयम्। तन्न, **लोकोपचारात् संज्ञेयं रूढेति** ॥२४६।

[वि० प०]

**त्रिच०।** श्रुतत्वादिह स्त्रियामिति त्रिचतुरोरेव विशेषणम्, न समासस्येत्याह – स्त्रियां वर्तमानयोरिति। तेन यदा समासप्रकृतिः पुंनपुंसकयोरपि वर्तते, त्रिचतुरी च स्त्रियां वर्तते, तदापि तिसृचतस्रौ भवत एव। यथा – प्रियास्तिस्रः, प्रियाश्चतस्रो वा यस्य, ययोर्येषामिति विग्रहे प्रियतिसा, प्रियतिस्रौ, प्रियतिस्रः। प्रियचतसा, प्रियचतस्रौ, प्रियचतस्रो वा ब्राह्मणाः इत्येवं नपुंसकेऽप्युदाहार्यम्। ननु यदि नपुंसकात् स्यमोर्लोपः क्रियते तदा तदुक्तप्रतिषेधात् कथमयमादेश इत्याह – प्रियतिसृ इत्यादि। वाशब्देनैतत् सूच्यते तदुक्तमपि कार्यं नाम्यन्तचतुरां तत्र विभाषया भवतीति निश्चितम्। यद्येवमिह बहुव्रीहावृदन्तलक्षणः कप्रत्ययः कथन्न भवतीति चेत्, नैवम्। तत्र बहुलत्वाद् **'असिद्धं बहिरङ्गम् अन्तरङ्गे'** (का० परि० ३३) इति न्यायाद् वा इत्यदोषः। पक्षे 'प्रियत्रि, प्रियचतुः कुलम्' इत्यपि भवति।

यदा तु त्रिचतुरी पुंसि नपुंसके वा वर्तते समासप्रकृतिस्तु स्त्रियां तदा तिसृचतस्रौ न भवतः। यथा प्रियास्त्रयः, प्रियाणि त्रीणि वा प्रियाश्चत्वारः, प्रियाणि चत्वारि यस्या ययोर्यासामिति विग्रहे प्रियत्रिः, प्रियत्री, प्रियत्रयः। तथा 'प्रियचत्वाः, प्रियचत्वारौ, प्रियचत्वारः स्त्रिय इति। दृष्टानुवृत्तिकतया विभक्त्यधिकारो वर्तते एव, किं विभक्तिग्रहणेन चेत्, नैवम्, स्वराधिकारोऽपि स्यात्। अथोत्तरत्र **"तौ रं स्वरे"** (२।३।२६) इति स्वरग्रहणबलान्नानुवर्तिष्यते। तर्हि सम्बन्धाधिकारनिवृत्त्यर्थम्, तेनेह विभाषा न वर्तते इति सिद्धम् ॥२४६।

[क० च०]

**त्रिचतुरोः।** ननु चतसृणां स्त्रीणां पुत्रः 'चतुःपुत्रः' इत्यत्र **"व्यञ्जनान्तस्य यत् सुभोः"** (२।५।४) इत्यतिदेशबलाद् विभक्त्यन्तस्यापि सुभोक्तत्वात् चतस्रादेशः कथन्न स्यात्, नैवम्। त्रिशब्दस्योत्तरपदे परे **"प्रकृतिश्च स्वरान्तस्य"** (२।५।३) इति प्रकृतिवद्भावात् तिस्रादेशो नास्ति। तत्साहचर्यात् चत्वार्शब्दस्याप्यतिदेशबलात् प्राप्तोऽपि चतस्रादेशो न भवतीति। सम्बन्धाधिकारनिवृत्त्यर्थमिति। ननु कथमुक्तं **"नॄ वा"** (२।३।२८) इति विकल्पविधानात्। **'उभयोर्विभाषयोर्मध्ये यो विधिः स नित्यः'**

(का० परि० ११) इति न्यायान्नित्यो भविष्यति, नैवम् । तत्रैवायं न्यायस्य प्रवेशः, यत्र पूर्वतो वाऽधिकारेण उत्तरत्र वाग्रहणं खण्डितुं शक्यते, तत्र **"न नामि दीर्घम्"** (२।३।२७) इत्यत्र निषेधबलादेव पूर्ववाशब्दनिवृत्तौ **"नॄ वा"** (२।३।२८) इति वाग्रहणं विना विकल्पोपलब्धिर्न स्यात् । तदा 'नृणाम्, नॄणाम्' इति न सिध्यति । अतो वाऽधिकारनिवृत्त्यर्थं विभक्तिग्रहणं विधेयमिति ॥२४६।

**[ समीक्षा ]**

'त्रि + जस्- शस्, चत्वार् + जस्- शस्, त्रि + भिस्, चत्वार् + भिस्, प्रियत्रि + सि, प्रियचत्वार् + सि' इस अवस्था में स्त्रीलिङ्ग में पाणिनि तथा कातन्त्रकार दोनों ही 'त्रि' को 'तिसृ' तथा 'चत्वार्' को 'चतसृ' आदेश करके 'तिस्रः, चतस्रः, तिसृभिः, चतसृभिः, प्रियतिसृ, प्रियचतसृ कुलम्' शब्दरूप सिद्ध करते हैं । पाणिनि का सूत्र है – **"त्रिचतुरोः स्त्रियां तिसृ चतसृ"** (अ० ७।२।९९) । अतः उभयत्र साम्य ही कहा जाएगा ।

**[ रूपसिद्धि ]**

१. **तिस्रः ।** त्रि (स्त्रीलिङ्ग) + जस्, शस् । प्रकृत सूत्र द्वारा 'त्रि' को 'तिसृ' आदेश, **"तौ रं स्वरे"** (२।३।२६) से ऋ को र् तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से स् को विसर्गादेश ।

२. **चतस्रः ।** चत्वार् (स्त्रीलिङ्ग) + जस्, शस् । प्रकृत सूत्र से 'चत्वार्' को 'चतसृ' आदेश तथा अन्य कार्य पूर्ववत् ।

३. **तिसृभिः ।** त्रि (स्त्रीलिङ्ग) + भिस् । प्रकृत सूत्र से त्रि- शब्द को 'तिसृ' आदेश तथा स् को विसर्ग ।

४. **चतसृभिः ।** चत्वार् (स्त्रीलिङ्ग) + भिस् । प्रकृत सूत्र से 'चत्वार्' को 'चतसृ' आदेश तथा स् को विसर्ग ।

५. **प्रियतिसृ कुलम् ।** प्रियत्रि (नपुंसकलिङ्ग) + सि, अम् । प्रियास्तिस्रो यस्य कुलस्य तत् । **"नपुंसकात् स्यमोर्लोपः"** (२।२।६) से सि- अम् लोप, 'तिसृ' आदेश ।

६. **प्रियचतसृ कुलम् ।** प्रियचत्वार् (नपुंसकलिङ्ग) + सि, अम् । प्रियाश्चतस्रो यस्य कुलस्य तत् । **"नपुंसकात् स्यमोर्लोपः"** (२।२।६) से सि- अम् प्रत्ययों का लोप तथा प्रकृत सूत्र से चत्वार् को 'चतसृ' आदेश ॥२४६।

## २४७. तौ रं स्वरे [२।३।२६]

**[सूत्रार्थ]**

स्वरादिविभक्ति के परे रहते 'तिसृ-चतसृ' आदेशघटित ऋ को र् आदेश होता है ॥२४७।

**[दु० वृ०]**

तौ तिसृचतस्रौ रं प्राप्नुतो विभक्तिस्वरे। तिस्रः, चतस्रः। बाधकबाधनार्थोऽयं योगः ॥२४७।

**[दु० टी०]**

तौ०। तद्ग्रहणं तिसृचतस्रोः कार्यित्वप्रतिपत्त्यर्थम्। अन्यथा त्रिचतुरोरेव कार्यितया प्रतीतयोरनुवृत्तिः स्यात् ततश्च तिसृचतस्रोरपवादो रादेशः स्यात्, नैवम्। रमिति कर्मपदं कर्तृपदमपेक्षते, कथं षष्ठ्यन्तयोस्त्रिचतुरोरनुवृत्तिः। अथ अर्थवशाद् विभक्तिविपरिणामश्चेत्, नैवम्, तिसृचतसृभ्यां कर्तृभ्यामर्थेन संबन्धात्। ननु तिसृचतस्रोरपि साध्यतया निर्दिष्टे कथमिह सिद्धतयाऽवधार्यौ, तस्मादनन्तरपरामर्शने तद्ग्रहणे सति निश्चयोऽस्तीति। ननु **"रम् ऋवर्णः"** (१।२।१०) इत्यनेनैव सिध्यतीत्याह – बाधकबाधनार्थोऽयमिति। 'तिस्रः, चतस्रः' इति घुट्यर् न भवति, 'तिस्रः, चतस्रः पश्य' इति, **"अग्निवच्छसि"** (२।१।६५) न भवति। 'प्रियतिस्रः, प्रियचतस्रः आगतः' इति ऋदन्तात् सपूर्वो न भवति। 'प्रियतिस्रि, प्रियचतस्रि'। **"अर् ङौ"** (२।१।६६) इत्यर् न भवति। **वाक्यकारस्य** तु समस्तेनैवारादेशेन भवितव्यमिति दर्शनम्। अत्र मण्डूकप्लुत्या व्यवस्थितविभाषा। **"न नामि"** (२।३।२७) इत्यत्र च नकारग्रहणं **सुखार्थम्** ॥२४७।

**[वि० प०]**

**तौ रम्०।** **"रम् ऋवर्णः"** (१।२।१०) इत्यनेनैव सिध्यति, किमर्थमिदमित्याह – बाधकबाधनार्थोऽयमिति। **"रम् ऋवर्णः"** (१।२।१०) इत्यस्य बाधको घुटि च **"अग्निवच्छसि"** (२।१।६५) इत्यादिनारादेशादिस्तस्य बाधनं बाधकबाधनं तदेवार्थः प्रयोजनमस्येति विग्रहः ॥२४७।

**[क० च०]**

**तौ रम्०।** रम् इति अस्वरोऽयमादेशः अश्रुतस्याकारस्य कल्पने प्रमाणाभावात्। अतो **'वर्णान्तस्य विधिः'** (का० परि० ५) इति न्यायाद् अन्तस्यैव भवति।

अथ किमर्थं स्वरग्रहणम्, न चान्तरत्वाद् विभक्त्यनुवर्तनं भविष्यतीति वाच्यम्, तदा तिस्रचतस्रोरिति रेफान्तम् इति पूर्वसूत्रे निर्दिशेत्, इदमपि न कृतं स्यात् ! अथ तथापि स्वरग्रहणाभावे व्यञ्जने कथं न स्यादिति चेत्, **"न नामि दीर्घम्"** (२।३।२७) इत्यत्र नकारयुक्ते आमि दीर्घनिषेधात् । अन्यथा न्वागमे कृते व्यञ्जने परे रेफ एव स्याद् अतो दीर्घप्राप्तौ कुतो निषेधः सार्थक इति ? सत्यम् । इह स्वरग्रहणस्थितावेव पूर्वत्र विभक्तिग्रहणं सम्बन्धाधिकारनिवृत्त्यर्थमिति व्याख्यातुं शक्यते ! अन्यथा पूर्वत्र स्वराधिकारनिवृत्त्यर्थमेव विभक्तिग्रहणं कथं सम्बन्धाधिकारनिवृत्त्यर्थं भविष्यतीति **हेम**स्यायमाशयः ॥२४७।

**[ समीक्षा ]**

'तिसृ + जस्-शस्, चतसृ + जस्-शस्' इस अवस्था में कातन्त्रकार तथा पाणिनि दोनों ऋ को 'र्' आदेश करके 'तिस्रः, चतस्रः' शब्दरूप सिद्ध करते हैं। पाणिनि का सूत्र है – **"अचि र ऋतः"** (अ० ७।२।१००) । अतः उभयत्र साम्य है।

**[ रूपसिद्धि ]**

१. **तिस्रः**। त्रि + जस्, शस् । **"त्रिचतुरोः स्त्रियां तिसृ चतसृ विभक्तौ"** (२।३।२५) से तिसृ आदेश । प्रकृत सूत्र से ऋकार को रकार तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से स् को विसर्गादेश ।

२. **चतस्रः**। चत्वार् + जस्, शस् । **"त्रिचतुरोः स्त्रियां तिसृ चतसृ विभक्तौ"** (२।३।२५) से चतसृ आदेश, प्रकृत सूत्र से ऋ को र् एवं स् को विसर्गादेश ॥२४७।

## २४८. न नामि दीर्घम् [ २।३।२७ ]

**[ सूत्रार्थ ]**

नाम् (नुआगम् + षष्ठीबहुवचन आम् प्रत्यय) परे रहते 'तिसृ-चतसृ' में ऋ को दीर्घादेश नहीं होता है ॥२४८।

**[ दु० वृ० ]**

तौ तिसृचतस्रौ दीर्घं न प्राप्नुतः सनावामि परे । तिसृणाम्, चतसृणाम् ॥२४८।

**[ दु० टी० ]**

**न नामि०**। 'आमि न दीर्घम्' इत्युक्ते वचनात् रानौ भविष्यति ? सत्यम् । नकारोच्चारण ज्ञापयति – रत्वेन न्वागमो न बाध्यते, अन्यथा बाधकबाधनार्थो रादेशो

यथा अरादीन् बाधते तथा न्वागममपि बाधते। न च वक्तव्यम् – **'ज्ञापकज्ञापिता विषयो ह्यनित्याः'** (का० परि० ६०) इत्यनित्यस्य लक्ष्यानुरोधात्, तेन 'अतितिसृणी, अतिचतसृणी कुले' इत्यादिकं सिद्धं भवति। 'न नामि' इत्युक्तेऽर्थात् तौ तिसृचतस्रौ दीर्घं न प्राप्नुतः इति गम्यते, प्रतिषेधस्यान्यस्याभावात्? सत्यम्। दीर्घग्रहणं **सुखार्थम्**॥२४८।

**[वि० प०]**

**न नामि०।** नकारयुक्त आम् नाम्। स चार्थात् न्वागमसहित इति सनावामि इति। **"दीर्घमामि सनौ"** (२।२।१५) इत्यनेन दीर्घत्वं प्राप्तं प्रतिषिध्यते। यद्येवं नकारग्रहणं किमर्थम्, अर्थात् सनाविति भविष्यतीति केवले आमि प्राप्तेरभावात्, सत्यम्। नकारोच्चारणं ज्ञापयति-रत्वेन न्वागमो न बाध्यते, अन्यथा बाधकबाधनार्थत्वाद् अरादेशादिकं यथा रत्वेन बाध्यते तथा न्वागममपि बाधेत इति, तेन 'प्रियतिसृणी, प्रियचतसृणी कुले' इति सिद्धं भवति॥२४८।

**[समीक्षा]**

'तिसृ+नुट्+आम्, चतसृ+नुट्+आम्' इस स्थिति में पाणिनि और कातन्त्रकार दोनों ही शाब्दिकाचार्य प्राप्त दीर्घादेश का निषेध करके **'तिसृणाम्, चतसृणाम्'** शब्द सिद्ध करते हैं। कातन्त्र में **"दीर्घमामि सनौ"** (२।२।१५) से प्राप्त दीर्घ का प्रकृत सूत्र से निषेध किया जाता है। पाणिनीय व्याकरण में **"नामि"** (अ०६।४।३) से प्राप्त दीर्घ का निषेध होता है **"न तिसृचतसृ"** (अ० ६।४।४) सूत्र से।

**[रूपसिद्धि]**

१. **तिसृणाम्।** त्रि+आम् (स्त्रीलिङ्ग)। स्त्रीलिङ्ग में **"त्रिचतुरोः स्त्रियां तिसृ चतसृ विभक्तौ"** (२।३।२५) से त्रि को तिसृ आदेश, **"आमि च नुः"** (२।१।७२) से नु-आगम, **"दीर्घमामि सनौ"** (२।२।१५) से प्राप्त दीर्घ का प्रकृत सूत्र से निषेध तथा **"रषृवर्णेभ्यः"** (२।४।४८) इत्यादि से न् को ण् आदेश।

२. **चतसृणाम्।** चत्वार् (स्त्रीलिङ्ग)+आम्। चत्वार् को चतसृ आदेश तथा अन्य सभी कार्य पूर्ववत्॥२४८।

## २४९. नॄ वा [२।३।२८]

**[सूत्रार्थ]**

नाम् (नु-आगमसहित षष्ठीविभक्तिबहुवचन-आम् प्रत्यय) के परवर्ती होने पर 'नृ' शब्दगत 'ऋ' को विकल्प से दीर्घ होता है ॥२४९।

**[दु० वृ०]**

नृ-शब्दो दीर्घं प्राप्नोति वा सनावामि परे। नृणाम्, नॄणाम् ॥२४९।

**[दु० टी०]**

**नॄ वा।** अविभक्तिनिर्देशः **सुखार्थः।** प्राप्ते विभाषेयम्। नञोऽनुवृत्तौ न किञ्चित् फलम् इति उत्तरत्र वा न वर्ततेऽधिकारस्येष्टत्वात् ॥२४९।

**[क० च०]**

**नॄ वा।** वाग्रहणं किमर्थम्, न ह्यत्र नॄ इति क्रियतां तदा **"दीर्घमामि सनौ"** (२।२।१५) इति दीर्घे सिद्धे वचनबलादेव विकल्पो भविष्यति। तथा वाग्रहणं विना नञोऽनुवृत्तिः कथन्न स्याद् इति चेत् तदा **"नॄ च, न नामि दीर्घम्"** (२।३।२७, २८) इत्येकयोगः कृतः स्यात्। न चैकयोगे चकारकरणं गौरवम् इति वाच्यम्, वरमक्षराधिक्यं न तु भिन्नयोग इति न्यायात्? सत्यम्। वाग्रहणं स्पष्टार्थमिति **हेमकरः।** ननु कथमिदमुच्यते, यावता **"दीर्घमामि सनौ"** (२।२।१५) इत्यत्र वाग्रहणनिवर्तने तस्य प्रयोजनम्। तथा च पञ्जी। वाशब्दोऽत्र न वर्तते **"नॄ वा"** इति विकल्पविधानाद् इत्युक्तं **"दीर्घमामि सनौ"** (२।२।१५) इत्यत्र? सत्यम्। अत्र स्थिते वाग्रहणे तत्र पञ्ज्यां यदुक्तं तदेव भद्रम्, इह वाग्रहणाभावे तु दीर्घमामि सनावित्यत्र सग्रहणस्य व्याप्त्यर्थत्वेन विकल्पनिवृत्तिरिति व्याख्येयम्। तत्र **प्रतिपत्तिगौरवनिरासार्थं** सहग्रहणं यदुक्तं तदिह वाग्रहणस्थितावेव बोद्धव्यमिति ॥२४९।

**[समीक्षा]**

'नृ+नु+आम्' इस स्थिति में पाणिनि तथा कातन्त्रकार दोनों के ही निर्देशानुसार वैकल्पिक दीर्घादेश होकर 'नृणाम्, नॄणाम्' से दो शब्दरूप सिद्ध होते हैं। पाणिनि का एतद्-विषयक सूत्र है– "नृ च" (अ० ६।४।६)।

**[रूपसिद्धि]**

१. **नॄणाम्, नृणाम्।** नृ+आम्। **"आमि च नुः"** (२।१।७२) से नु आगम, प्रकृत सूत्र से दीर्घ तथा **"रषृवर्णेभ्यः०"** (२।४।४८) से नकार को णकारादेश- नॄणाम्। दीर्घाभाव पक्ष में- नृणाम् ॥२४९।

## २५०. त्यदादीनाम विभक्तौ [ २।३।२९ ]

**[ सूत्रार्थ ]**

विभक्ति के परे रहने पर त्यदादिगणपठित शब्दों के अन्तिम वर्ण को अकारादेश होता है ।।२५०।

**[ दु० वृ० ]**

त्यदादीनामन्तस्याकारो भवति विभक्तौ । स्यः, त्यौ । सः, तौ । यत्र, तत्र । सर्वनामान्तर्गणो द्विपर्यन्त इह त्यदादिः । विभक्ताविति किम् ? त्यदीयः ।।२५०।

**[ दु० टी० ]**

**त्यदा०।** त्यदेवादिर्येषां ते त्यदादयः, सर्वनामसु ये पठ्यन्ते । सर्वनामसन्निवेशाच्च संज्ञोपसर्जनीभूतानां न भवति । **त्यद्, त्यदौ, त्यदः। अतित्यद्, अतित्यदौ, अतित्यदः।** ते पुनरर्थाद् द्विपर्यन्ता एव युष्मदस्मदोरन्तलोपाद् युष्मदस्मद्भ्यां प्रागपाठाच्च व्यवहितस्य भवच्छब्दस्य न भवतीत्याह – सर्वनामान्तर्गण इत्यादि । **केचित्** त्यदादीनां या विभक्तिस्तस्यां श्रुतत्वात् त्यदादीनामेव असंज्ञोपसर्जनरूपाणामिति व्याचक्षते ।प्रधानानां तु समासे तदन्तविधिना भवत्येव परमसः, परमतौ, परमते । **'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य'** (का० परि० ३१) इत्यनित्यैव । तथा च तासां स्वसंज्ञाभिरिति निर्देशस्तस्माद् **'या- सा- एषा'** इति न दुष्यति ।

नन्वेकशब्दोऽत्र पठ्यते, तस्य केवलस्याकारे कृते कथं तद्विकारबाधा न स्यात् । एके, एकेन, एकेभ्य इति । नैतदेवम् । त्यदादिषु एकशब्दस्य पाठः । कर्मण्युपमाने त्यदादौ **दृशष्टक्सकौ च, त्यदादिभ्य ईयञ्च** शेषेऽर्थे दृश्यते इति चरितार्थः, नैवम् । त्यदादीनाम् इति व्यक्तिप्रधानोऽयं निर्देशः । **जातौ** हि **'सकृल्लक्ष्ये लक्षणस्य चरितार्थता भवति'।** सत्यम् । इह तद्गुणसंविज्ञानोऽयं बहुव्रीहिर्गुणाभि-धायी, अवयवैर्विना नावयतीति कारणे **कार्योपचाराद्** बहुवचनम् । यथा 'देवदत्तादीन् भोजय' । एकस्य भोजनेऽन्यस्य भोजनं नास्तीत्यन्यत्र प्रवर्तते । द्विशब्दात् प्राक् पाठः पुनरद्व्यादेरिति वर्जनं मा भूत् । अतो न चोदनीयम् । द्विशब्दस्य हि व्यवहितस्य न स्यात् **"दोऽद्वेर्मः"** (२।३।३१) इति प्रतिषेधाच्च । अ इत्यविभक्तिनिर्देशः **सुखार्थः।** न विभक्तिरविभक्तिरिति नाशङ्कनीयम्, कार्यस्याश्रूयमाणत्वात् ।

अथ दीर्घोऽनुवर्तते । स च वचनादस्वरस्यापि भविष्यति, नैवम् । वचनन्तु अविभक्तिनिर्देशे चरितार्थम्, तेषामित्यादिनिर्देशाच्च । आमीति नानुवर्तते इति

विभक्तावित्युत्तरार्थं च । तत्पुत्रो मत्पुत्र इति विभक्तिव्यावर्तनादेव प्रत्ययलोपलक्षणं न भवति । तसादीनामप्रस्तुतानामपि इह विभक्तिग्रहणेन ग्रहणं **"विभक्तिसंज्ञा विज्ञेयाः"** (२।६।२४) इति वचनात् केचित् त्यच्छब्दस्य छन्दसि प्रयोग इति प्रतिपद्यन्ते ॥२५०।

**[ वि० प० ]**

**त्यदादीनाम्०** । "**नॄ वा**" (२।३।२८) इत्यतो वाग्रहणं नानुवर्तते, अनिष्टत्वात् । अ इति लुप्तप्रथमैकवचनम् आदिलोप इत्यादिना लोपः । अथ न विभक्तिरविभक्तिरिति कथन्न भवति चेत्, नैवम्, अन्यस्य विधेयस्याभावात् । अथ दीर्घोऽनुवर्तते इति चेत्, नैवम् । कथमन्त्यव्यञ्जनस्यासौ भवति, दीर्घादेः स्वरधर्मत्वात् । वचनबलादिति चेत्, तदयुक्तम् । अ इति लुप्तविभक्तिनिर्देशेनैव वचनं चरितार्थम् । कथमन्यथा कल्पयितुं न्याय्यम् । किञ्च तेषामित्यादिनिर्देशादवसीयते इत्याह - अकारो भवतीति । "**विभक्तिसंज्ञा विज्ञेया वक्ष्यन्तेऽतः परं तु ये**" (२।६।२४) इत्यादिना तसादीनामपि विभक्तित्वम् । अतस्तेष्वपि दर्शयति । यत्र तत्रेति । "**त्र सप्तम्या**" (२।६।२९) इति त्रप्रत्ययः । सर्वनामेत्यादि । ननु कथं द्विपर्यन्त इत्यवसीयते नहि तत्र वृत्करणमस्ति ? सत्यम् । "**एषां विभक्तावन्तलोपः**" (२।३।६) इत्यनेनैव युष्मदस्मदोरन्तलोपस्य सिद्धत्वात् । एवं तर्हि भवन्तुशब्दस्य कथन्न भवतीति चेत्, नैवम् । युष्मदस्मद्भ्यां व्यवहितत्वात्, अन्यथा पूर्वमाभ्यां पठेत् ॥२५०।

**[ क० च० ]**

**त्यदादीनाम्०** । ननु यदि अकारः कार्यः स्यात् तदा निःसंदेहार्थम् अद् विभक्ताविति निर्दिशेद् इत्याह – किञ्चेति । **वस्तुतस्तु** अकारात् सिलोपोऽपि सूत्रत्वाद् भविष्यतीति । सूत्रत्वं च वचनेनोभयत्र समानमित्याह – किञ्चेति ! आभ्यां पूर्वमेव पठेदिति **पञ्जी** । ननु कथम् इदमुच्यते, अथ भवच्छब्दस्य परत्र पाटे फलमस्ति । तथाहि त्यदादिगणपठितानां द्वन्द्वे पूर्वपठितस्य लोपः क्रियते । तथा च **श्रीपतिसूत्रम्** – "**शेषपूर्वयोस्त्यदादिभिः**" (कात० परि० का० ८४) इत्यनेन त्यदादिभिः सह **द्वन्द्वे** शेषस्यात्यदादेः पूर्वस्य च त्यदादेर्लुग् भवति । ततश्च अहं च भवांश्चेति **द्वन्द्वे** भवन्ताविति स्याद् ।

**अत्राभ्यां पूर्वपाठे** तु **भवांचाहं चेत्येकशेषे** वा **अत्यनिष्टरूपं स्यात्, नैवम् । अस्मन्मते** एकशेषो नास्तीति, किन्तु ईदृशा एव शब्दा ईदृशेष्वर्थेषु

वर्तन्ते इति। ननु यदि द्विपर्यन्तस्त्यदादिरुच्यते तदा कर्मण्युपमाने त्यदादावित्यत्र –

**कियन्मात्रं जलं विप्र! जानुदघ्नं नराधिप!**

**तथापीयमवस्था ते नहि सर्वे भवादृशाः॥**

इति प्रयोगः कथं स्यात्। त्यदादावुपपदे टक्सकाविति वक्ष्यति, सत्यम् इहेति **वृत्ता**विहपदेन इहप्रकरणे द्विपर्यन्तस्त्यदादिरित्यर्थः। प्रकरणान्तरस्य कार्ये सुतरामेव त्यदादित्वम्।२५०।

**[ समीक्षा ]**

'त्यद् + सि, त्यद् + औ, तद् + सि, तद् + औ, यद् + ङि = त्र, तद् + ङि = त्र' इस स्थिति में दोनों ही व्याकरणों में त्यदादि-गणपठित शब्दों के अन्तिम वर्ण को अकारादेश किया जाता है, जिसके फलस्वरूप 'स्यः, तौ, सः, तौ, यत्र, तत्र' शब्दरूप सिद्ध होते हैं। पाणिनि का सूत्र है– **"त्यदादीनामः"** (अ० ७।२।१०२)। अतः उभयत्र प्रक्रियागत साम्य है। व्याख्याकारों ने सर्वनामसंज्ञक सर्वादिगण में पठित शब्दों के अन्तर्गत **'द्वि'** शब्दपर्यन्त ही त्यदादिगण स्वीकार किया है।

**[ रूपसिद्धि ]**

१. **स्यः**। त्यद् + सि। प्रकृत सूत्र से द् को अ, **"अकारे लोपम्"** (२।१।१७) से पूर्ववर्ती अकार का लोप, **"तस्य च"** (२।३।३३) से त् को स् तथा सिप्रत्ययगत सकार को विसर्गादेश।

२. **त्यौ**। त्यद् + औ। द् को अ, अलोप तथा वृद्धि।

३. **सः**। तद् + सि। द् को अ, अलोप, त् को स् तथा सिप्रत्ययगत सकार को विसर्गादेश।

४. **तौ**। तद् + औ। द् को अ, अलोप तथा वृद्धि।

५. **यत्र**। यद् + ङि। द् को अ, अलोप तथा **"त्र सप्तम्याः"** (२।६।२९) से ङि को 'त्र' आदेश।

६. **तत्र**। तद् + ङि। द् को अ, अलोप तथा त्र आदेश॥२५०।

## २५१. किम् कः [२।३।३०]

**[सूत्रार्थ]**

विभक्ति के परे रहते 'किम्' शब्द को 'क' आदेश होता है ॥२५१।

**[दु० वृ०]**

किम्-शब्दः को भवति विभक्तौ । कः, कौ, कदा । विभक्ताविति किम् ? किंवान् ॥२५१।

**[दु० टी०]**

**किम्०** । किम्-शब्दः सर्वनामाव्ययश्चास्ति । अव्ययाद् विभक्तेर्लुगिति सर्वनामैव गृह्यते । किञ्च त्यदादीनामिति विशेषणात् । तथा च संज्ञोपसर्जनयोर्न भवति – किमौ, किमः, अतिकिमौ, अतिकिमः । अथ किमर्थं क आदिश्यते 'किमः' इत्युच्यताम्, त्यदादित्वादन्तस्याकारे कृतेऽन्त्यसदेशस्य इकारस्य अकारो भविष्यति, ततश्चाकारलोपे सिध्यति, नैवम् । अकारस्य अकारो विकारनिवृत्त्यर्थः कथन्न स्यात् – काभ्याम्, के, कयोरिति । तर्हि कादिति निर्दिश्यताम् , अकारमुच्चारणार्थं कृत्वा । **'कृकवाकुः'** इत्यत्र न भवति, त्यदाद्यनुवर्तनात् । तर्हि त्यदादिष्वकि कृते स्याद् विशेषाभावात् । यद्येवम् - 'इमः' इत्युच्यताम्, सत्यम् । किमः कादेशः साकोऽपि यथा स्यात् । न च वक्तव्यम्, अनिर्दिश्यमानत्वात् साको न स्यात्, वचनाद् इमोऽद्भावेऽगूवर्जनाच्च ॥२५१।

**[वि० प०]**

**किम्०** । कदेति । कस्मिन् काल इति विगृह्य **"काले किंसर्वयदेक०"** (२।६।२४) इति दाप्रत्ययः ॥२५१।

**[समीक्षा]**

'किम् + सि, किम् + औ, किम् + ङि- दा' इस स्थिति में पाणिनि तथा कातन्त्रकार दोनों ही शाब्दिकाचार्य 'किम्' शब्द के स्थान में 'क' आदेश करके 'कः, कौ, कदा' शब्दरूप सिद्ध करते हैं । पाणिनि का सूत्र है – **"किमः कः"** (अ० ७।२।१०३) । अतः उभयत्र साम्य है ।

**[रूपसिद्धि]**

१. **कः**। किम् (पुंलिङ्ग) + सि । प्रकृत सूत्र से 'किम्' को क तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से स् को विसर्गादेश ।

२. **कौ।** किम् (पुंलिङ्ग) + औ । प्रकृत सूत्र से 'किम्' को 'क' आदेश तथा **"ओकारे औ औकारे च"** (१।२।७) से अ को औ – औकारलोप ।

३. **कदा।** किम् + ङि । कस्मिन् काले । **"काले किंसर्व०"** (२।६।३४) इत्यादि से 'दा' प्रत्यय, समास, विभक्ति (ङि)-लोप, **"विभक्तिसंज्ञा विज्ञेया०"** (२।६।२४) से विभक्तिसंज्ञा तथा 'किम्' को 'क' आदेश ।।२५१।

## २५२. दोऽद्वेर्मः [२।३।३१]

**[सूत्रार्थ]**

विभक्ति के परे रहते द्वि-भिन्न त्यदादिशब्दगत दकार को मकारादेश होता है ।।२५२।

**[दु० वृ०]**

त्यदादीनां दकारस्य मकारो भवति विभक्तावद्वेः । इमौ, इमकौ । अद्वेरिति किम् ? द्वौ ।।२५२।

**[दु० टी०]**

**दोऽद्वे०।** अद्वेरिति वचनादिह दकारेण न त्यदादिर्विशिष्यते, अपि तु त्यदादिभिर्गुणीभूतैर्दकारो विशिष्यते । त्यदादीनां यो दकारोऽवयवो यत्र तत्र स्थित इति, तर्हि त्यदाद्यत्वमपि बाधते,नैवम् । अनन्त्ये कृतार्थत्वात् । ननु उभयोः सावकाशत्वात् परो भवितुमर्हतीति, नैवम् । तेषामित्यादिनिर्देशात् **'पूर्वपरयोः परो विधिर्बलवान्'** (कलाप०, पृ० २२१।५०) इत्यत्र परशब्दस्येष्टवाचित्वात् पूर्वोऽपि भवतीति, एवं सतीदम्–शब्द एव परिशिष्यते । 'इदमिमः' इति न कृतम् । इदम इमो भवति, मकारस्योत्तरार्थत्वात् ।।२५२।

**[क० च०]**

**दोऽद्वे०।** ननु **"तेषां द्वौ द्वौ"** (१।१।४) इत्यादिज्ञापकाद् द्विशब्दस्य दकारस्य स्थाने मकारो न भविष्यति, किम् अद्वेरिति प्रतिषेधेन ? सत्यम् । अत्र सूत्रत्वान्मकारो न भविष्यति इत्युक्तेऽत्र मकारः प्राप्नोतीति निषेधः सार्थक इति ।।२५२।

**[समीक्षा]**

'इदम् + औ , इदक् + औ' इस स्थिति में पाणिनि तथा शर्ववर्मा दोनों ही आचार्य दकार को मकारादेश करके 'इमौ, इमकौ' शब्दरूप निष्पन्न करते हैं । पाणिनि का सूत्र है – **"दश्च"** (अ० ७।२।१०९) । अतः उभयत्र साम्य है ।

**[ रूपसिद्धि ]**

१. **इमौ।** इदम् + औ। **"त्यदादीनाम विभक्तौ"** (२।३।२९) से म् को अ, **"अकारे लोपम्"** (२।१।१७) से दकारोत्तरवर्ती अकार का लोप, प्रकृत सूत्र से दकार को मकार तथा **"ओकारे औ औकारे च"** (१।२।७) से अ को औ- परवर्ती औ का लोप।

२. **इमकौ।** इदम् + औ। म् को अ, पूर्ववर्ती अ का लोप, **"अव्ययसर्वनाम्नः स्वरादन्त्यात् पूर्वोऽक् कः"** (२।२।६४) से दकार के बाद अक् तथा प्रकृत सूत्र से दकार को मकारादेश ॥२५२।

## २५३. सौ सः [ २।३।३२ ]

**[ सूत्रार्थ ]**

त्यदादिगणपठित शब्दों में विधमान दकार का सकारादेश होता है, सि- विभक्ति परे रहते।२५३।

**[ दु० वृ० ]**

त्यदादीनां दकारस्य मकारो भवति सौ विभक्तौ। असौ, असकौ। साक्षात् सःविति किम्? असौ पुत्रोऽस्येति **अदःपुत्रः** ॥२५३।

**[ दु० टी० ]**

**सौ०।** अद्वेरिति न वर्तते सावसम्भवात्। द्वाविच्छतीति विनि दीर्घत्वे क्विपि कृते द्वीरिति भवितव्यम्। नान्यदा त्यदादीनामिति विशेषणात्। तथा च संज्ञोपसर्जनयोर्न भवति – **अदाः, अत्यदाः।** सौ विभक्ताविति। ननु किमर्थं विभक्तादिति विशेषणम्, सिरयमर्थवान् विभक्तित्वं न व्यभिचरतीति, सत्यम्। सौ विभक्तौ परतो वर्तमानानां त्यदादीनां नान्यस्मिन् परत इति प्रतिपत्त्यर्थः, तेन युक्तार्थे न भवति प्रत्ययलोपलक्षणेनेत्याह – साक्षादित्यादि। तथा अकि कृतेऽनेकवर्णव्यवहितेऽपि भवत्येव। अत्रापि परिशिष्यतेऽदस एव ॥२५३।

**[ वि० प० ]**

**सौ०।** सौ विभक्ताविति। ननु किमर्थमिदं विभक्तावित्यधिकृत्य सिर्विशिष्यते। न ह्ययं विभक्तित्वं व्यभिचरतीति? सत्यम्। सौ विभक्तौ परतो वर्तमानानामेषां दकारस्य सो भवति, नान्यस्मिन् परत इति प्रतिपत्तव्यम्। तेन युक्तार्थे न भवति, प्रत्ययलोपलक्षणे सत्यपीत्याह – साक्षादित्यादि ॥२५३।

[क० च०]

**सौ०** । तेन युक्तार्थे न भवतीत्यादि । ननु समासे सुभोरुक्तमेव भवति । अन्यत्र प्रत्ययलोपलक्षणं नास्तीति **"व्यञ्जनान्तस्य यत् सुभोः"** (२।५।४) इति नियमबलादिति व्याख्यातमेव, तत् किं विभक्त्यधिकारेण ? सत्यम् । विभक्त्यधिकारो विधेय एवात्र । सेर्विशेषणम् **"अद् व्यञ्जनेऽनक्"** (२।३।३५), **"अपां मे दः"** (२।३।४६) इत्यादिषु साक्षात् प्रयोजनस्य सत्त्वात् तदर्थमिति । तथाहि तत्र व्यञ्जनस्य विशेषणं विभक्तावेव परतो भवति, **"व्यञ्जनान्तस्य यत् सुभोः"** (२।५।४) इत्यतिदेशादप्यस्मिन्नुत्तरपदे परतः प्राप्तोऽप्यादेशो न भवतीति नियमार्थमिति। **"अपां मे दः"** (२।३।४६) इत्यत्र विभक्त्यधिकाराद् 'अब्भारः' इत्यत्र न भवति । यद् वा **केचिद्** अत्र विभक्त्यधिकारः स्पष्टार्थः इति **संक्षेपः**। अन्यथा यत्र प्रत्ययोत्तरपदं न विद्यते तत्र प्रत्ययलोपलक्षणं स्यात् । ततो नित्यत्वाद् व्यञ्जनाच्चेति सिलोपेऽयमादेशः स्यादिति ।।२५३।

[समीक्षा]

'अदस् + सि, अदस् + अक् + सि' इस अवस्था में पाणिनि तथा कातन्त्रकार दोनों ही दकार को सकारादेश करके 'असौ, असकौ' शब्दरूप सिद्ध करते हैं । पाणिनि का सूत्र है – **"तदोः सः सावनन्त्ययोः"** (अ० ७।२।१०६) । अतः उभयत्र साम्य है । सूत्ररचना की दृष्टि से पाणिनि 'त् - द्' दोनों ही वर्णों के स्थान में सकारादेश का विधान एक ही सूत्र– द्वारा करते हैं, जबकि कातन्त्र में एतदर्थ पृथक्–पृथक् दो सूत्र हैं । टीकाकारों ने इसे सुखार्थ माना है – **"भिन्नयोगः सुखार्थ एव"** (कात० वृ० टी० २।३।३३) ।

[रूपसिद्धि]

१. **असौ** । अदस् + सि । **"त्यदादीनाम विभक्तौ"** (२।३।२९) से स् को अ, **"अकारे लोपम्"** (२।२।१७) से पूर्ववर्ती अकार का लोप, प्रकृत सूत्र से द् को स् तथा **"सावौ सिलोपश्च"** (२।३।४०) से अकार को औकार – सिलोप ।

२. **असकौ** । अदस् + सि । स् को अ, पूर्ववर्ती अ का लोप, **"अव्ययसर्वनाम्नः स्वरादन्त्यात् पूर्वोऽक् कः"** (२।२।६४) से अक्, द् को स्, अकार को औकार तथा सिलोप ।।२५३।

## २५४. तस्य च [ २।३।३३ ]

**[ सूत्रार्थ ]**

'सि' विभक्ति के परवर्ती होने पर 'त्यदादि' गणपठित शब्दों में विद्यमान तकार को सकारादेश होता है ।।२५४।

**[ दु० वृ० ]**

त्यदादीनां तकारस्य सकारो भवति सौ विभक्तौ । स्यः, स्यकः, सः, सकः । साक्षात् साविति किम् ? तत्पुत्रः ।।२५४।

**[ दु० टी० ]**

**तस्य।** कथमेषा सेति स्त्रीप्रत्ययेन व्यवधानात् । नैवम् । प्रागेव सौ सत्वं ततोऽत्वम्, ततः स्त्रियामादा । विभक्तिष्वपि **'लिङ्गग्रहणे लिङ्गविशिष्टस्यापि ग्रहणात्'** (का० परि० १७) । कथं 'हे सः' इति सन्निपातलक्षणत्वाद् ह्रस्वात् सिलोपो न स्यात् ? सत्यम् । वर्णग्रहणे निमित्तत्वाद् इत्यभ्युपगतम् । पूर्ववत् 'स पुत्रोऽस्य' इति विग्रहः, तस्य विकारः सकारो भवतीति विकारस्थः स इति षत्वम् । आदेशेऽपि **"एषसपरो व्यञ्जने०"** (१।५।१५) इति नोपपद्यते । तस्येत्यकारः **श्रुतिसुखार्थ** एव । एकयोगे कृते सिध्यति चकारोऽदसोऽनुकर्षणार्थो भविष्यति ? सत्यम् । भिन्नयोगः **सुखार्थ** एव ।।२५४।

**[ वि० प० ]**

**तस्य०।** तस्येत्यकारः **श्रुतिसुखार्थ** इति तकारमात्रस्यैव सकार इति । **तत्पुत्र** इति । 'स पुत्रोऽस्य' इति विग्रहः ।।२५४।

**[ क० च० ]**

**तस्य।** तकारमात्रस्य सकार इति । एतेनैकवर्णस्थानिकृतत्वाद् विकारत्वेन 'एषः' इत्यत्र षत्वं सिद्धम् । अन्यथा यदि पुनः समुदायस्य स्थाने (सस्वरः) सकारः स्यात् तदाऽनेकवर्णस्थाने विधीयमानत्वात् षत्वं न स्यात् । ननु आदेशविकारयोः को भेदः इति ? अत्र **कुलचन्द्रः** – अनेकवर्णस्य स्थाने यो विधीयते, स आदेशः । एकवर्णस्य स्थाने यो विधीयते, स विकार इति । अतस्तिस्रादेशस्य समुदायस्थाने विधीयमानत्वान्न षत्वम् । तथा च 'स्थस्तिष्ठ' इत्यत्र षत्वनिर्देशः । अत्र । षत्वविधौ **टीकायाम्** अनेकवर्णस्थानीयस्य तिस्रादेशस्य विकारशब्देनोक्तत्वात् ।

तथाहि आगमसाहचर्याद् विकारस्याप्येकवर्णस्यैव षत्वम्, न पुनरनेकवर्णस्य विकारस्येति । एतेन तिसृभिः' इत्यत्र न दुष्यति, किञ्च **"समानः सवर्णे०"** (१।२।१) इत्यत्रैकवर्णस्थाने कृतस्य दीर्घस्य विकारादेशशब्दाभ्यां व्यवहारात् । तस्माद् वादिभेदान्नामभेदः । **वस्तुतः** पुनरभेद इति **महान्तः** । तर्हि अस्मिन्नेव सूत्रे तकारस्य सकारो विकारस्थ इति षत्वम् । आदेशे हि **"एषसपरः"** (१।५।१०) इति षत्वं नोपपद्यते इति कथमुक्तं **टीकायाम्** ? सत्यम् । इदन्त्वा**पिशलीय**मतमवलम्ब्योक्तम् ।

किञ्चैवं व्याख्यातव्या **टीका।** तकार इति कारशब्दः स्वरूपे तकारमात्रस्य सकारवर्णमात्रं भवतीति शब्दो हेतौ विकारस्थ इति एकवर्णविकार इत्यर्थः । आदेशे हीति । अकारयुक्त आदेश इति युक्तशब्दलोपेऽपि समानलक्षणो दीर्घः । ततश्चानेकवर्णस्थाने कृतादेशत्वात् तिसृशब्दवन्न षत्वमिति भावः । ननु 'तत्पुत्रः' इत्यादिकं कथं प्रत्युदाहृतं द्व्यङ्गविकलत्वात् । तथाहि – यथा साक्षाद् विभक्तिर्नास्ति तथा **"सः पुत्रोऽस्य"** इति बहुव्रीहेरन्यपदार्थत्वेन सर्वनामत्वेऽपि नास्तीति ? सत्यम् । **"स्मै सर्वनाम्नः"** (२।१।२५) इत्यत्र यस्य संज्ञा कर्तव्या तदुत्तरविभक्तिमाश्रित्यैव गौणमुख्यतात्यवहार इति व्याख्यातम् । अतोऽन्तर्वर्तिविभक्तिमाश्रित्य मुख्यता ज्ञाते । तेन 'त्वकत्पुत्रः, मकत्पुत्रः' इत्यादावक्प्रत्ययः सिद्धो भवतीति दिक् ॥२५४।

**[ समीक्षा ]**

'त्यद्+सि, त्यद्+अक्+सि, तद्+सि, तद्+अक्+सि' इस अवस्था में दोनों ही आचार्य तकार को सकारादेश करके 'स्यः, स्यकः, सः, सकः' शब्दरूप सिद्ध करते हैं । पाणिनि का सूत्र है – **"तदोः सः सावनन्त्ययोः"** (अ० ७।२।१०६) । अतः उभयत्र साम्य ही है ।

**[ रूपसिद्धि ]**

१. **स्यः ।** त्यद्+सि । **"त्यदादीनाम विभक्तौ"** (२।३।२९) से दकार को अकार, **"अकारे लोपम्"** (२।१।१७) से दकारोत्तरवर्ती अकार का लोप, प्रकृत सूत्र से तकार को सकार तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से सकार को विसर्ग ।

२. **स्यकः ।** त्यद्+सि । द् को अ, अ का लोप, अक्प्रत्यय, प्रकृत सूत्र से त् को स् तथा स् को विसर्ग ।

३. **सः ।** तद्+सि । दकार को अकार, पूर्ववर्ती अकार का लोप, प्रकृत सूत्र से तकार को सकार तथा स् को विसर्ग ।

४. **सकः**। तद् + सि। द् को अ, पूर्ववर्ती अ का लोप, अक् प्रत्यय, प्रकृत सूत्र से तकार को सकार तथा स् को विसर्गादेश ॥२५४।

## २५५. इदमियमयं पुंसि [२।३।३४]

### [सूत्रार्थ]

सि-विभक्ति के परे रहते 'इदम्' शब्द को स्त्रीलिङ्ग में 'इयम्' तथा पुंलिङ्ग में 'अयम्' आदेश होता है ॥२५५।

### [दु० वृ०]

इदमियम्भवति, अयञ्च पुंसि सौ विभक्तौ। इयं स्त्री। अयं पुमान्। इदं कुलम् इति तदुक्तप्रतिषेधात्। सौ विभक्ताविति किम्? इदम्पुत्रः ॥२५५।

### [दु० टी०]

**इद०**। इदमियमयमिति प्रत्येकं लुप्तप्रथमैकवचनम्, अतो वाक्यार्थद्वयम। व्यवहितस्य पुंसीत्यनेन संबन्धो नास्तीत्याह - इयं स्त्रीत्यादि नपुंसके नित्यत्वात् सेर्लोपे कृते व्यञ्जनादावुक्तोऽकारश्च न भवतीति वक्ष्यति। न च वक्तव्यं पुंसीति किमर्थम्, लोकोपचारान्नपुंसके स्त्रियां पुंसि चावगम्यते, **प्रतिपत्तिरियं गरीयसीति** ॥२५५।

### [वि० प०]

**इदम्**। इदमियमयमिति प्रत्येकं लुप्तप्रथमैकवचनम्, अत इह वाक्यार्थद्वयम्। इदमियम्भवति, अयं च पुंसि इत्यनेन सन्निहितस्यैव वाक्यस्य सम्बन्धेन व्यवहितस्येत्याह – **इयं स्त्रीत्यादि**। यद्येवम्, इयमादेशं प्रति विशेषाभावान्नपुंसकेऽप्यसौ प्राप्नोतीत्याह- इदं कुलमित्यादि। नित्यत्वान्नपुंसकात् सेर्लोपे तदुक्तप्रतिषेधान्न भवतीत्यर्थः। ननु कथं तदुक्तप्रतिषेधादित्युच्यते! यावता नित्यत्वात् सेर्लोपे सति साक्षाद् विभक्तेरभावादेव न भविष्यति चेत्, नैवम्। सौ विभक्ताविति विशेषणाद् विभक्तावेव परतो भविष्यति नान्यस्मिन् परत इति व्यावृत्त्या यत्रैवान्यपरत्वं विद्यते तत्रैव न भवति, प्रत्ययलोपलक्षणे सत्यपि तच्च युक्तार्थ एव तत्रैव विभक्तेरन्यस्य विद्यमानत्वात्। यत्र विद्यते तत्र विभक्तेरेव निमित्तत्वमिति प्रत्ययलोपलक्षणन्यायेन प्रतिपत्तव्यमिति अवश्यं चैतदङ्गीकर्तव्यम्। अन्यथा 'अयं पुमान्, इयं स्त्री' इत्यत्रापि यदि नित्यत्वाद् व्यञ्जनाच्चेति सेर्लोपं ब्रूयात् तदा विभक्तेरेव निमित्तत्वं नास्ति कथमादेश इति, तस्माद् यथात्र प्रत्ययलोपलक्षणं तथा नपुंसकेऽपि स्यादिति तदुक्तप्रतिषेधो युज्यते। तथापि

**"अद् व्यञ्जनेऽनक्"** (२।३।३५) इत्यकारः कुतो न स्यात् **"नपुंसकात् स्यमोर्लोपेऽपि विरामव्यञ्जनादौ"** (२।२।६) इत्यतिदेशबलात् प्राप्नोतीति, तस्माद् 'इदं नपुंसके' इति वक्तव्यमेवेति चेत्, तदयुक्तम्। तत्र अपिग्रहणं व्यभिचारार्थं वक्ष्यति, तेनात्वम् इह न भवति। **इदम्पुत्रः** इति। अयं पुत्रोऽस्येति विग्रहः ॥२५५।

**[क० च०]**

**इदम्०।** ननु पूर्वसूत्रात् तकारानुवृत्त्या तकारस्यादेशत्रयं कथन्न स्यात्, नैवम्। पुंसि तत्पुरुषः स चेति ज्ञापकात् निःसन्देहार्थं मध्ये इदमोऽपाठाच्च। ननु इदम्-शब्द इयमयमापद्यते इत्येक एवादेशः कथन्न स्यात्, नैवम्। कार्यिणो मान्तस्य साहचर्याद् वर्णत्रितयनिर्देशाच्च मान्तवर्णत्रितयविशिष्ट आदेशः कल्प्यते। नित्यत्वात् सिलोप इति **पञ्जी**। नपुंसकात् स्यमोर्लोपस्य कृताकृतप्रसङ्गित्वाद् इत्यर्थः। ननु कथं नित्यत्वात् सेर्लोपः स्यात् **'नित्यादन्तरङ्गं बलीयः'** (का० परि० ९३) इति न्यायादन्तरङ्ग इयमादेशः प्राप्नोति ? सत्यम्। नित्यत्वमिह आवश्यकत्वमित्यर्थः।

**अयमभिप्रायः** – सौ परेऽन्तरङ्गत्वाद् इयमादेशे सति **"नपुंसकात् स्यमोर्लोपे"** (२।२।६) पुनर्निमित्ताभावन्यायाद् इदम्प्रकृत्युपस्थितौ पुनः प्रत्ययलोपलक्षणन्यायाद् अयमादेशः पश्चात् प्राप्नोतीति सिलोपस्यावश्यकत्वमिति। नित्यत्वाद् व्यञ्जनाच्चेति। सिलोप इत्यादि। ननु कथं नित्यत्वमुक्तम्, कृताकृतप्रसङ्गित्वाभावात्। तथाहि, आदेशे कृते **"व्यञ्जनाच्च"** (२।१।४९) इति सेर्लोपः स्यात्। अकृते आदेशे त्यदाद्यत्वेना-कारान्तात् सिलोपो न स्यात् ? सत्यम्। अत्रापि नित्यत्वमावश्यकमेवेत्यर्थः। प्रकारस्तूक्त एव। यद् वा व्यञ्जनान्तस्य व्यक्तित्वाद् व्यञ्जनाच्चेति प्रवर्तते इति ॥२५५।

**[समीक्षा]**

'इदम् (स्त्रीलिङ्ग) + सि, इदम् (पुंलिङ्ग) + सि' इस अवस्था में कातन्त्रकार ने स्त्रीलिङ्ग में 'इदम्' को 'इयम्' तथा पुंलिङ्ग में 'अयम्' आदेश का विधान किया है। पाणिनीय प्रक्रिया में एतदर्थ अनेक आदेश किए गए हैं। जैसे – **"इदमो मः"** (अ० ७।२।१०८) से मकार को मकार, **"यः सौ"** (अ० ७।२।११०) से दकार को यकारादेश तथा पुंलिङ्ग में **"इदोऽय् पुंसि"** (अ० ७।२।१११) से 'इद्' को 'अय्' आदेश।

व्याख्याकारों ने 'इदम्, इयम्, अयम्' इन तीनों पदों को लुप्त प्रथमैकवचनवाला माना है और सूत्र में दो वाक्य माने हैं। एक के अनुसार 'इदम् इयम् भवति'

तथा दूसरे के अनुसार 'अयं च भवति पुंसि' यह वाक्यार्थ किया जाता है – **"इदमियमयमिति प्रत्येकं लुप्तप्रथमैकवचनम्, अतो वाक्यार्थद्वयम्"** (कात० वृ० टी०, पञ्जी)।

**[ रूपसिद्धि ]**

१. **इयम्।** इदम् (स्त्रीलिङ्ग)+सि। **"व्यञ्जनाच्च"** (२।१।४९) से सिलोप, **"त्यदादीनाम विभक्तौ"** (२।३।२९) से मकार को अकार, **"अकारे लोपम्"** (२।१।१७) से पूर्ववर्ती अकारलोप, **"स्त्रियामादा"** (२।४।४९) से 'आ' प्रत्यय तथा प्रकृत सूत्र से 'इयम्' आदेश।

२. **अयम्।** इदम् (पुंलिङ्ग+सि। सिलोप, म् को अ, पूर्ववर्ती अकार का लोप तथा प्रकृत सूत्र से 'अयम्' आदेश।

३. **इदम्।** इदम् (नपुंसकलिङ्ग)+सि। **"नपुंसकात् स्यमोर्लोपः"** (२।२।६) से सिप्रत्यय का लोप ॥२५५।

## २५६. अद् व्यञ्जनेऽनक् [ २।३।३५ ]

**[ सूत्रार्थ ]**

व्यञ्जनादि विभक्ति के परे रहते अक्-वर्जित 'इदम्' शब्द के स्थान में 'अत्' आदेश होता है ॥२५६।

**[ दु० वृ० ]**

इदम् अग्वर्जितोऽद् भवति व्यञ्जनादौ विभक्तौ। आभ्याम्, एभिः। अनगिति किम्? इमकैः। साक्षाद् विभक्ताविति किम्? अस्य पुत्रः **इदम्पुत्रः** ॥२५६।

**[ दु० टी० ]**

**अद् व्य०।** एकवर्णोऽप्ययम् अभेदनिर्देशाद् इदमो रूपोपमर्दनेन प्रवर्तते, कुतो भेदलक्षणस्यान्तस्य विधिः। अस्य पुनः षष्ठीं विपरिणमय्य सर्वस्यादेशं प्रतिपद्यते, एषामिति निर्देशात्। न च वक्तव्यम् अन्तेऽकारः सिद्धः। अतः सर्वस्य भवति अकारस्याकारः कार्यान्तरबाधनार्थः स्यात्, **तकारः सुखनिर्देशार्थ एव।** सुभोरिति सिद्धे यद् व्यञ्जनग्रहणं तल्लिङ्गत्रयव्यञ्जने भवतीति प्रतिपत्त्यर्थम्, तेन 'पुंसि' इति न सम्बध्यते।

ननु न विद्यते ककारोऽस्येति विग्रहेऽर्थाद् अको वर्जनं भविष्यति, **अकारो-च्चारणं सुखप्रतिपत्त्यर्थमेव।** अन्यथा अगयोगाद् अगिति वा प्रतिपद्येत। अग्वर्जनं ज्ञापयति **'तन्मध्यपाती तद्ग्रहणेन गृह्यते'** (व्या० प० १८) इति। तेन त्यदाद्यत्वादीनि सिद्धानि भवन्तीति। इदम् अग्युक्तोऽन्वादेशेऽद् भवतीति वक्तव्यम्। पूर्वेण अग्युक्तस्य वर्जने प्राप्ते 'इमकाभ्यां रात्रिरधीता, अथो आभ्यामहरप्यधीतम्। इमकस्य शोभनं शीलम् अथो अस्य प्रभूतं स्वम्। इमकस्मै गां देहि, अथो अस्मै कम्बलमपि। तन्न वक्तव्यम्। अन्वादेशे बहुलत्वाद् अग् नास्तीति, नञोऽनित्यत्वाद् वा ॥२५६।

**[ वि० प० ]**

**अद्०!** अभेदनिर्देशाद् एकवर्णोऽपि समस्तस्य भवति। इदम् अद्–रूपेण विपरिणमते इत्यर्थः। एभिरित्यदादेशे कृते **"तस्माद् भिस् भिर्०"** (२।३।४८) इति भिसो भिरादेशः। सुभोरिति सिद्धे यद् व्यञ्जनग्रहणं तल्लिङ्गत्रये व्यञ्जने भवतीति प्रतिपत्त्यर्थम्। तेन अनन्तरमपि पुंसीति न संबध्यते ॥२५६।

**[ समीक्षा ]**

'इदम् + भ्याम्, इदम् + भिस्' इस अवस्था में कातन्त्रकार ने 'इद' को 'अ' आदेश करके 'आभ्याम्, एभिः' शब्दरूप सिद्ध किए हैं। पाणिनि **"हलि लोपः"** (अ० ७।२।११३) से 'इद्' भाग का लोप करते हैं। 'इद' को चाहे 'अ' आदेश किया जाए या 'इद्' भाग का लोप। दोनों के ही अनुसार 'अ' उपस्थित रहता है। 'भ्याम्' प्रत्यय परे रहते उसका दीर्घ होता है तथा भिस्प्रत्यय में एकारादेश। अतः किसी में भी गौरव-लाघव नहीं कहा जा सकता।

**[ रूपसिद्धि ]**

१. **आभ्याम्।** इदम् + भ्याम् (तृतीया-चतुर्थी-पञ्चमी विभक्ति-द्विवचन)। **"त्यदादीनाम विभक्तौ"** (२।३।२९) से मकार को अकार, **"अकारे लोपम्"** (२।१।१७) से पूर्ववर्ती अकार का लोप, प्रकृत सूत्र से 'इद' को 'अ' आदेश तथा **"अकारो दीर्घं घोषवति"** (२।१।१४) से उसका दीर्घ।

२. **एभिः।** इदम् + भिस्। म् को अ, पूर्ववर्ती अ का लोप, प्रकृत सूत्र से 'इद' को अ, **"तस्माद् भिस् भिर्"** (२।३।४८) से 'भिस्' को 'भिर्' आदेश **"धुटि बहुत्वे त्वे"** (२।१।१९) से अ को ए तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से र् को विसर्ग आदेश ॥२५६

## २५७. टौसोरन [ २।३।३६ ]

**[ सूत्रार्थ ]**

तृतीया - एकवचन 'टा' प्रत्यय तथा षष्ठीसप्तमी– द्विवचन 'ओस्' प्रत्यय के परे रहते अक्-वर्जित 'इदम्' शब्द को 'अन' आदेश होता है ॥२५७।

**[ दु० वृ० ]**

इदमोऽग्वर्जितस्य टौसोर्विभक्त्योरनादेशो भवति । अनेन, अनयोः । अनगिति किम् ? इमकेन, इमकयोः ॥२५७।

**[ दु० टी० ]**

**टौ०।** ननु षष्ठीमाश्रित्य किमित्यादेश उच्यते, नैवम् । **अभ्युपगमवादोऽयम्** आदेशेऽपि न दोषः । 'अन' इति सस्वरोऽयम्, अकारमन्तरेणाप्युच्चारयितुं शक्यत्वात् ॥२५७।

**[ वि० प० ]**

**टौ०।** इह **सुखप्रतिपत्त्यर्थम्** अर्थवशाद् विभक्तिविपरिणाममाश्रित्य षष्ठ्यन्ततां दर्शयन्नाह – इदमोऽग्वर्जितस्येति ॥२५७।

**[ समीक्षा ]**

'इदम् + टा, इदम् + ओस्' इस अवस्था में पाणिनि तथा शर्ववर्मा दोनों ही शाब्दिकाचार्य 'अन' आदेश करके 'अनेन, अनयोः' शब्दरूप सिद्ध करते हैं । अन्तर यह है कि कातन्त्रकार 'इद' को अकारान्त 'अन' आदेश करते हैं और पाणिनि केवल 'इद्' को हलन्त 'अन्' आदेश । दोनों ही प्रक्रियाओं में 'अन' रूप अकारान्त ही रहता है । पाणिनीय सूत्र है – **"अनाप्यकः"** (अ० ७।२।११२) । अतः प्रक्रिया में प्रायः साम्य ही है ।

**[ रूपसिद्धि ]**

१. **अनेन।** इदम् + टा । **"त्यदादीनाम विभक्तौ"** (२।३।२९) से म् को अ, दकारोत्तरवर्ती अ का लोप, प्रकृत सूत्र से 'इद' को 'अन' **"इन टा"** (२।१।२३) से टा को 'इन' तथा **"अवर्ण इवर्णे ए"** (१।२।२) से अकार को एकार-परवर्ती इकार का लोप ।

२. **अनयोः।** इदम् + ओस् (षष्ठी - सप्तमी - द्विवचन) । म् को अ, अकार-लोप, 'इद' को 'अन' **"ओसि च"** (२।१।२०) से नकारोत्तरवर्ती अ को ए, **"ए**

**अय्**"(१।२।१२) से एकार को 'अय्' आदेश तथा "**रेफसोर्विसर्जनीयः**" (२।३।६३) से सकार को विसर्गादेश ॥२५७।

## २५८. एतस्य चान्वादेशे द्वितीयायां चैन [२।३।३७]

### [सूत्रार्थ]

टा-ओस्-द्वितीया विभक्तियों के परे रहते अन्वादेशविषय में 'एतद्' तथा 'इदम्' शब्द को 'एन' आदेश होता है ॥२५८।

### [दु० वृ०]

एतस्य इदमश्च टौसोर्विभक्त्योर्द्वितीयायां च कथितस्यैवानुकथनविषये एनादेशो भवति। एतं व्याकरणम् अध्यापय, अथो एनं वेदमध्यापय। इमं घटमानय, अथो एनं परिवर्तय। एतेन रात्रिरधीता, अथो एनेनाहरप्यधीतम्। एतयोः शोभनं शीलम्, एनयोश्च प्रभूतं स्वम् इत्यादि योज्यम् ॥२५८।

### [दु० टी०]

**एतस्य०।** त्यदादीनामेतच्छब्दस्यैकदेश एतशब्दो गृह्यते, प्रकृतेः श्रूयमाणश्चकारः प्रकृतिमेव समुच्चिनोतीत्याह – इदमश्चेति। आदिश्यते इत्यादेशः। दिशिरिह कथने वर्तते, यथा '**धर्मं दिदेश मोक्षाय**' इति। विषयसप्तमीयमित्याह – **कथितस्यैवेत्यादि।** एवशब्देन न्यायार्थः सूच्यते। भिन्नाधिकरणे न भवति 'देवदत्तं भोजय, इमं च यज्ञदत्तम्' इति। न ह्यत्र एकार्थस्य पूर्वशब्देन प्रतिपादितस्य द्वितीयप्रतिपादनम्। इदमेतदोः श्रुतत्वाद् आभ्यामेव कथित इति गम्यते '**अयं दण्डो हरानेन, एतमाङं ङितं विद्यात्**'। नायमन्वादेशः, एकविधानत्वात्। तथा हि अयमित्यनेन दण्डस्य स्वरूपोपलक्षणमात्रं कृत्वा 'हरानेन' इति हरणक्रियां प्रति दण्डस्य करणत्वं निर्दिश्यते।

'एतमाङं ङितं विद्यात्' इत्यनेन ईषदादिष्वर्थेषु आकारमात्रनिर्देशं कृत्वा वेदनक्रियायां कर्मभाव एव विधीयते इति एतदः एतस्य एनादेशे दस्य त्यदाद्यत्वं च कथं नपुंसके। एतत् कुण्डलमानय, अथो एनत् (?) परिवर्तय' इति नित्यत्वादमो लोपे तदुक्तप्रतिषेधादत्वं नास्तीति चेत् तर्हि कथम् एनादेश इति। नैवम्। द्वितीयायामिति विषयसप्तमीत्वाद् भविष्यति ॥२५८।

### [वि० प०]

**एतस्य०।** प्रकृतेः श्रुतश्चकारः प्रकृतिमनुकर्षति प्रत्ययाच्च प्रत्ययमित्याह – एतस्य इदमश्चेत्यादि। आदिश्यते इत्यादेशः। दिशिरिह कथने वर्तते। यथा '**धर्मं दिदेश मोक्षाय**'

इति । अनुशब्दः पश्चादर्थे । अनु = पश्चाद् आदेशः अन्वादेशः, अनुकथनमित्यर्थः । तच्च पूर्वकथितस्यैव भवति, नाकथितस्य । विषयसप्तमीयमित्याह – कथितस्यैवेत्यादि । एत इत्यकारान्तः । त्यदादीनामेतच्छब्दस्यैकदेशो गृह्यते । तेन त्यदाद्यत्वं कृत्वा एत – **शब्दस्यैव** एनादेशः कार्यः । यत्र तु त्यदाद्यत्वं नास्ति, तत्र नित्यत्वादमो लोपे तदुक्तप्रतिषेधात् तत्र द्वितीयायामिति विषयसप्तमीत्वाद् अमोऽभावेऽपि दकारेण व्यवहितस्यापि एतच्छब्दस्यैनादेशो भवत्येव । यथा 'एतत् कुण्डलमानय, अथो एनं परिवर्तय' । इदमस्तु 'इदं कुण्डलमानय, अथ एनं परिवर्तय' इत्येव भवति । तथा चोक्तं **चान्द्रव्याकरणे** – एवम् इदमोऽपि योज्यम्, अयं तु विशेषः – 'इदं कुण्डलमानय, अथो एनं परिवर्तय' इति मकारान्त एवेति ।। २५८ ।

**[ क० च० ]**

**एतस्य०** । **'सबलैताश्च कर्वुरे'** इति कर्वुरवाचकस्य एतशब्दस्य न ग्रहणम्, त्यदादिसम्बन्धात् । ननु अनुकथनविषये एनादेशो भवतीति उक्तम्, तत् कथम् **'नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय'** (गी० गो० १।१) इत्यत्र एनादेशो न स्यात् । उच्यते – यया विभक्त्या कथनं तया विभक्त्या कर्माद्यर्थपुरस्कारेणैवानुकथनमपि स्यात्, तदैव एनादेशः । तथा च **श्रीपतिः** – यत्र कर्मादिकतया किञ्चित् प्रतिपाद्य पुनरुद्यते, सोऽत्रान्वादेशः । अत एव **वृत्ता**वपि 'एतं व्याकरणमध्यापय, अथो एनं वेदमध्यापय' इत्यत्र समानकारकविभक्त्या निर्देशो युक्तः, अत्र पुनः **'नक्तं भीरुः'** इति स्वरूपकथनमात्रम् । तथा च **टीकायाम्** – 'अयं दण्डो हरानेन' इत्यत्र नायमन्वादेशः, एकदेशविधानत्वादित्युक्तम्, तर्हि कथम् अपादानकारके दुःखहेतुरयमधर्मस्ततो नैनं सन्तः कर्तुमर्हन्तीति **त्रिलोचनविवरणं** संगच्छते ? सत्यम् । 'धर्मादन्तरं दृश्यते' इति क्रियाध्याहारेण कर्मार्थविशिष्टत्वान्न दोषः ।

ननु कथम् **'उवाच नैनं परमार्थतोऽयम्'** इत्यादिप्रयोगो गृह्यते इति । येन शब्देनानुकथनं तेन शब्देनैकार्थपुरस्कारेण कथनाभावात् ? सत्यम् । मण्डूकप्लुत्या व्यवस्थितवाधिकारादन्यत्रापि भवतीत्यदोषः । **अन्ये** तु एनशब्दो द्वितीयादिषु नियतप्रयोगः प्रकृत्यन्तरमस्तीति । वचनमिदं तु इदम एतस्य चानुकथने प्रयोगनिरासार्थमित्याहुः ।। २५८ ।

**[ समीक्षा ]**

**अन्वादेशः = अनु पश्चाद् आदेशः । कथितस्यैवानुकथनम् ।** अर्थात् जिसके लिए पहले कुछ कहा जाए, उसी के लिए पुनः कहना । इस अर्थ में 'अन्वादेश' शब्द

का प्रयोग पाणिनीय व्याकरण में भी प्रयुक्त है– **"इदमोऽन्वादेशे०"** (अ० २।४।३२)। जैसे 'एतं व्याकरणम् अध्यापय, अथो एनं वेदमध्यापय'। इसे व्याकरण पढ़ाओ और इसके पश्चात् इसे वेद पढ़ाओ। 'इमं घटमानय, अथो एनं परिवर्तय'। इस घड़े को ले आओ और इसके बाद इसे बदल दो। 'एतेन रात्रिरधीता, अथो एनेनाहरप्यधीतम्'। इसने रात्रि में पढ़ा और फिर इसने दिन में भी पढ़ा। 'एतयोः शोभनं शीलम्, एनयोश्च प्रभूतं स्वम्'। इन दोनों का आचरण प्रशंसनीय है और इनके पास पुष्कल धनसम्पत्ति भी है।

अन्वादेश में पाणिनि ने भी इदम् और एतद् को 'एन' आदेश किया है– **"द्वितीयाटौस्स्वेनः"** (अ० २।४।३४)। इसमें **"इदमोऽन्वादेशे०"** (अ० २।४।३२) सूत्र से 'अन्वादेशे' पद की अनुवृत्ति की जाती है।

**[ रूपसिद्धि ]**

१. एतं व्याकरणमध्यापय, अथो एनं वेदमध्यापय।

२. इमं घटमानय, अथो एनं परिवर्तय।

३. एतेन रात्रिरधीता, अथो एनेनाहरप्यधीतम्।

४. एतयोः शोभनं शीलम्, एनयोश्च प्रभूतं स्वम्।

प्रथम वाक्य में जिसे व्याकरण पढ़ाने के लिए कहा गया है उसे ही पुनः वेद पढ़ाने भी बात कही गई है। द्वितीय वाक्य में जिस घड़े को लाना है उसे ही बदलना भी है। तृतीय वाक्य में जिसने रात्रि में अध्ययन किया है, उसी ने दिन में भी और चतुर्थ वाक्य मे जिनका आचरण प्रशंसनीय बताया गया है, उन्हीं के पास पर्याप्त धनसम्पत्ति का होना भी कहा गया है। इनमें से केवल द्वितीय वाक्य में 'इदम्' को 'एन' तथा प्रथम, तृतीय, चतुर्थ वाक्यों में 'एतद्' शब्द को 'एन' आदेश किया गया है, जिसके फलस्वरूप 'एनम्' (द्वि० – ए० व०), 'एनम्' (द्वि० – ए० व०) 'एनेन' (तृ० – ए० व०) तथा 'एनयोः' (ष० – द्वि – व०) प्रयोग सिद्ध होते हैं।

१. **एनम्**। एतद् + अम्, इदम् + अम्। **"त्यदादीनाम विभक्तौ"** (२।३।२९) से द्-म् को अ, **"अकारे लोपम्"** (२।१।१७) से तकार-दकारोत्तरवर्ती अकार का लोप, प्रकृत सूत्र से 'एत-इद' को 'एन' तथा **"अमृशसोरादिर्लोपम्"** (२।१।४७) से 'अम्' के अकार का लोप।

२. **एनेन।** एतद् + टा ! द् को अ, तकारोत्तरवर्ती अ का लोप, प्रकृत सूत्र से एत को एन, **"इन टा"** (२।१।२३) से टा के स्थान में 'इन' तथा **"अवर्ण इवर्णे ए"** (१।२।२) से अ को ए–परवर्ती इ का लोप।

३. **एनयोः।** एतद् + ओस् ! द् को अ, तकारोत्तरवर्ती अ का लोप, एत को एन, **"ओसि च"** (२।१।२०) से नकारोत्तरवर्ती अकार को एकार, **"ए अय्"** (१।२।१२) से एकार को 'अय्' तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से स् को विसर्गादेश ॥२५८।

## २५९. तस्माद् भिस् भिर् [२।३।३८]

**[ सूत्रार्थ ]**

अकारादेशविशिष्ट 'इदम्' शब्द से परवर्ती 'भिस्' प्रत्यय को भिर् आदेश होता है ॥२५९।

**[ दु० वृ० ]**

तस्मादिदमः कृताकारात् परो भिस् भिर् भवति । एभिः । **केचित्** तस्मादिति किम् ? इमैः ॥२५९।

**[ दु० टी० ]**

**तस्मा०।** अनन्तरत्वादेतत् – शब्दस्यानुवृत्तिर्न स्यात्, तस्माद्ग्रहणेन इदम एव परामर्शनं क्रियते, सन्निपातलक्षणविधेर्वर्णग्रहणे निमित्तत्वादिदमः कृताकाराद् भिस ओसि प्राप्ते तद्बाधनार्थं भिरभिधीयते इत्याह – **कृताकारादित्यादि।** ये त्वनादेशं प्रति वक्तव्यमाचक्षते ते तस्माद् – ग्रहणेनाद्विधिमनित्यं मन्यन्ते इत्याह – केचिद् इत्यादि । न चैवं परदर्शनमस्तीति सूत्रमेवैतद् यदि भिसो भिसेवोच्यते यथैस्त्वं च बाधते, तथा विसर्जनीयमपीति पक्षे उच्यते । अघोषे **"रप्रकृतिरनामिपरोऽपि"** (१।५।१४) इति न भवति, बहुलत्वात् ॥२५९।

**[ वि० प० ]**

**तस्माद्०।** तस्मादिदम इति कथमेतद् यावता अनन्तरत्वाद् एतच्छब्दस्यैवानुवृत्तिः प्राप्नोति, न त्विदमस्तस्य चानुकृष्टत्वादिति ? सत्यम्, एतदर्थमेव तस्माद्ग्रहणम्, अन्यथा अनन्तरत्वादेतच्छब्दस्यैव प्रवृत्तिः सिद्धा किं तस्माद्ग्रहणेन ।अकारे कृते भिसैस् वा इति प्राप्ते तदपवादो भिरादेश उच्यते । ननु भिसि परतो **"अद् व्यञ्जनेऽनक्"**

(२।३।३५) इत्यकारः। ततः सन्निपातलक्षणत्वादेवैस् न भविष्यति, तत् किमनेनेति, नैवम्। वर्णग्रहणे निमित्तत्वादिह स्यादेव। ये पुनरेनादेशं प्रति वक्तव्यमाद्रियन्ते न सूत्रम्, तेषाम् इदम एवानन्तरत्वाद् अनुवृत्तिः सिद्धा, किं तस्माद्ग्रहणेन इत्याह – **केचिद्** इत्यादि। तस्माद्ग्रहणम् अद्विधेरनित्यार्थम्। तथा च प्रयोगो दृश्यते – **"इमैर्गुणैः सप्तर्षयः स्वर्गं गताः"** इति। अयं पुनरपप्रयोग इति मन्यते, न च दर्शनान्तरपरमप्येव-मस्तीति ॥२५९।

**[ समीक्षा ]**

'इदम् + भिस्' इस अवस्था में म् को अ तथा अलोप हो जाने पर 'इद' यह अकारान्त शब्द दृष्ट होता है, इस 'इद' के स्थान में 'अ' आदेश होने पर भी अकारान्त ही शब्द रहता है, अतः 'भिस्' के स्थान में **"भिसैस् वा"** (२।१।१८) से 'ऐस्' आदेश प्राप्त होता है, वह न हो इसके निवारणार्थ 'भिर्' आदेश करके 'एभिः' शब्दरूप कातन्त्रकार सिद्ध करते हैं। पाणिनि ने ऐस् आदेश का निषेध ही किया है – **"नेदमदसोरकोः"** (अ० ७।१।११)। इस प्रकार भी उक्त रूप ही सिद्ध होता है। अतः कार्यसंख्या की दृष्टि से किसी में भी गौरव नहीं कहा जा सकता।

**[ रूपसिद्धि ]**

१. **एभिः।** इदम् + भिस्। **"त्यदादीनाम विभक्तौ"** (२।३।२९) से म् को अ, **"अकारे लोपम्"** (२।१।१७) से पूर्ववर्ती अकार का लोप, **"अद् व्यञ्जनेऽनक्"** (२।३।३५) से 'इद' को 'अ' प्रकृत सूत्र से भिस् को भिर्, **"धुटि बहुत्वे त्वे"** (२।१।१९) से अ को ए तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से रेफ को विसर्ग आदेश ॥२५९।

## २६०. अदसश्च [ २।३।३९ ]

**[ सूत्रार्थ ]**

अक् – वर्जित अदस् – शब्द से परवर्ती भिस् प्रत्यय को 'भिर्' आदेश होता है ॥२६०।

**[ दु० वृ० ]**

अदसोऽग्वर्जितात् परो भिस् भिर् भवति। अमीभिः। 'अनक्' इति किम्? अमुकैः। चकार उत्तरत्रानग्निवृत्त्यर्थः ॥२६०।

**[दु० टी० ]**

**अदसः ।** अदसस्तस्माच्च भिस् भिर् इति कृतेऽपि वाक्यार्थद्वयम् अर्थात् संभवति, गुरुप्रतिपत्तिकरं चेति पृथक् सूत्रम् उच्यते । किञ्च चकारोऽयम् अव्ययत्वादनेकार्थ इत्युत्तरत्रानग् इति न वर्तते इति प्रतिपत्तव्यमित्याह – चकार इत्यादि ।।२६०।

**[वि० प० ]**

**अदसः ।** अमीभिरिति । अदसो भिस्, त्यदाद्यत्वम्, भिरादेशः, **"धुटि बहुत्वे त्वे"** (२।१।१९), **"अदसः पदे मः"** (२।२।४५) इति मत्वम्, **"एद् बहुत्वे त्वी"** (२।३।४२) ईत्वम् ।।२६०।

**[समीक्षा]**

'अदस् + भिस्' इस अवस्था में सकार को अकार तथा पूर्ववर्ती अकार का लोप होने पर **"भिसैस्"** (२।१।१८) से प्राप्त ऐस् आदेश न हो – एतदर्थ कातन्त्रकार ने भिस् को भिर् आदेश का विधान किया है। पाणिनि ने **"नेदमदसोरकोः"** (अ० ७।१।११) से ऐसादेश का निषेध किया है, उससे भी 'भिस्' प्रत्यय के अनादिष्ट रहने पर 'अमीभिः' शब्दरूप सिद्ध होता है।

**[रूपसिद्धि]**

१. **अमीभिः ।** अदस् + भिस् । **"त्यदादीनाम विभक्तौ"** (२।३।२९) से सकार को अकार, **"अकारे लोपम्"** (२।१।१७) से पूर्ववर्ती अकार का लोप, प्रकृत सूत्र से भिस् को भिर्, **"धुटि बहुत्वे त्वे"** (२।१।१९) से दकारोत्तरवर्ती अकार को एकार, **"एद् बहुत्वे त्वी"** (२।३।४२) से एकार को ईकार, **"अदसः पदे मः"** (२।२।४५) से दकार को मकार तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से रेफ को विसर्गादेश ।।२६०।

## २६१. सावौ सिलोपश्च [२।३।४०]

**[सूत्रार्थ]**

सिप्रत्यय के परे रहते 'अदस्' शब्द के अन्तिम वर्ण को 'औ' आदेश तथा सिप्रत्यय का लोप होता है ।।२६१।

**[दु० वृ० ]**

अदसोऽन्तस्यौर्भवति सौ परे सिलोपश्च । असौ, असकौ । साक्षात् साविति किम् ? असौ पुत्रोऽस्येति – **'अदःपुत्रः'** ।।२६१।

[दु० टी०]

**सावौ०।** सेरौत्वं न कृतम्, त्यदाद्यत्वे सति स्त्रियां 'हे असौ' इति संबुद्धौ चेत्येत्वं स्यात्। पुंसि च ह्रस्वात् सिलोपः औत्वस्य स्थानिवत्त्वादिति। 'असकौ स्त्री' इत्यत्र च **"के प्रत्यये स्त्रीकृताकारपरे पूर्वोऽकार इकारम्"** (२।२।६५), **"औरिम्"** (२।१।४१) चापद्यते। 'सेर्डौ' इति कृतेऽपि परत्वात् डानुबन्धेऽन्त्यस्वरादिलोपे कृते पश्चात् त्यदाद्यत्वेऽनिष्टरूपं स्यात्। तस्मात् **"सावौ सिलोपश्च"** (२।३।४०) इत्युच्यते।

कथम् 'अमुकः पुमान्, अमुका स्त्री, अमुकं नपुंसकम्' इति? सत्यम्। **"नृ वा"** (२।३।२८) इत्यतो **मण्डकप्लुतिन्यायेन** व्यवस्थितविभाषानुवर्तते, तेनात्र युक्तस्यौत्वम्, पक्षे सिलोपश्च न भवति। यथा मण्डूको दूरं गत्वा आत्मानं दर्शयति, तथा योऽधिकारः स मण्डूकगतिरुच्यते। **"उत्वं मात्"** (२।३।४१) इत्यत्र च चकारो वर्तते। तेन मादन्यस्माच्च भवतीत्यर्थः। इहापि **व्यवस्थितविभाषयेति।** विभक्ताविति इहापि वर्तते। तेनासौ पुत्रोऽस्येति 'अदःपुत्रः' **'अन्तरङ्गोऽयं विधिः'** इति व्यावर्तनाद् बहिरङ्गो युक्तार्थलक्षणो लोपो भवति, एवम् पूर्वोक्तेष्वपि स्थितम्॥२६१।

[क० च०]

**सावौ०।** ननु 'सेर्डौ' इति कृते सिध्यति, किं गुरुकरणेन? नैवम्। परत्वाड्डानुबन्धेऽन्त्यस्वरादिलोपे पश्चात् त्यदाद्यत्वे सत्यनिष्टरूपं स्यात्, तस्मात् **"सावौ सिलोपश्च"** (२।३।४०) इत्युच्यते। अत्र **कुलचन्द्रः** – त्यदाद्यत्वापवादोऽन्तस्यौकारो विधीयते इत्युपसंहारार्थमुक्तवान्। एतदनुसारेणैव **'बाधयित्वा त्यदाद्यत्वं सावौ चान्ते प्रवर्तते'** इति **बालैरुद्घुष्यते।** तत्सर्वमनुचितम् इति प्रतिभासते, **परिभाषावृत्ति-**विरोधात्। तथा ह्यस्मिन् सूत्रे ओकारकरणादेवासाविति सिध्यति त्यदाद्यत्वेऽन्तस्य **"ओकारे औ औकारे च"** (१।२।७) इति कृते सिध्यति, असाविति किमौकारकरणेन? तस्मादौकारकरणं बोधयति – स्वरादेशपरिभाषाऽस्तीति। एतच्च तदैव सम्भवति, यदि प्रथमं त्यदाद्यत्वविधिः प्रवर्तते। तस्मात् त्यदाद्यत्वे कृते पश्चादकारस्य स्थाने औकारे कृते स्वरादेश उपलभ्यते इति।

अथ तर्हि 'असौ' इत्यत्राकारस्योत्वे स्थानिवद्भावादेव **"ओकारे औ औकारे च"** (१।२।७) इत्यविषयत्वात् कथं सिध्यति चेत्, नैवम्। स्थानिवद्भावे **"अकारे**

**लोपम्"** (२।१।१७) इति कृते औकारस्य स्वरत्वे सुतरां सिध्यत्येव। तर्हि स्त्रियाम् 'असौ' इति कथं सिध्यति ? यावता त्यदाद्यत्वे **"स्त्रियामादा"** (२।४।४९) इति कृतेऽनेन स्त्रियामाकारस्योत्वे कृते स्थानिवद्भावेन औकारस्याप्याकारत्वाद् **"ओकारे औ औकारे च"** (१।२।७) इति न प्राप्नोति।'असकौ' इत्यत्र चाकारस्य स्थानिवद्भावात् के प्रत्यये इत्यादिना पूर्वस्याकारस्येकारे सति 'असिका' इत्यनिष्टरूपं स्यात्। न च स्थानिवद्भावादेशो ह्यवर्णविधावित्यनेनौकारस्य वर्णविधित्वेन स्थानिवद्भावनिषेध इति वाच्यम्।यतः स्थानिवदादेशो ह्यवर्णविधावित्यस्य स्वरादेशं प्रति स्वरादेशपरिभाषा बाधिकेति ? सत्यम्। अन्तरङ्गत्वादाप्रत्ययं बाधित्वा औकारः प्रवर्तते। तथाहि प्रकृत्याश्रितत्वादौकारस्यान्तरङ्गत्वं चेत्, नैवम्। स्त्रीप्रत्ययस्यापि प्रकृत्याश्रितत्वेन तुल्यत्वाद् औकारस्य विभक्त्याश्रितत्वेन बहिरङ्गत्वमपि चेत् **'प्रकृतेः पूर्वं पूर्वं स्याद् अन्तरङ्गम्'** (का० परि० ७१) इति न्यायाद् औकारस्याधिकत्वमिति।

**यद् वा** त्यदाद्यत्वे कृते स्त्रियाम् आप्रत्यये कृते सति **"त्यदादीनाम विभक्तौ"** (२।३।२९) इत्यत्र इत्यतः षष्ठ्यन्ततयाऽकारस्येत्यधिकाराद् अदसः संबन्धिनोऽकारस्यौकारे कृते निमित्ताभावन्यायादाकाराभाव इति सिद्धम् 'असौ' इति। न च स्त्रीप्रत्ययेन सेर्व्यवधानात् कथम् औकार इति वाच्यम्, आप्रत्ययस्य **'लिङ्गग्रहणेन लिङ्गविशिष्टस्यापि, ग्रहणम्'** (का० परि० १७) इति न्यायाद् अव्यवधानताया इष्टत्वात्। नापि के प्रत्यय इत्यस्य विषय इति वाच्यम्, औकारेण व्यवधानादिति। **वस्तुतस्तु** अस्मिन् सूत्रे व्यक्तिव्याख्यानमादृतम्, अत एव त्यदाद्यत्वेऽन्तर्व्यक्तिदृष्ट्यैवौकारप्रवृत्तिरिति। कुतोऽकारात् क्रियमाणस्य **"स्त्रियामादा"** (२।४।४९) इत्यस्य प्रसङ्ग इति **संक्षेपः**॥२६१।

**[ समीक्षा ]**

'अदस् + सि, अदस् + अक् + सि' इस अवस्था में पाणिनि तथा कातन्त्रकार दोनों ही आचार्य स् को औ, सि (सु) का लोप तथा अक् प्रत्यय करके 'असौ, असकौ' शब्दरूप सिद्ध करते हैं। पाणिनि का सूत्र है – **"अदस औ सुलोपश्च"** (अ० ७।२।१०७)। अतः उभयत्र साम्य दृष्ट है।

**[ रूपसिद्धि ]**

१. असौ। अदस् + सि। **"त्यदादीनाम विभक्तौ"** (२।३।२९) से स् को अ, **"अकारे लोपम्"** (२।१।१७) से दकारोत्तरवर्ती अकार का लोप, **"सो सः"** (२।३।३२) से द् को स्, तथा प्रकृत सूत्र से अ को औ – सि का लोप।

२. **असकौ।** अदस् + अक्+ सि । पूर्ववत् स् को अ, अलोप, द् को स् अक् प्रत्यय तथा प्रकृत सूत्र द्वारा अ को औ – सिलोप ।।२६१।

## २६२. उत्वं मात् [२।३।४१]

### [सूत्रार्थ]

अदस् – शब्दगत (द् को म्) म् से परवर्ती वर्ण के स्थाने में उत्व (उ – ऊ) आदेश होता है ।।२६२।

### [दु० वृ०]

अदसो मात् परस्य वर्णमात्रस्योत्वं भवति ।अमुम्, अमू, अमून् ।मादिति किम् ? अमुकाभ्याम् ।।२६२।

### [दु० टी०]

उत्वम्० ।मादित्यकार: सुखप्रतिपत्त्यर्थ: ।अमुम् इति अदस् + अम्, त्यदाद्यत्वम्, **'यावत् सम्भवस्तावद्विधिः'**(का० परि० ५४) इति पुनरकारेऽकारलोपे कृतेऽमोऽकारस्योत्वं न प्राप्नोति, नायमदसोऽवयव इति ।इह स्यात् – अमुष्मै, अमुष्मात्, अमुष्य, अमुष्मिन् इति ? सत्यम् । यद्यपि प्रधानमुत्वमत्र विधेयं स्यात् तथाप्यदसोऽप्रधानेनैव मादित्यनेन संबन्धो विशेषणविशेष्यभावस्य प्रयोक्तुरायत्तत्वात् । मकाराद् वर्णात् परस्याविशिष्टस्य वर्णमात्रस्य स्थाने उत्वमादेशो भवति, आगमलक्षणाभावादित्याह – अदस इत्यादि । अदस: शस्, त्यदाद्यत्वम्, **"शसि सस्य च न:"** (२।१।१६) इति दीर्घत्वे सति **"उत्वं मात्"** (२।३।४१) इत्युत्वस्य केन दीर्घत्वम् ।एवम् अदस औ:, ईत्वेऽकारस्य घोषवति दीर्घत्वे 'अमू, अमूभ्याम्' इति । नात्रोकारस्य भाव: उत्वम्, किन्तर्हि ऊनां भाव: उत्वम् इत्यादिबहुवचनान्ता गणस्य संसूचका इति ह्रस्वदीर्घप्लुतानां ग्रहणम् । प्लुतस्तु **लोके** नियतविषयत्वादिह नोदाहृत: । तेन **"स्थानेऽन्तरतम:"** (का० परि० १६) इति न्यायाद् ह्रस्वस्य ह्रस्वो दीर्घस्य च दीर्घ: इति । अदमुयङ् इति । **"विष्वग्देवयोश्च"** (४।६।७०) अन्त्यस्वरादेरद्र्यञ्चतौ क्वाविति कृते 'अदद्रे'। रेफस्यार्धमात्राकाल-लक्षणस्यापेक्षयाऽर्धमात्राकालोऽन्तरतमो ह्रस्वो न दीर्घ इति ।यद्यपि युक्तार्थे संख्याविशेषो नास्ति, तथापि भावप्रत्ययबलाद् **"अदोऽमुश्च"** (२।१।५४) इति अमु – वचनाद् बहुवचनमिह गम्यते ।।२६२।

[ वि० प० ]

**उत्वम्०।** अदसो मादिति । यद्यपि विधेयत्वाद् उत्वमत्र प्रधानम्, तथाप्यदसो नानेन संबन्धः। किन्तर्हि मादित्यनेनाप्रधानेनैव विशेषणविशेष्यभावस्य प्रयोक्तुरायत्तत्वात्। तेन अदसो मात् परस्य वर्णमात्रस्योत्वं प्रवर्तमानम् अदसोऽन्यस्यापि विभक्त्यादेर्वर्णमात्रस्य प्रवर्तत इति मात्रशब्देन दर्शयति – वर्णमात्रस्येति। अमुम् इति। अदस अम्। त्यदाद्यत्वम्। **"अकारे लोपम्"** (२।१।१७) इति कृते **'यावत्सम्भवस्तावद्विधिः'** (का० परि० ५४) इति पुनरमोऽकारेऽकारस्य लोपः, ततो विभक्त्यकारस्याकारः।

अमून् इति। अदसः शस्। तथैव त्यदाद्यत्वे कृते **"शसि सस्य च नः"** (२।१।१६) इति दीर्घत्वे पश्चाद् **"उत्वं मात्"** (२।३।४१) इत्यूकारो दीर्घः। कथम् इति चेदुच्यते, नात्र उकारस्य भाव उत्वम्, अपि तु ऊनां भावः उत्वमिति। तेनेत्यादिबहुवचनान्ता गणस्य संसूचका भवन्तीति तेन ह्रस्वदीर्घप्लुता गृह्यन्ते। ततः **"स्थानेऽन्तरतमः"** (का० परि० १६) इति न्यायाद् ह्रस्वस्य ह्रस्वो दीर्घस्य च दीर्घ ऊकार इति। प्लुतस्तु लोके प्रतिनियतविषय इति नोदाहृतः ॥२६२।

[ क० च० ]

**उत्वम्०।** मादिति किम् ? अमुकाभ्यामिति **वृत्तिः।** ननु कथं मादिति खण्ड्यते, स्वोदाहरणस्यैवासिद्धत्वात्। तथाहि 'अमुम्' इति न सिध्यति। अदसोऽमि त्यदाद्यत्वे पुनः **"अकारे लोपम्"** (२।१।१७) इति कृते मादिति विना अदसोऽवयवस्यैवोत्वस्य प्राप्तत्वाद् अमोऽकारस्योत्वं न स्यात्, अत्र **केनचित् सिद्धान्तः** क्रियते वर्णादित्युच्यताम् इतीदं न सङ्गतम्, लाघवाभावात्। **अन्ये** तु 'खण्डितुमेव न शक्यते किन्तु प्रथमकक्षायामेवोक्तम् इत्याहुः'। **अपरे** तु **'सकृत् कृते कृतः शास्त्रार्थः'** इति न्यायाद् एकवारम् अकारलोपम् इति कृते पश्चाद् अनेनादसोऽवयवस्योत्वे **"अग्नेरमोऽकारः"** (२।१।५०) इति अमुम् इति भवेदित्याहुः।

ननु तथापि 'अमुकाभ्याम्' इति कथमुक्तम्। मादित्यस्याभावे सावित्यस्यानुवर्तनात्, नैवम्। पृथग्योगात् साविति नानुवर्तते इति। **वस्तुतस्तु** नायं खण्डनपरो ग्रन्थः किन्तु **प्रयोजनाभिप्रायक** एव नातः काप्यनुपपत्तिः। ऊनामिति ह्रस्वदीर्घप्लुतानां प्रत्येकं व्यक्तिभेदाद् उकारग्रहणेन दीर्घप्लुतयोरग्रहणात् कथं बहुवचनम्, **नैवम्।** दीर्घप्लुतयोरेकजातित्वाज्जात्याक्षिप्तव्यक्तिभेदेन बहुवचनमिति चेत्, न।दीर्घप्लुतयोरुत्वं

जातेरभावात् ? सत्यम् । श्रुतत्वादिह वर्णशब्दलोपो ज्ञातव्यः । यथा "**यदुगवादितः**" (२।६।११) इत्यत्रोक्तमिति । **हेमकरस्तु** विदक्षया बहुवचनम् । यथा "**शमामष्टानां श्ये**" (६।१।१०२)इति **चान्द्रसूत्र**मित्युक्तवान् । त्वप्रत्ययबलादेव बहुत्वप्रतीतिरिति **टीका** ॥२६२।

**[समीक्षा]**

'अदस्+अम्, अदस्+औ, अदस्+शस्' इस अवस्था में पाणिनि तथा शर्ववर्मा दोनों ने ही म् (द्) से परवर्ती वर्ण के स्थान में उवर्णादेश करके 'अमुम्, अमू, अमून्' शब्दरूप सिद्ध किए हैं। अन्तर यह है कि पाणिनि उवर्णादेश तथा मकारादेश का विधान एक ही सूत्र द्वारा करते हैं–"**अदसोऽसेर्दादु दो मः**" (अ० ८।२।८०), जब कि कातन्त्र में एतदर्थ दो सूत्र स्वतन्त्र हैं। अतः प्रक्रिया की दृष्टि से उभयत्र साम्य ही है।

**[रूपसिद्धि]**

१. **अमुम्**। अदस्+अम्। "**त्यदादीनाम विभक्तौ**" (२।३।२९) से स् को अ, "**अकारे लोपम्**" (२।१।१७) से दकारोत्तरवर्ती अकार का लोप, "**अदसः पदे मः**" (२।२।४५) से द् को म् तथा प्रकृत सूत्र से अकार को उकारादेश।

२. **अमू**। अदस्+औ। पूर्ववत् स् को अ, पूर्ववर्ती अ का लोप, अ को औ-औ का लोप, द् को म् तथा प्रकृत सूत्र से औकार को ऊकारादेश।

३. **अमून्**। अदस्+शस्। पूर्ववत् स् को अ, अलोप, समानलक्षणदीर्घ-परवर्ती अकारलोप, "**शसि सस्य न नः**" (२।१।१६) से स् को न्, द् को म् तथा प्रकृत सूत्र से आकार को ऊकारादेश ॥२६२।

## २६३. एद् बहुत्वे त्वी [२।३।४२]

**[सूत्रार्थ]**

अदस्–शब्दगत मकार से परवर्ती वर्ण के स्थान में बहुवचन में प्रवृत्त होने वाले एकार को ईकारादेश होता है ॥२६३।

**[दु० वृ०]**

अदसो मात् परो बहुत्वे निष्पन्न एद् ईर्भवति। अमी, अमीभ्यः। बहुत्वे इति किम् ? अमू। मादिति किम् ? अमुकेभ्यः। तुशब्द उत्तरत्र बहुत्वनिवृत्त्यर्थः ॥२६३।

[ दु० टी० ]

**एद् बहु०** । बहुत्वे निष्पन्न इति बहुत्वार्थसम्भवो य एकार इत्यर्थः । बहुत्वे वर्तमानस्यादसो मादिति विशेषणे प्रयोजनाभावात् ॥२६३।

[ वि० प० ]

**एद् बहु०** । 'अमी, अमीभ्यः' इति । एकत्र अदसो जस्, त्यदाद्यत्वम् **"जस् सर्व इः"** (२।१।३०), **"अवर्ण इवर्णे ए"** (१।२।२) इत्याकारस्यैत्वम् । अन्यत्र **"धुटि बहुत्वे त्वे"** (२।१।१९) इत्येत्वम् । अमू इति । अदस् औ, त्यदाद्यत्वम् , नपुंसकत्वाद् "औरीम्" (२।२।९), अथवा स्त्रियामुदाहरणम्, त्यदाद्यत्वम्, **"स्त्रियामादा"** (२।४।४९), ततः "औरिम्" (२।१।४१), **"अवर्ण इवर्णे ए"** (१।२।२) इति द्विवचने निष्पन्नत्वात् **"उत्वं मात्"** (२।३।४१) इत्युत्वमेव भवति । ननु सन्ध्यक्षराणां दीर्घसंज्ञा नास्तीति कथम् एकारस्य दीर्घ ऊकार इति ? नैवम्, दीर्घो हि महाप्राणोऽपरस्य महाप्राणस्यैव स्थाने आन्तरतम्यात् प्रवर्तते इति दीर्घस्य दीर्घ ऊकार इति बाहुल्यादुच्यते ॥२६३।

[ क० च० ]

**एद्०** । एदिति तकारोऽनुबन्ध एद, **"बहुवचनम् अमी"** (१।३।३) इति निर्देशात् । **पञ्च्यां** बाहुल्यादिति गुरुत्वेन सादृश्ये आद् भवतीत्यर्थः । पक्षान्तरमाह – अथवेति ॥२६३।

[ समीक्षा ]

'अदस् + जस्, अदस् + भ्यस्' इस अवस्था में पाणिनि तथा शर्ववर्मा के अनुसार बहुवचन में विहित एकार को ईकारादेश होकर 'अमी, अमीभ्यः' शब्दरूप सिद्ध होते हैं । पाणिनि के एकार-ईकारविधायक सूत्र हैं – **"बहुवचने झल्येत्, एत ईद् बहुवचने"** (अ० ७।३।१०३; ८।२।८१) । इस प्रकार उभयत्र प्रक्रियासाम्य ही है ।

[ रूपसिद्धि ]

१. **अमी** । अदस् + जस् । **"त्यदादीनाम विभक्तौ"** (२।३।२९) से सकार को अकार, **"अकारे लोपम्"** (२।१।१७) से दकारोत्तरवर्ती अकार का लोप, **"जस् सर्व इः"** (२।१।३०) से जस् को इ, **"अवर्ण इवर्णे ए"** (१।२।२) से अ को ए-परवर्ती इकार का लोप, **"अदसः पदे मः"** (२।२।४५) से द् को म् तथा प्रकृत सूत्र से एकार को ईकारादेश ।

२. **अमीभ्यः।** अदस् + भ्यस् । पूर्ववत् सकार को अकार, पूर्ववर्ती अकार का लोप, **"भुटि बहुत्वे त्वे"** (२।१।१९) से अ को ए, दकार को मकार, अ को ए – ए का लोप, प्रकृत सूत्र से एकार को ईकार तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से स् को विसर्गादेश ॥२६३।

## २६४. अपां भे दः [२।३।४३]

### [सूत्रार्थ]

भकारादि विभक्ति के परे रहते 'अप्' शब्द के अन्तिम वर्ण को द् आदेश होता है ॥२६४।

### [दु० वृ०]

अपां विभक्तौ भे दो भवति । अद्भिः, स्वद्भ्याम् । विभक्ताविति किम् ? अब्भारः ॥२६४।

### [दु० टी०]

अपाम्० । अनुकार्यानुकरणयोर्भेदस्याविवक्षितत्वाद् बहुवचनम् । 'दः' इत्यकार उच्चारणार्थः। किमयं दादेश उतादादेश इति न चोद्यम्, उभयथाप्यदोषात् । किन्त्वकारस्याकारविधाने न किञ्चित् फलमिति द एवान्ते विधीयते । शोभना आपो ययोरिति विग्रहः । **'समासान्तविधिरनित्यः'** (व्या० परि० ७५) इति । अपामिति बहुवचनं विदधतः **सूत्रकारस्य** मतं बहुवचनमेव लक्ष्यते इति । अन्यथा शब्दविधाने हि निःसन्देहार्थम् इति विदध्यादिति ॥२६४।

### [वि० प०]

अपां प्रकृत्वादिह विभक्तिरनुवर्तते इत्याह – **अपां विभक्ताविति ।** अपामन्तस्य दकारो भवति विभक्तौ भ इत्यर्थः । तेन समाससंबन्धिन्यामपि विभक्तौ भ इति । **स्वद्भ्याम्** इति । शोभना आपो ययोरिति विग्रहः । **"पन्थ्यप्पुरः"** (२।६।७३ –१९) इति राजादिपाठादत्प्रत्ययो नास्ति, समासान्तविधेरनित्यत्वात् । अब्भार इति । अपो बिभर्तीति कर्मण्यण् । अपामिति बहुवचनेन सूत्रकारो ज्ञापयति 'बहुवचनान्त एवायं स्वभावात्' । अन्यथा शब्दप्रधाननिर्देशे 'अपः' इति विदध्यात् ॥२६४।

### [क० च०]

अपाम्० । 'दः' इत्यकार उच्चारणार्थः, एकवर्णादेशप्रस्तावात् ' अथ किमर्थमयं दादेशः, अदादेशो विधीयताम्, नैवम् । **'अनेकवर्णः सर्वस्य'** (का० परि० ६) इति

न्यायात् समुदायस्य प्रवर्तमानेऽकारस्याकारकरणे प्रयोजनाभावात् । न चोत्तरत्रानुवर्तने प्रयोजनमिति वाच्यम् । 'अनडुहि' इत्यत्र अनडुदिति दकारमात्रस्य दर्शनादिति **कुलचन्द्रः** ॥२६४।

**[ समीक्षा ]**

'अप् + भिस्, स्वप् + भ्याम्' इस अवस्था में पाणिनि तथा शर्ववर्मा दोनों ही शाब्दिकाचार्यों ने प् को द् आदेश का विधान करके 'अद्भिः, स्वद्भ्याम्' शब्दरूप सिद्ध किए हैं। पाणिनि का सूत्र है– **"अपो भि"** (अ० ७।४।४८)। इस प्रकार उभयत्र साम्य ही है।

**[ रूपसिद्धि ]**

१. **अद्भिः।** अप् + भिस् । प्रकृत सूत्र से पकार को दकार तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से स् को विसर्गादेश।

२. **स्वद्भ्याम्।** स्वप् + भ्याम् । शोभना आपो ययोस्ताभ्याम् । पूर्ववत् प्रकृत सूत्र से पकार को दकारादेश ॥२६४।

## २६५. विरामव्यञ्जनादिष्वनडुन्नहिवन्सीनां च [ २।३।४४ ]

**[ सूत्रार्थ ]**

विराम के विषय में तथा व्यञ्जनादि प्रत्यय के परे रहने पर अनड्वाह्, नह्भागान्त शब्द एवं वन्स्भागान्त शब्दों के अन्तिम वर्ण को 'द्' आदेश होता है ॥२६५।

**[ दु० वृ० ]**

विरामे व्यञ्जनादिषु च अनडुन्नहिवन्सीनां च लिङ्गानाम् अन्तस्य दो भवति। स्वनडुत्, स्वनडुद्भ्याम् । उपानत्, उपानद्भ्याम् । सुविद्वत्, सुविद्वद्भ्याम् । व्यञ्जनमिह सामान्यम् । तेन – अनडुत्ता, उपानत्ता, विद्वता । ये नेष्यते – अनडुह्यम्, उपानह्यम् ॥२६५।

**[ दु० टी० ]**

**विराम०** । विरमणं विरामोऽवसानम् । व्यञ्जनमेवादिर्येषामिति बहुव्रीहिः । एकापीयं सप्तमी अर्थवशाद् भिद्यते । विरामकृतं पौर्वापर्यं नास्तीति विरामविषये व्यञ्जनादिषु परत इत्यर्थः । वन्स्यनडुहोस्तु विरामेणैवोदाहरणं संयोगान्तलोपेनाधिष्ठितत्वान्नपुंसकेऽपि विरामव्यञ्जनादावुक्तं नपुंसकादित्यतिदेशबलात् सिध्यति । ननु विरामे दत्वं संयोगान्तलोपं किमिति न बाधते **'येन नाप्राप्तौ यो विधिरारभ्यते स तस्य बाधकः'** (व्या०परि० ४२)

इति न्यायात्। नैवम्। 'उपानद्' इत्यत्र विरामग्रहणस्य चरितार्थत्वात्। 'विद्वान्, अनड्वान्' इत्यत्र **'आदेशाद् आगमो विधिर्बलवान्'** (भो० परि० १०१) इति सौ न्वागमे सति परत्वात् संयोगान्तलोप एव स्यात्। संज्ञाविधावनुषङ्गलोपस्य बलवत्त्वं दर्शितमेव। 'विद्वद्भ्याम्' इत्यत्र दत्वमिदं विसर्जनीयस्यैव बाधकं न संयोगान्तलोपस्येति विरामग्रहणमुत्तरार्थमिहार्थं च। लोपविधेर्बलवत्त्वात् सिलोपे कृते **'वर्णाश्रये प्रत्ययलोपलक्षणं नास्ति'** (व्या० प० पा० ९६) इति। तथा 'पञ्च, सप्त' इति जस्– शसोर्लुकि कृते **"लिङ्गान्तनकारस्य"** (२।३।५६) इति नलोपो न स्यात्। 'विरामसुभेषु' इति कृते विरामव्यञ्जनादावित्यत्र व्यञ्जनशब्दाश्रितपक्षे दुष्यति। इतरपक्षेऽपि **सुखार्थमेव,** न तु **सामान्यार्थम्**। यस्माद् आदिग्रहणमिह विभक्त्यधिकारात् सामान्यं व्यञ्जनं लभ्यते इति तदर्थं व्यञ्जनमिह सामान्यं चेत् समासेऽपि स्वरे तर्हि व्यावृत्तिः स्यात्, अनडुदागमनम् इत्यादिषु, नैवम्। **"व्यञ्जनान्तस्य यत् सुभोः"** (२।५।४) भविष्यति, तर्हि 'आनडुहं चर्म, वैदुषं वाक्यम्' इत्यत्रापि स्यात् ? सत्यम्। तत्र यद्यपि पूर्वयोर्योगयोर्युक्तार्थोऽनुवर्तते तथापि तत्र प्रकरणबलात् समासमेवानुवर्तयिष्यामः।

यद्येवं 'दिवौकसः' इत्यत्रापि **"व्यञ्जनान्तस्य यत्सुभोः"** (२।५।४) इति उत्वं स्यात्, न सामान्यव्यञ्जनाश्रयत्वात्। क्व तर्हि **"व्यञ्जनान्तस्य यत्सुभोः"** (२।५।४) इति प्रवर्तते चेत्, नाहं जाने, अनियतविषयत्वात्। **अपरस्तु** ब्रूते – **"औ सौ, वाम्या, दिव उद् व्यञ्जने"** (२।२।२६, २७, २५) इत्यस्माद् योगतस्तान् योगान् पूर्वं विदध्यात्, न प्रकरणान्तरे स्थापयेत्। तस्माद् अर्थादिह प्रकरणे **"व्यञ्जनान्तस्य यत् सुभोः"** (२।५।४) इत्युपतिष्ठते न्यायः, पुनरत्र विभक्ताविति वर्तते, तदपेक्षया व्यञ्जनादिसामान्यं भवत् प्रत्यय एव गम्यते इति चोद्यमिदमपास्तमेव। 'यच्चरति, तच्चरति' इति चवर्गस्य गत्वं कथन्न स्याद् इति प्रतिपदोक्ताश्रयणमपि कष्टमिति। येनेष्यते अनडुह्यमिति, अनडुहि साध्विति विग्रहः। तत्रायं समाधिः **"स्वरे प्रत्यये ये च"** (२।६।४४) इत्यत्र प्रकरणबलात् तद्धितो यकारोऽवसीयते स च प्रत्ययत्वं न व्यभिचरति तत्र यत् प्रत्ययग्रहणं तद् विशिष्टसंज्ञावधारणार्थं प्रतिपत्तव्यम्। प्रति एतीति **प्रत्ययः।** स्वरमुच्चार्य व्यञ्जनमुच्चार्यते, व्यञ्जनं चोच्चार्य पुनः स्वर इति **पूर्वाचार्या** अघुट्स्वरमपि प्रत्ययमाहुः। तेन प्रत्यये ये इति विशेषणात् तद्धितयकारस्याघुट्स्वरत्वमध्यारोप्यते। प्रयोजनं तु ये व्यञ्जनकार्यं मा भूत्। न हि वन्सेरिकार उच्चारणार्थः, क्वन्सुवन्स्वोरुत्सृष्टानुबन्धयोर्ग्रहणमिति ॥२६५।

[वि० प०]

**विराम०।** एकापीयं सप्तमी अर्थवशाद् द्विधा भिद्यते, विरामस्याभावरूपत्वात् तत्कृतं पौर्वापर्यं नास्ति, विरामविषये व्यञ्जनादिषु च निमित्तेष्वित्याह – **विराम** इत्यादि। **उपानदिति।** उपपूर्वो नह बन्धने उपनह्यतीति क्विप्। **नहिवृतिवृषिव्यधिरुचिसहितनिषु क्विबन्तेषु प्रादिकारकाणामेव दीर्घः** श्चेति वचनादुपसर्गस्य दीर्घत्वं यदि स्यादेरेव व्यञ्जनमभिप्रेयात् तदा 'विरामसुभेषु' इति विदध्यात्। न खलु सकारभकाराभ्यामन्यद् व्यञ्जनमस्ति इत्याह – **व्यञ्जनमि**त्यादि। 'अनडुहो भावः, उपानहो भावः, विदुषो भावः' इति विगृह्य **"तत्वौ भावे"** (२।६।१३) इति तप्रत्ययः। यकारेऽपि तर्हि प्राप्नोतीत्याह – येनेष्यते इति। तद्धितयकारस्याघुट्स्वरत्वं प्रतिपादितम्। ततो न तस्मिन् व्यञ्जनकार्यमित्यर्थः। अनडुह्यमिति साधावर्थे यप्रत्ययः ॥२६५।

[क० च०]

**विराम०।** विरमणं विरामः, अवसानमित्यर्थः। ननु सेर्व्यञ्जनत्वादेव सिध्यति किं विरामग्रहणेन ? सत्यम्। **'सर्वविधिभ्यो लोपविधिर्बलवान्'** (का० परि० ३४) इति न्यायादसौ सिलोपे दकारो न स्यात्। न च प्रत्ययलोपलक्षणेन स्यादिति वाच्यम्, न वर्णाश्रये प्रत्ययलोपलक्षणमिति न्यायात्। उत्तरार्थं च, तेन 'पञ्च, षड्' इत्यत्र जस्शसोर्लुकि लिङ्गान्तनकारलोपो डत्वं च न स्यादिति शेषः। नहिवन्स्योरिकार उच्चारणार्थ आदेशस्यैकवर्णत्वात्। ननु किं वन्सिग्रहणं व्यञ्जनेऽनुषङ्गलोपे आन्तरतम्याद् **"धुटां तृतीयः"** (२।३।६०) इति कृते विरामे च वा विरामे सति सिद्धत्वात् ? सत्यम्। वन्सिग्रहणं विसर्जनीयस्य बाधनार्थं वन्स्यनडुहोस्तु विरामे नास्त्युदाहरणं पुंसि सौ नुरिति कृते संयोगान्तलोपेन बाधितत्वात्। नपुंसके च **"विरामव्यञ्जनादावुक्तम्"** (२।३।६४) इत्यतिदेशेनैव सिद्धत्वादिति **टीका।** तेन 'सुविद्वत्, स्वनडुत्' इति **वृत्तौ** पाठो नास्तीति ॥२६५।

[**समीक्षा**]

'स्वनड्वाह् (नपुंसकलिङ्ग) + सि, उपानह् + सि, उपानह् + भ्याम्, सुविद्वन्स् (नपुंसकलिङ्ग) + सि, सुविद्वन्स् + भ्याम्' इस अवस्था में कातन्त्रकार ने हकार – सकार को दकारादेश करके 'स्वनडुत्, स्वनडुद्भ्याम्, उपानत्, उपानद्भ्याम्, सुविद्वत्,

सुविद्वद्भ्याम्' शब्दरूप सिद्ध किए हैं। पाणिनि के अनुसार 'स्वनडुत्, सुविद्वत्' में तो दकारादेश होता है तथा 'उपानत्' में धकारादेश। सामान्यतया उभयत्र प्रक्रियासाम्य ही है। पाणिनि के दो सूत्र हैं– **"नहो धः, वसुस्रंसुध्वंस्वनडुहां दः"** (अ० ८।२।३४, ७२)।

**[ रूपसिद्धि ]**

१. **स्वनडुत्।** स्वनड्वाह् (नपुंसकलिङ्ग) + सि। शोभना अनड्वाहो यस्य कुलस्य तत्। **"नपुंसकात् स्यमो०"** (२।२।६) से सिलोप, **"विरामव्यञ्जनादावुक्तम्०"** (२।३।६४) के अतिदेशानुसार **"अनडुहश्च"** (२।२।४२) से आकारसहित वकार को उकार, प्रकृत सूत्र से ह् को द् तथा **"वा विरामे"** (२।३।६२) से द् को त्।

२. **स्वनडुद्भ्याम्।** स्वनड्वाह् + भ्याम्। शोभना अनड्वाहो ययोः कुलयोः पुंसोर्वा ताभ्याम्। पूर्ववत् सिलोप, **"अनडुहश्च"** (२।२।४२) से 'वा' को उ तथा प्रकृत सूत्र से हकार को दकारादेश।

३. **उपानत्।** उपानह् + सि। **"व्यञ्जनाच्च"** (२।१।४९) से सिलोप, प्रकृत सूत्र से ह् को द् तथा **"वा विरामे"** (२।३।६२) से दकार को तकारादेश।

४. **उपानद्भ्याम्।** उपानह् + भ्याम्। प्रकृत सूत्र से हकार को दकारादेश।

५. **सुविद्वत्।** सुविद्वन्स् (नपुंसकलिङ्ग) + सि। शोभनो विद्वान् यस्य कुलस्य तत्। **"व्यञ्जनाच्च"** (२।१।४९) से सिलोप, अतिदेश, **"अनुषङ्गश्चाक्रुञ्चेत्"** (२।२।३९) से नलोप, प्रकृत सूत्र द्वारा स् को द् तथा **"वा विरामे"** (२।३।६२) से दकार को तकारादेश।

६. **सुविद्वद्भ्याम्।** सुविद्वन्स् + भ्याम्। शोभनो विद्वान् ययोः कुलयोः पुंसोर्वा, ताभ्याम्। पूर्ववत् नलोप तथा प्रकृत सूत्र द्वारा सकार को दकारादेश ॥२६५।

## २६६. स्रसिध्वसोश्च [ २।३।४५ ]

**[ सूत्रार्थ ]**

विराम के विषय में तथा व्यञ्जनादि प्रत्यय के परे रहते स्रसन्त तथा ध्वसन्त लिङ्ग के अन्तिम वर्ण को द् आदेश होता है ॥२६६।

[दु० वृ०]

स्रसिध्वसोर्लिङ्गयोरन्तस्य विरामे व्यञ्जनादिषु च दो भवति। उखास्रत्, उखास्रद्भ्याम्, उखास्रत्कल्पः। पर्णध्वत्, पर्णध्वद्भ्याम्, पर्णध्वद्देश्यः॥२६६।

[दु० टी०]

**स्रसि०।** स्रन्सुध्वन्सोर्धात्वोः क्विपि कृतानुषङ्गलोपयोर्ग्रहणं विसर्गस्यापवादः। पृथगारम्भे हि सति चकारोऽयम्। स च अनुक्तसमुच्चयार्थ इति अग्युक्तस्याव्ययककारस्य दत्वं सिद्धं भवति। धिक्, धकित्, पृथक्, पृथकत्। यथासंख्यमिह नास्ति व्यञ्जनादिष्विति बहुवचनात्॥२६६।

[वि० प०]

**स्रसि०।** 'ऊखायाः संसते, पर्णानि ध्वंसते' इति क्विपि कृते **"अनिदनुबन्धानामगुणेऽनुषङ्गलोपः"** (३।६।१)। उखास्रत्कल्पः इति।। ईषदसमाप्त उखास्रदिति विगृह्य **"ईषदसमाप्तौ कल्पदेश्यदेशीयाः"** (२।६।४०-४) इति तमादि-दर्शनात् कल्पप्रत्ययः। तथा 'पर्णध्वद्देश्यः' इति देश्यप्रत्ययः॥२६६।

[क० च०]

**स्रसि०।** विसर्गस्यापवादोऽयम्। अथ पूर्वत्र 'वन्सिस्रसिध्वसाम्' इत्येकयोगः क्रियताम्? सत्यम्। पृथग्वचनाच्चकारोऽयमनुक्तसमुच्चयार्थः। तेनाग्युक्तस्य कान्ताव्ययस्य पक्षे दत्वं सिद्धम्। धिक्, धकित्। पृथक्, पृथकत्। यथासंख्यमिह नाशङ्क्यते 'व्यञ्जनादिषु' इति बहुवचनादिति **टीका**॥२६६।

[समीक्षा]

'उखास्रस्+सि, उखास्रस्+भ्याम्, उखास्रस्+कल्प+सि, पर्णध्वस्+सि, पर्णध्वस्+भ्याम्, पर्णध्वस्+देश्य+सि' इस अवस्था में पाणिनि तथा कातन्त्रकार दोनों ने ही सकार को दकारादेश का विधान करके 'उखास्रत्, उखास्रद्भ्याम्, उखास्रत्कल्पः, पर्णध्वत्, पर्णध्वद्भ्याम्, पर्णध्वद्देश्यः' शब्दरूप सिद्ध किए हैं। पाणिनि का सूत्र है – **"वसुस्रंसुध्वंस्वनडुहां दः"** (अ० ८।२।७२)। इस प्रकार उभयत्र प्रक्रियासाम्य ही है।

[ रूपसिद्धि ]

१. **उखास्रत्।** उखास्रस्+सि। **"व्यञ्जनाच्च"** (२।१।४९) से सिप्रत्यय का लोप, प्रकृत सूत्र द्वारा सकार को दकार तथा **"वा विरामे"** (२।३।६२) से दकार को तकारादेश।

२. **उखास्रद्भ्याम्।** उखास्रस्+भ्याम्। प्रकृत सूत्र द्वारा सकार को दकारादेश।

३. **उखास्रत्कल्पः।** उखास्रस्+कल्प+सि। ईषदसमाप्तः उखास्रत्। **"ईषदसमाप्तौ कल्पदेश्यदेशीयाः"** (२।६।४०-४) से कल्पप्रत्यय, प्रकृतसूत्र द्वारा सकार को दकार, **"अघोषे प्रथमः"** (२।३।६१) से द् को त्, 'उखास्रत्कल्प' की लिङ्गसंज्ञा, सिप्रत्यय तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से स् को विसर्गादेश।

४. **पर्णध्वत्।** पर्णध्वस्+सि। **"व्यञ्जनाच्च"** (२।१।४९) से सिलोप, प्रकृत सूत्र से स् को द् तथा **"वा विरामे"** (२।३।६२) से द् को त् आदेश।

५. **पर्णध्वद्भ्याम्।** पर्णध्वस्+भ्याम्। प्रकृत सूत्र से सकार को दकारादेश।

६. **पर्णध्वद्देश्यः।** पर्णध्वस्+देश्य+सि।ईषदसमाप्तः पर्णध्वत्। **"ईषदसमाप्तौ कल्पदेश्यदेशीयाः"** (२।६।४०-४) से 'देश्य' प्रत्यय, प्रकृत सूत्र से सकार को दकार, लिङ्गसंज्ञा (पर्णध्वद्देश्य), सिप्रत्यय तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से सकार को विसर्गादेश ॥२६६।

## २६७. हशषछान्तेजादीनां डः [ २।३।४६ ]

[ सूत्रार्थ ]

विराम के विषय में तथा व्यञ्जनादि प्रत्यय के परे रहने पर 'ह्-श्-ष्-छ्' वर्ण जिनके अन्त में हों या यज् आदि धातुएँ जिनके अन्त में हों – ऐसे लिङ्गों के अन्तिम वर्ण को डकारादेश होता है ॥२६७।

[ दु० वृ० ]

ह-श-ष-छान्तानां यजादीनां च लिङ्गानामन्तस्य विरामे व्यञ्जनादिषु च डो भवति। मधुलिट्, मधुलिड्भ्याम्, मधुलिट्पाशः। सुविट्, सुविड्भ्याम्, सुविट्तरः। षट्, षड्भिः, षट्त्वम्। शब्दप्राट्, शब्दप्राड्भ्याम्, शब्दप्राट्त्वम्। देवेट्, देवेड्भ्याम्,

देवेट्त्वम् । रज्जुसृट्, रज्जुसृड्भ्याम्, रज्जुसृट्त्वम् । 'यज्, सृज्, मृज्, राज्, भ्रज्, भ्रस्ज्, व्रश्च्, परिव्राज्' एते **यजादयः** ॥२६७।

**[दु० टी०]**

**हशष०।** हशषछा अन्ते येषामिति बहुव्रीहिः। इजेवादिर्येषामिति च। हशषछान्ताश्च इजादयश्चेति द्वन्द्वः। मधु लेढि। सुष्ठु विशति। शब्दं पृच्छति। देवेभ्यो यजति। रज्जुं सृजति इति क्विप्। तथा कांस्यं मार्ष्टि-कांस्यमृट्, कांस्यमृड्भ्याम्। संराजते – सम्राट्, सम्राड्भ्याम्। विभ्राजते – विभ्राट्, विभ्राड्भ्याम्। "**क्विब् भ्राजि०**" (४।४।५७) इत्यादिना क्विप्। धाना भृज्जति इति धानाभृट्, धानाभृड्भ्याम्। मूलं वृश्चति – मूलवृट्, मूलवृड्भ्याम्। "**संयोगादेर्धुटो लोपः**" (२।३।५५)। परिव्रजति – परिव्राट्, परिव्राड्भ्याम्। "**अन्येभ्योऽपि दृश्यन्ते**" (४।३।६७) इति विण्। इवर्णचवर्गयशानां तालव्यत्वात् शकारस्य विरामे जकारश्चकारश्च प्राप्तः। तथा घोषवत्यघोषे च हकारस्य यजादीनां च गत्वं कत्वं च प्राप्तम्। डत्वमुक्तम्। ऋवर्णटवर्गरषाणां मूर्धन्यत्वाद् अन्तरतमः षकारस्य डकारो भवत्येव ? सत्यम्। षकारग्रहणं ष एवान्ते यस्येति प्रतिपदोक्तार्थम्। तेन 'सर्पिष्षु, धनुष्षु, सर्पिष्कल्पः, धनुष्पाशः' इति कृते षत्वे न भवति। वचनमिदं ज्ञापयति – '**लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्**' (का० परि० ७५) इत्यनित्योऽयं न्यायः प्रायो वर्णविधिष्विति। तेन वृक्षांश्चरतीति सिद्धम्। अन्यथा "**शसि सस्य च नः**" (२।१।१६) इति नकारस्य लाक्षणिकत्वात् कुत एतदिति। "**च्छ्वोः शूटौ पञ्चमे च**" (४।१।५६) इति छस्य शत्वे शान्तत्वात् सिद्धे छग्रहणं ज्ञापयति 'शकारविधिरनित्यः' इति। तेन 'पथिप्राच्छौ, पथिप्राच्छः' इत्यपि सिद्धम्, तदेतत् पुनरदर्शनेन विरुध्यते इति।

अथ कृल्लक्षणनिरपेक्षमिदं चेत् तदा शान्तं लिङ्गं प्रतिपत्तव्यम् – 'पथिप्राशौ, पथिप्राशः' इत्यादिसिद्धये। अन्तग्रहणे सत्यादिशब्दस्य प्रत्येकं सम्बन्धो नाशङ्क्यते। इजादीनाम् इत्युक्ते '**इज गतौ**' (१।३४५ ईज गतौ) इत्यस्य ग्रहणमपि नाशङ्क्यते आदिशब्दस्य व्यवस्थावाचित्वाद् दृगादिषु 'ऋत्विज्' शब्दपाठाच्चेति ॥२६७।

**[वि० प०]**

**हशष०।** हश्च शश्च षश्च छश्च हशषछाः, ते अन्ते येषां ते हशषछान्ताः। इजेव आदिर्येषां ते इजादयस्ततो हशषछान्ताश्च इजादयश्चेति विग्रहः। इज इति

यजेः क्विपि सम्प्रसारणे च निर्देश इत्याह – यजादीनामिति । ननु विशेषाभावाद् **'इज गतौ'** (१।३४५ ईज गतौ) इति कथन्न गृह्यते ? नैवम्, आदिशब्दस्य व्यवस्थावाचित्वात्, दृगादिषु ऋत्विज्शब्दपाठाच्च । स हि उत्वापवादार्थो दृगादिषु पाठ उच्यते । यदि वात्र **'इज गतौ'** (१।३४५ ईज गतौ) इति गृह्यते, तदा ऋतौ यजतीति व्युत्पादितस्य ऋत्विज्शब्दस्य डत्वप्राप्तेरभावाच्चवर्गद्वारेणैव गत्वं सिद्धं किं दृगादिपाठेनेति भावः । मधुलिडिति । मधु लेढीति क्विप् । मधुलिट्पाश इति । कुत्सितो मधुलिडिति विगृह्य कुत्सितवृत्तेर्नाम्नि एव पाश इति तमादित्वात् पाशप्रत्ययः । **सुविडिति ।** सुष्ठु विशतीति क्विप् । सुविट्तर इति द्वयोरेकस्य निर्धारणे तरः । तथा शब्दं पृच्छतीति **"क्विब् वचिप्रच्छिश्रिद्रुश्रुप्रुज्वां दीर्घश्च"** इति क्विपि दीर्घः । देवेभ्यो यजतीति क्विपि कृते **"के यण्वच्च योक्तवर्जम्"** (४।१।७) इति यण्वद्भावात् सम्प्रसारणे यकारस्य इकारः । रज्जुं सृजतीति क्विप् ॥२६७।

## [ क० च० ]

**हशष० ।** व्यवस्थावाचित्वेन इष्टाश्रयणं कष्टमित्याह – ऋत्विज्शब्दपाठाच्चेति । ननु दृगादिषु ऋत्विज्शब्दपाठनियमः कथं न स्यात् । क्विबन्तयजशब्दस्य गो भवन् ऋतुपूर्वस्यैव भवति । तेन देवेभ्यो यजतीति देवपूर्वस्य यज्शब्दस्य गत्वं न भविष्यतीति, नैवम् । **'विधिनियमसम्भवे विधिरेव ज्यायान्'** (का० परि० ८४) इति न्यायात् तत्र विधिरेव कल्प्यते । तदैव विधिः सम्भवति, यद्यत्र यजादिग्रहणेन डत्वप्राप्तौ तदपवादो गत्वविधिः स्यादिति । ननु तत्रैव इजधातोर्ग्रहणं कथं न स्यादित्याह – ऋतौ यजतीत्यादि । रूढिवशादत्र ऋतौ यजतीत्यर्थ एव ऋत्विज्शब्दस्य पाठ इति प्रतिपत्तव्यम् । ननु तथापि अविशेषादिह इज् – यजोर्ग्रहणं कथं न स्यात् ? सत्यम् । एतन्निरासार्थमेवोक्तम् – आदिशब्दस्य व्यवस्थावाचित्वादिति **केचित् । वस्तुतस्तु** सृजादीनामेकप्रकृतीनां साहचर्याद् इजिरपि केवलव्यञ्जनप्रकृतित्वादेकप्रकृतिरेव गृह्यते इति **संक्षेपः** ॥२६७।

## [ समीक्षा ]

'मधुलिह् + सि, मधुलिह् + भ्याम्, सुविश् + सि, सुविश् + तर + सि, षष् + जस्, षष् + भिस्, शब्दप्राच्छ् + सि, शब्दप्राच्छ् + भ्याम्, देवेज् + सि, देवेज् + भ्याम्, देवेज् + त्व + सि, रज्जुसृज् + सि, रज्जुसृज् + भ्याम्, रज्जुसृज् + त्व + सि' इस अवस्था

में कातन्त्रकार 'ह्–श्–ष्–छ्' वर्णों के स्थान में 'ड्' आदेश करके 'मधुलिट्, मधुलिड्भ्याम्, सुविट्, सुविट्त्वम्, षट्, षड्भिः, शब्दप्राट्, शब्दप्राड्भ्याम्, देवेट्, देवेड्भ्याम्, देवेट्त्वम्, रज्जुसृट्, रज्जुसृड्भ्याम्, रज्जुसृट्त्वम्' आदि शब्दरूप सिद्ध करते हैं। पाणिनि **"व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः"** (अ० ८।२।३६) से 'यजादि–छ्–श्' के स्थान में मूर्धन्य ष् तथा **'झलां जशोऽन्ते"** (अ० ८।२।३९) से ष् को ड् आदेश करते हैं। 'मधुलिह्' आदि में **"हो ढः"** (अ० ८।२।३१) से हकार को ढकार तथा **"झलां जशोऽन्ते"** (अ० ८।२।३९) से ढकार को डकारादेश करते हैं। 'षट्' आदि के साधनार्थ भी **'झलां जशोऽन्ते"** (अ० ८।२।३९) से मूर्धन्य षकार को डकारादेश का विधान किया है।

**[ रूपसिद्धि ]**

१. **मधुलिट्।** मधुलिह्+सि। **"व्यञ्जनाच्च"** (२।१।४९) से सिलोप, प्रकृत सूत्र से ह् को ड् तथा **"वा विरामे"** (२।३।६२) से ड् के स्थान में ट् आदेश।

२. **मधुलिड्भ्याम्।** मधुलिह्+भ्याम्। प्रकृत सूत्र से हकार को डकारादेश।

३. **मधुलिट्पाशः।** मधुलिह्+पाश+सि। कुत्सितो मधुलिट् **"कुत्सितवृत्तेर्नाम्न एव पाशः"** (२।६।४०-५) से कुत्सार्थ में पाश-प्रत्यय, प्रकृत सूत्र से ह् को ड्, **"अघोषे प्रथमः"** (२।३।६१) से ड् को ट्, 'मधुलिट्पाश' शब्द की लिङ्गसंज्ञा, सिप्रत्यय तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से स् को विसर्गादेश।

४. **सुविट्।** सुविश्+सि। पूर्ववत् सि-लोप, प्रकृत **सूत्र से** श् को ड् तथा ड् को ट् आदेश।

५. **सुविड्भ्याम्।** सुविश्+भ्याम्। प्रकृत सूत्र द्वारा **शकार** को डकारादेश।

६. **सुविट्तरः।** सुविश्+तरः। अयमनयोः प्रकृष्टः सुविट्। **"द्वयोरेकस्य निर्धारणे तरः"** से तरप्रत्यय, प्रकृत सूत्र से श् को ड्, **"अघोषे प्रथमः"** (२।३।६१) से ड् को ट्, लिङ्गसंज्ञा, सिप्रत्यय तथा स् को विसर्गादेश।

७. **षट्।** षष्+जस्, शस्। **"कतेश्च जस्-शसोर्लुक्"** (२।१।७६) से 'जस्–शस्' प्रत्ययों का लुक्, प्रकृत सूत्र से ष् को ड् तथा **"वा विरामे"** (२।३।६२) से डकार को टकारादेश।

८. **षड्भिः।** षष् + भिस् । प्रकृत सूत्र ष् को ड् तथा सकार को विसर्गादेश।

९. **षट्त्वम्।** षष् + त्व + सि । षण्णां भावः । **"तत्वौ भावे"** (२।६।१३) से त्वप्रत्यय, प्रकृत सूत्र से ष् को ड्, **"अघोषे प्रथमः"** (२।३।६१) से ड् को ट्, लिङ्गसंज्ञा, सिलोप तथा मु - आगम।

१०. **शब्दप्राट्।** शब्दप्राच्छ् + सि ।सिलोप, प्रकृत सूत्र से छ् को ड्, **"निमित्ताभावे नैमित्तिकस्याप्यभावः"** (का० परि० २७) के न्यायानुसार छ् के अभाव में च् की निवृत्ति तथा **"वा विरामे"** (२।३।६२) से ड् को ट् आदेश।

११. **शब्दप्राड्भ्याम्।** शब्दप्राच्छ् + भ्याम् । प्रकृत सूत्र से छ् को ड् तथा चकार की निवृत्ति।

१२. **शब्दप्राट्त्वम्।** शब्दप्राच्छ् + त्व + सि । शब्दप्राच्छो भावः । **"तत्वौ भावे"** (२।६।१३) से त्वप्रत्यय, प्रकृत सूत्र से छ् को ड्, ड् को ट्, लिङ्गसंज्ञा, सिलोप तथा मु – आगम।

१३. **देवेट्।** देवेज् + सि । सिलोप, ज् को ड् तथा ड् को ट्।

१४. **देवेड्भ्याम्।** देवेज् + भ्याम् । प्रकृत सूत्र द्वारा जकार को डकारादेश।

१५. **देवेट्त्वम्।** देवेज् + त्व + सि । देवेजो भावः । **"तत्वौ भावे"** (२।६।१३) से त्वप्रत्यय, ज् को ड्, ड् को ट्, लिङ्गसंज्ञा, सिप्रत्यय, सिलोप तथा मु - आगम।

१६. **रज्जुसृट्।** रज्जुसृज् + सि । सिलोप, प्रकृत सूत्र से ज् को ड् तथा **"वा विरामे"** (२।३।६२) से ड् को ट्।

१७. **रज्जुसृड्भ्याम्।** रज्जुसृज् + भ्याम् । प्रकृत सूत्र से जकार को डकारादेश।

१८. **रज्जुसृट्त्वम्।** रज्जुसृज् + त्व + सि । रज्जुसृजो भावः । **"तत्वौ भावे"** (२।६।१३) से त्वप्रत्यय, प्रकृत सूत्र से ज् को ड्, ड् को ट्, लिङ्गसंज्ञा, सिप्रत्यय, सिलोप तथा मु - आगम ॥२६७।

## २६८. दादेर्हस्य गः [२।३।४७]

**[सूत्रार्थ]**

विराम के विषय में तथा व्यञ्जनादि प्रत्ययों के परे रहते दकारादि लिङ्ग-गत हकार के स्थान में गकार आदेश होता है ॥२६८।

[दु० वृ०]

लिङ्गस्य हस्य दादेर्विरामे व्यञ्जनादिषु च गो भवति। गोधुक्, गोधुग्भ्याम्, गोधुक्तमः ॥२६८।

[दु० टी०]

दादे०। द एवादिर्यस्येति विग्रहे लिङ्गस्य दादेर्न स्यात्। दामलिट्, दामलिड्भ्याम्। अनन्तरो दकारो नास्तीत्येकवर्णव्यवहितो गृह्यते। गां दोग्धीति क्विप्। एवं काष्ठं दहतीति काष्ठधक्, काष्ठधग्भ्याम्। कथं मित्रध्रुक्, मित्रध्रुग्भ्याम्? एकेन वर्णेन व्यवधानमाश्रीयते, न त्वनेकेनेति वचनात्। नैवम्, तदा दादिति विदध्यात्। दात् परस्येति गम्यत एव वचनात्। तस्मादादिशब्दः समीपमभिदधद् अपेक्षया व्यवहितं व्यवच्छिनत्तीति। अथवा लिङ्गस्य इत्यवयवावयविसंबन्धे षष्ठी। लिङ्गस्यावयवो दादिर्हान्त इति। कथं ध्रुक्, ध्रुग्भ्याम्। व्यपदेशिवद्भावाद् भविष्यति। दामलिट्, दामलिड्भ्यामिति। नात्र व्यपदेशिवद्भावप्रतीतिः, अतिव्यवहितत्वात्। न ह्यधातोर्दादिर्हकारः संभवतीत्याह– लिङ्गस्य हस्य दादेरिति। **केचिद्** धातोरिति सिंहावलोकितमधिकारमिच्छन्तीति। यथा सिंहो दूरं गत्वा पश्चादवलोकयति, तद्वद् यः स सिंहावलोकित इति, तथापि विशेषदत्तदृष्टिरिह प्रतिपत्तव्यः, चवर्गादिषु धातोरपि दर्शनात्। तदा दाम लेढीति क्विपि कृते कथं न स्यादिति पूर्ववत् परिहारश्चेत् किं धात्वधिकारेणेति ॥२६८।

[वि० प०]

दादेः। हस्य दादेरिति। द एव आदिर्यस्येति विग्रहः। **तेन लिङ्गस्य दादेर्न** भवति – दामलिडिति। गोधुगिति। गां दोग्धीति **"सत्सूद्विष०"** (४।३।७४) इत्यादिना क्विप्, **"हचतुर्थान्तस्य"** (२।३।५०) इत्यादिना दस्य धत्वम्। इहोकारव्यवधानेऽपि भवति न खल्वव्यवधानेन हकारस्य दादित्वमस्तीति। यद्येवं कथं मित्रध्रुगिति वचनप्रामाण्यादेकवर्णव्यवधानमाश्रीयते न त्वनेकेनेति। नैवम्, एवं सति दादिति विदध्यात्। वचनादेकवर्णव्यवधानेऽपि भविष्यति किमादिग्रहणेन? तस्माद् आदिग्रहणबलाद् वर्णान्तरातिरेकेणापि भवतीत्यदोषः। गोधुक्तम इति। अयमेषां प्रकृष्टो गोधुक् इति। **"आख्याताच्च तमादयः"** (२।६।४०) इति तमपत्ययः ॥२६८।

[क० च०]

दादेः । आदिग्रहणाद् वर्णान्तरातिरेकेणापि इत्यादि । अथ यदि वर्णान्तरातिरेकेणापि भवति, तदा 'दामलिड्' इत्यत्र कथं न स्यात् । चेत् तर्हि दादेरिति हकारस्य विशेषणेन किं कृतम् । लिङ्गस्यैव विशेषणं क्रियताम् इति **हेमकरः।** तन्न, लिङ्गस्य विशेषणे हि दादित्वाभावात् । **'गोधुक्'** इति स्वोदाहरणमेव न सिध्यति । तस्माद् अवश्यमेव दादेरिति हकारस्य विशेषणं युक्तम्, तस्मादयमेव **सिद्धान्तः।** तथाहि आदिशब्दादतिरिक्तवर्णान्तरेऽपि गृह्यमाणे दकारसाहचर्याद् अतिरिक्तमपि एकवर्णव्यञ्जनमेव गृह्यते इत्यदोषः ॥२६८।

[**समीक्षा**]

'गोदुह् + सि, गोदुह् + भ्याम्, गोदुह् + तम + सि ' इस अवस्था में कातन्त्रकार हकार को गकार तथा पाणिनि घकार - गकार आदेश करके 'गोधुक्, गोधुग्भ्याम्, गोधुक्तमः' प्रयोग सिद्ध करते हैं । पाणिनि के सूत्र हैं – **"दादेर्धातोर्घः, झलां जशोऽन्ते, झलां जश् झशि"** (अ० ८।२।३२; २।३९; ४।५३) । इस प्रकार पाणिनीय प्रक्रिया में गौरव सन्निहित है ।

[**रूपसिद्धि**]

१. **गोधुक्।** गोदुह् +सि । **"व्यञ्जनाच्च"** (२।१।४९) से सिलोप, **"हचतुर्थान्तस्य०"** (२।३।५०) से द् को ध्, प्रकृत सूत्र से ह् को ग् तथा **"वा विरामे"** (२।३।६२) से ग् को क् आदेश ।

२. **गोधुग्भ्याम्।** गोदुह् + भ्याम् । **"हचतुर्थान्तस्य०"** (२।३।५०) से द् को ध् तथा प्रकृत सूत्र से हकार को गकारादेश ।

३. **गोधुक्तमः।** गोदुह् + तम + सि । अयमेषां प्रकृष्टो गोधुक्। तमप्रत्यय, पूर्ववत् द् को ध्, ह् को ग् तथा **"अघोषे प्रथमः"** (२।३।६१) से ग् को क्, लिङ्गसंज्ञा, सिप्रत्यय, तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से सकार को विसर्गादेश ॥२६८।

## २६९. चवर्गदृगादीनां च [२।३।४८]

[**सूत्रार्थ**]

विराम के विषय में तथा व्यञ्जनादि प्रत्यय के परे रहते चवर्गान्त तथा दृश् - आदि लिङ्गसंज्ञक शब्दों में अन्तिम वर्ण को गकारादेश होता है ॥२६९।

[दु० वृ०]

चवर्गान्तस्य 'दृश्' इत्येवमादीनां च लिङ्गानामन्तस्य विरामे व्यञ्जनादिषु च गो भवति। वाक्, वाग्भ्याम्, वाक्त्वम्, वाक्कल्पः। तृष्णक्, तृष्णग्भ्याम्, तृष्णक्त्वम्। दृक्, दृग्भ्याम्, दृक्त्वम्। 'दृश्, स्पृश्, मृश्, दधृष्, उष्णिह्, ऋत्विज्, सृज्, असृज्' एते दृगादयः॥२६९।

[दु० टी०]

चवर्ग०। "**क्विब्वचिप्रच्छिश्रिद्रुस्रुप्रुज्वां दीर्घश्च**" इति "**तृषिधृषिस्वपां नजिङ्**" (४।४।५४)। दिशति तामिति दिक्, क्विप्। घृतं स्पृशतीति घृतस्पृक्। "**स्पृशोऽनुदके**" (४।३।७०) इति क्विप्। "**ऋत्विग् - दधृक् - स्रग् - दिगुष्णिहश्च**" (४।३।७३) इति क्विबन्ता निपात्यन्ते। न सृजतीति असृक्, क्विप्। दृगेवादिर्येषामिति बहुव्रीहिं कृत्वा पश्चाद् द्वन्द्वसमासः। यथाप्राप्तस्य बाधकमिदम्। ननु चजाभ्यामन्यश्चवर्गो नास्तीति चजदृगादीनामिति किन्न विदध्यात्? सत्यम्। वर्गग्रहणं संयोगान्तलोपमपि बाधित्वा गत्वार्थं "**वर्गे वर्गान्तः**" (२।४।४५) इति गत्वस्य चरितार्थत्वात् पश्चात् संयोगान्तलोपो भवत्येव। प्रत्यङ्, प्रत्यङ्भ्याम्। क्रुङ्, क्रुङ्भ्याम्। युङ्। अन्यथा यथा वाञ्छेः क्विपि कृते 'वान्, वांशौ' इति भवति। तथा एषाम् इनि परत्वात् संयोगान्तलोपः स्यात्। तत् पुनः अन्चियुजिक्रुन्चामेवाभिधानात्। '**खजि गतिवैकल्ये** (१।६९), **गुजि अव्यक्ते शब्दे**'(१।७४) खन्, खञ्जौ। गुन्, गुञ्जौ। यद्यभिधानं दृश्यते। अथवा तत्र व्यवस्थितविभाषया एषां प्रागेव गत्वे पश्चात् संयोगान्तलोपः॥२६९।

[वि० प०]

चवर्ग०। वाक्कल्प इति। ईषदसमाप्तौ वागिति पूर्ववत् कल्पप्रत्ययः। तृष्णगिति। "**तृषिधृषिस्वपां नजिङ्**" (४।४।५४) इति नजिङ् प्रत्ययः, '**तवर्गस्य षटवर्गाट्टवर्गः**" (३।८।५) इति नस्य णत्वम्। ननु वर्गग्रहणं किमर्थम्- चजाभ्यामन्यश्चवर्गो नास्तीति चजदृगादीनामित्युच्यताम्, सत्यम्। वर्गग्रहणं नित्यमपि संयोगान्तलोपं बाधित्वा गत्वार्थम्। ततो वर्गे वर्गान्तत्वे सति गत्वस्य चरितार्थत्वात् पश्चात् संयोगान्तलोपे सतीदं सिद्धं भवति। प्रत्यङ्भ्यामिति,

प्रत्यञ्चतीति क्विपि कृतेऽञ्चेरनुषङ्गलोपाभावो ज्ञापित एव। प्रत्यङ्, युङ्, क्रुङ् इति। **"युजेरसमासे नुर्धुटि"** (२।२।२८) इति नुरागमः। अन्यथा नित्यत्वात् परत्वाच्च प्राक् संयोगान्तलोपे कथमिदं स्यात्। तत् पुनरञ्चियुजिक्रुञ्चामेव। अन्येषां तु संयोगान्तस्यैवाग्रतो लोप इति। यथा **'खजि गतिवैकल्ये'** (१।६९)। खन्, खन्भ्यामिति। दृगादिषु ऋत्विजादीनां त्रयाणां चवर्गान्तत्वेऽपि नित्यत्वाद् यजादित्वे प्राप्ते गत्वार्थः पाठः ॥२६९।

**[क० च०]**

**चवर्ग०।** ऋत्विजादीनां त्रयाणामित्यादि। ननु 'स्रज्' इत्यस्य कथं डत्वप्राप्तिः, यजादिषु पाठाभावात्? सत्यम्। सृज इति यजादौ धातुमात्रपाठात् तत्स्थाने निपातस्यापि यजादित्वे को विरोधः। **वररुचिस्तु** स्रजपाठमेव नाद्रियते इति दिक्। ननु दृगादौ असृज्शब्दपाठात् कथं 'विश्वसृग्' इत्यत्र गत्वम्? सत्यम्। 'असृज' इत्यत्र एवं व्याख्यातव्यम्। अकारात् सृज् असृज इत्यर्थे सति विश्वशब्दस्याकारात् परस्य सृज्शब्दस्य विद्यमानत्वाद् इति **हेमकराशयः।** तन्न। न सृज् असृज् इति **टीकायां** नञ्समासस्योक्तत्वात् तस्माद् व्यवस्थितविभाषया गत्वसिद्धिरिति। **शरणदेवस्तु "न्यङ्क्वादीनां हश्च गः"** (४।६।५७) इत्यादिना गत्वमुच्यते ॥२६९।

**[समीक्षा]**

'वाच्+सि, वाच्+भ्याम्, तृष्णज्+सि, तृष्णज्+भ्याम्, दृश्+सि, दृश्+भ्याम्, दृश्+त्वम्' इस अवस्था में कातन्त्रकार अन्तिम वर्ण को गकारादेश करके 'वाक्, वाग्भ्याम्, तृष्णक्, तृष्णग्भ्याम्, दृक्, दृग्भ्याम्, दृक्त्वम्' इत्यादि शब्दरूप सिद्ध करते हैं। पाणिनि चवर्ग के स्थान में कवर्गादेश का विधान करते हैं–**"चोः कुः"** (अ० ८।२।३०)। इससे 'वाक्, तृष्णक्' जैसे शब्द सिद्ध होते हैं। दृश् से 'दृक्' आदि शब्दों के साधनार्थ पाणिनि ने **"व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः"** (अ० ८।२।३६) से श् को मूर्धन्य ष्, "झलां जशोऽन्ते" (अ० ८।२।३९) से ष् को ड् तथा ड् को ग् आदेश का विधान किया है। इस प्रकार पाणिनीय प्रक्रिया में स्पष्टतः गौरव सन्निहित है।

**[रूपसिद्धि]**

**१. वाक्।** वाच्+सि। **"व्यञ्जनाच्च"** (२।१।४९) से सिलोप, प्रकृत सूत्र द्वारा च् को ग् तथा **"वा विरामे"** (२।३।६२) से ग् को क् आदेश।

२. **वाग्भ्याम्।** वाच् + भ्याम्। प्रकृत सूत्र द्वारा **च् को ग् आदेश।**

३. **वाक्त्वम्।** वाच् + त्व + सि। वाचो भावः। **"तत्वौ भावे"** (२।६।१३) से त्व-प्रत्यय, प्रकृत सूत्र से च् को ग्, **"अघोषे प्रथमः"** (२।३।६१) से ग् को क्, लिङ्गसंज्ञा, सि-प्रत्यय, सिलोप तथा मु-आगम।

४. **वाक्कल्पः।** वाच् + कल्प + सि। वाच ईषदूनः। **"ईषदसमाप्तौ कल्पदेश्यदेशीयाः"** (२।६।४०-४) से कल्पप्रत्यय, प्रकृतसूत्र से च् को ग्, **"अघोषे प्रथमः"** (२।३।६१) से ग् को क्, 'वाक्कल्प' की लिङ्गसंज्ञा, सिप्रत्यय तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से सकार को विसर्गादेश।

५. **तृष्णक्।** तृष्णज् + सि। **"व्यञ्जनाच्च"** (२।१।४९) से सिलोप, प्रकृत सूत्र से ज् को ग् तथा **"वा विरामे"** (२।३।६२) से ग् को क् आदेश।

६. **तृष्णग्भ्याम्।** तृष्णज् + भ्याम्। प्रकृत सूत्र से जकार को गकारादेश।

७. **तृष्णक्त्वम्।** तृष्णज् + त्व + सि। तृष्णजो भावः। **"तत्वौ भावे"** (२।६।१५) से त्वप्रत्यय, प्रकृत सूत्र से ज् को ग्, **"अघोषे प्रथमः"** (२।३।६१) से ग् को क्, लिङ्गसंज्ञा, सिप्रत्यय, सिलोप तथा मु-आगम।

८. **दृक्।** दृश् + सि। सिलोप, श् को ग् तथा **"वा विरामे"** (२।३।६२) से ग् को क् आदेश।

९. **दृग्भ्याम्।** दृश् + भ्याम्। प्रकृत सूत्र से शकार को गकारादेश।

१०. **दृक्त्वम्।** दृश् + त्व + सि। दृशो भावः। **"तत्वौ भावे"** (२।६।१५) से त्वप्रत्यय, प्रकृत सूत्र से शकार को गकार, **"अघोषे प्रथमः"** (२।३।६१) से ग् को क्, लिङ्गसंज्ञा, सिप्रत्यय, सिलोप तथा मु – आगम ॥२६९।

## २७०. मुहादीनां वा [२।३।४९]

### [सूत्रार्थ]

विराम के विषय में तथा व्यञ्जनादि प्रत्ययों के परे रहने पर मुहादिगणपठित लिङ्ग के अन्तिम वर्ण को विकल्प से 'ग्' आदेश होता है ॥२७०।

[दु० वृ०]

मुहादीनां च लिङ्गानामन्तस्य विरामे व्यञ्जनादिषु च गो भवति वा। मुक्, मुग्भ्याम्, मुक्त्वम्। मुट्, मुड्भ्याम्, मुट्त्वम्। 'मुह्, द्रुह्, ष्णुह्, ष्णिह्, नश्' एते मुहादयः ॥२७०।

[दु० टी०]

मुहा०। **'मुह वैचित्त्ये'** (३।६७), **द्रुह जिघांसायाम्'**। मित्राय द्रुह्यतीति क्विप्-मित्रध्रुक्, मित्रध्रुग्भ्याम्। **'ष्णुहू उद्गिरणे'** (३।३९)-स्नुक्, स्नुग्भ्याम्। **ष्णिहू प्रीतौ** (३।४०)-स्निक्, स्निग्भ्याम्। **'नश (णश) अदर्शने'**(३।४१)-जीवनक्, जीवनग्भ्याम्। सम्पदादित्वात् क्विप्। **मुहादिस**माप्त्यर्थं गणे वृच्छब्दः पठ्यते ॥२७०।

[क० च०]

मुहा०। ननु **"दादेर्हस्य गः"** (२।३।४७) इत्यत्रादिग्रहणादेव मित्रध्रुगिति साधितम्, किमत्र विकल्पार्थम्! अन्यथा 'मित्रध्रुट्' इति न सिध्यति। यद्येवं तत्रादिग्रहणं व्यर्थमिति चेत्, नैवम्। इनन्तस्य द्रुहधातोर्मुहादित्वाभावाद् आदिना प्राप्तौ सत्याम् आदिग्रहणव्याप्त्या 'मित्रध्रुग्' इति सिद्धम्। अथ एकदेशविकृतस्यानन्यवद्भावाद् इनन्तस्यापि मुहादित्वात् 'मित्रध्रुग्' इति भविष्यति चेत्, अन्यत्र प्रयोजनमेतदपि विषयीकरोतीत्युक्तम्। यद् वा आदिग्रहणस्य फलं यद् 'मित्रध्रुग्' इति प्रदत्तं तत्तु मित्रस्य द्रुं वृक्षं जहातीति क्विबन्तात् **"तमाचष्टे"** इतीनि कृते क्विपि रूपमिति बोध्यम् ॥२७०।

[समीक्षा]

'मुह्+सि, मुह्+भ्याम्, मुह्+त्वम्' इस अवस्था में कातन्त्रकार हकार को वैकल्पिक गकारादेश करके 'मुक्-मुट्। मुग्भ्याम्-मुड्भ्याम्। मुक्त्वम्-मुट्त्वम्' शब्दरूप सिद्ध करते हैं। गकारादेश के अभाव में ह् को ड् होता है। पाणिनि ने **"वा द्रुहमुहष्णुहष्णिहाम्"** (अ० ८।२।३३) से वैकल्पिक घकारादेश करके इन रूपों को निष्पन्न किया है। अतः प्रक्रिया की दृष्टि से उभयत्र साम्य ही कहा जा सकता है।

[ रूपसिद्धि ]

१. **मुक्-मुट्।** मुह्+सि। **"व्यञ्जनाच्च"** (२।१।४९) से सिलोप, प्रकृत सूत्र से ह् को ग् तथा **"वा विरामे"** (२।३।६२) से ग् को क् आदेश - मुक्। गादेश के अभाव में **"हशषछान्तेजादीनां डः"** (२।३।४६) से ह् को ड् तथा **"वा विरामे"** (२।३।६२) से ड् को ट् आदेश होने पर - मुट्।

२. **मुग्भ्याम् - मुड्भ्याम्।** मुह्+भ्याम्। प्रकृत सूत्र से ह् को ग् आदेश - मुग्भ्याम्। गकारादेश के अभाव में **"हशषछान्तेजादीनां डः"** (२।३।४६) से हकार को डकारादेश होने पर - मुड्भ्याम्।

३. **मुक्त्वम् - मुट्त्वम्।** मुह्+त्व+सि। मुहो भावः। **"तत्वौ भावे"** (२।६।१३) से त्व - प्रत्यय, प्रकृत सूत्र से ह् को ग्, **"अघोषे प्रथमः"** (२।३।६१) से ग् को क् 'मुक्त्व' शब्द की लिङ्गसंज्ञा, सिप्रत्यय, सिलोप तथा मु - आगम - 'मुक्त्वम्'। गकारादेश के अभाव में **"हशषछान्तेजादीनां डः"** (२।३।४६) से ह् को ड् तथा **"अघोषे प्रथमः"** (२।३।६१) से ड् को ट् आदेश होने पर 'मुट्त्वम्' रूप सिद्ध होता है ॥२७०।

## २७१. हचतुर्थान्तस्य धातोस्तृतीयादेरादिचतुर्थत्वमकृतवत् [ २।३।५० ]

[ सूत्रार्थ ]

विराम के विषय में तथा व्यञ्जनादि प्रत्यय के परे रहते हकारान्त तथा वर्गीयचतुर्थवर्णान्त धातु में वर्गीय तृतीय वर्ण को वर्गीय चतुर्थ वर्ण आदेश होता है और उसका अकृतवद्भाव भी होता है ॥२७१।

[ दु० वृ० ]

धातोरवयवस्य हचतुर्थान्तस्य तृतीयादेरादिचतुर्थत्वं भवति विरामे व्यञ्जनादिषु च, तच्चाकृतवत्। निघुट्, निघुड्भ्याम्, निघुट्त्वम्। ज्ञानभुत्, ज्ञानभुद्भ्याम्, ज्ञानभुत्त्वम्। गर्दभयतेः क्विप् - गर्धप्, गर्धब्भ्याम्, गर्धप्त्वम्। धातोरिति किम्? दामलिट्। तृतीयादेरिति किम्? विक्रुत्। अकृतवदिति किम्? गोधुक् ॥२७१।

[दु० टी०]

हचतुर्था० । यदि धातोरित्यवयवावयविसम्बन्धे षष्ठीयं हचतुर्थान्तस्य तृतीयादेरिति चावयवस्य विशेषणम्, कथं तर्हि 'गोधुक्, काष्ठधुक्' इति ? सत्यम्, व्यपदेशिवद्भावात् । **बुद्धिर्हि** भगवती स्वभावपरिपाकवशादुपजायमाना सत्यप्यभेदे भेदं जनयति । यथा **'राहोः शिरः, शिलापुत्रस्य शरीरम्'** इति । दाम लेढीति क्विपि कृते नात्र व्यपदेशिवद्भावप्रतीतिस्तर्हि **'परमदामलिड्'** इति दुष्यति ? सत्यम् । **"हचतुर्थान्तस्य"** इति सिद्धे यदन्तग्रहणमिह तृतीयादिमपेक्ष्यानन्तरप्रतिपत्त्यर्थम्, तर्हि **'मित्रध्रुक्'** । परमदर्भयतेः क्विप् परमधर्ब् इति न सिध्यति ? सत्यम् । **"हचतुर्थान्तस्य धातोस्तृतीयादेरादिचतुर्थत्वम्"** इति सिद्धे यत् तृतीयादिग्रहणं तदिह चतुर्थान्तमपेक्षते । तेनैकवर्णातिरेकव्यवधानेऽपि न दुष्यति । एतदुक्तम् – एकस्वरस्यादिचतुर्थत्वमन्तरतमं भवतीति । अन्यथा अनया युक्त्या अस्तु समानाधिकरणलक्षणा षष्ठी तुण्डिभमाचष्टे इतीनि क्विपि कृते **'तुण्डिप्, तुण्डिब्भ्याम्'** इति । अत्र धात्वेकदेशोऽपि धातुरुपचर्यते ।

हचतुर्थान्तस्येति किम् ? द्विट्, द्विड्भ्याम् । नित्यत्वाद् दादेर्हस्य गत्वे सत्यादिचतुर्थत्वं न स्यात्, अकृतवद्ग्रहणबलात् । प्रागेव आदिचतुर्थत्वम्, हकारोपादानाच्चेति । ननु डत्व – गत्वविधौ ढत्वं घत्वं च किमिति न कुर्यात् । इह हकारोऽकृतवद्ग्रहणं च न करणीयं स्यात् । नैवम् । 'मूलवृट्, मूलवृड्भ्याम् । दृक्, दृग्भ्याम्' इत्यत्रादिचतुर्थत्वं प्रसज्येत । 'अकृतम्' इत्युक्तेऽकृतमिवेति गम्यत एव वद्ग्रहणं **सुखप्रतिपत्त्यर्थमेव** ॥२७१।

[वि० प०]

हचतु० । धातोरित्यवयवावयविसंबन्धे षष्ठीत्याह – धातोरित्यवयवावयविसम्बन्धे षष्ठीत्याह – धातोरवयवस्येति । हचतुर्थान्तस्य तृतीयादेरिति चावयवस्यैव विशेषणम् । यद्येवम्, निगूहतीति क्विपि कृते कथं 'निघुट्, निघुड्भ्याम्' इति । न ह्यत्रावयवी कश्चिदस्ति । इहैव स्यात् – 'गर्धप्, गर्धब्भ्याम्' इति ? सत्यम्, व्यपदेशिवद्भावात् । तथा ज्ञानं बुध्यते इति क्विप् – ज्ञानभुत्, ज्ञानभुद्भ्याम् । ज्ञानबुधो भावः **ज्ञानभुत्त्वम् इति** । गर्दभयतेः क्विबिति गर्दभमाचष्टे इति **"इन्**

**कारितं धात्वर्थे"** (३।२।९) इतीन् । **"ते धातवः"** (३।२।१६) इति धातुसंज्ञायाम् इनन्तात् क्विपि कारितलोपः। गर्दभो भाव गर्धप्त्वम् । दामलिडिति । दाम लेढीति क्विपि उपपदस्यात्र तृतीयादित्वम्, न धातोः। विक्रुदिति । विपूर्वात् **'कुप क्रुध रुष रोषे'** (३।६८)। विक्रुध्यतीति क्विप् । अकृतवदिति । हकारोपादानबलादिह प्रागेवादिचतुर्थत्वे हकारस्य दादित्वाभावात् **"दादेर्हस्य गः"** (२।३।४७) इति गत्वं न प्राप्नोतीति अकृतवद्ग्रहणाद् भवतीत्यर्थः ॥२७१।

**[ क० च० ]**

हच० । धातोरिति किम् ? दामलिडिति **वृत्तिः** । ननु कथं प्रत्युदाहरणं संगच्छते, यावता धातुग्रहणाभावे प्रकरणत्वाल्लिङ्गस्येति लभ्यते, ततश्च **"हचतुर्थान्तस्य तृतीयादेः"** इति च लिङ्गस्य विशेषणे 'निघुट्, मित्रध्रुग्' इत्यादि स्वोदाहरणमेव न सिध्यतीति तृतीयादित्वाभावाद् इति चेद् धातोरितिवल्लिङ्गस्यावयवावयविसंबन्धे षष्ठी कर्तव्या । ततश्च **'निघुट्'** इत्यादेर्लिङ्गावयवस्य तृतीयादित्वान्न दोषः। एवं तर्हि दामलिडिति प्रत्युदाहरणमेव न संगच्छते ।यतोऽत्र लिङ्गसमुदायस्यैव तृतीयादित्वं न त्ववयवस्य कुतोऽत्र प्राप्तिरिति ।

अथ यथा 'मित्रध्रुक्' इत्यादौ व्यपदेशिवद्भावादादिचतुर्थत्वं तथात्रापीति प्रत्युदाहृतमिति न दोषः। नैवम्, नात्र व्यपदेशिवद्भावप्रतीतिः, **टीका**विरोधात् । तथाहि दामलिडित्यत्र न व्यपदेशिवद्भावः इत्युक्तम् ! तर्हि परमदामलिडिति प्रत्युदाहरण भविष्यति ।अत्रावयवस्य दादित्वादिति चेद् इदमप्यसङ्गतमिति । तथाहि **"हचतुर्थान्तस्य"** इति सिद्धे यदन्तग्रहणं तदिह तृतीयापेक्षया हचतुर्थयोः सामीप्य-प्रतिपत्त्यर्थमिति **टीकाकार**वचनम् । ततः सामीप्ये गृह्यमाणे व्यवधानं विना न संभवतीति वचनादेकवर्णेन व्यवधानमाश्रीयत एव, ततो 'गोधुक्' इत्यादिकं न दुष्यति । यत्तु 'आदिचतुर्थत्वम्' इत्यत्रादिग्रहणसामर्थ्याद् मित्रध्रुगिति सिध्यर्थम् एकवर्णातिरिक्तव्यवधानेऽपि न दुष्यति इत्युक्तम्, तत्तु व्यञ्जनैकपरं बोध्यम्, न त्वनेकस्वरव्यञ्जनपरमिति । अन्यथा समीपप्रतिपादनस्यान्तग्रहणस्य वैयर्थ्यं स्यात् । एकवर्णेनातिरिक्तेन व्यवधानम् एकवर्णातिरिक्तव्यवधानमिति **टीका**पङ्क्तेरयमर्थः । तस्मात् 'परमदामलिट्' इत्यादिप्रत्युदाहरणस्याप्ययोग्यत्वाद् धातोरिति किम् ? दामलिडिति यदुक्तं तच्चिन्त्यमेव !

**केचित्तु** अन्तग्रहण – आदिग्रहणयोर्व्याख्यानमनपेक्ष्यैव प्रत्युदाहरणमिति समाधानं कुर्वन्ति, तत्तु तैरेवावगम्यते नास्माभिरिति । **वस्तुतस्तु** धातुग्रहणमुत्तरार्थमेव, तेन 'सर्पिर्भ्याम्, धनुर्भ्याम्' इत्यत्र **"इरुरोरीरूरौ"** (२।३।५२) इति न प्रवर्तते, इसुसोः प्रत्यययोरधातुत्वात् । अकृतवदिति किम् ? 'गोधुक्' इति **वृत्तिः।** अकृतवद्ग्रहणं गोधुगिति सिध्यर्थमिति भावः । तथाहि अकृतवद्ग्रहणाभावे **"दादेर्हस्य गः"** (२।३।४७) इति विशेषवचनाद् गत्वे हान्तत्वाभावे **'गोधुक्'** इत्यत्र आदिचतुर्थत्वं न सिध्यतीति । अकृतवद्ग्रहणं दत्वा तु विशेषणत्वेन प्राप्तं गत्वविधिं बाधित्वा प्रथमम् आदिचतुर्थत्वे कृते पश्चाद् अकृतवत्त्वेन दादित्वाद् गत्वं साधयतीति । अत्रैव हकारोपादानादिति **पञ्जी,** तत्कथं संगच्छते । तथाहि **"दादेर्हस्य गः"** (२।३।४७) इत्यस्य विषयं परिहृत्य **'निघुट्'** इत्यादावेवास्य चरितार्थत्वात् कथं तस्य सामर्थ्यमुच्यते । न च **"हशषछान्ते०"** (२।३।४६) इत्यादिना हकारस्य डत्वमेव बाधकमिति वाच्यम् । 'मधुलिड्भ्याम्' इत्यादावेव डत्वविधेश्चरितार्थत्वात् तस्माद्धकारोपादानस्य कथं सामर्थ्यं व्याख्यायते । नापि परत्वेन हकारस्याधिकसामर्थ्यमिति वाच्यम् **'परान्नित्यम्, नित्यादन्तरङ्गम्, अन्तरङ्गाच्चानवकाशं बलीयः'** (का० परि० ५१) इति न्यायाद् गकारस्य अधिकबलवत्त्वात् ? सत्यम् ।

अत्र **कश्चिज्जरद्गवः –** यदि निघुडित्यत्रैव हकारस्य चरितार्थत्वं भविष्यति, तदात्र हकारग्रहणमदत्वा डत्वविधौ ढत्वं विधाय गत्वविधौ च घत्वं विधाय चतुर्थान्तस्येति विदध्यात् । तथा च **उमापतिः –**

**दादेर्हस्य कृते घत्वे ढत्वे डत्वविधावपि ।**
**कार्ये आदिचतुर्थत्वे हकारग्रहणेन किम् ॥**

तस्माद्धकारग्रहणबलात् सर्वं हान्तं प्रति व्याप्त्या गत्वमपि बाध्यत इति बहु प्रलपति । तदसङ्गतमेव स्फुटम्, यावता 'मूलवृट्, द्विजिट्' इत्यादौ चतुर्थत्वप्रसङ्गस्य दुर्निवारत्वमिति । **अन्ये** तु 'निघुट्' इत्यादौ नित्यत्वाड्डत्वेऽत्र हकारग्रहणमनर्थकं स्यात् तत्र वक्तव्यम् – हकारोपादानबलादवश्यमेव प्रागादिचतुर्थत्वम्, अतो हकारोपादानबलादेव प्रागादिचतुर्थत्वमिति निश्चीयते, तद्वद् 'गोधुक्' इत्यत्रापि प्रागेवादिचतुर्थत्वे हकारस्य **"दादेर्हस्य गः"** (२।३।४७) इत्यनेन विहितं गत्वं न प्राप्नोति, दादित्वाभावात् ।

तस्माद् अनवकाशत्वात् प्राग् गत्वमेव प्राप्नोतीति हान्तत्वाभावान्नादिचतुर्थत्वं भवितुमर्हति, अकृतवद्ग्रहणात् प्राक् प्रवर्तमानमपि गत्वं पश्चाद् भवतीत्याहुः। **अपरे** तु व्यक्तिपक्षे ग्रन्थो योजनीयः इत्याहुः। तथाहि – **'व्यक्तौ प्रतिलक्ष्ये लक्षणानि भिद्यन्ते'** इति न्यायाद् 'गोधुक्' इत्यत्रानवकाशत्वेन हकारस्य बलवत्त्वाद् प्राग् आदिचतुर्थत्वं प्राप्तुमर्हति। तदा दादित्वेनानवकाशत्वाद् गत्वमपि प्राप्तुमर्हतीति। उभयोरेवानवकाशत्वे किं स्यादिति विरोधात् पर्यायेण प्राप्तौ 'गोधुट्, गोधुक्' इति पदद्वयस्य प्रसङ्गः स्यात्, यथा व्यक्तौ पर्यायेण प्राप्तौ 'युगपद् वचन' इति वक्ष्यति। ततश्च यस्मिन् पक्षे हकारोपादानबलाद् आदिचतुर्थत्वं प्रवर्तते, तस्मिन्नेव पक्षे दादित्वाभावाद् गत्वस्याप्राप्तिरेवेति। उभयविरोधपरिहारार्थम् अकृतवद्ग्रहणमिति **पञ्जीकृतो** हृदयम्। ननु तथापि अकृतवद्ग्रहणं गत्वसाधकं न क्रियताम्, गोधुगित्यत्र चतुर्थत्वेऽपि एकदेशविकृतस्यानन्यवद्भावाद् गत्वं भविष्यतीति चेत् तथापि यद् अकृतवद्ग्रहणं तद् बोधयति – अस्वशब्दोक्ते एकदेशविकृतस्यानन्यवद्भावादिति नास्तीति। अत्र दादित्वेनैव स्वशब्दोक्तत्वात्। अतो नास्वशब्दोक्तत्वादिति परिभाषेति **हेमकरा**शयः ॥२७१।

### [ समीक्षा ]

'निगुह् + सि, निगुह् + भ्याम्, ज्ञानबुध् + सि, ज्ञानबुध् + भ्याम्, गर्दभ् + सि, गर्दभ् + भ्याम्, गर्दभ् + त्व' इस अवस्था में कातन्त्रकार तथा पाणिनि दोनों ही आचार्य अन्तिम वर्ण से पूर्ववर्ती वर्गीय तृतीय वर्ण को चतुर्थ वर्णादेश करके 'निघुट्, निघुड्भ्याम्, ज्ञानभुत्, ज्ञानभुद्भ्याम्, गर्धप्, गर्धब्भ्याम्, गर्धप्त्वम्' आदि शब्दरूप सिद्ध करते हैं। एतदर्थ पाणिनि ने भष्भाव का प्रयोग किया है – **"एकाचो बशो भष् झषन्तस्य स्ध्वोः"** (अ०८।२।३७)।

### [ विशेष ]

१. 'गोदुह् + सि' इस अवस्था में द् को ध् आदेश पूर्व हो जाने पर धातु के दकारादि न रहने पर **"दादेर्हस्य गः"** (२।३।४७) से ह् को ग् आदेश नहीं हो सकता है, फलतः 'गोधुक्' आदि रूप निष्पन्न नहीं किए जा सकते। अतः सूत्रकार ने प्रकृत चतुर्थवर्णादेश को 'अकृतवत्' कहा है, जिससे गकारादेश उपपन्न हो जाता है।

२. 'द्विजिह्वमाचष्टे द्विजिट्, अदभ्रमाचष्टे अदप्' आदि में तृतीय वर्ण को प्रकृत आदेश न करने के लिए व्याख्याकारों के अभिमतानुसार 'अजकारादेः' भी पढ़ना चाहिए।

३. 'मृगावित्' में व् को अन्तस्थासंज्ञक माना जाए या ओष्ठस्थानीय ब्। इसका निर्णय दो कारिकाओं में किया गया है–

**यत्र यत्र वकारः स्यात् संयुक्तो दधषैः सह।**
**अन्तस्थां तां विजानीयात् तदन्यो वर्ग्य उच्यते॥**
**उदूटौ यत्र विधेते यो वः प्रत्ययसन्धिजः।**
**अन्तस्थां तां विजानीयात् तदन्यो वर्ग्य उच्यते॥**

अर्थात् 'द्वि' आदि में दकार के साथ, 'ध्वंस्' आदि में धकार के साथ तथा 'ष्वन्ज्' आदि में मूर्धन्य षकार के साथ रहने के कारण 'व्' अन्तस्थासंज्ञक ही माना जाएगा। इसके अतिरिक्त जहाँ उत्व अर्थात् सम्प्रसारण तथा ऊठ् आदेश प्रवृत्त होता है। जैसे–'भवन्त्' शब्दघटित 'व' को उत्व आदेश (२।२।६३)–भोः! तथा 'दिव्'–घटित व् को ऊठ्–**अक्षयूः** (४।१।५६)। प्रत्ययसन्धिज–द्वाभ्याम् आदि। द्वि+भ्याम्। इकार को अकार, दीर्घसन्धि। इस प्रकार 'द्–ध्–ष्' वर्णों के संयोग में, 'उत्व–ऊठ्' आदेशों में तथा प्रत्ययसंबन्धी सन्धि से निष्पन्न होने वाला वकार तो अन्तस्थासंज्ञक होता है, शेष स्थानों में उसे पवर्गीय मानना चाहिए।

**[ रूपसिद्धि ]**

१. **निघुट्**। नि+गुह्+सि। **"व्यञ्जनाच्च"** (२।१।४९) से सिप्रत्यय का लोप, प्रकृत सूत्र से ग् को घ्, **"हशषछान्तेजादीनां डः"** (२।३।४६) से ह् को ड् तथा **"वा विरामे"** (२।३।६२) से डकार को टकारादेश।

२. **निघुड्भ्याम्**। नि+गुह्+भ्याम्। प्रकृत सूत्र से ग् को घ् तथा **"हशषछान्तेजादीनां डः"** (२।३।४६) से हकार को डकारादेश।

३. **निघुट्त्वम्**। नि+गुह्+त्व+सि। निगुहो भावः। **"तत्वौ भावे"** (२।६।१३) से त्वप्रत्यय, प्रकृत सूत्र से गकार को घकार, **"हशषछान्तेजादीनां डः"** (२।३।४६)

से ह् को ड्, **"अघोषे प्रथमः"** (२।३।६१) से ड् को ट्, लिङ्गसञ्ज्ञा, सिप्रत्यय, सिलोप तथा मु–आगम।

४. **ज्ञानभुत्।** ज्ञानबुध्+सि। सिलोप, प्रकृत सूत्र से **"धुटां तृतीयः"** (२।३।६०) से ध् को द्, ब् को भ् तथा **"वा विरामे"** (२।३।६२) से ध् को त्।

५. **ज्ञानभुद्भ्याम्।** ज्ञानबुध्+भ्याम्। प्रकृत सूत्र से ब् को भ् तथा **"धुटां तृतीयः"** (२।३।६०) से धकार को दकारादेश।

६. **ज्ञानभुत्त्वम्।** ज्ञानबुध्+त्व+सि। ज्ञानबुधो भावः। **"तत्वौ भावे"** (२।६।१३) से त्वप्रत्यय, प्रकृतसूत्र से ब् को भ् **"धुटां तृतीयः"** (२।३।६०) से ध् को द्, **"अघोषे प्रथमः"** (२।३।६१) से द् को त्, लिङ्गसंज्ञा, सिप्रत्यय, सिलोप तथा मु–आगम।

७. **गर्धप्।** गर्दभ्+सि। सिलोप, प्रकृत सूत्र से द् को ध्, **"धुटां तृतीयः"** (२।३।६०) से भ् को ब् तथा **"वा विरामे"** (२।३।६२) से ब् को प् आदेश।

८. **गर्धब्भ्याम्।** गर्दभ्+भ्याम्। प्रकृत सूत्र से द् को ध् तथा **"धुटां तृतीयः"** (२।३।६०) से भ् को ब् आदेश,

९. **गर्धप्त्वम्।** गर्दभ्+त्व+सि। गर्दभो भावः। **"तत्वौ भावे"** (२।६।१३) से त्वप्रत्यय, प्रकृत सूत्र से दकार को धकार, **"धुटां तृतीयः"** (२।३।६०) से भकार को बकार, **"अघोषे प्रथमः"** (२।३।६१) से बकार को पकार, लिङ्गसंज्ञा, सिप्रत्यय, सिलोप तथा मु–आगम ॥२७१।

## २७२. सजुषाशिषो रः [२।३।५१]

### [सूत्रार्थ]

विराम के विषय में तथा व्यञ्जनादि प्रत्यय के पर में रहने पर 'सजुष्' एवं 'आशिष्' शब्दों के अन्तिम वर्ण को र् आदेश होता है ॥२७२।

### [दु० वृ०]

सजुषाशिषोरन्तस्य विरामे व्यञ्जनादिषु च रो भवति। सजूः, सजूर्भ्याम्, सजूःषु, सजूस्ता। आशीः, आशीर्भ्याम्, आशीःषु, आशीस्ता ॥२७२।

[दु० टी०]

सजु० । सह जुषते इति क्विप् । सजुषो डत्वं प्राप्तम् । आशंसनम् **आशीः**, सम्पदादित्वात् क्विप् । भावे 'आङः शासेरिच्छार्थस्येत्वं ज्ञापयिष्यति ।"**शासिवसिघसीनां च**" (३।८।२७) इति षत्वे लाक्षणिकत्वात् डत्वमपि नास्तीति षकारस्य स्थितिरेव प्राप्ता, नलोपश्चेति नियमेन च यिन्नाय्योः 'आशिष्यति, आशिष्यतः' इति भवितव्यम् । अघोषे रेफस्यास्य विसर्ग एवेति 'सजूःषु' इत्यादि ॥२७२।

[वि० प०]

सजुषा० । सह जुषते इति क्विप् । सहस्य सभाव उक्त एव । आशंसनम् **आशीः**, सम्पदादित्वाद् भावे क्विप्, शासेरिदुपधाया अनव्यञ्जनयोरित्यत्र आङः शास इच्छायाम् इत्यस्यापीत्त्वं ज्ञापयिष्यते – रेफे सति इरुरोरीरूरौ इति दीर्घत्वम् अघोषे परे चास्य रेफस्य विसर्गो वक्ष्यत इत्याह – सजूःषु इत्यादि ॥२७२।

[क० च०]

सजु० ।र् इत्यस्वरोऽयमादेशः ।वर्णान्तस्य विधित्वेन सकारस्य कार्यिणोऽस्वरत्वात् । अ इति नाशङ्क्यते । कार्यिणः षकारस्य व्यञ्जनत्वेन कार्यस्यापि तथैव युक्तत्वात् । सजुषो डत्वे प्राप्ते आङः शासेस्तु "**शासिवसिघसीनां च**" (३।८।२७) इति षत्वे "**हशषछान्त०**"(२।३।४६)इत्यत्र षकारग्रहणस्य प्रातिपदिकतया षकारस्य स्थितिप्राप्तौ रेफ उच्यते इति टीकाकृत् । **श्रीपतिमते** लाक्षणिकपरिग्रहार्थत्वात् डत्वमेव प्राप्तमिति । अत एव सजुषाशिषोस्तु मूर्धन्यस्यैव डत्वापवादो रेफ इत्युक्तम् । न च लाक्षणिकपरिग्रहणे 'सर्पिष्षु' इत्यादौ प्रसङ्ग इति वाच्यम् । यजादिसाहचर्याद् हशषछान्तानामपि प्रकृतिभूतानामेव स्यात् 'सर्पिष्षु' इत्यादौ तु सृपेरिसादेः प्रत्ययत्वेन प्रकृतिभूतत्वाभावात् कुतः प्रसङ्गः ।

अथोभयमते – "**विष्णौ च वेधाः, स्त्री त्वाशीर्हिताशंसाहिदंष्ट्रयोः**" (अ० को० ३।३।२२८) इति सान्तत्वेन विरोधः । यदुच्यते "**शासिवसिघसीनां च**" (३।८।२७) इत्यनेन षत्वविधानात् क्विपो लोपे त्वन्त्यत्वात् षत्वनिवृत्तौ दन्त्यान्तोऽयमाशीःशब्द इति । अत एवाविकारस्थोऽयमारम्भ इति वक्ष्यति । अनन्त्यत्वाभावे षत्वनिवृत्तौ हि "**रात् सस्यैव**" इति ज्ञापकम्, कथमन्यथा 'कटचिकीः' इत्यादौ सकारलोपः संगच्छते ।

आशिषावित्यादौ औकारादौ निमित्ते पुनरनन्त्यत्वात् **"शासिवसिघसीनां च"** (३।८।२७) इति षत्वं स्यादेव। यत्तु टीकाकृता **"शासिवसिघसीनां च"** (३।८।२७) इति षत्वे लाक्षणिकत्वाड्डत्वं नास्तीत्युक्तम्, तन्न आशीरित्येतदर्थम्, किन्तु आशीर्भ्याम् इत्यादौ व्यञ्जननिमित्त एव बोद्धव्यम्। न च स्यादिघुटि पदान्तवदित्यनेन आशीर्भ्याम् इत्यादौ पदान्तवद्भावेऽनन्त्यत्वात् कथं षत्वमिति वाच्यम्, स्यादिघुटि पदान्तवद् इत्यस्यासार्वत्रिकत्वात्। तेन 'निघुड्भ्याम्' इत्यादौ डत्वं सिद्धम्। अन्यथाऽनेन पदान्तवद्भावे लिङ्गान्तत्वाभावात् कथं हशषछान्तेत्यादिना लिङ्गान्तविहितं डत्वं पदान्ते स्यात्। न च **"हशषछान्त०"** (२।३।४६) इत्यत्र 'व्यञ्जनादिषु' इत्यधिकारानुवर्तनात् 'निघुड्भ्याम्, षड्भ्यः' इत्यादिषु डत्वं स्यादेव। अन्यथा तदनुवृत्तिवैफल्यप्रसङ्गत्वेन पदान्तवद्भावात् तद्विषयाभावः स्यादिति वाच्यम्, 'व्यञ्जनादिषु' इत्यधिकारानुवर्तनस्य 'परमनिघुड्भ्याम्' इत्यादिषु सुभोर्नोत्तरपदस्येत्यनेन पदान्तवद्भावनिषेधविषये चरितार्थत्वात्। अत एव **"डढणपरस्तु णकारम्"** (१।४।१४) इत्यत्र **टीकाकृता** पदान्तप्रस्तावे टकारान्नकाराच्च परः सकारस्तादिर्भवति वा। 'विट्त्साधुः, विट्साधुः। भवान्त्साधुः, भवान् साधुः' इत्युक्तम्। **"सुपि च"** इति वक्तव्यान्तरस्य 'विट्त्सु' इत्युदाहृतम्। अन्यथा सुप्यपि स्यादिघुटि पदान्तवदित्यनेन पदान्तवद्भावे पूर्वेणैव विट्त्सु इत्यादिकं सिद्धम्, किं वक्तव्यान्तरेण ? अत एव तत्रैव नेह स्यादिघुटि पदान्तवदित्यादृतमिति **हेमकरः।**

**कुलचन्द्रे**णाप्युक्तम्। **श्रीपतिनापि** डत्वापवाद इति यदुक्तं तत् सजुषः सर्वत्र, आशिषस्तु सुभोः पदमिति पदत्वे सति सुभोर्नोत्तरपदस्येत्यनेन पदत्वनिषेधात् परम् आशीर्भ्याम् परम् आशीर्भिरित्यादावनन्त्यत्वात् षत्वे कृते ज्ञातव्यमिति **मूर्धन्यस्यैव** संगच्छते इति भावः। आशीरिति दन्त्यसकारस्य सो व्यञ्जने नामिभ्यो रः **इति** रेफे सिध्यतीति। **दुर्गमते** च **"नामिपरो रम्"** (१।५।१२) इति रेफे आशीरिति स्यात्। यत्तु **वृत्तौ** 'आशीः' इत्युक्तम्, तत् प्रकृतिप्रदर्शनार्थं प्रच्छ – पथिप्राडितिवत्। ननु विभक्तिव्यञ्जने रेफस्य न स्यादिति प्रतिषेधस्य विद्यमानत्वात् कथं 'सजूःषु, आशीःषु' इत्यत्र विसर्गः? अत आह – अघोषे चेति **पञ्जी**। भवति चेति वक्तव्यबलादित्यर्थः ॥२७२।

**[ समीक्षा ]**

'सजुष् + सि, सजुष् + भ्याम्, आशिष् + सि, आशिष् + भ्याम्, आशिष् + सुप्, आशिष् + त + सि' इस अवस्था में पाणिनि तथा शर्ववर्मा दोनों ही आचार्य षकार

को र आदेश करके 'सजूः, सजूर्भ्याम्, आशीः , आशीर्भ्याम्, आशीःषु, आशीस्ता' आदि शब्दरूप सिद्ध करते हैं। पाणिनि का र् आदेश उ – अनुबन्धविशिष्ट है – 'रु'। **"ससजुषो रुः"** (अ० ८।२।६६)। इस सूत्र में 'आशिष्' शब्द का पाठ नहीं है। अतः 'आशिष्' के मूर्धन्यादेश (**शासिवसिघसीनां च** – अ० ८।३।६०) को असिद्ध मानकर स् को 'रु' आदेश उक्त सूत्र से सम्पन्न किया जाता है।

**[ रूपसिद्धि ]**

१. **सजूः।** सजुष् + सि। **"व्यञ्जनाच्च"** (२।१।४९) से 'सि' प्रत्यय का लोप, प्रकृत सूत्र से षकार को रकार, **"इरुरोरीरूरौ"** (२।३।५२) से 'ऊर्' तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से रेफ को विसर्गादेश।

२. **सजूर्भ्याम्।** सजुष् + भ्याम्। प्रकृत सूत्र से ष् को र् तथा **"इरुरोरीरूरौ"** (२।३।५२) से उर् को **'ऊर्'** आदेश।

३. **सजूःषु।** सजुष् + सुप्। प्रकृत सूत्र से ष् को र्, उर् को 'ऊर्' तथा रेफ को विसर्गादेश।

४. **सजूस्ता।** सजुष् + त + सि। सजुषो भावः। **"तत्वौ भावे"** (२।६।१३) से 'त' प्रत्यय, प्रकृत सूत्र से ष् को र्, उर् को ऊर्, रेफ को **"रेफसोर्विसर्जनीयः"** (२।३।६३) से विसर्ग, विसर्ग को स्, स्त्रीलिङ्ग में 'आ' प्रत्यय, लिङ्गसंज्ञा, सिप्रत्यय तथा सिप्रत्यय का लोप।

५. **आशीः।** आशिष् + सि। **"व्यञ्जनाच्च"** (२।१।४९) से सिप्रत्यय का लोप, प्रकृत सूत्र से ष् को र्, **"इरुरोरीरूरौ"** (२।३।५२) से इर् को ईर् तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से रकार को विसर्गादेश।

६. **आशीर्भ्याम्।** आशिष् + भ्याम्। प्रकृत सूत्र द्वारा ष् को र् तथा **"इरुरोरीरूरौ"** (२।३।५२) से 'इर्' को 'ईर्'।

७. **आशीःषु।** आशिष् + सुप्। प्रकृत सूत्र से ष् को र्, **"इरुरोरीरूरौ"** (२।३।५२) से इर् को ईर्, **"रेफसोर्विसर्जनीयः"** (२।३।६३) से रेफ को विसर्ग तथा सकार को मूर्धन्यादेश।

८. **आशीस्ता।** आशिष्+त+सि। आशिषो भावः। **"तत्वौ भावे"** (२।६।१३) से तप्रत्यय। प्रकृत सूत्र से ष् को र्, **"इरुरोरीरूरौ"** (२।३।५२) से इर् को ईर्, रेफ को विसर्ग, विसर्ग को स्, लिङ्गसंज्ञा, सिप्रत्यय ~~तथा उसका~~ लोप ॥२७२।

## २७३. इरुरोरीरूरौ [२।३।५२]

### [सूत्रार्थ]

विराम के विषय में तथा व्यञ्जनादि प्रत्यय के परे रहते धातु के अन्त मे विद्यमान इर् के स्थान में ईर् आदेश तथा उर् के स्थान में ऊर् आदेश होता है ॥२७३।

### [दु० वृ०]

धातोरिरुरोरीरूरौ भवतो यथासंख्यं विरामव्यञ्जनादिषु च। गीः, गीर्भ्याम्, गीर्षु, गीस्तरा। धूः, धूर्भ्याम्, धूर्षु, धूस्तरा ॥२७३।

### [दु० टी०]

**इरुरो०। "नामिनो र्वोः"** (३।८।१४) इत्यनेन व्यञ्जनेऽपि दीर्घं न प्राप्नोति, लिङ्गधातुत्वात्। **'इरुरोर्दीर्घः'** इति कृतेऽपि नलोपश्चेति वर्णापेक्षया नियमे सति 'गीर्यति, गीर्यते। धूर्यति, धूर्यते' इति न सिध्यति। अतः 'ईरूरौ' आदिश्येते। धातोरिति किम्? सर्पिर्भ्याम्, धनुर्भ्याम् ॥२७३।

### [वि० प०]

**इरुरो०।** गिरिति। धूर्वतीति क्विप्। **"ऋदन्तस्येरगुणे"** (३।५।४२) इति गिरतेरिरादेशः। **"राल्लोप्यौ"** (४।१।५८) इति धूर्वतेर्वकारलोपः। 'इरुरोर्दीर्घः' इति सिद्धे यद् ईरूर्ग्रहणं तच्छब्दकार्यप्रतिपत्त्यर्थम्। अन्यथा वर्णकार्ये प्राप्ते नलोपश्चेति नियमेन यिन्नाय्योर्दीर्घो न स्यात्–'गीर्यति, गीर्यते। धूर्यति, धूर्यते' इति ॥२७३।

### [क० च०]

**इरुरो०। "हचतुर्थान्तस्य०"** (२।३।५०) इत्यवयवित्वेन धातोरित्यनुवर्तते इत्याह – धातोरित्यादि। धातोरिति किम्? 'सर्पिर्भ्याम्, धनुर्भ्याम्' इत्यादि। 'सृपेरुस्, धनेरुस्' इति प्रत्ययस्थत्वात्, धातोरवयवत्वाभावात् ॥२७३।

**[ समीक्षा ]**

'गिर् + सि, गिर् + भ्याम्, गिर् + सुप्, गिर् + तर + सि, धुर् + सि, धुर् + भ्याम्, धुर् + सुप्, धुर् + तर + सि' इस अवस्था में कातन्त्रकार इर् को ईर् तथा उर् को ऊर् आदेश करके 'गीः, गीर्भ्याम्, गीर्षु, गीस्तरा, धूः, धूर्भ्याम्, धूर्षु, धूस्तरा' शब्दरूप सिद्ध करते हैं। पाणिनि ने रेफ की उपधा का दीर्घविधान किया है – "**र्वोरुपधाया दीर्घ इकः**" (अ० ८।२।७६)। इस प्रकार कार्य की दृष्टि से उभयत्र साम्य ही परिलक्षित होता है।

**[ रूपसिद्धि ]**

१. **गीः**। गिर् + सि। "**व्यञ्जनाच्च**" (२।१।४९) से सिप्रत्यय का लोप, प्रकृत सूत्र से इर् को ईर् तथा "**रेफसोर्विसर्जनीयः**" (२।३।६३) से रेफ को विसर्गादेश।

२. **गीर्भ्याम्**। गिर् + भ्याम्। "**इरुरोरीरूरौ**" (२।३।५२) से इर् को 'ईर्' आदेश।

३. **गीर्षु**। गिर् + सुप्। "**इरुरोरीरूरौ**" (२।३।५२) से इर् को ईर् तथा सकार को षकारादेश।

४. **गीस्तरा**। गिर् + तर + सि। प्रकृष्टा गीः। तर - प्रत्यय, इर् को ईर्, रेफ को विसर्ग, विसर्ग को स्, "**स्त्रियामादा**" (२।४।४९) से 'आ' प्रत्यय, समानलक्षणदीर्घ, लिङ्गसंज्ञा, सिप्रत्यय तथा उसका लोप।

५. **धूः**। धुर् + सि। सिलोप, उर् को ऊर् तथा रेफ को विसर्गादेश।

६. **धूर्भ्याम्**। धुर् + भ्याम्। प्रकृत सूत्र से 'उर्' को ऊर् आदेश।

७. **धूर्षु**। धुर् + सुप्। प्रकृत सूत्र से उर् को ऊर् तथा सका को मूर्धन्य षकारादेश।

८. **धूस्तरा**। धुर् + तर + सि। प्रकृष्टा धूः। तर – प्रत्यय, प्रकृत सूत्र से उर् को ऊर्, रेफ को विसर्ग, विसर्ग को सकार, "**स्त्रियामादा**" (२।४।४९) से स्त्रीलिङ्ग में आप्रत्यय, समानलक्षण दीर्घ, लिङ्गसंज्ञा, सिप्रत्यय तथा उसका लोप ॥२७३।

# २७४. अह्नः सः [२।३।५३]

## [ सूत्रार्थ ]

विराम के विषय में तथा व्यञ्जनादिप्रत्यय के परे रहते 'अहन्' शब्द के अन्तिम वर्ण को सकारादेश होता है ।।२७४।

## [ दु० वृ० ]

'अहन्' इत्येतस्य विरामे व्यञ्जनादिषु च सो भवति । अहः, अहोभ्याम्, अहःसु, अहस्त्वम् ।।२७४।

## [ दु० टी० ]

अह्नः । नलोपस्यापवादोऽयम् । कथमपवादोऽयम्, नलोपे हकारस्य विषयत्वात् । न च नित्यत्वम्, शब्दान्तरत्वात् । तर्हि नकारोच्चारणमनर्थकमिति नानर्थकं संबुद्ध्यर्थम् भविष्यति – हे अहः! तर्हि नस्यालुप्तवद्भावात् कथमनन्तस्य भवति । यथा विद्वान् इत्यत्र संयोगान्तलोपस्यालुप्तवद्भावाद् दत्वं न स्यात् ? सत्यम् । तत्र व्यञ्जने चरितार्थत्वाद् इत्युक्तमेव । इह तु वचनबलादनन्तस्य भवति । वचनाच्चेद् यथा अलुप्तवद्भावं बाधते तथा नलोपमपि बाधते । किञ्च 'रात्रिरूपरथन्तरेषु' इति परिगणनमनर्थकम्, स्वरान्तस्य कथं तस्य व्यञ्जने चरितार्थत्वात् । **"व्यञ्जनान्तस्य यत् सुभोः"** (२।५।४) इति लिङ्गप्रकरणत्वाद् धातोर्न भविष्यति – अहन् ।

अहन्तनुरस्य, अहन्धनमस्य – **'अहन्तनुः, अहन्धनः'** इति । अहन् इति निपातोऽयं वर्गान्ते सति अहन्शब्दो भवत्येव ? सत्यम् । **"व्यञ्जनान्तस्य यत्सुभोः"** (२।५।४) अतिदिष्टं तन्नञि जहातेः कथन्तस्य, कथम् अव्ययस्य भवतीति ? किञ्च कृतोपधालोपोऽयं निर्देशः, यस्यैतद् रूपं संभवति, स इह गृह्यते ।।२७४।

## [ क० च० ]

अह्नः । नलोपापवादोऽयं लिङ्गप्रस्तावाद् धातोर्न स्यात्, तेन 'अहन्' इत्यत्र न भवति । तर्हि अहन्तनुरस्य, अहं धनुरस्य । अहंशब्दोऽयं निपातः । वर्गे वर्गान्तत्वे कृते अहन्तनुः, अहन्धनुरित्यत्र कथन्न स्यात्, नैवम् । 'अह्नः' इति कृतोपधालोपनिर्देशो ज्ञापयति – यस्यैतद् रूपं संभवति तस्यैव ग्रहणमिति **टीका** ।।२७४।

**[समीक्षा]**

'अहन् + सि, अहन् + भ्याम्, अहन् + सुप्, अहन् + त्व + सि' इस अवस्था में कातन्त्रकार ने नकार को सकारादेश करके 'अहः, अहोभ्याम्, अहःसु, अहस्त्वम्' शब्दरूप सिद्ध किए हैं। पाणिनि ने एतदर्थ सुप् प्रत्यय परे रहते न् को रु तथा असुप् प्रत्यय परे रहते न् को र् आदेश किया है – "**अहन्, रोऽसुपि**" (अ० ८।२।६८, ६९)। इन दो आदेशों के कारण पाणिनीयप्रक्रिया में गौरव ही कहा जाएगा।

**[रूपसिद्धि]**

१. **अहः।** अहन् + सि। (नपुंसकलिङ्ग)। सिलोप, "**विरामव्यञ्जनादावुक्तम्०**" (२।३।६४) से अतिदेश, प्रकृतसूत्र से न् को स् तथा "**रेफसोर्विसर्जनीयः**" (२।३।६३) से विसर्गादेश।

२. **अहोभ्याम्।** अहन् + भ्याम्। प्रकृत सूत्र से न् को स्, "**रेफसोर्विसर्जनीयः**" (२।३।६३) से स् को विसर्ग, "**अघोषवतोश्च**" (१।५।८) से विसर्ग को उ तथा "**उवर्णे ओ**" (१।२।३) से अ को ओ-ओकारलोप।

३. **अहःसु।** अहन् + सुप्। प्रकृत सूत्र द्वारा न् को स् तथा "**रेफसोर्विसर्जनीयः**" (२।३।६३) से विसर्गादेश।

४. **अहस्त्वम्।** अहन् + त्व + सि। अह्नो भावः। "**तत्वौ भावे**" (२।६।१३) से त्वप्रत्यय, प्रकृत सूत्र से न् को स्, लिङ्गसंज्ञा, सिप्रत्यय, सिलोप तथा मु – आगम ।।२७४।

## २७५. संयोगान्तस्य लोपः [२।३।५४]

**[सूत्रार्थ]**

विराम के विषय में अथवा व्यञ्जनादि प्रत्यय के परे रहने पर संयोगसंज्ञक वर्णों में अन्तिम वर्ण का लोप होता है ।।२७५।

**[दु० वृ०]**

संयोगान्तस्य लोपो भवति विरामे व्यञ्जनादिषु च। विद्वान्, कटचिकीः, पुंभ्याम्, पुंसु ।।२७५।

[दु० टी०]

संयो० । लिङ्गस्य यः संयोगस्तस्यान्तलोप इति, तर्हि किमन्तग्रहणेन संयोगेन लिङ्गं विशिष्यते, विशेषणेन च तदन्तविधिः । संयोगान्तलिङ्गस्य लोपो भवति·वर्णान्तस्य विधिरिति ? सत्यम् । अन्तग्रहणमिह **मन्दधियां सुखप्रतिपत्त्यर्थम्** । अन्यथा निर्दिष्टस्य संयोगस्य लोप इति विप्रतिपद्येत ।।२७५।

[वि० प०]

संयो० । कटचिकीरिति कृञः सन् । **"स्वरान्तानां सनि"** (३।८।१२) इति दीर्घः । **"ॠदन्तस्येरगुणे"** (३।५।४२) इति ईर्, **"नामिनो र्वोः"** (३।८।१४) इत्यादिना दीर्घत्वम्, द्विर्वचनम्, कवर्गस्य चवर्गः । ततः कटं चिकीर्षतीति क्विपि कृते बुद्धिस्थे **"अस्य च लोपः"** (३।६।४९) इत्यकारलोपः, संयोगान्तसकारलोपः । परनिमित्तादेशाभावात् स्थानिवद्भावो नास्तीति अन्तसकारस्य लोपः ।।२७५।

[क० च०]

संयो० । ननु संयोगस्यान्तः संयोगान्त इत्यर्थे सति 'बहुश्रेयस्कः' इत्यादौ कथं संयोगात् परोऽकारो न लुप्यते । नैवम्, व्यञ्जनादेशप्रस्तावाद् वक्ष्यमाणसूत्रे संयोगावयवस्य लोपदर्शनाच्च । कटं चिकीर्षतीति क्विपि बुद्धिस्थ इत्यादि । ननु कथमिदमुक्तम्, यावता क्विपि निमित्तेऽकारलोपे कृतेऽपि **"न पदान्त०"** (का० परि० १०) इत्यादिना स्थानिवद्भावनिषेधात् संयोगान्तलोपो निर्विवाद एव । नैवम्, अभिप्रायापरिज्ञानात् । किन्त्व**यमभिप्रायः**– क्विपि निमित्तेऽकारलोपे स्थानिवद्भावेनानन्त्यत्वाभावात् षत्वं प्राप्नोति । अतो रात् सस्यैव लोप इति नियमेन मूर्धन्यषकारस्य लोपो न स्यात् । अतोऽवश्यं क्विपि बुद्धिस्थे इति वक्तव्यम् । ननु तथापि वक्तुमिदं न युज्यते । यावता रात् सस्यैव लोप इति नियमस्यान्यत्रानवकाशात् षत्वमत्र न भविष्यतीति चेत्, न । चतुःशब्दात् सुच्प्रत्यये कृते 'चतुर्भुङ्क्ते' इत्यादौ नियमस्य सावकाशत्वे प्रसङ्गस्य दुर्निवारत्वात् ।

अतः क्विपि बुद्धिस्थे इत्युक्त्वा अकारलोपस्य परनिमित्ताभावेन स्थानिवद्भावात् । अन्त्यत्वेन च षत्वाभावात् सिद्धः संयोगान्तलोप इत्युपसंहारः । अथ तर्हि 'कटचिकीर्भ्याम्' इत्यत्रानन्त्यत्वात् षत्वे रात् सस्यैव लोप इति नियमबलात् कथं

संयोगान्तलोप इति चेत्, नैवम् । क्विपि बुद्धिस्थेऽत्राकारलोपे सकारमात्रस्याविशिष्टत्वेन प्रत्ययस्थत्वाभावान्न षत्वमिति । तथा च प्रत्यये तिष्ठतीति प्रत्ययस्थ इति षत्वसूत्रे **टीकायां** वक्ष्यति । ननु 'दध्यत्र' इत्यत्र पदविराममाश्रित्य संयोगान्तलोपः कथन्न स्यात्, नैवम् । एकपदाश्रितत्वाद् अन्तरङ्गे संयोगान्तलोपे कर्तव्ये पदद्वयमाश्रितस्य सन्धिकार्यस्य बहिरङ्गस्यासिद्धत्वात् ॥२७५।

**[ समीक्षा ]**

'विद्वन्स् + सि, कटचिकीर्ष् + सि, पुमन्स् + भ्याम्, पुमन्स् + सुप्' इस अवस्था में पाणिनि तथा शर्ववर्मा दोनों ने ही संयोगसंज्ञक 'न् + स्, र् + ष्' वर्णों के अन्त में विद्यमान स् - ष् वर्णों का लोप करके 'विद्वान्, कटचिकीः, पुम्भ्याम्, पुंसु' शब्दरूप सिद्ध किए हैं । पाणिनि का भी यही सूत्र है – **"संयोगान्तस्य लोपः"** (अ० ८।२।२३)।

**[ विशेष ]**

'दध्यत्र' में पदविराम की दृष्टि से 'ध् + य्' संयोगसंज्ञक वर्णों में जो अन्तिम यकार का लोप प्राप्त होता है, उसका समाधान करते हुए व्याख्याकारों ने कहा है – एकपदाश्रित होने के कारण संयोगान्तलोप अन्तरङ्ग है, उसके प्राप्त होने पर पदद्वयाश्रित बहिरङ्ग सन्धिकार्य (इकार को यकारादेश) असिद्ध हो जाता है । अतः संयोगान्तलोप की प्रवृत्ति नहीं होती ।

**[ रूपसिद्धि ]**

१. **विद्वान्** । विद्वन्स् + सि । **"व्यञ्जनाच्च"** (२।१।४९) से सिप्रत्यय का लोप, **"सान्तमहतोर्नोपधायाः"** (२।२।१८) से दीर्घ तथा प्रकृत सूत्र से सकार का लोप ।

२. **कटचिकीः** । कटचिकीर्ष् + सि । सिप्रत्यय का लोप, प्रकृत सूत्र से संयोगान्त षकार का लोप तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से रेफ का विसर्गादेश ।

३. **पुम्भ्याम्** । पुमन्स् + भ्याम् । अन् के अकार का लोप, 'म् – न् - स्' इन संयोगसंज्ञक वर्णों में अन्तिम सकार का प्रकृत सूत्र से लोप तथा नलोप ।

४. **पुंसु** । पुमन्स् + सुप् । अन् के अकार का लोप, प्रकृत सूत्र से संयोगान्त सकार का लोप, नलोप तथा मकार को अनुस्वारादेश ॥२७५।

## २७६. संयोगादेर्धुटः [ २।३।५५ ]

**[ सूत्रार्थ ]**

विराम के विषय में तथा व्यञ्जनादि प्रत्ययों के परे रहने पर संयोगसंज्ञक वर्णों में धुट्संज्ञक आदि वर्ण का लोप होता है ।।२७६।

**[ दु० वृ० ]**

संयोगादेर्धुटो लोपो भवति विरामे व्यञ्जनादिषु च । मस्जेः– साधुमक्, साधुमग्भ्याम्, साधुमक्त्वम् । तक्षेः – साधुतट्, साधुतड्भ्याम्, साधुतट्त्वम् । विरामव्यञ्जनादिष्विति किम् ? गोरक्षौ । पुनः संयोगग्रहणमिह पूर्वस्मिंश्चानित्यार्थम् । तेन – मांसपिपक्। पूर्वस्मिंश्च रात् सस्यैव लोपः – ऊर्क्, ऊर्ग्भ्याम् ।।२७६।

**[ दु० टी० ]**

संयो० । लिङ्गस्य यः संयोगस्तस्यादेरवयवस्य धुटो लोप इति । एवं मस्जेश्च क्विपि कृते – साधुमक्, साधुमग्भ्याम् । एवं रक्षेश्च क्विपि कृते – गोरट्, गोरड्भ्याम् । यथा आख्याते स्कोः संयोगाद्योर्लोपो विधीयते तथा नात्र श्च्युतिर् इह शोपदेश एव पठ्यते ।'घृतं श्च्योतति' इति क्विप् । घृतश्च्युतमाचष्टे इतीनन्तात् क्विपि कृते आदेः शकारस्य लोप इष्यते – 'घृतक्, घृतग्भ्याम्' । तथा 'अट्ट् अतिक्रमे, अद्ड् अभियोगे' । टकारदकारोपदेशसामर्थ्यात् तवर्गयोगेऽपि टवर्गो नास्ति टकारदकारयोराद्योरपि लोपः । अत्, अट् ।

यद्येवम् , कलत्रयतेः क्विपि कृते कलत्, कलद्भ्यामिति न सिध्यति ? सत्यम् । स्कोः श्च्युतेः अट्टति – अड्डत्योरेव प्रतिपत्तव्यम् । तदेतत् कथमिति मनसि कृत्वाह – **पुनः संयोगग्रहणमित्यादि** । **"संयोगान्तस्य लोपः"** (२।३।५४) इत्यतः संयोगो वर्तिष्यते यत् पुनः संयोगग्रहणं प्रत्येकं तत् 'संज्ञापूर्वको विधिरनित्यः' (का० परि० ३०) इति प्रतिपत्त्यर्थम् । यथा 'मांसं पिपक्षति' इति क्विपि कृते मांसपिपक्। यथा रात् सस्यैव लोपः इति नियमः सिद्धो भवति, तथेदमपीत्यर्थः । अथवा पुनः संयोगग्रहणमिति नात्र पुनः शब्दः पुनरुक्तार्थे, किन्तर्हि वाक्यावधारणे । संयोगग्रहणं पुनरनित्यार्थमित्यर्थः । अनित्योऽर्थः साध्योऽस्येति विग्रहः । तदिह **मण्डूकप्लुतिन्यायेन** वाधिकारो व्यवस्थितविभाषार्थः । संयोगग्रहणं तु प्रत्येकं **सुखप्रतिपत्त्यर्थम्** ।।२७६।

[वि० प०]

संयो० । 'साधु मज्जति, साधु तक्ष्णोति' इति क्विप् । मांसपिपगिति पचेः सन् । द्विर्वचनम् । **"सन्यवर्णस्य"** (३।३।२६) इतीत्वम् । मांसं पिपक्षतीति क्विपि बुद्धिस्थे पूर्ववदकारलोपे संयोगान्तसकारस्यैव लोपः, न त्वादेर्धुट इति । इहानित्यत्वात् पूर्वस्मिंश्चानित्यत्वमुच्यते इति शेषः । यदि रेफात् परस्य वर्णस्य लोपस्तदा यकारस्यैव नान्यस्येत्यर्थः । तेन 'ऊर्क्, ऊर्ग्भ्याम्' इत्यादि सिद्धम् । **'ऊर्ज् बलप्राणधारणयोः'** (९।१७) इति चुरादाविनन्तात् क्विप् ॥२७६।

[क० च०]

संयो० । पुनः संयोगग्रहणमिति **वृत्तिः** । पूर्वसूत्रात् संयोगग्रहणानुवृत्त्या सिध्यति, किमत्र संयोगग्रहणेन ? सत्यम् । यत् पुनरिह संयोगग्रहणं तेन पूर्वोक्तसंयोगग्रहणस्यानित्यत्वसूचनार्थम् । अथ पूर्वसूत्रात् संयोगानुवृत्त्यैव साध्यस्य सिद्धिर्भविष्यति । यत् पुनरिह संयोगग्रहणं तदस्यैवानित्यत्वार्थमिति कथन्नानुमीयते इति चेन्नास्ति क्षतिरिति विनिगमनाभावात् । उभयत्राप्यनित्यत्वमस्तीत्येतदेव हृदि कृत्वाह – इह पूर्वस्मिंश्च इत्यादि । ननु 'मांसपिपग्' इत्यत्र संयोगान्तसकारलोपेऽसवर्णनिमित्तसकारस्याभावात् **"चवर्गस्य किरसवर्णे"** (३।६।५५) इत्यनेन विहितस्य ककारस्याभावे चकारस्य स्थितौ **"न संयोगान्त०"** (२।३।५८) इत्यादिना संयोगान्तलोपस्यालुप्तवद्भावात् कथं **"चवर्गदृगादीनां च"** (२।३।४८) इति गत्वम् ? सत्यम् । आदिचतुर्थत्वकार्यं प्रति अलुप्तवद्भावो नास्तीति **टीकायां** वक्ष्यमाणत्वात् ।

तथा च **"न सन् डादौ"** (कात० परि० – नाम० ५५) इति **श्रीपतिनापि** विहितम् इति **हेमकर**स्यापि मतम् । अथ 'ऊर्क्, ऊर्ग्भ्याम्' इत्यत्र नियमे रेफात् ककारस्य लोपो न भवति, रेफाक्रान्तस्य द्वित्वात् ककारात् ककारस्य लोपः कथन्न स्यात् ? नैवम् । निमित्ताभावादुभयककारस्याभावो रेफात् सस्यैव लोप इति नियमस्य वैफल्यं स्यादिति दिक् । ननु स्कोरट्तु – अद्ड् – श्च्युतामादेरिति नियमात् 'मूलवृड्' इत्यत्र कथं वृश्चेरादिलोपः, तालव्यादित्वात् ? सत्यम् । श्च्युत इति तालव्योपधस्योपलक्षणत्वाद् वृश्चेरपि बोद्धव्यः । अथवा यजादौ वृश्चिपाठाद् एव आदिधुड्लोपो ज्ञेयः । अन्यथा संयोगान्तलोपे शान्तद्वारेणैव डत्वं सिद्धम्, किं यजादिपाठेन । इदन्तु **"हशषछान्त०"**

(२।३।४६) इत्यादिसूत्रस्य **टीकायां** 'मूलवृड्' इत्यस्य साधने **"संयोगादेर्धुटो लोपः"** (२।३।५५) इति यदुक्तं तदन्वयबोधने व्याख्यातम्। **वस्तुतस्तु** वृश्चिग्रहणं यजादौ सुखार्थमेव। संयोगान्तलोपे शान्तत्वात् डत्वस्य सिद्धत्वात्। सयोगान्तलोपस्यालुप्तवद्भावाड् डत्वं न भविष्यतीति वाच्यम्, आदिचतुर्थत्वकार्ये कर्तव्येऽलुप्तवद्भावस्य निषेधात् ॥२७६।

**[ समीक्षा ]**

'साधुमस्ज् + सि, साधुमस्ज् + भ्याम्, साधुतक्ष् + सि, साधुतक्ष् + भ्याम्, साधुतक्ष् + त्व + सि' इस अवस्था में पाणिनि तथा शर्ववर्मा दोनों ही शाब्दिकाचार्यों ने संयोगसंज्ञक वर्णों में प्रथम वर्ण सकार - ककार का लोप करके 'साधुमक्, साधुमग्भ्याम्, साधुतट्, साधुतड्भ्याम्, साधुतट्त्वम्' शब्दरूप सिद्ध किए हैं। पाणिनि का सूत्र है – **"स्कोः संयोगाद्योरन्ते च"** (अ० ८।२।२९)।

**[ रूपसिद्धि ]**

१. **साधुमक्।** साधुमस्ज् + सि। **"व्यञ्जनाच्च"** (२।१।४९) से सि- लोप, प्रकृत सूत्र से सकार - लोप, **"चवर्गदृगादीनां च"** (२।३।४८) से ज् को ग् तथा **"वा विरामे"** (२।३।६२) से ग् को क् आदेश।

२. **साधुमग्भ्याम्।** साधुमस्ज् + भ्याम्। प्रकृत सूत्र से स् का लोप तथा **"चवर्गदृगादीनां च"** (२।३।४८) से ज् को ग् आदेश।

३. **साधुमक्त्वम्।** साधुमस्ज् + त्व + सि। साधुमस्जो भावः। **"तत्वौ भावे"** (२।६।१३) से त्व - प्रत्यय, प्रकृत सूत्र से सकार - लोप, **"चवर्गदृगादीनां च"** (२।३।४८) से ज् को ग्, **"अघोषे प्रथमः"** (२।३।६७) से ग् को क्, 'साधुमक्त्व' शब्द की लिङ्गसंज्ञा, सिप्रत्यय, सिलोप तथा मु – आगम।

४. **साधुतट्।** साधुतक्ष् + सि। सिलोप, प्रकृत सूत्र से ककारलोप, ष् को ड् तथा ड् को ट् आदेश।

५. **साधुतड्भ्याम्।** साधुतक्ष् + भ्याम्। प्रकृत सूत्र से ककार का लोप तथा **"धुटां तृतीयः"** (२।३।६०) से षकार को डकारादेश।

६. **साधुतट्त्वम्।** साधुतक्ष् + त्व + सि। साधुतक्षो भावः। **"तत्वौ भावे"** (२।६।१३) से त्वप्रत्यय, प्रकृत सूत्र से ककार - लोप, **"धुटां तृतीयः"** (२।३।६०) से ष् को ड्, **"अघोषे प्रथमः"** (२।३।६१) से ड् को ट्, 'साधुतट्त्व' शब्द की लिङ्गसंज्ञा, सिप्रत्यय, सिलोप तथा मु– आगम ॥२७६।

## २७७. लिङ्गान्तनकारस्य [ २।३।५६ ]

### [ सूत्रार्थ ]

विराम के विषय में तथा व्यञ्जनादि प्रत्यय के परे रहते लिङ्गसंज्ञक शब्द के अन्त में विद्यमान नकार का लोप होता है ॥२७७।

### [ दु० वृ० ]

लिङ्गान्तनकारस्य लोपो भवति विरामे व्यञ्जनादिषु च। सखा, राजभ्याम्, राजभिः, राजसु, राजत्वम्। लिङ्गान्तनकारस्येति किम्? अहन्। पुनर्लिङ्गग्रहणमुत्तरत्र सामान्यार्थम् ॥२७७।

### [ दु० टी० ]

लिङ्गान्त०। लिङ्गस्यान्तोऽवयवो यो नकारस्तस्य लोप इति। **'हन् हिंसागत्योः'** (२।४) ह्यस्तन्यां दिः, सिर्वा। अदादित्वादनो लुक्, अड् धात्वादिः। **"व्यञ्जनाद् दिस्योः"** (३।६।४७) लोपः। व्यवस्थितवाधिकाराद् 'राजन्वान् देशः, राजन्वती पृथिवी'। शोभनो राजा विद्यतेऽस्मिन्निति प्रशंसायां वन्तुः। तेन 'राजन्वान्, सौराज्ये' न वक्तव्यं भवति। यद्येवं प्रकरणवशाल्लिङ्गं लब्धमेव तर्हि स्यादिविभक्तिरपि प्रकरणाल्लभ्यते इति 'वृक्षान्' इत्यत्र कथं नलोपो न भवति, नैवम्। व्यञ्जनादौ सर्वदा लिङ्गमेव तत्साहचर्याद् विरामेऽपि सर्वदा लिङ्गमेवावसीयते इत्याह – पुनर्लिङ्ग इत्यादि। तेन धातुविभक्त्योरपि वक्ष्यमाणे कार्यं भवति। 'मज्जति, भृज्जति' इति **"धुटां तृतीयः"** (२।३।६०)। पयः, पयोभ्याम् इति विसर्गः। अन्तग्रहणं **सुखप्रतिपत्त्यर्थमेव** ॥२७७।

### [ वि० प० ]

लिङ्गान्त०। लिङ्गान्तश्चासौ नकारश्चेति कर्मधारयः। सखेति, सख्युश्चेति अन्। अहन्निति। हन् हिंसागत्योः। ह्यस्तन्यादिः सिर्वा। **"व्यञ्जनाद् दिस्योः"**

(३।६।४७) इति तस्य लोपः। **"अड् धात्वादेः"** (३।८।१६) इत्यडागमः। ननु लिङ्गप्रकरणत्वादेव धातोर्न भविष्यति, किं लिङ्गग्रहणेनेति। यद्येवम्, स्यादिविभक्तिरपि प्रकरणबलाल्लभ्यते। विराममाश्रित्य 'वृक्षान्' इत्यत्र नलोपः कथन्न स्याद् इति चेत्, नैवम्। व्यञ्जनादौ विभक्तौ विभक्तिनकारस्यासम्भवात् सर्वथा लिङ्गमेवावसीयते, तत्साहचर्याद् विरामेऽपि लिङ्गस्यैव नकारलोपो भविष्यति, किमर्थं लिङ्गग्रहणमित्याह – **पुनर्लिङ्गेत्यादि।** तेन **"धुटां तृतीयः"** (२।३।६०) इत्यादिषु धातोरपि कार्यमुपपद्यते इति ॥२७७।

**[ क० च० ]**

लिङ्गान्त०। नस्येति सिद्धे यत् कारग्रहणं तत् स्वरूपपरिग्रहार्थम्। तेन सखेत्यत्र लाक्षणिकनकारस्यापि लोपः इति **केचित्।** तन्न। वर्णविधौ लाक्षणिकपरिभाषाया अनित्यत्वादेव सिद्धेरिति भावः ॥२७७।

**[ समीक्षा ]**

'सखि + सि, राजन् + भ्याम्, राजन् + भिस्, राजन् + सुप्, राजन् + त्व + सि' इस अवस्था में पाणिनि तथा शर्ववर्मा दोनों ही आचार्य लिङ्ग (प्रातिपदिक) के अन्तिम नकार वर्ण का लोप करके 'सखा, राजभ्याम्, राजभिः, राजसु, राजत्वम्' शब्दरूप सिद्ध करते हैं। पाणिनि का सूत्र है – **"नलोपः प्रातिपदिकान्तस्य"** (अ० ८।२।७)।

**[ रूपसिद्धि ]**

१. **सखा।** सखि + सि। **"सख्युश्च"** (२।२।२३) से इ को अन्, **"नान्तस्य चोपधायाः"** (२।२।१६) से न् की उपधा को दीर्घ, **"व्यञ्जनाच्च"** (२।१।४९) से सिलोप तथा प्रकृत सूत्र से नलोपादेश।

२. **राजभ्याम्।** राजन् + भ्याम्। प्रकृत सूत्र से नलोप।

३. **राजभिः।** राजन् + भिस्। प्रकृत सूत्र से नलोप तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से स् को विसर्ग।

४. **राजसु।** राजन् + सुप्। प्रकृत सूत्र से नलोप।

५. **राजत्वम्।** राजन् + त्व + सि । राज्ञो भावः । **"तत्वौ भावे"** (२।६।१३) से त्वप्रत्यय, प्रकृत सूत्र से नलोप, लिङ्गसंज्ञा, सिप्रत्यय, सिलोप तथा मु-आगम ॥२७७।

## २७८. न संबुद्धौ [२।३।५७]

### [सूत्रार्थ]

सम्बुद्धिसंज्ञक 'सि' प्रत्यय परे रहते लिङ्ग (=प्रातिपादिक) के अन्तिम वर्ण नकार का लोप नहीं होता है ॥२७८।

### [दु० वृ०]

लिङ्गान्तनकारस्य लोपो न भवति, सम्बुद्धौ । हे राजन् ! पृथक्करणान्नपुंसकस्य वा – हे साम, हे सामन्! ॥२७९।

### [दु० टी०]

न संबुद्धौ । प्रतिषेधवचनं ज्ञापयति प्रत्ययलोपलक्षणमाश्रित्य संज्ञाविधिर्न बाध्यत इति **केचिदा**चक्षते । **अस्माभिस्तु** लिङ्गविधाने युक्तिरुक्तैव । कथं हे राजवृन्दारक इति, अचोद्यमेतत् । न हि संबुद्ध्यन्तस्य समासः सम्बोधनमाक्षिप्तक्रियापदं प्रवर्तमानं कथमनपेक्षमिति वृत्तिसमानार्थेन च वाक्येन भवितव्यम् । वाक्येनावयवसंबोधनमवगम्यते, समुदायसंबोधनं तु समासेनेति । पृथक्करणादित्यादि । एतेन **'नञा निर्दिष्टमनित्यम्'** (का०परि० ६७) इह साध्यते इति भावः ॥२७८।

### [क० च०]

न सं० । ननु किमर्थमिदं सिलोपे पदान्तत्वादेव नकारलोपो न भविष्यति । उच्यते – प्रतिषेधवचनं ज्ञापयति । प्रत्ययलोपलक्षणे सत्यपि लुप्तविभक्तीनां लिङ्गसंज्ञा न विहन्यते इति । अत एव पदसंज्ञाविधौ राजेति नित्यत्वाद् व्यञ्जनाच्चेति सिलोपे कृते पुनर्लिङ्गसंज्ञायां सत्यां लिङ्गान्तनकारलोपो भवतीति **पञ्जीकृतो**क्तमिति भावः । अथ लिङ्गान्तनकारस्यासंबुद्धौ इत्येकयोगः क्रियताम् । किं पृथग्वचनेनेत्याह – **पृथक्करणान्न पुमिति।** तेन 'नलोपो नपुंसकस्य वा' इति न सूत्रं वक्तव्यम् ॥२७८।

**[ समीक्षा ]**

'हे राजन् + सि' इस अवस्था में **"लिङ्गान्तनकारस्य"** (२।३।५६) से नकार का लोप प्राप्त होता है, परन्तु सम्बोधनविभक्ति के एकवचन = संबुद्धि में नकार-लोप का निषेध पाणिनि तथा शर्ववर्मा दोनों ही आचार्य करते हैं। पाणिनि का सूत्र है – **"न ङिसंबुद्ध्योः"** (अ० ८।२।८)। अतः 'हे राजन्! ' शब्दरूप निष्पन्न होता है। इस प्रकार उभयत्र प्रक्रियासाम्य है।

**[ रूपसिद्धि ]**

१. **हे राजन्!** हे राजन् + सि। **"व्यञ्जनाच्च"** (२।१।४९) से सिलोप, **"लिङ्गान्तनकारस्य"** (२।३।५६) से प्राप्त नलोप का प्रकृत सूत्र से निषेध।

२. **हे साम! हे सामन्!** हे सामन् (नपुंसकलिङ्ग) + सि। **"लिङ्गान्तनकारस्य"** (२।३।५६) सूत्र से प्रकृत सूत्र को पृथक् करने से नपुंसकलिङ्ग में नलोप का निषेध वैकल्पिक माना जाता है। तदनुसार नलोप के न होने पर 'हे सामन्!' तथा नलोप हो जाने पर 'हे साम!' यह प्रयोग निष्पन्न होता है ॥२७८।

## २७९. नसंयोगान्तावलुप्तवच्च पूर्वविधौ [ २।३।५८ ]

**[ सूत्रार्थ ]**

**"अकारो दीर्घं घोषवति"** (२।१।१४) सूत्र द्वारा विहित दीर्घादेश से लेकर **"लिङ्गान्तनकारस्य"** (२।३।५६) द्वारा विहित नलोपपर्यन्त जितनी भी पूर्वनिर्दिष्ट विधियाँ है, उनके प्राप्त होने पर नकार वर्ण तथा संयोगान्त वर्ण का लोप हो जाने पर भी अलुप्तवद्भाव होता है ॥२७९।

**[ दु० वृ० ]**

नकारसंयोगान्तौ लुप्तावप्यलुप्तवद् भवतः पूर्वविधौ लिङ्गान्तदीर्घादिके कर्तव्ये। राजभ्याम्, राजभिः, राजसु, विद्वान्, सुकन्भ्याम् ॥२७९।

**[ दु० टी० ]**

न संयो०। नश्च संयोगान्तश्च द्वन्द्वः। अलुप्ताविवालुप्तवत् प्रसज्यार्थे नञ्। अविवक्षितकर्मत्वात् कर्तरि वा निष्ठा। यथा 'लुप्तोऽयं देवदत्तः' इति **कार्यातिदेशोऽयम्**

अलुप्तयोर्यत् कार्यं लुप्तयोरपि तदतिदिश्यते इत्यर्थः। विधीयते इति विधिः कार्यम्, पूर्वश्चासौ विधिश्चेति कर्मधारयः। इतः सूत्रात् प्राग् यो विधिरुक्तः स पूर्वविधिः। न च विधानं विधिः पूर्वस्य स्थान इति नकारसंयोगान्तावपेक्ष्य भवति। तदा राजभिरिति भिस ऐस्त्वं स्यात्। स च नामप्रकरणम् अपेक्ष्य गृह्यते इत्याह – पूर्वविधावित्यादि। घोषवति दीर्घो भिस् ऐस्, धुट्येत्वं च न स्यादित्यर्थः। संयोगान्तलोपे लिङ्गान्तनकारलोपो न भवति। सुकन्, सुकन्भ्यामिति। सन्धिलक्षणं तु भवत्येव – राजच्छत्रम्, महांश्चरतीत्यादि।

परविधौ लुप्त एवेति 'दन्तिषु, करिषु' षत्वं भवति। कथं तर्हि 'वृत्रहभ्याम्' इति क्विपमाश्रित्य तोऽन्तो न भवतीति चेद्, **'असिद्धं बहिरङ्गमन्तरङ्गे'** (का० परि० ३३) इति न्यायात्। **ये** 'पन्थिन्, मन्थिन्' इति नान्तप्रकृतिमाश्रयन्ति तन्मतेनापि विरामव्यञ्जनादावित्यनुवर्तनमनर्थकम्। पथः, पथेति नस्याघुट्स्वरे लुप्तस्यानुषङ्गलोपेऽलुप्तवद्भावात् तृतीयः स्याच्चेत्, नैवम्। संयोगान्तसहचरितस्य नकारस्य ग्रहणादिह कथम् अघुट्स्वरेऽलुप्तस्य नस्यालुप्तवद्भाव इति ॥२७९।

**[वि० प०]**

न सं०। विधीयते इति **विधिः** कार्यम्। **"उपसर्गे दः किः"** (४।५।७०) इति कर्मणि किप्रत्ययः। पूर्वश्चासौ विधिश्चेति कर्मधारयः। एतस्मादेव सूत्राद् यः पूर्वो विधिः सः पुनर्नामप्रकरणमपेक्ष्य **"अकारो दीर्घं घोषवति"** (२।१।१४) इत्यादिना मद्विहितं कार्यमित्याह-पूर्वविधौ लिङ्गान्तदीर्घादिके कर्तव्ये इति। तेन 'राजभ्याम्' इत्यादौ **"अकारो दीर्घं घोषवति"** इति, **"भिसैस् वा, धुटि बहुत्वे त्वे"** (२।१।१८, १९) इत्येते न भवन्ति। तथा संयोगान्तलोपे लिङ्गान्तनकारस्य लोपो न भवति। सुकन्भ्याम् इति। **'कसि गतिशातनयोः'** (२।४८)। सुष्ठु कंस्ते इति क्विप्। यदि पुनरिह विधानं विधिरिति भावसाधनो विधिशब्दः स्यात् तदा पूर्वस्येति कर्मणि षष्ठी स्यात्। न च पूर्वो वर्णः कश्चिदिह विधातव्यः संभवति। अथ पूर्वस्य वर्णस्य स्थाने विधिः पूर्वविधिरिति कथन्न स्याद् इति चेत् तद् अयुक्तम्। एवन्तर्हि नकारसंयोगान्तलोपापेक्षया पूर्वत्वं प्रतिपत्तव्यं स्यात्। ततश्च 'राजभ्याम्' इत्यत्र च दीर्घस्यैव प्रतिषेधः स्यात्। राजभिरित्यत्र **"भिसैस् वा"** (२।१।१८) इति ऐस्त्वं भवत्येव। नकारसंयोगान्ताभ्यां

तस्य परत्वात् सन्धिलक्षणं भवत्येव, तस्य नामप्रकरणबहिर्भूतत्वात् । यथा 'राजच्छत्रम्, महांश्चरति' इति स्वरात् परस्य छकारस्य द्विर्भावो नकारस्य चानुस्वारपूर्वः शकार इति, तथा परविधिरपि स्यादेव 'दन्तिषु, करिषु' इति षत्वम् ॥२७९।

**[ क० च० ]**

न सं० । राजभ्यामितीह दीर्घस्यैव प्रतिषेधः स्यादिति । ननु ईदृश एव सूत्रार्थस्तु मा भूद् राजभिरिति का नो हानिः । नैवम्, ईदृशे सूत्रार्थे सूत्रस्यैव वैफल्यं स्यात् । अथ 'राजभ्याम्' इत्यादिषु चरितार्थत्वात् कथं वैफल्यमिति चेत्, नैवम् । **'असिद्धं बहिरङ्गमन्तरङ्गे'** (का० परि० ३३) इति न्यायाद् बहिरङ्गस्य नकार-संयोगान्तयोर्लोपस्यासिद्धवद्भावाद् दीर्घनलोपादिकं न भवत्येव, तस्माद् 'राजभिः' इति सिद्ध्यर्थमेव सूत्रविधानम् । तत्तु तदैव संभवति, यदि पूर्वश्चासौ विधिश्चेति कर्मधारयः स्यादिति ।

ननु यदि राजभिरिति सिद्ध्यर्थं सूत्रविधानम्, किं संयोगान्तग्रहणेन, नस्यैवालुप्तत्वं विधीयताम् ? सत्यम् । संयोगान्तग्रहणम् असिद्धवद्भावस्यानित्यत्वसूचनार्थम् । तेन 'यासाम्' इत्यत्र प्रकृत्याश्रितत्वादन्तरङ्गस्त्रीप्रत्ययं प्रति विभक्त्याश्रितत्वाद् बहिरङ्गं त्यदाद्यत्वं नासिद्धम् । 'प्रतिदीव्नः' इत्यत्र च दीर्घः सिद्धः । अन्यथा अकारलोपस्यासिद्धवद्भावाद् रेफसकारयोर्व्यञ्जनादिनिमित्तत्वाभावेन **"नामिनो र्वोरकुर्छुरोर्व्यञ्जने"** (३।८।१४) इत्यनेन प्रवर्तते । तथा कलत्रशब्दादेनि क्विपि सति संयोगान्तरेफस्य लोपेऽसिद्धवद्भावस्याभावात् 'कलद्भ्याम्' **इत्यत्र "धुटां तृतीयः"** (२।३।६०) इत्यस्य प्रवृत्तिरिति ।

ननु अन्तग्रहणं किमर्थम्, न संयोगावलुप्तवद् इत्यास्ताम्, नैवम् । 'साधुमक्' इत्यत्र संयोगावयवस्यादिधुटो लोपे सत्यनेनैव अलुप्तवद्भावे च न संयोगान्त-जकारलोपः स्यात् कुत्र गत्वं प्रवर्तितव्यमिति अन्तग्रहणं देयमिति। ननु तथापि न क्रियताम् अन्तग्रहणं **'येन विधिस्तदन्तस्य'** (का० परि० ३) इति न्यायात् संयोगान्तलोपो भविष्यति ? सत्यम् । अनेनैवान्तग्रहणलाभे यत् पुनरिहान्तग्रहणं तत् सर्वथाऽन्तस्यैव लोपेऽलुप्तवद्भावार्थम् । अन्यथा 'साधुमक्' इत्यत्र पूर्व एव दोषः स्यादिति **हेमकरस्याय**माशयः ॥२७९।

**[ समीक्षा ]**

'राजन् + भ्याम्, राजन् + भिस्, राजन् + सुप्, विद्वन्स् + सि, सुकन्स् + भ्याम्' इस अवस्था में 'राजन्'-घटित नकार का लोप होने पर **"अकारो दीर्घं घोषवति"** (२।१।१४) से दीर्घादेश प्राप्त होता है तथा 'विद्वन्स्'-घटित संयोगान्त सकार का लोप होने पर **"लिङ्गान्तनकारस्य"** (२।३।५६) से नलोप प्राप्त होता है। यदि 'राजभ्याम्' आदि में दीर्घादेश तथा 'विद्वान्' में नलोप प्रवृत्त हो जाए तो अनिष्ट रूपों की आपत्ति होगी – ऐसा न हो एतदर्थ कातन्त्र में नलोप तथा संयोगान्तलोप का (अतिदेश) अलुप्तवद्भाव किया गया है। फलतः दीर्घ-नलोप कार्य नहीं हो पाते। पाणिनीय व्याकरण में **"पूर्वत्रासिद्धम्"** (अ० ८।२।१) सूत्र द्वारा संयोगान्तलोप (**संयोगान्तस्य लोपः** – अ० ८।२।२३) को तथा **"नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति"** (अ० ८।२।२) द्वारा नलोप को असिद्ध मानकर उक्त रूप निष्पन्न किए गए हैं।

**[ रूपसिद्धि ]**

१. **राजभ्याम्।** राजन् + भ्याम्। **"लिङ्गान्तनकारस्य"** (२।३।५६) से नलोप तथा प्रकृत सूत्र से नलोप का अलुप्तवद्भाव करके **"अकारो दीर्घं घोषवति"** (२।१।१४) से प्राप्त दीर्घादेश का प्रतिषेध।

२. **राजभिः।** राजन् + भिस्। पूर्ववत् नलोप, उसका अलुप्तवद्भाव तथा सकार को विसर्गादेश।

३. **राजसु।** राजन् + सुप्। पूर्ववत् नलोप तथा उसके अलुप्तवद्भाव से दीर्घ आदेश का निषेध।

४. **विद्वान्।** विद्वन्स् + सि। **"धुटि चासंबुद्धौ"** (२।२।१७) से न् की उपधा को दीर्घ, **"व्यञ्जनाच्च"** (२।१।४९) से सिलोप तथा **"संयोगान्तस्य लोपः"** (२।३।५४) से सकारलोप।

यहाँ यह विशेष ज्ञातव्य है कि संयोगान्तलोप हो जाने पर **"लिङ्गान्तनकारस्य"** (२।३।५६) से नकार का लोप प्राप्त होता है – इसके वारणार्थ प्रकृत सूत्र से संयोगान्तलोप का अलुप्तवद्भाव किया गया है। जिसके फलस्वरूप 'विद्वान्' आदि शब्दरूप नकारघटित सिद्ध होते हैं।

५. **सुकन्भ्याम्।** सुकन्स् + भ्याम्। पूर्ववत् संयोगान्तलोप तथा उसका अलुप्तवद्भाव ॥२७९।

## २८०. इसुस्दोषां घोषवति रः [ २।३।५९ ]

### [ सूत्रार्थ ]

विभक्तिसंबन्धी घोषवान् वर्ण के परे रहते इसन्त, उसन्त तथा दोस् शब्द के अन्तिम स् वर्ण को र् आदेश होता है ॥२८०।

### [ दु० वृ० ]

इसन्तस्य उसन्तस्य दोस्शब्दस्य च रो भवति घोषवति विभक्तौ। सर्पिर्भ्याम्, धनुर्भ्याम्, दोर्भ्याम्। घोषवतीति किम्? सर्पिःषु, धनुःषु, दोःषु। 'भे रः' इति सिद्धे घोषवतीत्युत्तरार्थं च ॥२८०।

### [ दु० टी० ]

इसु० ।**"सृपेरिस्, धनेरुस्, दमेर्डोस्"** (उ० २।४४, ४५, ३१) इति प्रत्ययत्वात् षत्वं प्राप्तम्। रत्वमुच्यते। पिपठिषति, पिपतिषतीति। तत्र विषयसप्तम्यपीति क्विपः प्राग् अस्य च लोपे कृते इस्स्थानित्वाभावात् 'पिपठीर्भ्याम्, पिपतीर्भ्याम्' इति भवत्येव। षत्वस्य बाधकम् इदं चेत् किमिह घोषवद्ग्रहणेन विरामे व्यञ्जनादावपि रेफादेशः प्रवृत्तः पदमध्ये चरितार्थत्वात्। अन्यत्र विसर्जनीयो भवति। पदान्ते घोषवति च पुना रेफ इति। यथा 'पिपठीः सर्पिर्गच्छति'। तर्हि सर्पिष्यति, धनुष्यति, दोष्यतीति रत्वं भवितुमर्हति शब्दाश्रयत्वात्। यिन्नाय्योर्नलोप एव करणीय इति नियमेनास्य बाधा न स्यादिति। यद्येवन्, 'भे रः' इति कथन्न विदध्यात्? सत्यम्। घोषवति रो भवति, अघोषे रो न भवतीति व्यावृत्तिबलादस्य प्रतियोगी विसृष्टः साधितो भवति षत्वापवाद इति। तेन 'सर्पिःषु, धनुःषु, दोःषु'। पक्षे विसर्जनीयस्य पररूपं भवत्येवेत्याह – **भे र** इत्यादि। उत्तरार्थं चेति। चकारेणोत्तरार्थं क्रियमाणमिहार्थमपि इत्याविर्भाव्यते। तेन 'पिपठीःषु, पिपतीःषु' इति **"रप्रकृतिरनामिपरोऽपि"** (१।५।१४) इति बहुलत्वादघोषेऽपि रेफ इति। ततः **"इरुरोरीरूरौ"** (२।३।५२) इति वचनं प्रवर्तते। तथा 'पिपठीःकल्पः, पिपठीःकल्पनम्, पिपठीःपाशः, पिपठीःपुरुषः' इति युक्तार्थे ॥२८०।

[वि० प०]

इसुस्० । भकारमन्तरेणापि स्यादौ घोषवान् वर्णो नान्यः संभवतीत्याह – भे रः इत्यादि । चकारेण इहार्थमपि सूचयति । तेन घोषवति रो भवति, अघोषे रो न भवतीति व्यावृत्तिबलादस्य प्रतियोगी विसृष्टः साधितो भवति । 'सर्पिःषु, धनुःषु, दोःषु' इति । अन्यथा 'सृपेरिस्, धनेरुस्, दमेर्डोस्' इति प्रत्ययस्थत्वात् षत्वमेव स्यात् । विसर्गे च कृते पक्षे पररूपं भवतीति ॥२८०।

[क० च०]

इसुस० । इसुसन्तानां विसर्जनीये प्राप्ते प्रत्ययस्थत्वात् षत्वं प्राप्नोति तद्बाधको रेफो विधीयते । चकार इहार्थमपि सूचयतीत्यादि । ननु परस्मिन् सूत्रे चरितार्थं घोषवद्ग्रहणं कथमत्र सूत्रे घोषवति रो भवति, अघोषे रो न भवतीति नियमार्थं स्यादिति । न चात्र 'भे रः' इत्युत्तरत्र घोषवतीति कृते सिध्यतीति । यदत्र घोषवद्ग्रहणं तन्नियमार्थमिति वाच्यम् । लाघवार्थमत्रैव घोषवद्ग्रहणस्य कर्तुं योग्यत्वात् ? सत्यम् । 'धुटां तृतीयः' इत्यकृत्वा 'धुटि धुटः सस्य चाशिटस्तृतीयः' इति क्रियताम् ।

**अयमर्थः** – धुटि परे धुटस्तृतीयो भवति, सस्य चाघोषे प्रथमस्य विषयत्वाद् इच्छतीत्यादौ न तृतीयः इति, अर्थाद् घोषवति धुटीति गम्यते । एतदनन्तरम् 'इसुसुदोषां भे रः' इति क्रियताम्, तदा घोषवद्ग्रहणं नियमार्थम् । नन्वेवं सूत्रे कर्तव्ये लाघवाभावात् प्रत्युत गौरवापत्तेश्च । नैवमस्ति लाघवम् । तथाहि धुटीति निमित्ताश्रयणात् 'शक्यते' इत्यत्र ककारस्य न तृतीयः शिड्वर्जनात् 'द्विष्ठः' इत्यत्र तृतीयाभावः सिद्धः । सस्येति ग्रहणात् भृज्जतीत्यादौ सस्य तृतीयः सिध्यति । ततश्चैषां कार्याणामनेनैव सिद्धत्वादाख्याते धुटां तृतीयश्चतुर्थेष्वेवेति नियमार्थं वचनं न कर्तव्यं भवति । अपि च 'अवमसंयोगाद्' इत्यादिना 'दध्नः' इत्यादौ पदे तृतीयाभावदर्शनार्थं क्रियमाणमलुप्तवद्वचनं न कृतं स्याद् धुटीति निमित्ताश्रयणात् । तस्माद् यदतिरिक्तघोषवद्ग्रहणं क्रियते तन्नियमार्थमेवेति न दोषः । तेन तत्प्रतियोगी विसृष्टः साधितो भवति ।

ननु कथमिदमुच्यते, यावता षत्वविधेर्विसर्गविधेर्बाधकत्वात् षत्वमेव प्राप्नोति ? सत्यम् । अघोषे सुतरामेव सिद्धस्य रेफाभावस्य नियमेन यद् विधानं तद्

घोषवत्प्रतियोगिकघोषाश्रितविसर्गरूपकार्यान्तरसाधनार्थमेव पर्यवस्यतीति। अन्यथा घोषवतीति नियमेन किं कृतमिति। ननु 'लिङ्गान्तनकारस्य' इत्यत्र लिङ्गग्रहणस्य सामान्यार्थत्वेनैव मज्जतीत्यादौ तृतीयादिकं सिध्यति, किमुत्तरत्र सामान्यार्थत्वेन घोषवद्ग्रहणेन ? सत्यम्। उत्तरत्र घोषवद्ग्रहणानुवर्तनात् कृपणमित्यादौ पकारादेः स्वरे परे तृतीयाभावः फलमिति ॥२८०।

**[ समीक्षा ]**

'सर्पिस्+भ्याम्, धनुस्+भ्याम्, दोस्+भ्याम्' इस अवस्था में कातन्त्रकार ने सकार को रकारादेश करके 'सर्पिर्भ्याम्, धनुर्भ्याम्, दोर्भ्याम्' शब्दरूप सिद्ध किए हैं। पाणिनि ने **"ससजुषो रुः"** (अ० ८।२।६६) से स् को रु आदेश करके उक्त प्रयोग सिद्ध किए हैं। प्रक्रिया की दृष्टि से उभयत्र प्रायः साम्य ही है।

**[ रूपसिद्धि ]**

१. **सर्पिर्भ्याम्।** सर्पिस्+भ्याम्। प्रकृत सूत्र से सकार को रकारादेश।

२.३. **धनुर्भ्याम्।** धनुस्+भ्याम्। **दोर्भ्याम्।** दोष्+भ्याम्। उभयत्र प्रकृत सूत्र से स् को र् आदेश।

**[ विशेष ]**

वृत्तिकारादि के अभिमतानुसार सूत्रकार को 'इसुसुदोषां भे रः' ऐसा ही सूत्र बनाना चाहिए था। इससे भी अभीष्ट सिद्धि अविकल रूप में हो जाती है, फिर भी जो 'घोषवति' यह पाठ किया गया है, वह **"धुटां तृतीयः"** (२।३।६०) इस उत्तरवर्ती सूत्र के लिए भी समझना चाहिए– यह उन्होंने समाधानपक्ष दिखाया है– **"भे रः इति सिद्धे घोषवतीत्युत्तरार्थं च"** (दु० वृ० २।३।५९)॥२८०।

## २८१. धुटां तृतीयः [ २।३।६० ]

**[ सूत्रार्थ ]**

घोषवत्संज्ञक वर्ण जिसके आदि में हों ऐसे प्रत्ययादि के परवर्ती होने पर धुट्संज्ञकवर्णों के स्थान में वर्गीय तृतीय वर्ण होते हैं॥२८१।

[दु० वृ०]

धुटां वर्णानां तृतीयो भवति घोषवति सामान्ये। योषिद्भ्याम्, चित्रलिग्भिः, मज्जति, लज्जते, भृज्जति ॥२८१।

[दु० टी०]

धुटाम्० ।धुड्भिरिह न केचिद् विशेष्याः सन्ति, अश्रूयमाणत्वादिति तदन्तविधिर्न भवति। टु मस्जो, ओ लस्जी, भ्रस्जेः लृवर्णतवर्गलसा दन्त्या इति **'स्थानेऽन्तरतमः'** (का० परि० १७) सकारस्य दकारः। **"तवर्गश्चटवर्गयोगे चटवर्गौ"** (२।४।४६) इति सोपधपाठस्तु **"न्यङ्क्वादीनां च"** (४।६।५७) इति गत्वे मद्गुः। **"स्कोः संयोगाद्यो-रन्ते च"** (३।६।५४) इति सलोपे 'मग्नम्, भृष्टम्' इति यथा स्यात्। कथं 'शक्यः, स्वप्नः' इति धुटां तृतीयश्चतुर्थेष्वेव प्रत्ययेष्विति नियमात् ।कथं 'विद्युत्वान्, तडित्वान्' इति मण्डकप्लुतिव्यवस्थितवानुवृत्त्या तकारस्य वन्तौ न भवति इति। यथा मण्डूकः उत्प्लुत्य उत्प्लुत्य गच्छतीति। अलुप्तविधावपि व्यवस्थितविभाषा सिद्धैव। यथा – महाब्रह्माणमाचष्टे, सुवेश्मानमाचष्टे **'महाब्रट्, सुवेट्'** इति ।तथा **'घृतग्'** इत्युदाहृतमेव। कारितक्विबन्तानां धातूनां डत्वादयश्चतुर्थपर्यन्ताः प्रयोगानुसारेण लुप्तविधौ द्रष्टव्याः इति ॥२८१।

[वि० प०]

धुटाम्० ।इह घोषवतीत्यनुवृत्तिः सामान्यार्थ एवेत्याह – **घोषवति सामान्य** इति। चित्रलिग्भिरिति। चित्रं लिखतीति क्विप्। मज्जतीत्यादि **'टु मस्जो शुद्धौ, भ्रस्जू पाके, ओलजी ओ लस्जी व्रीडे'** (५।५१, ४, ११६) सम्प्रसारणम्। **'लृवर्णतवर्गलसा दन्त्याः'** (कात० शि० सू० ४) इति न्यायाद् अन्तरतमः सकारस्य दन्त्यस्य तृतीयो दकारः प्रवर्तते – **"तवर्गश्चटवर्गयोगे चटवर्गौ"** (२।४।४६) इति ॥२८१।

[क० च०]

धुटाम्० । इह घोषवतीत्यनुवृत्तिः। सामान्यार्थमित्यादि। ननु कथम् इदमुच्यते, यावता **"लिङ्गान्तनकारस्य"** (२।३।५६) इत्यत्र लिङ्गग्रहणादेव सामान्यमवगम्यते इति ? सत्यम्। यदि घोषवद्ग्रहणं न क्रियते तदा इच्छतीत्यादौ अघोषेऽपि तृतीयः स्यात्, नैवम्, अघोषे प्रथमस्य विषयत्वात्। तर्हि वहतीत्यादौ स्वरे दोषः स्याच्चेद्

घोषवदनुवृत्तौ सामान्यत्वेन लब्धे लिङ्गग्रहणं सामान्यार्थमित्युक्तम्, चेद् उच्यते लिङ्ग-ग्रहणमेव सामान्यार्थम्। घोषवदनुवृत्तिस्तु स्वरव्यावृत्त्यर्थम्। तदयुक्तम्, पूर्वत्र 'भे रः' इति सिद्धे यद् घोषवद्ग्रहणं तद् व्याप्त्या लिङ्गातिरिक्तस्थलेऽपि तृतीयार्थं भविष्यति, नैवम्। पूर्वसूत्रे घोषवद्ग्रहणात् 'सुपीःषु' इत्यादौ विसर्गसिद्धिरिति। यत्तु घोषवतीत्य-नुवृत्तिः सामान्यार्थमित्युक्तं तत्तु लिङ्गग्रहणस्य फलमेव स्फुटीकृतमिति ॥२८१।

**[ समीक्षा ]**

'योषित् + भ्याम्, चित्रलिख् + भिस्, मस्ज् + ति, लस्ज् + ते, भ्रस्ज् + ति' इस अवस्था में त् – ख् – स् (द्) को वर्गीय तृतीय वर्ण 'द् – ग् – ज्' आदेश करके कातन्त्रकार ने 'योषिद्भ्याम्, चित्रलिग्भिः, मज्जति, लज्जते, भ्रज्जति' शब्दरूप सिद्ध किए हैं। एतदर्थ पाणिनि का सूत्र है – **"झलां जश् झशि"** (अ० ८।४।५३)। कातन्त्रव्याकरण में प्रत्याहार नहीं हैं, उसमें झल् प्रत्याहार के लिए 'धुट्' संज्ञा की है – **"धुड् व्यञ्जनमनन्तःस्थानुनासिकम्"** (२।१।१३)। जश् प्रत्याहार में वर्गीय तृतीय वर्ण आते हैं, एतदर्थ 'धुटां तृतीयः' में 'तृतीयः' पद पढ़ा गया है। अतः अपने – अपने व्याकरण की प्रक्रिया के अनुसार दोनों ही विधान समान हैं। किसी एक में गौरव की संभावना नहीं की जा सकती।

**[ रूपसिद्धि ]**

१. **योषिद्भ्याम्।** योषित् + भ्याम्। प्रकृत सूत्र द्वारा धुट्संज्ञक तकार के स्थान में तवर्गीय तृतीय वर्ण दकारादेश।

२. **चित्रलिग्भिः।** चित्रलिख् + भिस्। प्रकृत सूत्र से धुटसंज्ञक ख् – वर्ण के स्थान में कवर्गीय तृतीय वर्ण ग् – आदेश तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से स् को विसर्गादेश।

३-५. **मज्जति।** मस्ज् + ति। **लज्जते।** लस्ज् + ते। **भृज्जति।** भ्रस्ज् + ति। इन तीनों शब्दों में **"अन् विकरणः कर्तरि"** (३।२।३२) से 'अन्' विकरण्, **'स्थानेऽन्तरतमः'** (का० परि० १६) के न्यायानुसार **'लृवर्णतवर्गलसाः'** (कात० शि० सू० ४) इस शिक्षावचन के आधार पर सकार के स्थान में तवर्गीय तृतीय दकार वर्णादेश तथा **"तवर्गश्चटवर्गयोगे चटवर्गौ"** (२।४।४६) से दकार को जकारादेश ॥२८१।

## २८२. अघोषे प्रथमः [२।३।६१]

**[सूत्रार्थ]**

अघोष वर्ण जिनके आदि में हों ऐसे प्रत्यय आदि के परे रहते धुट्संज्ञक वर्ण के स्थान में वर्गीय प्रथम वर्ण आदेश होता है ॥२८२।

**[दु० वृ०]**

अघोषे धुटां वर्णानां प्रथमो भवति । षट्सु, ज्ञानभुत्सु, इच्छति, गच्छति ॥२८२।

**[दु० टी०]**

अघोषे० । 'सुपि प्रथमः' इति सिद्धेऽघोषग्रहणमिह सामान्यार्थम् उत्तरार्थं चेत्याह – इच्छतीत्यादि । कथं 'वृश्चति, श्च्योतति' इति **"अघोषेष्वशिटां प्रथमः"** (३।८।९) इति चेत् तर्हि इच्छतीत्यादावपि तेनैव भविष्यति 'तच्छादयति, तट्टीकते' इति **"पदान्ते धुटां प्रथमः"** (३।८।१) अस्त्येवेति । नैवम् । यथा धुटां तृतीयश्चतुर्थेष्वेव प्रत्ययेषु स्थितः, तथा अघोषेषु प्रत्ययेषु अशिटां प्रथमोऽपि तत्सन्निहितत्वात् 'जक्षतुः' इत्यादावनेनैव प्रथम इति । 'वृश्चति, श्च्योतति' इति शोपदेशबलात् प्रथमो न भवति। अन्यथा चकार एवोपदिश्यते **'इवर्णचवर्गयशास्तालव्याः'** (कात० शि० सू० २) इति ॥२८२।

**[समीक्षा]**

'षड् + सुप्, ज्ञानभुध् + सुप्, इछ्छ + ति, गछ्छ + ति' इस अवस्था में 'ड्, ध्, छ्' वर्णों के स्थान में वर्गीय प्रथम वर्ण 'ट्, त्, च्' आदेश करके शर्ववर्मा 'षट्सु, ज्ञानभुत्, इच्छति, गच्छति' शब्दरूप सिद्ध करते हैं। पाणिनि का एतदर्थ सूत्र है– "खरि च" (अ० ८।४।५५)। इससे झलों को चर् आदेश होता है खर् परे रहते। अपने अपने व्याकरण की प्रक्रिया के अनुसार दोनों के ही समान आदेश हैं।

**[रूपसिद्धि]**

१. **षट्सु**। षष् + सुप्। **"हशषछान्तेजादीनां डः"** (२।३।४६) से ष् को ड् तथा प्रकृत सूत्र से ड् को ट् आदेश।

२. **ज्ञानभुत्सु**। ज्ञानबुध् + सुप्। **"हचतुर्थान्त०"** (२।३।५०) से ब् को भ् तथा प्रकृत सूत्र से धकार को तकारादेश।

३. **इच्छति।** इषु इच्छायाम् (५।७०) + ति । **"अन् विकरणः कर्तरि"** (३।२।३२) से प्रकृति – प्रत्यय के मध्य में अन् विकरण, **"गमिष्यमां छः"** (३।६।६९) से ष् को छ्, **"द्विर्भावं स्वरपरश्छकारः"** (१।५।१८) से 'छ्' को द्वित्व तथा प्रकृत सूत्र से प्रथम छकार को चवर्गीय प्रथम चकार वर्णादेश ।

४. **गच्छति।** गम्लृ गतौ (१।२७२) + ति । **"अन् विकरणः कर्तरि"** (३।२।३२) से 'अन्' विकरण, **"गमिष्यमां छः"** (३।६।६९) से म् को छ्, **"द्विर्भावं स्वरपरश्छकारः"** (१।५।१८) से छ् को द्वित्व तथा प्रकृत सूत्र से प्रथम छकार को चवर्गीय प्रथम चकार वर्णादेश ॥२८२।

## २८३. वा विरामे [२।३।६२]

### [सूत्रार्थ]

विराम के विषय में धुट्संज्ञक वर्णों के स्थान में प्रथम अथवा तृतीय वर्ण आदेश होता है ।२८३।

### [दु० वृ०]

विरामे धुटां वर्णानां प्रथमस्तृतीयो वा भवति । विधप्, विधब् । वाक्, वाग् ॥२८३।

### [दु० टी०]

वा वि० । वाशब्द इह समुच्चयार्थो न विकल्पार्थः । विकल्पार्थे हि 'विदभ्नोति' इति क्विपि कृते पक्षे भकारस्य स्थितिः स्यात् । यदि पुनरयं विकल्पार्थः स्यात्, अधिकृतेनैव वाग्रहणेन सिध्यति व्याख्यानतो विशेषार्थप्रतिपत्तेर्वेति **"पदान्ते धुटां प्रथमः"** (३।८।१) इत्यस्यापवादोऽयं **'ज्ञानभुदाश्रयः, ज्ञानभुट्टीकनम्'** इत्यादि, तस्याचरितार्थत्वात् ॥२८३।

### [वि० प०]

वा वि० । प्रथमस्तृतीयो वेति । वाशब्दः समुच्चये । प्रथमो भवति, तृतीयो वेत्यर्थः । यदि पुनर्विकल्पार्थः स्यात् तदा विदभ्नोतीति क्विपि कृते पक्षे भकारस्थितिरपि स्यात्, अस्त्वेतदिति चेद् नैवम् । व्याख्यानतो विशेषार्थप्रतिपत्तेः समुच्चयार्थ एवायं

वाशब्दः । अथवा यदि विकल्पार्थः स्यात् तदा "**मुहादीनां वा**" (२।३।४९) इत्यतो मण्डूकप्लुत्या वाऽधिकाराद् विकल्पो भविष्यति, किमनेनेति । अवश्यं च वाऽधिकारोऽङ्गीकर्तव्यः 'विद्युत्वान्, तडित्वान्' इति सिद्धये । अन्यथा विद्युद् विद्यतेऽस्येति वन्तुप्रत्यये धुटां तृतीय एव स्यात् । ततो वाऽनुवृत्त्या तकारस्य वन्तौ तृतीयो न भवतीति प्रतिपत्तव्यम् । तथोत्तरत्रापि न विसर्गः – 'पयस्वान्, भास्वान्, यशस्वान्, दोष्मान्, अर्चिष्मान्, आयुष्मान्' इत्यत्र घोषवत्यपि रो न भवति, तत्रापि व्यवस्थितविभाषाश्रयणात् । अत इह तसोर्मत्वर्थीय इति च न वक्तव्यं भवति ।२८३।

## [क० च०]

वा वि० । वाशब्दः कार्यमेव समुच्चिनोति न तु निमित्तम्, पूर्वेणैव सिद्धत्वात् । व्याख्यानत इति **पञ्जी** । 'विरामे वा' इत्यकरणादिति **केचित्** । तन्न ! तत्तु प्राक्पठितस्य वाशब्दस्य विकल्पदर्शनात् । यथा "**वाऽसरूपोऽस्त्रियाम्**" (४।२।८) इति । अन्तपाठे तस्यापि समुच्चयार्थो दृश्यते । यथा "**शि न्चौ वा**" (१।४।१३) वेति । **अन्ये** तु वाशब्दस्य विकल्पार्थत्वे तृतीयानुवृत्तिर्न स्यात्, अपि तु प्रथमैव । तदा अघोषे प्रथमे "**वा विरामे**" इति कृतं स्यादित्याहुः । तदप्यसङ्गतम्, एकयोगे सति वाशब्दस्य समुच्चयार्थशङ्काया अनिवार्यत्वात् । **अपरे** तु 'विरामे विभाषया' इत्यकरणात् समुच्चयार्थ एवेत्याहुः ।

तदप्यसङ्गतम् । यदि समुच्चयार्थ एव स्यात् तदा चकारमेव विदध्याद् इत्यस्यापि स्वरत्वात् । तस्मादा**चार्यपारम्पर्य**मेव व्याख्यानमिति । **वस्तुतस्तु** व्याप्तिन्यायादेवात्र व्याख्यानमिति ब्रूमः । अथ किं तद् व्याख्यानमिति अभिसन्धाने कष्टं स्यादित्याह – **अथवेति** । अथ मण्डूकप्लुत्याश्रयणे कष्टं स्यादित्याह – आवश्यकत्वादित्यादि ।।२८३।

**।। इति श्रीविद्याभूषणसुषेणाचार्यशर्मकविराजकृतौ द्वितीये नामचतुष्टयाध्याये तृतीयो युष्मदादिपादः समाप्तः ।।**

**[ समीक्षा ]**

'विधभ् + सि, वाच् + सि' इस अवस्था में पाणिनि तथा शर्ववर्मा दोनों ही आचार्य पवर्गीय प्रथम वर्ण प् एवं कवर्गीय प्रथम वर्ण क् आदेश का विधान करके 'विधप्, वाक्' शब्द निष्पन्न करते हैं। पाणिनि का सूत्र है – **"वाऽवसाने"** (अ० ८।४।५६)। कातन्त्रव्याख्याकार 'वा' शब्द का समुच्चय अर्थ स्वीकार करते हैं, तदनुसार वर्गीय प्रथम – तृतीय वर्ण होकर 'विधप् – विधब्, वाक्-वाग्' ये दो – दो रूप साधु माने जाते हैं। पाणिनीय व्याख्याकार 'वा' को विकल्पार्थक मानते हैं, तदनुसार भी चर्त्व न होने पर पक्ष में **"झलां जशोऽन्ते"** (अ० ८।२।३९) से जश्त्व उपपन्न होता है।

**[ रूपसिद्धि ]**

१. **विधप्, विधब्।** विदभ् + सि। **"हचतुर्थान्त०"** (२।३।५०) से द् को ध् तथा प्रकृत सूत्र से भ् को प् – ब् आदेश।

२. **वाक्, वाग्।** वाच् + सि। **"व्यञ्जनाच्च"** (२।१।४९) से सिप्रत्यय का लोप, **"चवर्गदृगादीनां च"** (२।३।४८) से च् को ग् तथा प्रकृत सूत्र से ग् को क् – ग् आदेश ॥२८३।

## २८४. रेफसोर्विसर्जनीयः [ २।३।६३ ]

**[ सूत्रार्थ ]**

विराम के विषय (शब्दावसान) में, घोष तथा अघोषसंज्ञक वर्ण के परे रहने पर रेफ एवं सकार के स्थान में विसर्ग आदेश होता है ॥२८४।

**[ दु० वृ० ]**

रेफसकारयोर्विसर्जनीयो भवति विरामे = शब्दच्छेदे, घोषवत्यघोषे च। गीः, धूः, वृक्षः, पयोभ्याम्, पयःसु। वाऽधिकाराद् विभक्तिव्यञ्जने रेफस्य न स्यात् – गीर्षु, धूर्षु। भवति च – सजूःषु, आशीःषु ॥२८४।

**[ दु० टी० ]**

रेफ०। विरामो वर्णाभाव इति चेत् तर्हि पूर्वभागेऽपि विरामः स्यात्, 'रसः, सरः' इत्यत्रापि विसर्गप्रसङ्गः। क एवमाह विपूर्वो रमिः स्वभावादारम्भपूर्वके वर्तते

इत्याह – विरामे शब्दच्छेद इति । अश्रुतत्वात् प्रकृतिविराम इति नाशङ्क्यते कथम् अन्यस्मिन् ब्राह्मणकुले विरतानि व्रतानि स्वाध्यायश्चेति । नैवम्, ब्राह्मणजातिम् अपेक्ष्यात्रापि आरम्भपूर्वक एवाभाव इति ब्रूमः । **अथवा** अवसानार्थ एव विरामो **लोके** रूढ इति । ननु व्यवहितयोर्घोषवदघोषयोः कथमनुवर्तनम् ? सत्यम् । **गोयूथनामाधिकारः ।** यथैकस्य गोरनुमार्गेण बहवो गच्छन्ति, तथैकस्याधिकारस्यानुमार्गेण यदा बहवोऽधिकाराः प्रवर्तन्ते स गोयूथ उच्यते । तृतीयप्रथमयोरपवादः सकारस्य विसर्जनीय उच्यते, रेफस्य स्थितिरेव प्राप्ता ।

यद्येवम्, 'पुमान्, विद्वान्' इत्यत्र संयोगान्तलोपात् परो विसर्जनीयः कथन्न भवति ? सत्यम् । व्यवस्थितविभाषार्थो वाशब्द इह प्रतिपत्तव्य एव । तथा च **'पुंस्कोकिलः'** इत्यादौ सन्धौ दर्शितमेव । तथा मत्वर्थे न भवति 'यशस्वान्, पयस्वान्, अर्चिष्मान्, दोष्मान्' इत्यत्र घोषवत्यपि रो न भवति, तत्रापि व्यवस्थितविभाषाश्रयणमिति । तेन तसोस्तसौ मत्वर्थीये न वक्तव्यमिति । वाधिकारादित्यादि । एवं 'वार्-वार्सु, द्वार्-द्वार्सु' । यद्येवं सुपीति वक्तुं युक्तम्, नैवम् । वार्भ्याम्, द्वार्भ्याम् इति विसर्जनीये घोषवति लोपः स्यात् । रप्रकृतिरनामिपरोऽपीति चेत् ? सत्यम् । बहुलम् इत्यनेनाश्रितव्यवस्थितविभाषेयं **सुखप्रतिपत्तिहेतु**रुच्यते ।

'सजूःषु, आशीःषु' इति । एवं 'पिपतीःषु, पिपठीःषु' । रेफाद् विहिते सुपि रेफस्य न विसर्गः । अरेफाद् विहिते भवत्येवेत्यर्थः । कथं 'नृकणोऽपत्यं नार्कणः, नृकणः, नार्कण्यः' इति । अपत्येऽणि ण्ये च आकृतिगणत्वाद् विहिते वृद्धिर्बहिरङ्गा 'असिद्धं बहिरङ्गमन्तरङ्गे' भवति । कथं ददुरो मर्मरो मर्कट इति । एवंभूता एवैते शब्दाः स्वभावसिद्धाः लोकतः इति । अथवा विरामव्यञ्जनादाविति स्मर्यते, स च प्रत्यये एवेति न विरुध्यते ॥२८४।

**[ वि० प० ]**

रेफ० । विरामशब्दः स्वभावादवसाने वर्तते इत्याह – विरामे शब्दच्छेदे शब्दावसाने इति यावत् । ननु कथं तर्हि व्यवस्थितयोर्घोषवदघोषयोरनुवृत्तिः स्यात् ? सत्यम् । गोयूथनामाधिकारोऽयम् । यथा एकस्य गोरनुमार्गेण बहवो गावो गच्छन्ति तद्वदेकस्याधिकारस्यानुमार्गेण यदा बहवोऽधिकारा अनुवर्तन्ते, तदासौ गोयूथनामाधिकारो भवति ॥२८४।

**[समीक्षा]**

'गिर् + सि, धुर् + सि, वृक्ष + सि, पयस् + सुप्' इस अवस्था में शर्ववर्मा रेफ तथा सकार को विसर्गादेश करके 'गीः, धूः, वृक्षः, पयःसु' शब्द निष्पन्न करते हैं। पाणिनि ने केवल रेफ के स्थान में ही विसर्ग का विधान किया है, अतः स् को पहले **"ससजुषो रुः"** (अ० ८।२।६६) से और तब "खरवसानयोर्विसर्जनीयः" (अ० ८।३।१५) से विसर्गादेश प्रवृत्त होता है। इस प्रकार पाणिनीय प्रक्रिया में गौरव ही कहा जा सकता है।

**[रूपसिद्धि]**

१. **गीः**। गिर् + सि। **"व्यञ्जनाच्च"** (२।१।४९) से सिलोप, **"नामिनो र्वोरकुर्छुरोर्व्यञ्जने"** (३।८।१४) से रेफ की उपधा इकार को दीर्घ तथा प्रकृत सूत्र से रेफ को विसर्गादेश।

२. **धूः**। धुर् + सि। पूर्ववत् सिलोप, उकार को दीर्घ तथा प्रकृत सूत्र से रेफ को विसर्गादेश।

३. **वृक्षः**। वृक्ष + सि। प्रकृत सूत्र से स् को विसर्ग।

४. **पयोभ्याम्**। पयस् + भ्याम्। प्रकृत सूत्र से सकार को विसर्ग, **"अघोषवतोश्च"** (१।५।८) से विसर्ग को उ तथा **"उवर्णे ओ"** (१।२।३) से अकार को ओकार – परवर्ती ओकार का लोप।

५. **पयःसु**। पयस् + सुप्। प्रकृत सूत्र से सकार को विसर्गादेश ॥२८४।

## २८५. विरामव्यञ्जनादावुक्तं नपुंसकात् स्यमोर्लोपेऽपि [२।३।६४]

**[सूत्रार्थ]**

विराम के विषय में तथा व्यञ्जनादि प्रत्यय के परे रहते जो जो कार्य पूर्व में किए जा चुके हैं, वे सभी कार्य नपुंसकलिङ्ग वाले शब्दों से 'सि – अम्' प्रत्ययों का लोप होने पर भी सम्पन्न होंगे ॥२८५।

**[दु० वृ०]**

विरामे व्यञ्जनादौ च यदुक्तं कार्यं नपुंसकलिङ्गात् परयोः स्यमोर्लोपेऽपि तद् भवति। श्रुतत्वात् तस्यैव। सुवाक्, सुवाग्, सुपथि, सुविद्वत्, सुपुम्, सुचतुः,

सुद्यु। एवम् उखास्रत्, देवेड् इत्यादयः। अपिग्रहणं व्यभिचारार्थम्, तेन इदमोऽत्वं न स्यात् ॥२८५।

**॥ इति दौर्गसिंह्यां वृत्तौ द्वितीये नामचतुष्टयाध्याये तृतीयः पादः समाप्तः॥**

## [दु० टी०]

विराम०। विरामश्च व्यञ्जनादिश्चेति सत्यपि समाहारद्वन्द्वे नपुंसकलक्षणो न भवति, **सुखनिर्देशात्।** सुवाक्, सुवाग् इति। शोभना वाचो यस्येति विग्रहे **"नपुंसकात् स्यमोर्लोपः"** (२।२।६) परत्वात् न तु व्यञ्जनाच्चेति। ततश्च 'न च तदुक्तम्' इति प्रतिषेधाद् विरामे प्रथमतृतीयावप्राप्तौ। अथ तत्र तयोः स्यमोरुक्तम्, तस्मिन् प्रत्ययलोपलक्षणे चोक्तमित्युच्यते, तथापि व्यञ्जनादावित्युक्ते विरामोक्तस्य बाधां मन्येत मन्दधीरिति विरामग्रहणम्। व्यञ्जनादावुक्तं सर्वथा न स्यादेवेति कार्यस्य शास्त्रस्य चायमतिदेश इति कार्येऽप्यतिदिश्यमाने यस्याः प्रकृतेर्यदुक्तं तस्यास्तदेवेति श्रुतत्वात्। कथं यत् तत् कुलमिति व्यञ्जने त्यदादीनामत्वमुक्तमेव, नैवम्। न हि स्वरव्यञ्जनेषूक्तं व्यञ्जनोक्तं भवति, विशेषनिर्देशात्।

**अन्यः** पुनराह– 'विरामसुभेषु' इति सिद्धे यद् व्यञ्जनग्रहणं तद् व्यञ्जन-शब्दोच्चारितकार्यप्रतिपत्त्यर्थम्। सुपथीत्यादि। ननु कथं प्रकरणान्तरप्रकृतीनां व्यञ्जना-दावुक्तं स्यात्, नैवम्। व्यञ्जनमेवादिर्यस्येति आदिशब्दे व्याप्त्यर्थ इह न विरुध्यते। यदा तु व्यञ्जनादाविति स्मर्यते तदा भूयो व्यञ्जनग्रहणं व्याप्त्यर्थम् **आदिग्रहणं सुखार्थमुक्तम्।** उक्तमन्तरेणातिदेशप्रतिपत्तिर्गरीयसी स्यात्। नपुंसकादिति पञ्चम्या विहितविशेषणमाख्यायते। नपुंसकाद् विहितौ यौ स्यमौ तयोः स्यमोर्लोपे सति तस्यैवेति श्रुतत्वान्नपुंसकस्यैवेत्यर्थः। तेन बहूनि श्रेयांसि यस्य स बहुश्रेयान् इति, अत्र नलोपो न भवति। नपुंसकस्येत्युक्ते नपुंसकान्तस्यापि प्राप्नोति। अथ अमा सहचरितस्य सेर्लोपो गृह्यते इति स पुनर्नपुंसकात् स्यमोर्लोप एव।

यद्येवम्, नपुंसकग्रहणेनापि किम्, पुमानित्यादिषु व्यञ्जनाच्चेति सेर्लोपे व्यञ्जनादावुक्तम्, तन्न भविष्यत्येव ? सत्यम्। **प्रतिपत्तिरियं गरीयसीति।** नपुंसकग्रहणम्, अस्मिंश्च सति विहितविशेषणमपि युक्तम्। विहितविशेषणेन च स्यमोरिति चरितार्थम्, अन्यथा स्यमोर्ग्रहणमनर्थकमेव। स्यमोरित्युक्तेऽपि स्यमोर्लोप इति गम्यते। यच्च

लोपग्रहणं तत् **सुखार्थमेव** ।अपीत्यादि ।"**अद् व्यञ्जनेऽनग्**" (२।३।३५) इति वचनादत्वं प्रसज्येत । ननु पूर्वं तावदयमविशेषणाद् विधिर्बाधितः, स चायं स्त्रियां चरितार्थ इति नपुंसके तदुक्तप्रतिषेधान्न भवति कथं पुनरत्वं प्राप्नोति, '**सकृद् बाधितो विधिर्बाधित एव**' (का० परि० ३६) इति न्यायात्। एवं सति उक्तसमुच्चयमात्रेऽयमपिशब्दः प्रतिपत्तव्यः ॥२८५।

**॥ इति दुर्गसिंहविरचितायां कातन्त्रवृत्तिटीकायां द्वितीये नामचतुष्टयाध्याये तृतीयो युष्मदादिपादः समाप्तः॥**

## [वि० प०)

यद्यपि विरामश्च व्यञ्जनादिश्चेति समाहारत्वान्नपुंसकत्वम्, तथापि "**नामिनः स्वरे**" (२।२।१२) इति नपुंसकलक्षणो नुर्न भवति, सूत्रत्वात्। 'छन्दोवत् सूत्राणि कवयः कुर्वन्ति'।"**नपुंसकात् स्यमोर्लोपेऽपि**" (२।२।६) इति नपुंसकादिति पञ्चम्या विहितविशेषणमुच्यते, नपुंसकाद् यौ विहितौ स्यमौ तयोर्लोपेऽपीत्यर्थः ।तेन नपुंसकान्ताद् विहितयोः स्यमोर्लोपे न भवति , यथा बहूनि श्रेयांसि यस्य स बहुश्रेयानिति । अन्यथा '**येन विधिस्तदन्तस्य**' (का० परि० १) इति न्यायान्नपुंसकान्तस्यापि व्यञ्जनोक्तनकारलोपः स्यात्। अतो विहितविशेषणार्थं नपुंसकादिति पञ्चमीयम्। यद्येवम्। कस्यैतत् कार्यमित्याह – **तस्यैवेति ।** श्रुतत्वान्नपुंसकलिङ्गस्यैवेत्यर्थः ।

'सुवाक्, सुवाग्' इति ।शोभना वाचो यस्य कुलस्येति विग्रहः ।परत्वान्नपुंसकात् स्यमोर्लोपः स्यान्न तु व्यञ्जनाच्चेति । ततो न च तदुक्तमिति प्रतिषेधः स्यात्, विरामे प्रथमतृतीयौ न प्राप्तौ । अतोऽतिदेशसामर्थ्याद् भवतः। ननु कथमत्र तदुक्तप्रतिषेध-प्राप्तिः, यतः प्रत्ययलोपलक्षणन्यायेन प्राप्तस्यैव कार्यस्य प्रतिषेधः। तथाहि तस्मिन् लोपे प्रत्ययलोपलक्षणेनोक्तं तदुक्तमिति **टीकाकृतो**क्तम्। ततो विरामोक्तं कार्यं तदुक्तप्रतिषेधाभावादेव भविष्यति किं विरामग्रहणेन । नैतदेवम् । यत्र हि प्रत्यये यत् कार्यं क्रियते तत्र स्यमोर्लोपे प्रत्ययस्याभावात् तत् कार्यं प्रत्ययलोपलक्षणेन प्राप्नोति । तत्र प्रत्ययलोपलक्षणन्यायेनैव प्राप्तस्य कार्यस्य प्रतिषेधः । यथा तदित्यत्र त्यदाद्यत्वस्य, यत्र तु निमित्तं नापेक्षते तत्र हि विरामविहितस्य कार्यस्य स्यमोर्लोपे सत्येवोक्तत्वात्। तस्मिन् लोपे उक्तं तदुक्तमिति प्रतिषेधः स्यादेव। नहि तत्र विशेषोऽस्ति, येन प्रत्ययलोपलक्षणेन प्राप्तस्यैव प्रतिषेध इति ।

यत् पुनरुक्तं तस्मिन् लोपे प्रत्ययलोपलक्षणेनोक्तं तदुक्तमिति तदुपलक्षणं वेदितव्यम् । प्रत्ययलोपलक्षणादिनोक्तमित्यर्थः । किं च यदि विरामग्रहणं न स्यात् तदा व्यञ्जनादावुक्तमित्युक्ते विरामोक्तकार्यस्य बाधनं स्याद् इति मन्यते **मन्दधी**रिति विराम-ग्रहणम् । इह व्यञ्जनादावुक्तमिति सर्वथा न प्राप्नोति इति व्यञ्जनग्रहणम् । सुपथीत्यादि । शोभनाः पन्थानो यस्य कुलस्येति विग्रहे **"व्यञ्जने चैषां निः, विरामव्यञ्जनादिष्वनडुन्नहि-वन्सीनां च, पुंसोऽनूशब्दलोपः, चतुरो वाशब्दस्योत्वम्, दिव उद् व्यञ्जने"** (२।२।३८; ३।४४; २।४०, ४१, २५) इत्येतैर्नलोपादीनि कार्याणि व्यञ्जनोक्तानि भवन्ति । एवमिति । उखायाः स्रंसते, देवेभ्यो यजति कुलम् इति क्विप् **"स्रसिध्वसोश्च"** (२।३।४५) इति, **"हशषछान्तेजादीनां डः"** (२।३।४६) इति विरामव्यञ्जनादौ दकारडकारौ भवतः । इदमत्वं न स्यादिति **"अद् व्यञ्जनेऽनक्"** (२।३।३५) इति व्यञ्जनोक्तम्, इदमोऽदादेशो न स्यादित्यर्थः ॥२८४।

**॥ इति त्रिलोचनदासकृतायां कातन्त्रवृत्तिपञ्जिकायां द्वितीये नामचतुष्टयाध्याये तृतीयो युष्मदादिपादः समाप्तः ॥**

### [ समीक्षा ]

'पयः, तत्, सुसखि' आदि के सिद्ध्यर्थ 'सि - अम्' प्रत्ययों का लोप हो जाने पर प्रत्ययलक्षण मानकर संभाव्य कार्यों का प्रतिषेध किया गया है – **"नपुंसकात् स्यमोर्लोपो न च तदुक्तम्"** (२।२।६) सूत्र द्वारा, परन्तु 'सुवाक्, सुपथि, सुविद्वत्, सुपुम्, सुचतुः, सुद्यु' आदि के सिद्ध्यर्थ प्रत्ययलक्षण की आवश्यकता है । अन्यथा च् को ग्, वा को उ – आदेश आदि कार्य सम्पन्न नहीं होंगे – इसी के सम्पादनार्थ प्रकृत सूत्र द्वारा **'नपुंसकात् स्यमोर्लोपेऽपि'** निर्देश किया गया है । पाणिनीय व्याकरण में **"न लुमताऽङ्गस्य"** (अ० १।१।६३) से अभीष्ट स्थलों के लिए प्रत्ययलक्षण का निषेध किया है । उनसे अतिरिक्त स्थलों में प्रत्ययलक्षण होता ही है ।

### [ रूपसिद्धि ]

१. **सुवाक्, सुवाग्।** सुवाच् (नपुं० लि०) + सि, अम् । शोभना वाग् यस्य कुलस्य तत् । **"व्यञ्जनाच्च"** (२।१।४९) से सि - अम् प्रत्ययों का लोप, उनका प्रत्ययलक्षण (अतिदेश), **"चवर्गदृगादीनां च"** (२।३।४८) से च् को ग् तथा **"वा विरामे"** (२।३।६२) द्वारा विकल्प से ग् को क् आदेश ।

२. **सुपथि।** सुपन्थि (नपुं० लि०)+सि, अम्। शोभनः पन्था यस्य कुलस्य तत्। पूर्ववत् सि–अम् का लोप, उनका प्रत्ययलक्षण (अतिदेश) तथा **"व्यञ्जने चैषां निः"** (२।२।३८) से नलोप।

३. **सुविद्वत्।** सुविद्वन्स् (नपुं० लि०)+सि, अम्। शोभना विद्वांसो यस्य कुलस्य तत्।पूर्ववत् सि–अम् का लोप, उनका प्रत्ययलक्षण (अतिदेश), **"अनुषङ्गश्चाक्रुञ्चेत्"** (२।२।३९) से नलोप, **"विरामव्यञ्जनादिष्वनडुन्नहिवन्तीनां च"** (२।३।४४) से स् को द् तथा **"वा विरामे"** (२।३।६२) से द् को त्।

४. **सुपुम्।** सुपुमन्स् (नपुं० लि०)+सि, अम्। शोभनाः पुमांसो यस्य कुलस्य तत्। पूर्ववत् सि–अम् का लोप, उनका प्रत्ययलक्षण, **"पुंसोऽनूशब्दलोपः"** (२।२।४०) से अन् का लोप तथा **"संयोगान्तस्य लोपः"** (२।३।५४) से सकार का लोप।

५. **सुचतुः।** सुचत्वार् (नपुं० लि०)+सि, अम्। शोभनाश्चत्वारो यस्य कुलस्य तत्। पूर्ववत् सि–अम् का लोप, उनका प्रत्ययलक्षण, **"चतुरो वाशब्दस्योत्वम्"** (२।२।४१) से वा को उ तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से रेफ को विसर्ग आदेश।

६. **सुद्यु।** सुदिव् (नपुं० लि०)+सि, अम्। शोभना द्यौर्यस्य कुलस्य तत्। पूर्ववत् सि-अम् का लोप, प्रत्ययलक्षण, "दिव उद् व्यञ्जने" (२।२।२५) से व् को उ तथा इ को य् आदेश।

७. **उखास्रत्, उखास्रद्।** उखास्रस् (नपुं० लि०)+सि, अम्। पूर्ववत् सि-अम् का लोप, प्रत्ययलक्षण, **"स्रसिध्वसोश्च"** (२।३।४५) से स् को द् तथा "वा विरामे" (२।३।६२) से द् को त् आदेश।

८. **देवेट्, देवेड्।** देवेज् (नपुं० लि)+सि, अम्। देवान् यजति। पूर्ववत् सि-अम् का लोप, प्रत्ययलक्षण, **"हशषछान्तेजादीनां डः"** (२।३।४६) से ज् को ड् तथा **"वा विरामे"** (२।३।६२) से ड् को वैकल्पिक ट् आदेश ॥२८५।

**॥ इत्याचार्यशर्ववर्मप्रणीतस्य कातन्त्रव्याकरणस्य द्वितीये नामचतुष्टयाध्याये समीक्षात्मकस्तृतीयो युष्मदादिपादः समाप्तः॥**

॥श्रीः॥

## परिशिष्टम् – १

### आचार्यश्रीप्रतिदत्तप्रणीतम्

# कातन्त्रपरिशिष्टम्

## नामप्रकरणम्

### १. धातुः

इह लिङ्गसंज्ञाविधौ न किञ्चित् परिशिष्यते। तथा ह्यर्थवद् इति सतोऽसतो वाऽर्थस्याभिधायकमुच्यते। तच्च विशिष्टमिह गृह्यते। यस्येतरनिरपेक्षयाभिधान-शक्तिरस्ति, तदिहार्थवत्त्वस्येयं संज्ञा। अन्यथा धातुविभक्तिवर्जमर्थे लिङ्गमिति कृतं स्यात्। प्रत्ययास्तु नियोगतः प्रकृतीरनुगच्छन्तस्तदर्थानपेक्ष्यैव स्वार्थानभिदधानाः कथमनपेक्षतया अर्थवन्तः स्युः। विभक्तिवर्जनं तु तदन्तार्थम्। विकरणागमयणाद-यस्त्वनर्थका एव सत्स्वपि हि तेषु प्रकृतिप्रत्ययाभ्यामधिकार्थाप्रतीतेः, तत् कथं बहुचि विकरणादौ चास्याः प्रसङ्गः। किञ्च एकदेशात् समुदायः प्रधानं तत्रैव ज्यायसी शास्त्रप्रवृत्तिरिति कुतोऽन्यत्र प्रसङ्गः। तथा च **'अवयवसिद्धेः समुदायसिद्धि-र्बलीयसी'** (व्या० प० पा० १०८) इति वार्त्तिकम्। एवमपि विभक्तिवर्जनं पूर्ववत्। अर्थवद्ग्रहणं तु इहानर्थकस्यैवानुकरणस्य निषेधार्थम्। एतेनापदस्यानुकरणस्य प्रयोगः साधीयानित्याचार्येणावेदितम्, यथा गवित्ययमाहेति। ऐकान्तिकी चेहाचार्य-प्रवृत्तिर्ज्ञापयति – वाक्यस्य नेयं संज्ञति।

अथवा नञा सिद्धेर्यद् वर्जग्रहणं तद् वर्जनीयस्याधिक्यसूचनार्थम्। भवत्यक्षरा-धिक्यादर्थाधिक्यमिति **वृद्धाः** स्मरन्ति, तेन वाक्यस्यापीह प्रतिषेध इति। अनर्थ-केभ्यस्तु निपातेभ्योऽव्ययगणे पाठाद् भिन्नवाक्यतायामपि विभक्तयः समर्थनीयाः।

अन्यथा अव्ययगणे तेषामुपदेशोऽनर्थकः स्यात्। अनर्थकानामकृप्रत्ययोऽपि हि नास्तीति। एकवाक्यतायां तु अव्ययमात्रात् स्यादयो ज्ञाप्यन्ते। नन्वेकवाक्यतायां पारिशेष्यादेव वृक्षादिभ्यः स्यादयो भविष्यन्ति न धातुभ्यो नानर्थकेभ्य एकत्वादि-विरहात्। नापि पदेभ्य एकत्वादेरभिहितत्वात्। ततश्च नलोपादिविधौ स्यादिप्रकृते-रित्युक्तेऽप्यभिमतं सिध्यति किमनया संज्ञया ? नैवं वाक्यार्थस्यैकत्वस्यापह्नोतुम-शक्यत्वात्, वाक्यादपि प्रथमैकवचनं स्यात्, वर्जग्रहणस्याभावात्। किञ्चाभिहितमपि संख्यानं वचनान्यनुवर्तन्ते। यथा – एकब्राह्मणः, त्रिचतुराः, सप्तर्षयः, पञ्चाम्राः। ततश्च पचति, पचतः, पचन्तीति कुतो न तान्यनुवर्तन्ते।

किञ्चाभिहितेऽपि संख्याने भवत्येकवचनमौत्सर्गिकम्। यथा पचतिरूपम्, पचतोरूपम्, पचन्तिरूपमिति, एवं स्याद्यन्तादपि स्यात्। किञ्च लुनीहि लुनीहीत्यादौ संख्या तिरोहितेति तदभिव्यक्तये ह्यन्तरङ्गाः स्यादयो भवितुमर्हन्तीति। किञ्च 'स्थीयते, भूयते' इत्यादौ आख्यातैकवचनवद् धात्वर्थमात्रे विवक्षिते धातोरप्येकवचनं स्यात्। भिन्नवाक्यतायां तु निपातादिव निरर्थकादपि पदादपि वाक्यादपि बाधकान-वसरे धातोरपि स्यादयः प्रसज्येरन्। भिन्नवाक्यता चाव्ययेभ्यः स्याद्युत्पत्त्यर्थमवश्य-मिहाश्रयणीया। ज्ञापकात् तेभ्यः स्यादय इति चेत् ज्ञापकेन किमिह प्रत्याख्यातुम-शक्यम्। ईषदसमाप्तौ नाम्नः प्राग् बहुजिति तमादिनिपातनेऽवश्यमिह मन्तव्यम्। बहुजर्थेन बहुना नाम्ना कर्मधारये बहुपत्येति अग्नित्वं स्यात्। बहुराजा, बहुसखा, बहुगौः, बहुपन्थाः, बहुधूरित्यादौ समासान्तोऽत् स्यात्। वीरबहुबाहुना, वीरबहुकायेन, वीरबहुमेघेनेति पदव्यवाये णत्वं न स्यात्। बह्वयस्कुशा, बह्वयस्कर्णिरित्युत्तरपदस्थ-त्वात् सत्वं न स्यात्। बहुसर्पिष्कुण्डिका, बहुधनुष्कुलम् इत्युत्तरपदस्थत्वाद् इसुसोः षत्वमनित्यं स्यात्। बहुदण्डी, बहुपयस्वी, बहुलक्ष्मीवान् इति कर्मधारयादिनादिरपि न स्यात् ? बहुजर्थे बहुरिति भाष्याद् बहुजर्थेन बहुना कर्मधारये बहुपतिनेत्यादिना बहुनृत्यति, बहुगायतीत्यादिना च भवितव्यमिति लक्ष्यते। तथापि बहुपत्येत्यादि उदाहृतरूपसिद्ध्यर्थं बहुज्विधानं कर्तव्यमेव ॥१॥

## २. सर्वनाम

आसंज्ञान्तरं संज्ञात्वेनेदमधिक्रियते ॥२॥

## ३. असंज्ञोपसर्जनं सर्वादिः

असंज्ञानुपसर्जनं च सर्वादिः सर्वनामसंज्ञो भवति । परिसंख्यातोऽ**यमाचार्यैः।** अन्यतमस्त्विह गणे न पठ्यते । अन्यतमस्मिन्निति च **शिक्षायुर्वेदादिषु** च दृश्यते । **कीर्तिना** द्वयमपि गणेऽत्र पठितमेव । असंज्ञेति किम् ? सर्वाय च्छात्राय । अनुपसर्जनमिति किम् ? प्रियसर्वाय, अतिसर्वाय । तदन्तस्यैवायं प्रतिषेधः । बहुव्रीहाविति वचनन्त्व-तदन्तार्थम् । तेन 'त्वकत्पुत्रः, मकत्पुत्रः' इत्युपसर्जनेऽपि सर्वनामत्वं स्यात् ।। ३ ।

## ४. पूर्वादिर्व्यवस्थायाम्

अवधिमत्तावश्यकं **व्यवस्था ।** तस्यामसंज्ञोपसर्जनं पूर्वादिः सर्वनामसंज्ञो भवति । पूर्वस्मै, परस्मै ग्रामाय । व्यवस्थायामिति किम् ? पूर्वाय, प्रतीताय । दक्षिणाय, प्रवीणाय ।। ४ ।

## ५. स्वमज्ञातिवित्ताख्या

न चेज्ज्ञातिवित्तयोराख्याभूतं स्वं सर्वनाम भवति । स्वस्मै हितम्, स्वस्मै ग्रामाय । अज्ञातिवित्ताख्या इति किम् ? स्वाय ज्ञातये, वित्ताय वेत्यर्थः । आख्याग्रहणं पर्यायत्वार्थम् । इह स्यादेव – स्वस्मै ज्ञातये, स्वस्मै वित्ताय । तुल्यादिकरणत्वादिहापि ज्ञातिवित्तयोः स्वं वर्तत एव ।। ५ ।

## ६. अन्तरमुपसंव्याने बहिर्पुरि

वस्त्रेणावृतं परिधान**मुपसंव्यानम्,** तत्र वहिरर्थे च पुरोऽन्यत्रान्तरं सर्वनाम भवति । अन्तरस्मै वस्त्राय, अन्तरस्मै गृहाय । अनयोरिति किम् ? ग्रामयोरन्तरे तडागः । अपुरीति किम् ? अन्तरायां पुरि, अन्तरे नगरे । एनोऽपि नपुंसकमन्यादौ मन्तव्यः । इदमानय, अथो एनत् परिवर्तय । नपुंसकैकवचने एनदिति वार्त्तिकम् । **अपरे** तु एनदिति सूत्र एव पठन्ति। तत्र त्यदाद्यत्वाभावे तश्रुतिरेव स्यात् ।। ६ ।

## ७. वा तीयो ङवत्सु

तीयप्रत्ययान्तं ङवत्सु सर्वनाम भवति वा । द्वितीयस्मै, द्वितीयाय । तृतीयस्मै, तृतीयाय । अकि च द्वितीयकस्मै, तृतीयकस्मै । कप्रत्यये तु न स्मैप्रभृतयः स्युः ।। ७ ।

## ८. सुभोः पदम्

सुपि भादौ स्यादौ च लिङ्गं पदसंज्ञं भवति । सुकन्सु, सुकन्भ्याम् । प्रशान्सु, प्रशान्भ्याम् । नानुस्वारः । पुंभ्याम्, पुम्भ्याम् । पञ्चमो वा स्यात् । मूर्धन्यस्तु पदादप्यपदादेः स्यादेव । गिरिषु, वाक्षु । कथं सर्पिष्षु ? षान्तरवचनात् सुपि षोऽनुमीयते ॥८ ।

## ९. न यस्वरे प्रत्यये

यादौ स्वरादौ च प्रत्यये विभक्त्यन्तं पदसंज्ञं न भवति । समिध्यम्, तडित्यम्, कर्मण्यम् , हविष्यम् । न प्रथमतृतीयौ णत्वषत्वे च स्याताम् । स्वरे च वैक्रुधम्, ताडितम्, पार्वणम्, वैदुषम् । 'त्वचयति, क्षुधयति' इत्यपि भवदीयमिति वक्ष्यते । यस्वर इति किम् ? सर्पिष्यात्, मृन्मयम् । पुंवत् षो न स्यात्, पञ्चमोऽनुस्वारश्च स्यादेव ॥९।

## १०. समानोऽग्निवदमृशसोः

समानसंज्ञकोऽमृशसोः परयोरग्निवद् भवति । यत्राग्निविधिरसिद्धो यत्र चापवादाप्रसङ्गस्तत्रायं विधिः । वातप्रमीमिमम्, वातप्रमीन् । ईरयमौणादिकः । स्त्रियां वातप्रमीम्, वातप्रमीरिति नदीत्वात् । यथा हे वातप्रमि, वातप्रम्यै, वातप्रमीणामिति । कर्कन्धूमिमम्, कर्कन्धूनिति चेच्छन्ति । ऊरयमौणादिकः । धात्वनुकरणस्य च चितीम्पठति, गुपूम्पठति । वर्णग्रहणे च – ईम्पठति, ऊम्पठति, यत्रोपसर्जनं नदी तत्रापि विधिरयमिति मतम् । सुप्रेयसीन्, अतितन्त्रीन्, अतिवधून् । धात्ववयवस्य तु नद्या अनद्याश्चाम्शसोर्धातुविधिरेव । यवल्वम्, यवल्वः । पुनर्भ्वम्, पुनर्भ्वः (पश्य) । न हि **तन्त्रान्तरे** धात्ववयवस्य नदीत्वेऽमृशसोर्विधिभेदोऽस्ति । पुनर्भ्वम् इत्युदाहृतं च **पारायणतन्त्रप्रदीपादौ ।** वर्षाभूम्, वर्षाभूरिति सिद्धये युक्तयस्त्वाम्नायविरोधिन्यो नोपकारिण्यः । ऋदॣवर्णान्ताश्चास्य विषयाः । स्तॄं पठ, स्तॄन् पठ । गम्ॡं पठ, गम्ॡन् पठ ॥१०।

## ११. न समासे पुंसि ह्रस्वेयुवृ नदी

पुंलिङ्गे समासे उपसर्जनं ह्रस्वेयुवृस्थानं नदी न भवति । सुमतये, सुधेनवे छात्राय । भूरिश्रियाम्, बभ्रुभ्रुवां यूनाम् । भूरिश्रिये, बभ्रुभ्रुवे यूने । समुदाये मत्यादीनां स्त्र्याख्यत्वात् प्रसङ्गः । यथा – अतितन्त्र्यै, अतिवध्वै यूने । उक्तं हि **भाष्ये** – सिद्धं

त्ववयवस्त्रीत्वादिति । पुंसीति किम् ? सुमत्यै, सुमतये । सुधेन्वै, सुधेनवे । भूरिश्रियै, भूरिश्रियै । बभ्रुभ्रुवै, बभ्रुभ्रुवे स्त्रियै । भूरिश्रीणाम्, भूरिश्रियाम् । बभ्रुभ्रूणाम्, बभ्रुभ्रुवां स्त्रीणामिति ।

**भाष्ये**ऽप्युक्तम् – समासेऽस्त्रीवचन एव आमृङवदाश्रया विभाषेति । निषेधोऽयमामृङवदाश्रयस्य विकल्पस्यैव । नित्यनदीत्वस्य तू नदीवद्भावादेव निवृत्तिः सिद्धा । हे भूरिश्रीः, हे बभ्रुभ्रूः । **'जाता सुभ्रु ! मनोरमे ! तव दशा'** इति **रुद्रटस्य** तु सामान्योपक्रमेण स्यात् । यथा **"विहर मया सह भीरु ! कानननानि"** (वा० रा० ५/२०/३६) इति **वाल्मीकेः ।** नहि भीरोरुङस्मार्त इति सामान्योपक्रमश्चायम् । **"शक्यं श्वमांसादिभिरपि क्षुत् प्रतिहन्तुम्"** (पस्पशा०, पृ० ४६) इति समाधये **भाष्ये**ऽपीष्ट एव ॥११ ।

## १२. एदोद्भ्यां लुक् संबुद्धेः

एदोद्भ्यां परस्य संबुद्धेर्लुग् भवति । सेवतेर्विचि हे से, देवतेश्च– हे दे । **भाष्यचान्द्र**योस्तु वान्ताद् धातोर्विजप्रमाणम् । कथमन्यथा य्वोर्लोपे वग्रहणं प्रत्याख्यातम् । भाष्येऽप्युक्तम् **'वकारस्योदाहरणं नास्ति'** इति । **चन्द्रगोमिना "यो वलि लोपः"** (चा० व्या० ५/१/६३) इति प्रणीतम् । ईङः क्विप् चेत् हे उपे, महान् हेः कामोऽस्य हे महे । वेङः क्विपि ऊः महान् ऊः हे महो । उः शम्भुः, स्मृतः उर्येन हे स्मृतो । इह औत्वं नास्ति । गोरुपलक्षणं हि द्योरेव औणादिकसादृश्यात् । उक्तं हि **भाष्ये**– "द्योशब्दादपि सुड् वृद्धिनिमित्तमिष्यते । गोद्यवोरिति च **संग्रहकारः** पठति । अमृशसोरात्वे त्वोदन्तमात्रोपलक्षणमाश्रयणीयम् । महाँ, महाः । स्मृताँ, स्मृताः पश्य । गोश्चेति गुणोपलक्षणत्वादेदोद्भ्यां ङसिङसोरलोपश्च स्यात्– महेः, महेः । स्मृतोः, स्मृतोः । ऌतः संबुद्धिजसोरलिष्यते हे पठितशकल्, हे पठितशकल एते ॥१२ ।

## १३. क्रुशस्तुनस्तृस्त्र्यसंबुद्धिघुटोः

क्रुशेः परस्य पुनः स्त्रियामसंवुद्धिघुटि च त्रादेशो भवति । क्रोष्ट्री, क्रोष्ट्रूनतिक्रान्ता अतिक्रोष्ट्री । पञ्चभिः क्रोष्ट्रीभिः क्रीतं पञ्चक्रोष्ट्र । लुगणादिलुकीति स्त्रीप्रत्ययस्य लुक् । घुटि च क्रोष्टा, क्रोष्टारौ, क्रोष्टारः । बहुक्रोष्टृणि वनानि । को न स्यात्– असिद्धत्वात् । असंबुद्धाविति किम् ? हे क्रोष्टो ! तृचा सिद्धं चेत् स्त्रियामसंवुद्धिघुटि च पुनः श्रुतिर्दुर्निवारा ॥१३ ।

## १४. वा टादौ स्वरे

टादौ स्वरे क्रुशस्तुनस्त्रादेशो भवति वा । क्रोष्ट्रा, क्रोष्टुना । क्रोष्ट्रे, क्रोष्टवे । क्रोष्टुः, क्रोष्टोः । क्रोष्टरि, क्रोष्टौ । क्रोष्टूनाम् इत्यादेशादागमविधिर्बलवान् । टादाविति किम् ? क्रोष्टून् । स्वर इति किम् ? क्रोष्टुभ्याम् । तृचा तुना सिद्धे व्यावृत्तिविषये मृगे तृजन्तनिवृत्त्यर्थमिदम् । वावचनानर्थक्यं स्वभावसिद्धत्वादिति । **वार्त्तिके** स्वभावादेतत् सिद्धम् । टादौ स्वरे तृजन्तं तुनन्तं च मृगवाचीति । **भाष्ये** च स्वभावसिद्धत्वमाश्रित्य प्रत्याख्यातमिदम्, किन्तु स्वभावाश्रयणेन किमिह प्रत्याख्यातुमशक्यम् । क्रोष्ट्रृन् इत्य**पाणिनीयत्वाद् अशाकटायनीयत्वाच्च विरुद्धम्** ।।१४।

## १५. अघुटि मासनिशयोर्मास्निशौ

अघुटि स्यादौ मासनिशयोर्मास्निशौ भ्वतो वा यथासङ्ख्यम् । मासः, मासान् । मासा, मासेन । माभ्याम् विसर्जनीयस्य लुक् । मासाभ्याम् । मासि, मासे । माःसु, मासेषु । निशः, निशाः । निशां, निशया । निशि, निशायाम् । निज्भ्याम्, निशाभ्याम् । निच्शु, निशासु । इह घोषवति शस्य तृतीयोऽघोषे च प्रथम इति व्याख्यातमेव । व्यञ्जने शस्य चवर्गपरिणामः **पारायणतन्त्रप्रदीपादावुक्तो** धात्ववयवस्यैव शस्य टवर्गपरिणामत्वात्, यत्तु निशिति प्रकृत्यन्तरं त्रिकाण्डशेषादौ पठ्यते तस्य डत्वमेव – निड्भिरिति । कथमाशब्दस्य विरिञ्च्यर्थस्य एदेहि । अःपुत्रः । स्मृताशब्दस्य स्मृते देहि । स्मृतः पुत्रः । हाहाशब्दस्य चाव्युत्पत्तौ हाहे देहि, हाहः पुत्रः ? सत्यम् । आधातोरिति धातुग्रहणम् अश्रद्धोपलक्षणम् इति प्रतिपत्तव्यम् । स्त्रियामातोऽन्यस्यातो लोप इति **वार्त्तिकम्** ।।१५।

## १६. पादहृदययूषदोषां पद्हृद्यूषन्दोषणः

अघुटि स्यादौ पादादीनां पदादयो यथासंख्यं भवन्ति वा । पदः, पादान् आरूढस्य । पद्भ्याम्, पादाभ्यां श्लोकस्य । पदी, दीर्घपादे वृत्ते । पदां चतुर्णामपि चादिमध्ययोः । हृदा, हृदयेन जघ्ने । हृदि, हृदये लोमानि । "हृदि विद्ध इवात्यर्थं मया संतप्यते जनः" । यूष्णः, यूषान् । यूषैः, यूष्णभिः । बहुयूष्णी, बहुयूषे पात्रे । "**निस्तुषस्यास्य मुद्गस्य पीते यूष्णि निरामयः**" । दोष्णः, दोषः, दोषभ्याम्, दोर्भ्याम् । दीर्घदोष्णी, दीर्घदोषी कुले । निष्पष्टदोष्णः । "**दोष्णां बलान्मन्त्रबलं गरीयः**" । **भागवृत्तिकृता** छान्दसं वचनम्

इत्यभ्युपगतम् । न तन्मतमाद्यानां वृत्तिकृताम्, न च **चान्द्रस्य। स्मार्ताश्च** भाषायामपि प्रयुक्तवन्तः । मनश्चरणयोस्तु हृत्पच्छब्दौ प्रकृत्यन्तरे धुट्यपि स्तः । शस्प्रभृतिष्वित्याचार्यः । शसादाविति **चन्द्रश्च** पठति, तयोर्नपुंसकादीकारे न भवितव्यमिति मतम् ॥१६।

## १७. मातृकस्य ऋदादेरत् पुत्रस्तुतौ संबुद्धौ

संबुद्धौ परतो मातृकस्य ऋदादेरवयवस्य पुत्रस्तुतावद् भवति । हे गार्गीमात ! हे वात्सीमात ! पुत्रेति किम् ? हे गार्गीमातृके कन्ये । स्तुताविति किम् ? अरे दासीमातृक ! संबुद्धाविति किम् ? गार्गीमातृकः ॥१७।

## १८. वोशनसो नः

उशनसोऽन्तस्य नकारो भवति वा सम्बुद्धौ । हे उशनन् ! हे उशनः ॥१८।

## १९. नलोपो नपुंसकस्य च

नपुंसकस्य उशनसश्च संबुद्धौ नस्य लोपो भवति वा । हे साम, हे सामन् । हे दाम, हे दामन् । हे उशन, हे उशनन् ॥१९।

## २०. गुणोऽपथ्यादेः

अपथ्यादेर्नपुंसकस्य नाम्यन्तस्य संबुद्धौ गुणो वा भवति । हे वारि ! हे वारे ! हे त्रपो ! हे त्रपु । हे कर्तः, हे कर्तृ । हे शकल्, हे शकॢ । ॡतोऽप्यल् इति **माध्यन्दिनीयाः। भाष्ये** तु त्रपुशब्दस्यैव गुणोऽयमिष्यते । अपथ्यादेरिति किम् ? हे सुपथि, हे सुमथि, हे अनृभुक्षि कुलेति । हे सुपथिन्, हे सुमथिन्, हे अनृभुक्षिन् इति चेच्छन्ति । आचारे पथ्यादेर्नुश्चेति वक्ष्यति पथेनति, मथेनति, ऋभुक्षेणति । यणि च पथिन्यते, मथिन्यते, ऋभुक्षिण्यते ॥२०।

## २१. स्त्रीत्रिचतुरन्तस्य स्यमोस्तिसृ चतसृ

ये स्त्रियां त्रिचतुरी तदन्तस्य नपुंसकस्य स्यमोस्तिसृ - चतसृ इत्येतौ भवतो वा । प्रियतिसृ, प्रियचतसृ, प्रियत्रि, प्रियचतुः कुलम् । केचिद् इह विकल्पं नेच्छन्ति । तदुक्तं **भाष्यकृता – "लुक्यङ्गकार्यं निषिध्यते, स्यमोर्लुक्यनङ्गकार्यत्वात् तिसृ चतसृ न नित्यम्"** इति । नाम्यन्तचतुरां वा तदुक्तम् इत्युक्तौ 'सुपथि कुलम्' इत्यात्वम्, 'सुसखि कुलम्'

इत्यन्, हे प्रियचतुः कुलेति ह्रस्वश्च स्यात् । हे कर्तः कुलेत्यर् च न स्यात्, अघुट्त्वादात्वमपि कर्त्रादीनां सिलोपनिरपेक्षत्वात्, तदिह तैः प्रतिविधातव्यम् इति ॥२१।

## २२. शौ वा बहूर्ज्जो जः प्राङ् नुः

बहूर्ज्जो जकारात् प्राक् शौ परतो नुरागमो भवति वा । बहूर्ञ्जि, बहूर्ज्जि कुलानि । शाविति किम् ? बहूर्ञ्जि राजन्यके । बहुग्रहणं किम् ? अल्पूर्ञ्जि, निरूर्ञ्जि कुलानि । **ये** त्वन्तस्थानुनासिकोपधस्यापि धुडन्तस्य शौ परतो नुम् इच्छन्ति, तेषामपि सुवल्गीत्यादिवदन्त्यस्वरात् प्राप्तस्य निषेधे विकल्पोऽयम् । **तन्त्रान्तरेऽपि** जकारात् प्रागेवात्र नुरागमः । तदुक्तं बहूर्ज्जोऽन्त्यात् पूर्वं नुमिच्छन्ति । अन्यत्र मस्जो जात् पूर्वम् इत्यधिकारे विधिरयम् । **वार्त्तिके** तु बहूर्ञ्जि प्रतिषेध एव । पृषन्त् – बृहन्त् – महन्त् – जगन्तः सानुषङ्गा एव प्रकृतयः । सजन् पृषन् वायुः । स्थूलपृषती वृष्टिः । जितजगन् जगन् वाति । वायौ पुंस्ययम् । जगती, प्रियजगतीति अनन्तत्वादी । क्विबन्तस्य तु पुंस्यपि जगदित्येव **स्मार्तः** ॥२२।

## २३. शुन्योपशुनयोरुद्वनस्तद्धिते

'शुन्य – उपशुन'इत्यत्रैव तद्धिते वनन्तस्योद् भवति । शुने हितं शुन्यम्, बाहुलको दीर्घः – शून्यम् । शुनः समीपम् उपशुनम् । अतः साहचर्याद् यतोग्रहणमिह न स्यात् । शुनि साधु शुन्यम् । नियमः किम् ? शौवनम् । यौवनम् । वन इति किम् ? वैदुष्यम् । तद्धित इति किम् ? शुनी ॥२३।

## २४. ऋतोर्यि

ऋकारस्य तद्धिते ये परे रेफो भवति । कत्र्यम्, पित्र्यम् ॥२४।

## २५. तत्राघुट्स्वरवदेव

तत्र तद्धिते यकारेऽघुट्स्वरवदेव कार्यं भवति । वैदुष्यम्, प्राष्ठौह्यम्, प्रातीच्यम्, तैरश्च्यम्, औदीच्यम्, वैयाघ्रपद्यम् । वन्सेरुत्, **वाहेरौदन्वेरलोप**ः पूर्वदीर्घता । तिरश्च्युदीची पादः पत् तद्धिते येऽतिदिश्यते । नियमः किम् ? व्यञ्जनकार्यं मा भूत् । अनडुह्यम्, मधुलिह्यम्, गोदुह्यम्, गिर्यम्, धुर्यम्, पयस्यम्, दिव्यम् ।

**विसर्गान्तो दकारादिरादेशो व्यञ्जनाश्रितः।**

**उदुविधिश्च दिवो वस्य तद्धिते ये निषिध्यते॥ २५।**

## २६. तद्वत् तसोर्मन्त्वर्थे

तकारसकारयोर्मन्त्वर्थे प्रत्यये तद्धितयकारवत् कार्यं भवति। गरुत्वान्, मरुत्वान्, विद्युत्वान्। इहापदत्वमतिदिश्यते – पयस्वान्, तेजस्वान्, रजस्वल इह विसर्गाभावः। विदुष्मतीति संसत्, पेचुष्मान् ग्रामः। इह वस्योत्वमपदान्तत्वे मूर्धन्यश्च। तयोरिति किम् ? स्रग्वी, समिद्वान। मन्त्वर्थ इति किम् ? मरुद्वत्, सर्पिर्वत् ॥२६।

## २७. राजन्वानर्हे

अर्हे प्रशंसायां वन्तौ राजन्वान् भवति। राजन्वान् देशः। राजन्वती पूः। अर्हे इति किम् ? राजवन्तस्त्रिगर्ताः। राजवती पल्ली ॥२७।

## २८. चर्मण्वत्याख्यायाम्

संज्ञायां चर्मण्वती भवति। चर्मण्वती नाम नदी कदली च। आख्यायामिति किम् ? चर्मवती शाला ॥२८।

## २९. वत्यङ्गिरोनभोमनुषाम्

एषां वतिप्रत्यये तद्धितयकारवत् कार्यं भवति। अङ्गिरा इव अङ्गिरस्वत्, नभस्वत्, मनुष्वत्। वतीति किम् ? नभोरूपम्। एषामिति किम् ? यशोवत्, सर्पिर्वत् ॥२९।

## ३०. वृष्णो वस्वश्वयोः

वस्वश्वयोः परयोर्वृषन्शब्दस्य तद्धितयकारवत् कार्यम्भवति। वृषण्वसुः, वृषणश्वः। नलोपाभावो णत्वं च स्यात् "**यणाशिषोः**" (३/४/७४;६/१३) इति ज्ञापकाद् उत्तरपदे ङणनानां द्वित्वमनित्यम्। **भाष्ये** तूत्तरपदे ङणनानां द्वित्वाभाव एव समर्थितः। तदा "**सर्वतोऽक्तिन्नर्थात्**" इति **वार्त्तिके**। "**यिन्नायी स्वरवत्**" इत्यत्र नकारस्य, (द्वितीय) पाठश्चिन्त्यः ॥३०।

## ३१. लुकि व्यञ्जनवत्

लुञ्चेः क्विप् चेति भावे क्विपि न्यङ्क्वादित्वात् कत्वे लुक्शब्दः पुंलिङ्गः, लुकि सति व्यञ्जनवत् कार्यं भवति । तिष्ठत्युपद्यु, उपद्यु आगतः । सप्तम्याः पञ्चम्याश्चात्र लुकि दिव उत् । उपगोमदास्ते, उपगोमदागच्छति । प्राक्, प्रत्यक् । एष्वनुषङ्गलोपः । उपपुम् । **अनुशब्दलोपः** । उपपथि, उपमथि । नस्य लोपः । उपचतुः, उपानडुत् । वाशब्दस्योत्वम् ।

**अनषङ्गस्य पुंसोऽनः पन्थिमन्थ्योश्च नस्य लुक् ।**

**चतुरोऽनडुहश्चोत्वं लुक्येवं तु विधीयते ॥**

सामान्यातिदेशे विशेषस्यानतिदेशात् – उपरि, उपेदम् । राय आत्वम् इदमोऽत्वं च न स्यात् ॥३१।

## ३२. उवर्णे दिवः

दिवो वकारस्योवर्णे परतो व्यञ्जनवत् कार्यं भवति । द्यून्तिः, द्यूर्ध्वम्, उद्यद्-द्यूद्यानवाप्याम् इति च । उवर्णे इति किम् ? दिवाश्रयो दिवीश्वरः । येऽपि दिवर्थे द्युप्रकृत्यन्तरमिच्छन्ति तैरपि दिवोऽनिष्टरूपव्यपोहार्थं विधिरयम् आश्रयणीयः ॥३२।

## ३३. अह्नो यिन्नाय्योः

यिन्नाय्योः परयोरह्नो व्यञ्जनवत् कार्यं भवति ।अहर्य्यति, अहर्य्यते ।नलोपश्चेति नियमान्निवृत्तो व्यञ्जनविधिः, यथा – दिव्यति ॥३३।

## ३४. वोऽनवर्णादौत्यूत्

अनवर्णात् परस्य वाहेर्वाशब्दस्यौति प्रसजति सत्यूद् भवति । भाषायामपि वहेर्विण्णिति मतं **कात्यायनस्य** । वारुहः, वारुहा । अवर्णादेव वहेर्विण्णिति बहूना-मिष्टमपि न मतं नः । वार्वाडिति च दृश्यते । **भाष्य**स्थित्या तु अनवर्णोपपदस्याघुट्य-प्रयोग एव लक्ष्यते । अनवर्णोपपदस्य वहेर्विण् न दृश्यते चेद् ऊहेः प्रयोग एव समर्थयितव्यः ॥३४।

## ३५. ईति स्यतो नलोपो वा

स्यसंहितस्य शन्तृङ ईकारे प्रत्यये नलोपो भवति वा। करिष्यती, करिष्यन्ती कुले। यास्यती, यास्यन्ती स्त्री। स चिन्तयत्येव भियस्त्वदेष्यतीः। रिरंस्यती वारिरुहाद्विलोचने। विच्छेस्तुदादिपाठादायान्तरायेऽपि विच्छायती, विच्छायन्तीति **पारायणिकाः**। तुदादिपाठादायानित्यत्वे विच्छन्ती, विच्छती च स्यादि**त्यपरे**। अत्र मते गां विच्छतीति **न्यासादौ** घटते ॥३५।

## ३६. नान्च्वोरर्हणे

अर्हणे अन्च्वोर्लिङ्गस्य धातोश्च नलोपो न भवति। गुर्वञ्चा, देवद्र्यञ्चा। गुर्वङ्भ्याम्, देवद्र्यङ्भ्याम्। प्राङ्, देवद्र्यङ् कुलम्। द्विवचनं धातुपरिग्रहार्थम्। अञ्च्यन्ते, अञ्चिताः पितरः। अर्हणे इति किम्? प्राग्भ्याम्, प्राक्षु, उदक्तमम्भः कूपात्। इडप्यन्चेरर्हणे वक्ष्यते ॥३६।

## ३७. अस्य च

अर्हणे अञ्चेरकारस्य लोपो न भवति। गुर्वञ्चा, देवद्र्यञ्चा। कथं गोञ्चा? अन्चाश्रयो लोपोऽनेन बाध्यते, न त्वेदोदाश्रयः। तिर्यगुदन्चोस्त्वनर्चायामेव वृत्तिरिति तिरश्च्युदीची अर्चायां न निषिध्येते। तदिहाप्रमाणम्। तिर्यञ्चोदञ्चेति प्रयोगस्यार्चाया**माचार्यै**रुदाहृतत्त्वात् ॥३७।

## ३८. षनृहनृधृतराज्ञामेवाणि

एषामेवाण्यनोऽकारस्य लोपो भवति। वार्ष्णम्, वार्त्रघ्नम्, भ्रौणघ्नम्, धार्तराज्ञम्। अघुट्स्वरत्वादनो लोपे प्राप्ते नियमोऽयम्। इह मा भूत् – सामनो वैमनः। एवेति प्रत्ययनियमनिश्चयार्थम् ॥३८।

## ३९. तद्धितेऽह्नः

तद्धितेऽह्न एवास्य लोपो भवति। पूर्वाह्णः, आह्निकम्। अह्न एवेति किम्? यूनां भावो यौवनिका, तक्षण्यः ॥३९।

## ४०. स्वायम्भुवम्

एतदनन्तरं निपात्यते। स्वयम्भुव इदं स्वायम्भुवम् ॥४०।

## ४१. पुनर्वद् दृन्कराद् भुवः

दृन्कराभ्यां परस्य भुवः पुनः शब्दादिव कार्यं भवति । तत् पुनरुविषये वत्वम् । दृन्निति नान्ते हिंसार्थेऽव्यये । भुवः क्विप् । दृन्भ्वम्, दृन्भ्वः । करभ्वम्, करभ्वः । विकृतादपि – कारभ्वौ, कारभ्व इति चेष्यते । दन्भेरुप्रत्यये दृन्भूर्निपात्यते इति **भाष्ये। तन्त्रान्तरे** उणादौ चोक्तम् - तस्याधात्ववयवत्वादमूशसोर्वत्वाभाव इति लक्ष्यते ।।४१।

## ४२. क्विप् रामासस्थस्यैव धातोरेकस्वरस्य य्वौ

धातोर्यौ य्वौ विहितौ तावेकस्वरस्य क्विप्समासस्थस्यैव भवतः। प्रण्यौ, ग्रामण्यौ । प्रस्वौ, अन्तस्वौ । च्विडाजूर्याद्युपसर्गोपपदानामेव स्याद्युत्पत्तेः प्राक् क्विपा समासः । नियमः किम् ? ईषद्भियः, कुधियः, अभियः, नानाधियः । पापाद् भीः, पापभिया । 'वृश्चिकभिया पलायमानस्य' इति **भाष्ये।** धर्मेण धीः, धर्मधिया । दात्रेण लूः, दात्रलुवा । **वात्तिके**ऽप्युक्तम् – **"गतिकारकोपपदाभ्यामन्यपूर्वस्य क्विबन्तस्य नेष्यते"** इति गतिरिति च्विडाजूर्याद्युपसर्गाणामिह ग्रहणम् । **संग्रहकारो**ऽप्याह – गतिकारकयोः पूर्वत्वे क्विब्-विधावपूर्वत्वेन भवतीति ।**चान्द्रे** तु कारकासंख्याभ्यामविशेषेणेष्यते ।।४२।

## ४३. परस्याददद्रीचो वा मो दोश्च

स्यादौ परतोऽदद्रीचः परस्य दस्य युगपदुभयोश्च दकारयोर्मकारो भवति वा । अदमुयङ्, अमुमुयङ् ।अदद्र्यङ्, अमुद्र्यङ् इति बहूनामिष्टमपि न मतं नः ।परस्यामत्वे पूर्वस्य मत्वमिति **भाष्ये**ऽपि दूषितम् ।।४३।

## ४४. सभोरिदमन्वादेशे

सकारभकारादौ स्यादावन्वादेशे इदमद् भवति, सागर्थोऽयमारम्भः । इमकस्मै गां ददाति, अथो अस्मै कम्बलं देहि ।इमकस्माद् भीतोऽसि अथो अस्माच्छन्दोऽधीष्व । इमकस्य श्वेतास्तरङ्गाः । अथो अस्य पीता गावः । इमकस्मिन्नुच्चाः प्रासादाः, अथो अस्मिन्नीचाः पन्थानः । इमकाभ्यां छन्दोऽधीतम्, अथो आभ्यां निरुक्तमधीतम् । सभोरिति किम् ? इमकान् शालीन् लुनीहि । अथो इमकान् विक्रीणीष्व । कथमिमकौ ब्राह्मणौ । अथो इमकाभ्यां छन्दोऽध्येष्यते । यत्र कर्मादिकतया किञ्चित् प्रतिपाद्य पुनरनूद्यते सोऽत्रान्वादेशः ।।४४।

## ४५. सो व्यञ्जने नामिभ्यो रः

नामिभ्यः परस्य सस्य व्यञ्जने परे रो भवति । सुपीःषु, सुपीष्कल्पः, सुपीष्पाशः, सुपीः काम्यति, सुपीस्तरः, सुपीःपुत्रः । सुतूःषु, सुतूष्कल्पः, सुतूष्पाशः, सुतूःकाम्यति, सुतूस्तरः, सुतूःपुत्रः । तथा पिपठीःषु, पिपतीःषु । सजुषाशिषोस्तु मूर्धन्यस्यैव डत्वापवादो रेफः । कथं मित्रशीःषु रत्वं स्यात्, मतमेतद् **भाष्ये** इति ? सत्यम् । **"सजुषाशिषो रः"** (२/३/५१) इत्यत्राङ सपूर्वमुपलक्ष्यते । **वाक्यकार**स्तु आङ्येव शास्तेः क्विपः प्रमाणमित्याह, तदेवात्र न्याय्यम् । यत्तु 'प्रियतिसरौ, प्रियतिसरः । प्रियचतसरौ, प्रियचतसरः' इत्यत्र रेफाप्रवृत्तिमुदाजहार वाक्यकारस्तत् **"तौ रं स्वरे"** (२/३/२६) **इति** व्यवस्थित-विभाषानुवृत्त्या संग्रहणीयम् ॥४५।

## ४६. सुपि रः षसोर्विसर्जनीयः

सुपि षसोरेव रेफस्य विसर्जनीयो भवति । सजूःषु, आशीःषु, सुपीःषु, सुतूःषु । नियमः किम् ? गीर्षु, धूर्षु, कटचिकीर्षु, द्रोणबुभूर्षु ॥४६।

## ४७. वाऽदसो नौत्साकः सादुच्च

साकोऽदसः सावौत्वं न भवति वा, निषेधसन्नियोगेन च सात् परस्य वर्णस्योत्वं भवति । असुकः पुमान्, असकौ वा । असुका स्त्री, असकौ वा । क्लीबेऽदकः कुलम् इत्येव स्यात् । असुकम् इत्येके । अमुकम् इत्या**म्नायात्** ॥४७।

## ४८. श्वेतवाहादेरन्तस्य डस् पदान्ते

पदान्ते श्वेतवाहादेरन्तस्य डस् भवति । श्वेतवाहादिर्मन्त्रे श्वेतबहुक्थेत्यादिना निपातितो विनन्तो गणः । श्वेतवाह् – श्वेतवाः, श्वेतवोभ्याम्, श्लेतवःसु । उक्थशंस्-उक्थशाः, उक्थशोभ्याम्, उक्थशःसु । पुरोडाश – पुरोडाः, पुरोडोभ्याम्, पुरोडःसु । अवयाज – अवयाः, अवयोभ्याम्, अवयाःसु । पदान्ते इति किम् ? श्वेतवाहौ, उक्थशंसौ । पुरोडाशौ, अवयाजौ ॥४८।

## ४९. सौ दीर्घः

डसोऽस्य सौ दीर्घो भवति । संबुद्ध्यर्थम् इदम् । हे श्वेतवाः, हे उक्थशाः, हे पुरोडाः, हे अवयाः । **केचिद्** उपदेशावस्थस्यैव दीर्घमिच्छन्ति, तैरसम्बुद्ध्यर्थमिदमाश्रयणीयम् ॥४९।

## ५०. संयोगान्तस्य लोपः

'संयोगान्तस्य' इति च 'लोप' इति च द्वयम् अधिकर्तव्यम् ॥५०।

## ५१. अट्त अद्दडश्च्युतामादेः

एषां संयोगस्यादेः पदान्ते लोपो भवति । **'अट्त् अतिक्रमहिंसयोः'** (१/३५०) टोपधस्तान्तः। समत्, समद्भ्याम्, समत्तरः । **'अद्दड् अभियोगे'** (१/१२५) दोपधो डान्तः।उदट्, उदड्भ्याम्, उदट्टरः।श्च्युतिरिह तालव्यादिः।घृतं श्च्योततीति क्विप्, घृतश्च्युतमाचष्टे इतीन् । पुनः क्विप् - घृतक्, घृतग्भ्याम्, घृतक्तरः । **पारायणे** तु दन्त्योपदेशस्यैतद् रूपम् । तालव्योपदेशस्य तु मधुट्, मधुड्भ्याम् इति संयोगान्तलोप एवोदाहृतः।अट्टेष्टोपधत्वे अट्टिषत इत्यभ्यासे टश्रुतिः।अद्डेर्दोपधत्वे अड्डिडिषतीति दस्य द्विर्वचननिषेधस्तु स्यात् । **नैयासिका**स्तु अत्टिं तोपधमधीयानाः 'अत्टिटिषते' इत्यभ्यासे तश्रुतिमिच्छन्तोऽस्यादिलोपं प्रत्याचक्षते ॥५१।

## ५२. सस्य च

सकारस्य संयोगादेर्लोपो भवति । साधुमक्, साधुमग्भ्याम्, साधुमक्तरः । सोपदेशबलान्न प्रागेव दत्वम् । धुटो लोपविषये नियमः किम् ? उदग्रयतेः क्विप् - उदक्, उदग्भ्याम् । गिरिवेश्मयते । क्विप् – गिरिवेट्, गिरिवेड्भ्याम् । महोष्मयतेः क्विप् – महोट्, महोड्भ्याम् । **भाष्ये** तु संयोगान्तलोपेऽधुटो लोपो नास्तीति समर्थितम् । तन्मते समुद्झयतेः क्विप् – समुत्, समुद्भ्याम् इति प्रत्युदाहरणम् । दोपधोऽयमिति **पारायणिकाः** ॥५२।

## ५३. कस्याघचवर्गयोः

घादेशचवर्गादिशाभ्यामन्यस्य संयोगादेः कस्य लोपो भवति । गोरट्, गोरड्भ्याम्, गोरट्टरः । गृहं विविक्षतीति क्विप् – गृहविवीः, गृहविवीर्भ्याम्, गृहविवीस्तरः । मधु लिलिक्षतीति क्विप् । मधुलिलीः, मधुलिलीर्भ्याम्, मधुलिलीस्तरः । अघचवर्गयोरिति किम् ? वनदिधक्, वनदिधग्भ्याम् । ओदनबुभुक्, ओदनबुभुग्भ्याम् । मुहेस्तु घत्वढत्वे स्तः इति – मुमुक्, मुमुरिति स्यात् । **भाष्ये** तु अधुट्परस्य संयोगादेर्लोपो नास्तीति चिन्तितम्, तदा शुक्लयतेः क्विप् – शुक्ल् इत्येव स्यात् ॥५३।

## ५४. रात् सस्यैव

रेफात् परस्य संयोगान्तस्य सस्यैव लोपो भवति । कटचिकीः, कटचिकीर्भ्याम्, कटचिकीस्तरः । द्रोणबुभूः, द्रोणबुभूर्भ्याम्, द्रोणबुभूस्तरः । नियमः किम् ? ऊर्क्, ऊर्ग्भ्याम् । एवेति नियमान्तरनिवृत्त्यर्थं पदान्तत्वान्मूर्धन्यनिवृत्तौ लोपोऽयमिति ।।५४।

## ५५. न सन् डादौ

डकारादौ कर्तव्ये लुप्तः संयोगान्तः सन् न भवति । गिरिवेश्मानमाचष्टे गिरिवेट् । महोष्माणमाचष्टे महोट् । अदभ्रमाचष्टे अधट् । द्विजिह्वमाचष्टे द्विजिट् । इह दस्य धत्वं जस्य झत्वं च नास्ति । हचतुर्थान्तस्य तृतीयादेरेकस्वरस्यैवाजकारादेरादिचतुर्थत्वं व्यवस्थितविभाषाविज्ञानात् । कथन्तर्हि मृगावित्, मृगाविद्भ्याम् । चतुर्थविधौ बिभ्यत्सतीत्युदाहृतं **पूर्वै**र्व्युत्पादितं च **न्यासादौ** ? सत्यम् । अभ्यासादेवाकृतसंप्रसारणस्यैव व्यधेरोष्ठ्यो बकारोऽन्यत्रान्तस्थैव । ओष्ठ्यो यकारपरो मध्य इति **शिक्षाकाराः** पठन्ति । एवं च "**इषुव्यधाद् वधाद्**" इति **माघ**यमकेऽप्यभङ्गः । **अपरे** त्वन्तस्थादिमविशेषणे व्यधिं प्रतिपद्यन्ते ।।५५।

## ५६. वा सायसंख्याविभ्योऽह्नस्याहन् ङौ

सायादिभ्यः परस्याप्रत्ययान्तस्याह्नेत्यस्य ङौ परेऽहन्नित्यादेशो भवति वा । सायाह्नि, सायाहनि, सायाह्ने । द्व्यह्नि, द्व्यहनि, द्व्यह्ने । व्यह्नि, व्यहनि, व्यह्ने । अञ्झलादिगत्वप्रतिषेधो न परिशिष्यते दृगादिसाहचर्याच्चवर्गस्यापि कृदन्तस्यैव गत्वं स्यात् । विश्वसृग् इति गत्वं तु दृगादित्वात् । **भाष्य**स्थित्यापि विश्वसृगिति गत्वेन भवितव्यम् । अत एव रज्जुसृडिति डत्वम् प्रयतितव्यमिति **काशिकादौ** । ञकारस्येह ङ्कारोऽपि विरामव्यञ्जनयोरप्रतिविधेयो नञादिप्रयोगेष्वदृष्टत्वात् । **स्थितानामन्वाख्यानं हि व्याकरणमिति भाष्यम्** ।।५६।

## ५७. अनोत्सभः सर्वनामस्यादेरप्यक्

ओकारसकारभकारादेरन्यस्य सर्वनामस्यादेरन्त्यात् स्वरात् पूर्वोऽग् भवति वा । त्वयका, त्वया । मयका, मया । भवतकः, भवतः । स्याद्यका प्रकृत्यको बाधनमिष्यते । ओकारसकारभकारादौ तु युवकयोः, युष्मकासु, युष्मकाभिरिति ।।५७।

## ५८. त्यादेश्च

त्यादेश्चान्त्यात् स्वरात् पूर्वोऽग् भवति वा । पचतकि, पचति । बुभुजके, बुभुजे । अन्त्यात् स्वरादित्येव । अददात्, अदात् । तदेतत् कुत्सादयश्चार्था अपेर्बहुलकत्वात् ॥ ५८ ।

## ५९. तूष्णीकाम्

तूष्णीमो मकारात् पूर्वः का इत्यव्ययं भवति वा । तूष्णीकाम्, तूष्णीम् । तूष्णीकाम् इति प्रकृत्यन्तरं चेदक् स्यात् तस्यापवादोऽयमिष्यते ॥ ५९ ।

## ६०. न सामि

सामीत्यर्धार्थमव्ययम्, तस्याक् न भवति । सामि भुज्यते, सामि मज्जति रवौ न विरेजे ॥ ६० ।

## ६१. कस्तोऽकि

अकि सति कान्तस्याव्ययस्य तो भवति । धिक्, धकित् । पृथक्, पृथकत् ॥ ६१ ।

## ६२. ऋद्ध्यर्थनदीवंश्याव्ययीभावाददोऽम् सप्तम्याः

ऋद्ध्यर्थनदीवंश्यानां योऽव्ययीभावस्तस्मादकारान्तात् सप्तम्या नित्यमम् भवति । सुमद्रम्, द्वियमुनम्, उन्मत्तगङ्गम्, लोहितगङ्गम् । देशे – एकविंशति भारद्वाजम् । कथम् उपगङ्गे, उपगार्ग्ये ? नदीवंश्यश्रुतिविहिताव्ययीभावग्रहणात् ॥ ६२ ।

## ६३. वान्योऽन्येतरेतरपरस्परेभ्योऽमादेरपुंस्याम्

एभ्यः परस्यामादेरपुंसि विषये आमादेशो भवति वा । एभ्यः प्रथमा नाभिधीयते इति **वृद्धाः** । अन्योन्याम्, अन्योन्यं वा स्त्रियः पश्यन्ति । एवं ब्राह्मणकुलानि । अन्योन्याम्, अन्योन्येन वा स्त्रीभिर्भुज्यन्ते, एवं ब्राह्मणकुलैः । अन्योन्याम्, अन्योन्यस्मै वा स्त्रियः स्पृहयन्ति । एवं ब्राह्मणकुलानि । अन्योन्याम्, अन्योन्यस्माद् वा स्त्रियो विरमन्ति । एवं ब्राह्मणकुलानि । अन्योन्याम्, अन्योन्यस्य वा स्त्रियः स्मरन्ति । एवं ब्राह्मणकुलानि । अन्योन्याम्, अन्योन्यस्मिन् वा स्त्रियोऽनुरज्यन्ते । एवम् ब्राह्मणकुलानि । एवम् इतरेतराम्, परस्पराम् । अपुंसीति किम् ? अन्योन्यं पुरुषाः पश्यन्ति, अन्योन्यम् इभौ विघट्टयतः । अन्योन्यादयः पुंस्त्वैकत्वयोरिव स्वभावात् । अन्योन्यम्, इतरेतरम्,

परस्परम् इति क्रियाविशेषणत्वेऽपि पुंस्त्वमेव। नपुंसकत्वे हि तुरागमः स्याद् अन्यादित्वात्। न ह्येषां सर्वनामगणे प्रतिपदपाठोऽस्तीत्येकं **मतम्।** सर्वनामगणेऽन्या-देरन्यत्र नपुंसकान्यमून्युपदेश्यानीति **अपरे** मन्यन्ते। एभ्योऽमादेशोऽपि बहुलमिति **केचित्।** 'अमामौ वा' इति पठन्ति **एके।** आमन्तस्य च प्रायः प्रयोगो दृश्यते ॥६३।

## ६४. वसादयो यथास्वम् अन्वादेशे

अन्वादेशे यथास्वं यथायथं वसादयो नित्यम् भवन्ति। पुत्रो युष्माकम्, अथो वः कम्बलः। पुत्रोऽस्माकम्, अथो नः कम्बलः। पुत्रो युवयोः, अथो वां कम्बलः। पुत्र आवयोः, अथो नौ कम्बलः। पुत्रस्तव, अथो ते ग्रामः। पुत्रो मम, अथो मे धनम्। द्वितीयाचतुर्थ्योरप्येवम्। तथा पुत्रस्त्वां पातु, अथो त्वा स्मरत्युपाध्यायः। पुत्रो मां पातु, अथो मा स्मरति शिष्यः ॥६४।

## ६५. वा सपूर्वात् प्रथमान्तात्

विद्यमानपूर्वपदात् प्रथमान्तात् परेषामन्वादेशे यथायथं वसादयो वा भवन्ति। युष्माकमाश्ममागारम्, अथो गृहे लाक्षिको वः कम्बलः, अथो गृहे लाक्षिको युष्माकं कम्बलः। अस्माकमत्युच्चा गृहाः सन्ति, अथो गृहे गावो नः सन्ति। अथो गृहे गावोऽस्माकं सन्ति। युवयोर्ब्राह्मणकः पिता। अथो माता वृषली वाम्। अथो माता वृषली युवयोः। आवयोर्ब्राह्मणः पिता। अथो माता आचार्यानी नौ। अथो माता आचार्यानी आवयोः। तवायं जाल्मो दासः, अथो गृहे भार्या तव। ममायं जाल्मो दासः, अथो गृहे भार्या मे। अथो गृहे भार्या ममेत्येवमादयः ॥६५।

## ६६. न दृगर्थैरालोचने

आलोचनवृत्तैर्दर्शनार्थैर्योगे वसादयो न भवन्ति। ग्रामो युष्मान् समीक्षते। ग्रामोऽस्मान् समीक्षते। आलोचयतीत्यर्थः। दृगर्थैरिति किम्? ग्रामो वः सम्प्रधारयति। आलोचने इति किम्? ग्रामो वः पश्यति। अधातुज समानाधिकरणमसद्वद् भवति इति **भाष्य**स्मृतेरिहाप्यकृदन्तादेकाधिकरणाद् व्यवस्थितविभाषया वसादयो न भवन्तीति लक्ष्यते। गोमतां युष्माकं स्वम्, दण्डिनोर्युवयोः स्वम्। पाशुलस्य तव स्वम्। एवम् अस्मदोऽपि कृदन्तात् पुनरनिषेधः। पाचकानां वः स्वम्, ग्राहिणोर्वां स्वम्, दरिद्रस्यते स्वम्। एवमस्मदोऽपि ॥६६।

## ६७. प्रागामन्त्रितपदमसद्वत्

आमन्त्रितं पूर्वपदमसद्वद् भवति । छात्रा युष्माकं स्वम्, छात्रौ युवयोः स्वम् । छात्र ! तव स्वम्, छात्रा अस्माकं स्वम्, छात्रौ ! आवयोः स्वम्, छात्र ! मम स्वम्, छात्र ! त्वां नेष्यति ग्रामान्, छात्र ! मां नेष्यति ग्रामान् । प्रागिति किम् ?

**रागसागरमग्नानामस्माकमभयप्रद !**

**पुनातु विश्वमीशस्य तव विश्वम्भरस्मृतिः ॥**

परस्य सत्त्वमेवेति पादादित्वान्निषेधः स्यात् ।आमन्त्रितादिति सिद्धेऽसद्वद्भावः पूर्वतरात् पदाद् विधिर्यथा स्यादिति । गृहे छात्रा ! वः स्वम्, गृहे छात्राः! नः स्वम् । तथा च "**उचितं रचयामि देवि! ते**" ॥६७।

## ६८. जसेकाधिकरणे वा

जसन्तमामन्त्रितमेकाधिकरणे परतोऽसद्वद् भवति वा । छात्राः कौमाराः । युष्माकं स्वम्, छात्राः कौमाराः ! अस्माकं स्वम् ! छात्राः कौमाराः ! वः स्वम्, छात्राः कौमाराः ! नः स्वम् । इयमन्वादेशे विभाषोदाहर्तव्या ॥६८।

## ६९. न सामान्यार्थमजस्

सामान्यवचनमजसन्तमामन्त्रितमेकाधिकरणे परतो नासद्वद् भवति । छात्रौ गुणिनौ ! वां स्वम्, छात्र गुणिन् ! ते स्वम्, छात्रौ गुणिनौ ! नौ स्वम् । छात्र गुणिन् ! मे स्वम् । सामान्यार्थमिति किम् ? डित्थ काश्मीरक ! तव स्वम्, डित्थ कालिङ्गक ! मम स्वम् । अजसीति किम् ? छात्राः कौमाराः! युष्माकं स्वम् इति वा स्यात् ॥६९।

## ७०. इत् के स्त्र्याकारे

स्त्रियामाकारो यस्मात् स स्त्र्याकारः, स्त्र्याकारे के पूर्वस्येकारो भवत्यधिकर्तव्यम् ॥७०।

## ७१. नरकमामकयोः

अनयोः स्त्र्याकारे के पूर्वस्येद् भवति । नरं कामयते इति अन्यतोऽपि चेति डः – नरिका ।ममेयं मामिका ।मामकात् संज्ञायामेवेत् ।अप्रत्ययककारार्थं वचनम् ॥७१।

## ७२. न यत्तदोः

अनयोः स्त्र्याकारे के इकारो न भवति । यका, सका । यकाम्, तकाम् । यकाभिः, तकाभिः ॥७२।

## ७३. त्यकनाशीरकयोश्च

त्यकन्प्रत्ययस्याशिषि विहिताकस्य च स्त्र्याकारे के इकारो न भवति । अधित्यका, उपत्यका । अध्युपाभ्यामूर्ध्वासन्नयोस्त्यकन् । आशीरकस्य च – जीवका, नन्दका, प्रजनका, प्रसवका, प्रभवका ॥७३।

## ७४. क्षिपकादिषु च

क्षिपकादिषु इकारो न भवति ।

**क्षिपका ध्रुवका चैव करका धारकेष्टका ।**

**एडका चटकाद्याश्च पितॄणामष्टका भवेत् ॥७४।**

## ७५. तारका रूढौ

रूढौ तारकेतीकारो न भवति । तारका नक्षत्रम्, नेत्रांशश्च । रूढाविति किम् ? तारिका धीवरी ॥७५।

## ७६. वर्णका वस्त्रे

वस्त्रे वर्णकेतीकारो न भवति । वर्णका वस्त्रान्तरम् । वस्त्र इति किम् ? वर्णिका नटस्य कणकस्य च ॥७६।

## ७७. वा सूतपुत्रवृन्दारकाणाम्

एषां स्त्र्याकारे इकारो भवति वा । सूतिका, सूतका । पुत्रिका, पुत्रका । वृन्दारिका, वृन्दारका । वृन्दारेत्येकदेशानुकरणम् ॥७७।

## ७८. वर्त्तका शकुनौ

शकुनौ वर्त्तकेतीकारो भवति वा । वर्त्तिका, वर्त्तका शकुनिः । शकुनाविति किम् ? वर्त्तिका दीपस्य ॥७८।

## ७९. अधातुत्यपूत्यणां यकाभ्यामस्य श्रद्धायाः

अधातोरत्यपूत्यणोश्च यकारककाराभ्यां परस्य श्रद्धास्थानिनोऽकारस्य स्त्र्याकारे के इकारो भवति वा । भ्रातृव्यिका, भ्रातृव्यका । अपत्ये भ्रातुर्व्यः । अभ्रे भवा **अभ्रियिका**, अभ्रियका । तत्र भवे अभ्रसमुद्राभ्यामियः । दूरे भवा दूरेत्यिका, दूरेत्यका । दूरादेत्यः । कात् – चटकिका, चटकका । एडकिका, एडकका । मूषिकिका, मूषिकका । अधातुत्यपूत्यणामिति किम् ? आढ्यिका, शिक्षाकिका, आध्यायति । शिक्षां कायतीति डकौ । इहत्यिका, अत्रत्यिका । क्वेहात्रतसस्त्यप् । अमात्यिका । नित्यधिष्ट्यामात्या इति त्यपि निपातः । दाक्षिणात्यिका । दक्षिणापुरःपश्चाद्भ्यस्त्यण् । श्रद्धाया इति किम् ? बहुशस्यिका, निष्काकिका भूः । कः समासान्तः । सांकाश्ये भवा – सांकाश्यिका, काम्पिल्ये भवा – काम्पिल्यिका । योपधादकण् ॥७९॥

## ८०. द्वैषाजाङ्गास्वानाम्

स्त्र्याकारे एषामाकारस्येकारो भवति वा । द्विके, द्वके । द्विकाभ्याम्, द्वकाभ्याम् । एषिका, एषका । अजिका, अजका । अङ्गिका, अङ्गका । स्विका, स्वका । एषा-मुपसर्जनानामपि द्वे रूपे भवतः । बह्वजिका, बह्वजका । बह्वङ्गिका, बह्वङ्गका । बहुस्विका, बहुस्वका । स्त्रीनिर्देश इति किम् ? शुभ्रोऽजो यस्याः सा शुभ्राजिका । प्रियोऽङ्गो यस्याः सा प्रियाङ्गिका ॥८०॥

## ८१. गोस्त्रीप्रत्ययस्योपसर्जनस्यान्त्यस्य ह्रस्वः

गोशब्दस्य स्त्रीप्रत्ययस्य चोपसर्जनान्त्यस्य ह्रस्वो भवति । बहुगुः, अतिखट्वः । अलं जायायै अलंजायः, निष्कौशाम्बि, अलंकुमारिः, अतिवामोरूः । तथा पञ्चखट्वी, पञ्चमालिः । समाहृतिप्राधान्यादिहोपसर्जनता । द्रव्यप्राधान्येऽपि द्विगुमिच्छन्तः कथं ह्रस्वं प्रतिपद्यन्ते । गोस्त्रीप्रत्ययस्येति किम् ? अतितन्त्रीः, अतिजम्बूः । निस्तन्त्रारवितथ-संस्कृतप्रभाषीत्यपि स्यादेव । उणादिषु धातुनिर्देशस्योपलक्षणत्वात् तन्त्रेरपीप्रत्ययः । तन्त्रीररुचिरालस्यमित्याचार्येण प्रयुक्तं हि । तन्त्रीशब्दोऽपि **तन्त्रान्तरे** उणादिवृत्तौ । **'नन्दी वन्दी च तन्त्रीः'** इति **त्रिकाण्डे** च दृश्यते । यस्यायं प्रयोगः – **"विभज्य नक्तन्दिवमस्ततन्त्रिणा"** इति । यस्य च भूमीरतन्त्रीयम् इति रूपम् ॥८१॥

## ८२. ओदौद् द्वितीयासु न स्त्रियाः

आसु स्त्रीशब्दस्योपसर्जनस्य ह्रस्वो न भवति। अतिस्त्रियोः, अतिस्त्रियौ, अतिस्त्रियम्, अतिस्त्रियः पश्य। उपसर्जनलक्षणस्य प्रतिषेधादिहाप्रतिषेध एव। अतिस्त्रिणोः कुलयोः ॥८२।

## ८३. नेयन्सोर्बहुव्रीहौ

ईयन्सोः परस्य स्त्रीप्रत्ययस्य बहुव्रीहौ ह्रस्वो न भवति। बहुप्रेयसी, सुप्रेयसी युवा। नेयन्सोरिति बहुव्रीहौ कनिषेधः। उपसर्जनादपि स्त्रीकारान्तात् सिलोपः स्यादेव। कथं सुप्रेयसी कुलम्। नपुंसकस्यापि निषेधमिच्छन्ति तदिह पुनर्नञ्ग्रहणात्। बहुव्रीहाविति किम् ? अतिप्रेयसिः पान्थः, उपप्रेयसि प्रेम ॥८३।

## ८४. आदीदूतां के लिङ्गात्

'आत्, ईत्, ऊत्' एषां लिङ्गाद् विहिते के ह्रस्वो भवति। सोमपकः, ग्रामणिकः, यवलुकः, वत्सिका, कुमारिका, ब्रह्मबन्धुका, कर्कन्धुका। एषामिति किम् ? गोका, नौका। लिङ्गादिति किम् ? काकः, पाकः। "इण्भीपाक०" इत्यादिना धातोः कः ॥८४।

## ८५. न बहुव्रीहौ

एषां बहुव्रीहौ के ह्रस्वो न भवति। महोदधिक्राकः। सनदीकः, सवधूकः। भ्रुवस्तु को नास्त्येव। बभ्रुभ्रूरित्येव स्यात् ॥८५।

## ८६. स्त्र्यातो वा

बहुव्रीहौ के स्त्र्याकारस्य ह्रस्वो वा भवति। बहुखट्वकः, बहुखट्वाकः। श्वेताश्वकः, श्वेताश्वाकः। बृहदजकः, बृहदजाकः। स्त्रीति किम् ? दृष्टरजाकः। बहुव्रीहावित्येव – बालिका, वत्सिका ॥८६।

## ८७. तत्रापुंवृत्तादिच्च

अपुंवृत्ताद् विहितस्य स्त्र्यातस्तत्र स्त्र्याकारे के इत् ह्रस्वश्च वा भवति। मालिका, मालाका। कन्यिका, कन्यका, कन्याका। भस्त्रिका, भस्त्रका, भस्त्राका। आभिः

प्रकृतिभिश्च – निर्भिस्त्रिका, निर्भस्त्रिका, निर्भस्त्राकेति सिद्धम् । अलमन्यत्र भस्त्राग्रहणम् । तत्रेति किम् ? जङ्घकः, चूडकः । तत्र **"प्रसिते स्वाङ्गात्"** इति कः । अपुंवृत्तादिति किम् ? अश्विका । बहुव्रीहाविति न स्मर्यते ।।८७।

## ८८. अष्टनः कपाले हविष्यात्

कपाले परे हविषि वाच्येऽष्टनः आकारो भवति । अष्टसु कपालेषु संस्कृतम् अष्टाकपालं हविः । हविषीति किम् – अष्टकपाल ओदनः ।।८८।

## ८९. संज्ञायां च

संज्ञायां चाष्टन आकारो भवति । अष्टावक्रो नामर्षिः । अष्टापदः शरभः । अष्टापदं शारिफलं कनकं च ।।८९।

## ९०. तद्योगिन्यष्टगवे

अष्टगवयोगिन्यर्थे वर्तमानेऽष्टगवे स्थितस्याष्टन आकारो भवति । अष्टानां गवां समाहारः अष्टगवम्, तद्युक्तं शकटादिकम् अष्टागवम् ।।९० ।

## ९१. दशविंशतित्रिंशत्सु द्वेश्चाबहुव्रीहौ

अबहुव्रीहौ समासे दशविंशतित्रिंशत्सु परतो द्वेरष्टनश्चाद् भवति । द्वौ च दश च, द्वाभ्यामधिका वा दश द्वादश । एवं द्वाविंशतिः, द्वात्रिंशत् । अष्टाविंशतिः, अष्टात्रिंशत् । अबहुव्रीहाविति किम् ? द्विदश, द्विदशाः, अष्टदशाः ।।९१।

## ९२. त्रेस्त्रयस्

अबहुव्रीहौ समासे दशविंशतित्रिंशत्सु परतस्त्रेस्त्रयसादेशो भवति । त्रयोदश, त्रयोविंशतिः, त्रयस्त्रिंशत् । अबहुव्रीहावित्येव – त्रिदश, त्रिदशाः ।।९२।

## ९३. तावनशीतिशतसंख्यायां वा

अशीतिवर्जितायां त्यन्तायां शदन्तायां च संख्यायाम् अबहुव्रीहौ समासे तेषां तौ पूर्वविधी भवतो वा । अष्टासप्ततिः, अष्टसप्ततिः । द्वासप्ततिः, द्विसप्ततिः । त्रयःसप्ततिः, त्रिसप्ततिः । अष्टानवतिः, अष्टनवतिः । द्वानवतिः, द्विनवतिः । त्रयोनवतिः, त्रिनवतिः । षष्टिरपि त्यन्तो निपातः – अष्टाषष्टिः, अष्टषष्टिः । द्वाषष्टिः, द्विषष्टिः । त्रयःषष्टिः, त्रिषष्टिः ।

शदन्तायां च – द्वाचत्वारिंशत्, द्विचत्वारिंशत् । अष्टाचत्वारिंशत्, अष्टचत्वारिंशत् । त्रयश्चत्वारिंशत्, त्रिचत्वारिंशत् । अष्टापञ्चाशत्, अष्टपञ्चाशत् । द्वापञ्चाशत्, द्विपञ्चाशत् । त्रयःपञ्चाशत्, त्रिपञ्चाशत् । अनशीति किम् ? द्व्यशीतिः, त्र्यशीतिः । त्रिंशदिति किम् ? अष्टाभिरधिकं शतम् अष्टशतम् । अबहुव्रीहावित्येव – द्वित्रिंशाः, त्रिविंशाः ।।९३।

## ९४. संज्ञायामनजिरादिबहुस्वरस्य वति दीर्घः

अजिरादिवर्जितस्य बहुस्वरस्य वन्तुप्रत्यये संज्ञायां दीर्घो भवति । अमरावती, वीरणावती, उदुम्बरावती, मशकावती, पुष्करावती, अनजिरादिरिति किम् ? अजिरवती, खदिरवती,

**अजिरं खदिरशशाङ्कौ कारण्डवचक्रवाकपुलिनानि ।**
**मलयालङ्कारावपि हिरण्यमन्येऽपि चाकृतितः ॥**

बहुस्वरस्येति किम् ? वेत्रवती, भोगवती । संज्ञायामिति किम् ? तुरगवती सेना ।।९४।

## ९५. पद्मशरधूमकुशवंशमृगाणां च

एषां संज्ञायां वन्तौ दीर्घो भवति । पद्मावती, शरावती, धूमावती, कुशावती, वंशावती, मृगावती । द्विस्वरार्थं वचनम् ।।९५।

## ९६. अष्ठीवत्प्रभृतयश्च

अष्ठीवत्प्रभृतयश्च निपात्यन्ते संज्ञायाम् । अतिशयेनास्थीनि सन्त्यस्मिन्निति अष्ठीवान् जानुः । कक्षा विद्यतेऽस्य कक्षीवान् ऋषिः । लवणं विद्यतेऽस्यामिति लवण्वती । उदकमस्यास्तीति उदन्वान् समुद्रः । एवम् आसन्दीवान् ग्रामः । चक्रीवान् खरः । अहीवती, कपीवती, अलीवती, ऋषीवती इत्यादयः ।।९६।

## ९७. वलचि च

वलचि प्रत्यये च दीर्घो भवति । कृषीवलः, आसुतीवलः, दन्तावलः । कृष्यासुतिदन्तेभ्यो वलच् । वलचीति किम् ? उत्साहवलः, पितृवलः, भ्रातृवलः । उत्साहपितृभ्रातृरजःशिखापरिषदो वलः ।।९७।

## ९८. चितेः के बहुव्रीहौ

बहुव्रीहौ के चितेर्दीर्घो भवति । द्विचितीकम्, बहुचितीकं श्मशानम् । बहुव्रीहाविति किम् ? चितिका, परमचितिका ।। ९८।

## ९९. इचि सरूपे

इजन्ते समानरूपे पदे पूर्वस्य दीर्घो भवति । केशाकेशि, दन्तादन्ति **"इज् व्यतिहारे"** इतीच् । सरूप इति किम् ? द्वौ दन्तावस्येति द्विदन्ति प्रहरति । **"द्विदन्त्यादिभ्यश्च"** इति इच् ।। ९९।

## १००. आच्च गुणिनः

गुणोऽस्यास्तीति गुणी असन्ध्यक्षरं नामी, तदन्तस्य सरूपे इजन्ते परे पूर्वस्याद् दीर्घश्च भवति । मुष्टामुष्टि, मुष्टीमुष्टि, बाहाबाहवि, बाहुबाहवि व्यासजेताम् ।। १००।

## १०१. स्त्रीप्रत्ययस्य लुगणादिलुक्यगोणीसूच्योः

अणादिलुकि सति स्त्रीप्रत्ययस्य लुग् भवति न तु गोणीसूच्योः । पञ्चभिः खट्वाभिः क्रीतः पञ्चखट्वः । एवं पञ्चपटुः, पञ्चवेणिः, पञ्चक्रुङ्, पञ्चोष्णिक्, पञ्चक्रोष्टा । पञ्चभिर्युवतिभिः क्रीतः पञ्चयुवा । पञ्च इन्द्राण्यो देवता अस्येति पञ्चेन्द्रः । स्त्रीप्रत्ययस्येति किम् ? पञ्चतन्त्रीः, पञ्चजम्बूः । अणादिलुकीति किम् ? पञ्चानां तटीनां समाहारः पञ्चतटि । समाहारो हि नानद्यर्थतया गृह्यते । अगोणीसूच्योरिति किम् ? पञ्चगोणिः, पञ्चसूचिः । उपसर्जनत्वाद्ध्रस्वः सिद्धः ।। १०१।

**।। इति महामहोपाध्यायश्रीपतिदत्तविरचितायां कातन्त्रपरिशिष्टवृत्तौ नामप्रकरणं समाप्तम् ।।**

## षत्वप्रकरणम्

### १. सस्य षो निमित्तात्

निमित्तं नामिकराः। निमित्तात् परस्य सकारस्य षकारो भवतीत्यधिकर्तव्यम्। अविशेषे निमित्तादिति, विशेषे त्वनिमित्तादपि। तुराषाट्, परमष्ठः ॥१॥

### २. तद्वत् खङन्तस्थाभ्यः

खङन्तस्थाभ्यः परस्य सस्य निमित्तादिव षकारो भवति। दृख्षु, क्रुङ्षु, अश्वयूषु, हल्षु, मूल्वृषु ॥२॥

### ३. समासेऽङ्गुलेः सङ्गस्य

अङ्गुलेः परस्प समासे सङ्गस्य सस्य षो भवति। अङ्गुलिषङ्गः, अङ्गुलीषङ्गः। समास इति किम्? अङ्गुली सङ्गं भजते। पदाद्यन्तयोः सस्य षो नास्तीत्यारम्भः ॥३॥

### ४. भीरोः स्थानस्य

भीरोः परस्य स्थानस्य समासे सस्य षो भवति। भीरुष्ठानम्। समास इत्येव – भीरु स्थानं पश्य ॥४॥

### ५. अग्नेः स्तुतः

अग्नेः परस्य स्तुः क्विबन्तस्य सस्य षो भवति। अग्निष्टुत् ॥५॥

### ६. दीर्घात् सोमस्य

दीर्घान्तादग्नेः परस्य सोमस्य सस्य षो भवति। अग्नीषोमौ। **"ईदग्नेः सोमवरुणयोर्देवताद्वन्द्वे"**। तस्यैव दीर्घस्येह ग्रहणम्। इह न स्यात् – अग्निश्च इश्च सोमश्च अग्नीसोमाः। दीर्घादिति किम्? अग्निसोमौ ज्योतिरुद्भिदे ॥६॥

### ७. ज्योतिरायुर्भ्यां स्तोमस्य

आभ्यामग्नेश्च स्तोमस्य सस्य षो भवति। ज्योतिष्टोमः, आयुष्टोमः, अग्निष्टोमः। समास इत्येव-ज्योतिस्तोमे तृणानाम् ॥७॥

## ८. गवियुधिभ्यां स्थिरस्य

आभ्यां स्थिरस्य सस्य षो भवति । गविष्ठिरः, युधिष्ठिरः । **'विष्टरस्थां गविष्ठिराम्'** इति **भट्टिः** । समासानुवर्तनाद् यत्र लुक्, तत्रायं मूर्धन्यः, स चाभ्यां संज्ञायामेव । समास इत्येव – गवि स्थिरो भारः, युधि स्थिरो राजन्यः ॥८।

## ९. मातृपितृभ्यां स्वसुः

आभ्यां स्वसुः सस्य षो भवति । मातृष्वसा, पितृष्वसा ॥९।

## १०. मातुःपितुर्भ्यां वा

'मातुः, पितुः' इत्येताभ्यां स्वसुः सस्य षो भवति वा । मातुष्वसा, पितुष्वसा । मातुःस्वसा, पितुस्वसा । मातृपितृभ्यां लुग् वा षष्ठ्याः । वाक्ये तु न स्यादेव – मातुः स्वसा, पितुः स्वसा ॥१०।

## ११. वर्णेऽभिनिसः स्तानस्य

अभि – निस्पूर्वस्य स्तनतेर्घञन्तस्य वर्णेऽर्थे सस्य षो भवति । अभिनिःस्तन्यत इति अभिनिष्टानो विसर्गो वर्णश्च । वचः स्पष्टाभिनिष्टानम् । वर्ण इति किम् ? अभिनिस्तानो गर्भिण्याः ॥११।

## १२. नदीष्णनिष्णातयोर्दाक्ष्ये

दाक्ष्येऽनयोः सस्य षो भवति । नदीष्णः पान्थः । नद्यवगाहनदक्ष इत्यर्थः । **'ततो नदीष्णान् पथिकान् गिरिज्ञान्'**इति **भट्टौ** । चारकर्मणि निष्णातः । दाक्ष्य इति किम् ? नद्यां स्नाति नदीस्नः । निःस्नातस्तीर्थे । निष्णातिरिति मतं चेत् सुषामादिषु द्रष्टव्यम् ॥१२।

## १३. प्रष्ठोऽग्रगे

अग्रगेऽर्थे प्रष्ठ इति भवति । प्रतिष्ठत इति प्रष्ठः । **"सर्वनारीगुणैः प्रष्ठाम्"** इति च । अग्रग इति किम् ? प्रस्थो यवानाम् ॥१३।

## १४. विण्यहः सहेः

विणि सति अहान्तस्य सहेः षो भवति । तुराषाट्, तुराषाड्भ्याम् । अह इति किम् ? 'तुरासाहं पुरोधाय' ॥१४।

## १५. वेः स्त्रो नाम्नि

विपूर्वस्य स्तृणातेः संज्ञायामवयवत्वेन स्थितस्य सस्य षो भवति। विष्टारो बृहतीच्छन्दः, विष्टारः पङ्क्तिश्छन्दः। विष्टरः कुशमुष्ट्यादिः। नाम्नीति किम् ? विस्तारः पटस्य। कथं विस्तारो विटपः। स्तृणोतेर्घञि ॥१५।

## १६. विकुपरिशमिभ्यः स्थलस्य

एभ्यः स्थलस्य सस्य षो भवति। विष्ठलम्, कुष्ठम्, **परिष्ठलम्**। शम्याः स्थलमिति ह्रस्वत्वे – शमिष्ठलम् ॥१६।

## १७. गोभूमिद्वित्रिकुशङ्क्वङ्गुमञ्जिपुञ्जिदिव्यग्निबर्हिषःस्थस्य

एभ्यः स्थस्य सस्य षो भवति। गोष्ठम्, भूमिर्ष्ठम्, द्विष्ठम्, त्रिष्ठम्, कुष्ठम्, शङ्कुष्ठम्, अङ्गुष्ठम्, मञ्जिष्ठम्, पुञ्जिष्ठम्, दिविष्ठम्। इहालुक् सप्तम्याः। अग्निष्ठः, बर्हिष्ठः। एभ्यः इति किम् ? वारिस्थः। स्थस्येति किम् ? गोस्थितिः ॥१७।

## १८. एत्यको नाम्नि

कुवर्जितान्निमित्तादेकारपरस्य सस्य संज्ञायां षो भवति। हरिषेण, वायुषेण। एतीति किम् ? त्रिस्रोताः। अक इति किम् ? विष्वक्सेनः। कस्य खत्वं चेत् कग्रहणं कवर्गोपलक्षणम्। विष्विति मूर्धन्यो निपातः। तस्य विष्वक् – विषुव – विषुवदादयः प्रयोगाः ॥१८।

## १९. इतो नक्षत्राद् वा

इदन्तान्नक्षत्रादेकारपरस्य सस्य संज्ञायां षो भवति वा। रोहिणिषेणः, रोहिणिसेनः ॥१९।

## २०. सुषामादिश्च

सुषामादिश्च मध्ये मूर्धन्यो भवति –

**सुषामा गौरिषक्थं च दुःषन्धिः सुष्ठु दुष्ठु च।**

**निःषमोऽपष्ठुनिःषेधदुःषेधाः सक्रतीषहः ॥**

**द्युषद्दिविषदौ देवे मृषा गोषाश्च नामनि।**

**आयुष्ठाम्बष्ठशेकुष्ठपरमष्ठाः सुषन्धि च॥**

**सव्येष्ठा परमेष्ठी च ये चान्ये मुनिभिः स्मृताः॥२०।**

## २१. प्रतिष्णातकपिष्ठलौ सूत्रगोत्रयोः

एतौ सूत्रगोत्रयोर्यथासंख्यं समूर्धन्यौ भवतः। प्रतिष्णातं सूत्रम् पाणिनेः, सुविशुद्धमित्यर्थः। कपिरिव स्थलतीति कपिष्ठलो गोत्रम्। सूत्रगोत्रयोरिति किम् ? प्रतिस्नातं शिरः। कपिस्थलं गिरिः॥२१।

## २२. ह्रस्वात् तादौ तद्धिते नाम्नः

ह्रस्वात् परस्य सस्य नाम्नो विहिते तादौ तद्धिते षो भवति। सर्पिष्टा, धनुष्टा। सर्पिष्ट्वम्, धनुष्ट्वम्। वपुष्ट्वम्, वपुष्टमम्। चतुष्टयम्, चतुष्ट्वम्। ह्रस्वादिति किम् ? गीस्त्वम्, उच्चैस्तराम्। तादाविति किम् ? सर्पिस्सात्। नाम्न इति किम् ? कुर्युस्तराम्, ददुस्तराम्। तद्धित इति किम् ? सर्पिस्तरति॥२२।

## २३. उपसर्गात् सुनोति-सुवति-स्यति-स्तौति-स्तोभतीनामनन्तरोऽपि

उपसर्गस्थान्निमित्ताद् एषामटा व्यवहितोऽव्यवहितोऽपि सः षो भवति। अभिषुणोति, अभ्यषुणोत्, अभिषुवति, अभ्यषुवत्। अभिष्यति, अभ्यष्यत्। अभिष्टौति, अभ्यष्टौत्। अभिष्टोभते, अभ्यष्टोभत। एवम् अनुषुणोति अन्वषुणोत्। य्वाभ्यामपि निमित्तवद्भावात्। तथा विसर्गान्तराये नामिनो निमित्तत्वमस्त्येव। निःषुणोति, दुःषुणोति। राच्च – निरष्टोभत, दुरष्टोभत॥२३।

## २४. स्थासेनिसेधतिसिचसन्जस्वन्जामडभ्यासान्तरश्च

उपसर्गस्थान्निमित्ताद् एषामडभ्यासान्तराऽनन्तरश्च सस्य षो भवति। प्रतिष्ठाता, प्रत्यष्ठात्, प्रतितष्ठौ। अभिषेणयति, अभ्यषेणयत्, अभिषि**षेणयिषति**। "**अभिषिषेणयिषुं भुवनानि यः**" निषेधति, न्यषेधत्, निषेषिध्यते। अभि**षिञ्चति**, अभ्यषिञ्चत्, अभिषिषिक्षति। अनुषजति, अन्वषजत्, अनुषिषङ्क्षति। परिष्वजते, पर्यष्वजत्, परिषिषङ्क्षते॥२४।

## २५. सदेरप्रतेः

अप्रतेरुपसर्गस्थान्निमित्तात् सदेरडभ्यासान्तरोऽनन्तरश्च सः षो भवति। निषीदति, न्यषीदत्, निषाषद्यते। निषिषत्सति। परिषीदन्त्यस्यामिति **परिषत्।** अप्रतेरिति किम् ? प्रतिसीदति ॥२५।

## २६. प्रतेरपि स्तन्भेः

निमित्तमात्रादुपसर्गस्थात् प्रतेरप्यडभ्यासान्तरश्च स्तन्भेः सः षो भवति। **प्रतिष्टभ्नाति**, प्रत्यष्टभ्नात्, प्रतिताष्टभ्यते। विष्टभ्नाति, व्यष्टभ्नात्, विताष्टभ्यते। अभिष्टभ्नाति, अभ्यष्टभ्नात्, अभिताष्टभ्यते। उपष्टब्धम्, उपष्टम्भम् इत्यार्षं चेत्, **सुषामादौ** द्रष्टव्यम् ॥२६।

## २७. अवादौर्जित्यनिकटाश्रयेषु

अवात् परस्य स्तन्भेरेष्वर्थेष्वडभ्यासान्तरश्च सः षो भवति। मल्लो मल्लमवष्टभ्नाति, तर्जयतीत्यर्थः। अवष्टभ्यतेऽनेनेति अवष्टम्भः स्वर्णम्। **"रघोरवष्टम्भमयेन पत्रिणा"।** सेनामवष्टभ्नाति आसीदतीत्यर्थः। दण्डमवष्टभ्नाति, अवलम्बते इत्यर्थः। एष्विति किम् ? अवस्तब्धो बाहीकः। शीतेन जडीकृत इत्यर्थः ॥२७।

## २८. वेश्च स्वनो भोजने

वेरवाच्च भोजनेऽर्थे स्वनोऽडभ्यासान्तरश्च सः षो भवति। विष्वणति, अवष्वणति। व्यष्वणत्, विषष्वणत्, विषष्वाण, अवषष्वाण। सशब्दभोजने स्वनिरिह वर्तते। भोजन इति किम् ? विस्वनति (अवस्वनति) विरौतीत्यर्थः ॥२८।

## २९. परिनिविभ्यः सेवते

एभ्यः सेवतेरडभ्यासान्तरश्च सः षो भवति। परिषेवते, निषेवते, विषेवते, परिषिषेवते पर्यषेवत, न्यषेवत, परिषिषेव इत्यादि। एभ्य इति किम् ? अभिसेवते ॥२९।

## ३०. सितसयसिवुसहसुटामनन्तरः

परिनिविभ्यः सितादीनामनन्तरः सः षो भवति। षिञः क्तः– परिषितम्, निषितम्, विषितम्, षिञोऽल् घश्च-परिषयः, निषयः, विषयः। परिषीव्यति, निषीव्यति, विषीव्यति, परिषहते, निषहते, विषहते। परिष्करोति। विष्किरः पक्षी। अनन्तर इति

किम् ? परिषिसेविषति (पर्यसेव्यत), विषासह्यते, परिषस्कार । परिनिविभ्य इत्येव – अभिसीव्यति, प्रतिस्किरति शत्रून् । प्रतेश्च हिंसार्थ इति सुट् ॥३०।

## ३१. सिवुसहसुट्स्तुस्वन्जां विभाषाटः

परिनिविभ्यः सिवादीनामटः परस्य सस्य षो भवति वा । पर्यषीव्यत्, पर्यसीव्यत् । पर्यषहत, पर्यसहत । पर्यष्करोत्, पर्यस्करोत् । पर्यष्टौत्, पर्यस्तौत् । पर्यष्वजत, पर्यस्वजत । स्तुस्वन्जोः प्राप्ते विभाषा ॥३१।

## ३२. व्यनुपर्यभिनिभ्यः स्यन्दतेरप्राणिनि

अप्राणिन्येभ्यः स्यन्दतेरनन्तरः सः षो भवति वा । विष्यन्दते, विस्यन्दते तैलम् । अनुष्यन्दते, अनुस्यन्दते । परिष्यन्दते, परिस्यन्दते । अभिष्यन्दते, अभिस्यन्दते । निष्यन्दते, निस्यन्दते । अप्राणिनीति किम् ? विस्यन्दते मत्स्याः ॥३२।

## ३३. परेः स्कन्देः

परेः परस्य स्कन्दतेरनन्तरः सः षो भवति वा । परिष्कन्दते, परिस्कन्दते ॥३३।

## ३४. वेरनिष्ठायाम्

वेः परस्य स्कन्दतेरनन्तरः सः षो भवति वा अनिष्ठायाम् । विष्कन्दते, विस्कन्दते । अनिष्ठायामिति किम् ? विस्कन्नः, विस्कन्नवान् ॥३४।

## ३५. स्फुरिस्फुल्योर्निर्निविभ्यः

एभ्यः स्फुरिस्फुल्योरनन्तरः सः षो भवति वा । निःष्फुरति, निःस्फुरति । निष्फुरति, निस्फुरति । विष्फुरति, विस्फुरति, निःष्फुलति, निःस्फुलति । निष्फुलति, निस्फुलति । विष्फुलति, विस्फुलति । एवं निःष्फुरितः, निःस्फुरितः । निःष्फुलितः, निःस्फुलितः इत्यादि ॥३५।

## ३६. नित्यं वेः स्कन्भेः

विपूर्वस्य स्कन्भेर्नित्यं षो भवति । **'ष्टभि, स्कभि प्रतिबन्धे'** (१/३९२), सौत्रो वा । विष्कम्भते, विष्कम्भिता, विष्कम्भः, विष्कभ्नाति, विष्कभ्नोति ॥३६।

## ३७. उपसर्गप्रादुर्भ्यामस्तेर्यस्वरेषु

उपसर्गस्थान्निमित्तात् प्रादुषश्च परस्यास्तेर्यस्वरेषु सः षो भवति । बहुवचनमयथासंख्यार्थम् । प्रतिष्यात्, अनुष्यात् । अभिषन्ति, अनुषन्ति । प्रादुःष्यात्, प्रादुःषन्ति । यस्वरेष्विति किम् ? अभिस्तः, प्रादुस्तः । अनन्तर इत्येव – अभ्यसानि, प्रादुरासीत् ॥३७॥

## ३८. सुविनिदुर्भ्यः सुपः

सुपः इति स्वपेः कृतसम्प्रसारणस्य निर्देशः । एभ्यः सुपः सः षो भवति । सुषुप्यते, सुषुप्तः, सुषुप्तिः । एवं विषुप्यते, निःषुप्यते, दुःषुप्यते । सम्प्रसारणनिर्देशः किम् ? सुस्वपिति, सुस्वप्नः ॥३८॥

## ३९. समसूत्योश्च

सुविनिदुर्भ्यः समसूत्योश्च सः षो भवति । सुषमम्, विषमम्, निःषमम्, दुःषमम्, सुषूतिः, विषूतिः, निःषूतिः, दुःषूतिः ॥३९॥

## ४०. निसस्तप्यनभ्यावृत्तौ

अनभ्यावृत्तावपौनःपुन्येऽर्थे तपतौ परतो निसः षो भवति । निष्टपति सुवर्णम् परीक्षकः, सकृद् धमतीत्यर्थः । अनभ्यावृत्ताविति किम् ? निस्तपति सुवर्णं घटकः । पुनः पुनर्धमतीत्यर्थः ॥४०॥

## ४१. न सात् कृसरधूसरादिषु

सात्प्रत्यये कृसरधूसरादिषु च सस्य षो न भवति । वारिसात्, बिन्दुसात् । कृधूराभ्यः सरक् । कृसरः, कृसरा । धूसरः, धूसरा । 'महिषधूसरितः सरितस्तटः' इति । सुस्थः, सुस्थितिः । दुःस्थः, दुःस्थितिः । परिस्थः, परिस्थितिः ॥४१॥

## ४२. बहुच् प्रकृत्युत्तरपदादेः

बहुच्प्रकृतेरुत्तरपदस्य चादेः सस्य षो न भवति । बहुसेतुः, कपिसेतुः, गिरिसेतुः । दधिसेतुः । बहुच्प्रकृत्युत्तरपदयोः पदत्वं नास्तीत्युभयोरुपादानम् ॥४२॥

## ४३. सिचश्चेक्रीयिते

सिचश्चेक्रीयिते परे सस्य षो न भवति । सेसिच्यते । उपसर्गाश्रयोऽपि बाध्यते । अभिसेसिच्यते ॥४३।

## ४४. निप्रतिभ्यां स्तब्धस्य

आभ्यां स्तब्धस्य सः षो न भवति । प्रतेरपीति प्राप्तेः निस्तब्धः, प्रतिस्तब्धः । निष्टब्धश्छात्र इति निस्पूर्वस्य ॥४४।

## ४५. उपसर्गात् स्तन्भुसिवुसहां चणि

उपसर्गस्थादेषां चणि षो न भवति । व्यतस्तम्भत, पर्यसीषिवत्, पर्यसीषहत् । उपसर्गाश्रयोऽनेन बाध्यते । धात्ववयवात्तु निमित्तादुपसर्गादपि स्यादेव ॥४५।

## ४६. स्यतिसुवोरभ्यासे

अनयोरभ्यासे षो न भवति । अभिससौ, अभिसुसूषति, स्तौतीनन्तयोरेव षणीति नियमाद् धातोरपि न स्यात् । अभिसिषासति, अभिसेषीयते । अभिसुषाव, अभिसोषूयते । एषु धातोः स्यादेव ॥४६।

## ४७. स्ये च सुञः

सुञोऽभ्यासे स्ये च परतः षो न भवति। अभिसुषाव, अभिसोषूयते, अभिसुसूषति । षणि नियमात् पूर्ववत् । स्ये च अभिसोष्यते, अभ्यसोष्यत । अभिसुसूषतीति क्विब् दृश्यते चेत् – अभिसुसूरिति धूसरादित्वात् ॥४७।

## ४८. सोढश्च

सोढित्यस्य च षो न भवति । विसोढः, परिसोढः । विसोढुम्, परिसोढुम् । परिसोढा, विसोढा । विसोढव्यम्, परिसोढव्यम् । ढकारनिर्देशः किम् ? विषहते, परिषहते । सितसयसिवुसहसुटामिति षत्वम् ॥४८।

## ४९. सेधतेर्गतौ

गतावर्थे सेधतेः षो न भवति । अभिसेधति गौः ॥४९।

## ५०. सदिस्वन्जोः परोक्षायामभ्यासात्

परोक्षायामनयोरभ्यासात् परः षो न भवति। विषसाद। अभिषस्वन्जे (परिषस्वजे)। अभ्यासादित्यभ्यासे प्रतिषेधो मा भूत् ॥५०।

## ५१. इनि स्विदिस्वदिसहां सनि

इनि सत्येषां सनि परतोऽभ्यासात् षो न भवति। सिस्वेदयिषति, सिस्वादयिषति। सिसाहयिषति।इनीति किम्? सिष्वित्सति।अभ्यासादिति किम्? विषिसाहयिषति ॥५१।

**॥इति महामहोपाध्यायश्रीश्रीपतिदत्तविरचितकातन्त्रपरिशिष्टे षत्वप्रकरणं समाप्तम्॥**

●

# णत्वप्रकरणम्

## १. णो नः

निमित्तादिति वर्तते। निमित्तं त्विह स्वरादिव्यवहिताश्च रषृवर्णाः, निमित्तान्नस्य णो भवतीत्यधिकर्तव्यम् ॥१।

## २. पूर्वपदस्थात् संज्ञायाम्

पूर्वपदस्थान्निमित्तात् संज्ञायामुत्तरपदस्थस्य नस्य णो भवति। शूर्पणखा, द्रुणसः, खरणसः। संज्ञेति शब्दरूढिरिह गृह्यते। तेन अग्रणीः, ग्रामणीः, अक्षौहिणी सेनेति। वृत्तावप्येकपदत्वमस्तीति नियमोऽयम्। स तु पूर्वपदस्थादुत्तरपदस्थस्यासंज्ञायां णत्वं निवर्तयति। ताम्रनखः, शुष्कनखः। प्रत्ययस्य पूर्वस्थादपि णत्वं स्यात्। दद्रुणः, लक्षणः। मन्त्वर्थे नप्रत्ययः ॥२।

## ३. वनस्याग्रेकोटरादेः

अग्रे – कोटरादेः परस्य वनस्य संज्ञायां णो भवति। अग्रेवणम्। सप्तम्याः समासोऽयं निपातनादलोपः। कोटरावणम्, सिध्रकावणम्, मिश्रकावणम्, शारिका-वणम्। पुरगशब्दो ह्रस्वादिस्वर इति मतम् – पुरगावणम्। दीर्घत्वं वक्ष्यते। नियमः किम् ? कुबेरवनम्, शतपत्रवनम् ॥३।

## ४. प्रनिरन्तरिक्षुप्लक्षशराम्रकार्ष्यपीयूक्षाखदिरेभ्यः

एभ्यो वनस्य णो भवति। प्रकृष्टं वनम् प्रवणम्, वनान्निर्गतं निर्वणम्, वनस्यान्तः अन्तर्वणम्। इक्षुवणम्, प्लक्षवणम्, शरवणम्, आम्रवणम्, कार्ष्यवणम्, पीयूक्षावणम्, खदिरवणम् ॥४।

## ५. द्वित्रिस्वरेभ्यो वौषधिवृक्षेभ्योऽनिरिकादेः

द्विस्वरेभ्यस्त्रिस्वरेभ्यश्च ओषधिवृक्षेभ्यः अनिरिकादेः परस्य वनस्य णो भवति वा। फलपाकान्तान्युदभिदान्योषधयः। व्रीहिवणम्, व्रीहिवनम्। नीवारवणम्, नीवारवनम्।

वृक्षेभ्यश्च – शिग्रुवणम्, शिग्रुवनम् । शिरीषवणम्, शिरीषवनम् । द्वित्रिस्वरेभ्य इति किम् ? राजमाषवनम्, पारिभद्रवनम् । ओषधिवृक्षेभ्य इति किम् ? दूर्वावनम् । अनिरिकादेरिति किम् ? इरिकावनम्, तिमिरावनम्, चीरिकावनम् । इरिकादिनिषधान्न यथासंख्यमिहेति ।।५।

## ६. आदह्नस्य

अदन्तात् सनिमित्तात् परस्याप्रत्ययान्तस्याह्नो नस्य णो भवति । पूर्वाह्णः, अपराह्णः, प्राह्णः । आदिति किम् ? निरह्नः । अप्रत्ययनिर्देशः किम् ? दीर्घाह्नी प्रावृट् । दीर्घाहनावृतू ।।६।

## ७. वाह्याद् वाहनस्य

उह्यते इति वाह्यम् । उह्यते येन तद् वाहनम् इत्युणादिको ण्युट्, घुटि ह्रस्वस्य दीर्घाभावात् । सनिमित्ताद् वाह्यात् परस्य वाहनस्य नस्य णो भवति । इक्षुवाहणम्, दर्भवाहणं शकटम् । इक्षुरुह्यतेऽनेनेत्यर्थः । "**दूरादपावर्तितभारवाहणाः**" इति । वाह्यादिति किम् ? दाक्षेः स्वं वाहनं दाक्षिवाहनम् । एवं "**कुथेन नागेन्द्रमिवेन्द्र-वाहनम्**" (शिशु० १/८) । यदा त्वसौ वोढव्यस्तदा दाक्षिवाहणम्, इन्द्रवाहणं भवत्येव ।।७।

## ८. देशे पानस्य

पूर्वपदस्थान्निमित्तात् पानस्य नस्य णो भवति देशेऽर्थे । पीयते इति पानम् । क्षीरं पानमत्रेति क्षीरपाणा उशीनराः । सौवीरपाणा बाह्लीकाः । कषायपाणा गान्धाराः । सुरापाणाः प्राच्याः । देशे कृतणत्वाः केनचिन्निमित्तेन पुरुषेष्वपि वर्तन्त एव ।।८।

## ९. भावकरणयोर्वा

भावकरणयोर्वर्तमानस्य युडन्तस्य पानस्य पूर्वपदस्थान्निमित्ताण्णो भवति वा । क्षीरपाणम्, क्षीरपानम् । क्षीरपाणी, क्षीरपानी पात्री । अनयोरिति किम् ? उष्ट्रेण पीयते उष्ट्रपानो मणिः ।।९।

## १०. गिरिनद्यादिषु च

गिरिनद्यादिषु च नस्य णो भवति वा। गिरिणदी, गिरिनदी। गिरिणद्धम्, गिरिनद्धम्। वक्रणितम्बा, वक्रनितम्बा। वक्रणदी, वक्रनदी।

**गिरिनद्यपि गिरिनद्धं वक्रनितम्बा तथैव माषोणम्।**

**वक्रनदी च गणेऽस्मिन् विनिश्चितो गिरिनितम्बोऽपि॥१०।**

## ११. स्यादिसमासान्तयोरयुवादेः

पूर्वपदस्थान्निमित्तात् स्यादिसंबन्धिनः समासान्नस्य चायुवादेर्नस्य णो भवति वा। तन्त्रवापेण, तन्त्रवापेन। वारिवाहेण, वारिवाहेन। माषवापाणाम्, माषवापानाम्। समासान्नस्य च – व्रीहिवापिणौ, व्रीहिवापिनौ। व्रीहिवापिणि, व्रीहिवापिनि। स्यादिसमासान्तयोरिति किम्? वीरभगिनी। अयुवादेरिति किम्? शूद्रयुवानः, क्षत्रिययुवानः, परिपक्वानि, प्रपक्वानि तन्त्रवाक्येन। पूर्वपदस्थादित्येव – कुम्भहारिणौ॥११।

## १२. नित्यमेकस्वरकवर्गवत्युत्तरपदस्य

समासान्तभूतस्य शब्दस्योत्तरपदमिति **रूढिः।** तस्मिन्नेकस्वरे कवर्गवति च सति स्यादिसमासन्तयोरयुवादेर्नस्य णो भवति नित्यम्। क्षीरपेण, क्षीरपाणाम्। दीर्घकायेण, वक्रमुखेण, वीरभोगेण, दीर्घमेघेण। समासान्तस्य च वृत्रहणौ। वस्त्रयुगाणि। अयुवादेरित्यधिकर्तव्यमेव नित्यमपि मा भूदिति॥१२।

## १३. त्रिचतुर्भ्यां हायनस्य वयसि

त्रिचतुर्भ्यां परस्य हायनस्य वयसि गम्यमाने नस्य णो भवति। त्रिहायणो दम्यो वत्सः। चतुर्हायणी गौः। वयसीति किम्? चतुर्हायना शाला॥१३।

## १४. पूर्वापहा (य) णादयः

पूर्वापहा (य) णादयः कृतणत्वाः साधवो भवन्ति। पूर्वापहा (य) णाः। अपरापहाणाः, संप्रापहाणाः॥१४।

## १५. नसस्य

प्रादिभ्यो नासाया नसं वक्ष्यति, तस्येह ग्रहणम्। निमित्तात् परस्य नासिकादेशस्य नसशब्दस्य णो भवति। प्रणसम्, दुर्णसम्, निर्णसं मुखम्॥१५।

## १६. उपसर्गाण्णोपदेशस्य

उपसर्गस्थान्निमित्तात् णोपदेशस्य धातोर्नस्य णो भवति। प्रणमति, प्रणम्य, खरप्रणादी, परिणयति, निर्णयति, अन्तर्णयति। अन्तरो णत्वविधावुपसर्गत्वात्। उपसर्गादिति किम्? वृक्षं वृक्षं परि नयति। प्रनायको राजन्यः। नामोपनिपातिनोऽनुपसर्गत्वात् कथं प्रणायकः, प्रणयतीति वुणि स्यात्। णोपदेशस्येति किम्? प्रनृत्यति, प्रनाथते। नाथिरप्यनजोपदेशः **पारायणे**। **भाष्ये** तु नोपदेश एवायम्। कथं दुर्नयति, उपसर्गप्रतिरूपकत्वान्न णत्वमिति **अष्टकवृत्तिकृतः**। **"उपसर्गाददूरे"** इति पठन्ति **एके**, तदा दुर्नयतीत्यादयोऽकृतणत्वा एवेति मतमेत**च्चूर्णिर**प्यनुगृह्णाति तदा क्षुभ्नादिपाठे दुर्नयतीह मन्तव्यम्॥१६।

## १७. अनितेरन्तस्यापि

उपसर्गस्थान्निमित्तात् परस्यानितेरन्तस्यापि नस्य णो भवति। प्राणिति, प्राणकः, पर्यणिति, निराणीत्, अन्तरणनम्, दुराणीत्। क्विप् – हे प्राण्! हे पर्यण्! केचिदिह परैः प्रतिषेधमिच्छन्ति – पर्यनिति, हे पर्यन्॥१७।

## १८. अभ्यासाच्च

उपसर्गस्थान्निमित्तादभ्यासात् परस्य चानितेर्नस्य णो भवति। प्राणिणत्, पर्यणिणत्, प्राणिणिषति, पर्यणिणिषति। कृतणत्वस्य द्विर्वचनं चेत् – प्रणिनाय, प्रणिनीषति। "परिणिनंसुरसावुपैति" इत्यादावपि णत्वद्वयप्रसङ्गः॥१८।

## १९. हिन्वानिमीनाम्

उपसर्गस्थान्निमित्ताद् हिन्वानिमीत्येतेषां नस्य णो भवति। प्रहिणोति, प्रवपाणि, प्रयाणि, प्रमीणाति॥१९।

## २०. हनः

उपसर्गस्थान्निमित्ताद् हनो नस्य णो भवति। प्रहणनम्, प्रहण्यते॥२०।

## २१. वमोर्वा

उपसर्गस्थान्निमित्ताद् हनो नस्य वमोः परतो णो भवति वा। प्रहण्वः, प्रहन्वः। प्रहण्मः, प्रहन्मः॥२१।

## २२. अयनस्य चादेशेऽन्तरः

अन्तरः परस्य हनोऽयनस्य चादेशादन्यत्र णो भवति । अन्तर्हण्यते, अन्तरयणम् । आदेश इति किम् ? अन्तर्हननोऽन्तरयनो देशः । कथमन्तर्घणो देशः । ये तु निपातसूत्रे कृतणत्वं निर्दिशन्ति तन्मते स्यात् ॥२२।

## २३. निंसिनिक्षिनिन्दां वा कृति

उपसर्गस्थान्निमित्तात् कृत्येषां नस्य णो भवति वा । प्रणिंसकः, प्रनिंसकः । प्रणिक्षकः, प्रनिक्षकः । प्रणिन्दकः, प्रनिन्दकः । कृतीति किम् ? प्रणिंस्ते, प्रणिक्षति, प्रणिन्दति, नित्यं णोपदेशत्वात् । कृतीत्यपठद्भिरेषां णोपदेशोऽप्यनादरणीय एव ॥२३।

## २४. नेर्नद-गद-पद-पत-दा-मेङ्-माङ्-स्यति-हन्ति-याति-वाति-द्राति-प्साति-वपति-वहति-शाम्यति-चिनोति-दोग्धिषु

नदादिषु परत उपसर्गस्थान्निमित्तात् नेर्नस्य णो भवति । प्रणिनदति, प्रणिगदति, प्रणिपतति, प्रणिपद्यते, प्रणिदत्ते, प्रणिधत्ते, प्रणिमयते, प्रणिमिमीते, प्रणिष्यति, प्रणिहन्ति, प्रणियाति, प्रणिवाति, प्रणिद्राति, प्रणिप्साति, प्रणिवपति, प्रणिवहति, प्रणिशाम्यति, प्रणिचिनोति, प्रणिदोग्धि ॥२४।

## २५. अकखादावुपदेशेऽषान्ते वा

उपदेशे यो न कखादिर्न च सान्तस्तस्मिन् धातावुपसर्गस्थान्निमित्तात् परस्य नेर्नस्य णो भवति वा । प्रणिपचति, प्रनिपचति । प्रणिरौति, प्रनिरौति । अकखादाविति किम् ? प्रनिक्वणति, प्रनिखिद्यते । अषान्त इति किम् ? प्रनिपुष्णाति । उपदेश इति किम् ? 'प्रनिचकार, प्रनिचखाद' इति प्रतिषेधो यथा स्यात् । प्रणिनंष्टा, प्रणियष्टेति च विधिः ॥२५।

## २६. स्वरात् कृतः

उपसर्गस्थान्निमित्तात् स्वरात् परस्य कृतो नकारस्य णो भवति । प्रयाणम्, निर्याणम्, अन्तर्याणम्, प्रेङ्खणम्, प्रोम्भणम्, निर्वहमाणः, प्रवहणीयम्, अप्रयाणिस्ते जाल्मः । प्रहीणः, प्रहीणवान्, हाग्लाभ्यां क्त्यर्थे निरौणादिकः प्रहाणिः । प्रपायिणौ, काकप्रपायिणौ, मधुप्रपायिणौ । समासान्तेऽपि उपसर्गादयं विधिः परत्वात् । स्वरादिति किम् ? प्रभुग्नः, निर्भुग्नः, निमग्नः ॥२६।

## २७. निर्विण्णम्

निर्पूर्वाद् विदः क्ते निर्विण्णमिति निपात्यते। **'निर्विण्णोऽध्ययने जडः'**। **'अदण्ड्या दण्डपातेन निर्विण्णा यस्य तु प्रजाः'**। निर्विदिरिह वैराग्यार्थः ॥२७।

## २८. वेनः

इनन्ताद् विहितस्य कृतो नकारस्योपसर्गस्थान्निमित्ताद् वा णो भवति। प्रयापणा, प्रायापना। प्रवाहणीयम्, प्रवाहनीयम्। विहितविशेषणत्वाद् व्यवहितस्यापि प्रयाप्यमाणम्, प्रयाप्यमानम् ॥२८।

## २९. व्यञ्जनादेर्नाम्युपधात्

व्यञ्जनादेर्नाम्युपधाद् धातोरुपसर्गस्थान्निमित्तात् कृतो नस्य णो भवति वा। प्रकोपणम्, प्रकोपनम्। प्रगूहणम्, प्रगूहनम्। व्यञ्जनादेरिति किम् ? प्रोहणम्, प्रोखणम्। नाम्युपधादिति किम् ? प्रवहणम्। स्वरादित्येव– प्रभुग्नम्। विहितविशेषणात्– प्रकुप्यमाणम्, प्रकुप्यमानम् ॥२९।

## ३०. नानुषङ्गिणः

अनुषङ्गिणो व्यञ्जनादेर्धातोः कृतो नस्य णो न भवति। नाम्युपधादिति न स्मर्यते– प्रकम्पनम्, प्रमङ्गनम्, प्रगुम्फनम्, प्रकम्पणा, प्रमङ्गणा, प्रगुम्फणा। इनन्तानामनुषङ्गित्वाभावादिति। व्यञ्जनादेरित्येव– प्रेङ्खणम्, प्रोम्भणम् ॥३०।

## ३१. इनश्च भाभूपूङ्कमिगमिख्याप्यायिवेपः

भाप्रभृतिभ्यः केवलेभ्य इनन्तेभ्योऽपि कृतो नस्य णो न भवति। प्रभानम्, प्रभापना, प्रभवनम्, प्रभावना, प्रपवनम्, प्रपावना। पूञस्तु प्रपवणम्, प्रपावणेति। प्रकमनम्, प्रकामना। प्रगमनम्, प्रगमना। प्रख्यानम्, प्रख्यापना। प्रप्यायनम्, प्रप्यायना। प्रवेपनम्, प्रवेपना। ख्याञिह **त्रिमुनिमते चान्द्रमते** च न पठ्यते ॥३१।

## ३२. हो घि हनः

हनो हस्य घकारे सति णो न भवति। शत्रुघ्नः। पूर्वपदस्थादपि प्राप्तः– वृत्रघ्नः। नित्यम् एकस्वरकवर्गवतीति– अन्तर्घ्नन्ति, अन्तरघानि। अयनस्य चादेशे-

ऽन्तर इति । प्रघ्नन्ति, प्राघानि । हन इति कथम् – द्रुघणः, प्रघणः । इह हनो घनिरादिश्यते, न तु हस्य घः । हन इति किम् ? अर्घेण । अर्हेर्घञि न्यङ्क्वादित्वाद् घः ॥३२।

## ३३. पदे षः

पदे परतो यः षकारस्तस्माण्णो न भवति । सर्पिष्पानम्, धनुष्पानम् । पद इति किम् ? सर्पिष्केण, धनुष्केण ॥३३।

## ३४. अतद्धितेनाङ् पदेनान्तराये

अतद्धिते परतो यदाङोऽन्यत् पदं तेनान्तराये नस्य णो न भवति । माषकुम्भवापेन, चतुरङ्गयोगेन, नक्रमुखौघेन, वक्रमेघमुखेन, प्रावनह्यति, पर्यवनह्यति । अनाङिति किम् ? पर्याणद्धम्, निराणद्धम् । अतद्धित इति किम् ? आर्द्रगोमयेण, वीरगोमिणा । **चान्द्रे** तु मयट्यप्ययं निषेधः ॥३४।

## ३५. लृवर्णेन

लृवर्णेनान्तराये नस्य णो न भवति । प्रक्लृप्यमानम्, परिक्लृप्यमानम् । **भाष्ये**ऽप्येतत् समर्थितम् । **चान्द्रे** त्वेतन्न लभ्यते ॥३५।

## ३६. नशो ड – ष – तदादेशेषु

डे षे तदादेशे च नशो णो न भवति । प्रनङ्भ्याम्, प्रनट्, प्रनट्शूरः, प्रनष्टम्, प्रनंक्ष्यति । एष्विति किम् ? प्रणश्यति, प्रणक्, प्रणक्षु ॥३६।

## ३७. क्षुभ्नादेश्च

क्षुभ्नादेश्च नस्य णो न भवति । क्षुभ्नाति, क्षुभ्नीतः, क्षुभ्नन्ति । तृप्नोति, तृप्नुतः, तृप्नुवन्ति । नरीनृत्यते । नृतिं चर्करीतं भाषायामपीच्छन्ति । नरीनर्ति, नरिनर्ति, नर्नर्ति । परिनदनम्, दुर्नद्धिः, दुर्नद्धः । त्रिषु णोपदेशत्वात् प्राप्तः । आचार्यानी, आचार्यभोगीनः । संज्ञायां तु – गिरिनगरम्, हरिनन्दी, शरनिवेशः, परिनर्तनम्, परिगहनम्, परिनन्दनः । दर्भानूपः, सर्भानुः, सूत्रनटः, हर्यग्निः, शरनिवासः, ऋगयनम्, दुर्नाम,

सर्वनाम, नरवाहनः, नृनयनम् । क्षुभस्तृप्नुरिमाविह नृतिरभ्यासात् परोऽथ परिनदनम् । दुर्नद्धिर्दुर्नद्धोऽपि आचार्यादानभोगीनौ –

**नन्दिन्-नगर-निवेशा नर्तनगहने च नन्दनानूपौ ।**

**भानुनटाग्निनिवासा अयनमृचो नाम चाख्यायाम् ।**

**नरवाहनो नृनयनं क्षुभ्नातिगणोऽयमाकृतिगणेयः ॥ ३७ ।**

**॥ इति महामहोपाध्यायश्रीश्रीपतिदत्तविरचितायां कातन्त्रपरिशिष्टवृत्तौ णत्वप्रकरणं समाप्तम् ॥**

●

# परिशिष्टम् — २

## [रूपसिद्धिशब्दाः]


| शब्दरूपम् | पृ० सं० |
|---|---|
| १. अग्नयः | १४१ |
| २. अग्नये | १४५ |
| ३. अग्निना | १३९ |
| ४. अग्निम् | ४२ |
| ५. अग्नी | १३५ |
| ६. अग्नीनाम् | १७६, २३३ |
| ७. अग्नीन् | १३७ |
| ८. अग्नेः | १४७ |
| ९. अग्नौ | २०८ |
| १०. अतिजरम् | २०८ |
| ११. अतितव | ३७३ |
| १२. अतितुभ्यम् | ३७०, ३७१ |
| १३. अतित्वभ्यम् | ३७५ |
| १४. अतित्वयि | ३५७, ३८१ |
| १५. अतित्वान् | ३५७, ३६५ |
| १६. अतित्वासु | ३८४ |
| १७. अतिदध्ना | २२४ |
| १८. अतिदिवम् | २५५ |
| १९. अतिद्याम् | २५५ |
| २०. अतिभुवः | ३१८ |
| २१. अतिमभ्यम् | ३७५ |
| २२. अतिमम | ३७३ |
| २३. अतिमयि | ३५७, ३८१ |
| २४. अतिमह्यम् | ३७१ |
| २५. अतिमान् | ३५७, ३६५ |
| २६. अतिमासु | ३८४ |
| २७. अतियुवत् | ३७४ |
| २८. अतियुवाभिः | ३६१, ३८४ |
| २९. अतियुष्मभ्यम् | ३५७ |
| ३०. अतियूयम् | ३७० |
| ३१. अतिराभ्याम् | ३८६ |
| ३२. अतिवयम् | ३७० |
| ३३. अत्यस्थ्ना | २२४ |
| ३४. अत्यस्मभ्यम् | ३५७ |
| ३५. अत्यहम् | ३६४ |

३६. अत्यावत् ३७४
३७. अत्यावाभिः ३६१, ३८४
३८. अद्भिः ४३३
३९. अनडुद्भ्याम् २८१
४०. अनडुहः २८१
४१. अनडुहा २८१, २८२
४२. अनडुह्यम् २८२
४३. अनड्वान् २८३
४४. अनड्वाही २८२
४५. अनयोः ४१९
४६. अनेन ४१९
४७. अनेहा २४७
४८. अन्यत् २१०
४९. अन्यतरत् २१०
५०. अपक्त ५४
५१. अमी ४३१
५२. अमीभिः ४२५
५३. अमीभ्यः ४३२
५४. अमुना १४०
५५. अमुम् ४३०
५६. अमुष्मात् २८९
५७. अमुष्मिन् २८९
५८. अमू ४३०
५९. अमून् ४३०
६०. अयम् ४१७
६१. अर्यमा २४५
६२. अर्वती ३९५
६३. अर्वत्यम् ३९५
६४. अर्वत्सु ३९५
६५. अर्वन्तः ३९५
६६. अर्वन्तौ ३९५
६७. अल्पाः ९८
६८. अल्पे ९८
६९. अश्वकः ३३४
७०. अष्टाभिः ३८८
७१. अष्टाभ्यः ३८८
७२. अष्टासु ३८८
७३. अष्टौ ३९१, ३९२
७४. असकौ ४१२, ४२८
७५. असौ ४१२, ४२७
७६. अस्थ्ना २२४
७७. अस्मकाभिः ३३४
७८. अस्मत् ३७४
७९. अस्मभ्यम् ३५७, ३७५

८०. अस्माकं पापनाशनः ३५१
८१. अस्माकम् ३७७
८२. अस्मान् ३६५
८३. अहः ४६२
८४. अहःसु ४६२
८५. अहन्धनः ४६१
८६. अहम् ३६८
८७. अहस्त्वम् ४६२
८८. अक्ष्णा २२४
८९. अहोभ्याम् ४६२
९०. आनडुहिकः २८२
९१. आपः २४०
९२. आभ्याम् ५८, ४१८
९३. आर्वतम् ३९५
९४. आवाभ्याम् ३६०, ३८४
९५. आवाम् ३६४
९६. आवयोः ३८०
९७. आशीः ४५८
९८. आशीःषु ४५८
९९. आशीर्भ्याम् ४५८
१००. आशीस्ता ४५९
१०१. इच्छति ४८१
१०२. इतरत् २१०
१०३. इदम् ४१७
१०४. इमं घटमानय अथो एनं परिवर्तय ४२२
१०५. इमकौ ४११
१०६. इमौ ४११
१०७. इयम् ४१७
१०८. उखास्रत् ४३८, ४८९
१०९. उखास्रत्कल्पः ४३८
११०. उखास्रद् ४८९
१११. उखास्रद्भ्याम् ४३८
११२. उच्चकैः ३३४
११३. उत्तरपूर्वस्यै १११
११४. उदीचः ३००
११५. उदीचा ३००
११६. उदीची ३००
११७. उपानत् ४३६
११८. उपानद्भ्याम् ४३६
११९. उशना ६६, २४७
१२०. उष्ट्रिका ३३९
१२१. एकपदः ३०४

१२२. एतं व्याकरणमध्यापय अथो एनं वेदमध्यापय ४२२
१२३. एतयोः शोभनं शीलम् अथो एनयोश्च प्रभूतं स्वम् ४२२
१२४. एतेन रात्रिरधीता अथो एनेनाहरप्यधीतम् ४२२
१२५. एनम् ४२२
१२६. एनयोः ४२३
१२७. एनेन ४२३
१२८. एभिः ४१९,४२४
१२९. एषु ७१
१३०. एहकि ३३४
१३१. ऋभुक्षः २७३
१३२. ऋभुक्षा २७३
१३३. ऋभुक्षाः २७०
१३४. ऋभुक्षाणौ २७२
१३५. औदीच्यम् ३००
१३६. कः ४०९
१३७. कटचिकीः ४६४
१३८. कतमत् २१०
१३९. कतरकतमाः ९९
१४०. कतरकतमे ९९
१४१. कतरत् २१०
१४२. कति १८४
१४३. कदा ४१०
१४४. कर्तारः १६७
१४५. कर्तारौ १६७
१४६. कर्तृणा कुलेन २३०
१४७. कर्तृणाम् २३३
१४८. कर्त्रा कुलेन २३०
१४९. कीलालपः ३१२
१५०. कीलालपा ३१२
१५१. कुण्डम् २०८
१५२. कुण्डे २१२
१५३. कुम्भपदी ३०४
१५४. कौ ४१०
१५५. गच्छति ४८१
१५६. गर्धप् ४५५
१५७. गर्धप्त्वम् ४५५
१५८. गर्धब्भ्याम् ४५५
१५९. गाः २६८
१६०. गाम् २६८
१६१. गावः २६६
१६२. गावौ २६६
१६३. गीः ४६०, ४८५

१६४. गीर्भ्याम् ४६०
१६५. गीर्षु ४६०
१६६. गीस्तरा ४६०
१६७. गोः १४८
१६८. गोऽचः २९८
१६९. गोऽचा २९८
१७०. गोऽची २९८
१७१. गोधुक् ४४४
१७२. गोधुक्तमः ४४४
१७३. गोधुग्भ्याम् ४४४
१७४. गोमान् २४२
१७५. गौः २६६
१७६. गौच्यम् २९८
१७७.ग्रामण्यः ३२१
१७८. ग्रामण्याम् १८५
१७९. ग्रामण्यौ ३२१
१८०. ग्रामो नौ ३४५
१८१. ग्रामो वाम् ३४५
१८२. चतसृणाम् ४०४
१८३. चतसृभिः ४०१
१८४. चतस्रः ४०१,४०३
१८५. चतुरः २८०
१८६. चतुर्णाम् १७९
१८७. चतुर्थः २८०
१८८. चतुर्भिः २८०
१८९. चातुरिकः २८०
१९०. चातुर्यम् २८०
१९१. चित्रलिग्भिः ४७९
१९२. जरसः ३९८
१९३. जरसौ ३९८
१९४. जराः ३९८
१९५. जरे ३९८
१९६. जक्षति २५९
१९७. जक्षत् २५८
१९८. जक्षन्ति २५९
१९९. जाग्रति २५९
२००. जाग्रत् २५८
२०१. जाग्रन्ति २५९
२०२. ज्ञानभुत् ४५५
२०३. ज्ञानभुत्त्वम् ४५५
२०४. ज्ञानभुत्सु ४८०
२०५. ज्ञानभुद्भ्याम् ४५५
२०६. तडित् १३३
२०७. तत् २०६
२०८. तत्र ४०८

२०९. तव ३७२
२१०. तासाम् ९४
२११. तिरश्चः २९९
२१२. तिरश्चा २९९
२१३. तिरश्ची २९९
२१४. तिसृणाम् ४०४
२१५. तिसृभिः ४०१
२१६. तिस्रः ४०१,४०३
२१७. तुदती कुले २६२
२१८. तुदती स्त्री २६२
२१९. तुदन्ती कुले २६२
२२०. तुदन्ती स्त्री २६२
२२१. तुभ्यम् ३७१
२२२. तुल्या ११३
२२३. तुल्योः ११३
२२४. तृष्णक् ४४७
२२५. तृष्णक्त्वम् ४४७
२२६. तृष्णग्भ्याम् ४४७
२२७. तृतीयस्यै १२५
२२८. तृतीयायै १२५
२२९. तैरश्च्यम् २९९
२३०. तैलकः ३३४
२३१. तौ ४०८
२३२. त्यौ ४०८
२३३. त्रयाणाम् १७८
२३४. त्वत् ३७४
२३५. त्वत्कपितृकः १०६
२३६. त्वम् ३६८
२३७. त्वयका ३३४
२३८. त्वया ३८०
२३९. त्वयि ३५७,३८१
२४०. त्वाम् ३६३
२४१. दण्डकतमाः १००
२४२. दण्डकतमे १००
२४३. दण्डी २४५
२४४. ददति २५९
२४५. ददत् २५८
२४६. ददन्ति २५९
२४७. दधत् २५८
२४८. दध्नः ३०९
२४९. दध्ना २२४,३०९
२५०. दक्षिणोत्तरपूर्वाणाम् १०२
२५१. दिवम् २५४२
२५२. दृक् ४४७

| | |
|---|---|
| २५३. दृक्त्वम् | ४४७ |
| २५४. दृग्भ्याम् | ४४७ |
| २५५. देवदत्तक: | ३३४ |
| २५६. देवेट् | ४४२,४८९ |
| २५७. देवेट्त्वम् | ४४२ |
| २५८. देवेड् | ४४२,४८९ |
| २५९. देवेड्भ्याम् | ४४२ |
| २६०. दोर्भ्याम् | ४७७ |
| २६१. द्याम् | २५४ |
| २६२. द्युगत: | २५२ |
| २६३. द्युत्वम् | २५३ |
| २६४. द्युभ्याम् | २५२ |
| २६५. द्युषु | २५२ |
| २६६. द्यौ: | २५३ |
| २६७. द्वितीयस्यै | १२४ |
| २६८. द्वितीयायै | १२४ |
| २६९. धनुर्भ्याम् | ४७७ |
| २७०. धानाका: | ३३४ |
| २७१. धू: | ४६०,४८५ |
| २७२. धूर्भ्याम् | ४६० |
| २७३. धूर्षु | ४६० |
| २७४. धूस्तरा | ४६० |
| २७५. धेनव: | १४२ |
| २७६. धेनवे | १४५,२०१ |
| २७७. धेनू | १३५ |
| २७८. धेनूनाम् | १७६,२३३ |
| २७९. धेनो: | १४७ |
| २८०. धेनौ | १५० |
| २८१. धेन्वै | २०१ |
| २८२. नदी | १३१ |
| २८३. नदी: | १३० |
| २८४. नदीनाम् | १७६ |
| २८५. नदीम् | १२९ |
| २८६. नद्या: | १२६ |
| २८७. नद्याम् | १२६ |
| २८८. नद्यै | ४६,१२५ |
| २८९. नप्तारौ | १६९ |
| २९०. निघुट् | ४५४ |
| २९१. निघुट्त्वम् | ४५४ |
| २९२. निघुड्भ्याम् | ४५४ |
| २९३. नियः | ३१४ |
| २९४. नियाम् | १८५ |
| २९५. नियौ | ३१४ |
| २९६. नीचकै: | ३३४ |

२९७. नृणाम् ४०५
२९८. नॄणाम् ४०५
२९९. पचतकि ३३४
३००. पञ्च १८४
३०१. पञ्चानाम् १८२,२३४
३०२. पटवः १४२
३०३. पटवे १४५
३०४. पटुना ४२,१३४,१३९
३०५. पटू १३५
३०६. पटून् १३८
३०७. पत्या १९०
३०८. पत्युः १५३
३०९. पत्यौ १५१
३१०. पथः २७३,२७४
३११. पथयति २७४
३१२. पथा २७३
३१३. पथिकः २७४
३१४. पद्मानि ३७,२१४,२१८
३१५. पन्थाः २७०
३१६. पन्थानौ २७१
३१७. पयः २०६
३१८. पयःसु ४८५
३१९. पयसी २१२
३२०. पयांसि ३८,५४, २१४,२१८
३२१. पयोभ्याम् ४८५
३२२. परमत्रयाणाम् १७८
३२३. पर्णध्वत् ४३८
३२४. पर्णध्वद्देश्यः ४३८
३२५. पर्णध्वद्भ्याम् ४३८
३२६. पाचिका ३३९
३२७. पाठिका ३३९
३२८. पितरः १६२
३२९. पितरि १६०
३३०. पितरौ १६२
३३१. पिता १५६
३३२. पितुः १५४
३३३. पितॄन् १५८
३३४. पुत्रस्ते ३४८
३३५. पुत्रस्ते दास्यति ३४९
३३६. पुत्रस्त्वा पातु ३४९
३३७. पुत्रो नः ३४३

३३८. पुत्रो मा पातु ३४९
३३९. पुत्रो मे ३४८
३४०. पुत्रो मे दास्यति ३४९
३४१. पुत्रो वः ३४३
३४२. पुम्भ्याम् २७८,४६४
३४३. पुंसः २७८
३४४. पुंसा २७८
३४५. पुंसु ४६४
३४६. पुंस्त्वम् २७८
३४७. पुरुदंशा २४७
३४८. पूर्वस्मात् ९१
३४९. पूर्वस्मिन् ९१
३५०. पूर्वात् ९१
३५१. पूर्वापरात् १०२
३५२. पूर्वापराय १०२
३५३. पूर्वे ९१
३५४. पूषा २४५
३५५. पेचुषः २९१
३५६. पेचुषम् २९२
३५७. पेचुषा २९१
३५८. पेचुषी २९१
३५९. पौंस्नम् २७८
३६०. प्रतिदीव्नः ३०९
३६१. प्रतिदीव्ना ३०९
३६२. प्रतीचः २९७
३६३. प्रतीचा २९७
३६४. प्रतीची २९८
३६५. प्रथमाः ९९
३६६. प्रथमे ९९
३६७. प्रष्ठौहः २९५
३६८. प्रष्ठौहा २९५
३६९. प्रष्ठौही २९५
३७०. प्रातीच्यम् २९८
३७१. प्राष्ठौह्यम् २९६
३७२. प्रियचतयति २८०
३७३. प्रियचतसृ कुलम् ४०१
३७४. प्रियतिसृ कुलम् ४०१
३७५. प्रियाष्टः ३८८
३७६. प्रियाष्टौ ३८८
३७७. बुद्धयः १४२
३७८. बुद्धये १४५,२००
३७९. बुद्धी १३५

३८०. बुद्ध्यै २००
३८१. भवान् २४२
३८२. भाती कुले २६२
३८३. भाती स्त्री २६२
३८४. भान्ती कुले २६२
३८५. भान्ती स्त्री २६२
३८६. भिन्धकि ३३४
३८७. भृज्जति ४७९
३८८. भ्रुवः ३२२
३८९. भ्रुवाम् १९७
३९०. भ्रुवे २०१
३९१. भ्रुवै २०१
३९२. भ्रुवौ ३२२
३९३. भ्रूणाम् १९७
३९४ मघवती ३९७
३९५. मघवत्यम् ३९७
३९६. मघवत्सु ३९७
३९७. मघवन्तः ३९७
३९८. मघवन्तौ ३९७
३९९. मघवान् ३९६
४००. मघोनः २९४
४०१. मघोना २९४
४०२. मघोनी २९४
४०३. मज्जति ४७९
४०४. मणिकः ३३४
४०५. मत्कपितृकः ७
४०६. मथः २७३, २७५
४०७. मथयति २७५
४०८. मथा २७३
४०९. मथिकः २७५
४१०. मधुलिट् ४४१
४११. मधुलिट्पाशः ४४१
४१२. मधुलिड्भ्याम् ४४१
४१३. मन्थाः २७०
४१४. मन्थानौ २७२
४१५. मम ३७२
४१६. मयका ३३४
४१७. मया ३८०
४१८. मयि ३५७,३८१
४१९. महतः २७७
४२०. महता २७७
४२१. महत्ता २७७
४२२. महत्सु २७७
४२३. महद्भ्याम् २७७

४२४. महान् २३८
४२५. महान्तौ २३८
४२६. मही १३१
४२७. मह्यम् ३७१
४२८. माघवतम् ३९७
४२९. मातरि १६०
४३०. माता १५६
४३१. मातुः १५५
४३२. माम् ३६३
४३३. माला ४७,११२
४३४. मालानाम् १७६
४३५. माले ११९
४३६. मासपूर्वाय १०४
४३७. मासावराः १०४
४३८. मासेन पूर्वाय १०४
४३९. मासेनावराः १०४
४४०. मित्रभुवः ३१८
४४१. मित्रभुवौ ३१८
४४२. मुक् ४४९
४४३. मुक्त्वम् ४४९
४४४. मुग्भ्याम् ४४९
४४५. मुट् ४४९
४४६. मुट्त्वम् २३०
४४७. मृदवे वस्त्राय २३०
४४८. मृदुने वस्त्राय २३०
४४९. यः ६६
४५०. यत्र ४०८
४५१. यवल्वः ३२१
४५२. यवल्वौ ३२१
४५३. यावकः ३३४
४५४. यासाम् ९४
४५५. युङ् २५६
४५६. युञ्जः २५६
४५७. युञ्जौ २५६
४५८. युवयोः ३८०
४५९. युवाभ्याम् ३६०,३८४
४६०. युवाम् ३६३
४६१. युष्मकाभिः ३३४
४६२. युष्मत् ६५,३७४
४६३. युष्मभ्यम् ३५७,३७५
४६४. युष्माकं कुलदेवता ३५१
४६५. युष्माकम् ३६५

४६६. युष्मान् ३६५
४६७. यूनः २९४
४६८. यूना २९४
४६९. यूनी २९४
४७०. यूयम् ३७०
४७१. योषिद्भ्याम् ४७९
४७२. रज्जुसृट् ४४२
४७३. रज्जुसृट्त्वम् ४४२
४७४. रज्जुसृड्भ्याम् ४४२
४७५. राः ३८६
४७६. राजत्वम् ४७०
४७७. राजनि ३१०
४७८. राजभिः ४६९,४७४
४७९. राजभ्याम् ४६९,४७४
४८०. राजसु ४६९,४७४
४८१. राजा २३६
४८२. राजानौ २३६
४८३. राज्ञः ३०९
४८४. राज्ञा ३०९
४८५. राज्ञि ३१०
४८६. राभ्याम् ३८६
४८७. लज्जते ४७९
४८८. लुवः ३१४
४८९. लुवौ ३१४
४९०. वत्सकः ३३४
४९१. वधूः १७६
४९२. वधूम् १३०
४९३. वध्वाः १२६
४९४. वध्वै ४६, १२६
४९५. वयम् ३७०
४९६. वस्त्रान्तरवसनान्तराः १०७
४९७. वाक् १३३,४४६,४८३
४९८. वाक्कल्पः ४४७
४९९. वाक्त्वम् ४४७
५००. वाग् ४८३
५०१. वाग्भ्याम् ४४७
५०२. वारिणी २२२
५०३. वारिणे २२२
५०४. विदुषः ५१,२७६,२९२
५०५. विदुषा २७६,२८२
५०६. विदुषी २७६,२९२
५०७. विद्वान् ४६४,४७४

| | |
|---|---|
| ५०८. विधप् | ४८३ |
| ५०९. विधब् | ४८३ |
| ५१०. विश्वकः | ३३४ |
| ५११. विश्वस्मात् | ८९ |
| ५१२. विश्वस्मिन् | ९० |
| ५१३. विश्वस्मै | ८८ |
| ५१४. विश्वे | ९७ |
| ५१५. विश्वेषाम् | ९४ |
| ५१६. वृत्रघ्नः | २६४ |
| ५१७. वृत्रघ्ना | २६४ |
| ५१८. वृत्रहा | २४५ |
| ५१९. वृक्षः | ४८५ |
| ५२०. वृक्षकः | ३३४ |
| ५२१. वृक्षम् | ६५ |
| ५२२. वृक्षयोः | ७२ |
| ५२३. वृक्षस्य | ७६ |
| ५२४. वृक्षाणाम् | ४०,५८,१७६ |
| ५२५. वृक्षात् | ७५, |
| ५२६. वृक्षान् | ६२ |
| ५२७. वृक्षाय | ५८,७९ |
| ५२८. वृक्षेण | ७८ |
| ५२९. वृक्षेभ्यः | ७२ |
| ५३०. वृक्षैः | ७० |
| ५३१. वैदुषम् | २९२ |
| ५३२. वैदुष्यम् | २७६ |
| ५३३. वैयाघ्रपद्यम् | ३०४ |
| ५३४. व्याघ्रपदः | ३०४ |
| ५३५. व्याघ्रपदा | ३०४ |
| ५३६. शब्दप्राट् | ४४२ |
| ५३७. शुनः | २९४ |
| ५३८. शुना | २९४ |
| ५३९. शुनी | २९४ |
| ५४०. श्रद्धा | ४७,११२ |
| ५४१. श्रद्धानाम् | १७६ |
| ५४२. श्रद्धायाः | १२१ |
| ५४३. श्रद्धायाम् | १२१ |
| ५४४. श्रद्धायै | १२१ |
| ५४५. श्रद्धे | ११९ |
| ५४६. श्रियाम् | १९७ |
| ५४७. श्रिये | २०१ |
| ५४८. श्रियै | २०१ |
| ५४९. श्रीणाम् | १९७ |

५५०. श्रेयांसौ २३८
५५१. श्रेयान् २३८
५५२. षट् १८४,४४१
५५३. षट्त्वम् ४४२
५५४. षट्सु ४८०
५५५. षड्भिः ४४२
५५६. षण्णाम् १८२
५५७. सः ६६,४०८,४१४
५५८. सकः ४१५
५५९. सक्थ्ना २२४
५६०. सखा २४९,४६९
५६१. सखायः २५०
५६२. सखायौ २५०
५६३. सख्या १८९
५६४. सख्युः १५३
५६५. सख्ये १८९
५६६. सख्यौ १५१
५६७. सजूः ४५८
५६८. सजूःषु ४५८
५६९. सजूर्भ्याम् ४५८
५७०. सजूस्ता ४५८
५७१. सप्तानाम् २३४
५७२. सर्पिर्भ्याम् ४७७
५७३. सर्वकः ३३९
५७४. सर्वस्मात् ८९
५७५. सर्वस्मिन् ९०
५७६. सर्वस्मै ८८
५७७. सर्वस्याः १२३
५७८. सर्वस्याम् १२३
५७९. सर्वस्यै ४०,१२३
५८०. सर्विका ३३९
५८१. सर्वे ९७
५८२. सर्वेषाम् ४०,९४
५८३. साधुतद् ४६७
५८४. साधुतद्त्वम् ४६८
५८५. साधुतद्भ्याम् ४६७
५८६. साधुमक् ४६७
५८७. साधुमक्त्वम् ४६७
५८८. साधुमग्भ्याम् ४६७
५८९. सामनी ३१०
५९०. सामानि २३६
५९१. साम्नी ३१०

५९२. सुकन्भ्याम् ४७५
५९३. सुकर्तॄणि २१८
५९४. सुचतुः ४८९
५९५. सुदण्डीनि २४४
५९६. सुद्यु ४८९
५९७. सुधिय : ३१६
५९८. सुधियौ ३१५
५९९. सुपथि ४८९
६००. सुपदः ३०४
६०१. सुपुम् ४८९
६०२. सुपूषाणि २४५
६०३. सुविट् ४४१
६०४. सुविट्वरः ४४१
६०५. सुविड्भ्याम् ४४१
६०६. सुवाक् ४८८
६०७. सुवाग् ४८८
६०८. सुविद्वत् ४३६,४८९
६०९. सुविद्वद्भ्याम् ४३६
६१०. सुवृत्रहाणि २४५
६११. सुसखि २०६
६१२. सुसखीनि २१८
६१३. सुस्रोताः २४२
६१४. स्त्रियः ३२४,३२५
६१५. स्त्रियम् ३२४
६१६. स्त्रियै १९५
६१७. स्त्रियौ ३२४
६१८. स्त्रीः ३२५
६१९. स्त्रीणाम् १९५
६२०. स्यः ४०८,४१४
६२१. स्यकः ४१४
६२२. स्वद्भ्याम् ४३३
६२३. स्वनडुत् ४३६
६२४. स्वनडुद्भ्याम् ४३६
६२५. स्वर्यमाणि २४५
६२६. स्वसारौ १६९
६२७. स्वाम्पि तडागानि २४०
६२८. स्रस्यते ५१
६२९. हे अक्क! ११७
६३०. हे अग्ने ! १४३,१७४
६३१. हे अनड्वन् ! २८५
६३२. हे अम्ब! ११६
६३३. हे ऋभुक्षाः ! २७०
६३४. हे कर्तः ! १७१

| | |
|---|---|
| ६३५. हे द्यौः ! | २५४ |
| ६३६. हे धेनो ! | १४३ |
| ६३७. हे नदि ! | १२८,१७४ |
| ६३८. हे पन्थाः ! | २७० |
| ६३९. हे प्रियचत्वः ! | २८५ |
| ६४०. हे भवन् ! | ३२८ |
| ६४१. हे भो ! | ३२८ |
| ६४२. हे मन्थाः ! | २७० |
| ६४३. हे माले ! | ११५,१७४ |
| ६४४. हे राजन् ! | ४७१ |
| ६४५. हे वधु ! | १२८,१७४ |
| ६४६. हे वृक्ष ! | १७४ |
| ६४७. हे श्रद्धे! | ११५,१७४ |
| ६४८. हे साम ! | ४७१ |
| ६४९. हे सामन् ! | ४७१ |
| ६५०. हे स्त्रि ! | १९४ |
| ६५१. हे स्वसः ! | १७१ |

# परिशिष्टम् – ३

## [श्लोकसूची]

### श्लोकवचनम्


| क्रमाङ्कः | | पृष्ठाङ्कः |
|---|---|---|
| १. | अज्ञाने कुत्सिते चैव संज्ञाया (दयाया)-मनुकम्पने ।<br>तद्युक्तनीतादप्यल्पे वाच्ये ह्रस्वे च कः स्मृतः ॥ | ३३१ |
| २. | अनडुत् – पुं – पयोलक्ष्मी - नावामेकत्ववाचिनाम् ।<br>नित्यं कः स्याद् बहुव्रीहौ वा स्याद् द्वित्वबहुत्वयोः ॥ | २०५ |
| ३. | अभ्यासात् प्रतिभाहेतुः सर्वः शब्दोऽपरैः स्मृतः ।<br>बालानां च तिरश्चां तद् यथार्थप्रतिपत्तिषु ॥ | ४ |
| ४. | आगमोऽनुपघातेन विकारश्चोपमर्दनात् ।<br>आदेशस्तु प्रसङ्गेन लोपः सर्वापकर्षणात् ॥ | ३६, ३७ |
| ५. | आमि दीर्घं सनौ चेत् स्यात् कृते दीर्घे न नुर्भवेत् ।<br>वचनाद् यत्र तन्नास्ति नोपधायाश्च वर्मणाम् ॥ | २३१, २३२ |
| ६. | इनन्तयोस्तु तद् वाच्यं यदुक्तं युष्मदस्मदोः ।<br>वर्जयित्वैत्वमात्वं च मान्तलोपो विभाषया ॥ | ३८३ |
| ७. | उदूटौ यत्र विद्येते यो वः प्रत्ययसन्धिजः ।<br>अन्तस्थां तां विजानीयात् तदन्यो वर्ग्य उच्यते ॥ | ४५४ |
| ८. | उपोष्य रजनीमेकाममावस्यां तिलोदकैः ।<br>पितरस्तर्पयामास विधिदृष्टेन कर्मणा ॥ | १६० |
| ९. | उवाच नैनं परमार्थतोऽयम् । | ४२१ |

१०. एकस्य बहूनां वा धातोर्लिङ्गस्य पदानां वा।
विभजन्त्यर्थं यस्माद् विभक्तयस्तेन ताः प्रोक्ताः॥ २७

११. एत्वं भिसि परत्वाच्चेदत ऐस् क्व भविष्यति।
भूतपूर्वात् कृतेऽप्येत्वे नित्यमैस्त्वं तथा सति॥ ६७, ६८

१२. एष बन्ध्यासुतो याति खपुष्पकृतशेखरः।
मृगतृष्णाम्भसि स्नात्वा शशशृङ्गधनुर्धरः॥ १७

१३. औकारोऽयं शीविधौ ङिद् गृहीतो ङिच्चास्माकं नास्ति कोऽयं प्रकारः।
सामान्यार्थस्तस्य चासञ्जनेऽस्मिन् ङित्कार्यं ते श्यां प्रसक्तं स दोषः॥ ११९

१४. कथं चाभ्यां विशेषाभ्यां वर्तते कर्मधारयः।
कृते चास्मिन् बहुव्रीहौ दिशा वेत्यपि सुस्थितम्॥ १०९

१५. कार्यिणा हन्यते कार्यी कार्यं कार्येण हन्यते।
निमित्तं तु निमित्तेन तच्छेषमनुवर्तते॥ १२२

१६. कियन्मात्रं जलं विप्र! जानुदघ्नं नराधिप!
तथापीयमवस्था ते नहि सर्वे भवादृशाः॥ ४०८

१७. कुण्डलोद्घृष्टगण्डानां कुमाराणां तपस्विनाम्।
निचकर्त शिरान् द्रौणिर्नालेभ्य इव पङ्कजान्॥ ३२

१८. कुत्सादिभिः समाप्त्यर्थं पदं सद्भिः प्रयुज्यते।
लोके जात्यादयः सर्वे यस्मात् कुत्सादिहेतवः॥ ३२९

१९. कुत्सितस्था तु या कुत्सा तदर्थः को विधीयते।
कुत्सितत्वेन कुत्स्यो वा न सम्यग् वाऽपि कुत्सितः।
स्वशब्दाभिहितः केन विशिष्टोऽर्थः प्रतीयते॥ ३२९

२०. गणे तदन्तस्य विधेरभावो बाह्वादिसूत्रे ह्युपबाहुपाठात्।
अतोऽत्र मन्येत कुतोऽत्र देश्यं द्वन्द्वादिके कार्यनिषेधवाचा॥ ८५

२१. गते मृते प्रव्रजिते क्लीबे च पतिते पतौ ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥ १५१

२२. ङित्त्वे विद्याद् वर्णनिर्देशमात्रं वर्णे यत् स्यात् तच्च विद्यात् तदादौ ।
वर्णश्चायं तेन ङित्त्वेऽप्यदोषो निर्देशोऽयं पूर्वसूत्रेण वा स्यात् ॥ ११९

२३. जातिक्रियागुणद्रव्यैः स्वभावाख्यानमीदृशम् ।
दण्डिनो मतमाश्रित्य दुर्गेणापीत्युदाहृतम् ॥ ११, २२

२४. जामातृसम्पत्तिमचिन्तयित्वा पित्रा तु दत्ता स्वमनोऽभिलाषात् ।
कुलद्वयं हन्ति मदेन नारी कूलद्वयं क्षुब्धजला नदीव ॥ ४५

२५. तथा परेषां युधि चेति पार्थिवः ॥ ८६

२६. तथा समुद्रादपरे परे नृपाः ॥ ८६

२७. त्रीणामिव समुद्राणां युगान्तेऽम्बुसमागमः ॥ १७६

२८. दक्षिणस्याश्च पूर्वस्या दिशोरथ उपर्यपि ।
उदीच्याश्च प्रतीच्याश्च मध्यमत्राप्यसौ भवेत् ॥ १०९

२९. दादेर्हस्य कृते घत्वे ढत्वे डत्वविधावपि ।
कार्ये आदिचतुर्थत्वे हकारग्रहणेन किम् ॥ ४५२

३०. धातुलिङ्गनिपातानां वर्णानामर्थदर्शनात् ।
तिलांशे च तिलौघे च न तैलं सैकते यतः ॥ ५

३१. धूमायन्त इवाश्लिष्यः प्रज्वलन्तीव संहताः ।
उल्मुकानीव मे स्वा हि ज्ञातयो भरतर्षभ ! ॥ ८३

३२. नक्तं भीरुरयं त्वमेव तदिमं राधे ! गृहं प्रापय ॥ ४२१

३३. नद्यश्च नार्यश्च सदृक्प्रभावास्तुल्यानि कूलानि कुलानि तासाम् ।
तोयैश्च दोषैश्च निपातयन्ति सद्यो हि कूलानि कुलानि नार्यः ॥ ४५

३४. नवं नवं परिक्षिप्य पुराणमवकर्षतः।
अतिजरस्य भिक्षुष्य कन्था वर्षशतं गता ॥ ७५

३५. नायं हेतुरिहैकान्तो गृहयन्त्रादिदर्शनात्।
अनर्थकावयवानां समुदायोऽर्थवानिति ॥ ५

३६. निवार्यतामालि! किमप्ययं वटुः पुनर्विवक्षुः स्फुरितोत्तराधरः।
न केवलं यो महतो विभाषते शृणोति तस्मादपि यः स पापभाक् ॥ ९१

३७. परतः केचिदिच्छन्ति केचिदिच्छन्ति पूर्वतः।
उभयोः केचिदिच्छन्ति केचिन्नेच्छन्ति चोभयोः ॥ २८६, २८७

३८. पर्यायाणां प्रयोगो हि यौगपद्येन नेष्यते।
पर्यायेणैव ते यस्माद् वदन्त्यर्थं न संहताः।
पर्यायत्वं ततः सर्वपर्यायाणां प्रतिष्ठितम् ॥ ८३

३९. पाणिनेर्न नदी गङ्गा यमुना वा नदी स्थली।
प्रभुः स्वातन्त्र्यमापन्नो यदिच्छति करोति तत् ॥ ४५

४०. पादस्त्वर्थसमाप्तिर्वा ज्ञेयो वृत्तस्य वा पुनः।
मात्रिकस्य चतुर्भागः पाद इत्यभिधीयते ॥ ३४१, ३५०

४१. पान्तु वो नरसिंहस्य नखलाङ्गलकोटराः।
हिरण्यकशिपोर्वक्षः क्षेत्रासृक्कर्दमारुणाः ॥ ३४९, ३५०

४२. पिता माता ननान्दा ना सव्येष्ट्रभ्रातृयातरः।
जामाता दुहिता देवा न तृप्रत्ययभागिनः ॥ १६७

४३. प्रयोगकाले शब्दानां लोपादेशागमादयः।
न सन्ति तत्स्वभावस्य सिद्धस्यैव प्रसिद्धितः ॥ ३७८

४४. बाधयित्वा त्यदाद्यत्वं सावौ चान्ते प्रवर्तते ॥ ४२६

४५. मातर्लक्ष्मि ! भजस्व माम् ॥ ४५

४६. यत्र यत्र वकारः स्यात् संयुक्तो दधषैः सह ।
अन्तस्थां तां विजानीयात् तदन्यो वर्ग्य उच्यते ॥ ४५४

४७. यस्मिन् दश सहस्राणि पुत्रे जाते गवां ददौ ।
ब्राह्मणेभ्यः प्रियाख्येभ्यः सोऽयमुञ्छेन जीवति ॥ ४३

४८. यूनी काममियं दुनोति हृदयं वैधव्यभावाद् वधूः ॥ २९३

४९. रुद्रो विश्वेश्वरो देवो युष्माकं कुलदेवता ।
स एव नाथो भगवान् अस्माकं पापनाशनः ॥ ३४९

५०. वरतनु ! सम्प्रवदन्ति कुक्कुट्यः ॥ १४३

५१. विदिक्ष्वर्थेषु पूर्वादिः समासोऽत्र विधीयते ।
विना वाक्यविशेषेण विशेष्यावीदृशौ कुतः ॥ १०९

५२. विभक्तिपक्षे प्रथमाद्वितीयाद्वारैव घुट्त्वं किल जस्शसोः स्यात् ।
यथैव घुट्त्वं नियमस्तथैष नाम्नेत्यसिद्धं स्फुटमेव जातम् ॥ ३०

५३. विभक्तिसंज्ञा विज्ञेया वक्ष्यन्तेऽतः परं तु ये ।
अद्व्यादेः सर्वनाम्नस्ते बहोश्चैव पराः स्मृताः ॥ ८७

५४. विमानना सुभ्रु ! कुतः पितुर्गृहे ॥ १९९

५५. विष्णौ च वेधाः स्त्री त्वाशीर्हिताशंसाहिदंष्ट्रयोः ॥ ४५६

५६. वृथा द्व्येषामपि मेदिनीभृताम् ॥ ८६

५७. व्युत्पादने पदानां तु तेषु लक्षणसाक्षिणः ।
व्यवहाराः प्रवर्तेरन् विकारेष्वप्यदः समम् ॥ ३७८

५८. शब्देनोच्चार्यमाणेन यद् वस्तु प्रतिपद्यते ।
तस्य शब्दस्य तद् वस्तु जायतामर्थसंज्ञया ॥ ६

५९. शब्दैरेभिः प्रतीयन्ते जातिद्रव्यगुणक्रियाः।
चातुर्विध्यादमीषां तु शब्द उक्तश्चतुर्विधः॥ २,१०

६०. शून्या जगाम भवनाभिमुखी कथञ्चित्॥ ३४

६१. श्रद्धाविकारे भवतीह नामी नदीविकारेऽपि स एव दृष्टः।
ह्रस्वे विकारे किल साहचर्याद् हे पन्थिशब्दस्य कुतो न लोपः॥ २६९

६२. श्रीविद्याभूषणाचार्यसुषेणेन विनिर्मितः।
आस्तां कलापचन्द्रोऽयं कालापानां मनोमुदे॥ ७

६३. श्लथीकृतप्रग्रहमर्वतां व्रज॥ ३९६

६४. संबन्धिभेदात् सत्तैव भिद्यमाना गवादिषु।
जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः॥ २

६५. संबोधनं न लोकेऽस्ति विधातव्ये च वस्तुनि॥ ३४

६६. संबोधनं तूशनसस्त्रिरूपं सान्तं तथा नान्तमथाप्यदन्तम्॥ २४६

६७. समस्येते यदैकत्वे बहुत्वे युष्मदस्मदी।
समासो वर्तते द्वित्वे न युवावौ तदा तयोः॥ ३५९

६८. सर्वतो जयमन्विच्छेत् पुत्रादेकात् पराजयम्॥ ८८

६९. सिद्धस्याभिमुखीभावमात्रं संबोधनं विदुः।
प्राप्ताभिमुख्यो ह्यर्थात्मा क्रियायां विनियुज्यते॥ ३४

७०. स्त्री नदी तदिदं सत्यं रसेनाकुलिता सती।
यतो ध्वंसं विधत्ते सा कूलवत् कुलयोरपि॥ ४५

७१. स्थिते जकारे विफलं जसीति जस्यानुबन्धत्वमतो न पूर्वम्।
एवं च पूर्वापरसूत्रदृष्ट्या घुडन्यधुट्त्वेव कुतोऽत्र देश्यम्॥ ५९

७२. स्वयमेकैकशः पुत्राः पतन्ति युद्धदुर्मदाः॥ १४

७३. स्वसा नप्ता च नेष्ट्या च त्वष्टा क्षत्ता तथैव च।
होता पोता प्रशास्ता च अष्टौ स्वस्रादयः स्मृताः॥ १६८

७४. स्वार्थो द्रव्यं च लिङ्गं च संख्या कर्मादिरेव च।
अमी पञ्चैव लिङ्गार्थास्त्रयः केषाञ्चिदग्रिमाः॥ ११

७५. हे लक्ष्मीः! स्या दरिद्राणां तन्त्रीः कर्णामृतं पिब॥ ४४

●

# परिशिष्टम् – ४

## [व्युत्पत्तिपरकशब्दाः]


| क्रमाङ्कः | व्युत्पन्नशब्दाः | पृष्ठाङ्कः |
|---|---|---|
| १. | अतिगुम् | २६७ |
| २. | अतिगून् | २६७ |
| ३. | अतिदध्ना | २२२ |
| ४. | अतियुष्मया | ३४७ |
| ५. | अतिसखेः | १८६ |
| ६. | अत्यदसौ | २८६ |
| ७. | अत्यस्थ्ना | २२२ |
| ८. | अत्यस्मया | ३४७ |
| ९. | अदःपुत्रः | ४२५ |
| १०. | अनडुह्यम् | ४३४ |
| ११. | अनुषङ्गः | १०,४९ |
| १२. | अनन्तस्थानुनासिकम् | ५१ |
| १३. | अन्तरीपः | ९५ |
| १४. | अन्त्यः | ३५ |
| १५. | अप्रजाः | २४१ |
| १६. | अप्सव्यम् | २३ |
| १७. | अब्भारः | ४३२ |
| १८. | अभिधेयसत्ता | १७ |
| १९. | अष्टादश | ३८७ |
| २०. | अष्टाविंशतिः | ३८७ |
| २१. | अर्थः | ७ |
| २२. | अर्थवत् | ८ |
| २३. | अल्पादिः | ९७ |
| २४. | अक्षरम् | ३१८,३१९ |
| २५. | अहन्तनुः | ४६१ |
| २६. | आकृतिः | २२६,२२७ |
| २७. | आख्यौ | ४३ |
| २८. | आगमः | ३५ |
| २९. | आदेशः | ४२० |
| ३०. | आभिमुख्यम् | ३३,३४९ |
| ३१. | आमन्त्रितम् | ३३ |
| ३२. | आमुष्यायणः | २३,२४ |
| ३३. | आशीः | ४५६ |
| ३४. | इः | १०६,३१८ |
| ३५. | इजादयः | ४३९ |
| ३६. | इयुवस्थानौ | १९५ |

३७. उपधा ४८
३८. उपविश्वम् ८८
३९. उपसंव्यानम् ८१,८३
४०. उपानत् ४३५
४१. उपान्त्यः ४८
४२. ऋत्विक् ४४०
४३. एकैकशः १४
४४. कीलालपः ३११
४५. क्रोष्ट्रिभक्तिः १६३
४६. गर्धप् ४४९
४७. गार्गीमातृकः १७०
४८. गोधुक् ४४३
४९. ग्रामणीः १८४,१८५
५०. चातुरिकः २७९
५१. चातुर्यम् २७९
५२. ज्ञानभुत् ४५०
५३. ज्ञानभुत्त्वम् ४५०
५४. तान्तवः ३३६
५५. तिरश्चः २९९
५६. तुण्डिप् ४५०
५७. तूष्णीकः ३२९
५८. तौम्बुरवम् २१९
५९. त्वदयति ३४६
६०. दधि २२३
६१. दह्नः ३०५
६२. दादेः ४४३
६३. दिव्यम् २५१
६४. द्युगतः २५१
६५. द्युत्वम् २५१
६६. द्युयज्ञः २५१
६७. द्विपादिकम् ३०१
६८. द्विशः १४
६९. द्वीपः ९५
७०. धानाभृट् ४३९
७१. धुट्स्वरम् २१६
७२. नदीसंज्ञकेकारान्तम् १३१
७३. नरपतिः १९०
७४. नरिका ३३७
७५. नोपधा २३७
७६. पतिः १९०
७७. पथिकः २७४
७८. पद्माक्षेण २२३
७९. परमधर्ब् ४५०
८०. परिभाषा ३५,३७

| | | | |
|---|---|---|---|
| ८१. परिव्राट् | ४३९ | १०३. भ्रूः | ३२१ |
| ८२ पुत्रकाम्या | ३३५ | १०४. मदयति | ३४६ |
| ८३. पुरुदंशा | २४५ | १०५. मधुलिट् | ४४० |
| ८४. पूर्वविधिः | ४७२ | १०६. मांसपिपक् | ४६६ |
| ८५. पूर्वाह्णेतनः | २३ | १०७. माघवनः | २९३ |
| ८६. पूर्वाह्णेतमाम् | २३ | १०८. मात्रिकम् | ३५० |
| ८७. पूर्वाह्णेतराम् | २३ | १०९. मालान्ती | २६० |
| ८८. पौंस्नम् | २७७ | ११०. मित्रध्रुक् | ४४८ |
| ८९. प्रतिपदम् | २० | १११. युङ् | २५५ |
| ९०. प्रत्यङ् | ४४६ | ११२. यौवतम् | २९३ |
| ९१. प्रत्ययः | ३३२,४३४ | ११३. रक्तविकारः | ३०७ |
| ९२. प्रसङ्गः | ६९ | ११४. राजन्वान् | ४६८ |
| ९३. प्रातिपदिकम् | २० | ११५. राजपथः | २६८ |
| ९४. प्रावरणीयम् | ८१ | ११६. रूपम् | १८ |
| ९५. प्रियचत्वाः | २८४ | ११७. लिङ्गम् | ६, २० |
| ९६. प्रियतिसा | ४०० | ११८. वासः | १०६ |
| ९७. प्रियतिस्रः | ४०० | ११९. विधिः | ३०५,३०६,४७२ |
| ९८. प्रियतिस्रौ | ४०० | १२०. विभक्तयः | २३ |
| ९९. प्रियसक्थेन | २२३ | १२१. वृन्दारिका | ३३६ |
| १००. बहुचर्मिका शाला | २३,३३६ | १२२. विरामः | ४३३ |
| १०१. भाषितपुंस्कः | २२६ | १२३. वृक्षावौ | ३१३ |
| १०२. भाषितपुंस्कम् | २२५,२२७ | १२४. वैदुषम् | २७६ |

१२५. शङ्खध्मः ३११
१२६. शौवः २९३
१२७. ष्णान्ता १८०
१२८. संख्या १८०
१२९. संयोगः ३०५
१३०. संव्यानम् ८३
१३१. सनुः २३१
१३२. सपूर्वः १४९
१३३. सम्राट् ४३९
१३४. सर्वनाम ७९, ८१
१३५. सर्वाः २४
१३६. सार्वनामिकम् १००
१३७. सुधीः ३१४
१३८. सुपथि ४८८
१३९. सुपथी २८८
१४०. सुप्रजाः २४१
१४१. सुवाक् ४८६, ४८७
१४२. सुविट् ४४०
१४३. सुसखि २०४
१४४. सुहिन् २३७
१४५. सोमपः २२७
१४६. स्त्र्याख्यौ ४३, ४४
१४७. स्थानम् ३७८
१४८. स्मृताः ३१२
१४९. स्मृते ३१२
१५०. स्वयम्भूः ३१३
१५१. स्वाभिधेयापेक्षः ८२
१५२. स्वाम्पि २३९
१५३. हशषछान्ताः ४३९
१५४. हे गार्गीमात ! १७०
१५५. हे प्रियचत्वः ! २८४

# परिशिष्टम् – ५

## (विशिष्टशब्दसूची)


| शब्दाः | पृष्ठाङ्काः |
|---|---|
| अकणिषम् | ५३ |
| अकृतवत् | ४४९ |
| अग्निः | ४० |
| अग्निकार्यम् | २४ |
| अग्निवत् | १५७ |
| अग्निष्टोमेन यजेत | ४ |
| अग्नी | ४१ |
| अचिनवम् | २३ |
| अज्ञाते | ३३४ |
| अतिजरस्य | ७५ |
| अतिदेशः | ३२१ |
| अतिदेशबलम् | ९,२०३ |
| अतिदेशबलात् | ४३३ |
| अतिदेशसामर्थ्यात् | ४८७ |
| अतिदेशाः | १५७ |
| अतिराभ्याम् | ३८ |
| अतिरिणा | ३८ |
| अतिरिणोः | ३८ |
| अतिसख्युः | १५२ |
| अदृष्टपरिकल्पना | १८ |
| अद्यतनी | १३,५४ |
| अधिकारार्थम् | २३ |
| अध्याहार्यम् | १८ |
| अनड्वाहीमालभेत | २८१ |
| अनन्तरप्रतिपत्त्यर्थम् | ४५० |
| अनन्वितानां स्वरूपम् | ३ |
| अनर्थकस्य ग्रहणम् | २४३ |
| अनर्थकानामप्रयोगात् | ७ |
| अनवस्था | १३ |
| अनित्यत्वसूचनार्थम् | ४७३ |
| अनित्यम् | १८०,२४६ |
| अनित्येयं परिभाषा | ५६ |
| अनुकम्पा | ३३०,३३४ |

अनुकरणनिर्देशः १८८
अनुकरणम् ५, ७, १४, १५, १५४
अनुकार्यम् ५, ७, १५
अनुकार्यानुकरणयोर्भेदस्याविवक्षितत्वात् ३८७, ४३२
अनुक्तसमुच्चयार्थः ४३७
अनुदात्तम् ३५१
अनुनासिकम् ५१
अनुप्रयोग : ८१
अनुबन्धः सुखप्रतिपत्त्यर्थ एव ७३
अनुबन्धाः ५८, १२०
अनुमानम् ८
अनुषङ्गः ९, १०, ४९, २६०, ४८९
अनुषङ्गलोपः २९०, २९६
अनुसन्धेयम् १८
अनेकवर्णविधिः ९६, २२४
अनेकाक्षरयोः ३१८
अन्तरङ्गम् ४२७, ४५२
अन्तरङ्गोऽयं विधिः ४२६
अन्तरायां पुरि वसति ८१
अन्तर्वर्तिनी विभक्तिः ५, ९८, १६६, २८६, २८९
अन्तर्व्यक्तिदृष्टिः ४२७
अन्त्यापहारी ३५५
अन्वयः ४
अन्वयबोधः ८
अन्वर्थता ५३
अन्वर्थबलम् १०, २४
अन्वर्थसंज्ञा ६
अन्वर्थसंज्ञाकरणम् ८२
अन्वाचयशिष्टः २०३
अन्वाचयशिष्टत्वम् २९८
अन्वाचयशिष्टत्वाशङ्का १४६
अन्वादेशः ३५०, ४२०
अन्वितानां जातिः ३
अपकर्षः ३७९
अपचितपरिमाणे ३३०
अपप्रयोगः १७, १९, २०७, ४२४
अपरकल्पना ११
अपराधः १७
अपवादविषयः १८

अपोहः ४
अप्रधानम् १७८
अप्रसिद्धमुपमेयम् १९९,२००
अभिधानतः १६४
अभिधानात् ३३३
अभिधेयता १४
अभिधेयत्वम् १६
अभिधेयम् १, ५, १०,१७,२२
अभिधेयसत्तासमाविष्टम् ६
अभिप्रायापरिज्ञानम् १९२,३६२
अभिमुखीकरणम् ३४
अभिव्याप्तिमत्त्वम् ९
अभूवन् १२
अभेदबुद्धिः १७
अभेदविवक्षा १५७, ३७३
अभेदस्तु साहजिकः १५
अम्बार्थाः ३४
अयं पन्थाः स्रुघ्नं गच्छति ४
अयमभिप्रायः ११६, ११८, १२३, २३१, २३२, ४१६, ४६३
अयमभिसन्धिः ३२७
अयमर्थः १५८,१७५,४७६
अयमाशयः ९,१२,१४,१५६,२३८
अर्थः १, ५
अर्थगतिः ५१
अर्थदर्शनम् ५
अर्थप्रतिपादकत्वम् १३
अर्थप्रतिपादनम् ४
अर्थप्रतीतिः १५
अर्थभेदप्रतिपत्तिः ४
अर्थवत्त्वम् ८
अर्थवद्ग्रहणम् ५, ७, १५, ३२,१२४,२२०
अर्थवन्तो वर्णाः ५
अर्थवल्लक्षणम् ८
अर्थवशाद् विभक्तिविपरिणामः ४०२
अर्थवान् ५
अर्थानुकरणम् १८८
अर्थानुसन्धानम् १५
अर्थान्तरापोहः ४

अर्थाभिधानम् १४
अर्थी ५
अर्धभाक् ५
अलुक्समासः १९०
अलुप्तवत् ३०५, ३०९, ४७१
अलुप्तवद्भावः ४६७
अलुप्तवद्वचनम् ४७६
अल्पशः ६१
अवच्छेदः ४
अवधारणार्थम् ३०१
अवधिः ८०
अवयवः १६
अवयवकृतो विरामः ७
अवयवविरतिः ५
अवयवशक्तिः ८
अवयवसिद्धेः समुदाय-
सिद्धिर्बलीयसी १३, १४
अविद्यमानवत् ३४९
अविस्पष्टार्थहेतुः ६
अव्ययगणः ३५३
अव्ययम् ३२८
अव्ययाश्चानेकार्थाः २४९
अव्ययीभावः ८८
अव्युत्पत्तिपक्षः १३१, १६८
अश्वतरः ३३१
अश्वयुक् १३
अश्वयुजमाचष्टे १३
अश्वयु १३
अष्टगवम् ३८७
अष्टपुत्रा नारी ३८६, ३८८
अष्टाकपालम् ३८७
अष्टागवम् ३८७
अष्टावक्रो नाम ऋषि ३८७
असिद्धं बहिरङ्ग-
मन्तरङ्गे १०, १३, ४७२
अस्मन्मतम् १७, १८, २०,
८४, ३१७, ३२६, ३८२, ४०७
अस्माकमयं पक्षः १९
अस्यायमभिप्रायः ११८
अस्यायमर्थः ८२, १०९
अस्यायमाशयः ४६, १६१, ३०७
अस्यार्थः २०, ३०२
अहन् १, ५
अक्षरसमाम्नायः ३१८

आकारप्रदर्शनार्थः १३
आख्यातप्रधानं वाक्यम् ३४०
आख्यातम् ७
आगमः ३५, १६३, १८०
आगमविधिः २३१,३७६,४३४
आगमशासनमनित्यम् १३
आचार्यः ६
आचार्यपारम्पर्यम् ११३,३६३, ४८२
आचार्याणामभिप्रायो लक्ष्यते ७४
आढ्यपूर्वः १०५
आदित्यं पश्यति १८
आदिव्यवस्थावचनम् २०९
आदेशः ३६,१२०,३१३
आद्यन्तवत् ५५
आधुनिकसंकेतः ११
अपाणिनीयम् १२९
अभ्यस्तम् २५६
आमन्त्रणम् ३३
आमन्त्रितम् ३३, १९४, ३४९
आशुविनाशित्वम् १९
इत्याशयः १५६
इमैर्गुणैः सप्तर्षयः स्वर्गं गताः ४२४
इष्टत्वादधिकारस्य १९१
इष्टसिद्ध्यर्थम् ८४
उच्चारणगौरवम् ३१६
उच्चारणार्थः १३, २५१, २९०, २९८, ३९२
उच्चारणसौकर्यार्थम् ९३
उञ्छः ४३
उणादयो बहुलं भवन्ति १६४
उत्तमसख्ये देहि ४१
उत्तरपूर्वायै १११
उत्तरार्थम् २३३,२५७,४७५,४७७
उत्सर्गः १८, ९०, ३४१, ३४२
उदङ् २९९
उदधिष्य ७४
उदीचिः २९९
उन्मत्तवचनम् १,५,७,१४,१५
उपकुम्भम् १३, ५९
उपचारः ३४, ४३, ८०, १०८, १८६, १९५, १९६, २२८, ३०५, ३०७, ३५१, ३७९
उपचाराश्रयणम् ११४

उपधा ४७, १८१, २३१
उपलक्षणम् १३
उपसद्भिश्चरित्वा
मासमेकं जुहुयात् १२२
उपस्थापकत्वम् ८
उपस्थितिहेतुबुद्धिजनकत्वम् ८
उपानद् ४९
उभयमेवैतत् शब्दार्थः २
उभयविवरणम् ३४७
उलूकः १७
उशना ६३
ऋभुक्ष्यम् २७२
ऋषिप्रयोगः ७५
ऋषिवचनम् ३२,१५०, १७६
एकं वाक्यम् ४
एकदेशविकृतम् ३८५
एकदेशविकृतमनन्यवत् २६०, २६४,
एकदेशविकृतस्यानन्यवद्-
भावात् ३९४,३९७, ४५३
एकवर्णविधिः ९६, २२४
एकवणदिशप्रस्तावः ४३२
एकवाक्यता ७८, १८७
एकैकशः १४
एते शब्दाः स्वभाव-
सिद्धा लोकतः ४८४
ओङ्कारः २७
औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धः २
औत्सर्गिकम् ३४२
औपदेशिकम् २४१
कटाक्षितम् २५
कर्ता १६५
कर्मधारयः १८३
कर्मादि ११
कलापः ४१०
कलापचन्द्रः ७
कल्याणीशब्दः २२८
काकुवादः १६५
कातन्त्रशब्दः ११७
काम्पिल्लादिः ३४
कारकम् ४
कारशब्दः ५४
कारितम् २८०, ४५१

कार्यसंप्रत्ययः २१९, २२०, २६४, ३५२, ३८१
कार्यातिदेशः १९१, ३२१, ४७१
कार्यित्वप्रतिपत्त्यर्थम् ४०२
कार्योपचारः ४०६
कार्षापणम् २
कालपाः ७
कीलालपाः ४६
कुण्डि १२
कुण्डे १२
कुतुः २५
कुतुपः २५
कुत्सा ३३०
कुत्सिते ३३४
कुदेश्यम् १५
कुमारी २३
कुलद्वयम् ४५
कूलद्वयम् ४५
कृताकृतप्रसङ्गित्वम् ९
केनार्थेनागतोऽसि १, ५
केषांचित् १९८
क्रिया २, ४, १०
क्रियातिपत्तिः ५४
क्रिया धात्वर्थः ३
क्रियायां कुण्डम् ११
क्रियार्थः ५
क्रिया साध्यमुच्यते १०
खट्वा २३
खरकुटी ४३
गङ्गा ४५
गङ्गायां घोषः ११४
गणकृतमनित्यम् २०८
गणसूत्रार्थः ८०
गभीरायां नद्यां घोषः प्रतिवसति ८६
गरीयसी २४६
गवां स्थानेऽश्वा बध्यन्ताम् ३७९
गुणः २, १०
गुणः सहजो धर्मः ३
गुणे कुमारी ११

गुरुकरणम् १०

गुरुकरणं वैचित्र्यार्थम् १२९

गुरुनिर्देशः १७

गुरुलाघवचिन्ता ९१, १११, १५५, १५६

गुरुसंज्ञाकरणम् १९

गूढपाद् भुजङ्गः ३०२

गृहयन्त्रादिदर्शनम् ५

गोमन्ति ९

गोयूथनामाधिकारः ४८४

गौणमुख्यव्यवहारः १७७

गौणयोगः ३५२

गौरवम् १४, १६०, १७८, ३३४

गौरवापत्तिः २३२

ग्रामो दग्धः ४३

घटकलशौ १६

घिसंज्ञा ४२

घुट् २८, १६१

घोषवत् ५७

ङ्यापोर्ग्रहणम् २८

चः समुच्चयं वक्ति १८

चकारोपादानम् ३६१

चतुरः ३९

चतुष्टयप्रकरणम् ७

चतुष्टयाः ९८

चतुष्टयी शब्दानां प्रवृत्तिः ३

चतुष्टये ९८

छन्दः ६८, १९५, ३८६

छन्दोऽनुरोधः ११

छलः १६

छान्दसप्रयोगः ८६

जगत्पर्यायाः ७९

जनव्यवहाराः २९

जम्बूद्वीपः ८०, ८३

जल्पः १६

जहत्स्वार्थवादिनः ९

जातिः २, ९, १०, १६, २२, २७९, ४०६

जातिपक्षः ६९

जातिरेव पदार्थः ८

जातौ वृक्षः ११

जामातृसम्पत्तिः [illegible]

जीवलोकः १७
झल् प्रत्याहारः ५३
टीकाकृत्सिद्धान्तः ९
टीकापङ्क्तिः ९
टीकाविरोधः १०
डित्त्थः १,
डित्त्थत्वं जातिः ३
ढक्का १४
तकारः सुखनिर्देशार्थ एव ४१७
तत्त्वज्ञानम् १६
तदन्तविधिः ८४,२३३,२४१
तद्गुणसंविज्ञानो
बहुव्रीहिः ९०,१८६,३२५
तन्त्रीः ४४
तन्त्रीयं वीणा १३०
तन्मतम् १६३
तपरकरणमसन्देहार्थम् ४२
तपरकरणम् १५४
तमादिनिपातनम् ८०
तर्कः १६
ताच्छील्यम् २२३, ३५९
ताच्छील्यार्थविवक्षा १६३
तात्पर्यार्थः १०९
तिरश्चिः २९८, २९९
तिर्यङ् २९८, २९९
तुष्यतु दुर्जनः २०५
तैलम् ५
त्यादिवर्जम् ६
त्रिकटुकमौषधम् ३७९
दधि ८
दर्भाणां स्थाने शरैरास्तरितव्यम् ३७९
दिक् १३,३३४,३३८
दिवाभुवौ ३१६
दिशः १०७
दीर्घः ५४
दूषणानुपपत्तिः ९
दृषत् २३
दृष्टपरिकल्पना १८
दृष्टान्तः १६
देवता २२८
देशान्तरसंचारलक्षणः ३८०
दोषः १७

द्रव्यं गुणाधिकरणम् ३
द्रव्यमेव शब्दार्थः २
द्रव्यम् २,१०,११,२२
द्रव्ये डित्थः ११
द्रौणिः ३२
द्वादश ३८७
द्वाविंशतिः ३८७
द्विविधैव शब्दानां प्रवृत्तिः ३
द्व्यङ्गविकलता २२८
धनत्वम् १६
धनम् १,५,२२
धर्मं दिदेश मोक्षाय ४२०
धर्मश्च धर्मिणमपेक्षते २०४
धर्मी १६
धातुः १,११०,१६२,१६३,४४९
धातुपादः १
धातुवद्भावः १९५
धातुस्वरूपम् १२
धुट् ३६,५१
नञा निर्दिष्टमनित्यम् ४७०
नदी ४२, १७१
नमः परमदेवतायै ५
नरजसनम् ५८
न हि निराधारा जातिरुपलभ्यते २
न ह्यरुणकिरणावली-
नामपराधः १७
नागृहीतविशेषा बुद्धि-
र्विशेष्ये चोपजायते ७
नाम २१
नामप्रकरणम् ४७२
नामी ७, २१८
नाम्नां समुच्चयो द्वन्द्वः ३४८
निग्रहस्थानम् १६
नित्यत्वमेव शब्दार्थस्य २
नित्यम् ३५, १८०
नित्ययोगः ७
नित्यशब्दार्थसंम्बन्धवादिनाम् ७
निपातः ४६१
निपातनम् ३०२
निपाताः ५
निमित्तम् २९०
निमित्तातिदेशः ३२१

निमित्तानुसन्धानम् ३९३
नियमप्रतिपत्तिर्गरीयसी ३१
नियमाय २३२
नियमार्थम् ११, ३२
निर्णयः १६
निर्देशक्रमः ७६
निर्धारणम् ८०
निवृत्तिः १, ५, १७, २२, ३७९
निःश्रेयसम् १६
निष्कारकम् १८
निष्क्रियम् १८
निष्पन्नम् ३५
नीतिश्चतुर्विधा ३३३
नीतौ ३३४
नीलमुत्पलम् १९८
नैमित्तिकम् २९०
नैयायिकानां मतम् १५
पञ्चक्रोष्टू रथः १६३
पटुम् ४०
पटू ४१
पटो दग्धः ४३
पताका २
पतीयति १५०
पत्ये १९०
पदकार्यपक्षे २८८
पदकार्यम् ७
पदविरामः १२
पदान्तप्रस्तावः ४५७
पदार्थः ८
पदार्थोपस्थितिः ८
पद्मानि ३५
पयांसि ३५
परनिमित्तादेशः ९५, २३५, ३३५
परः पाणिनिः २६
परपक्षन्यूनताप्रदर्शनार्थम् २५
परमतम् ११८, १६६
परमसख्या कृतम् ४१
परमार्थतस्तु ८६
परविधिः २३१, ३०६
परसूत्रम् ११, २०
परस्मैपदानि ३४८
पराग्रहणम् २४
पराणि ३४८

| | |
|---|---|
| परादिः | ३८ |
| परित्यागः | ६ |
| परिभाषावतारः | २८९ |
| परोक्षा | ५३ |
| परोक्षावत् | २९१ |
| पक्षान्तरोपन्यासः | १५९ |
| पाचकः | ७ |
| पाठाधिक्यम् | २१२, २१७ |
| पादः | ३५० |
| पादसमानार्थः पादप्य-स्तीति मतम् | ३०४ |
| पितरस्तर्पयामास | १५९ |
| पुम्भ्याम् | ९ |
| पुंस्कोकिलः | ४८४ |
| पूजा | २३९ |
| पूर्वसवर्णः | १५८ |
| पूर्वाचार्यः | २१ |
| पूर्वाचार्यप्रसिद्धा संज्ञा | १९ |
| पूर्वाचार्यसंज्ञा | ५० |
| पूर्वापरसूत्रदृष्टिः | ५९ |
| पूर्वाह्णेतराम् | २३ |
| पृथक्करणबलम् | १५१ |
| पृथग्योगः | २९८ |
| पृथग्योगो बालावबोधा | ७६ |
| पृथग्योगोऽयमुत्तरार्थः | २४८ |
| पृथग्वचनम् | १५७ |
| पौर्वापर्यम् | ४३३, ४३५ |
| पूर्वपरयोः परो विधि-र्बलवान् | ४१० |
| पूर्वपक्षः | १८, १९३ |
| पूर्वपक्षद्वयम् | १८८ |
| पूर्वविधिः | ३०५ |
| पौंस्नम् | २७७ |
| प्रकृतिः | ३१ |
| प्रकृतिप्रत्यययोरनुपघाती आगमः | ३७ |
| प्रकृतिवदनुकरणम् | १५, १८८ |
| प्रक्रियागौरवनिरासार्थम् | ३८९, ३९० |
| प्रक्रियागौरवम् | १११, १५५, १५६ |
| प्रक्रियालाघवम् | १६७ |
| प्रतिपत्तिः | २५५ |

प्रतिपत्तिगौरवं भवतीति संक्षेपः २६७
प्रतिपत्तिगौरव-
निरासार्थम् ३६, ९९, ४०५
प्रतिपत्तिगौरवम् ९५, १०८,
१११, २९०
प्रतिपत्तिरियं गरीयसी ४६,१०३,
१४६,१५५, ३२२, ३२३,४१५,४८६
प्रतिपदोक्तम् १७५, ४३९
प्रतिपदोक्तिर्गरीयसी १०९
प्रतिभा ४
प्रतिषेधः १६५
प्रतीतिः २०
प्रतीयमानम् २
प्रत्ययलोपलक्षणन्यायः ३५५
प्रत्ययलोपलक्षणम् ११४, २०३,
२४०, ३०६, ३५८, ४११, ४१५,
४३४, ४८६, ४८७
प्रत्ययविकारागमस्थः ४०
प्रत्यासत्तिः २२७
प्रत्युदाहरणम् ५२
प्रत्युदाहरणलाघवम् ३४४
प्रत्येकशक्तिकल्पनम् ३८०
प्रथमकक्षा १२
प्रदीपः ३५
प्रपाचकः ९
प्रमाणम् १४, १६, ३३३
प्रमेयम् १६
प्रयोजनम १, २, ५, १६, २२
प्रयोजनान्तरम् १५१
प्रयोजनाभिप्रायकः ४२९
प्रवृत्तिनिमित्तं जात्यादि २८
प्रवृत्तिनिमित्तत्वम् ३८५
प्रवृत्तिनिमित्तम् २२९
प्रवृत्तिनिमित्तस्वरूपः ११
प्रशंसा ४६८
प्रसङ्गः ३७८
प्रसिद्धमुपमानम् १९९, २००
प्रसिद्धम् ३५
प्रातिपदिकान्तम् ४६९

प्राप्ते विभाषेयम् ३१०
प्राप्यम् ६
प्रायोगिकः २४१
प्रायोवृत्तिता ५५
प्रियतिसृणा ३८
प्रियपञ्चूनाम् १८१
प्रियषषाम् १८१
प्लुतस्तु लोके प्रतिनियतविषयः ४२९
बन्ध्यासुतः ६
बलिरिन्द्रो भविष्यति १७
बहुक्रोष्टुना वनेन ३९
बहुधेनुः ४३
बहुपरिव्राजका नगरी ३३६
बहुमतिः ४३
बहुलाधिकारः ३३५
बाधकबाधनार्थः ४०२
बाध्यबाधकभावः ३९
बालाः २६३, ४२६
बालादिसुखबोधहेतुः ३७८
बालावबोधार्थः ७६
बुद्धिः ७
बुद्धिर्हि भगवती ४५०
बुद्धिशब्दौ २२६
बुद्धौ प्रतिभासः ४
बुध्याध्यासितसंबन्धः ७६
ब्राह्मणवत् क्षत्रियेऽपि
प्रवर्तितव्यम् ३२१
ब्राह्मणेभ्यो दधि दीयतां
तक्रं कौण्डिन्याय २०२
ब्राह्मणो न हन्तव्यः ४
भगवान् १५९
भवन्मतम् १२३
भविष्यन्ती १, ६
भारवहनाक्षमा ऋषयः ३३१
भारहारः ५४
भावः खलु जातिः २७९
भावसप्तमी १६६
भावसाधनम् ३६७
भाषा ६६, ६७
भाषाग्रहणं स्वरूपाख्यानमेव ९७
भाषायाम् २८१, ३२६, ३८६

भाषितपुंस्कम् २२५, २२७
भाषितपुंस्कोऽर्थः २२६
भिन्नयोगः सुखार्थ एव ४१२
भिन्नवाक्यता २३
भिन्नवाक्यपदात् ३४९
भिन्नविभक्तिनिर्देशात् ३६२
भिक्षुष्य ७४
भूतपूर्वगतिः ११४, २८४
भूतपूर्ववदुपचारः १२०
भेदः पुनर्विवक्षावशात् १५
भेदविवक्षा १५
भ्रकुंशः २१३
भ्रुव्नाम् १९५
भ्रूणघ्नी २४४
मञ्चाः क्रोशन्ति १८७
मण्डूकप्लुतिन्यायः १९८, ४२६, ४६५
मण्डूकप्लुत्या व्यवस्थितविभाषा ४०२
मण्डूकप्लुत्याश्रयणम् ४८२
मतान्तरमेतत् ३१६
मतान्तरम् ७७, १४२, १७२
मध्येऽपवादाः ३९१
मनः १४
मनोविज्ञानम् ३५०
मन्दधियां सुखप्रतिपत्त्यर्थम् २३, ३०१, ३६६, ३८६, ४६३
मन्दधीः ४८८
मरुदेशः १४४
मर्यादा ८०
मशकनिवृत्तिः १, ५, १७
मशकार्थो धूमः १, ५
महती संज्ञा २०, ३१
महानिति बुद्धिरुत्पद्यते ३
महाप्राणः ४३१
महाविरामः १२
मातुः स्मृतवान् १५१
मुख्ययोगः ३५२
यथासंख्यनिरासार्थम् ३४६
यथासंख्यम् १५२, ३४७, ३५८, ३६६
यमुना ४५
यवल्वम् ४१

यष्टीः प्रवेशय २२६
यावत्सम्भवस्तावद् विधिः १३,४२८
युक्तिः ७
युजमापन्ना ऋषयः २५५
युवतिः २९३
येन नाप्राप्तौ यो विधिः ४३३
योगरूढम् ३५
योगविभागः १५९
योगविभागादियमिष्टसिद्धिः ३२३
योग्यताभ्रमः ८
राजपुरुषः ६, ८, ९,
रामो वनमगच्छत् १७
राहोः शिरः ४५०
रूढिः २६
रूढितः ९१
रूढित्वात् ३१३
रूढिवशात् १६४
रूढ्याश्रयणात् सिद्धम् २४८
रूपप्रधानोऽयं निर्देशः २४८
रूपातिदेशः ३२१
लघुसंज्ञा ३१
लक्षणम् १७५
लक्षणा १४
लक्षणानि ३०८, ४५३
लक्ष्यानुसारित्वम् १६१
लाघवम् ७०,७७,१७८, २२५, ४७६
लाघवार्थम् ७१
लाक्षणिकपरिभाषा १२
लिङ्गग्रहणम् १५०
लिङ्गग्रहणेन लिङ्ग० ४२७
लिङ्गमन्वर्थमुच्यते ४
लिङ्गम् १,४,८,११,१५३
लिङ्गविशिष्टस्यापि ग्रहणात् ४१३
लिङ्गसंज्ञावसरः ९
लिङ्गार्थाः ११
लुग्लोपे न प्रत्ययकृतम् २०३
लोकः ६
लोकतः २२८, २३४
लोकतः सिद्धम् २१३, ३३१, ३४६
लोकप्रसिद्धम् ३४०
लोकलिङ्गानुशासनगम्यानि २०१

लोकलिङ्गानुशासनम् ३१
लोकव्यवहारः १८२
लोकव्यवहारसंपादनम् २०
लोके ३४
लोके गुरुवद् गुरुपुत्रेऽप्युपचारः ३७९
लोके रूढम् ४८४
लोकोपचारः ७९, ८१, ८२, ८४, १२२, १२६, १८०, २२७, २५१, २६१, २७२, २७४, २९६, ४१५
लोकोपचारात् संज्ञेयं रूढेति ४००
लोपः ३६, १२८, १५५, १७१
लोपविधिः ११४, १७३, २१९, ४३५
वत्करणं हि सादृश्यार्थम् १९६
वनम् ५
वनि १२
वने १२
वरमक्षराधिक्यं न तु भिन्नयोगः ४०५
वर्जनम् ७
वर्णकार्यम् ७
वर्णनिर्देशमात्रम् ११९
वर्णविधिः १२
वर्णसमाम्नायः ५४, ३१८
वर्णान्तस्य विधिः २८७, ४०२
वर्णोच्चारणम् १६
वर्तमाना ६
वस्तुतः १३, २६, ३४, ५९, ६१, ६४, ८५, ८६, १०४, १२२, १३२, १९४, २०५, २२१, २२९, २५७, ३०८, ३२७, ३४२, ३४४, ३५१, ३८३, ४०७, ४१४, ४२९, ४४०, ४६७, ४८२
वस्तुसत्ता १७
वाक्यं हि द्विविधम् १८
वाक्यभेदः २४९, ३४७
वाक्यम् ४, ७, १८, १०३, ३३८
वाक्यसंस्कारपक्षः ४
वाक्यार्थद्वयम् ४१७
वाक्यार्थव्यक्तिः १९
वाक्यावधारणम् ४६५
वाचकाभिनयः २१
वाच्यलिङ्गम् १०

वाच्यवाचकलक्षणसंबन्धः ८, २२८
वादः १६
वास्तुः २२९
विकरणः ७, ४७९
विकल्पार्थता ७१
विकारः ३६
विचित्रनिर्देशः खलु
बालबोधक एव ६०, ६२
विचित्रार्थमेव ५५
वितण्डा १६
विदिशः १०७
विदुषः ५०
विद्युत्वान् ३५
विधयः ३३६
विधिः १६५
विधिनियमसंभवे० ४४०
विधिमुखम् १८६
विधिरेव ज्यायान् ५७
विध्यङ्गशेषभूता ३५
विप्रतिषेधः ६९, १५२
विपर्ययनिर्देशः ७७

विपर्यासः २७
विभक्तयः २३
विभक्तिः १, ४, २१, २८
विभक्तिप्रत्ययः ५
विभक्तिवर्जनम् १३
विभक्तिविपरिणामः १००, १३९, १४९, १५५, १५७, ३६२, ४१९
विभक्तिसंज्ञा ४०७
विभक्तिस्वरः ३१२, ४०२
विभक्त्यधिकारः ३९३, ४१२
विमलधियः ३१४
विरामः ७, १९, ४३३, ४८८
विरामव्यञ्जनादिः ४१६
विरामो वर्णाभावः ४८३
विलक्षणनिर्देशोऽपि० २६३
विवक्षा १५, १७७, ३३३
विशिष्टं ज्ञानम् ३
विशेषणज्ञानम् ७
विशेषणम् ४, १८
विशेषणविशेष्यभावस्य० ९३, ४२८

विशेषणविशेष्य-
भावस्येष्ट० २०४, ३१९, ३५४
विशेषणविशेष्यभावौ ३४०
विशेषातिदिष्टम् ९२, १९३, ३११, ३५४
विशेषार्थप्रतिपत्तिः ११३, १४२, १९६, २५४, ३५८, ३६१, ४००
विशेष्यज्ञानम् ७
विषयता १४
विषयसप्तमी २२१, ३३५, ४७५
विसर्जनीयः ७२, ९८, २४२, ४८३
विस्पष्टार्थम् २९५, २९८
विहितविशेषणम् ४८७
वीणान्ती २६०
वीप्सा १४, ३०१
वृत् ७९, ९०
वृत्करणम् ८२, ९८, २०८
वृत्तिः ८, १४, १५
वृत्तिमात्रम् १००
वृत्तिव्याख्यानम् १५
वृत्रहन् ४
वृत्रहा ५
वृद्धिरागमः ३०४
वृक्षांश्चरति १२
वृक्षान् १, ७, १२
वृक्षेभिः १७
वेदाः प्रमाणम् २९
वैचित्र्यार्थम् १२८, २७१
वैषम्यसंबन्ध ३६१, ३६२
व्यक्तिः ९, २५
व्यक्तिपक्षः ६९
व्यक्तिप्रधानो निर्देशः ४०६
व्यक्तौ हि बहुवचनं भवति २७४
व्यतिक्रमः ११, ७५
व्यञ्जनम् ४८९
व्यञ्जनादेशप्रस्तावात् ४६३
व्यतिरेकः ४
व्यधिकरणबहुव्रीहिः १७
व्यपदेशः १९१, ३४०

व्यपदेशातिदेशः ३२१
व्यपदेशिवद्भावः २२२, ३१८
व्यवस्था ८०, ८२, ८३
व्यवस्थावचनः ३५२
व्यवस्थितविभाषा १९५, ३४९, ४२६, ४८६
व्याख्यानतो विशेषार्थ० ४८१
व्याख्यानम् ११३, ३४४
व्याप्तिः १७
व्याप्तिन्यायः १, १७
व्याप्त्यवधारणार्थः २३०
व्यावृत्तिः ८, ३४, १६५, ३५५, ३७५, ३८७
व्युत्पत्तिपक्षः १६८, २४५, २७८
व्युत्पन्नपक्षः १३१
शक्तिः ८, १४
शतशो देहि २१३
शपथः १७४
शब्दः ६
शब्द उक्तश्चतुर्विधः २, १०
शब्दच्छेदः ४८३
शब्दपदार्थः १८९
शब्दशक्तिस्वभावः २०, ३०२
शब्दस्वरूपप्रतिपादनम् १४
शब्दस्वरूपोपस्थितिः १४
शब्दानां नियोगः ३
शब्दा नित्याश्चेत् ३७८
शब्दानुकरणस्वरूपम् १५
शब्दानुकरणम् २५, १८८
शब्दार्थाश्चत्वारः १०
शब्दाश्रये गौणमुख्यव्यवहारः ३८८
शब्दो नित्यः १४
शरदं मातरं पश्य ४४
शशविषाणम् ८, १५, १७, ३६
शास्त्रम् १४
शास्त्रव्यवहारः ३०
शास्त्रातिदेशः ३२१
शास्त्रातिदेशपक्षः ९
शिलापुत्रस्य शरीरम् ४५०
शिवो मे श्रीयशोमुखः ३०८
शिष्टप्रयोगः ३२६
शुक्लः पटः २

शेषत्वम् १६१
श्रद्धा ३८, ४६, १७१, १७५
श्रद्धापुरुषः ४६
श्रिय्नाम् १९५
श्रुतहानिकल्पना ६१
श्रुतिसुखार्थ एव २९५, ४१३
श्रुतिसुखार्थम् ५७
श्रौतसम्बन्धो विधिः ३५८
श्लोकः १७
संख्या ४, ११
संज्ञाकरणम् २०
संज्ञा नित्या अन्वाख्यातंव्याः ४८
संज्ञापूर्वको विधिरनित्यः ४६५
संज्ञायाम् ३३४
संज्ञाशब्दाः १६८
संज्ञाशब्दा लोकोपचारात्
सिद्धाः ३८९
संनियोगशिष्टानि ६०
संबन्धः २, ३०, ३४०
संबन्धस्य प्रयोक्तुरायत्तत्वात् १४६
संबन्धाधिकारनिवृत्त्यर्थम् ४००, ४०३
संबन्धो वाच्यवाचकलक्षणः ३०
संबुद्धिः ३३, ११३,
१२६, २८२, ३२५,
संबोधनम् ३४
संयोगान्तम् ४६२
संयोगान्तलोपः ४७४
संव्यवहारः २०
संशयः १६
संसङ्गः ७
संहिता ३२४
संक्षेपः ९, १५, १९,
३०, ३३, ३९, ८४, १८९, २२१, २६७,
३९१, ४१२, ४४०
सकलवैयाकरणपरः ११७
सकृत् कृते कृतः शास्त्रार्थः ४२९
सकृद् गतो विप्रतिषेधः २१९
सकृद् बाधितो विधिः ३७६, ४८७
सकृल्लक्ष्ये लक्षणस्य
चरितार्थता ४०६
सखीन् २४
सखीयति १५०

सङ्गतिः ७
सत्ता नित्या ३
सत्तामात्रत्वादात्मनः ३
सत्तासमाविष्टमभिधेयम् ६
सत्तैव धात्वर्थः ३
सत्तैव शब्दार्थः २
सन्धिः १९, ७७
सन्धिप्रकरणम् ७
सन्धिलक्षणम् ४७२, ४७३
सन्ध्यक्षराणि २४३
सन्निपातलक्षणपरिभाषा ६७, ७४
सन्निपातलक्षणविधिः ३८, ५६, १७१, १८०, २०७, ३५५, ३९९, ४०६, ४२३
सप्तमी द्विधा भिद्यते १४
सबलैताश्च कर्बुरे ४२१
समवायलक्षणसंबन्धः २२७
समानः ६०, ३५७
समानाधिकरणबहुव्रीहिः १७
समानाधिकरणा ४५०
समासान्तः २०५, २३९, ३००, ३०२, ३०३, ४३२
समाहारः ३९०
समीपलक्षणा षष्ठी १६३
समुच्चयः ११०, १६१
समुच्चयार्थः ३९८
समुदायः ५, ३४०
समुदायवृत्ताः शब्दा अवयवेऽपि २६०
समुदायसिद्धिः १३
समुदाये शक्तिरस्त्येव ९
सम्प्रदायः १६०, १६६
सम्प्रसारणम् २९४
सर्वनाम ३२८
सर्वनामस्थानम् ३१, १५६, १६२, १६७
सर्वस्यै ३८
सर्वादेशविधिः ३७२, ३७६
सर्वार्थाभिधानशक्तियुक्तः शब्दः २०
सर्वापहारी लोपः ३५५
सविकल्पान्यपि ज्ञापकानि ३०५
साधनम् ४
साधुत्वम् १४

साध्यम् ४
सानुषङ्गनिर्देशः २९६
सामदानभेददण्डलक्षणा नीतिः ३३०
सामर्थ्यस्य तनुत्वे ऋषभतरः ३३१
सामान्यम् २, ३४९
साम्प्रदायिकाः १७०
सार्वनामिककार्यम् १०२
सावकाशत्वम् ९
साहचर्यम् २, २१३, ३६२
साहचर्याशङ्का ३६२
साहित्यशङ्का १८
साक्षात्प्रतिपत्त्यर्थम् ३८१, ३८२
सिद्धशास्त्रानुसारम् १९४
सिद्धान्तः १३, १६, १०२, १२७, १९३, ३१५, ३२७, ३८३, ३९०, ३९१, ४४४
सीतायाः पतये नमः १९०
सुकर्तृणि ५२
सुखनिर्देशाय २११, ४८६
सुखपरिहारः ३२
सुखप्रतिपत्तिकृतप्रतिज्ञोऽयम् १५९
सुखप्रतिपत्त्यर्थम् २३, ३८, ५८, ७३, ७६, ७८, ११६, १२९, १४९, १५४, १७२, १८३, २११, २३३, ३०५, ३६७, ३८१, ३८४, ४१८, ४६५, ४६८, ४८४
सुखार्थं व्यञ्जनग्रहणम् ५३
सुखार्थमुक्तम् ४८६, ४८७
सुखार्थमेव १२९, २९०, ३०३, ३४६, ३५३, ४३४
सुखार्थमेव समासान्तग्रहणम् ३०३
सुखार्थम् १५, १९, २६, ५९, ७१, १०१, ११६, १२९, २७७, ३८२, ४०२, ४०५, ४०६
सुधीः ३१४
सुधीभिः ११०
सुपन्थानि वनानि २७०
सुमेरुः ८०, ८३
सुषेणः ७
सुसखीनि ५२
सुसख्युः १५२
सूचीकटाहन्यायः ७
सूत्रफलम् २५७
सूत्राङ्गत्वम् १८

सूत्रार्थविवरणम् ३४७
सूपकारः ७
सेनान्यम् ४१
सैकतः ५
सोमपाः स्त्री ४६
सौत्रनाडिः ८५
सौत्रो धातुः १५४
स्त्रीपुंनपुंसकानि लोक० ३१, २०१
स्थानी ३८०
स्पष्टार्थम् १२४, ३८१
स्मरणम् ३५०
स्मृतयः प्रमाणम् २९
स्वभावपरिपाकवशात् ४५०
स्वभावाख्यानम् ११
स्वमतम् १४३, १६०
स्वरः ७, ३१२, ३१९
स्वरग्रहणं सुखप्रतिपत्त्यर्थम् १३५
स्वरादेशः २९, ११४, ३०६, ३२६, ३५४
स्वरूपम् ३,
स्वर्भुवौ ३१६
स्वलिङ्गपरित्यागः ३०७
स्वस्रादिः १६७
स्वाङ्गम् २२३
स्वायम्भुवम् ३१२
स्वार्थः ३, ४, ११
स्वार्थस्तु शब्दानां प्रवृत्तिं प्र० ३
स्वाश्रयानुवृत्तिः १४४
हस्तचेष्टा ४२
हस्त्यादयः ३०२
हिमवन्तं शृणोति १८
हे अनड्वन् ! २८३
हे अम्बाडे ! ११५,
हे अम्बाले! ११५
हे अम्बिके! ११५
हेतुः ५
हेत्वाभासः १६
हे भवन्! ३२५
हे वात्सीमात ! १७०
ह्यस्तनी ५४
ह्रस्वः १७१
ह्रस्वग्रहणम् ११६
ह्रस्वमपि गृहं ह्रस्वम् १२६, १२७
क्षमाभुवौ ३१६
क्षितिभुवौ ३१६
क्षेपः ३३०

●

# परिशिष्टम् – ६

## [उद्धृता ग्रन्थाः]


| ग्रन्थाः | पृष्ठाङ्काः |
|---|---|
| अग्निपुराणम् | २१, २७ |
| अथर्ववेदप्रातिशाख्यम् | २१, ४९ |
| अभिधानकाण्डम् | १७ |
| अमरकोशः | २११ |
| ऋक्तन्त्रम् | २७ |
| ऋक्प्रातिशाख्यम् | ४९ |
| कलापचन्द्रः | १८३ |
| कातन्त्रप्रदीपः | ६५ |
| कातन्त्रवृत्तिटीका | १८५ |
| कामधेनुटीका (अमरकोशस्य) | ३४४ |
| काशकृत्स्नधातुव्याख्यानम् | २१, ५० |
| काशिकावृत्तिः | ११९, २२९ |
| कुमारसंभवम् | ३४ |
| कोशः | ८७ |
| गोपथब्राह्मणम् | २१, २७ |
| चान्द्रव्याकरणम् | ४२१ |
| चान्द्रसूत्रम् | ४३० |
| जैनेन्द्रव्याकरणम् | २१, २७, ४९ |
| टीका | ९, १०, १८, ४७, ६४, ६९, ८६, ११०, १७०, १८८, १९४, २४१, ३०३, ३८८, ३९१, ४१३, ४१४, ४२१, ४३५, ४३७, ४५१, ४६१, ४६६ |
| तन्त्रान्तरम् | २४१ |
| त्रिलोचनविवरणम् | ४२१ |
| दौर्गसिंही वृत्तिः | १८४ |
| धातुपादः | १८३ |
| नाट्यशास्त्रम् | २१, २७ |
| नारदपुराणम् | २१, २७ |
| निरुक्तम् | २७, ४९ |
| न्यासः | ५० |
| पञ्जिका | १६, ५७, १२३, १४८, १९३, २०५, २६७, ३०३, ३२७ |

पञ्जी ३७, ६४, ७४, १०६, ११७, १६५, १९४, २०७, २९७, ३०७, ३४८, ३५३, ३६२, ३७७, ३९०, ४०७, ४१६, ४३१, ४५२

पञ्जीप्रदीपः ३६०

परिभाषावृत्तिः ४२६

पाणिनिसूत्रम् १६५

बालमनोरमा २८

बृहद्देवता २१, २७

भारतम् १४

भाष्यम् २८, १८६, ३८३

महाभाष्यप्रदीपः २०

मुग्धबोधव्याकरणम् २१, २७, ४९

वाजसनेयिप्रातिशाख्यम् २१, ४९

वामनसूत्रम् ५७

वृत्तिः १४, २५, ३०, ३४, ३९, ४१, ४२, ४७, ५०, ५९, ६४, ७७, ९३, १०१, १०५, १०६, १२२, १३२, १३३, १३५, १३८, १६१, १६२, १६५, १९२, २२०, २३५, २३८, २४१, २४६, २६५, २९३, ३३०, ३५१, ३७५, ३७७, ४२१, ४२९, ४३५, ४५१, ४६६

शब्दरत्नम् २८

शब्दशक्तिप्रकाशिका २०, २७

शाकटायनव्याकरणम् २७

श्रीपतिसूत्रम् ६४, ३२०

हैमव्याकरणम् २७

# परिशिष्टम् – ७

## [उद्धृतानि आचार्यनामानि]


| आचार्याः | पृष्ठाङ्कः |
|---|---|
| हैमशब्दानुशासनम् | २१ |
| अजहत्स्वार्थवादिनः | ८ |
| अनित्यवादिनः | ३१८ |
| अन्यः | २, ३, ४, ३३, १४२, १५७, १८८, १९६, २१५, ३११, ३२६, ३७९, ३८९, ३९९, ४८६ |
| अन्ये | ५, ७, १३, १९, ४८, ७८, ८०, ८६, ८७, ८८, ९९, १२७, १४३, १५१, १६३, १७२, २९३, ३०३, ३०८, ३२०, ३८०, ३९४, ३९८, ४२१, ४२९, ४५२ |
| अपरः | २, ४, १७२, १९६, २०३, ३५५, ४३४ |
| अपरे | ८८, २३२, ३३८, ३५०, ४२९, ४५३, ४८२ |
| अमरः | २११ |
| अयम् | २८१ |
| अर्वाचीन आचार्य | २१, ४९ |
| अस्माभिः | १९६, ४७० |
| आदेशवादिनः | १६३ |
| आधुनिकाः | १०६ |
| आपिशलिः | ३४१ |
| आपिशलीयाः | ३६, ३५०, ४१४ |
| उमापतिः | १७, २५, ५९, १०१, १०९, ४५२ |
| एके | ५२, १४२, १४३, १४९, १७२, १८०, १८३, १९५, ३३७, ३८१ |
| कश्चित् | २, २४, ३४, ६२, ९३, ९८, १११, १३४, १७३, १८८, २०२, ३४२, ३४८, ३५५, |
| कातन्त्रैकदेशीयाः | ११७ |
| काशिकाकारः | २३९ |
| कुलचन्द्रः | ७, १२, ५९, ६५, ७८, ८६, ९१, १०४, १०६, १३२, १६५, १७०, १७३, १७७, १८१, २०४, २०५, २१७, २२१, २२९, २५७, २६५, २६९, २९३, ३०३, ३२७, ३६२, ३९१, ३९४, ४१३, ४२६, ४३३, ४५७ |

कुलचन्द्रप्रभृतयः १३८
केचित् १३, १८, १९, २५, ३४, ४४, ५०, ६६, ६७, ६९, ८४, ८६, १०३, ११६, ११७, १५६, १६२, १९८, १९९, २००, २०५, २१७, २२८, २३२, २३९, २४५, २६०, २६८, २८१, २९३, ३१२, ३३८, ३५१, ३८०, ३८४, ३८८, ३९२, ४१२, ४२३, ४२४, ४४०, ४४३, ४६९, ४७०, ४८२
केनचित् ९५, २०७, ३८२, ४२९
कैयटः २०
कैश्चित् ८४, ९५, १३०, ३६१
गालवः २२९
गुरवः ५६, १९४
गोपीनाथः १२,
चूर्णिकारः १५२
जरद्गवः ४५२
जिनेन्द्रबुद्धिः ८२
जैमिनीयाः १२३
टीकाकारः १७३, ४५१
टीकाकृत् ९, ६५, ९८, १६०, १७४, ४५६
त्रिलोचनः १५
दण्डी ११, २२
दुर्गः ११, १०९, १४९, १५६, ४५७
दुर्गसिंहः २२
नवीनाः १६२
नव्याः ८७
नित्यवादिनः ३१८
नैयायिकाः ८, १५, ३४०
न्यासकारः ३१
पञ्चीकृत् २५
पञ्जिकाकृत् १७
पञ्जीकारः १७०
पञ्जीकृत् १७४, २३२, ४५३, ४७०
पतञ्जलिः २८
पदकारः ३११
परः १६३
परैः ३१७
पाणिनिः १७, २०५, २४१
पुरुषोत्तमचक्रवर्ती ७१
पूर्वाचार्यः २६, ३१, ४९, ५०, ११३, १५८, ३१८, ४३४

प्रभाकराः १४
प्राञ्चः ३०, १०५, १६२, २३२
भगवान् १२५
भट्टेन २८८
भाष्यकारः ७३, ७४, २६५, ३९६
भाष्यकृत् ३५४, ३८९
महान्तः २५, ५०, ५९
९६, ११०, १३२, १७३, १९४, २००,
२२९, २५७, २६५, ३०३, ४१४
महाभाष्यकारः २८
मीमांसकाः ९
मूर्खाः १३
मेदिनीकारः ११०
यः २०९, ३८९
ये ७३, ११८, २१३, ४७२
यैः ८०, ८१
रक्षितः ८८
वयम् ६८, १०१
वररुचिः २५, ११७, १२९,
१३३, १४३, १६०, १६५, ३२०, ४४६
वाक्यकारः ४०२
वार्त्तिककारः २१६
वाल्मीकिः ३४४
विद्यानन्दः ३५१
वृत्तिकारः १५
वृत्तिकृत् १४, १०४
वृद्धाः ६८, ६९
वृद्धैः ३३३
वैद्यः २६९
वैयाकरणाः १९
वोपदेवः ४६
व्याघ्रभूतिः ६७, ६८, २३२, २४६
व्युत्पत्तिवादी ४३
शब्दशक्तिप्रकाशिकाकारः २०
शरणदेवः ८६, १०६, ४४६,
शर्ववर्मा ७७, १६४, १६५, ३९६
श्रीपतिः ६४, ८६, १६०,
२०५, २४१, ३१२, ३८३, ३९४,
४०७, ४२१, ४५६, ४५७, ४६०
सागरः २३२

साम्प्रदायिकाः १९३, २००, ३६०

सुभूतिः ४४

सुषेणविद्याभूषणः २२, १२९

सुषेणाचार्यः १८२

सूत्रकारः ३२६, ४३२

सूत्रकृत् ३२९

हेमः ३९८

हेमकरः १२, १५, १९, २२, ४४, ५०, ५९, ६१, ६३, ६९, ११४, १३७, १५८, १६६, १७३, १७४, २१७, २३३, २३७, २६९, २८४, ३०७, ३०८, ३१५, ३२६, ३५१, ३८२, ३८३, ३९४, ४०५, ४३०, ४४४, ४४६, ४५३, ४५७, ४६६, ४७३


●

# परिशिष्टम् – ८

## [साङ्केतिकशब्दपरिचयः]

| सङ्केतः | पूर्णरूपम् | पृष्ठाङ्कः |
| --- | --- | --- |
| अ० | अष्टाध्यायी | ११, १७, ६०, १४५, १५३, १७१, २४३, ३०२, ३५७, ३९६, ४६९ |
| अ० को० | अमरकोशः | २५, ८७ |
| उ० | उणादिः | १६४ |
| कलाप०, क० व्या० | कलापव्याकरणम् | ५५, ७०, ७२, २१९, २२०, २३५, २५० |
| कात० | कातन्त्रव्याकरणम् | २८, ८७ |
| कात० प० | कातन्त्रपरिभाषा | १३, ३२, ६०, ६६, १३९, १५०, १७३, १८५, १९२, २४८ |
| कात० प० पा० | कातन्त्रपरिभाषापाठः | ६०, १४२, ३२५ |
| का० परि० | कातन्त्रपरिभाषा | २७१, २७५, २८७, २९७, ३०३, ३४१, ३५५, ३९२, ३९९, ४१३, ४१६, ४२८, ४७० |
| कात० परि० ण० | कातन्त्रपरिशिष्टम्-णत्वप्रकरणम् | १८४, १८५ |
| कात० परि० सं० | कातन्त्रपरिशिष्टम्-सन्धिप्रकरणम् | २०९ |
| कात० वृ० टी० | कातन्त्रवृत्तिटीका | ४१२ |

| | | |
|---|---|---|
| कात० वृ० न्या० | कातन्त्रवृत्तिन्यासः | ८२ |
| कात० शि० सू० | कातन्त्रशिक्षासूत्रम् | ४७८, ४८० |
| का० परि० | कातन्त्रपरिशिष्टम् | ३७२ |
| कालाप०<br>काला० प० | कालापपरिभाषा | १३, २९० |
| कालापप० पा० | कालापपरिभाषापाठः | २४६ |
| कु० सं० | कुमारसंभवम् | ३४ |
| क्रम० | क्रमसंख्या | २१९, २२०, २३५, २५० |
| गौ० न्या० सू० | गौतमन्यायसूत्रम् | १६ |
| चा० प० पा० | चान्द्रपरिभाषापाठः | २६५ |
| जै० परि० वृ० | जैनेन्द्रपरिभाषावृत्तिः | १०० |
| दु० टी० | दुर्गटीका | १ |
| दु० वृ० | दुर्गवृत्तिः | १ |
| द्र० | द्रष्टव्यम् | ५५ |
| न्या० सू० | न्यायसूत्रम् | १६ |
| प० त० | पञ्चतन्त्रम् | ४५ |
| पुरु० प० पा० | पुरुषोत्तमपरिभाषापाठः | ३२९ |
| पृ० सं० | पृष्ठसंख्या | ५५, ७०, ७२ |
| भोजपरि० | भोजपरिभाषा | ७३ |
| भोज० प० सू० | भोजदेवीयपरिभाषासूत्रम् | ९५ |
| म० भा० दी० | महाभाष्यदीपिका | ५० |
| मी० द० | मीमांसादर्शनम् | २ |

| | | |
|---|---|---|
| वा० प० | वाक्यपदीयम् | २, ३४ |
| वृत्तित्रय०<br>वृ० त्र० वा० | वृत्तित्रयवार्त्तिकम् | ४५ |
| व्या० प० | व्याडिपरिभाषा | १४, ३२ |
| व्या० प० पा० | व्याडिपरिभाषापाठः | ८४, २०४, २४३, ३९१ |
| व्या० परि० | व्याडिपरिभाषावृत्तिः | १३, २०, १२२, १४६, ४३२ |
| व्या० प० | व्याडिपरिभाषावृत्तिः | ६१,१८९,२१३ |
| सं० | संख्या | ५५, ७२ |
| सीर० प० | सीरदेवपरिभाषावृत्तिः | १११ |
| सू० | सूत्रम् | २१, ७३ |

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

श्रुतम् मे गोपाय

श्रीजी कम्प्यूटर प्रिण्टर्स, वाराणसी